होऽपि कृतः । ततः सप्तमे-परिभाषाऽऽदिप्रकरणे १ मानपरिभाषा २ भेषजविधान ३ धात्वादिशोधनमारणविधि ४ स्नेहपानविधि५ पञ्चक- विधि, ६ धूमपानादिविधि, ७ रोगिपरीक्षानामकानि सप्त प्रकरणानि न्ति । किं च षड्भिः प्रकरणैः पूर्वो भागस्तथाऽन्तिमेन सप्तमेन प्र- रणेन द्वितीयो भागः स्वीकृतोऽस्य सम्पादकैर्लेखकैश्च ।

अपि चात्र पुष्पाकार(*)चिह्नसमन्विता ग्रन्थस्यांशाष्टीकारूपेण द्धव्यास्तद्भिन्ना मूलरूपेणेति विज्ञप्तिरस्माकम् ।

किं च बहुषु स्थलेष्वध्येतॄणां विशेषतः परीक्षाऽर्थिनां विद्याऽर्थिनां ते नवीनमवतरणमवतारितमित्यपि न विस्मर्त्तव्यम् ।

अयं ग्रन्थो यद्यप्यन्यत्र प्रकाशितचरस्तथाऽपि बहुमूल्यलभ्यतया तीव सुलभ आसीत् सर्वेषामिति लघ्वाकारेणास्य मुद्रणं "विद्यावि- ास" मुद्रणयन्त्रालये तदध्यक्षेण श्रेष्ठिवरश्रीजयकृष्णदासगुप्तमहोद- न स्वकीयद्रव्यव्ययेन कारितम्, तेनैव चाभ्यर्थितेन मयाऽस्य यथा ति सम्पादनमपि कृतम् ।

यदि चात्र सीसकाक्षरसंयोजकस्य सम्पादकस्य मम च प्रमा- दात् क चिदपि का चिदपि त्रुटिः स्याद् दृष्टिदोषोद्भवा किं वाऽज्ञान- विलाससम्भवा सा स्वकीयेव क्षन्तव्या क्षान्तिनिधिभिः सुमतिभिस्तत्र भवद्भिरायुर्वेदं विद्वद्भिरिति सविनयमनुनयो—

श्रीराधारमणमन्दिरे (बुलानाला) काश्याम् ज्यैष्ठामायां सं० १९९२ वै०	विदुषामेकान्तविनेयस्य साहित्यशास्त्रिणो- ब्रह्मशङ्करमिश्रस्य

प्राप्तिस्थानम्—

चौखम्बा संस्कृत पुस्तकालय

बनारस सिटी ।

॥ श्रीः ॥

भावप्रकाशस्य पूर्वखण्डे—

विषयानुक्रमणिका ।

विषयाः	पृ. सं.
मङ्गलाचरणम्	१
कवेरुक्तिः	,,
आयुर्वेदस्य लक्षणम्	,,
आयुर्वेदस्य निरुक्तिः	,,
आयुर्वेदस्योत्पत्तिक्रम-स्तत्रादौ ब्रह्मणः प्रादुर्भाव	,,
दक्षात् प्रादुर्भावः	,,
अश्विनीसुताभ्यां प्रादुर्भावः	२
इन्द्रात्प्रादुर्भावः	,,
आत्रेयात् प्रादुर्भावः	,,
भरद्वाजात् प्रादुर्भावः	४
चरकात् प्रादुर्भावः	५
धन्वन्तरेः प्रादुर्भावः	६
सुश्रुतात् प्रादुर्भावः	७
अथ द्वितीयं सृष्टिप्रकरणम् ।	
ग्रन्थारम्भः	८
सृष्टिक्रमः	,,
प्रकृतेः स्वरूपम्	,,
[प्रकृ]तेः स्वरूपविशेषः	९

विषयाः	पृ. सं.
प्रकृतिपुरुषयोः साधर्म्यम्	९
तयोर्वैधर्म्यम्	,,
प्रकृतेर्नामानि	१०
प्रकृतेर्गुणाः	,,
सत्त्वगुणयुक्तस्य मनसो लक्षणम्	,,
रजोगुणयुक्तस्य ,, ,,	,,
तमोगुणयुक्तस्य ,, ,,	,,
महत्तत्त्वोत्पत्तिः	११
अहङ्कारस्योत्पत्तिस्तस्य त्रैविध्यम्	,,
त्रिविधाहङ्कारस्य कार्यम्	,,
मनस उभयेन्द्रियत्वम्	,,
इन्द्रियाणां विषयाः	१२
पञ्चतन्मात्रोत्पत्तिः	,,
महाभूतोत्पत्तिः	,,
महाभूतानां गुणाः	,,
अष्टानां प्रकृतीनां मध्ये तावत् प्रथमा [illegible]	[illegible]
सप्त प्रकृतयः	[illegible]
षोडश विकाराः	[illegible]

विषयाः	पृ. सं.
जीवात्मनः स्थानम्	१४
जीवात्मनो गुणाः	,,
अथ तृतीयं गर्भप्रकरणम्	१५
रजस्वलास्वरूपम्	,,
गर्भग्रहणयोग्यः समयः	,,
रजस्वलाया नियमाः	,,
एतस्या नियमाकरणे दोषाः	१६
रजस्वलाकृत्यम्	,,
भर्तृकृत्यम्	,,
गर्भाधाने निषिद्धो विहितश्च कालस्तयोः फलञ्च	,,
स्त्रीणां योनिमध्ये नाडीत्रयवर्णनम्	१७
युग्मायुग्मरात्रीणां फलम्	,,
दम्पत्योः सम्भोगे योग्यपुरुषस्य लक्षणम्	,,
तत्रायोग्यपुरुषलक्षणम्	,,
तत्र योग्यायाः स्त्रियो लक्षणम्	,,
तत्रायोग्यस्त्रीलक्षणम्	,,
गर्भावतरणक्रमः	१८
गर्भाशयस्य स्वरूपम्	,,
गर्भे जीवप्रवेशप्रकारः	१९
गर्भाशयद्वारमुखसंवरणकालः	,,
यमजसन्तानोत्पत्तौ हेतुः	,,
स्त्रीपुंसनपुंसकसन्तानोत्पत्तौ हेतुः	,,
परिहार्यपरिहारार्थं सद्योगृहीतगर्भाया लक्षणम्	२०
तस्या एवोत्तरकालीनं लक्षणम्	,,
तत्र पुत्रगर्भवत्या लक्षणम्	२१

विषयाः	पृ. सं.
कन्यागर्भवत्या लक्षणम्	२१
नपुंसकगर्भवत्याः ,,	,,
नपुंसकविशेषकथनम्	,,
नपुंसकविशेषाणां लक्षणम्	,,
नरचेष्टितायाः कन्याया उत्पत्तिहेतुकथनम्	२२
अपरा अपि गर्भप्रकृतयः	,,
पुत्राणामाहाराचारचेष्टाभेदहेतुकथनम्	२३
गर्भलक्षणम्	,,
अङ्गोपाङ्गविवरणम्	,,
हृदयस्य स्वरूपकथनम्	२४
शरीरोत्पत्तौ समवायिकारणान्तराणि	२६
दोषस्वरूपम्	,,
दोषशब्दस्य निरुक्तिः	,,
तत्र वायोः स्वरूपम्	,,
स्थानभेदेन वायूनां नामानि	२७
उदानादीनां तेषां स्थानानि	,,
तेषां कर्माणि	,,
पित्तस्य स्वरूपम्	२८
पित्तानां नामानि	,,
पाचकादीनां तेषां स्थानानि	,,
तेषां कर्माणि	,,
अग्निः पित्ताद् भिन्नो न वेतिविषयको विचारः	२९
श्लेष्मस्वरूपम्	३१
स्थानभेदेन श्लेष्मणां नामानि	,,

विषयाः	पृ. सं.
क्लेदनादीनां तेषां स्थानानि	३१
तेषां कर्माणि	३२
धातुशब्दस्य निरुक्तिः	,,
धातूनां कर्माणि	,,
रसशब्दस्य निरुक्तिः	,,
रसस्य स्वरूपम्	,,
रसस्य स्थानम्	३३
रसस्य कर्माणि	,,
रक्तस्य स्वरूपम्	,,
रक्तस्य स्थानम्	,,
मांसस्य स्वरूपम्	,,
तस्य पेशीकथनम्	३४
मांसपेशीनां संख्या	,,
तत्र शाखागताः	,,
कोष्ठगताः	,,
ग्रीवोर्ध्वगाः	,,
स्त्रीणां मांसपेशीसंख्या	३५
मांसपेशीनां कर्माणि	,,
मेदसः स्वरूपम्	,,
तस्य स्थानम्	,,
अस्थ्नः स्वरूपम्	,,
अस्थ्नां संख्याकथनम्	३६
शाखागतानामस्थ्नां संख्या	,,
पार्श्वादिगतानां संख्या	,,
ग्रीवोर्ध्वगतानां संख्या	,,
पञ्चविधस्यास्थ्नो वर्णनम्	,,
तस्य स्थानानि	,,

विषयाः	पृ. सं.
अस्थ्नां प्रयोजनम्	३७
मज्जस्वरूपम्	,,
शुक्रस्योत्पत्तिः	,,
आहारोदर्गतिपरिणामयोः कथनम्	,,
आहारस्य षाड्विध्यकथनम्	,,
आमाशयस्य स्थानम्	३८
ग्रहणीलक्षणम्	३९
आहारपाके विशेषः	,,
तत्र चरकोक्तिः	,,
तत्र सुश्रुतोक्तिः	,,
आहाराद्रसोत्पत्तिकथनम्	४०
रसस्य त्रैविध्यम्	४१
आहाररसस्य रसादौ धाताववस्थिति समयस्य सुश्रुतभोजयोर्मतोक्तपरिमाणयोः कथनम्	,,
रसादीनां धातूनां मलानि	,,
आहाररसाद्रक्तोत्पत्तिप्रकारः	,,
मांसोत्पत्तिप्रकारः	४२
मेदस उत्पत्तिप्रकारः	,,
अस्थ्न उत्पत्तिप्रकारः	,,
मज्जोत्पत्तिप्रकारः	४३
शुक्रोत्पत्तिप्रकारः	,,
ओजस उत्पत्तिप्रकारलक्षणयोः कथनम्	,,
आर्तवोत्पत्तिप्रकारः	४४
स्त्रीणामार्तवशुक्रयोः फलम्	४५
रसस्य शरीरे त्रिधा सञ्चारकथनम्	,,

विषयाः	पृ. सं.
वाजीकरिणीनामोषधीनां प्रयोजनम्	४५
बालानां शुक्रादर्शने हेतुः	४६
वृद्धानां धातोरवृद्धौ हेतुः	,,
शुक्रस्य स्वरूपम्	,,
जविस्य देहे विशेषाधिष्ठानकथनम्	,,
गर्भसञ्जननशुक्रस्य लक्षणम्	४७
शुक्रस्य स्थानम्	,,
तस्य क्षरणमार्गः	,,
तस्य क्षरणकारणम्	,,
आर्त्तवस्य स्वरूपम्	,,
गर्भग्रहणयोग्यस्यार्त्तवस्य लक्षणम्	४८
धातुव्यतिरिक्ता गुणाः	,,
धातूनां मलाः	,,
अथोपधातवः	,,
आशयाः	४९
आशयानुक्रमः	,,
कलास्वरूपम्	,,
तासां संख्याकथनम्	,,
मर्माणि	५०
तेषां संख्याः स्थानं च	,,
तेषां प्रकारभेदकथनम्	,,
सद्योमारकाणि मर्माणि	,,
कालान्तरप्राणहराणि मर्माणि	५१
वैकल्यकराणि मर्माणि	५२
रुजाकराणि मर्माणि	५४
विशल्यघ्नानि मर्माणि	,,
मर्मणां मारणकालावधिः	,,

विषयाः	पृ. सं.
अथ सन्धयः	५४
तस्य द्वैविध्यम्	,,
तस्य संख्या	,,
कोष्ठगताः सन्धयः	५५
ग्रीवोर्ध्वगताः सन्धयः	,,
अष्टसन्धिवर्णनम्	,,
अथ शिराः	५६
शिरासंख्याः	,,
स्वशिरासञ्चारिणो वायोः कर्माणि	५७
स्वशिरा० कुपितस्य वायोः कर्माणि	,,
स्वशिरासञ्चारिणः पित्तस्य क०	,,
स्वशिरा० कुपितस्य पित्तस्य क०	,,
स्वशि० कफस्य क०	,,
स्वशि० कुपितस्य कफस्य क०	,,
स्वशि० रक्तस्य क०	५८
स्वशि० कुपितस्य रक्तस्य क०	,,
वातवहादिशिराणां वर्णादयः	,,
अथ स्नायुः	,,
तत्र स्नायोः स्वरूपम्	,,
स्नायुसंख्या	,,
तत्र शाखागताः	,,
कोष्ठगताः	५९
ग्रीवोर्ध्वगताः	,,
अथ धमन्यः	,,
तत्रोर्ध्वगताः	,,
अधोगताः	,,
तिर्यग्गताः	६०

विषयाः	पृ. सं.
अथ कण्डराः	६०
अथ रन्ध्राणि	६१
अथ स्रोतांसि	,,
अथ जालानि	,,
अथ कूर्चाः	,,
रज्जवः	६२
सेवन्यः	,,
संघाताः	,,
सीमन्ताः	,,
अथ त्वचः	,,
अथ लोमानि लोमकूपाश्च	६३
मासिको गर्भक्रमः	,,
दौर्हृदविशेषफलम्	६४
गर्भस्य प्रथमोत्पन्नमङ्गम्	६५
शरीरे पितृजमातृजरसजात्मजा-भागाः	६६
गर्भस्य विशिष्टोपकारकम्	,,
गर्भस्य जीवनोपायः	६७
गर्भवृद्धेर्हेतुरुपायश्च	,,
दृष्टिरोमकूपानामवृद्धिः	,,
नखकेशानां सदावृद्धिः	,,
चेतनाचेतनाङ्गानि	,,
गर्भस्य वातविण्मूत्राकरणे कारणम्	६८
गर्भारोदने कारणम्	,,
गर्भिणीकृत्याकृत्यानि	,,
प्रसवमासकथनम्	६९

विषयाः	पृ. सं.
सूतिकागृहाकृतिः	६९
आसन्नप्रसवाया लक्षणम्	,,
तस्या उपचारः	,,
जनयित्री	,,
जनयित्रीकृत्यम्	,,
व्यथारहितायाः प्रवाहणाद्वैगुण्यम्	७०
अथ चतुर्थं बालप्रकरणम् ।	
बालस्य जन्मोत्तरविधिः	,,
प्रसूताया नियमाः	,,
तस्या नियमसमयावधिः	,,
स्तन्यस्वरूपम्	,,
स्तन्यस्य प्रवृत्त्यवधिः	,,
स्तन्यप्रवृत्तिहेतुकथनम्	७१
स्तन्याल्पतायां हेतुः	,,
तस्य वृद्धिहेतुः	,,
कलमस्य लक्षणम्	,,
स्तन्यस्य दुष्टिहेतुः	,,
दुष्टस्तन्यस्य लक्षणम्	,,
दुष्टस्तन्यस्य शोधनविधिः	७२
शुद्धस्तन्यस्य लक्षणम्	,,
धात्रीलक्षणम्	,,
निषिद्धधात्रीलक्षणम्	,,
बालस्य स्तन्यपानविधिः	,,
अन्यथा वैगुण्यम्	७३
स्तन्याभिमन्त्रणम्	,,
जनन्याः क्षीराभावे धात्र्याश्चालाभे प्रकारः	,,

विषयाः	पृ. सं.
बालस्यान्नप्राशनकालः	७३
बालस्य परिचर्याविधिः	,,
बालस्य स्वभावतो हितानि	७४
बालस्य कवलादेः समयः	,,
बाल्यादेरवधिः	,,
प्रकृतिलक्षणानि	७५
वातप्रकृतिलक्षणम्	,,
पित्तप्रकृतिलक्षणम्	,,
श्लेष्मप्रकृतिलक्षणम्	,,
द्वन्द्वजत्रिदोषजप्रकृतिलक्षणम्	७६
वातप्रकृतिलक्षणं वाग्भटोक्तम्	,,
पित्तप्रकृतिलक्षणम् ,,	,,
कफप्रकृतिलक्षणम् ,,	७७
पञ्चमं दिनर्त्तुचर्याप्रकरणम् ।	
अथ देशाः	७८
तत्रानूपलक्षणम्	,,
जाङ्गललक्षणम्	,,
साधारणलक्षणम्	,,
दिनादिचर्याः	७९
स्वस्थस्य लक्षणम्	,,
दिनचर्याः	,,
पुरीषवेगाभिघाताद्धानिः	,,
वातनिग्रहजा दोषाः	,,
मूत्रनिग्रहजा दोषाः	,,
दन्तधावनविधिः	८०
तृणराजसंज्ञका वृक्षाः	८१
तृणराजदन्तधावनानविधेः	,,

विषयाः	पृ. सं.
दन्तधावनायोग्या जनाः	८१
जिह्वानिर्लेखनविधिः	,,
गण्डूषविधिः	,,
गण्डूषानर्हजनाः	८२
मुखप्रक्षालनगुणाः	,,
नस्यप्रयोजनम्	,,
अञ्जनविधिः	,,
अञ्जनायोग्यजनाः	,,
नखादिकर्त्तनविधिः	,,
नासालोमोत्पाटने दोषाः	८३
केशप्रसाधनगुणाः	,,
दर्पणालोकनगुणाः	,,
व्यायामगुणाः	,,
बलार्धस्य लक्षणम्	,,
व्यायामयोग्या जनाः	८४
अतिव्यायामदोषाः	,,
अभ्यङ्गगुणाः	,,
सर्वाङ्गेष्वभ्यङ्गगुणाः	,,
शिरस्यभ्यङ्गगुणाः	,,
कर्णयोस्तैलपूरणगुणाः	,,
कर्णयोस्तैलादिपूरणे योग्यसमयाः	,,
पादाभ्यङ्गगुणाः	,,
स्नेहयुक्तावगाहनगुणाः	८५
अभ्यङ्गायोग्यजनाः	,,
उद्वर्तनगुणाः	,,
स्नानविधिः	,,
आमलकैः स्नानस्य गुणाः	८६

विषयाः	पृ. सं.
स्नानानर्हजनाः	८६
स्नानोत्तरं वस्त्रेणाङ्गमार्जनगुणाः	,,
वस्त्रधारणगुणाः	,,
शीतोष्णवर्षाकालेषु धारणार्हवस्त्राणि तद्गुणाश्च—	,,
नवनिर्मलाम्बरधारणगुणाः	,,
मलिनवस्त्रधारणदोषाः	८७
प्रलेपगुणाः	,,
शीतोष्णवर्षाकालेषु प्रलेपार्हद्रव्याणि तद्गुणाश्च—	,,
सामान्यतोऽनुलेपगुणास्तदनर्हजनाश्च	,,
पुष्पाभरणादिधारणगुणाः	,,
काञ्चनाभरणधारणगुणाः	,,
रत्नाभरणधारणगुणाः	,,
सूर्यादिनवग्रहप्रीतिकररत्नानि	८८
वज्रश्रृङ्गाररत्नानां धारणगुणाः	,,
सिद्धमन्त्रमहौषधधारणगुणाः	,,
भोजनविधिः	,,
तत्र भोजनकाले मङ्गलवस्तुदर्शनगुणाः	,,
मङ्गलवस्तूनि	,,
पादुकाधारणगुणाः	,,
क्षुत्तृडाद्यवरोधे हानिकथनम्	,,
भोजनेच्छाविघाते हा०क०	,,
जलपानेच्छाविघाते हा०क०	८९
·पेच्छाविघाते हा०क०	,,
क्षु· ·ायां सत्यामपि भोजनाकरणे प्रसव·	,,
,, ,, भोजनकरणे गुणाः	८९
भोजनस्य समयाः	,,
जीर्णाहारस्य लक्षणम्	९०
आहारस्य स्थानम्	,,
भोजने शुभाशुभस्थयः	,,
भोजनस्य पात्राणि तद्गुणाश्च	,,
जलस्य पात्राणि तद्गुणाश्च	,,
भोजने प्रथमभोज्यपदार्थः	९१
दृष्टिदोषविनाशकमन्त्रम्	,,
भोजनक्रमः	,,
स्वाद्वन्नस्य लक्षणं गुणाश्च	९२
अत्युष्णान्नादिभोजने हानिः	,,
अतिद्रुतविलम्बिताशनयोर्दोषाः	,,
त्रिविधगुर्वन्नभोजननिषेधः	,,
आहारस्य षाड्विध्यम्	९३
स्वभावलघुनः संस्कारगुरुणः स्वभावगुरुणश्च भक्ष्यस्य परिणामः	,,
केवलशुष्कान्नस्य दोषाः	,,
अपक्वं किं भवतीत्यस्योत्तरम्	,,
शुष्कादीनां वैगुण्यम्	,,
सक्तुभक्षणविधिः	९४
सक्तुभक्षणे वर्जनीयानि	,,
विषमाशनस्य लक्षणम्	,,
बहुनोऽल्पस्य भक्ष्यस्य दोषाः	,,
अकाले भुक्तस्य दोषाः	,,
अतीतकाले भोजने दोषाः	,,
भोजनप्रमाणम्	,,

विषयाः	पृ. सं.
स्वल्पमात्रया वारिपानम्	९५
भुक्तस्यादौ मध्येऽन्ते च जलपानस्य-फलानि	,,
तृषितक्षुधितयोः क्रमेण भोजनजल-पानयोः सहेतुको निषेधः	,,
भोजनस्यादौ मध्येऽन्ते च मधुरादि-पदार्थभोजनम्	,,
भोजनान्ते सोपपत्तिको दुग्धपान-विधिः	,,
आचमनविधिः	९७
भोजनानन्तरक्रियाः	,,
भोजनोपरि वातादीनां वृद्धिक्रमः	९८
भुक्तमात्रे संजातकफस्य परिहारः	,,
ताम्बूलभक्षणस्य कालः	,,
ताम्बूलगुणाः	,,
नवीनताम्बूलगुणाः	,,
बंगीयताम्बूलगुणाः	,,
पुराणताम्बूलगुणाः	९९
पुंगीफलगुणाः	,,
खादिरसुधाताम्बूलगुणाः	,,
ताम्बूलपर्णाग्रमध्यादिभागापरित्यागे दोषाः	,,
ताम्बूलस्य पीतद्वयं परित्यज्य तृतीयपीतादनुपानम्	,,
अधिकताम्बूलभक्षणे दोषाः	,,
ताम्बूलभक्षणानर्हजनाः	,,
भोजनोत्तरं चङ्क्रमणगुणाः	१००
भोजनोत्तरमुपवेशनशयनादिफलानि	,,

विषयाः	पृ. सं.
भोजनोत्तरं शयनरीतिः	१००
सर्वदा वामपार्श्वेन शयने हेतुः	,,
खट्वादीनामुपरि शयनफलानि	,,
संवाहनगुणाः	,,
अप्रवातप्रवातसेवनगुणाः	,,
पूर्ववायुसेवनगुणदोषाः	१०१
दक्षिणपश्चिमपवनयोर्गुणदोषाः	,,
उत्तरवायोर्गुणदोषाः	,,
आग्नेयादिवायूनां गुणाः	,,
व्यजनतालवृन्तादिभववायूनां गुणाः	,,
दिवास्वापप्रतिषेधः	,,
दिवास्वापयोग्यजनाः	१०२
भोजनानन्तरं शयनफलम्	,,
शयनमर्दनादीनां फलानि	,,
अपरेऽप्युदरे अन्नस्य स्थापनहेतवः	,,
अन्नस्योदरेऽस्थितिहेतवः	,,
अन्यदपि वर्जनीयम्	,,
अजीर्णस्य हेतुः	१०३
अध्यशनस्य लक्षणम्	,,
सायमाशाजीर्णे भोजनोपायः	,,
दिवास्त्रीसंगनिषेधः	,,
उपवेशनाटनादिगुणाः	१०४
उष्णीषधारणगुणाः	,,
उपानद्धारणगुणाः	,,
अनुपानद्भ्यां पादाभ्यां चङ्क्रमणे दोषाः	,,
छत्रदण्डधारणगुणाः	,,
शिबिकाऽऽद्यारोहणगुणाः	,,

विषयाः	पृ. सं.
आतपादीनां गुणाः	१०४
वृष्टिकुहेल्योः सेवनगुणाः	१०५
अग्निधूमयोः सेवनगुणाः	,,
सदाचरणानि	,,
संध्यायां निषिद्धकर्माणि	१०७
तदाचरणे दोषाः	,,
अथ रात्रिचर्याः	,,
ज्योत्स्नाऽऽदीनां गुणाः	,,
रात्रौ भोजनस्य समयः परिमाणश्च	,,
मैथुनेच्छायां सत्यां तदकरणे दोषाः	,,
स्त्रीणां बालाऽऽद्यवस्थानामवधिः	,,
बालाऽऽदिस्त्रीणां सेवनस्य समयः फलं च	१०८
सेवनेन सद्यः प्राणकराणि द्रव्याणि	,,
सेवनेन सद्यः प्राणहराणि द्रव्याणि	,,
वृद्धस्य तरुणीगमने तरुणस्य च वृद्धागमने फलम्	,,
नियमपूर्वकं स्त्रीगमने गुणाः	,,
ऋतुभेदेन स्त्रीसेवनप्रकारः	,,
वसन्तादिष्वृतुषु कियता कालेन स्त्रीसेवनं युक्तमित्यस्य कथनम्	,,
ऋतुभेदेन स्त्रीसेवनसमयभेदः	१०९
स्त्रीसेवननिषिद्धकालाः	,,
स्त्रीसेवनयोग्यायोग्यस्थानानि	,,
स्त्रीसेवनकाले पुरुषाणां वेषादिकाः	,,
मैथुनानर्हपुरुषाः	,,
मैथुनयोग्याः स्त्रियः	,,

विषयाः	पृ. सं.
मैथुनायोग्याः स्त्रियः	११०
विशेषेण रजस्वलागमने दोषाः	,,
संन्यासिन्यादीनां स्त्रीणां गमने दोषाः	,,
प्रकाशे स्त्रीसेवने दोषाः	,,
पुंसवनानन्तरं कृत्यम्	,,
बुभुक्षितादीनां पुरुषाणां स्त्रीसंभोगे मध्याह्ने स्त्रीसेवने च दोषाः	,,
व्याधितस्य पुंसस्तथा प्रत्यूषादिसमये स्त्रीगमने दोषाः	१११
तिर्यगादियोनौ मैथुने दोषाः	,,
मलमूत्रयोर्वेगावस्थायां मैथुने चलित-शुक्रधारणे विपरीतमैथुने च दोषाः	,,
विशेषेणोपस्थितशुक्रधारणे निषेधः	,,
सुरतान्ते हितकराणि द्रव्याणि	,,
अतिव्यवायजा रोगाः	,,
रात्रौ निद्राजागरणयोर्गुणाः	,,
सुखपूर्वकनिद्रालाभार्थमौषधम्	,,
उषःकाले जलपानगुणाः	,,
उषःकाले नासाजलपानगुणाः	११२
नासाजलपाने जलपरिमाणम्	,,
विशेषेण नासाजलपाने गुणाः	,,
नासावारिपानानर्हजनाः	,,
अथ ऋतुचर्या	११३
ऋतुषट्कस्य वर्णनम्	,,
मतभेदेन पुनर्वर्णनम्	,,
दक्षिणोत्तरायणयोर्लक्षणं गुणाश्च	,,
ऋतूनां गुणदोषाः	,,

विषयाः	पृ. सं.
"कस्मिन् ऋतौ कस्य दोषस्य चयप्रकोपोपशमाः" इत्यस्य सहेतु कथनम्	११४
अकाले दोषवृद्धिहेतुः	,,
दोषचयलक्षणम्	११५
वर्षर्त्तौ नियमाः	,,
शरदि ऋतौ नियमाः	,,
अंशूदकलक्षणम्	,,
हेमन्तर्त्तौ नियमाः	११६
शिशिरर्त्तौ नियमाः	,,
वसन्तर्त्तौ नियमाः	,,
ग्रीष्मर्त्तुनियमाः	,,
ऋतुचर्याऽऽचरणे फलम्	,,
अथ षष्ठं वर्गप्रकरणम् ।	
तत्र प्रथमो मिश्रवर्गः	११७
व्याधेर्लक्षणम्	,,
व्याधिभेदाः	,,
कर्मजा व्याधयः	,,
दोषजा व्याधयः	,,
कर्मदोषोद्भवा व्याधयः	११८
रोगक्षयहेतवः	,,
साध्यादिभेदेन त्रिविधा रोगाः	,,
याप्यलक्षणम्	,,
साध्ययाप्ययोश्चिकित्साऽऽवश्यकता	,,
उपद्रवस्य लक्षणम्	,,
अरिष्टस्य लक्षणम्	११९
चिकित्सालक्षणम्	,,
चिकित्साविध्युपदेशः	,,

विषयाः	पृ. सं.
रोगाज्ञानेन चिकित्साकरणे दोषः	११९
रोगज्ञाने भेषजाज्ञाने दोषाः	१२०
रोगौषधयोर्ज्ञाने गुणाः	,,
चिकित्सापद्धतिः	
अतिरिक्ताया हीनायाश्च क्रियाया वर्जनम्	१२१
चिकित्सायाः फलम्	,,
धनिकेभ्योऽर्थग्रहणं वैद्यानामुचितम्	१२२
निःशुल्ककारिताचिकित्साफलम्	,,
वैद्यवृत्तेः सर्वत्र सुसिद्धत्वम्	,,
चिकित्साया अङ्गानि	,,
रोगिणो लक्षणम्	,,
चिकित्स्यस्य लक्षणम्	,,
अचिकित्स्यस्य लक्षणम्	,,
अचिकित्स्यानां चिकित्सानिषेधः	१२३
दूतस्य लक्षणम्	,,
दूतयात्रायां शकुनविचारः	,,
रिक्तहस्तयोर्दूतरोगिणोर्वैद्यदर्शननिषेधः	,,
सुवैद्यस्य लक्षणम्	१२४
निषिद्धवैद्यस्य लक्षणम्	,,
वैद्यस्य कर्म	,,
"न वैद्यः प्रभुरायुषः" इति वचनोपरि विचारः	,,
आयुर्विचारः	१२६
दीर्घायुषो लक्षणानि	,,
स्वल्पायुषो लक्षणानि	,,

विषयाः	पृ. सं.
गतायुषां पुरुषाणामोषधिप्रदानस्या-किञ्चित्करत्वे हेतुः	१२८
द्रव्यस्यावश्यकता	१२९
परिचारकस्य लक्षणम्	,,
भेषजस्य लक्षणम्	१३०
ओषधिग्रहणपरिभाषा	,,
द्रव्याणां परीक्षा	१३२
स्वभावतो हितानि द्रव्याणि	,,
स्वभावादहितानि द्रव्याणि	१३३
संयोगविरुद्धानि द्रव्याणि	,,
भेषजग्रहणसङ्केतः	१३४
प्रतिनिधिद्रव्याणि	,,
द्रव्यगतपञ्चपदार्थाः	१३६
तत्र द्रव्यगता रसाः	१३७
तत्रादौ मधुररसस्य गुणाः	,,
अतियुक्तस्य मधुररसस्य गुणाः	,,
अम्लस्य गुणाः	,,
अतियुक्तस्याम्लस्य गुणाः	१३८
लवणस्य गुणाः	,,
अतियुक्तस्य लवणस्य गुणाः	,,
कटुरसस्य गुणाः	,,
अतियुक्तस्य कटुरसस्य गुणाः	,,
तिक्तरसस्य गुणाः	
अतियुक्तस्य तिक्तस्य गुणाः	१३९
कषायरसस्य गुणाः	,,
अतियुक्तस्य कषायस्य गुणाः	,,
मधुरादीनामपरे विशेषाः	,,

विषयाः	पृ. सं.
आकाशादिसम्बन्धिद्रव्यगुणाः	१४०
लघ्वादिगुणवतां द्रव्याणां गुणाः	,,
दीपनम्	१४१
पाचनम्	,,
शमनम्	,,
अनुलोमनम्	,,
स्रंसनम्	१४२
भेदनम्	,,
रेचनम्	,,
वमनम्	,,
देहसंशोधनम्	,,
ग्राहि	,,
स्तम्भनम्	१४३
छेदनम्	,,
लेखनम्	,,
वाजीकरम्	,,
शुक्लम्	,,
शुक्रस्य जनकं रेचकं च-	,,
शुक्रस्य प्रवर्तकं रेचकं-स्तम्भकं क्षयकारकं च	१४४
रसायनम्	,,
व्यवायि	,,
विकाशि	,,
मदकारि	,,
विषम्	,,
प्रमाथि	१४५
अभिष्यन्दि	,,

विषयाः	पृ. सं.
विदाहि	१४५
योगवाहि	,,
वीर्यम्	,,
तद्गुणाः	,,
विपाकः	१४६
मधुरादिरसयुक्तपदार्थानां विपाकरसाः	,,
विपाकानां गुणाः	,,
प्रभावः	,,
द्वितीयः हरीतक्यादिवर्गः ।	**१४७**
हरीतक्या उत्पत्तिनामलक्षणगुणाः	,,
बिभीतकस्य नामानि गुणाश्च	१५०
आमलक्या नामानि गुणाश्च	,,
त्रिफलाया लक्षणनामगुणाः	,,
शुण्ठ्या नामानि गुणाश्च	१५१
आर्द्रकस्य नामानि गुणाश्च	,,
पिप्पल्या नामानि गुणाश्च	,,
मरिचस्य नामानि गुणाश्च	१५२
त्रिकटुकस्य लक्षणनामगुणाः	,,
पिप्पलीमूलस्य नामानि गुणाश्च	,,
चतुरूषणस्य लक्षणं गुणाश्च	,,
चव्यस्य नामगुणाः	,,
गजपिप्पल्या नामानि गुणाश्च	१५३
चित्रकस्य नामानि गुणाश्च	,,
पञ्चकोलस्य लक्षणं गुणाश्च	,,
षडूषणस्य लक्षणं गुणाश्च	,,
यवान्या नामानि गुणाश्च	,,
अजमोदाया नामानि गुणाश्च	,,

विषयाः	पृ. सं.
पारसीकयवानीगुणाः	१५४
शुक्लजीरककृष्णजीरककालिकानामगुणाः	,,
धान्यकस्य नामानि गुणाश्च	,,
शतपुष्पामिश्रेययोर्नामानि गुणाश्च	,,
मेथीवनमेथीनामगुणाः	१५५
चन्द्रशूरस्य नामानि गुणाश्च	,,
चतुर्बीजस्य लक्षणं गुणाश्च	,,
हिङ्गुनामगुणाः	,,
वचाया नामानि गुणाश्च	,,
पारसीकवचाया नामानि गुणाश्च	१५६
महाभरीवचानामगुणाः	,,
चोपचीनीनामगुणाः	,,
हवुषाद्वयस्य नामगुणाः	,,
विडङ्गस्य नामानि गुणाश्च	,,
तुम्बुरुफलस्य नामानि गुणाश्च	१५७
वंशलोचनस्य नामगुणाः	,,
समुद्रफेनस्य नामानि गुणाश्च	,,
अष्टवर्गस्य लक्षणगुणाः	,,
जीवकर्षभकयोरुत्पत्तिलक्षणनामगुणाः	,,
मेदामहामेदयोरुत्पत्तिलक्षणनामगुणाः	१५८
काकोलीक्षीरकाकोल्योरुत्पत्तिलक्षण०	,,
ऋद्धिवृद्ध्योरुत्पत्तिलक्षणनामगुणाः	,,
अष्टवर्गस्य प्रतिनिधिः	१५९
यष्टीमधुनामगुणाः	,,
काम्पिल्लस्य नामगुणाः	,,
आरग्वधस्य नामगुणाः	,,
कटुकाया नामगुणाः	१६०

विषयाः	पृ. सं.
किरातकस्य (चिरायता) नाम-गुणाः	१६०
इन्द्रयवस्य नामगुणाः	,,
मदनः (मयनफल)	१६१
रास्ना	,,
नाकुली (रास्नाभेदः)	,,
माचिका	,,
तेजवती	१६२
ज्योतिष्मती (मालकांगुनी)	,,
कुष्ठम् (कूठ)	,,
कुष्ठभेदः (पुष्करमूलम्)	,,
कटुपर्णी (चोक)	,,
कर्कटशृङ्गी	१६३
कट्फलः	,,
भार्गी	,,
पाषाणभेदः	,,
धातकी	,,
मञ्जिष्ठा	१६४
कुसुम्भम्	,,
लाक्षा (लाही)	,,
हरिद्रा	,,
कर्पूरहरिद्रा	१६५
वनहरिद्रा	,,
दारुहरिद्रा	,,
रसाञ्जनम्	,,
वाकुची	,,
चक्रमर्दः	१६६

विषयाः	पृ. सं.
अतिविषा	१६६
लोध्रः	,,
लशुनः	,,
लशुनस्योत्पत्तिः	१६७
रसोनशब्दस्य निरुक्तिः	,,
लशुने रसस्थानानि	,,
लशुनगुणाः	,,
लशुनसेविनां हिताहितपदार्थाः	,,
पलाण्डुः	,,
भल्लातकः	१६८
भङ्गा	,,
खाखसः	,,
अहिफेनकम्	,,
खाखसतिलाः	१६९
सैन्धवः	,,
शाकम्भरीयम्	,,
सामुद्रं लवणम्	,,
विडलवणम्	,,
सौवर्चलं लवणम्	१७०
खानिजं लवणम्	,,
चणकाम्लकम्	,,
यवक्षारः स्वर्जिका सुवर्चिका च	,,
टङ्कणक्षारः	,,
क्षारद्वयं क्षारत्रयं च	१७१
क्षाराष्टकम्	,,
चुक्रम् (चूक)	,,

विषयाः	पृ. सं.
तृतीयः कर्पूरादिवर्गः	१७१
कर्पूरम्	,,
चीनाककर्पूरः	१७२
कस्तूरी	,,
लताकस्तूरी	,,
गन्धमार्जारवीर्यम्	,,
चन्दनम्	,,
उत्तमचन्दनस्य लक्षणम्	,,
चन्दनस्य गुणाः	१७३
पीतचन्दनम्	,,
रक्तचन्दनम्	,,
पतङ्गम्	,,
अगुरु कृष्णागुरु च	,,
देवदारु	१७४
सरलः	,,
तगरं पिण्डतगरं च	,,
पद्मकम्	,,
गुग्गुलुः	१७५
गुग्गुलुभेदाः	,,
तेषां लक्षणानि	,,
तेषां गुणाः	,,
सामान्यतो गुग्गुलुगुणाः	,,
नवीनस्य प्राचीनस्य गुग्गुलोर्लक्षणं गुणाश्च	,,
गुग्गुलुसेविनां त्याज्यानि	१७६
सरलनिर्यासगुग्गुलुः	,,
रालः	,,
कुन्दुरुः	,,
शिलारसः	,,

विषयाः	पृ. सं.
जातीफलम्	१७
जातीपत्री	
लवंगम्	
स्थूलैला (बडी इलायची)	
एला (गुजराती इलायची)	१७८
त्वक्पत्रम्	,
दारुसिता	,
पत्रकम्	,
नागकेशरः	,
त्रिजातकं चातुर्जातकं च	१७
कुङ्कुमम्	,
गोरोचना	
नखं नखी च	
बालम्	१८
वीरणम्	,
उशीरम्	,
जटामांसी	
शैलेयम्	,
मुस्तकं नागरमुस्तकं च	१८
कर्चूरः	
मुरा (मुरहरी)	,
गन्धपलाशी	
प्रियङ्गुर्गन्धप्रियङ्गुश्च	१८
तत्फलगुणाः	,
रेणुका	,
ग्रन्थिपर्णम्	
स्थौणेयकम् (ग्रन्थिपर्णभेदः)	,

विषयाः	पृ. सं.
ग्रन्थिपर्णस्य भेदान्तरम्	१८३
तालीसपत्रम्	,,
कङ्कोलं (सुगन्धिद्रव्यम्)	,,
गन्धकोकिला गन्धमालती च	,,
लामज्जकम्	,,
एलबालुकम्	१८४
कैवर्तीमुस्तकम्	,,
स्पृक्का	,,
पर्पटी	,,
नलिका	१८५
प्रपौण्डरीकम्	,,

चतुर्थो गुडूच्यादिवर्गः ।

विषयाः	पृ. सं.
गुडूची	,,
नागवल्ली	१८६
बिल्वः	,,
गाम्भारी	,,
गाम्भारीफलगुणाः	१८७
पाटला	,,
तत्पुष्पफलयोर्गुणाः	,,
अग्निमन्थः	,,
श्योनाकः	१८८
तद्बालप्रौढफलयोर्गुणाः	,,
बृहत्पञ्चमूलम्	,,
शालिपर्णी	,,
पृष्टिपर्णी	,,
वार्त्ताकी	१८९
कण्टकारीनामानि	,,
श्वेतपुष्पायास्तस्या नामानि	१८९
कण्टकार्या गुणाः	,,
कण्टकारीद्वयस्य फलगुणाः	,,
श्वेतपुष्पकण्टकार्या गुणाः	,,
गोक्षुरः	१९०
लघुपञ्चमूलम्	,,
दशमूलम्	,,
जीवन्ती	,,
मुद्गपर्णी	,,
माषपर्णी	१९१
जीवनीयगणः	,,
शुक्लरक्तैरण्डौ	,,
एरण्डपत्राग्रपत्रफलमज्जगुणाः	१९२
शुक्लरक्तार्कौ	,,
शुक्लरक्तार्कयोः पुष्पगुणाः	,,
अर्कदुग्धगुणाः	,,
सेहुण्डः	,,
स्नुहीदुग्धगुणाः	१९३
सेहुण्डभेदः शातला	,,
कलिहारी	,,
श्वेतरक्तकरवीरौ	,,
धत्तूरः	१९४
आटरूषः	,,
पर्पटः	,,
निम्बः	,,
निम्बस्य पत्रफलयोर्गुणाः	१९५
महानिम्बः	,,

विषयाः	पृ. सं.
पारिभद्रः	१९५
काञ्चनारो रक्तकाञ्चनारश्च	,,
तयोः पुष्पगुणाः	,,
शोभाञ्जनः	१९६
शिग्रुवल्कलपत्रस्वरसगुणाः	,,
शिग्रुबीजगुणाः	,,
अपराजिता	,,
सिन्दुवारः	,,
सिन्दुवारपत्रगुणाः	१९७
कुटजः	,,
कण्टककरञ्जघृतकरञ्जौ	,,
करञ्जपत्रफलगुणाः	,,
करञ्जी	,,
गुञ्जा	१९८
कपिकच्छूः	,,
तद्बीजगुणाः	,,
मांसरोहिणी	,,
चिह्लकः	,,
टङ्कारी	१९९
वेतसः	,,
जलवेतसः	,,
इज्जलः (समुद्रशोष)	,,
अङ्कोटः	,,
अङ्कोटफलगुणाः	,,
बलाचतुष्टयम्	,,
लक्ष्मणा	२००
स्वर्णवल्ली	,,

विषयाः	पृ. सं.
कार्पासी	२०
वंशः	,,
वंशस्य करीरयवयोर्गुणाः	२०१
नलः	,,
भद्रमुञ्जो मुञ्जश्च	,,
काशः	,,
गुन्द्रः	,,
एरका	२०२
कुशः क्षुरपत्रश्च	,,
कत्तृणम्	,,
भूतृणम्	,,
नीलदूर्वा	,,
श्वेतदूर्वा	२०३
गण्डदूर्वा	,,
वाराहीकन्दः	,,
मुशलीकन्दः	,,
शतावरी महाशतावरी च	२०४
अश्वगन्धा	,,
पाठा	,,
श्वेता त्रिवृत्	,,
श्यामा त्रिवृत	२०५
लघुदन्ती बृहद्दन्ती च	,,
दघुदन्तीफलम्	,,
जयपालः	,,
इन्द्रवारुणी महेन्द्रवारुणी च	२०६
नीली	,,
शरपुङ्खः	,,

विषयाः	पृ. सं.
यवासो दुरालभा च	२०६
मुण्डी महामुण्डी च	२०७
अपामार्गः	,,
रक्तापामार्गः	,,
अपामार्गफलगुणाः	२०८
कोकिलाक्षः	,,
अस्थिसंहारः	,,
कुमारी	,,
श्वेतपुनर्नवा	,,
रक्तपुष्पा पुनर्नवा	२०९
गन्धप्रसारणी	,,
कृष्णशारिवा	,,
श्वेतशारिवा	,,
शारिवाद्वयस्य गुणाः	,,
भृङ्गराजः	२१०
शणपुष्पी	,,
त्रायमाणा	,,
मूर्वा	,,
काकमाची	,,
काकनासा	२११
काकजंघा	,,
नागपुष्पी	,,
मेषश्रृङ्गी	,,
हंसपदी	,,
सोमलता	२१२
आकाशवल्ली	,,
पातालगरुडी	,,

विषयाः	पृ. सं.
वन्दा	२१२
वटपत्री	,,
हिङ्गुपत्री	,,
वंशपत्री	,,
मत्स्याक्षी	२१३
सर्पाक्षी	,,
शङ्खपुष्पी	,,
अर्कपुष्पी	,,
लज्जालुः	,,
अलम्बुषा	,,
दुग्धिका	२१४
भूम्यामलकी	,,
ब्राह्मी ब्रह्ममाण्डूकी च	,,
द्रोणा	,,
सुवर्चला	२१५
वन्ध्याकर्कोटकी	,,
मार्कण्डिका	,,
देवदाली पीतदेवदाली च	,,
जलपिप्पली	२१६
गोजिह्वा	,,
नागदमनी	,,
वीरतरुः	,,
छिक्कनी	२१७
कुकुन्दरः	,,
सुदर्शना	,,
आखुकर्णी	,,
मयूरशिखा	,,

विषयाः	पृ. सं.
अथ पञ्चमः पुष्पवर्गः ५ ।	**२१८**
कमलम्	,,
कमलभेदाः	,,
पद्मिनी	,,
नवपत्रादि	,,
संवर्त्तिका	,,
कर्णिका	२१९
किञ्जल्कः	,,
मृणालं शालूकं च	,,
स्थलकमलम्	,,
कुमुदम्	,,
कुमुदिनी	,,
कल्हारम्	२२०
शतपत्री	,,
वासन्ती	,,
वार्षिकी	,,
यूथिका पीतयूथिका च	२२१
चम्पकः	,,
बकुलः	,,
बृहद्बकुलः	,,
कदम्बः	,,
कुब्जकः	२२२
मल्लिका	,,
माधवी	,,
केतकः सुवर्णकेतकी च	,,
किङ्किरातः	,,
कार्णिकारः	२२३

विषयाः	पृ. सं.
अशोकः	२२३
अम्लाटनः	,,
सैरेयकः	,,
कुन्दम्	,,
मुचुकुन्दः	२२४
तिलकः	,,
बन्धुजीवः	,,
जपापुष्पम्	,,
सिन्दूरी	,,
मुनिवृक्षः	,,
तुलसी	,,
मरुबकः	२२५
दमनकः	,,
बर्बरी	,,
अथ षष्ठो वटादिवर्गः ६ ।	**२२६**
वटः	,,
पिप्पलः	,,
पिप्पलभेदः	,,
नन्दीवृक्षः	,,
उदुम्बरः	,,
काकोदुम्बरिका	२२७
प्लक्षः	,,
शिरीषः	,,
क्षीरिवृक्षपञ्चकं त्वक्पञ्चकं च	,,
शालः	२२८
शालभेदः	,,
शल्लकी	,,

विषयाः	पृ. सं.
शिंशपा	,,
ककुभः	,,
असनः	२२९
खदिरः	,,
श्वेतखदिरः	,,
इरिमेदः	,,
रोहीतकः	,,
बब्बूलः	,,
अरिष्टकः	२३०
पुत्रजीवः	,,
इङ्गुदः	,,
जिङ्गिनी	,,
तमालः	,,
तूणी	,,
भूर्जपत्रः	२३१
पलाशः	,,
शाल्मलिः	,,
मोचरसः	,,
कूटशाल्मलिः	२३२
धवः	,,
धन्वङ्गः	,,
करीरः	,,
शाखोटः	,,
वरुणः	२३३
कटभी	,,
मोक्षः	,,
जलशिरीषिका	,,

विषयाः	पृ. सं.
शमी	२३३
सप्तपर्णः	२३४
तिनिशः	,,
भूमीसहः	,,
अथ सप्तम आम्रादिवर्गः	,,
आम्रः	,,
आमाम्रफलम्	,,
शुष्कामाम्रफलम्	२३५
पक्वाम्रफलम्	,,
वृक्षपक्वाम्रफलगुणाः	,,
कृत्रिमपक्वाम्रफलगुणाः	,,
गालिताम्ररसगुणाः	,,
आम्रखण्डगुणाः	,,
दुग्धयुक्ताम्रगुणाः	,,
आम्रातियोगः	२३६
आम्रावर्त्तः	,,
आम्रबीजम्	,,
आम्रनवपल्लवः	,,
आम्रातकः	,,
राजाम्रः	२३७
कोशाम्रः	,,
पनसः	,,
पनसबीजगुणाः	,,
पनसमज्जगुणाः	,,
लकुचः	,,
कदली	२३८
कदलीभेदाः	,,

विषयाः	पृ. सं.
चिर्भिटम्	२३८
नारिकेलः	,,
कोमलजीर्णतरफलगुणाः	,,
नारिकेलजलगुणाः	२३९
नारिकेलादीनां शिरोगुणाः	,,
कालिन्दम्	,,
खर्बूजम्	,,
त्रपुसम्	,,
गुवाकः	,,
आर्द्रस्विन्नगुवाकगुणाः	२४०
तालः	,,
तालरसः	,,
बिल्वः	,,
पक्वबिल्वफलगुणाः	,,
बालबिल्वफलगुणाः	२४१
कपित्थः	,,
नारङ्गः	,,
तिन्दुकः	,,
कुपीलुः	,,
राजजम्बूः	२४२
जलजम्बुका	,,
बदरी	,,
बदरविशेषलक्षणगुणाः	,,
प्राचीनामलकम्	,,
लवली	२४३
करमर्दः	,,
प्रियालः	,,
राजादनः	२४३
विकङ्कतः	२४४
पद्माक्षम्	,,
मखान्नम्	,,
शृङ्गाटकम्	,,
कैरविणीफलम्	,,
मधूकः	,,
परूषकम्	२४५
तूतः	,,
दाडिमः	,,
बहुवारः	,,
कतकः	२४६
द्राक्षा	,,
क्षुद्रखर्जूरी–पिण्डखर्जूरी च	,,
खर्जूरीतरुतोयगुणाः	२४७
पिण्डखर्जूरीभेदः	,,
वातादः	,,
सेवम्	,,
अमृतफलम्	२४८
पीलुः	,,
अक्षोटः	,,
बीजपूरः	,,
मधुककंटी	,,
जम्बीरद्वयम्	,,
निम्बूकम्	२४९
मिष्टनिम्बूफलम्	,,
कर्मरङ्गम्	,,

विषयाः	पृ. सं.
आम्लिका	२४९
अम्लवेतसः	"
वृक्षाम्लकम्	२५०
चतुरम्लं पञ्चाम्लञ्च परिभाषाऽपि	"

अथाष्टमो धात्वादिवर्गः।

विषयाः	पृ. सं.
तत्र धातूनां लक्षणानि गुणाश्च	२५१
धातुशब्दस्य निरुक्तिः	"
सुवर्णस्योत्पत्तिस्तन्नामानि	"
उत्तमसुवर्णस्य लक्षणम्	"
निकृष्टसुवर्णस्य लक्षणम्	"
सम्यङ्मारितसुवर्णगुणाः	२५२
असम्यङ्मारितसुवर्णदोषाः	"
रूप्यस्योत्पत्तिः	"
कृत्रिमरूप्योत्पत्तिः	"
रूप्यनामानि	"
उत्तमाधमरूप्ययोर्लक्षणानि	"
सम्यङ्मारितरूप्यगुणाः	२५३
असम्यङ्मारितरूप्यदोषाः	"
ताम्रस्योत्पत्तिः	"
ताम्रनामानि	"
उत्तमाधमताम्रलक्षणानि	"
सम्यङ्मारितताम्रगुणाः	"
असम्यङ्मारितताम्रस्य दोषाष्टकम्	"
रङ्गम्	२५४
यसदम्	"
सीसम्	"
सीसस्य गुणाः	"
अशुद्धवङ्गनागयोर्दोषाः	२५४
लोहस्योत्पत्तिर्नामानि च	२५५
लोहस्य सप्तदोषाः	"
लोहगुणाः	"
अशुद्धलोहदोषाः	"
लोहसेविनां त्याज्यपदार्थाः	"
सारलोहस्य लक्षणं गुणाश्च	"
कान्तलोहस्य लक्षणं गुणाश्च	२५६
किट्टी	"
उपधातवः	"
तत्र सुवर्णमाक्षिकम्	"
अशुद्धसुवर्णमाक्षिकदोषाः	२५७
तारमाक्षिकम्	"
अशुद्धतारमाक्षिकदोषाः	"
तुत्थं खर्परञ्च	"
कांस्यम्	२५८
आरकूटम्	"
सिन्दूरम्	"
शिलाजतुन उत्पत्तिनामगुणाः	२५९
शिलाजतुभेदलक्षणगुणाः	"
रसस्य निरुक्तिः	"
पारदस्योत्पत्तिभेदाः	"
पारदस्य जातिभेदेन कर्मभेदाः	२६०
पारदस्य नामगुणाः	"
पारदस्यावस्थाभेदेन नामानि	"
पारदास्थितदोषफलम्	"
असंस्कृतपारदसेवननिषेधः	"

विषयाः	पृ. सं.
उपरससंख्या	२६१
हिंगुलस्य नामानि लक्षणं गुणाश्च	,,
हिंगुलोत्थपारदस्य शुद्धता	,,
गन्धकस्योत्पत्तिर्नामानि भेदाश्च	,,
गन्धकभेदानामुपयोगित्रिविषयाः	,,
गन्धकगुणाः	२६२
अशुद्धगन्धकदोषाः	,,
अभ्रकस्योत्पत्तिः	,,
अभ्रकस्य भेदास्तदुपयोगविषयाश्च	,,
अभ्रकस्यान्येऽपि भेदाः	,,
अभ्रकस्योत्पत्तिस्थानभेदाद्गुणभेदाः	२६३
मृताभ्रकस्य गुणाः	,,
अशुद्धाभ्रकदोषाः	,,
हरितालम्	,,
अशुद्धस्यासम्यङ्मारितस्य च हरितालस्य दोषाः	,,
मनःशिलाया नामगुणाः	२६४
अशुद्धमनःशिलाया दोषाः	,,
स्रोतोऽञ्जनं सौवीरञ्च	,,
टङ्कणस्य गुणाः	,,
स्फटिकाया नामानि गुणाश्च	२६५
राजावर्त्तस्य गुणाः	,,
चुम्बकस्य नामगुणाः	,,
गैरिकसुवर्णगैरिकयोर्नामगुणाः	,,
खटिकागौरखटिकयोर्नामगुणाः	,,
बालुकाया नामगुणाः	२६६
तुत्थभेदः खर्परी	,,

विषयाः	पृ. सं.
काशीशम्	२६६
सौराष्ट्री मृत्तिका	,,
कृष्णमृत्तिका	,,
कर्दमः (कीचड)	,,
कपर्दकम्	,,
शङ्खः	२६७
बोलस्य नामानि गुणाश्च	,,
कंकुष्ठस्योत्पत्तिर्भेदाश्च	,,
उत्तमाधमकंकुष्ठयोर्लक्षणम्	,,
कंकुष्ठगुणाः	,,
रत्नस्य निरुक्तिः	,,
रत्ननामानि	२६८
रत्नसंख्या	,,
विष्णुधर्मोत्तरोक्तनवरत्ननिरूपणम्	,,
हीरकस्य नामलक्षणभेदाः	,,
हीरकभेदगुणाः	,,
पुंस्त्रीनपुंसकभेदात् त्रिविधस्य तस्य-लक्षणगुणा उपयोगविषयाश्च	,,
अशुद्धहीरकदोषाः	२६९
मारितवज्रस्य गुणाः	,,
गारुत्मतस्य नामानि	,,
माणिक्यस्य नामानि	,,
पुष्परागस्य नामानि	,,
इन्द्रनीलं गोमेदश्च तयोर्नामानि	,,
वैदूर्यस्य नामानि	,,
मौक्तिकस्य नामोद्भवभूगुणाः	२७०
प्रवालस्य नामानि	,,

विषयाः	पृ. सं.
रत्नानां गुणाः	२७०
उपरत्नानां निरूपणं गुणाश्च	,,
विषम्	२७१
तत्र वत्सनाभस्य स्वरूपनिरूपणम्	,,
हारिद्रस्य स्वरूपनिरूपणम्	,,
सक्तुकस्य स्वरूपम्	,,
प्रदीपनः	,,
सौराष्ट्रिकः	,,
शृङ्गिकः	,,
कालकूटस्योत्पत्तिः स्वरूपं च	,,
हालाहलस्वरूपम्	२७२
ब्रह्मपुत्रस्वरूपम्	,,
विषस्य सलक्षणोपयोगा भेदाः	,,
विषदुर्गुणाः	,,
शोधितविषगुणाः	,,
विषशोधनस्यावश्यकता	२७३
उपविषाणां निरूपणम्	,,

नवमो धान्यवर्गः ।

विषयाः	पृ. सं.
धान्यानाम् भेदाः	,,
शाल्यादीनां भेदाः	,,
शालिधान्यानां लक्षणम्	,,
तेषां जातिभेदेन नामानि	,,
शालीनां गुणाः	२७४
कैदारजशालिगुणाः	,,
स्थलजशालिगुणाः	,,
वापितावापितशालिगुणाः	,,
नवपुराणरोपितशालिगुणाः	,,
छिन्नरूढशालिगुणाः	२७४
रक्तशालिगुणाः	२७५
व्रीहिधान्यानां लक्षणनामगुणाः	,,
षष्टिकानां लक्षणम्	,,
तेषां नामानि	,,
तेषां गुणाः	२७६
तत्र षष्टिकाया गुणाः	,,
शूकधान्यानि तत्र यवभेदाः	,,
तेषां गुणाः	,,
गोधूमस्य नामसलक्षणभेदाः	,,
गोधूमगुणाः	२७७
मधूलीनन्दीमुखयोर्गुणाः	,,
शिम्बीधान्यस्य नामानि गुणाश्च	,,
मुद्गः	,,
माषः	२७८
राजमाषः	,,
निष्पावः	,,
वनमुद्गः	,,
मसूरः	२७९
आढकी	,,
चणकः	,,
भर्जनादिभेदेन तस्य गुणभेदाः	,,
कलायः	,,
त्रिपुटः	,,
कुलत्थः	२८०
तिलः	,,
अतसी	,,

विषयाः	पृ. सं.
तुवरी	२८०
रक्तपीतसर्षपौ	२८१
राजिका कृष्णराजिका च	,,
क्षुद्रधान्यम्	,,
कङ्गुः	,,
चीनाकः	२८२
श्यामाकः	,,
कोद्रवो वनकोद्रवश्च	,,
चारुकः	,,
वंशयवाः	,,
कुसुम्भबीजम्	,,
गवेधुका	,,
नीवारः	२८३
यावनालः	,,
परिभाषा	,,
दशमः शाकवर्गः	,,
शाकनिरूपणम्	,,
शाकानां गुणाः	,,
वास्तुकद्वयम्	२८४
पोतकी	,,
श्वेतरक्तमारिषौ	,,
तण्डुलीयः	२८५
जलतण्डुलीयम्	,,
पलक्या	,,
कालशाकम्	,,
पट्टशाकः	,,
कलम्बी	२८६
लोणी बृहल्लोणी च	२८६
चाङ्गेरी	,,
चुक्रिका	,,
चञ्चुकी	,,
हिलमोचिका	२८७
शितिवारः	,,
मूलकपत्रम्	,,
द्रोणपुष्पी दलम्	,,
यवानीशाकम्	,,
दद्रुघ्नपत्रम्	,,
सेहुण्डः	२८८
पर्पटः	,,
गोजिह्वा	,,
पटोलपत्रम्	,,
गुडूचीपत्रम्	,,
कासमर्दः	,,
चणकशाकम्	,,
कलायशाकम्	२८९
सार्षपशाकम्	,,
अथ पुष्पशाकानि	,,
अगस्तिपुष्पम्	,,
कदलीपुष्पम्	,,
शोभाञ्जनस्य पुष्पं मधु च	,,
शाल्मलीपुष्पम्	,,
अथ फलशाकानि	
कूष्माण्डम्	२९०
कूष्माण्डी	,,

विषयाः	पृ. सं.
अलाबूर्दीर्घा वर्तुला च	,,
कटुतुम्बी	,,
कर्कटी	,,
चिचिण्डः	२९१
कारवेल्लं कारवेल्ली च	,,
महाकोशातकी	,,
राजकोशातकी	,,
पटोलः	,,
पटोलस्य मूलनालपत्रफलानां गुणाः	२९२
बिम्बी	,,
शिम्बी पुस्तशिम्बी च	,,
कोलशिम्बिः	,,
शोभाञ्जनफलम्	,,
वृन्ताकम्	,,
बालवृद्धफलयोर्गुणाः	२९३
अङ्गारपरिपाचितवृन्ताकफलगुणाः	,,
तैललवणान्वितवृन्ताकफलस्य श्वेतवृन्ताकस्य च गुणाः—	,,
डिण्डिशः	,,
पिण्डारम्	,,
कर्कोटी (ककोडा)	,,
डोडिका	,,
कण्टकारीफलम्	२९४

अथ नालशाकानि

विषयाः	पृ. सं.
तत्र सार्षपनालगुणाः	,,

अथ कन्दशाकानि

विषयाः	पृ. सं.
सूरणम्	२९४
आलुकम्	,,
आलुकमात्रगुणाः	२९५
आलुकी रक्तालुभेदः (अरुई)	,,
मूलकद्वयम्	,,
गृञ्जनम्	,,
कदलीकन्दः	२९६
मानकन्दः	,,
वाराहीकन्दः	,,
हस्तिकर्णा	,,
केमुकम्	,,
कसेरु चिचोढं च	,,
शालूकम्	२९७
अथनिषिद्धशाकीन	,,
सस्वेदजशाकानि	,,

अथैकादशो मांसवर्गः । २९८

विषयाः	पृ. सं.
मांसस्य नामानि गुणाः	,,
मांसभेदाः	,,
जाङ्गलमांसभेदाः सगुणाश्च	,,
आनूपमांसस्य भेदाः गुणाश्च	,,

अथ जाङ्गलाः ।

विषयाः	पृ. सं.
जङ्घालानां गणलाना लक्षणानि गुणाश्च	,,
विलेशयाः	२९९
गुहाशयाः	,,
पर्णमृगाः	,,
विष्किराः	३००

विषयाः	पृ. सं.
प्रतुदाः	३००
प्रसहाः	,,
ग्राम्याः	३०१

अथानूपाः

तत्र कूलेचराणां गणना गुणाश्च	,,
प्लावाः	,,
कोशस्थाः	,,
पादिनः	३०२
मत्स्याः	,,
अथ जङ्गलास्तत्र हरिणः	,,
कुरङ्गः	३०३
ऋष्यः	,,
पृषतः	,,
न्यङ्कुः	,,
सावरम्	,,
राजीवः	,,
मुण्डी	,,

अथ विलेशयाः

शशकः	,,
सेधा	३०४
अथ पक्षिणः	,,
वर्त्तकः	,,
लावः	,,
बार्त्तीकः	३०५
कृष्णतित्तिरिर्गौरतित्तिरिश्च	,,
चटकः	,,
कुक्कुटो वनकुक्कुटश्च	,,

विषयाः	पृ. सं.

अथ प्रतुदाः

हारीतः	३०५
पाण्डुर्धवलपाण्डुश्च	३०६
मयूरः	,,
पारावतः	,,
पक्ष्यण्डानि	,,

अथ ग्राम्याः

छागः	,,
प्रसूताजाया बालकाजासुतस्य च मांसगुणाः	३०७
निष्कासिताण्डवृद्धव्याधिमृतानां छागानां मांसस्य छागमुण्डस्य च गुणाः	,,
मेषः	,,
एडकः	,,
वृषभः	,,
अश्वः	३०८

अथ कूलेचराः

महिषः	,,
मण्डूकः	,,

अथ पादिनः

कच्छपः	,,

अथ विशेषाः

सद्योहतस्य मांसगुणाः	३०९
स्वयंमृतस्य ,,	,,
बालवृद्धयोः ,,	,,
विषादिमृतस्य ,,	,,
जात्यादिपरत्वेन ,,	,,

विषयाः	पृ. सं.
अथ मत्स्याः	
रोहितः	३१०
शिलोन्ध्रः	,,
भकुरः	,,
मोचिका	,,
पाठीनः	,,
शृङ्गी	,,
इल्लीशः	३११
शष्कुली	,,
गर्गरः	,,
कविका	,,
वर्मिमत्स्यः	,,
दण्डमत्स्यः	,,
एरङ्गः	,,
महाशफरः	,,
गरघ्नी	३१२
मद्गुरः	,,
सपादमत्स्यः	,,
प्रोष्ठी	,,
क्षुद्रमत्स्याः	,,
अतिक्षुद्रमत्स्याः	,,
मत्स्यगर्भः	,,
शुष्कमत्स्याः	,,
दग्धमत्स्यः	३१३
कूपजादिमत्स्याः	,,
ऋतुविशेषे मत्स्यविशेषाः	,,

विषयाः	पृ. सं.
द्वादशः कृतान्नवर्गः ।	
अन्नानां साधनप्रकाराः सिद्धानां गुणाश्च	,,
तत्र परिभाषा	,,
भक्तम्	३१४
दाली	,,
कृशरा	,,
तापहरी	,,
क्षीरिका	३१५
नारिकेरक्षीरी	,,
सेविका	,,
सामिता	,,
मण्डकः	,,
सानुपानमण्डकगुणाः	३१६
पोलिका	,,
लप्सिका	,,
रोटिका	,,
अङ्गारकर्कटी	३१७
यवरोटिका	,,
बलभद्रिका	,,
धूमसी	,,
झर्झरी	,,
चणकरोटिका	,,
पिष्टिका	३१८
वेढमिका	,,
पर्पटः	,,
पूरिका	,,

विषयाः	पृ. सं.
वटकः शुष्कः सरसश्च	३१९
काञ्जिकवटकः	,,
अम्लिकावटकाः	,,
मुद्गवटकाः	३२०
माषवटिकाः	,,
कूष्माण्डकवटी	,,
मुद्गवटी	,,
अलीकमत्स्यः	,,
क्वथिता (कढी)	३२१
अलीकमत्स्यगुणाः	,,
मुद्गार्द्रकवटकाः	,,
वेसनम्	,,
वेसनवटिका (फुलौरी)	३२२
अथ मांसस्य प्रकाराः ।	
तत्र शुद्धमांसम्	,,
वेशवारः	,,
शुद्धमांसगुणाः	,,
सहद्रकम्	,,
तक्रमांसम्	३२३
हरीसा	,,
तलितमांसम्	,,
शूल्यपलम्	,,
मांसश्रृङ्गाटकम्	३२४
सिद्धमांसरसः	,,
शाकपाकविधिः	,,

विषयाः	पृ. सं.
अथ पक्वान्नसाधनविधिः ।	
मण्डकः	३२५
सम्पावः	,,
कर्पूरनालिका	,,
फनिका	३२६
शष्कुली	,,
सेविकामोदकाः	,,
मुक्तामोदकाः	३२७
वेसनमोदकाः	,,
दुग्धकूपिका	,,
कुण्डालनी (जलेबी)	,,
अथ पश्चात्परिवेष्याणि ।	
रसाला (सिखरन)	३२८
शर्करोदकम् (सरबत)	३२९
अथ प्रपाणकानि ।	
अम्रफलप्रपाणकम्	,,
अम्लिकाफलपानकम्	,,
निम्बुकफलपानकम्	,,
धान्याकपानकम्	३३०
काञ्जी	,,
जालिः	,,
तक्रम्	,,
दुग्धम्	,,
सक्तवः	३३१
यवसक्तवः	,,
चणकयवसक्तवः	,,
शालिसक्तवः	,,

विषयाः	पृ. सं.
सक्तुविषये सामान्यपरिभाषा	३३१
धानाः	,,
लाजाः	३३२
चिपिटाः	,,
होलकः (होरहा)	,,
ऊबी	,,
कुल्माषाः (घुघुरी)	,,
पललम्	३३३
पिण्याकः	,,
तण्डुलः	,,
अथ त्रयोदशो वारिवर्गः ।	
तत्र पानीयस्य नामगुणाः	,,
पानीयस्य भेदाः	,,
धाराजलं तद्भेदाश्च	३३४
गाङ्गं सामुद्रं च जलम्	,,
अनार्तवजलम्	३३५
करकाजलम्	,,
तौषारजलम्	,,
हैमजलम्	,,
भौमजलभेदाः	३३६
जाङ्गलादिजलत्रयम्	,,
नादेयजलम्	,,
तस्य शीघ्रवहत्वादिभेदेन देशभेदेन च गुणभेदाः	,,
औद्भिदजलम्	३३७
नैर्झरजलम्	,,
सारसजलम्	,,

विषयाः	पृ. सं.
ताडागजलम्	३३७
वाप्यजलम्	,,
कौपजलम्	,,
चौण्ड्यजलम्	३३८
पाल्वलजलम्	,,
विकिरजलम्	,,
कैदारजलम्	,,
वृष्टिजलम्	,,
हेमन्तादिकालविशेषे विहिता जलविशेषाः	,,
अंशूदकम्	३३९
जलग्रहणस्य समयः	,,
जलस्य पानविधिः	,,
शीतलजलपानस्य विषयाः	३४०
शीतलजलपाननिषेधस्य विषयाः	,,
अल्पजलपानस्य विषयाः	,,
जलपानस्यावश्यकता	,,
गुणवत् तोयम्	,,
अवगुणकारि जलम्	,,
दूषितजलस्य शोधनोपायः	३४१
पीतजलस्य परिपाककालाः	,,
अथ चतुर्दशो दुग्धवर्गः ।	
दुग्धस्य नामानि गुणाश्च	,,
दुग्धपानार्हजनाः	,,
गोदुग्धम्	३४२
कृष्णादिगोदुग्धानि	,,
सद्यःप्रसूताया विवत्सायाश्च गोदुग्धगुणाः	,,

विषयाः	पृ. सं.
देशविशेषेण गोदुग्धगुणविशेषाः	३४२
आहारविशेषेण गोदुग्धस्य गुणविशेषाः	,,
माहिषदुग्धम्	३४३
अजादुग्धम्	,,
मृग्यादिदुग्धम्	,,
आविकदुग्धम्	,,
घोटकीदुग्धम्	,,
औष्ट्रदुग्धम्	,,
हस्तिनीदुग्धम्	,,
नारीदुग्धम्	,,
धारोष्णादिदुग्धानि	,,
पीयूषकिलाटक्षीरशाकतक्रपिण्डमोरटानां लक्षणानि गुणाश्च	३४४
संतानिका	,,
खण्डादियुक्तानि दुग्धानि	३४५
प्रभातादिभवानि दुग्धानि	,,
दुग्धसेवनस्य समयविशेषेण गुणविशेषाः	,,
मथितदुग्धम्	,,
दुग्धफेनम्	,,
निन्दितदुग्धस्य लक्षणम्	३४६
अथ पञ्चदशो दधिवर्गः ।	
दध्नो गुणाः	,,
दधिभेदाः	,,
मन्दादिदध्नो लक्षणं गुणाश्च	,,
गोदधि	३४७
माहिषदधि	३४७
आजदधि	,,
पक्वदुग्धजातदधि	,,
निःसारदुग्धजनितदधि	,,
गालितदधि	,,
शर्करादिसहितदधि	,,
रात्रौ दधिभक्षणस्य निषेधः	,,
ऋतुविशेषेण दधिभक्षणविधिनिषेधौ	३४८
विधिमन्तरा दधिसेवने दुर्गुणाः	,,
दध्नः सरमस्तुनोर्लक्षणं गुणाश्च	
अथ षोडशस्तक्रवर्गः ।	
तक्रस्य पृथक् २ नामलक्षणगुणाः	,,
उद्धृतस्तोकोद्धृतानुद्धृतघृतानां तक्राणां गुणाः	३४९
दोषविशेषे व्याधिविशेषे च तक्रविशेषाः	,,
पक्वापक्वतक्रयोर्गुणाः	,,
तक्रसेवनविषयाः	३५०
तक्रस्य निषेधविषयाः	,,
गव्यादीनां विशिष्टतक्राणां गुणाः	,,
अथ सप्तदशो नवनीतवर्गः ।	
नवनीतस्य नामगुणाः	,,
माहिषनवनीतम्	,,
दुग्धोत्थनवनीतम्	,,
सद्योनिःसारितनवनीतम्	,,
चिरन्तननवनीतम्	३५१

विषयाः	पृ. सं.
अष्टादशो घृतवर्गः ।	
घृतस्य नामगुणाः	३५१
तत्र गव्यघृतम्	,,
माहिषघृतम्	,,
आजघृतम्	,,
औष्ट्रघृतम्	३५२
आविकघृतम्	,,
नारीघृतम्	,,
वडवाघृतम्	,,
दुग्धनिःसृतघृतम्	,,
ह्यस्तनदुग्धोत्थघृतम्	,,
पुराणघृतम्	,,
नवीनघृतविषयाः	,,
घृतप्रयोगस्याविषयाः	३५३
अथैकोनविंशो मूत्रवर्गः ।	
तत्र गोमूत्रगुणाः	,,
मनुष्यमूत्रगुणाः	,,
मूत्रपरिभाषा	,,
अथ विंशस्तैलवर्गः ।	
तत्र तैलस्य स्वरूपं गुणाश्च	३५४
तिलतैलगुणाः	,,
तैलस्य बृंहणलेखनयोर्विषये विचारः	,,
घृततैलयोः परिभाषा	,,
सर्षपराजिकातैलयोर्गुणाः	३५५
तुवरीतैलम्	,,

विषया	पृ. सं.
अतसीतैलम्	३५५
कुसुम्भतैलम्	,,
खसबीजतैलम्	,,
एरण्डतैलम्	,,
सर्जरसतैलम्	३५६
सर्वतैलानां गुणाः	,,
अथैकविंशः सन्धानवर्गः ।	
काञ्जिकस्य लक्षणं गुणाश्च	,,
काञ्जिकसेवनायोग्यजनाः	,,
तुषोदकं तस्य लक्षणं गुणाश्च	३५७
सौवीरम्	,,
आरनालम्	,,
धान्याम्लम्	,,
शिण्डाकी	,,
शुक्तम्	,,
आसुतम्	,,
मद्यम्	३५८
अरिष्टम्	,,
सुरा	,,
वारुणी	,,
द्विविधः सीधुः	,,
आसवः	३५९
नवपुराणमदिरयोर्गुणाः	,,
सात्त्विकादिमनुष्याणां मद्येन जाताश्चेष्टाः	,,
मद्यगन्धस्य दूरीकरणोपायः	,,

विषयाः	पृ. सं.
अथ द्वाविंशो मधुवर्गः ।	
मधुनो नामगुणाः	३६०
मधुभेदाः	,,
तेषां लक्षणं गुणाश्च	,,
माक्षिकम्	,,
भ्रामरम्	,,
क्षौद्रम्	,,
पौत्तिकम्	३६१
छात्रम्	,,
आर्घ्यम्	,,
औद्दालकम्	,,
दालम्	,,
नवपुराणमधुगुणाः	३६२
शीतलोष्णमधुनोर्गुणदोषाः	,,
मधूच्छिष्टस्य नामगुणाः	,,
अथ त्रयोविंशः इक्षुवर्गः ।	
इक्षोर्नामगुणाः	,,
इक्षुभेदाः	३६३
श्वेतपौण्ड्रको भीरुकेक्षुश्च	,,
कोशकारेक्षुः	,,
कान्तारेक्षुः	,,
वंशकेक्षुः	,,
शतपोरकेक्षुः	,,
तापसेक्षुः	,,
काण्डेक्षुः	,,
सूचीपत्रनैपालदीर्घपत्रनीलपोराणां गुणाः	३६३
मनोगुप्तेक्षुः	,,
बालतरुणवृद्धेक्षुगुणाः	३६४
इक्षोरङ्गभेदेन गुणभेदाः	,,
चूषितेक्षुगुणाः	,,
यान्त्रिकेक्षुरसः	,,
पर्युषितेक्षुरसः	,,
पक्वेक्षुरसः	,,
इक्षुरसनिर्मितपदार्थगुणाः	,,
फाणितस्य लक्षणगुणाः	,,
मत्स्यण्डी	३६५
गुडः	,,
पुराणनवीनगुडौ	,,
अनुपानभेदेन गुडस्य गुणाः	,,
खण्डम्	,,
शर्करा	,,
पुष्पसिता सितोपला च	३६६
मधुखण्डगुणाः	,,
परिभाषा	,,
अथ चतुर्विंशोऽनेकार्थवर्गः ।	
द्व्यर्थानि नामानि	,,
त्र्यर्थानि नामानि	३६८
चतुरर्थानि नामानि	३७०
बह्वर्थानि नामानि	,,

इति प्रथमो भागः ।

द्वितीयो भागः।

सप्तमं परिभाषाऽऽदिप्रकरणम्।

विषयाः	पृ. सं.
१ मानपरिभाषाप्रकरणम्।	
मानोक्तौ हेतुः	३७१
मागधमानम्	,,
द्रवार्द्रशुष्कद्रव्याणां मानविषये परिभाषा	३७३
कुडवभाण्डस्य लक्षणम्	,,
कालिङ्गमानम्	,,
२ भेषजविधानप्रकरणम्।	
भेषजानां विधानानि	३७४
कषायभेदाः	,,
स्वरसविधिः	,,
तण्डुलजलविधिः	,,
हिमनिर्माणविधिः	,,
मन्थनिर्माणविधिः	३७५
फाण्टनिर्माणविधिः	,,
कल्कविधिः	,,
चूर्णविधिः	,,
अनुपानम्	,,
भावनाविधिः	३७६
पुटपाकविधिः	,,
उष्णोदकविधिः	,,

विषयाः	पृ. सं.
क्षीरपाकविधिः	३७६
क्वाथविधिः	,,
क्वाथपानमात्रा	३७७
क्वाथे सिताऽऽदीनां प्रक्षेपमानम्	,,
औषधभक्षणविधिः	,,
अवलेहविधिः	,,
गुटिकानिर्माणविधिः	३७८
घृततैलयोर्विधिः	,,
सिद्धस्नेहस्य लक्षणानि	३८०
स्नेहपाकस्य लक्षणपूर्वकं त्रैविध्यम्	,,
दग्धपाकस्य निष्प्रयोजनत्वं तथाऽऽमपाकस्य दोषाः	,,
मृद्वादिपाकानां विषयाः	,,
घृततैलादीनामुषितत्वस्य गुणकारकता	,,
सन्धानविधिः	,,
आसवारिष्टलक्षणानि	३८१
सामान्यतोऽरिष्टविधिः	,,
द्विविधः सीधुः	,,
सुरा सुराजातिश्च	,,
वारुणी	,,

विषयाः	पृ. सं.
शुक्तलक्षणम्	३८१
चुक्रलक्षणम्	,,
तुषोदकसौवीरारनालकाञ्जिक-शिण्डाकीलक्षणानि	३८२

३ धात्वादिशोधनमारण-विधिप्रकरणम् ।

विषयाः	पृ. सं.
मारणयोग्यसुवर्णस्य लक्षणम्	,,
मारणायोग्यसुवर्णस्य लक्षणम्	,,
सुवर्णस्य शोधनविधिः	,,
अशुद्धसुवर्णस्य दोषाः	,,
सुवर्णस्य मारणविधिः	,,
सुवर्णमारणस्य द्वितीयो विधिः	३८३
,, तृतीयो विधिः	,,
,, चतुर्थो विधिः	,,
मारितसुवर्णस्य गुणाः	३८४
असम्यङ्मारितसुवर्णस्य दोषाः	,,
अथ धात्वादिमारणोपयुक्ताः पुटप्रकाराः	,,
तत्र महापुटस्य प्रकारः	,,
गजपुटस्य प्रकारः	,,
वाराहकौक्कुटपुटयोः प्रकारः	३८५
कौक्कुटपुटस्यान्यः प्रकारः	,,
कपोतपुटस्य प्रकारः	,,
गोवरस्य प्रकारः	,,
गोवरपुटस्य प्रकारः	,,
भाण्डपुटस्य प्रकारः	,,
अथ यन्त्रप्रकाराः	३८५
तत्र बालुकायन्त्रम्	,,
दोलायन्त्रम्	३८६
स्वेदनयन्त्रम्	,,
विद्याधरयन्त्रम्	,,
भूधरयन्त्रम्	,,
डमरुयन्त्रम्	,,
मारणयोग्यरजतस्य लक्षणम्	,,
अयोग्यरजतस्य लक्षणम्	,,
रजतस्य शोधनम्	३८७
अशुद्धरजतस्य दोषाः	,,
रजतस्य मारणविधिः	,,
मारितरजतस्य गुणाः	,,
मारणयोग्यताम्रस्य लक्षणम्	,,
अयोग्यताम्रस्य लक्षणम्	,,
ताम्रस्य शोधनविधिः	३८८
ताम्रगतं दोषाष्टकम्	,,
ताम्रस्य मारणविधिः	,,
मारितताम्रस्य गुणाः	३८९
वङ्गस्य स्वरूपम्	,,
अशुद्धवङ्गस्य दोषाः	,,
वङ्गस्य शोधनविधिः	,,
वङ्गस्य मारणविधिः	,,
मारितवङ्गस्य गुणाः	,,
यशदस्य स्वरूपं गुणाश्च	३९०
सीसकस्य शोधनविधिः	,,
सीसकस्य मारणविधिः	,,

विषयाः	पृ. सं.
अपरः सीसकमारणविधिः	३९०
मारितसीसकस्य गुणाः	,,
अशुद्धलौहस्य दोषाः	,,
लौहस्य दोषशान्तये शोधनविधिः	३९१
लौहस्य मारणविधिः	,,
लौहमारणस्य तृतीयो तृतीयविधी	,,
मारितलौहस्य गुणाः	३९२
लौहभस्मभक्षणे मात्रा	,,
लौहसेवनसमये बर्जनीयद्रव्याणि	,,
सर्वधातूनां मारणे साधारणविधिः	,,
अथोपधातूनां मारणप्रकारः ।	
तत्राशुद्धस्वर्णमाक्षिकस्य दोषाः	,,
स्वर्णमाक्षिकस्य शोधनविधिः	,,
स्वर्णमाक्षिकस्य मारणाविधिः	,,
तारमाक्षिकस्य शोधनविधिः	३९३
तारमाक्षिकस्य मारणविधिः	,,
स्वर्णमाक्षिकरूप्यमाक्षिकयोर्विशेषगुणाः	,,
अशुद्धतुत्थस्य शोधनविधिः	,,
शुद्धतुत्थस्य गुणाः	,,
कांस्यपित्तलयोः शोधनविधिः	,,
तयोर्मारणविधिः	३९४
मारितकांस्यरीत्योर्गुणाः	,,
सिन्दूरस्य गुणाः	,,
शिलाजतुनो लक्षणं शोधनविधिश्च	,,
काथ्यद्रव्याणां भावनाफलम्	३९५

विषयाः	पृ. सं.
शोधितशिलाजतुनो गुणाः	३९६
रसस्य शोधनविधिः	,,
तत्रादौ स्वेदनविधिः	,,
मर्दनाविधिः	३९७
मूर्च्छनाविधिः	,,
ऊर्ध्वपातनविधिः	,,
अधःपातनाविधिः	३९८
मुख्यदोषहरणार्थं शोधनविधिः	,,
सर्वदोषहरसंक्षिप्तशोधनाविधिः	,,
पारदस्य मारणविधिः	,,
पारदमारणेऽपरो विधिः	३९९
पारदमारणे तृतीयो बिधिः	,,
रसकर्पूरनिर्माणविधिः	,,
सिन्दूररसविधिः	४००
मारितमूर्च्छितपारदयोर्गुणाः	४०१
अथोपरसानां शोधनविधिः ।	
हिङ्गुलस्य शोधनविधिः	,,
शोधितहिङ्गुलस्य गुणाः	,,
हिंगुलात्पारदनिष्कर्षणविधिः	,,
अशुद्धगन्धकस्य दोषाः	,,
गन्धकस्य शोधनविधिः	४०२
शुद्धगन्धकस्य गुणाः	,,
अशुद्धाभ्रकस्य दोषाः	,,
अभ्रकस्य शोधनविधिः	,,
अभ्रकस्य मारणाविधिः	,,
धान्याभ्रकस्य विधिः	,,
मारिताभ्रकस्य गुणाः	४०३

विषयाः — पृ. सं.

अशुद्धहरितालस्य दोषाः ४०३
हरितालस्य मारणविधिः ,,
शोधितमारितहरितालयोर्गुणाः ,,
अशुद्धमनःशिलाया दोषाः ४०४
मनःशिलायाः शोधनविधिः ,,
शोधितमनःशिलाया गुणाः ,,
खर्परस्तुत्थभेदस्तस्य शोधनविधिः ,,
शुद्धखर्परस्य गुणाः ,,
सर्वोपरसानां साधारणशोधनविधिः ,,
तेषामेव विशेषशुद्धिः ४०५

अथ रत्नानां शोधनमारणविधिः ।

अशुद्धवज्रस्य दोषाः ,,
वज्रस्य शोधनविधिः ,,
अन्यः शोधनविधिः ,,
वज्रस्य मारणविधिः ,,
अन्यो विधिः ,,
मारितवज्रस्य गुणाः ,,
शेषरत्नानां शोधनमारणविधिः ४०६

अथ विषोपविषाणां शोधनविधिः ।

वत्सनाभस्य स्वरूपम् ,,
विषस्य शोधनविधिः ,,
विषस्य गुणाः ,,
उपविषाणां निरूपणम् ,,
द्रव्याणां गुणवत्तायामवधिः ४०७
ग्रन्थान्तराद् घृततैलयोर्विशेषः ,,

४ स्नेहपानविधिप्रकरणम् ।

स्नेहस्य भेदा विशेषनामानि च ,,

विषयाः — पृ. सं.

स्नेहपानविधिः ४०८
सर्पिःपानार्हजनाः ४०९
वसापानार्हजनाः ,,
मज्जः सर्पिषोऽपि पानार्हजनाः ,,
शीतादिकालवातादिदोषभेदेन स्नेहपानसमयभेदाः ,,
नस्यादिषु तैलघृतयोः प्रयोगे नियमः ,,
घृतादिपानेऽनुपानानि ,,
स्नेहद्वेषिणां स्नेहपानविधिः ,,
स्नेहकारीणि पदार्थान्तराणि ४१०
स्नेहाजीर्णे कर्त्तव्यकर्माणि ,,
स्नेहपानजतृष्णायाः प्रशमोपायः ,,
स्नेहपानायोग्यजनाः ,,
स्नेहपानयोग्यजनाः ,,
सम्यक्स्निग्धस्य लक्षणम् ,,
अतिस्निग्धस्य लक्षणम् ४११
रूक्षातिस्निग्धयोर्जनयोः कर्त्तव्यकर्माणि ,,
स्नेहसेवनस्य गुणाः ,,
स्नेहसेवने त्याज्यकर्माणि ,,

५ पञ्चकर्मविधिप्रकरणम् ।

पञ्चकर्मनामानि ,,

अथ वमनम् ,,

वमनार्हसमयजनाः ,,
वमनानर्हजनाः ४१२
वमनविधिः ,,

विषयाः	पृ. सं.
अथ विरेचनम्	४१४
विरेचनार्हसमयजनाः	,,
मृदुमध्यमक्रूरकोष्ठास्तद्योग्यमात्राद्रव्यादीनि	४१५
ऋतुभेदेन विरेकद्रव्यभेदाः	४१६
अभयाऽऽदिमोदकः	,,
विरेकोत्तरकर्माणि	४१७
दुर्विरिक्तातिविरिक्तयोर्लक्षणं भेषजञ्च	,,
अथानुवासनम् ।	४१८
अनुवासननिरूहयोर्भेदः	,,
स्नेहवस्तिविधिः	,,
अथ निरूहः	४२३
निरूहवस्तिविधिः	,,
उत्क्लेशनवस्तिः	४२५
दोषहरवस्तिः	,,
शमनवस्तिः	,,
लेखनवस्तिः	,,
बृंहणवस्तिः	,,
पिच्छिलवस्तिः	,,
निरूहमात्राविधिः	,,
मधुतैलकवस्तिः	४२६
यापनवस्तिः	,,
युक्तरथवस्तिः	,,
सिद्धवस्तिः	,,
उत्तरवस्तिविधिः	,,
फलवर्त्तिविधिः	४२८

विषयाः	पृ. सं.
अथ नावनम् ।	
नस्यग्रहणविधिः	४२८
रेचननस्यमात्रा	,,
रेचननस्यविधिः	४२९
नस्यौषधप्रमाणम्	,,
रेचननस्यस्य भेदद्वयम्	,,
रेचननस्यभेदद्वयलक्षणम्	,,
रेचनस्नेहननस्योपयोगः	,,
वैरेचननस्यौषधिगुणाः	,,
रेचननस्यस्यापरविधिः	४३०
प्रधमननस्यस्यौषधिः	,,
बृंहणस्नेहननस्यस्य कल्पना	,,
बृंहणनस्यस्य विधिः	४३१
नस्यस्यान्यो विधिः	,,
प्रतिमर्शस्य मात्रा	,,
प्रतिमर्शस्य समयः	४३२
प्रतिमर्शस्य विषयाः	,,
नस्यस्य सामान्यविधिः	,,
नस्यदानानन्तरमकर्तव्यकर्माणि	४३३
नस्यहीनयोगातियोगचिकित्सा	,,
६ धूमपानादिविधिप्रकरणम्	४३४
अथ धूमपानविधिः	,,
धूमपाननालिकामानम्	४३५
धूमपानविधिः	,,
धूमपानौषधिकल्कः	,,
गृहदेयधूमः	४३६

विषयाः	पृ. सं.
अपराजितो धूमः	४३६
धूमपाने त्याज्यकार्याणि	,,
अथ गण्डूषकवलप्रतिसारणविधिः	
तत्रादौ गण्डूषविधिः	,,
गण्डूषभेदाः	,,
गण्डूषकवलौषधमानम्	४३७
गण्डूषकवलयोरवस्थामर्यादा	,,
कवलविधिः	,,
प्रतिसारणविधिः	,,
अथ स्वेदविधिः	,,
तापस्वेदविधिः	४३९
उष्मस्वेदविधिः	,,
उपनाहस्वेदविधिः	,,
द्रवस्वेदविधिः	४४०
मूर्द्धतैलविधिः	४४१
कर्णपूरणविधिः	४४२
लेपविधिः	,,
दोषघ्नो लेपः	४४३
विषहा लेपः	,,
अपरः कृमिविषापहलेपः	,,
मुखकान्तिदो लेपः	,,
शोणितस्रावणविधिः	४४४
नेत्रस्वच्छकारिणीक्रिया	४४७
तत्रादौ सेकविधिः	,,
आश्च्योतनविधिः	४४८
पिण्डिकाविधिः	,,
विडालकविधिः	४४९
तर्पणविधिः	,,
यथार्थतर्पणचिह्नम्	४५०
अतितर्पितहीनतर्पितयोर्लक्षणं प्रतीकारोऽयोग्यसमयश्च	,,
पुटपाकविधिः	,,
तिक्तद्रव्याणि	४५१
अञ्जनविधिः	,,
लेखनकारिणी चन्द्रोदयावर्त्तिः	४५२
रोपणकारिणी कुसुमिकावर्त्तिः	४५३
स्नेहनकारिणीवर्त्तिः	,,
लेखनकारिणी रसक्रिया	,,
रोपणी रसक्रिया	,,
स्नेहनकारिणी रसक्रिया	,,
लेखनचूर्णम्	४५४
रोपणचूर्णम्	,,
स्नेहनचूर्णम्	,,
प्रत्यञ्जनसेवनविधिः	,,
नयनामृतचूर्णम्	,,
दृष्टिस्वच्छकारिणी शलाका	४५५
अथ भेषजभक्षणसमयाः	,,
तत्र प्रथमकालस्य विषयाः	,,
द्वितीयकालस्य विषयाः	,,
तृतीयकालस्य विषयाः	,,
चतुर्थकालस्य विषयाः	४५६
पञ्चमकालस्य विषयाः	,,
निरन्नकोष्ठ ओषधिसेवनगुणाः	,,
अन्नेन सहौषधिसेवनगुणाः	,,

विषयाः	पृ. सं.
औषधपाकापाकयोश्चिह्नम्	४५६
चरकोक्तौषधसेवनविधिः	,,
सप्तमं रोगिपरीक्षाप्रकरणम्	४५७
रोगिपरीक्षा	,,
नेत्रपरीक्षा	,,
जिह्वापरीक्षा	४५८
मूत्रपरीक्षा	,,
नाडीपरीक्षा	,,
येन येन रोगाणां ज्ञानं स्यात्तस्य तस्योक्तिः	४५९
हेतोर्लक्षणम्	,,
संप्राप्तिलक्षणम्	,,
संप्राप्त्यौपाधिकभेदाः	४६०
विकल्पव्याख्यानम्	,,
प्रधानव्याख्यानम्	,,
बलव्याख्यानम्	,,
कालव्याख्यानम्	४६१
पूर्वरूपस्य लक्षणम्	,,
लक्षणस्य लक्षणम्	,,
उपशयस्य लक्षणम्	४६२
वायोरुपशयः	,,
पित्तस्योपशयः	,,
कफस्योपशयः	,,
रोगनिदानविवेचनम्	४६३
वायोः प्रकोपस्य कारणानि	,,
पित्तप्रकोपस्य कारणानि	४६४
विदाहिलक्षणम्	,,
कफप्रकोपस्यकारणानि	,,
एको रोगोऽन्यरोगनिमित्तमित्तत्यस्य कथनम्	४६५
रोगस्य हेतौ रोगस्य वैचित्र्यम्	,,
वृद्धक्षीणानां दोषधातुमलानां सुश्रुतोक्तचिकित्सा	४६६
स्वस्थस्य लक्षणम्	,,
दोषधातुमलानां वृद्धेर्निदानानि	४६७
अतिवृद्धानां तेषां लक्षणानि	,,
अतिवृद्धानां तेषां ह्रासनम्	४६८
दोषधातुमलानां क्षयस्य निदानानि	,,
क्षीणानां तेषां लक्षणानि	४६९
ओजःक्षयस्य निदानानि	,,
क्षीणौजसो लक्षणम्	,,
मलक्षयस्य लक्षणम्	,,
मूत्रादीनां क्षयस्य लक्षणम्	४७०
क्षीणधातुदोषमलानां बर्धनविधिः	,,
केन दोषेण क्षीणो नरः किं वस्त्वभिकाङ्क्षतीत्यस्य कथनम्	,,
सुश्रुतोक्तबललक्षणम्	४७२
बलक्षयस्य निदानम्	,,
बलक्षयस्य लक्षणम्	,,
बलवृद्धेर्निदानम्	,,
बलाबललक्षणम्	,,

इति ।

प्राप्तिस्थानम्—

चौखम्बा संस्कृत पुस्तकालय

बनारस सिटी।

॥ श्रीः ॥

भावप्रकाशस्य मध्यखण्डे—

विषयानुक्रमणिका ।

अष्टमं चिकित्साप्रकरणम् ।

विषयाः	पृ. सं.
१ तत्रादौ ज्वराधिकारः ।	
ज्वरस्य प्रथमोत्पत्तिकथनम्	१
ज्वरमूर्त्तिवर्णनम्	२
ज्वरस्य विप्रकृष्टकारणकथनपूर्विका-सम्प्राप्तिः	३
ज्वरस्य सामान्यविशेषपूर्वरूपम्	,,
द्वन्द्वजपूर्वरूपम्	४
सान्निपातिकपूर्वरूपम्	,,
ज्वरस्य सामान्यलक्षणम्	,,
प्रस्वेदानिर्गमनपक्षे कारणम्	५
ज्वरस्य सामान्यचिकित्सा	,,
व्यजनानिलस्य गुणाः	,,
सामान्यज्वरपथ्यानि	,,
तरुणज्वरे त्याज्यानि	,,
त्याज्यसेवनादवगुणाः	,,
तरुणज्वरत्याज्यव्यायामादीनां सेवने-पृथक् पृथग् दोषाः	६
"ज्वरी लङ्घनं कुर्यादि"त्यत्र चरकवाग्भटयोर्मतम्	,,
दोषपाकसमयः	७
लङ्घनविषये विचारः	,,
उपवासरूपलङ्घनस्य फलम्	९
सम्यक्कृतस्य लङ्घनस्य लक्षणम्	,,
हीनलङ्घनस्य लक्षणम्	१०
अतिशयितलङ्घनस्य लक्षणम्	,,
"बलरक्षणं लङ्घनं कारयेदि"ति कथनम्	,,
अनशननिषेधविषयाः	,,
आमस्य लक्षणम्	११
सामस्य वातस्य लक्षणम्	,,
निरामस्य वातस्य लक्षणम्	१२
प्रसङ्गात् सामस्य पित्तस्य लक्षणम्	,,
निरामपित्तस्य लक्षणम्	,,
सामकफस्य लक्षणम्	,,
निरामकफस्य लक्षणम्	,,
सामस्य व्याधेर्लक्षणम्	,,
"ज्वरी लङ्घनेऽपि जलम्पिबेदि"त्यत्र सुश्रुतमतम्	,,
शीतलजलपानस्य निषेधः	१३

विषयाः	पृ. सं.
क्वथितजलस्य विधिर्गुणा विषयाश्च	१३
उष्णोदकस्य लक्षणं गुणाश्च	१४
ऋतुभेदेन जलस्य पाकभेदः	,,
ग्रन्थान्तरोक्तारोग्याम्बुनाम्नस्तस्य लक्षणं गुणाश्च	,,
ऋतुभेदेन जलग्रहणम्	१५
शृतशीतलजलपानविषयाः	,,
क्वथितस्य जलस्य शीतलीकरणविशेषे गुणविशेषः	,,
तत्रापरेऽपि विशेषाः	१६
रात्रौ तूष्णोदकस्य लक्षणान्तरम्	,,
तस्य गुणाः	,,
"रात्रावुष्णोदकञ्च तत्समेव पिबेदि"ति कथनम्	,,
अपक्वशीतलजलपानस्य विषयविशेषः	,,
आमादिजलानां जठराग्निना पाककालावधिः	१७
रोगविशेषे जलसंस्कारः	,,
तत्र विचारः	,,
दिननिद्रानिषेधः	१८
दिवाशयनार्हजनाः	१९
वातिकादिज्वराणां पाकावधिः	,,
ज्वरस्य तारुण्यमध्यावस्थाजीर्णताऽवधिः	,,
ज्वरौषधदानसमयः	,,
दोषपाकलक्षणम्	२१
तरुणज्वरे कषायस्य दोषः	२२
तरुणज्वरे वमननिषेधः	२३
अवस्थाविशेषे वमनोपदेशः	,,
पाचनशमनौषधदानसमयः	,,
सामान्यज्वरे पाचनकषायः	२४
सर्वज्वरेषु सामान्यतः संशमनौषधिः	,,
दुग्धपाकः	२५
गुडूच्यादिक्वाथः	,,
संशोधननिषेधः	,,
निषिद्धस्यापि संशोधनस्यावस्थाविशेषे दानम्	,,
शोधनसाध्यरोगाः	,,
संशोधनम्	२६
आरोग्यपञ्चकद्वयम्	,,
सारिवाऽऽदिकल्कः	,,
संशोधनशमनौषधनिषेधः	२७
सुदर्शनचूर्णम्	,,
निम्बादिचूर्णम्	२८
शठ्यादिक्वाथः	,,
हरीतक्यादिगुटी	,,
लाक्षाऽऽदितैलम्	२९
द्वितीयं लाक्षाऽऽदितैलम्	,,
महालाक्षाऽऽदितैलम्	,,
नवज्वरे रसप्रयोगः।	३०
उदकमञ्जरीरसः	१७
ज्वरधूमकेतुरसः	३१
महाज्वराङ्कुशरसः	,,
ज्वरघ्नी वटिका	,,

विषयाः	पृ. सं.
नवज्वरहरी वटिका	३२
सर्वज्वरहररसः	,,
सामान्यज्वरे रसाः ॥	,,
महाज्वराङ्कुशरसः	,,
श्वासकुठाररसः	३३
ज्वराङ्कुशः	,,
हुताशनरसः	,,
ज्वरघ्नीवटिका	३४
रविसुन्दररसः	,,
कज्जली	,,
रसपर्पटी	,,
ज्वरिणोऽन्नदानसमये चरकोक्तिः	३५
तद्विषयकविचारः	३६
विषमज्वरे चरकोक्तान्नदानसमये विशेषः	३७
भोजनादिस्थाननिर्णयः	,,
ज्वरितस्योपवेशनप्रकारः	,,
अन्नग्रहणसमये ज्वरितेन कवलकरणकथनम्	३८
ज्वरिणे हितवस्तुदानकथनम्	,,
ज्वरिताय हितान्यन्नादीनि	,,
अन्नसाधनप्रक्रिया	३९
मण्डस्य लक्षणविधिगुणाः	,,
पेयाया विधिगुणाः	,,
प्रमथ्याया विधिगुणाः	४०
यूषस्य विधिगुणाः	,,
यूषस्य प्रकारान्तरम्	,,

विषयाः	पृ. सं.
मुद्गयूषविधिः	४०
मुद्गयूषगुणाः	४१
मुद्गामलकयूषगुणाः	,,
मसूरयूषगुणाः	,,
यवाग्वा विधिगुणाः	,,
विलेप्या विधिगुणाः	,,
भक्तस्य विधिगुणाः	,,
रसौदनस्य विधिः	४२
रसौदनगुणाः	,,
मण्डादिपदार्थप्रक्रिया	,,
औषधसिद्धपेयागुणाः	,,
वातज्वरादौ पेयासाधनौषधविधानम्	४३
पञ्चमुष्टिकयूषः	४४
वर्त्तिप्रयोगः	,,
पेयायवाग्वोश्च क्वचिदपवादः	,,
सन्तर्पणस्वरूपम्	,,
गुणाधिकारोक्तलाजशक्तुगुणाः	,,
चरकोक्ततर्पणप्रकारः	४५
ज्वरघ्नानि फलानि	,,
ज्वररोगिनियमाः	,,
ज्वरविमुक्तेः पूर्वरूपम्	४६
ज्वरमुक्तस्य लक्षणम्	,,
ज्वरमुक्तस्य पालनीयनियमाः	,,
वातज्वराधिकारः	४७
वातज्वरस्य निदानं संप्राप्तिश्च	,,
वातज्वरस्य लक्षणम्	,,
वातज्वरचिकित्सा	४८

विषयाः	पृ. सं.
तत्र भेषजम्	४८
दशमूलादिक्वाथः	,,
बृहत्पञ्चमूलीक्काथः	४९
किराताादिक्काथः	,,
कालिङ्गक्काथः	,,
विश्वाऽऽदिक्काथः	,,
बृहत्पञ्चमूलादिक्वाथः	,,
कणाऽऽदिक्काथः	५०
कल्पतरुरसः	,,
त्रिपुरभैरवरसः	,,
स्वेदस्य विधिगुणाः	,,
वालुकास्वेदः	५१
कवलस्य विधिगुणाः	,,
निद्रानाशस्य निदानम्	,,
निद्रानाशचिकित्सा	,,
दारुषट्कलेपः	५२
कर्णनादचिकित्सा	,,
शुष्ककासचिकित्सा	,,
वातज्वरहितवस्तूनि	,,
पित्तज्वराधिकारः	५३
पित्तज्वरस्य निदानं संप्राप्तिश्च	,,
पित्तज्वरस्य लक्षणम्	,,
पित्तज्वरस्य चिकित्सा	५४
तिक्ताऽऽदिक्काथः	,,
पर्पटादिक्वाथः	,,
द्राक्षाऽऽदिक्काथः	,,
पटोलादिक्काथः	,,
गुडूच्यादिक्काथः	,,

विषयाः	पृ. सं.
ह्रीबेरादिक्काथः	५५
भूनिम्बादिक्काथः	,,
महाद्राक्षाऽऽदिक्वाथः	,,
धान्याकक्वाथः	,,
अमृताहिमवासाहिमौ	,,
द्वितीयो गुडूच्यादिक्वाथः	,,
प्रलेपः	५६
शीतलजलधारा	,,
पथ्याऽवलेहः	,,
आर्द्रवस्त्रधारणम्	,,
कवलः	,,
तर्पणम्	,,
पित्तज्वरोपचारः	,,
कफज्वराधिकारः	५७
कफज्वरस्य निदानं सम्प्राप्तिश्च	,,
कफज्वरस्य लक्षणम्	,,
श्लेष्मज्वरस्य चिकित्सा	५८
पिप्पल्यादिक्काथः	,,
पिप्पल्यवलेहः	,,
चतुर्भद्रिकाऽवलेहः	,,
अष्टाङ्गावलेहः	,,
निर्गुण्डीक्काथः	५९
यवान्यादिक्काथः	,,
वासाऽऽदिक्काथः	,,
मरिचादिक्काथः	,,
कल्पतरुरसः	,,
कवलः	,,

विषयाः	पृ. सं.
अन्नम्	५९
वातपित्तज्वराधिकारः	,,
वातपित्तज्वरस्य निदानं संप्राप्तिश्च	,,
वातपित्तज्वरपूर्वरूपम्	६०
वातपित्तज्वरस्य लक्षणम्	,,
वातपित्तज्वरस्य चिकित्सा	,,
किराताद्दिक्काथः	,,
पञ्चभद्रक्काथः	,,
त्रिफलाऽऽदिक्काथः	,,
मधुकादिहिमः	,,
अन्नम्	६१
वातश्लेष्मज्वराधिकारः	,,
वातश्लेष्मज्वरस्य निदानं संप्राप्तिश्च	,,
वातकफज्वरस्य पूर्वरूपम्	,,
वातकफज्वरस्य लक्षणम्	,,
वातकफज्वरस्य चिकित्सा	६२
पञ्चकोलम्	,,
द्वितीयः किराताद्दिक्काथः	,,
पिप्पल्यादिक्वाथः	,,
बृहत्पिप्पल्यादिक्काथः	,,
दशमूलीक्वाथः	६३
पिप्पलीक्वाथः	,,
सूर्यशेखररसः	,,
उद्धूलनम्	,,
मरिचाद्युद्धूलनम्	६४
वालुकास्वेदः	,,
भूनिम्बाद्युद्धूलनम्	,,

विषयाः	पृ. सं.
कवलः	६४
अन्नम्	,,
पित्तकफज्वराधिकारः	,,
पित्तकफज्वरस्य निदानं संप्राप्तिश्च	,,
पित्तकफज्वरपूर्वरूपम्	,,
पित्तकफज्वरलक्षणम्	६५
पित्तकफज्वरचिकित्सा	,,
गुडूच्यादिक्काथः	,,
अमृताष्टकक्काथः	,,
कण्टकार्यादिक्काथः	,,
नागरादिक्काथः	,,
कटुकीकल्कः	,,
वासारसः	६६
शृङ्गबेरादिक्काथः	,,
अन्नम्	,,
सन्निपातज्वराधिकारः	,,
सन्निपातज्वरस्य निदानं संप्राप्तिश्च	,,
सन्निपातज्वरस्य सामान्यलक्षणानि	,,
सामान्यसन्निपातज्वरस्य त्रयोदशभेदाः	६७
अनुक्रमेण त्रयोदशसन्निपातनामानि	६८
वातोल्वणविस्फारकलक्षणम्	,,
पित्तोल्वणाशुकारिलक्षणम्	,,
कफोल्वणकम्पनलक्षणम्	,,
वातपित्तोल्वणबभ्रुलक्षणम्	,,
वातकफोल्वणशीघ्रकारिलक्षणम्	६९
पित्तकफोल्वणभल्लुलक्षणम्	,,

विषयाः	पृ. सं.
वातपित्तकफोल्वणकूटपाकललक्षणम्	६९
अधिकवात-मध्येपित्त-हीनकफ-सम्मोहकसन्निपातलक्षणम्	७०
मध्यवाताधिकपित्तहीनकफपाकलसन्निपातलक्षणम्	,,
हीनवाता-धिकपित्त-मध्यकफ-याम्यसन्निपातलक्षणम्	७१
अधिकवात-हीनपित्त-मध्यकफ-क्रकचसन्निपातलक्षणम्	,,
मध्यवात-हीनपित्त-मध्यकफ-कर्कटकसन्निपातलक्षणम्	,,
हीनवात-मध्यपित्ता-धिककफ वैदारिकसन्निपातलक्षणम्	७२
सन्निपातज्वरविशेषाणां तन्त्रान्तरस्थ-नामानि	,,
तेषां प्रत्येकं लक्षणानि	,,
शीताङ्गसन्निपातलक्षणम्	,,
तन्द्रिकसन्निपातलक्षणम्	७३
प्रलापकसन्निपातलक्षणम्	,,
रक्तष्ठीविसन्निपातलक्षणम्	,,
भुग्ननेत्रसन्निपातलक्षणम्	,,
अभिन्यासन्निपातलक्षणम्	,,
जिह्वकसन्निपातलक्षणम्	७४
सन्धिगसन्निपातलक्षणम्	,,
अन्तकसन्निपातलक्षणम्	,,
रुग्दाहसन्निपातलक्षणम्	,,
चित्तभ्रमसन्निपातलक्षणम्	,,

विषयाः	पृ. सं.
कर्णिकसन्निपातलक्षणम्	७४
कण्ठकुब्जसन्निपातलक्षणम्	७५
सन्निपातज्वरसाध्यासाध्यत्वम्	,,
अन्यग्रन्थोक्तवातोल्वणादित्रयोदश-सन्निपातानां कुम्भीपाकादिनामानि	,,
एषां लक्षणानि	,,
कुम्भीपाकलक्षणम्	,,
प्रोर्णुनावलक्षणम्	,,
प्रलापिसन्निपातलक्षणम्	,,
अन्तर्दाहलक्षणम्	,,
दण्डपातसन्निपातज्वरलक्षणम्	७६
अन्तकसन्निपातलक्षणम्	,,
एणीदाहसन्निपातलक्षणम्	,,
हारिद्रकसन्निपातलक्षणम्	,,
अजघोषसन्निपातलक्षणम्	,,
भूतहाससन्निपातलक्षणम्	,,
यन्त्रापडिसन्निपातलक्षणम्	,,
संन्याससन्निपातलक्षणम्	,,
संशोषिसन्निपातलक्षणम्	,,
सन्निपातज्वरभयङ्करता	७७
असाध्यसन्निपातज्वरलक्षणम्	,,
सन्निपातस्य साध्यासाध्यता	,,
सामान्यसन्निपातज्वरचिकित्सा	,,
सन्निपातज्वरलङ्घनावधिः	७८
त्रिदोषज्वरस्य हननप्रशमयोः-कारणकथनम्	७९
धातुपाकलक्षणम्	,,

विषयाः	पृ. सं.
मलपाकलक्षणम्	७९
हननप्रशमयोः परमावधिः	८०
सन्निपातज्वरे प्रथमकर्त्तव्यता	,,
लङ्घनम्	,,
वालुकास्वेदः	,,
सैन्धवादिनस्यम्	,,
मधूकसारादिनस्यम्	८१
निष्ठीवनम्	,,
अवलेहः	,,
अष्टाङ्गावलेहः	,,
चतुरङ्गावलेहः	८२
अञ्जनम्	,,
शिरीषबीजाद्यञ्जनम्	,,
लोहचूर्णाद्यञ्जनम्	,,
दण्डपाण्युक्ताञ्जनम्	८३
लेपः	,,
दशमूलक्वाथः	,,
द्वादशाङ्गक्वाथः	,,
चतुर्दशाङ्गक्वाथः	,,
किराततिक्तादिगणः	८४
अष्टादशाङ्गक्वाथः	,,
द्वितीयोऽष्टादशाङ्गक्वाथः	,,
सन्निपातज्वरे रसाः ।	
मृतसञ्जीवनीवटिका	,,
त्रिनेत्ररसः	,,
रसेन्द्रचिन्तामण्युक्तभस्मेश्वररसः	८५
अग्निकुमाररसः	,,
पञ्चवक्त्ररसः	८५
अमृतादिवटी	८६
शीतज्वरे रसाः ।	
शीतज्वरारिरसः	,,
शीतकेशरी रसः (रसप्रदीपे)	,,
शीतभञ्जीरसः	,,
रसेन्द्रचिन्तामण्युक्तः शीतभञ्जी रसः	८७
रसरत्नप्रदीपोक्तः शीतभञ्जी रसः	,,
कट्फलादिपानम्	,,
शीतलजलनिषेधः	८८
अन्नम्	,,
वातोल्बणसंनिपातज्वरे-चिकित्सा	,,
बृहत्यपञ्चमूलीक्वाथः	८९
परूषकादिक्वाथः	,,
किरातादिसप्तकम्	,,
कफोल्बणसंनिपातज्वरचिकित्सा	
बृहत्यादिक्वाथः	,,
लघुपञ्चमूलक्वाथः	,,
चातुर्भद्रकक्वाथः	,,
पर्पटादिक्वाथः	,,
योगराजक्वाथः	९०
प्रवृद्धहीनवातादिसंनिपात-ज्वरचिकित्सा	,,
शीताङ्गस्य चिकित्सा	९१
तन्द्रिकस्य चिकित्सा	,,
प्रलापकस्य चिकित्सा	,,

विषयाः	पृ. सं.	विषयाः	पृ. सं.
रक्तष्ठीविसन्निपातचिकित्सा	९२	आगन्तुज्वराणां हेतुभेदेन लक्षणभेदाः	९९
भुग्ननेत्रस्य चिकित्सा	,,	कामज्वरस्य चिकित्सा	१००
अभिन्यासस्य चिकित्सा	,,	भयादिजज्वराणां विशेषलक्षणानि	,,
शृङ्ग्यादिक्वाथः	,,	आगन्तुकज्वराणां चिकित्सा	१०१
जिह्वकचिकित्सा	९३	सर्वगन्धः	,,
किरातादिकवलः	,,	**विषमज्वराधिकारः**	१०२
शालूरपर्ण्याद्यवलेहः	,,	विषमज्वरसम्प्राप्तिः	,,
क्षुद्राऽऽदिविश्वाऽऽदिक्वाथौ	,,	रसादिधातुविशेषेण विषमज्वरविशेषाः	१०३
सन्धिकसन्निपातस्य चिकित्सा	,,	विषमज्वरस्य सामान्यलक्षणम्	,,
अन्तकज्वरस्य चिकित्सा	९४	विषमज्वरस्य भेदाः	,,
रुग्दाहस्य चिकित्सा	,,	सन्ततज्वरस्य लक्षणम्	,,
षडङ्गपानीयम्	,,	सततज्वरस्य लक्षणम्	१०४
धान्याकक्वाथः	९५	अन्येद्युष्कज्वरस्य लक्षणम्	,,
पथ्याऽवलेहः	,,	तृतीयकचातुर्थिकज्वरयोर्लक्षणम्	,,
लेपः	,,	तत्र सुश्रुतप्रमाणम्	,,
जलधारा	,,	द्विदोषोल्वणतृतीयकज्वरस्यलक्षणम्	१०५
अवगाहनम्	,,	कफोल्वणवातोल्वणयोश्चतुर्थकज्वरयोर्लक्षणम्	१०६
अवगुण्ठनम्	,,	चतुर्थकविपर्ययाद्यन्यविषमज्वराणां लक्षणम्	,,
अन्नम्	,,	सन्ततादिज्वरे पूर्वं शीतस्य दाहस्य वोत्पत्तौ हेतुः	१०७
दाहनाशका अन्योपायाः	,,	शीतदाहादिज्वरयोस्त्रिदोषजताकथनम्	,,
चित्तभ्रमस्य चिकित्सा	९६		
कर्णिकसन्निपातचिकित्सा	९७		
कण्ठकुब्जचिकित्सा	९८		
आगन्तुकज्वराधिकारः	,,		
आगन्तुकज्वरनिदानम्	,,		
आगन्तुकज्वरान्यनिदानम्	,,		
"कस्यागन्तोः को निजो दोष" इत्यपेक्षायां कथनम्	९९		

विषयाः	पृ. सं.
विषमज्वरविशेषः	१०७
विषमज्वरविशेषस्य प्रलेपकस्य लक्षणम्	,,
विषमज्वराणां सामान्यचिकित्सा	१०८
सन्ततादिज्वराणां सामान्य चिकित्सा ।	
गुडूचीमोदकः	१०९
विषमज्वरिणां भोजनम्	,,
सन्ततादिज्वराणां विशिष्टा-चिकित्सा	,,
शीतज्वरे भूतभैरवचूर्णम्	१११
कायस्थाऽऽदिधूपलेपतैलानि	,,
दाहस्य चिकित्सा	११२
षड्गुणतक्रतैलम्	,,
महाषड्गुणतक्रतैलम्	,,
पद्मकादितैलम्	,,
प्रलेपकस्य चिकित्सा	११३
माहेश्वरधूपः	,,
ज्वरे देवानां स्तुतिपूजने	,,
रसादिधातुगतज्वराणां लक्षणचिकित्से ।	
रसगतज्वरस्य लक्षणम्	११४
रसगतज्वरस्य चिकित्सा	,,
रक्तगतज्वरस्य लक्षणम्	,,
रक्तगतज्वरस्य चिकित्सा	,,
मांसगतज्वरस्य लक्षणम्	,,
मांसगतज्वरस्य चिकित्सा	,,

विषयाः	पृ. सं.
मेदोगतज्वरस्य लक्षणम्	११४
मेदोगतज्वरस्य चिकित्सा	,,
अस्थिगतज्वरस्य लक्षणम्	११५
अस्थिगतज्वरस्य चिकित्सा	,,
मज्जगतज्वरस्य लक्षणम्	,,
शुक्रगतज्वरस्य लक्षणम्	,,
जीर्णज्वराधिकारः ।	
जीर्णज्वरस्य सामान्यलक्षणम्	,,
जीर्णज्वरविशेषवातबलासकलक्षणम्	,,
जीर्णज्वरस्य सामान्यचिकित्सा	,,
त्रिकण्टकक्वाथः	११६
पिप्पल्यादिक्वाथादिकाः	,,
आमलकादिचूर्णम्	,,
द्राक्षाऽऽद्यष्टादशाङ्गक्वाथः	,,
बर्द्धमानपिप्पली	११७
दुर्जलजनितज्वराचिकित्सा	
हरीतक्यादिचूर्णम्	,,
शुण्ठीक्वाथः	,,
दुर्जलजेतृरसः	,,
पटोलादिक्वाथः	१०८
किरातादिचूर्णम्	,,
शुण्ठ्यादिकल्कः	,,
आर्द्रकादिकल्कः	,,
साध्यज्वरलक्षणम्	,,
ज्वरोपद्रवाः	,,
प्रसङ्गाज्ज्वरोपद्रवाणां चिकित्सा	,,
ज्वरे श्वासस्य चिकित्सा	,,
दशाङ्गक्वाथः	,,

विषयाः	पृ. सं.	विषयाः	पृ. सं.
द्वात्रिंशत्क्वाथः	११९	अतीसारस्य षड्विधत्वविवरणम्	१२५
पिप्पल्यादिचूर्णम्	,,	अतीसारस्य सामान्यचिकित्सा	१२६
श्वासे दाहप्रयोगः	,,	आमातिसारस्य क्रमाचिकित्सा	,,
ज्वरे मूर्च्छायाश्चिकित्सा	,,	आमपक्वयोर्लक्षणम्	,,
ज्वरेऽरुचेश्चिकित्सा	,,	लङ्घनान्ते भोजनम्	,,
ज्वरे वमनस्य चिकित्सा	१२०	पथ्याऽऽदिक्वाथः	,,
ज्वरे तृषायाश्चिकित्सा	,,	पाठाऽऽदिचूर्णम्	१२७
ज्वरेऽतिसारस्य चिकित्सा	,,	हरीतक्यादिकल्कः	,,
ज्वरे विड्ग्रहस्य चिकित्सा	,,	वत्सकादिक्वाथः	,,
ज्वरे हिक्कायाश्चिकित्सा	,,	शुण्ठीपुटपाककल्कौ	,,
ज्वरे कासस्य चिकित्सा	,,	धान्यादिपञ्चकक्वाथः	,,
ज्वरे दाहस्य चिकित्सा	१२१	धान्यादिचतुष्कक्वाथः	,,
सुखसाध्यज्वरलक्षणम्	,,	**पक्वातीसारचिकित्सा**	
कष्टसाध्यज्वरलक्षणम्	,,	लोध्रादिचूर्णम्	,,
वर्षाऽऽदौ दोषप्रधानता	,,	समङ्गाऽऽदियोगचतुष्टयम्	१२८
अन्तर्वेगस्य लिङ्गानि कष्टसाध्यत्वं च	१२२	गङ्गाधरक्वाथः	,,
असाध्यज्वरलक्षणम्	,,	गङ्गाधरचूर्णम्	
गम्भीरज्वरलक्षणम्	,,	द्वितीयं गङ्गाधरचूर्णम्	
सामान्यज्वरे कर्णमूलशोथस्य सुखसाध्यत्वादि	,,	वृद्धगङ्गाधरचूर्णम्	
अरिष्टम्	,,	अङ्कोलकल्कः	१२९
विषमज्वरारिष्टम्	१२४	कुटजाष्टकावलेहः	,,
द्वितीयोऽतिसाराधिकारः		आमलकालवालम्	,,
अतीसारस्य विप्रकृष्टानि-निदानानि	,,	पाठाऽऽद्यालवालम्	,,
अतीसारस्य पूर्वरूपम्	१२५	वातातीसारस्य लक्षणम्	,,
अतीसारस्य सम्प्राप्तिः	,,	वातातिसारस्य चिकित्सा	१३०
		पित्तातिसारस्य लक्षणम्	,,
		पित्तातिसारस्य चिकित्सा	,,

विषयाः	पृ. सं.
बिल्वादिक्वाथः	१३०
रसाञ्जनादिचूर्णम्	,,
पित्तातीसारभेदस्य रक्तातीसारस्य लक्षणं सम्प्राप्तिश्च	,,
रक्तातिसारचिकित्सा	,,
कुटजदाडिमक्वाथः	,,
कुटजादिक्वाथः	,,
तिलकल्कः	१३१
वत्सकादिक्वाथः	,,
कृष्णमृदादिकल्कः	,,
गुडबिल्वः	,,
जम्ब्वादिस्वरसः	,,
कुटजक्षीरम्	,,
शतावरीकल्कः	,,
नवनीतावलेहः	,,
चन्दनकल्कः	१३२
गुदशाहपाकव्यथाबहिर्निःसरणभ्रंशोपायाः	,,
पद्मिनीपत्रचूर्णम्	१३३
कफातीसारस्य लक्षणम्	,,
कफातिसारस्य चिकित्सा	,,
चव्यादिक्वाथः	,,
हिङ्ग्वादिचूर्णम्	,,
द्विदोषजातीसारस्य सामान्यचिकित्सा	,,
वातश्लेष्मातिसारस्य चिकित्सा	,,
वातपित्तातीसारस्य चिकित्सा	१३४
पित्तकफातीसारस्य चिकित्सा	,,
सन्निपातातीसारस्य लक्षणम्	१३४
सन्निपातातीसारस्य चिकित्सा	,,
पञ्चमूल्यादिक्वाथः	,,
चतुःसममोदकः	,,
कुटजपुटपाकः	,,
कुटजावलेहः	१३५
अङ्कोटवटकः	,,
आगन्तुजस्य शोकातिसारस्य संप्राप्तिपूर्वकं लक्षणम्	,,
आगन्तुजस्य भयातीसारस्य संप्राप्तिपूर्वकं लक्षणम्	१३६
शोकातीसारभयातीसारयोश्चिकित्सा	,,
आमातिसारस्य सम्प्राप्तिपूर्वकं लक्षणम्	,,
आमातीसारस्य चिकित्सा	१३७
शोथातीसारस्य चिकित्सा	,,
छर्द्यतीसारस्य चिकित्सा	,,
निःसारकस्य चिकित्सा	,,
विष्ठाक्षयस्य चिकित्सा	,,
बिल्वतैलम्	१३८
अतिसारभेदप्रवाहिकायाः सम्प्राप्तिपूर्वकं लक्षणम्	,,
वातादिदोषभेदेन प्रवाहिकालक्षणम्	,,
प्रवाहिकाचिकित्सा	,,
बिल्वाद्यवलेहः	,,
धातक्यादिः	१३९
असाध्यातीसारिणां लक्षणानि	,,
अतिसारमुक्तस्य लक्षणम्	१४०

विषयाः	पृ. सं.
अतिसारिणो वर्जनीयानि	१४०
शङ्खपोटलीरसः	,,
विजयाऽवलेहः	१४१
अतिविषाऽवलेहः	,,
तृतीयो ज्वराऽतिसाराधिकारः।	
ज्वरातिसारस्य निदानाकथने हेतुः	,,
ज्वरातिसारस्य चिकित्सा	,,
उत्पलषष्ठकक्वाथः	१४२
कणाऽऽदिक्वाथः	,,
नागरादिक्वाथः	,,
बृहद्गुडूच्यादिक्वाथः	,,
उत्पलादिचूर्णम्	,,
बिल्वादिक्वाथः	,,
द्वितीयो नागरादिक्वाथः	,,
दशमूलीक्वाथः	१४३
चतुर्थो ग्रहणीरोगाधिकारः।	
ग्रहणीरोगस्य सम्प्राप्तिः	,,
ग्रहणीस्वरूपम्	,,
ग्रहणीरोगस्य संख्यापूर्वकं सामान्य-लक्षणम्	,,
वातोत्पन्नग्रहण्या निदानसम्प्राप्ति-पूर्वकं लक्षणम्	१४४
पित्तजग्रहण्या निदानसम्प्राप्ति-पूर्वकं लक्षणम्	,,
कफोत्पन्नग्रहण्या निदानसम्प्राप्ति-पूर्वकं लक्षणम्	,,
त्रिदोषोत्पन्नग्रहण्या निदानसम्प्रा-प्तिपूर्वकं लक्षणम्	१४५
ग्रहणीरोगभेदः सङ्ग्रहणीरोगः	,,
ग्रहणीरोगभेदाख्यं घटीयन्त्रम्	,,
सामान्यतो ग्रहणीरोगस्य चिकित्सा	१४६
तक्रप्रसङ्गाद् दधिगुणाः	,,
गोदधिगुणाः	,,
माहिषदधिगुणाः	,,
अजादधिगुणाः	,,
तक्रभेदाः	,,
तक्रगुणाः	१४७
निःसारितघृतादितक्रगुणाः	,,
रोगविशेषे तक्रविशेषाः	,,
पक्वापक्वतक्रगुणाः	,,
तक्रस्य निषेधविषयाः	,,
तक्रस्य गुणोत्कर्षः	,,
षड्यूषणम्	१४८
लाईचूर्णम्	,,
जातीफलादिचूर्णम्	,,
चित्रकादिवटिका	,,
बिल्वकल्कः	,,
वार्त्ताकुगुटिका	१४९
मुस्तकादिचूर्णम्	,,
सर्जरसचूर्णम्	,,
बिल्वादिसिद्धाजादुग्धगुणाः	,,
कल्याणगुडः	,,
महाकल्याणगुडः	१५०
कूष्माण्डकल्याणकगुडः	,,

विषयाः	पृ. सं.
पञ्चमोऽर्शोधिकारः ।	
अर्शसां सन्निकृष्टानि निदानानि	१५२
वातार्शसां विप्रकृष्टनिदानानि	,,
पित्तार्शसां विप्रकृष्टं निदानम्	१५३
कफार्शसां विप्रकृष्टनिदानम्	,,
द्विदोषत्रिदोषार्शसां विप्रकृष्टनिदानम्	,,
अर्शसां पूर्वरूपम्	१५४
अर्शसां सम्प्राप्तिपूर्वकं लक्षणम्	,,
वातार्शोलक्षणम्	,,
पित्तार्शोलक्षणम्	१५५
पित्तोत्तरभेदरक्तार्शोलक्षणम्	१५६
कफोल्वणार्शोलक्षणम्	१५७
द्वन्दजार्शोलक्षणम्	,,
त्रिदोषोल्वणस्वाभाविकार्शोलक्षणम्	,,
अन्यग्रन्थोक्तस्वाभाविकार्शोऽन्यलक्षणम्	,,
सुखसाध्यार्शोलक्षणम्	१५८
कष्टसाध्यार्शोलक्षणम्	,,
असाध्यार्शोलक्षणम्	,,
याप्यार्शोलक्षणम्	,,
अर्शोऽरिष्टम्	,,
लिङ्गाद्यर्शोलक्षणम्	१५९
चर्मकीलस्य सम्प्राप्तिपूर्वकं लक्षणम्	,,
चर्मकीलस्य वातादिभेदेन लक्षणम्	,,
अर्शःसामान्यचिकित्सा	,,
करञ्जादिचूर्णम्	१६०
रजनीलेपः	,,
पिप्पल्यादिलेपः	,,
हरिद्राऽऽदिलेपः	१६०
तिलभक्षणम्	,,
रुधिरस्रावणम्	१६१
बृहत्काशीसादितैलम्	,,
समशर्करचूर्णम्	,,
विजयचूर्णम्	,,
लघुशूरणमोदकः	१६२
बृहच्छूरणमोदकः	,,
बाहुशालगुडः	१६३
तिलादिमोदकः	१६४
सगुडाभया	,,
शङ्करलौहम्	,,
रक्तार्शश्चिकित्सा	१६८
चन्दनादिक्वाथः	,,
समङ्गाऽऽदिदुग्धम्	१६९
क्षारसूत्रम्	,,
नासिकाऽऽद्यर्शश्चिकित्सा	,,
चर्मकीलचिकित्सा	,,
अर्शोरोगिणामपथ्यानि	,,
षष्ठो जठराग्निविकाराधिकारः ।	
सन्निकृष्टनिदानपूर्वकजठराग्निविकाराः	,,
मन्दाग्निलक्षणम्	,,
तीक्ष्णाग्निलक्षणम्	१७०
विषमाग्निलक्षणम्	,,
समाग्निलक्षणम्	,,
भस्मकस्य निदानसम्प्राप्तिपूर्वकं लक्षणम्	,,
भस्मकस्य सोपद्रवमारिष्टम्	,,

विषयाः	पृ. सं.
अजीर्णस्य विप्रकृष्टनिदानम्	१७१
अजीर्णप्राप्तिकारणम्	,,
अजीर्णसामान्यलक्षणम्	,,
सन्निकृष्टकारणसहिताजीर्णभेदाः	,,
आमाजीर्णलक्षणम्	१७२
विदग्धाजीर्णलक्षणम्	,,
विष्टब्धाजीर्णलक्षणम्	,,
रसशेषाजीर्णलक्षणम्	१७३
अजीर्णोपद्रवाः	,,
अतिशयितेभ्योऽजीर्णेभ्यो विसूच्यादिरोगाः	,,
विसूचिकानिरुक्तिः	,,
विसूचिकानिदानम्	,,
विसूचिकालक्षणम्	,,
विसूचिकोपद्रवाः	,,
अलसकलक्षणम्	,,
विसूचिकाऽलसकयोररिष्टम्	१७४
विलम्बिकालक्षणम्	,,
जीर्णाहारलक्षणम्	,,
अजीर्णचिकित्सा	,,
गुडाष्टकम्	,,
हिङ्ग्वष्टकम्	१७५
बृहदग्निमुखचूर्णम्	,,
वैश्वानरक्षारः	१७६
लवणभास्करचूर्णम्	१७७
बडवाऽनलचूर्णम्	,,
समशर्करचूर्णम्	१७८
अजीर्णे रसाः	१७८
क्रव्यादरसः	,,
ज्वालाऽनलरसः	१७९
अग्निकुमाररसः	,,
रामबाणरसः (रसेन्द्रचिन्तामणौ)	१८०
शङ्खवटी (रसरत्नप्रदीपे)	,,
बृहच्छङ्खवटी	१८१
अजीर्णकण्टकरसः	,,
(क) अजीर्णारिरसः	,,
विसूचिकाचिकित्सा	१८२
उत्क्लेशस्य लक्षणम्	,,
दारुषट्कः	१८३
अलसकविलम्बिकयोश्चिकित्सा	,,
भस्मकरोगचिकित्सा	,,
विशिष्टद्रव्याजीर्णे विशिष्टं पाचनद्रव्यम्	,,

कृमिरोगाधिकारः।

विषयाः	पृ. सं.
कृमिभेदाः	१८५
कृमिनिदानम्	,,
बाह्यकृमिरूपम्	१८६
बाह्यकृमिविकारः	१८६
आभ्यन्तरकृमिनिदानम्	,,
जातकृमिलक्षणम्	,,
कफोत्पन्नकृमिनिदानसंप्राप्तिलक्षणानि	,,
रक्तोत्पन्नकृमीणां विप्रकृष्टनिदानम्	१८७
रक्तजाः क्रिमयः	,,
पुरीषजकृमीणां विप्रकृष्टनिदानम्	,,

विषयाः	पृ. सं.
पुरीषजक्रमिलक्षणम्	१८७
क्रमिचिकित्सा	"
क्रमिरोगिणोऽपथ्यानि	१८८
अष्टमः पाण्डुरोगकामलाहलीमकाधिकारः ।	
पाण्डुरोगस्य संख्यापूर्वकं सन्निकृष्टनिदानम्	"
पाण्डुरोगस्य विप्रकृष्टनिदानपूर्विका सम्प्राप्तिः	१८९
पाण्डुरोगस्य पूर्वरूपम्	"
वातोत्पन्नपाण्डुरोगस्य लक्षणम्	"
पित्तोत्पन्नपाण्डुरोगस्य लक्षणम्	"
सन्निपातोत्पन्नपाण्डुरोगस्य लक्षणम्	"
कफोत्पन्नपाण्डुरोगस्य लक्षणम्	"
मृद्भक्षणजनितपाण्डुरोगस्य संप्राप्तिः	"
मृद्भक्षणोत्पन्नपाण्डुरोगस्य लक्षणम्	१९०
पाण्डुरोगिणोऽसाध्यलक्षणानि	"
पाण्डुरोगभेदकामलाया निदानपूर्विका सम्प्राप्तिः	१९१
कामलाया लक्षणम्	"
कामलाभेदः कुम्भकामलालक्षणं च	"
कुम्भकामलिनामरिष्टलक्षणम्	"
कामलाद्वयारिष्टम्	"
पाण्डुरोगस्य भेदो हलीमकः	१९२
पाण्डुरोगचिकित्सा	"
पुनर्नवाऽऽदिमण्डूरः	"
नवायसचूर्णम्	"

विषयाः	पृ. सं.
कामलाचिकित्सा	१९३
हलीमकचिकित्सा	"
अमृताऽऽदि घृतम्	१९४
पाण्डुरोगकामलाहलीमकानां सामान्यचिकित्सा	"
त्र्यूषणादिमण्डूरवटिका	"
अष्टादशाङ्गलौहम्	"
नवमो रक्तपित्ताधिकारः	**१९५**
रक्तपित्तस्य निदानपूर्विका सम्प्राप्तिः	"
रक्तपित्तस्य सामान्यलक्षणम्	"
रक्तपित्तप्रवृत्तिमार्गाः	"
रक्तपित्तस्य पूर्वरूपम्	१९६
कफजवातजरक्तपित्तयोर्विशिष्टरूपम्	"
पित्तजरक्तपित्तस्य विशिष्टरूपम्	"
संसर्गविशेषेण मार्गभेदः	"
रक्तपित्तोपद्रवाः	"
रक्तपित्तस्य साध्यत्वादि	"
साध्यरक्तपित्तलक्षणम्	"
असाध्यरक्तपित्तलक्षणम्	१९७
रक्तपित्तारिष्टम्	"
रक्तपित्तस्य चिकित्सा	"
धान्यकादिहिमादिकः	१९८
दूर्वाऽऽद्यघृतम्	"
खण्डकूष्माण्डावलेहः	२००
बृहत्कूष्माण्डावलेहः	"
खण्डकूष्माण्डकम्	२०१
खण्डकाद्यलौहम्	२०२

विषयाः	पृ. सं.
शतावरीपाकः	२०३
दशमोऽम्लपित्तश्लेष्मपित्ताधिकारः	
अम्लपित्तस्य विप्रकृष्टनिदानम्	"
अम्लपित्तरोगस्य लक्षणम्	२०४
ऊर्ध्वगाम्लपित्तस्य लक्षणम्	"
अधोगाम्लपित्तस्य लक्षणम्	"
अम्लपित्तस्यावस्थाविशेषः	"
अम्लपित्ते दोषसंसर्गः	"
दोषभेदेन लक्षणभेदः	२०५
अम्लपित्तस्य साध्यत्वादि	"
कफपित्तस्य लक्षणम्	"
अम्लपित्तस्य चिकित्सा	"
खण्डकूष्माण्डकावलेहः	२०६
नारिकेलखण्डम्	"
बृहन्नारिकेलखण्डम्	"
श्लेष्मपित्तस्य चिकित्सा	२०७
एकादशो राजयक्ष्माधिकारः।	
राजयक्ष्मणो विप्रकृष्टं सन्निकृष्टं च निदानम्	२०८
यक्ष्मादीनां निरुक्तिः	"
राजयक्ष्मणः सम्प्राप्तिः	"
राजयक्ष्मणः पूर्वरूपम्	२०९
राजयक्ष्मणो लक्षणम्	"
सुश्रुतोक्तानि तस्य षड्लक्षणानि	२१०
तस्यैकादशलक्षणानि	"
असाध्ययक्ष्मिलक्षणम्	"
तत्र विशेषः	"

विषयाः	पृ. सं.
तस्यारिष्टलक्षणम्	२११
राजयक्ष्मिणां जीवनावधिः	"
राजयक्ष्मिणश्चिकित्सा	"
निदानविशेषैर्विशेषशोषाः	"
व्यवायशोषिणो लक्षणम्	"
शोकशोषिणो लक्षणम्	"
वार्द्धक्यशोषिणो लक्षणम्	२१२
अध्वशोषिणो लक्षणम्	"
व्यायामशोषिणो लक्षणम्	"
व्रणशोषस्य निदानमसाध्यत्वं च	"
उरःक्षतशोषस्य निदानम्	"
उरःक्षतशोषिणो लक्षणम्	२१३
उरःक्षतस्य विशिष्टं लक्षणम्	"
निदानविशेषेणोरःक्षतलक्षणम्	२१४
उरःक्षतस्य साध्ययाप्यासाध्य- लक्षणम्	"
राजयक्ष्माचिकित्सा	"
षडङ्गयूषः	"
सितोपलाऽऽदिचूर्णम्	२१५
जातीफलादिचूर्णम्	"
लाक्षाऽऽदितैलप्रयोगः	"
वासाऽवलेहः	"
व्यवायादिहेतुकशोषचिकित्सा	२१६
शोकशोषचिकित्सा	"
व्यायामशोषचिकित्सा	"
अध्वशोषचिकित्सा	"
व्रणशोषचिकित्सा	"

विषयाः	पृ. सं.
उरःक्षतचिकित्सा	२१६
बलाऽऽदिचूर्णम्	,,
एलाऽऽदिगुटिका	,,
द्राक्षाऽऽदिघृतम्	२१७
अमृतप्राशावलेहः	,,
उरःक्षतरोगिपथ्यानि	,,
राजयक्ष्मणि रसाः	२१८
अमृतेश्वररसः	,,
राजमृगाङ्करसः	,,
अग्निरसः	,,

एकादशः कासरोगाधिकारः ।

विषयाः	पृ. सं.
कासस्य निदानसम्प्राप्तिपूर्वकं-सामान्यलक्षणम्	२१९
काससंख्या	,,
कासपूर्वरूपम्	,,
वातिककासलक्षणम्	,,
पैत्तिककासलक्षणम्	२२०
श्लैष्मिककासलक्षणम्	,,
क्षतजकासस्य निदान-सम्प्राप्तिपूर्वकं लक्षणम्	,,
क्षयजकासस्य निदानपूर्विका संप्राप्तिः	,,
क्षयजकासस्य लक्षणम्	,,
कासस्यासाध्यसाध्ययाप्यत्वलक्षणम्	२२१
कासोपेक्षाया दोषाः	,,
कासस्य चिकित्सा	,,
वातजकासस्य चिकित्सा	,,
पित्तजकासस्य चिकित्सा	२२२
कफजकासस्य चिकित्सा	२२२
पिप्पल्यादिक्वाथः	,,
क्षतजकासचिकित्सा	,,
क्षयजकासचिकित्सा	,,
कासरोगस्य सामान्यचिकित्सा	२२३
समशर्करचूर्णवटिके	,,
मरिचाद्य चूर्णम्	,,
मरिचादिगुटिका	२२४
भृगुहरीतकी	,,
कण्टकार्यवलेहः	,,

द्वादशो हिक्काऽधिकारः ।

विषयाः	पृ. सं.
हिक्काया विप्रकृष्टनिदानम्	२२५
हिक्कायाः संख्यारूपसम्प्राप्तिः	,,
हिक्कायाः सामान्यलक्षणम्	,,
हिक्कायाः पूर्वरूपम्	,,
अन्नजाया हिक्काया लक्षणम्	२२६
यमलाया हिक्काया लक्षणम्	,,
क्षुद्राया हिक्काया लक्षणम्	,,
गम्भीराया हिक्काया लक्षणम्	,,
महतीहिक्काया लक्षणम्	,,
हिक्काऽसाध्यतालक्षणानि	,,
यमलाहिक्काऽसाध्यतालक्षणानि	२२७
यमिकायाः साध्यत्वम्	,,
हिक्काचिकित्सा	,,
चन्द्रशूररसः	२२८

त्रयोदशः श्वासरोगाधिकारः ।

विषयाः	पृ. सं.
श्वासस्य निदानम्	,,

विषयाः	पृ. सं.
श्वासस्य भेदाः	२२८
तस्य पूर्वरूपम्	,,
श्वाससम्प्राप्तिः	,,
महाश्वासस्य लक्षणम्	,,
ऊर्ध्वश्वासस्य लक्षणम्	२२९
छिन्नश्वासस्य लक्षणम्	,,
तमकश्वासस्य लक्षणम्	२३०
प्रतमकश्वासस्य लक्षणम्	२३१
तस्यैवापरलक्षणम्	,,
क्षुद्रश्वासलक्षणम्	,,
श्वासानां साध्यत्वादि	,,
श्वासस्य चिकित्सा	२३२
भार्गीगुडः	२३३
महाकट्फलादियोगः	,,
दशमूलरसः	,,
श्वासकुठाररसः	,,
चतुर्दशः स्वरभेदाधिकारः।	
स्वरभेदस्य निदानसम्प्राप्तिपूर्वकं लक्षणम्	२३४
वातिकादिस्वरभेदिनो लक्षणम्	,,
पित्तजस्वरभेदिलक्षणम्	,,
कफजस्वरभेदिलक्षणम्	,,
सन्निपातजस्वरभेदिलक्षणम्	,,
क्षयजस्वरभेदिलक्षणम्	,,
मेदोभवस्वरभेदिलक्षणम्	,,
स्वरभेदासाध्यलक्षणम्	२३५
स्वरभेदचिकित्सा	,,

विषयाः	पृ. सं.
निदिग्धिकाऽवलेहः	२३५
मृगनाभ्याद्यवलेहः	२३६
ब्राह्म्याद्यवलेहः	,,
पञ्चदशोऽरोचकाधिकारः।	
सनिदानवातारोचकलक्षणम्	,,
पित्तजकफजारुचिलक्षणम्	,,
आगन्तुजत्रिदोषजारुचिलक्षणम्	,,
वातजाद्यरोचकविशेषलक्षणम्	२३७
अरोचकसामान्यलक्षणम्	,,
भक्तद्वेषाभक्तच्छन्दयोर्लक्षणम्	,,
अरोचकचिकित्सा	,,
अम्लीकापानकः	२३८
तक्रम्	,,
शिखरिणी	,,
दाडिमादिचूर्णम्	,,
लवङ्गादिचूर्णम्	,,
यवानीखाण्डवचूर्णम्	२३९
षोडशश्छर्द्यधिकारः।	
छर्देर्विप्रकृष्टसन्निकृष्टनिदानपूर्विकासंप्राप्तिः	,,
छर्देः पूर्वरूपम्	,,
छर्देः सामान्यलक्षणम्	२४०
वातजच्छर्दिलक्षणम्	,,
पित्तजच्छर्दिलक्षणम्	,,
कफजच्छर्दिलक्षणम्	,,
त्रिदोषजच्छार्दिलक्षणम्	,,
आगन्तुजच्छर्दिलक्षणम्	,,
कृमिजच्छर्दिलक्षणम्	,,

विषयाः	पृ. सं.
छर्देरुपद्रवाः	२४१
छर्देरसाध्यता साध्यता च	,,
छर्देश्चिकित्सा	,,
एलाऽऽदिचूर्णम्	२४२
सप्तदशस्तृष्णाऽधिकारः ।	
तृष्णाया निदानपूर्विका सम्प्राप्तिः	२४३
तृष्णायाः सामान्यलक्षणम्	,,
वातजतृष्णालक्षणम्	,,
पित्तजतृषालक्षणम्	२४४
कफजतृषालक्षणम्	,,
क्षतजतृषालक्षणम्	,,
क्षयजतृषालक्षणम्	,,
आमोत्पन्नतृषालक्षणम्	,,
भुक्तोद्भवतृषालक्षणम्	,,
उपसर्गजतृषालक्षणम्	,,
उपद्रवयुक्ततृषाऽरिष्टम्	२४५
तृषाचिकित्सा	,,
षडङ्गपानम्	,,
अष्टादशो मूर्च्छाभ्रमनिद्रातन्द्रासंन्यासाधिकारः ।	
मूर्च्छाया निदानपूर्विका सम्प्राप्तिः	२४७
मूर्च्छासामान्यलक्षणम्	,,
मूर्च्छायाः षड्विधत्वम्	,,
मूर्च्छापूर्वरूपम्	२४८
वातजमूर्च्छालक्षणम्	,,
पित्तजमूर्च्छालक्षणम्	,,
कफजमूर्च्छालक्षणम्	,,
त्रिदोषजमूर्च्छालक्षणम्	२४८
रक्तजमूर्च्छानिदानम्	२४९
रक्तजमूर्च्छालक्षणम्	,,
मद्यजविषजयोर्मूर्च्छयोर्निदानम्	,,
मद्यजमूर्च्छालक्षणम्	,,
विषजमूर्च्छालक्षणम्	,,
मूर्च्छाभ्रमतन्द्राऽऽदीनां भेदः	२५०
तन्द्राया लक्षणम्	,,
क्लमस्य लक्षणम्	,,
निद्राया लक्षणम्	,,
संन्यासस्य सम्प्राप्तिपूर्वकं लक्षणम्	,,
संन्यासस्य मूर्च्छाऽऽदिभ्यो भेदः	२५१
मूर्च्छाचिकित्सा	,,
रक्तजादीनां मूर्च्छानां चिकित्सा	२५२
संन्यासचिकित्सा	,,
मूर्च्छोपयोगिरसौ	,,
भ्रमचिकित्सा	२५३
तन्द्राया अतिनिन्द्रायाश्च चिकित्सा	,,
एकोनविंशो मदात्ययाधिकारः ।	
मदस्य स्वभावः	,,
तस्य युक्तियुक्तेर्माहिमोक्तिः	,,
तत्र विधिः	२५४
देशः	,,
मात्रा	,,
"कस्मिन्नृतौ कीदृङ् मद्यं पेयमि"त्यत्र वर्णनम्	,,
मद्यगुणाः	२५५

विषयाः	पृ. सं.
सात्त्विकस्य मदस्य लक्षणम्	२५६
राजसस्य मदस्य लक्षणम्	२५७
तामसस्य मदस्य लक्षणम्	,,
अतितामसस्य मदस्य लक्षणम्	,,
केषां मदाधिक्यं केषां च मदाल्पत्वं भवति, तत्कथनम्	,,
मदात्ययनिदानम्	,,
विधिमन्तरा सेवितमद्यमन्यविकारोत्पादकम्	२५८
मदात्ययादीनां हेत्वन्तरम्	,,
मद्योत्पन्नविकाराः	,,
मदात्ययस्य सामान्यलक्षणम्	,,
वातजमदात्ययस्य निदानम्	२५९
वातजमदात्ययस्य लक्षणम्	,,
पित्तजमदात्ययस्य निदानम्	,,
पित्तजमदात्ययस्य लक्षणम्	,,
कफजमदात्ययस्य निदानम्	,,
कफजमदात्ययस्य लक्षणम्	,,
सान्निपातिकमदात्ययस्य निदानं लक्षणं च	,,
परमदलक्षणम्	,,
पानाजीर्णलक्षणम्	२६०
पानविभ्रमलक्षणम्	,,
मदात्ययाद्यसाध्यलक्षणम्	,,
मदात्ययादिविकारचिकित्सा	,,
प्रसन्नप्रासकोद्रवादिमदचिकित्सा	२६२
विंशो दाहाधिकारः।	
पित्तजदाहः	२६३
रक्तजदाहः	२६३
रक्तपूर्णकोष्ठजदाहः	,,
मद्यजदाहः	,,
तृष्णानिरोधजदाहः	,,
धातुक्षयजदाहः	२६४
मर्माभिघातजदाहः	,,
दाहस्यासाध्यतां	,,
दाहचिकित्सा	,,
चन्दनादिक्वाथः	२६५
काञ्जिकतैलम्	,,
एकविंश उन्मादाधिकारः।	
उन्मादस्य निरुक्तिः	,,
अवस्थाभेदेनोन्मादस्य नामान्तरम्	,,
उन्मादस्य विप्रकृष्टं निदानम्	,,
उन्मादस्य सन्निकृष्टं निदानम्	२६६
उन्मादस्य सम्प्राप्तिः	,,
उन्मादस्य सामान्यलक्षणम्	,,
वातजोन्मादस्य निदानपूर्विका सम्प्राप्तिः	,,
वातजोन्मादस्य लक्षणम्	,,
पित्तजोन्मादस्य सम्प्राप्तिः	२६७
पित्तजोन्मादस्य लक्षणम्	,,
कफजोन्मादस्य निदानपूर्विका सम्प्राप्तिः	,,
कफजोन्मादस्य लक्षणम्	,,
सान्निपातिकोन्मादस्य निदानपूर्वकं लक्षणम्	,,

विषयाः	पृ. सं.
मनोदुःखजोन्मादस्य विप्रकृष्टं-निदानम्	२६८
मनोदुःखजोन्मादस्य लक्षणम्	,,
विषजन्योन्मादस्य लक्षणम्	,,
उन्मादारिष्टम्	,,
देवादिकृतोन्मादस्य सामान्यलक्षणम्	,,
देवग्रहजुष्टस्य लक्षणम्	२६९
दैत्याविष्टस्य लक्षणम्	,,
गन्धर्वाविष्टस्य लक्षणम्	,,
यक्षाविष्टस्य लक्षणम्	,,
पित्राविष्टस्य लक्षणम्	२७०
नागाविष्टस्य लक्षणम्	,,
राक्षसाविष्टस्य लक्षणम्	,,
ब्रह्मराक्षसाविष्टस्य लक्षणम्	,,
पिशाचाविष्टस्य लक्षणम्	,,
हिंसाऽर्थगृहीतस्य लक्षणम्	२७१
देवादीनामावेशसमयः	,,
उन्मादस्य चिकित्सा	२७२
सिद्धार्थकादिघृतम्	,,
उन्मादिनस्त्रासभयादिकरणम्	,,
त्र्यूषणाद्यञ्जनम्	२७३
सारस्वतचूर्णम्	,,
विश्वाऽद्यचूर्णम्	,,
महाचैतसघृतम्	,,
देवाद्याविष्टानां चिकित्सा	२७४
कृष्णाऽऽद्यञ्जनम्	,,
ऋक्षलोमकधूपः	२७५
कल्याणघृतादिप्रयोगः	,,

विषयाः	पृ. सं.
द्वाविंशोऽपस्माराधिकारः ।	
अपस्मारस्य निदानपूर्विका संप्राप्तिः	२७५
अपस्मारसंख्या	,,
अपस्मारस्य सामान्यलक्षणम्	,,
अपस्मारस्य पूर्वरूपम्	,,
वातजापस्मारस्य लक्षणम्	,,
पित्तजापस्मारस्य लक्षणम्	२७६
कफजापस्मारस्य लक्षणम्	,,
सन्निपातजापस्मारस्य लक्षणम्	,,
अपस्मारस्यारिष्टलक्षणम्	,,
अपस्मारस्य प्रकोपसमयः	,,
अपस्मारस्य चिकित्सा	२७७
ब्राह्मीघृतम्	,,
कूष्माण्डकघृतम्	२७८
कल्याणचूर्णम्	,,
भूतभैरवरसः	,,
त्रयोविंशो वातव्याध्यधिकारः ।	
वातव्याधीनां सामान्यतो विप्रकृष्ट-निदानानि	२७९
वर्षर्त्वादिकारणप्रबलवातोत्पन्नव्याधिनामानि	२८०
वातव्याधीनां सामान्यचिकित्सा	२८१
शिरोग्रहस्य लक्षणम्	,,
शिरोग्रहचिकित्सा	,,
जृम्भालक्षणम्	,,
जृम्भाचिकित्सा	,,
हनुग्रहस्य सनिदानं लक्षणम्	२८२

विषयाः	पृ. सं.	विषयाः	पृ. सं.
हनुग्रहचिकित्सा	२८२	विश्वाचीचिकित्सा	२८९
प्रसारणीतैलम्	,,	माषादितैलम्	,,
जिह्वास्तम्भलक्षणम्	२८३	ऊर्ध्ववातलक्षणम्	,,
जिह्वास्तम्भचिकित्सा	,,	ऊर्ध्ववातचिकित्सा	,,
गद्गदमिन्मिनमूकानां लक्षणम्	,,	आध्मानलक्षणम्	,,
गद्गदमिन्मिनमूकानां चिकित्सा	२८४	आध्मानचिकित्सा	,,
सारस्वतघृतम्	,,	नारायणचूर्णम्	२९०
कल्याणावलेहः	,,	दारुषट्कलेपः	,,
प्रलापस्य लक्षणम्	,,	महानाराचरसः	,,
प्रलापचिकित्सा	,,	प्रत्याध्मानलक्षणम्	,,
रसाज्ञानस्य लक्षणम्	२८५	प्रत्याध्मानचिकित्सा	२९१
रसाज्ञानचिकित्सा	,,	वाताष्ठीलालक्षणम्	,,
किराततिक्ताऽऽदिकल्कः	,,	प्रत्यष्ठीलालक्षणम्	,,
त्वक्शून्यताया लक्षणम्	,,	वाताष्ठीलाप्रत्यष्ठीलयोश्चिकित्सा	,,
त्वक्शून्यताचिकित्सा	,,	हिङ्ग्वादिचूर्णम्	,,
अर्दितस्य सम्प्राप्तिपूर्वकं लक्षणम्	,,	तूनीलक्षणम्	,,
सलक्षणमर्दितस्य भेदः	२८६	प्रतितूनीलक्षणम्	२९२
अर्दितासाध्यलक्षणम्	,,	तूनीप्रतितूनीचिकित्सा	,,
अर्दितरोगचिकित्सा	,,	त्रिकशूललक्षणम्	,,
मन्यास्तम्भस्य निदानपूर्वकं लक्षणम्	२८७	त्रिकशूलचिकित्सा	,,
मन्यास्तम्भचिकित्सा	,,	त्रयोदशाङ्गगुग्गुलुः	,,
बाहुशोषलक्षणम्	,,	मुहुर्मूत्रमूत्रनिग्रहयोर्निदानपूर्वकं लक्षणम्	२९३
बाहुशोषचिकित्सा	,,	मुहुर्मूत्रणमूत्रनिग्रहयोश्चिकित्सा	,,
अपबाहुकलक्षणं चिकित्से	२८८	गृध्रसीलक्षणम्	,,
माषतैलम्	,,	गृध्रसीचिकित्सा	२९४
विश्वाचीलक्षणम्	,,	रास्नागुग्गुलुः	,,

विषयाः	पृ. सं.
रास्नासप्तकक्वाथः	२९५
पथ्यादिगुग्गुलुः	,,
खञ्जस्य पङ्गोश्च लक्षणम्	,,
खञ्जपङ्गुचिकित्सा	,,
कलायखञ्जस्य लक्षणम्	,,
कलायखञ्जचिकित्सा	२९६
क्रोष्टुकशीर्षस्य लक्षणम्	,,
तस्य चिकित्सा	,,
खल्लीलक्षणम्	,,
खल्लीचिकित्सा	,,
वातकण्टकलक्षणम्	,,
वातकण्टकचिकित्सा	,,
पाददाहलक्षणम्	२९७
पाददाहचिकित्सा	,,
पादहर्षलक्षणम्	,,
पादहर्षचिकित्सा	,,
आक्षेपकस्य सम्प्राप्तिपूर्वकं सामान्यलक्षणम्	,,
आक्षेपकस्य चत्वारो भेदाः	,,
केवलवातोत्पन्नाक्षेपकस्य लक्षणम्	२९८
कफयुक्तवातोत्पन्न दण्डापतानकस्य लक्षणम्	,,
चतुष्प्रकाराक्षेपकस्य चिकित्सा	,,
महाबलातैलम्	,,
अन्तरायामलक्षणम्	२९९
बाह्यायामलक्षणम्	,,
तयोश्चिकित्सा	,,
धनुःस्तम्भलक्षणम्	२९९
कुब्जकलक्षणम्	३००
धनुर्वातकुब्जकयोश्चिकित्सा	,,
अपतन्त्रकलक्षणम्	,,
अपतन्त्रकचिकित्सा	,,
मरिचादिनस्यम्	३०१
हरीतक्यादियोगः	,,
अपतानकलक्षणम्	,,
अपतानकचिकित्सा	,,
पक्षाघातलक्षणम्	,,
पक्षाघातस्य साध्यासाध्यज्ञानार्थं कथनम्	३०२
पक्षाघातस्य साध्यत्वादि	,,
तस्यैवापरमसाध्यलक्षणम्	,,
पक्षाघातचिकित्सा	,,
माषादिक्वाथः	,,
ग्रन्थिकादितैलम्	,,
माषादितैलम्	,,
सर्वाङ्गवातलक्षणम्	३०३
सर्वाङ्गवातचिकित्सा	,,
स्थाननामलक्ष्यलक्षणा वातव्याधयः	,,
उक्तवातव्याधिचिकित्सा	,,
अन्यप्रकारेण वातव्याधिनिरूपणम्	,,
हेतुविशेषेण वातव्याधिविशेषाः	३०४
तेषां चिकित्सा	,,
रसादिधातुगतवायूनां लक्षणानि	,,
रसादिधातुगतवायुचिकित्सा	३०५

विषयाः	पृ. सं.
केतकादितैलम्	३०५
स्थानविशेषेण वातव्याधिविशेषः	३०६
कोष्ठगतवायुलक्षणम्	,,
कोष्ठगतवातचिकित्सा	,,
आमाशयगतवायुलक्षणम्	,,
आमाशयगतवायुचिकित्सा	,,
षड्धरणयोगः	३ ७
षड्धरणयोगान्तरम्	,,
पक्वाशयगतवायुलक्षणम्	,,
पक्वाशयगतवायुचिकित्सा	,,
उदरगतवायुचिकित्सा	,,
कुक्षिगतवायुचिकित्सा	,,
गुदगतवायुलक्षणम्	,,
गुदगतवायुचिकित्सा	३०८
हृदयगतवायुचिकित्सा	,,
कर्णेन्द्रियादिगतवायुलक्षणम्	,,
कर्णेन्द्रियादिगतवायुचिकित्सा	,,
शिरागतवायुलक्षणम्	,,
शिरागतवायुचिकित्सा	,,
स्नायुगतवायोर्लक्षणं चिकित्सा च	,,
सन्धिगतवायुलक्षणम्	,,
सन्धिगतवायुचिकित्सा	३०९
उक्तरोगाणां कृच्छ्रसाध्यत्वम्	,,
तेषामेवोपद्रवाः	,,
वातव्याध्यसाध्यलक्षणम्	,,
पञ्चविधस्य प्रकुपितस्य वायोः कार्यं लिङ्गं च	,,
वातव्याधीनां सामान्यानि भेषजानि	३०९
चक्रदत्तप्रोक्तमहामाषादितैलम्	,,
द्वितीयमहामाषादितैलम्	३१०
मध्यमनारायणतैलम्	३११
महानारायणतैलम्	,,
महायोगराजगुग्गुलुः	३१५
रास्नाऽऽदिक्वाथः	३१६
रसोनकल्कः	,,
रसोनाष्टकम्	,,
वातारिरसः	३१७

चतुर्विंश ऊरुस्तम्भाधिकारः ।

ऊरुस्तम्भस्य विप्रकृष्टसन्निकृष्टनिदानसम्प्राप्तिपूर्वकं लक्षणम्	३१८
ऊरुस्तम्भपूर्वरूपम्	,,
ऊरुस्तम्भरूपम्	,,
ऊरुस्तम्भारिष्टम्	३१९
ऊरुस्तम्भचिकित्सा	,,
रास्नाऽऽदिक्वाथः	३२०
कुष्ठाद्यतैलम्	३२१
अष्टकट्वरतैलम्	,,
द्विपञ्चमूलाद्यतैलम्	,,
महासैन्धवाद्यतैलम्	३२२
सैन्धवाद्यतैलम्	,,

पञ्चविंश आमवाताधिकारः ।

आमवातस्य निदानपूर्विका संप्राप्तिः	,,
आमस्वरूपम्	३२३

विषयाः	पृ. सं.
आमवातस्य सामान्यलक्षणम्	३२३
तन्त्रान्तरोक्तामवातलक्षणम्	,,
अतिवृद्धस्यामवातस्य लक्षणम्	,,
आमवातस्य विशिष्टलक्षणम्	३२४
आमवातस्य साध्यत्वादि	,,
आमवातस्य चिकित्सा	,,
हिङ्ग्वाद्यचूर्णम्	३२५
पिप्पल्यादिचूर्णम्	,,
पथ्याऽऽद्यचूर्णम्	३२६
रसोनादिकषायः	,,
रास्नापञ्चकक्वाथः	,,
पञ्चकोलक्वाथः	,,
शट्यादिकल्कः	,,
रास्नासप्तकक्वाथः	,,
चित्रकादिचूर्णम्	,,
पुनर्नवाऽऽदिचूर्णम्	३२७
नागरचूर्णम्	,,
पञ्चकोलचूर्णम्	,,
एरण्डतैलम्	,,
एरण्डतैलहरीतकी	,,
आरग्वधपत्रप्रयोगः	,,
कटिग्रहपङ्गुरोगयोर्लक्षणं चिकित्सा च	,,
अमृताद्यचूर्णम्	३२८
अलम्बुषाऽऽदिचूर्णम्	,,
द्वितीयमलम्बुषाऽऽदिचूर्णम्	,,
तृतीयमलम्बुषाऽऽदिचूर्णम्	,,
वैश्वानरचूर्णम्	३२९
अमृताद्यचूर्णम्	३२९
शुण्ठीधान्यकघृतम्	,,
शुण्ठीघृतम्	,,
द्वितीयं शुण्ठीघृतम्	३३०
काञ्जिकाद्यघृतम्	,,
शृङ्गवेराद्यघृतम्	,,
अजमोदादिचूर्णवटकौ	,,
योगराजगुग्गुलुः	३३१
प्रसारणीलेहः	,,
खण्डशुण्ठी	,,
रसोनपिण्डः	३३२
प्रसारणीतैलम्	,,
द्विपञ्चमूलाद्यतैलम्	,,
बृहत्सैन्धवाद्यतैलम्	,,
निरूहवस्तिः	३३३
आमवातेऽपथ्यानि	,,
मध्यमरास्नाऽऽदिक्वाथः	,,
महारास्नाऽऽदिक्वाथः	३३४
रास्नाऽऽदिदशमूलक्वाथः	,,
षड्विंशः पित्तव्याध्यधिकारः।	
पित्तव्याधीनां विप्रकृष्टसन्निकृष्टनिदानम्	३३५
पित्तरोगाः	,,
सप्तविंशः श्लेष्मव्याध्यधिकारः।	
श्लेष्मव्याधीनां सामान्यतो विप्रकृष्टसंनिकृष्टनिदानानि	३३६
कफरोगाः	,,

विषयाः	पृ. सं.
श्लेष्मव्याधीनां सामान्या चिकित्सा	३३६

अष्टाविंशो वातरक्ताधिकारः ।

विषयाः	पृ. सं.
वातरक्तस्य विप्रकृष्टनिदानम्	३३७
वातरक्तस्य पूर्वरूपम्	३३८
वाताधिकस्य वातरक्तस्य लक्षणम्	३३९
रक्ताधिकस्य वातरक्तस्य लक्षणम्	,,
पित्ताधिकस्य वातरक्तस्य लक्षणम्	,,
अधिककफद्विदोषत्रिदोषाणां- वातरक्तानां लक्षणानि	३४०
वातरक्तप्रसर्पणप्रकारः	,,
वातरक्तस्योपद्रवाः	,,
वातरक्तस्य साध्यत्वादि	,,
वातरक्तचिकित्सा	३४१
गुग्गुलुवटिका	३४३
लाङ्गलीगुटिका	३४६
बलाघृतम्	,,
अपरपिण्डतैलम्	,,
पारूषकघृतम्	,,
शतावरीघृतम्	३४७
ऋषभकघृतम्	,,
गुडूचीघृतम्	,,
द्वितियतृतीयचतुर्थ- गुडूचीघृतानि	,,
अमृताद्यघृतम्	,,
पञ्चमं गुडूच्यघृतम्	३४८
महागुडूचीघृतम्	,,
शताह्वाऽऽदितैलम्	३४९
महापिण्डतैलम्	३४९
पिण्डतैलम्	,,
द्वितीयं पिण्डतैलम्	,,
महापद्मकतैलम्	,,
खुड्डाकपद्मकतैलम्	३५०
गुडूचीतैलम्	,,
अमृताह्वयतैलम्	,,
मृणालाद्यमिश्रकतैलम्	३५१
धत्तूराद्यतैलम्	,,
नागबलातैलम्	,,
जीवकाद्यमिश्रकः	,,
शतपाकबलातैलम्	३५२
मधुकाद्यतैलम्	,,
शतपाकमधुकतैलम्	,,
सहस्रपाकबलातैलम्	,,
पुनर्नवागुग्गुलुः	३५३
समशर्करगुग्गुलुः	,,
अमृतागुग्गुलुः	,,
द्वितीयोऽमृतागुग्गुलुः	३५४
नवपुराणयोर्गुग्गुल्वोर्लक्षणम्	३५५
चन्द्रप्रभागुटिका	,,
कैशोरगुग्गुलुः	,,
त्रिफलागुग्गुलुः	३५६
सिंहनादगुग्गुलुः	३५७
द्वितीयः सिंहनादगुग्गुलुः	,,
तृतीयः सिंहनादगुग्गुलुः	३५८
योगसारामृतम्	३५९
वातरक्ते त्याज्यानि	,,

विषयाः	पृ. सं.
एकोनत्रिंशः शूलाधिकारः।	
शूलस्य सन्निकृष्टं निदानम्	३६०
वातोत्पन्नशूलस्य विप्रकृष्ट-निदानसम्प्राप्तिपूर्वकं लक्षणम्	,,
हृदयशूललक्षणम्	३६१
पार्श्वशूललक्षणम्	,,
बस्तिशूललक्षणम्	,,
पित्तजशूलस्य निदानसम्प्राप्ति-पूर्वकं लक्षणम्	,,
कफजशूलस्य निदानसम्प्राप्ति-पूर्वकं लक्षणम्	३६२
द्विदोषोत्पन्नशूलस्य लक्षणम्	,,
त्रिदोषोत्पन्नशूलस्य लक्षणम्	,,
आमोत्पन्नशूलस्य लक्षणम्	,,
आमशूलस्य दोषविशेषेण देशविशेषः	३६३
तन्त्रान्तरोक्तामशूलस्य लक्षणम्	,,
शूलोपद्रवाः	,,
शूलस्य साध्यत्वादि	,,
शूलारिष्टम्	,,
शूलस्यैव भेदः परिणामशूलम्	३६४
अन्नद्रवनामकशूलविशेषस्य लक्षणम्	,,
शूलस्य चिकित्सा	,,
मृत्तिकास्वेदः	,,
कार्पासास्थ्यादिस्वेदः	३६५
तिलादिगुटिका	,,
वातजशूलचिकित्सा	,,
पित्तजशूलचिकित्सा	३६५
कफजशूलचिकित्सा	३६६
आमशूलचिकित्सा	,,
कूष्माण्डक्षारः	,,
परिणामशूलचिकित्सा	३६७
विडङ्गादिमोदकः	,,
शुण्ठ्यादिकल्कः	,,
पथ्याऽऽदिलौहम्	,,
नारिकेलक्षारः	३६८
अन्नद्रवशूलचिकित्सा	,,
गुडमण्डूरः	३६९
शूलरोगेऽपथ्यानि	,,
त्रिंश उदावर्त्तानाहाधिकारः।	
उदावर्त्तस्य विप्रकृष्टनिदानम्	,,
उदावर्त्तस्य सामान्यलक्षणम्	३७०
अधोवातावरोधोत्पन्नोदावर्त्तस्य लक्षणम्	,,
पुरीषावरोधोत्पन्नोदावर्त्तस्य लक्षणम्	,,
मूत्रावरोधोत्पन्नोदावर्त्तस्य लक्षणम्	,,
जृम्भाऽवरोधोत्पन्नोदावर्त्तस्य लक्षणम्	,,
नेत्रोदकावरोधोत्पन्नोदावर्त्तस्य लक्षणम्	,,
छिक्काऽवरोधोत्पन्नोदावर्त्तस्य लक्षणम्	३७१
उद्गारावरोधोत्पन्नोदावर्त्तस्य लक्षणम्	,,

विषयाः	पृ. सं.
वमनावरोधोत्पन्नोदावर्त्तस्य लक्षणम्	३७१
वीर्यावरोधोत्पन्नोदावर्त्तस्य लक्षणम्	,,
क्षुधाऽवरोधोत्पन्नोदावर्त्तस्य लक्षणम्	,,
तृषाऽवरोधोत्पन्नोदावर्त्तस्य लक्षणम्	,,
श्वासावरोधोत्पन्नोदावर्त्तस्य लक्षणम्	,,
निद्राऽवरोधोत्पन्नोदावर्त्तस्य लक्षणम्	,,
रूक्षादिकुपितवातोत्पन्नोदावर्त्तस्य-निदानसम्प्राप्तिपूर्वकं लक्षणम्	,,
असाध्योदावर्त्तस्य लक्षणम्	३७२
आनाहस्य सामान्यलक्षणम्	,,
आमजानाहस्य लक्षणम्	,,
मलसञ्चयेनोत्पन्नानाहस्य लक्षणम्	,,
उदावर्त्तानां चिकित्सा	३७३
हिङ्ग्वादिफलवर्त्तिः	३७४
मदनफलादिवर्त्तिः	,,
नाराचचूर्णम्	,,
गुडाष्टकम्	,,
शुष्कमूलकाद्यघृतम्	,,
आनाहस्य चिकित्सा	३७५
त्रिकटुकादिवर्त्तिः	,,

एकत्रिंशो गुल्माधिकारः ।

विषयाः	पृ. सं.
गुल्मस्य सन्निकृष्टविप्रकृष्टकारणपूर्वकं सामान्यलक्षणम्	,,
तस्य पञ्चविधत्वविवरणम्	,,
आर्त्तवोत्पन्नगुल्मः	३७५
कोष्ठेऽपि तस्य स्थाननियमः	३७६
गुल्मस्य सामान्यलक्षणम्	,,
गुल्मस्य पूर्वरूपम्	,,
वातिकगुल्मनिदानम्	,,
वातिकगुल्मलक्षणम्	,,
पैत्तिकगुल्मनिदानम्	,,
पैत्तिकगुल्मलक्षणम्	,,
श्लैष्मिकसान्निपातिकयोर्गुल्मयोः कारणम्	,,
श्लैष्मिकगुल्मलक्षणम्	,,
द्वन्द्वजगुल्मलक्षणम्	,,
त्रिदोषजगुल्मलक्षणम्	३७८
आर्त्तवरूपरक्तजगुल्मलक्षणम्	,,
असाध्यगुल्मलक्षणम्	३७९
गुल्मचिकित्सा	,,
हिङ्ग्वादिचूर्णम्	३८०
क्षाराष्टकम्	३८१
वज्रक्षारः	,,
गुल्मरोगित्याज्यपदार्थाः	३८२
रक्तगुल्मचिकित्सा	,,

द्वात्रिंशः प्लीहयकृदधिकारः ।

विषयाः	पृ. सं.
प्लीह्नः शरीरावयवविशेषस्य स्वरूपम्	,,
प्लीहरोगस्य निदानसम्प्राप्तिपूर्वकं लक्षणम्	,,
रक्तजप्लीहलक्षणम्	३८३
पित्तजप्लीहलक्षणम्	,,
कफजप्लीहलक्षणम्	,,
वातजप्लीहलक्षणम्	,,

विषयाः	पृ. सं.
प्लीहासाध्यलक्षणम्	३८३
शरीरावयवविशेषस्य यकृतः स्वरूपम्	,,
यकृद्रोगः	,,
प्लीहरोगचिकित्सा	,,
यकृद्रोगचिकित्सा	३८४
त्रयस्त्रिंशो हृद्रोगाधिकारः ।	
हृद्रोगस्य विप्रकृष्टं निदानम्	,,
हृद्रोगस्य सम्प्राप्तिपूर्वकं लक्षणम्	३८५
वातजहृद्रोगलक्षणम्	,,
पित्तजहृद्रोगलक्षणम्	,,
कफजहृद्रोगलक्षणम्	,,
त्रिदोषजहृद्रोगलक्षणम्	,,
कृमिजहृद्रोगस्य विप्रकृष्टनिदानपूर्विका सम्प्राप्तिः	३८६
कृमिजहृद्रोगलक्षणम्	,,
हृद्रोगोपद्रवाः	,,
हृद्रोगचिकित्सा	,,
अर्जुनघृतम्	३८७
बलाऽऽद्यघृतम्	,,
चतुस्त्रिंशो मूत्रकृच्छ्राधिकारः ।	
मूत्रकृच्छ्रस्य विप्रकृष्टं निदानम्	,,
मूत्रकृच्छ्रस्य सम्प्राप्तिपूर्वकं लक्षणम्	,,
वातजमूत्रकृच्छ्रस्य लक्षणम्	,,
पित्तजमूत्रकृच्छ्रस्य लक्षणम्	,,
कफजमूत्रकृच्छ्रलक्षणम्	,,
सन्निपातजमूत्रकृच्छ्रलक्षणम्	३८८
शल्यजनितमूत्रकृच्छ्रलक्षणम्	,,

विषयाः	पृ. सं.
पुरीषजमूत्रकृच्छ्रलक्षणम्	३८८
वीर्यजन्यमूत्रकृच्छ्रलक्षणम्	,,
अश्मरिजन्यमूत्रकृच्छ्रलक्षणम्	,,
शर्करोपद्रवाः	३८९
वातजमूत्रकृच्छ्रचिकित्सा	,,
पुनर्नवाऽऽद्यमिश्रकः	,,
पित्तजमूत्रकृच्छ्रचिकित्सा	,,
तृणपञ्चमूलम्	,,
शतावर्यादिक्वाथः	,,
एर्वारुबीजादिपानम्	,,
हरीतक्यादिक्वाथः	,,
शतावरीघृतं क्षीरं च	३९०
त्रिकण्टकाद्यघृतम्	,,
कफजमूत्रकृच्छ्रचिकित्सा	,,
त्रिदोषजमूत्रकृच्छ्रचिकित्सा	,,
अभिघातजन्यमूत्रकृच्छ्रचिकित्सा	,,
पुरीषजमूत्रकृच्छ्रचिकित्सा	३९१
वीर्यजन्यमूत्रकृच्छ्रचिकित्सा	,,
अश्मरीजन्यमूत्रकृच्छ्रचिकित्सा	,,
मूत्रकृच्छ्रसामान्यचिकित्सा	,,
सुकुमारकुमारकपुनर्नवाऽऽद्यवलेहः	३९२
पञ्चत्रिंशो मूत्राघाताधिकारः ।	
मूत्राघातस्य कारणं भेदश्च	३९३
वातकुण्डलिकालक्षणम्	,,
अष्ठीलालक्षणम्	,,
वातवस्तिलक्षणम्	,,
मूत्रातीतलक्षणम्	३९४
मूत्रजठरलक्षणम्	,,

विषयाः	पृ. सं.	विषयाः	पृ. सं.
मूत्रोत्सङ्गलक्षणम्	३९४	पाषाणभेदाद्यघृतम्	४०२
मूत्रक्षयलक्षणम्	,,	वीरतरादिगणः	,,
मूत्रग्रन्थिलक्षणम्	,,	पित्तोल्वणाश्मरीलक्षणम्	,,
मूत्रशुक्रलक्षणम्	३९५	पित्ताश्मरीचिकित्सा	,,
उष्णवातलक्षणम्	,,	कुशादिघृतम्	,,
मूत्रसादलक्षणम्	,,	कफोल्वणाश्मरीलक्षणम्	४०३
विड्विघातलक्षणम्	,,	कफाश्मरीचिकित्सा	,,
वस्तिकुण्डललक्षणम्	३९६	वरुणादिघृतम्	,,
वस्तिकुण्डलासाध्यलक्षणम्	,,	वरुणादिगणः	,,
मूत्राघातचिकित्सा	,,	शुक्राश्मरीनिदानम्	४०४
शिलोद्भिदादितैलम्	३९७	शुक्राश्मरीसम्प्राप्तिः	,,
धान्यगोक्षुरकघृतम्	,,	शुक्राश्मरीलक्षणम्	,,
भद्रावहघृतम्	३९८	शुक्राश्मर्याः शर्करारूपत्वम्	,,
विदारीघृतम्	,,	शर्करायाः सहेतुकः पातोऽवरोधश्च	,,
क्षौद्रार्धभागयोगः	३९९	अश्मर्य्युपद्रवाः	४०५
वर्त्तिः	,,	अश्मरीशर्करासिकतानामरिष्टम्	,,
अतिदेशः	४००	अश्मरीचिकित्सा	,,
षट्त्रिंशोऽश्मरीरोगाधिकारः ।		तृणपञ्चमूलाद्यघृतम्	४०६
अश्मरीसंख्या	,,	वरुणतैलम्	,,
अश्मरीसम्प्राप्तिः	,,	कुशाद्यतैलम्	,,
तस्या अनेकदोषाश्रयत्वम्	,,	अश्मरीणां सामान्यचिकित्सा	,,
अश्मरीसामान्यलक्षणम्	,,	वरुणाद्यचूर्णम्	४०७
वातोल्वणाश्मरीलक्षणम्	४०१	वरुणकगुडः	,,
वातोल्वणाश्मरीचिकित्सा	,,	कुलत्थाद्यघृतम्	४०८
शुण्ठ्यादिकषायः	,,	शरादिपञ्चमूलाद्यघृतम्	,,
एलाऽऽदिक्वाथः	,,	वरुणाद्यघृतम्	,,
वरुणादिकषायः	,,	वीरतराद्यतैलम्	४०९

विषयाः	पृ. सं.
अपरवीरतरादितैलम्	४०९
पुनर्नवाऽऽद्यतैलम्	,,
सैन्धवाद्यतैलवीरतरादिगणोपयोगः	,,
सप्तत्रिंशत्तमः प्रमेहपिडकाऽधिकारः	
प्रमेहस्य निदानम्	४१०
प्रमेहाणां सम्प्राप्तिः	,,
प्रमेहाणां संख्या साध्यत्वादि च	४११
प्रमेहदोषदूष्यज्ञानम्	,,
प्रमेहपूर्वरूपम्	,,
प्रमेहसामान्यलक्षणम्	४१२
कफजप्रमेहलक्षणम्	,,
पित्तजप्रमेहलक्षणम्	४१३
वातजप्रमेहलक्षणम्	,,
कफजप्रमेहोपद्रवाः	४१४
पित्तजप्रमेहोपद्रवाः	,,
वातजप्रमेहोपद्रवाः	,,
प्रमेहारिष्टम्	,,
स्त्रीणां प्रमेहाभावे कारणम्	,,
असाध्यप्रमेहलक्षणम्	,,
मधुमेहशब्दस्य प्रवृत्तौ निमित्तम्	४१५
प्रमेहोपेक्षाजनितदशपिडकानां नामस्थानानि	,,
उक्तदशविधपिडकानां लक्षणानि	,,
प्रमेहपिडकादोषनिर्णयः	,,
प्रमेहमन्तरा पिडकोत्पत्तिः	,,
पिडकानामसाध्यत्वम्	४१६
पिडकोपद्रवाः	,,

विषयाः	पृ. सं.
प्रमेहिणां पथ्यानि	४१६
प्रमेहिणामहितवस्तूनि	,,
प्रमेहचिकित्सा	,,
फलत्रिकादिक्काथः	४१७
त्रिकटुकाद्यमोदकः	४१८
न्यग्रोधाद्यचूर्णम्	,,
लोहादिचूर्णगुडूचीस्वरसौ	,,
त्रिकटुगुटिका	४१९
दाडिमाद्यघृतम्	,,
गोक्षुरादिचूर्णगुटिके	,,
सिंहामृतघृतम्	४२०
धान्वन्तरघृतम्	,,
अर्जुनाद्यं तैलं घृतं च	४२१
क्षारलेहः	,,
गोक्षुरकाद्यवलेहः	,,
असनादियोगः	४२२
शिलाजतुस्वर्णमाक्षिकरौप्यमाक्षिकप्रयोगाः	,,
प्रमेहपिडकाचिकित्सा	४२३
प्रमेहनिवृत्तिलक्षणम्	,,
अष्टात्रिंशत्तमः स्थौल्याधिकारः ।	
मेदोवृद्धिनिदानम्	,,
मेदोवृद्धिसम्प्राप्तिः	४२४
मेदोवृद्धिलक्षणम्	,,
मेदसः स्थानम्	,,
मेदस्विनोऽग्निवृद्धौ हेतुः	,,
अतिस्थूलस्य लक्षणम्	४२५
अतिस्थूलताया वैगुण्यम्	,,

विषयाः	पृ॰ सं.
मेदोवृद्धिचिकित्सा	४२५
अमृताऽऽदिगुग्गुलुः	४२६
दशाङ्गगुग्गुलुः	,,
त्र्यूषणादिगुग्गुलुः	,,
लोहरसायनम्	,,
लोहारिष्टः	४२७
व्योषाद्यशक्तुप्रयोगः	४२८
त्रिफलाऽऽद्यतैलम्	,,
महासुगन्धितैलम्	४२९
एकोनचत्वारिंशत्तमः कार्श्याधिकारः	
कार्श्यस्य निदानम्	४३१
कृशलक्षणम्	,,
अतिकृशस्य रोगाः	,,
सत्यपि कार्श्ये बलवत्त्वकारणम्	,,
सत्यामपि स्थूलतायां बलहीनत्वकारणम्	,,
कार्श्यचिकित्सा	,,
अश्वगन्धातैलम्	४३२
असाध्यकार्श्यम्	,,
चत्वारिंशत्तम उदराधिकारः ।	
उदरस्य निदानम्	,,
उदररोगसम्प्राप्तिः	,,
उदररोगस्य सामान्यरूपम्	,,
उदररोगस्य सन्निकृष्टनिदानपूर्विका संख्या	४३३
वातोदरस्य लक्षणम्	,,
पित्तोदरस्य लक्षणम्	,,
कफोदरस्य लक्षणम्	,,

विषयाः	पृ. सं.
सन्निपातोदरलक्षणम्	४३४
प्लीहोदरलक्षणम्	,,
बद्धगुदोदरलक्षणम्	४३५
क्षतोदरलक्षणम्	,,
दकोदरलक्षणम्	,,
उदररोगस्य साध्यत्वादि	४३६
जातोदकोदरस्य लक्षणम्	,,
उदररोगचिकित्सा	४३७
कुष्ठादिचूर्णम्	,,
लशुनतैलम्	,,
पित्तोदरकफोदरयोश्चिकित्सा	,,
नागरादि तैलं घृतं च	४३८
नारायणचूर्णम्	,,
नाराचघृतम्	४३९
वज्रकल्कः	,,
पुनर्नवाऽऽदिक्वाथः	,,
एकचत्वारिंशत्तमः शोथाधिकारः ।	
शोथस्य विप्रकृष्टं निदानम्	,,
शोथस्य सम्प्राप्तिपूर्वकं सामान्यलक्षणम्	४४०
वातजशोथलक्षणम्	,,
पित्तजशोथलक्षणम्	४४१
कफजशोथलक्षणम्	,,
द्विदोषजशोथलक्षणम्	,,
सन्निपातजशोथलक्षणम्	,,
अभिघातजशोथलक्षणम्	,,
विषजशोथलक्षणम्	,,

विषयाः	पृ. सं.
यत्र स्थिता दोषा यत्र शोथं-कुर्वन्ति, तत्कथनम्	४४२
शोथोपद्रवाः	,,
शोथासाध्यता	,,
शोथस्य कष्टसाध्यत्वादि	,,
शोथचिकित्सा	४४३
शोथस्य सामान्यचिकित्सा	४४४
पथ्याऽऽदिक्काथः	,,
फलत्रिकक्काथः	,,
गुडादिवटिका	,,
माणकघृतम्	४४५
शुष्कमूलकतैलम्	,,
द्विचत्वारिंशत्तमो वृद्धिब्रध्नाधिकारः ।	
वृद्धेर्निदानं सङ्ख्या च	,,
वृद्धिसम्प्राप्तिः	,,
वातजवृद्धिलक्षणम्	,,
पित्तजवृद्धिलक्षणम्	,,
कफजवृद्धिलक्षणम्	,,
रुधिरजवृद्धिलक्षणम्	,,
मेदोजवृद्धिलक्षणम्	,,
मूत्रजवृद्धिलक्षणम्	४४६
अन्त्रवृद्धिलक्षणम्	,,
उपेक्षिताया अन्त्रवृद्धेरवस्था	,,
अन्त्रवृद्धेरसाध्यलक्षणम्	,,
ब्रध्नस्य सनिदानं लक्षणम्	४४७
वृद्धिरोगचिकित्सा	,,

विषयाः	पृ. सं.
रास्नाऽऽदिक्काथः	४४८
वृद्धिबाधिका वटिका	,,
ब्रध्नचिकित्सा	,,
त्रिचत्वारिंशत्तमो गलगण्डगण्डमालाग्रन्थ्यर्बुदाधिकारः ।	
गलगण्डस्य सामान्यलक्षणम्	४४९
गलगण्डसम्प्राप्तिः	,,
वातजगलगण्डलक्षणम्	,,
कफजगलगण्डलक्षणम्	,,
मेदोजन्यगलगण्डलक्षणम्	४५०
असाध्यगलगण्डलक्षणम्	,,
गण्डमालालक्षणम्	,,
गण्डमालाया एवावस्थाविशेषस्यापच्या लक्षणम्	,,
अपच्याः साध्यत्वादि	,,
ग्रन्थिलक्षणम्	,,
वातजग्रन्थिलक्षणम्	४५१
पित्तजग्रन्थिलक्षणम्	,,
कफजग्रन्थिलक्षणम्	,,
मेदोजग्रन्थिलक्षणम्	,,
शिराजन्यग्रन्थिलक्षणम्	,,
ग्रन्थेः कष्टसाध्यताऽसाध्यता च	४५२
अर्बुदस्य सम्प्राप्तिपूर्वकं सामान्यलक्षणम्	,,
अर्बुदस्य विशिष्टानि लक्षणानि	,,
रुधिरजन्यार्बुदस्य निदानसम्प्राप्तिलक्षणादि	,,

विषयाः	पृ. सं.
मांसार्बुदसम्प्राप्तिः	४५३
मांसजन्यार्बुदानिदानम्	,,
असाध्यार्बुदलक्षणम्	,,
अर्बुदानां पाकाभावे कारणम्	,,
गलगण्डचिकित्सा	,,
अमृताऽऽदितैलम्	४५४
गण्डमालाचिकित्सा	,,
काञ्चनारगुग्गुलुः	,,
चक्रमर्दतैलम्	४५५
गुञ्जातैलम्	,,
अपचीचिकित्सा	,,
चन्दनादितैलम्	,,
व्योषादितैलम्	,,
ग्रन्थ्यर्बुदचिकित्सा	,,
चतुश्चत्वारिंशत्तमः श्लीपदाधिकारः	
श्लीपदस्य विप्रकृष्टकारणम्	४५६
श्लीपदस्य सामान्यलक्षणम्	,,
तेषां क्रमेण लक्षणानि	४५७
श्लीपदासाध्यता	,,
श्लीपदचिकित्सा	,,
पञ्चचत्वारिंशत्तमो विद्रध्यधिकारः	
विद्रधेः सम्प्राप्तिपूर्वकं सामान्यलक्षणम्	४५८
विद्रधिषड्विधत्वविवरणम्	,,
विशिष्टानि लक्षणानि	,,
वातजविद्रधिलक्षणम्	,,
पित्तजविद्रधिलक्षणम्	,,
कफजविद्रधिलक्षणम्	४५९
सान्निपातिकविद्रधिलक्षणम्	,,
अभिघातजविद्रधेः सम्प्राप्तिपूर्वकं लक्षणम्	,,
रुधिरजन्यविद्रधिलक्षणम्	,,
अधिष्ठानविशेषेण लिङ्गविशेषं बोधयितुमाभ्यन्तरविद्रधेर्लक्षणम्	,,
स्थानविशेषेण रूपविशेषः	४६०
विद्रधिस्रावमार्गः	,,
विद्रधिसाध्यत्वादि	,,
बहिर्विद्रधिसाध्यासाध्यत्वम्	४६१
विद्रधिचिकित्सा	,,
षट्चत्वारिंशत्तमो व्रणशोथाधिकारः	
व्रणशोथस्य सङ्ख्याविवरणपूर्वकं सामान्यलक्षणम्	४६२
व्रणशोथस्य विशिष्टरूपम्	,,
अपक्वव्रणशोथलक्षणम्	,,
पच्यमानव्रणशोथलक्षणम्	४६३
पक्वव्रणशोथलक्षणम्	,,
एकदोषजस्यापि शोथस्य पाककाले सकलैर्दोषैः सह सम्बन्धकथनम्	,,
शोथपाके मतान्तरम्	४६४
गम्भीरपाकलक्षणम्	,,
पक्वव्रणशोथात्पूयानिःसृतौ दोषः	,,
व्रणशोथस्य पक्वापक्वज्ञानाज्ञाने वैद्यगुणदोषौ	,,
व्रणशोथचिकित्सा	४६५

विषयाः	पृ. सं.
शोथनाशकलेपः	४६५
रात्रिलेपनिषेधे हेतुः	४६६
रात्रिलेपनिषेधाविषयाः	,,
शोथोपरि क्वाथादिपरिषेचनम्	,,
विम्लापनम्	,,
शोथस्य विम्लापनविधिः सुश्रुतोक्तः	,,
रक्तमोक्षणम्	,,
उपनाहः	४६७
पुनर्नवाऽद्युपनाहः	,,
शोथपाचनम्	,,
पाचनद्रव्याणि	,,
शोथभेदनम्	४६८
शस्त्रसाध्यं भेदनम्	,,
व्रणविशेषे शस्त्रनिक्षेपापवादः	,,
भेदनद्रव्यम्	,,
दारणम्	,,
शोथपीडनम्	,,
व्रणशोधनम्	४६९
व्रणरोपणम्	,,
सवर्णताकारकलेपः	४७०
व्रणरोगिभोजनम्	,,
व्रणे भ्रमादिजोपद्रवाः	४७१
आगन्तुकव्रणचिकित्सा	,,
जात्यादिघृतम्	४७२
जात्यादितैलम्	,,
विपरीतमल्लतैलम्	,,
अमृताऽऽदिगुग्गुलुः	,,

विषयाः	पृ. सं.
अग्निदग्धचिकित्सा	४७३
सिक्थकादिघृतम्	,,
पटोलादितैलम्	,,
व्रणग्रन्थिचिकित्सा	,,
सप्तचत्वारिंशत्तमो भग्नाधिकारः ।	
भग्नस्य भेदः	४७४
सन्धिभग्नस्य सामान्यलक्षणमुत्पिष्ट-	,,
विश्लिष्टकयोर्विशिष्टलक्षणं च	,,
विवर्त्तितादिलक्षणम्	,,
काण्डभग्नद्वादशभेदाः	४७५
ते प्रकाराः	,,
कर्कटकाश्विकाण्डभग्नलक्षणम्	,,
भग्नस्य कष्टसाध्यता	४७६
भग्नस्यासाध्यता	,,
अस्थिविशेषेण भग्नविशेषः	,,
भग्नचिकित्सा	४७७
आभागुग्गुलुः	४७८
लाक्षाऽऽद्यगुग्गुलुः	,,
गन्धतैलम्	४७९
अवस्थाऽनुसारेण भग्नोपशान्तिः	,,
भग्नस्य विशेषरक्षा	४८०
भग्नविशेषोपदेशः	,,
भग्नापथ्यम्	,,
भग्नारोग्यलक्षणम्	,,
अष्टचत्वारिंशत्तमो नाडीव्रणाधिकारः ।	
नाडीव्रणस्य सम्प्राप्तिपूर्विका निरुक्तिः	४८१

विषयाः	पृ. सं.
अस्या दोषानुबन्धेन संख्या	४८१
वातजनाडीव्रणलक्षणम्	४८२
पित्तजनाडीव्रणलक्षणम्	,,
कफजनाडीव्रणलक्षणम्	,,
त्रिदोषजनाडीव्रणलक्षणम्	,,
शल्यनिमित्तजनाडीव्रणलक्षणम्	,,
नाडीव्रणस्यासाध्यत्वं कष्टसाध्यत्वं च	,,
नाडीव्रणचिकित्सा	४८३
वातजनाडीव्रणचिकित्सा	,,
हिंस्राऽऽद्यतैलम्	,,
पित्तजनाडीव्रणचिकित्सा	,,
श्यामाघृतम्	,,
कफजनाडीव्रणचिकित्सा	,,
स्वर्जिकाऽऽद्यतैलम्	,,
सैन्धवाद्यतैलम्	,,
शल्यजनाडीव्रणचिकित्सा	,,
कुम्भीपाकाद्यतैलम्	४८४
कर्चूरतैलम्	,,
भल्लातकाद्यतैलम्	,,
स्वर्जिकाऽऽद्यतैलम्	४८५
सप्ताङ्गगुग्गुलुः	,,
एकोनपञ्चाशत्तमो भगन्दराधिकारः	
भगन्दरस्य पूर्वरूपसहितं स्वरूपम्	,,
भगन्दरस्य निरुक्तिः	४८६
वातजशतपोनकभगन्दरस्य लक्षणम्	,,
पैत्तिकोष्ट्रग्रीवभगन्दरस्य लक्षणम्	,,
श्लैष्मिकपरिस्राविभगन्दरलक्षणम्	,,

विषयाः	पृ. सं.
त्रिदोषजन्यशम्बूकावर्त्तभगन्दर-लक्षणम्	४८६
शल्यादिक्षतजन्योन्मार्गिभगन्दर-लक्षणम्	४८७
भगन्दरस्य कष्टसाध्यत्वम-साध्यत्वं च	,,
भगन्दरचिकित्सा	,,
विष्यन्दनतैलम्	४८८
निशाऽऽद्यतैलम्	४८९
करवीरादितैलम्	,,
नवकार्षिकगुग्गुलुः	,,
भगन्दरशस्त्रक्रियाकर्त्तव्यता	,,
लाङ्गलकादिच्छेदलक्षणानि	,,
व्रणिनोऽपथ्यानि	४९०
पञ्चाशत्तम उपदंशाधिकारः।	
उपदंशनिदानम्	,,
पञ्चोपदंशानां पृथक्त्वेन लक्षणानि	,,
उपदंशासाध्यता	४९१
उपदंशोपेक्षाफलम्	,,
उपदंशचिकित्सा	,,
वराऽऽदिगुग्गुलुः	४९३
करञ्जाद्यघृतम्	,,
भूनिम्बाद्यघृतम्	,,
अतिदेशः	,,
आगारधूमाद्यतैलम्	,,
गोजीतैलम्	४९४
जम्ब्वाद्यतैलम्	,,

विषयाः	पृ. सं.
कोशातकीतैलम्	४९४
उपदंशे पथ्यानि	,,
एकपञ्चाशत्तमो लिङ्गार्शोऽधिकारः।	
लिङ्गार्शोलक्षणम्	,,
लिङ्गार्शश्चिकित्सा	४९५
द्विपञ्चाशत्तमः शूकदोषाधिकारः।	
शूकदोषनिदानम्	,,
अश्वगन्धाऽऽदितैलम्	४९६
सर्षपिकालक्षणम्	,,
अष्ठीलिकालक्षणम्	,,
ग्रथितलक्षणम्	,,
कुम्भीकालक्षणम्	,,
अलजीलक्षणम्	,,
मृदितलक्षणम्	४९७
सम्मूढपिडकालक्षणम्	,,
अवमन्थलक्षणम्	,,
पुष्करिकालक्षणम्	,,
स्पर्शहानिलक्षणम्	,,
उत्तमालक्षणम्	,,
शतपोनकलक्षणम्	,,
त्वक्पाकलक्षणम्	,,
शोणितार्बुदलक्षणम्	४९८
मांसार्बुदलक्षणम्	,,
मांसपाकलक्षणम्	,,
विद्रधिलक्षणम्	,,
तिलकालकलक्षणम्	,,
शूकदोषासाध्यलक्षणम्	,,

विषयाः	पृ. सं.
शूकदोषचिकित्सा	४९८
दार्वीतैलम्	४९९
रसाञ्जनलेपः	,,
त्रिपञ्चाशत्तमः कुष्ठरोगाधिकारः।	
कुष्ठस्य निदानं संख्या च	,,
सप्त महाकुष्ठनामानि	५००
एकादश क्षुद्रकुष्ठनामानि	,,
कुष्ठानां त्रिदोषजत्वेनैकस्यापि दोषस्योल्वणतया सप्तधात्वम्	५०१
कुष्ठपूर्वरूपम्	,,
येनोल्वणेन यत् कुष्ठमुत्पद्यते तन्नामानि	,,
महाकुष्ठानां मध्ये प्रथमं कापालस्य लक्षणम्	५०२
औदुम्बरकुष्ठलक्षणम्	,,
मण्डलकुष्ठलक्षणम्	,,
सिध्मकुष्ठलक्षणम्	,,
काकणकुष्ठलक्षणम्	५०३
पुण्डरीककुष्ठलक्षणम्	,,
ऋक्षजिह्वककुष्ठलक्षणम्	,,
क्षुद्रकुष्ठानां मध्ये एककुष्ठगजचर्मणोर्लक्षणम्	,,
चर्मदलनामकक्षुद्रकुष्ठलक्षणम्	,,
विचर्चिकानामकक्षुद्रकुष्ठलक्षणम्	५०४
विपादिकानामकक्षुद्रकुष्ठलक्षणम्	,,
पामालक्षणम्	,,
कच्छूनामकक्षुद्रकुष्ठलक्षणम्	,,
दद्रुनामकक्षुद्रकुष्ठलक्षणम्	,,

विषयाः	पृ. सं.
विस्फोटनामकक्षुद्रकुष्ठलक्षणम्	५०४
किटिमकुष्ठलक्षणम्	,,
अलसकनामकक्षुद्रकुष्ठलक्षणम्	५०५
शतारुष्कुष्ठलक्षणम्	,,
सप्तधातुगतानां कुष्ठानां लक्षणानि	,,
रसगतकुष्ठलक्षणम्	,,
रुधिरगतकुष्ठलक्षणम्	,,
मांसगतकुष्ठलक्षणम्	,,
मेदोगतकुष्ठलक्षणम्	,,
अस्थिमज्जगतकुष्ठलक्षणम्	,,
शुक्रगतकुष्ठलक्षणम्	५०६
कुष्ठेषूल्वणवातादिदोषलिङ्गम्	,,
कुष्ठस्य साध्यत्वादि	,,
कुष्ठारिष्टम्	,,
त्वग्दुष्टिसाम्यात् कुष्ठभेदत्वाच्चात्रैव सभेदश्वित्रलक्षणम्	५०७
दोषभेदेन लक्षणभेदाः	,,
श्वित्रस्य साध्यासाध्यत्वम्	५०८
कुष्ठादिरोगाणां संसर्गजत्वम्	,,
कुष्ठचिकित्सा	,,
पथ्याऽऽदिलेपः	,,
सोमराज्युद्वर्त्तनम्	,,
पञ्चनिम्बकावलेहः	५०९
स्वायम्भुवगुग्गुलुः	५१०
एकविंशतिकगुग्गुलुः	,,
कैशोरगुग्गुलुप्रयोगः	,,
अमृतभल्लातकावलेहः	,,

विषयाः	पृ. सं.
महाभल्लातकावलेहः	५११
लघुमञ्जिष्ठाऽऽदिक्वाथः	५१३
मध्यमञ्जिष्ठाऽऽदिक्वाथः	,,
बृहन्मञ्जिष्ठाऽऽदिक्वाथः	,,
लघुमरिचादितैलम्	,,
महामरिचाद्यतैलम्	५१४
तालकेश्वररसः	५१५
गलितकुष्ठारिरसः	,,
सिध्मचिकित्सा	,,
केशरषष्ठम्	,,
चर्मदलचिकित्सा	५१६
पामाचिकित्सा	,,
जीरकाद्यतैलम्	,,
आदित्यपाकतैलम्	,,
सैन्धवादिलेपः	,,
कच्छूचिकित्सा	,,
अर्कतैलम्	,,
कच्छूराक्षसतैलम्	,,
कृतमालादिकल्कः	५१७
दद्रुचिकित्सा	,,
श्वित्रकुष्ठचिकित्सा	,,
सोमराजीघृतम्	५१८

चतुष्पञ्चाशत्तमः शीतपित्तोदर्द-कोठोत्कोठाधिकारः ।

विषयाः	पृ. सं.
शीतपित्तादीनां विप्रकृष्टसन्निकृष्टनिदानपूर्विका सम्प्राप्तिः	,,
शीतपित्तादीनां पूर्वरूपम्	,,

विषयाः	पृ. सं.
शीतपित्तलक्षणम्	५१९
उदर्दलक्षणम्	,,
कोठोत्कोठयोर्लक्षणम्	,,
शीतपित्तोदर्दकोठोत्कोठचिकित्सा	,,
नवकार्षिको यथा	,,
आर्द्रकखण्डम्	५२०
पञ्चपञ्चाशत्तमो विसर्पाधिकारः ।	
विसर्पस्य विप्रकृष्टनिदानं सङ्ख्या निरुक्तिश्च	,,
विसर्पस्य सप्तधात्वम्	५२१
विसर्पस्य दोषदूष्याणि	,,
वातजविसर्पलक्षणम्	,,
पित्तजविसर्पलक्षणम्	,,
कफजविसर्पलक्षणम्	,,
सान्निपातिकविसर्पलक्षणम्	,,
वातपित्तजाग्निविसर्पलक्षणम्	,,
वातकफजग्रन्थिविसर्पलक्षणम्	५२२
कफपित्तजकर्दमाख्यविसर्पलक्षणम्	,,
सान्निपातिकविसर्पलक्षणम्	५२३
क्षतागन्तुनिमित्तकाष्टमवीसर्पलक्षणम्	,,
विसर्पोपद्रवाः	,,
विसर्पस्य साध्यत्वादि	,,
विसर्पचिकित्सा	५२४
दशाङ्गलेपः	,,
करञ्जतैलम्	,,
षट्पञ्चाशत्तमः स्नायुरोगाधिकारः	
स्नायुरोगस्य निदानं लक्षणं च	५२५
स्नायुरोगचिकित्सा	,,

विषयाः	पृ. सं.
सप्तपञ्चाशत्तमो विस्फोटकाधिकारः ।	
विस्फोटकस्य विप्रकृष्टसन्निकृष्टनिदानपूर्विका सम्प्राप्तिः	५२६
विस्फोटकसामान्यलक्षणम्	,,
वातजविस्फोटकलक्षणम्	,,
पित्तजविस्फोटकलक्षणम्	,,
कफजविस्फोटकलक्षणम्	५२७
कफपित्तजविस्फोटकलक्षणम्	,,
वातपित्तजविस्फोटकलक्षणम्	,,
त्रिदोषजविस्फोटकलक्षणम्	,,
रुधिरजन्यविस्फोटकलक्षणम्	,,
विस्फोटकभेदाः	,,
विस्फोटकोपद्रवाः	,,
विस्फोटकस्य साध्यत्वादि	५२८
विस्फोटकचिकित्सा	,,
किराततिक्तकादिद्वादशाङ्गकाथः	,,
अष्टपञ्चाशत्तमः फिरङ्गरोगाधिकारः ।	
फिरङ्गशब्दस्य निरुक्तिः	५२९
फिरङ्गस्य विप्रकृष्टनिदानम्	,,
फिरङ्गरोगरूपम्	,,
फिरङ्गस्योपद्रवाः	,,
फिरङ्गस्य साध्यत्वादि	५३०
फिरङ्गरोगस्य चिकित्सा	,,
कर्पूररसः	,,
सप्तशालिवटी	,,
धूमप्रयोगः	,,

विषयाः	पृ. सं.
एकोनषष्टितमो मसूरिका-शीतलाऽधिकारः ।	
मसूरिकाणां विप्रकृष्टसन्निकृष्ट-निदानपूर्विका सम्प्राप्तिः	५३२
मसूरिकापूर्वरूपम्	,,
वातजमसूरिकालक्षणम्	,,
पित्तजमसूरिकालक्षणम्	,,
रुधिरजन्यमसूरिकालक्षणम्	,,
कफजमसूरिकालक्षणम्	५३३
त्रिदोषजमसूरिकालक्षणम्	,,
रसगतमसूरिकालक्षणम्	,,
रक्तजमसूरिकालक्षणम्	,,
मांसगतमसूरिकालक्षणम्	,,
मेदोगतमसूरिकालक्षणम्	,,
अस्थिमज्जगतमसूरिकालक्षणम्	,,
शुक्रगतमसूरिकालक्षणम्	५३४
चर्मजामसूरिकालक्षणम्	,,
रोमान्तिकामसूरिकालक्षणम्	,,
मसूरिकायाः सुखसाध्यता	,,
मसूरिकायाः कष्टसाध्यता	,,
मसूरिकाणामसाध्यता	५३५
मसूरिकाऽरिष्टम्	,,
मसूरिकाहेतुकः शोथविशेषः	,,
मसूरिकाचिकित्सा	५३६
निम्बादिक्वाथः	५३७
मसूरिकाभेदशीतलाऽधिकारः ।	
शीतलायाः स्वरूपं भेदा भेषजञ्च	५३८
शीतलास्तोत्रम्	५३९
शीतलाया भेदाः	५४०
शीतलाया द्वितीयो भेदः	,,
शीतलायास्तृतीयो भेदः	,,
शीतलायाश्चतुर्थपञ्चमषष्ठसप्तमभेदाः	५४१
शीतलासप्तकस्य सामान्यचिकित्सा	,,
शीतलायाः साध्यत्वादि	,,
षष्टितमः क्षुद्ररोगाधिकारः ।	
पलितरोगस्य निदानपूर्वकं लक्षणम्	,,
पलितचिकित्सा	५४२
इन्द्रलुप्तस्य निदानपूर्वकसम्प्राप्ति-लक्षणम्	,,
इन्द्रलुप्तचिकित्सा	,,
स्नुहीदुग्धादितैलम्	५४३
दारुणकलक्षणं चिकित्सा च	,,
गुञ्जाऽऽदितैलम्	,,
अरूंषिकालक्षणम्	,,
अरूंषिकाचिकित्सा	५४४
त्रिफलाऽऽद्यतैलम्	,,
इरिवेल्लिकालक्षणम्	,,
इरिवेल्लिकाचिकित्सा	,,
पनसिकालक्षणम्	,,
पनसिकाचिकित्सा	,,
पाषाणगर्दभलक्षणम्	,,
पाषाणगर्दभचिकित्सा	,,
मुखदूषिकालक्षणम्	५४५
मुखदूषिकाचिकित्सा	,,

विषयाः	पृ. सं.
मुखलेपमात्रा	५४५
मुखलेपाः	,,
मुखकान्तिकरलेपः	,,
व्यङ्गलक्षणम्	,,
नीलिकालक्षणम्	,,
व्यङ्गनीलिकयोश्चिकित्सा	,,
कुङ्कुमाद्यतैलम्	५४६
वल्मीकलक्षणम्	५४७
असाध्यवल्मीकलक्षणम्	,,
वल्मीकचिकित्सा	,,
मनःशिलाऽऽद्यतैलम्	५४८
कक्षागन्धमालयोर्लक्षणं चिकित्सा च	,,
अग्निरोहिणीलक्षणम्	,,
अग्निरोहिणीचिकित्सा	,,
विदारिकालक्षणम्	,,
विदारिकाचिकित्सा	५४९
चिप्पलक्षणम्	,,
कुनखस्य निदानं लक्षणं च	,,
चिप्पकुनखयोश्चिकित्सा	,,
परिवर्त्तिकाया निदानं लक्षणं च	,,
परिवर्त्तिकाचिकित्सा	५५०
अवपाटिकाया निदानं लक्षणं च	,,
अवपाटिकाचिकित्सा	,,
निरुद्धप्रकाशलक्षणम्	,,
निरुद्धप्रकाशचिकित्सा	५५१
सन्निरुद्धगुदस्य निदानं लक्षणं च	,,
सन्निरुद्धगुदस्य चिकित्सा	,,
वृषणकच्छ्वा निदानं लक्षणं च	५५१
वृषणकच्छूचिकित्सा	,,
अहिपूतनस्य निदानं लक्षणं च	५५२
अहिपूतनचिकित्सा	,,
गुदभ्रंशस्य लक्षणं निदानं च	,,
गुदभ्रंशस्य चिकित्सा	,,
मूषकतैलम्	,,
शूकरदंष्ट्रकलक्षणम्	,,
शूकरदंष्ट्रकचिकित्सा	५५३
अनुशयीलक्षणम्	,,
अनुशयीचिकित्सा	,,
अलसलक्षणम्	,,
अलसचिकित्सा	,,
दारीलक्षणम्	५५४
दारीचिकित्सा	,,
उन्मत्ततैलम्	,,
कदरलक्षणम्	,,
कदरचिकित्सा	५५५
तिलकालकलक्षणम्	,,
मशकलक्षणम्	,,
श्यावपिण्डिकलक्षणम्	,,
जतुमणिलक्षणम्	,,
तिलकालकमशकजतुमणिचिकित्सा	,,
न्यच्छलक्षणम्	,,
न्यच्छचिकित्सा	५५६
पद्मिनीकण्टकलक्षणम्	,,
पद्मिनीकण्टकचिकित्सा	,,

विषयाः	पृ. सं.
निम्बादिघृतम्	५५६
अजगल्लिकालक्षणम्	,,
अजगल्लिकाचिकित्सा	,,
यवप्रख्यालक्षणम्	५५७
अन्त्रालजीलक्षणम्	,,
यवप्रख्याऽन्त्रालजीचिकित्सा	,,
विवृतालक्षणम्	,,
इन्द्रविद्धालक्षणम्	,,
गर्दभिकालक्षणम्	,,
जालगर्दभलक्षणम्	,,
विवृतेन्द्रविद्धागर्दभिकाजालगर्दभानां-चिकित्सा	५५८
कच्छपिकालक्षणम्	,,
कच्छपिकाचिकित्सा	,,
शर्कराऽर्बुदलक्षणम्	,,
शर्कराऽर्बुदचिकित्सा	,,
सहेतुकाः सलक्षणाः कति चिदालस्यादिक्षुद्रविकाराः	,,
एकषष्टितमः शिरोरोगाधिकारः ।	
शिरोरोगस्य निदानं संख्या च	५५९
वातजशिरोरोगलक्षणम्	,,
पित्तजशिरोरोगलक्षणम्	,,
कफजशिरोरोगलक्षणम्	५६०
सन्निपातजशिरोरोगलक्षणम्	,,
रुधिरजन्यशिरोरोगलक्षणम्	,,
रसादिधातुक्षयजन्याशिरोरोगलक्षणम्	,,
कृमिजन्याशिरोरोगलक्षणम्	,,

विषयाः	सं. पृ.
सूर्यावर्त्तलक्षणम्	५६०
अनन्तवातलक्षणम्	५६१
शङ्खकलक्षणम्	,,
अर्द्धावभेदकस्य निदानं लक्षणं च	,,
शिरोरोगचिकित्सा	५६२
शिरोवस्तिविधिः	,,
षड्बिन्दुतैलम्	५६३
कुमारीतैलम्	,,
पथ्याऽऽदिक्काथः	५६४
सर्वशिरोरोगाणां सामान्यचिकित्सा	५६५
द्विषष्टितमो नेत्ररोगाधिकारः ।	
नेत्रस्य प्रमाणम्	,,
नेत्रस्याङ्गानि	,,
नेत्रमण्डलोत्पन्नाष्टसप्ततिरोगाः	,,
सुश्रुतोक्तषट्सप्ततिसंख्या	५६६
नेत्ररोगाणां समान्यतो विप्रकृष्टसन्निकृष्टनिदानपूर्विका संप्राप्तिः	,,
आदौ दृष्टिरोगाः	५६७
नेत्रदृष्टिलक्षणम्	,,
चत्वारि पटलानि	,,
प्रथमपटलगतदोषस्वभावः	,,
द्वितीयपटलगतदोषस्वभावः	५६८
तृतीयपटलगतदोषस्वभावः	,,
चतुर्थपटलगतदोषस्वभावः	५६९
दृष्टिरोगाणां नामानि संख्या च	,,
वातजलिङ्गनाशस्य लक्षणम्	५७०
पित्तजलिङ्गनाशस्य लक्षणम्	,,

विषयाः	पृ. सं.
कफजलिङ्गनाशस्य लक्षणम्	५७०
सन्निपातजलिङ्गनाशस्य लक्षणम्	,,
रक्तजन्यलिङ्गनाशलक्षणम्	,,
परिम्लायिलिङ्गनाशलक्षणम्	५७१
वातादिजनेत्रवर्णेन लिङ्गनाशस्य षड्विधत्वम्	,,
वातादिजनिते रोगे नेत्रमण्डलरूपविशेषः	,,
लिङ्गनाशेऽनुक्तदाहादिदोषलिङ्गम्	५७२
पित्तविदग्धदृष्टिलक्षणम्	,,
कफविदग्धदृष्टिलक्षणम्	,,
धूमदर्शिलक्षणम्	,,
ह्रस्वजात्यलक्षणम्	,,
नकुलान्ध्यलक्षणम्	५७३
गम्भीरिकालक्षणम्	,,
सनिमित्तलिङ्गनाशस्य निदानं लक्षणं च	,,
अनिमित्तलिङ्गनाशस्य निदानं लक्षणं च	,,
कृष्णमण्डलजा रोगाः	,,
तेषां नामानि सङ्ख्या च	,,
सव्रणशुक्रलक्षणम्	,,
सव्रणशुक्रस्य साध्यासाध्यलक्षणानि	५७४
अव्रणशुक्रलक्षणम्	,,
व्रणशुक्रस्य साध्यत्वेऽप्यवस्थाभेदेन कष्टसाध्यता	,,
अव्रणशुक्रस्यासाध्यता	,,
अक्षिपाकात्ययलक्षणम्	५७५
अजकाजातलक्षणम्	,,

विषयाः	पृ. सं.
नेत्रशुक्लभागजा रोगाः	५७५
तेषां नामानि संङ्ख्या च	,,
प्रस्तार्यर्मलक्षणम्	,,
शुक्लार्मलक्षणम्	५७६
अधिमांसार्मलक्षणम्	,,
रक्तार्मलक्षणम्	,,
स्नाय्वर्मलक्षणम्	,,
शुक्तिलक्षणम्	,,
अर्जुनलक्षणम्	,,
पिष्टकलक्षणम्	,,
शिराजाललक्षणम्	,,
शिराजपिडकालक्षणम्	,,
बलासग्रथितलक्षणम्	५७७
वर्त्मजा रोगाः	,,
तत्रत्यानां रोगाणां नामानि सङ्ख्या च	,,
उत्सङ्गिनलिक्षणम्	,,
कुम्भीकालक्षणम्	,,
पोथकीलक्षणम्	५७८
वर्त्मशर्करालक्षणम्	,,
अर्शोवर्त्मलक्षणम्	,,
शुष्कार्शोलक्षणम्	,,
अञ्जनदूषिकालक्षणम्	,,
बहुलवर्त्मलक्षणम्	,,
वर्त्मबन्धकलक्षणम्	,,
क्लिष्टवर्त्मलक्षणम्	,,
वर्त्मकर्दमलक्षणम्	५७९
श्याववर्त्मलक्षणम्	,,

विषयाः	पृ. सं.
प्रक्लिन्नवर्त्मलक्षणम्	५७९
अक्लिन्नवर्त्मलक्षणम्	,,
वातहतवर्त्मलक्षणम्	,,
वर्त्मार्बुदलक्षणम्	,,
निमेषलक्षणम्	,,
शोणितार्शोलक्षणम्	,,
लगणलक्षणम्	५८०
बिसवर्त्मलक्षणम्	,,
कुञ्चनलक्षणम्	,,
पक्ष्मरोगाः	,,
तत्रत्ययो रोगयोर्नामनी	,,
पक्ष्मकोपलक्षणम्	,,
अन्यग्रन्थोक्तपक्ष्मकोपलक्षणम्	,,
पक्ष्मशातलक्षणम्	,,
सन्धिजा रोगाः	५८१
सन्धयः	,,
तत्रत्यानां रोगाणां संख्या	,,
पूयालसलक्षणम्	,,
उपनाहलक्षणम्	,,
स्रावाणां सम्प्राप्तिः	,,
पित्तजस्रावलक्षणम्	,,
कफजस्रावलक्षणम्	५८२
सन्निपातजस्रावलक्षणम्	,,
रुधिरजन्यस्रावलक्षणम्	,,
पर्वण्यलज्योर्लक्षणम्	,,
जन्तुग्रन्थिलक्षणम्	,,
समस्तनेत्रजा रोगाः	,,

विषयाः	पृ. सं.
तेषां नामानि संख्या च	५८२
चत्वार्यभिष्यन्दनामानि	,,
वाताभिष्यन्दलक्षणम्	५८३
पित्ताभिष्यन्दलक्षणम्	,,
कफाभिष्यन्दलक्षणम्	,,
रक्ताभिष्यन्दलक्षणम्	,,
अधिमन्थानामभिष्यन्दजत्वकथनम्	,,
अधिमन्थानां लक्षणानि	,,
सशोथशोथहीनाक्षिपाकयोर्लक्षणम्	५८४
हताधिमन्थलक्षणम्	,,
वातपर्ययलक्षणम्	,,
शुष्काक्षिपाकलक्षणम्	,,
अन्यतोवातलक्षणम्	५८५
अम्लाध्युषितलक्षणम्	,,
शिरोत्पातलक्षणम्	,,
शिराहर्षलक्षणम्	,,
नेत्रस्य सामतालक्षणम्	,,
नेत्रस्य निरामतालक्षणम्	५८६
नेत्ररोगस्य चिकित्सा	,,
नेत्ररोगिणां हिताहितपदार्थाः	,,
सेकविधिः	,,
आश्च्योतनविधिः	५८७
पिण्डीविधिः	५८८
बिडालकविधिः	,,
मुखालेपो यथा	,,
तर्पणविधिः	५८९
तर्पणनिषेधविषयाः	५९०

विषयाः	पृ. सं.
पुटपाकविधिः	५९०
अञ्जनविधिः	,,
दृष्टिप्रसादनी शलाका	५९१
अञ्जनकरणविधिः	,,
अञ्जननिषेधविषयाः	५९२
स्नेहनी वटिका	,,
रोपणी वटी	,,
लेखनी चन्द्रोदया वटी	,,
पुष्पहरी वर्त्तिः	,,
स्नेहनी रसक्रिया	,,
रोपणी रसक्रिया	,,
लेखनी रसक्रिया	५९३
स्नेहनं चूर्णम्	,,
रोपणं चूर्णम्	,,
लेखनं चूर्णम्	,,
सामान्यान्यञ्जनानि	५९४
मुक्ताऽऽदिमहाञ्जनम्	,,
नयनशोणाञ्जनम्	,,
चन्द्रोदया वटी	५९५
चन्द्रप्रभावर्त्तिः	,,
कणामरिचयोः प्रयोगः	,,
महात्रिफलाऽऽद्यं घृतम्	,,
द्वितीयं त्रिफलाऽऽद्यघृतम्	५९६
वासकादिक्वाथः	५९७
त्रिषष्टितमः कर्णरोगाधिकारः।	
कर्णरोगाणां नामानि सङ्ख्या च	,,
कर्णशूलस्य सम्प्राप्तिपूर्वकं लक्षणम्	,,

विषयाः	पृ. सं.
कर्णशूलस्योपद्रवात्तदसाध्यता च	५९७
कर्णनादलक्षणम्	,,
बाधिर्यलक्षणम्	५९८
बाधिर्यासाध्यता	,,
कर्णक्ष्वेडलक्षणम्	,,
कर्णस्रावलक्षणम्	,,
कर्णकण्डूलक्षणम्	,,
कर्णगूथलक्षणम्	,,
कर्णप्रतिनाहलक्षणम्	,,
कृमिकर्णकलक्षणम्	५९९
पतङ्गादिषु कर्णप्रविष्टेषु लक्षणम्	,,
द्विविधकर्णविद्रधिलक्षणम्	,,
कर्णपाकलक्षणम्	,,
पूतिकर्णकलक्षणम्	,,
कर्णशोथकर्णार्बुदकर्णार्शोलक्षणानि	,,
चरकोक्तं कर्णरोगचतुष्टयं वातपित्त-कफसन्निपातकृतम्	६००
वातजकर्णरोगलक्षणम्	,,
पित्तजकर्णरोगलक्षणम्	,,
कफजकर्णरोगलक्षणम्	,,
सन्निपातजकर्णरोगलक्षणम्	,,
कर्णपालीरोगाः	,,
सनिदानं परिपोटकलक्षणम्	,,
उत्पातलक्षणम्	,,
उन्मन्थकलक्षणम्	,,
दुःखवर्द्धनलक्षणम्	६०१
परिलेहिलक्षणम्	,,

विषयाः	पृ. सं.	विषयाः	पृ. सं.
कर्णरोगचिकित्सा	६०१	दुष्टप्रतिश्यायलक्षणम्	६०७
बिल्वतैलम्	६०२	रक्तजप्रतिश्यायलक्षणम्	"
कुष्ठादितैलम्	"	चिकित्सामन्तरा सर्वे प्रतिश्यायाः कालान्तरेणासाध्याः	६०८
कर्णपालीरोगचिकित्सा	६०३	प्रतिश्यायदुष्टौ कृम्युत्पत्तिस्तल्लक्षणंच	"
शतावरीतैलम्	"	वृद्धानां प्रतिश्यायानामपरविकारकारकत्वम्	"
चतुःषष्टितमो नासारोगाधिकारः।		चतुस्त्रिंशत्संख्यापूरणाय कथनम्	"
नासारोगाणां नामानि संख्या च	"	चिकित्साभेदादामपीनसलक्षणम्	"
पीनसलक्षणम्	६०४	पक्वपीनसलक्षणम्	६०९
पूतिनस्यलक्षणम्	"	नासारोगचिकित्सा	"
नासापाकलक्षणम्	"	व्योषादिघटिका	"
पूयरक्तलक्षणम्	"	व्याघ्रीतैलम्	"
दोषजक्षवथुलक्षणम्	६०५	शिग्रुतैलम्	"
आगन्तुजक्षवथुलक्षणम्	"	**पञ्चषष्टितमो मुखरोगाधिकारः।**	
भ्रंशथुलक्षणम्	"	मुखस्य स्वरूपम्	६११
दीप्तिलक्षणम्	"	मुखरोगसंख्या	"
प्रतीनाहलक्षणम्	"	मुखरोगनिदानम्	"
स्रावलक्षणम्	"	ओष्ठरोगाणां निदानपूर्विका संख्या	"
नासाशोषलक्षणम्	"	वातजौष्ठरोगलक्षणम्	"
प्रतिश्यायस्य सद्योजनकनिदानपूर्विका सम्प्राप्तिः	"	पित्तजौष्ठरोगलक्षणम्	"
प्रतिश्यायस्य चयादिक्रमजनकनिदानपूर्विका सम्प्राप्तिः	६०६	कफजौष्ठरोगलक्षणम्	"
प्रतिश्यायपूर्वरूपम्	"	त्रिदोषजौष्ठरोगलक्षणम्	६१२
वातजप्रतिश्यायलक्षणम्	"	रक्तजौष्ठरोगलक्षणम्	"
पित्तजप्रतिश्यायलक्षणम्	६०७	मांसजौष्ठरोगलक्षणम्	"
कफजप्रतिश्यायलक्षणम्	"	मेदोजौष्ठरोगलक्षणम्	"
त्रिदोषजप्रतिश्यायलक्षणम्	"	अभिघातजौष्ठरोगलक्षणम्	"

विषयाः	पृ. सं.
ओष्ठरोगचिकित्सा	६१२
प्रतिसारणविधिः	६१३
दन्तवेष्टजरोगाणां नामानि संख्या च	,,
शीतादलक्षणम्	,,
दन्तपुप्पटकलक्षणम्	,,
दन्तवेष्टलक्षणम्	,,
सौषिरलक्षणम्	६१४
महासौषिरलक्षणम्	,,
पारिदरलक्षणम्	,,
उपकुशलक्षणम्	,,
वैदर्भलक्षणम्	,,
खल्लीवर्द्धनलक्षणम्	,,
अधिमांसलक्षणम्	६१५
पञ्चविधदन्तनाडीलक्षणम्	,,
दन्तविद्रधिलक्षणम्	,,
दन्तवेष्टरोगचिकित्सा	,,
मुस्ताऽऽदिवटिका	,,
सहचराद्यतैलम्	६१६
जात्यादितैलम्	६१७
दन्तरोगाणां नामानि सङ्ख्या च	,,
दालनलक्षणम्	६१८
क्रिमिदन्तलक्षणम्	,,
भञ्जनकलक्षणम्	,,
दन्तहर्षलक्षणम्	,,
दन्तशर्करालक्षणम्	,,
कपालिकालक्षणम्	,,
श्यावदन्तकलक्षणम्	,,

विषयाः	पृ. सं.
कराललक्षणम्	६१९
दन्तरोगचिकित्सा	,,
लाक्षाऽऽद्यतैलम्	,,
दन्तरोगिणोऽपथ्यानि	६२०
जिह्वारोगाणां निदानं नामानि सङ्ख्या च	,,
वातजजिह्वारोगलक्षणम्	,,
पित्तजजिह्वारोगलक्षणम्	,,
कफजजिह्वारोगलक्षणम्	,,
अलासलक्षणम्	,,
उपजिह्विकालक्षणम्	६२१
जिह्वारोगचिकित्सा	,,
तालुरोगाणां सङ्ख्या नामानि च	,,
गलशुण्डीलक्षणम्	,,
तुण्डिकेरीलक्षणम्	,,
अध्रूषलक्षणम्	६२२
कच्छपलक्षणम्	,,
तालुर्बुदलक्षणम्	,,
मांससङ्घातलक्षणम्	,,
तालुपुप्पुटलक्षणम्	,,
तालुशोषलक्षणम्	,,
तालुपाकलक्षणम्	,,
तालुरोगचिकित्सा	,,
गलरोगाणां नामानि सङ्ख्या च	६२३
पञ्चरोहिणीनां सामान्या सम्प्राप्तिः	,,
वातजरोहिणीलक्षणम्	,,
पित्तजरोहिणीलक्षणम्	,,
कफजरोहिणीलक्षणम्	६२४

विषयाः	पृ. सं.
त्रिदोषजरोहिणीलक्षणम्	६२४
रक्तजरोहिणीलक्षणम्	,,
रोहिणीनां मारकत्वावधिः	,,
कण्ठशालूकलक्षणम्	,,
अधिजिह्वकलक्षणम्	,,
वलयलक्षणम्	,,
बलासलक्षणम्	,,
एकवृन्दलक्षणम्	,,
वृन्दलक्षणम्	६२५
शतघ्नीलक्षणम्	,,
गिलायुलक्षणम्	,,
गलविद्रधिलक्षणम्	,,
गलौघलक्षणम्	,,
स्वरघ्नलक्षणम्	,,
मांसतानलक्षणम्	,,
विदारीलक्षणम्	६२६
गलरोगचिकित्सा	,,
गलरोगाणां सामान्य चिकित्सा	६२७
समस्तमुखरोगाणां निदानं सङ्ख्या च	,,
वातजमुखरोगलक्षणम्	,,
पैत्तिकमुखरोगलक्षणम्	,,
कफजमुखरोगलक्षणम्	,,
मुखरोगेष्वसाध्यानि	,,
सम्पूर्णमुखरोगाणां चिकित्सा	६२८
षट्षष्टितमो विषाधिकारः ।	
विषस्य द्वैविध्यम्	६२९
स्थावरविषस्य दशस्थानानि	,,
जङ्गमविषस्य षोडश स्थानानि	६२९
स्थावरविषाणां सामान्यकार्याणि	६३०
मूलविषस्य कार्यम्	,,
पत्रविषकार्यम्	,,
फलविषकार्यम्	,,
पुष्पविषकार्यम्	,,
त्वक्सारनिर्यासविषकार्याणि	,,
क्षीरविषकार्यम्	,,
धातुविषकार्यम्	,,
कन्दविषविशेषकार्यम्	,,
विषपरीक्षा	,,
विषस्य दशगुणाः	,,
तैर्गुणैर्विषस्य कार्यम्	६३१
विषलिप्तशस्त्रहतस्य लक्षणम्	,,
विषदातृलक्षणम्	,,
जङ्गमविषस्य सामान्यकार्याणि	६३२
सर्पाः	,,
भोगिसर्पादिकृतदंशलक्षणभेदः	,,
देशविशेषे कालविशेषे च दष्टस्यासाध्यत्वम्	,,
दर्वीकरजातिसर्पाणां विषकृत्यम्	६३३
दर्वीकरलक्षणम्	,,
येषु विषमाशु मारकं भवति तेषां निर्देशः	,,
विषाभिभूतस्यासाध्यलक्षणम्	,,
दूषीविषलक्षणम्	६३४
दूषीविषकार्यम्	,,

विषयाः	पृ. सं.
स्थानविशेषोत्थितदूषीविषलक्षणम्	६३४
दूषीविषस्य प्रकोपसमयः	,,
प्रकुपितदूषीविषस्य पूर्वरूपम्	,,
प्रकुपितदूषीविषस्य रूपम्	६३५
दूषीविषभेदेन विकारभेदाः	,,
दूषीविषशब्दस्य निरुक्तिः	,,
दूषीविषस्य साध्यत्वादि	,,
कृत्रिमविषलक्षणं गरकार्यञ्च	,,
लूताया उत्पत्तिर्निरुक्तिः संख्या च	६३६
तासां सामान्यानां दंशलक्षणम्	,,
असाध्यसौवर्णकादिलूतादंशलक्षणम्	६३७
मूषकविषलक्षणम्	,,
प्राणहरमूषकविषकार्यम्	,,
कृकलासदष्टस्य लक्षणम्	,,
वृश्चिकविषलक्षणम्	,,
असाध्यवृश्चिकदष्टस्य लक्षणम्	,,
कणभोच्चिटिङ्गदष्टयोर्लक्षणे	,,
सविषमण्डूकदष्टस्य लक्षणम्	६३८
मत्स्यविषस्य लक्षणम्	,,
जलौकाविषकार्यम्	,,
गृहगोधिकाशतपदीमशकविषकार्याणि	,,
असाध्यमशकमक्षिकादंशलक्षणम्	,,
व्याघ्रादिविषकार्यम्	,,
विषोज्झितस्य लक्षणम्	६३९
विषचिकित्सायां स्थावरविषघ्नोपायाः	,,
मृत्युपाशच्छेदिघृतम्	६४०

विषयाः	पृ. सं.
सप्तषष्टितमः प्रदराधिकारः ।	
प्रदररोगस्य विप्रकृष्टनिदानं संख्या च	६४१
प्रदरस्य सामान्यलक्षणम्	,,
कफजपित्तजवातजत्रिदोषजप्रदराणां-लक्षणानि	,,
अत्यन्तरुधिरनिःसरणोपद्रवाः	६४२
साध्यप्रदररोगिणीलक्षणम्	,,
चिकित्सानिवृत्त्यर्थं शुद्धार्त्तवलक्षणम्	,,
प्रदरचिकित्सा	,,
दार्व्यादिक्वाथः	६४३
अष्टषष्टितमः सोमरोगाधिकारः ।	
सोमरोगस्य निदानसम्प्राप्तिलक्षणानि	,,
सोमरोगचिकित्सा	६४४
सोमरोगे मूत्रातीसारलक्षणम्	,,
एकोनसप्ततितमो योनिरोगाधिकारः ।	
योनिरोगनिदानम्	,,
योनिरोगनामानि	,,
उपर्युक्तयोनिरोगलक्षणम्	६४५
विवृतासूचीवक्त्रयोर्लक्षणम्	६४६
त्रिदोषजाया लक्षणम्	,,
असाध्ययोनिरोगाः	,,
योनिकन्दस्य निदानं लक्षणं च	,,
वातजादिभेदेन योनिकन्दरूपम्	,,
योनिरोगचिकित्सा	६४७
नष्टार्त्तववन्ध्ययोश्चिकित्सा	,,
गर्भास्थापकयोगाः	६४८
साध्ययोनिरोगाणां सामान्यचिकित्सा	,,

विषयाः	पृ. सं.
वातादिजयोनिरोगाणां चिकित्सा	६४८
त्रिफलाऽऽदिघृतम्	६५०
फलघृतम्	,,
योनिकन्दस्य चिकित्सा	६५१
गर्भिणीरोगचिकित्सा	,,
चलितगर्भस्थापने ह्रीबेरादिक्वाथः	,,
गर्भस्रावगर्भपातयोर्निदानं पूर्वरूपं च	६५२
गर्भस्रावपातयोरवधिः	,,
गर्भपातस्य निदानं दृष्टान्तश्च	,,
गर्भस्रावचिकित्सा	,,
उत्पलादिगणः	,,
गर्भपातोपद्रवाः	६५३
गर्भस्य स्थानान्तरगमनोपद्रवाः	,,
गर्भपातोपद्रवचिकित्सा	,,
गर्भिण्याः प्रतिमासचिकित्सा	६५४
वातशुष्कगर्भचिकित्सा	६५५
प्रसवसमयः	,,
प्रसवमासमतिक्रम्य स्थायिगर्भे चिकित्सा	६५६
काले प्रसवविलम्बे चिकित्सा	,,
मूढगर्भस्य निदानसम्प्राप्तिलक्षणानि	६५७
चतुर्विधमूढगर्भस्य लक्षणम्	,,
मूढगर्भस्याष्टधात्वम्	६५८
सुश्रुतोक्ताष्टप्रकारान्तराणि	,,
असाध्यमूढगर्भिणीलक्षणम्	,,
मृतगर्भस्य लक्षणं गर्भमरणकारणं च	६५९
गर्भिण्या अन्यासाध्यलक्षणानि	,,
मूढगर्भचिकित्सा	६६०
गर्भच्छेदनप्रकारः	,,
प्रसुतायोनिक्षतादिचिकित्सा	,,
प्रसूताया अनिःसृतापराजोपद्रवाः	६६१
उदरस्थितापरायाश्चिकित्सा	,,
मक्कल्लशूलस्य निदानसम्प्राप्तिलक्षणानि	,,
मक्कल्लशूलचिकित्सा	,,
पिप्पल्यादिगणः	,,
प्रसूताया हिताहितानि	६६२
सूतिकारोगनिदानम्	,,
सूतिकारोगाः	,,
प्रसुताया ज्वरादिरोगविशेषाणां निदानविशेषः	,,
सूतिकारोगचिकित्सा	६६३
देवदार्वादिक्वाथः	,,
पञ्चजीरकपाकः	,,
सौभाग्यशुण्ठीपाकः	६६४
प्रसूताया नियमसमयावधिः	,,
स्तनरोगस्य सम्प्राप्तिः	,,
स्तनरोगाणामतिदेशेन लक्षणानि	६६५
स्तनरोगचिकित्सा	,,
सप्ततितमो बालरोगाधिकारः ।	
बालानां बालग्रहरक्षोपदेशः	,,
बालग्रहाणां नामानि	,,
बालग्रहोत्पत्तिः	६६६
बालग्रहाणां बालग्रहणकारणम्	६६७

विषयाः	पृ. सं.
सामान्यविशिष्टबालग्रहजुष्टयोर्लक्षणानि	६६७
सामान्यग्रहजुष्टचिकित्सा	६६८
अष्टमङ्गलघृतम्	६६९
स्कन्दग्रहजुष्टबालकचिकित्सा	,,
स्कन्दापस्मारग्रहजुष्टचिकित्सा	६७०
शकुनीग्रहजुष्टचिकित्सा	६७१
शिशुरक्षायां देव्याः स्तुतिः	६७२
रेवतीग्रहजुष्टचिकित्सा	,,
पूतनाग्रहजुष्टचिकित्सा	६७३
गन्धपूतनाग्रहजुष्टचिकित्सा	६७४
तिक्तद्रुमाः	,,
शीतपूतनाग्रहजुष्टचिकित्सा	,,
मुखमण्डिकाग्रहजुष्टचिकित्सा	६७५
जलाभिमन्त्रणमन्त्रम्	,,
नैगमेयग्रहजुष्टचिकित्सा	६७६
बालरोगाणां निदानं लक्षणं च	,,
तालुकण्टकलक्षणम्	६७७
महापद्मककुकूणकयोर्लक्षणे	,,
तुण्डिगुदपाकयोर्लक्षणम्	,,
अहिपूतनलक्षणम्	६७८
आजगल्लिकालक्षणम्	,,
पारिगर्भिकलक्षणम्	,,
दन्तोद्भेदजरोगाः	,,
बालरोगचिकित्सा	,,
बालस्य कनीयसी मात्रा	६७९
प्रकारान्तरेणौषधोपायने सुश्रुतोक्तिः	,,
अनभिभाषिबालस्यान्तर्गतरोगज्ञानोपायः	,,

विषयाः	पृ. सं.
बालकस्य ज्वरादिरोगचिकित्सा	६८०
सर्वज्वरेषु भद्रमुस्ताऽऽदिक्वाथः	,,
ज्वरातिसारे चतुर्भद्रावलेहः	,,
अतिसारे बिल्वादिक्वाथः	,,
दुर्धरातिसारे समङ्गाऽऽदिक्वाथः	,,
आमातिसारे विडङ्गादिचूर्णम्	,,
रक्तातिसारे मोचारसादियवागूः	,,
अतीसारे नागरादिक्वाथः	६८१
प्रवाहिकायां लाजाऽऽदिचूर्णम्	,,
ग्रहण्यादिरोगे रजन्यादिचूर्णम्	,,
कासघ्नो मुस्तकादिस्वरसः	,,
बालानां पुराणकासोपरिकेशरावलेहिका	,,
कासश्वासे धान्यादिपानम्	,,
द्राक्षाऽऽदिचूर्णम्	,,
हिक्कावमिघ्नः कटुकरोहिण्यवलेहः	,,
दुग्धवमिघ्नोऽवलेहः	६८२
आनाहे वातशूले च सैन्धवाद्यवलेहः	,,
मूत्राघातघ्नः कणाऽऽद्यवलेहः	,,
कार्श्यहरयोगः	,,
शोथघ्नलेपः	,,
क्षतविसर्पविस्फोटज्वरहरक्वाथः	,,
मुखस्रवहरक्वाथः	,,
मुखपाकहरप्रलेपः	,,
बालानां रोदने चूर्णम्	६८३
तालुकण्टकघ्नकल्कः	,,
कुकूणकहरलेपः	,,
नाभिशोथघ्नस्वेदः	,,

विषयाः	पृ. सं.
नाभिपाकघ्नं तैलमवधूलनं च	६८३
गुदपाकघ्नयोगः	,,
अहिपूतने लेपः	,,
पारिगर्भिकोपायः	,,
बालानां दन्तोद्भेदजरोगशमोपायः	६८३
बालानां शक्तिवर्धकप्रयोगाः	६८४
लाक्षाऽऽदितैलम्	,,

इति मध्यखण्डम् ।

अथोत्तरखण्डम् ।

एकसप्ततितमो वाजीकरणाधिकारः ।

विषयाः	पृ. सं.
वाजीकरणस्य लक्षणम्	६८५
प्रसङ्गात् क्लैब्यस्य लक्षणं संख्या च	,,
असाध्यक्लैब्यलक्षणम्	६८६
क्लैब्यचिकित्सायां सामान्यविधिः	,,
क्लैब्यस्य चिकित्सायां वाजीकरणविधिः	,,
वाजीकरणवस्तूनि	६८७
वाजीकररसाला	,,
रतिबर्द्धनयोगाः	,,
गोक्षुरादिमोदकः	,,
मदनमञ्जरीवटी	६८८
वस्ताण्डकच्छपाण्डयोगौ	,,
श्रीरतिवल्लभपूगपाकः	,,
कामेश्वरमोदकः	६९०
महाखण्डकूष्माण्डावलेहः	६९०
आम्रपाकः	,,
महाचन्दनादितैलम्	६९१
मधुपक्वहरीतकी	६९२
वानरीवटिका	६९३
आकारकरभादिवटी	,,

द्विसप्ततितमो रसायनाधिकारः ।

विषयाः	पृ. सं.
रसायनलक्षणम्	,,
रसायनस्य फलं विधिश्च	,,
रसायनप्रयोगाः	६९४
लौहगुग्गुलुः	६९५
रसायनविशेषफलम्	,,
ग्रन्थकर्तृशुभाशीःशंसनम्	,,
ग्रन्थसमाप्तिः	,,

❀ इति ❀

❀ श्रीः ❀

भावप्रकाशः

गजमुखममरप्रवरं सिद्धिकरं विघ्नहर्त्तारम् ।
गुरुमवगमनयनप्रदमिष्टकरीमिष्टदेवतां वन्दे ॥ १ ॥

कवेरुक्तिः ।

आयुर्वेदागमनं क्रमेण येनाभवद् भूमौ ।
प्रथमं लिखामि तमहं नानातन्त्राणि संदृश्य ॥ २ ॥

अथायुर्वेदस्य लक्षणमाह—

आयुर्हिताहितं व्याधेर्निदानं शमनं तथा ।
विद्यते यत्र विद्वद्भिः स आयुर्वेद उच्यते ॥ ३ ॥

अथायुर्वेदस्य निरुक्तिमाह—

अनेन पुरुषो यस्मादायुर्विन्दति वेत्ति च ।
तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः ॥ ४ ॥

*शरीरजीवयोर्योगो जीवनं तेनावच्छिन्नः काल आयुः, आयुर्वेदद्वारा आयुष्याण्यनायुष्याणि च द्रव्यगुणकर्माणि ज्ञात्वा तेषां सेवनत्यागाभ्यामारोग्येणायुर्विन्दति, तेनैव हेतुना परस्याप्यायुर्वेत्ति च॥४॥

अथायुर्वेदस्योत्पत्तिक्रममाह । तत्रादौ ब्रह्मणः प्रादुर्भावमाह—

विधाताऽथर्वसर्वस्वमायुर्वेदं प्रकाशयन् ।
स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुम् ॥ ५ ॥
ततः प्रजापतिं दत्तं दक्षं सकलकर्मसु ।
विधिर्धीनीरधिः साङ्गमायुर्वेदमुपादिशत ॥ ६ ॥

अथ दक्षात् प्रादुर्भावमाह—

अथ दक्षः क्रियादक्षः स्ववैद्यौ वेदमायुषः ।
वेदयामास विद्वांसौ सूर्यांशौ सुरसत्तमौ ॥ ७ ॥

अथाश्विनीसुताभ्यां प्रादुर्भावमाह—

दत्तादधीत्य दस्रौ वितनुतः संहितां स्वीयाम् ।
सकलचिकित्सकलोकप्रतिपत्तिविवृद्धये धन्याम् ॥ ८ ॥
स्वयम्भुवः शिरश्छिन्नं भैरवेण रुषाऽथ तत् ।
अश्विभ्यां संहितं तस्मात्तौ जातौ यज्ञभागिनौ ॥ ९ ॥
देवासुररणे देवा दैत्यैर्ये सक्षताः कृताः ।
अक्षतास्ते कृताः सद्यो दस्राभ्यामद्भुतं महत् ॥ १० ॥
वज्रिणोऽभूद् भुजस्तम्भः स दस्राभ्यां चिकित्सितः ।
सोमान्निपतितश्चन्द्रस्ताभ्यामेव सुखीकृतः ॥ ११ ॥
विशीर्णा दशनाः पूष्णो नेत्रे नष्टे भगस्य च ।
शशिनो राजयक्ष्माऽभूदश्विभ्यां ते चिकित्सिताः ॥ १२ ॥
भार्गवश्च्यवनः कामी वृद्धः सन्विकृतिं गतः ।
वीर्यवर्णस्वरोपेतः कृतोऽश्विभ्यां पुनर्युवा ॥ १३ ॥
एतैश्चान्यैश्च बहुभिः कर्म्मभिर्भिषजां वरौ ।
बभूवतुर्भृशं पूज्याविन्द्रादीनां दिवौकसाम् ॥ १४ ॥

अथेन्द्रात् प्रादुर्भावमाह—

संदृश्य दस्रयोरिन्द्रः कर्माण्येतानि यत्नवान् ।
आयुर्वेदं निरुद्वेगं तौ ययाचे शचीपतिः ॥ १५ ॥
नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ ।
आयुर्वेदं यथाऽधीतं ददतुः शतमन्यवे ॥ १६ ॥
नासत्याभ्यामधीत्यैव आयुर्वेदं शतक्रतुः ।
अध्यापयामास बहूनात्रेयप्रमुखान्मुनीन् ॥ १७ ॥

अथात्रेयात् प्रादुर्भावमाह—

एकदा जगदालोक्य गदाकुलमितस्ततः ।
चिन्तयामास भगवानात्रेयो मुनिपुङ्गवः ॥ १८ ॥
किं करोमि क्व गच्छामि कथं लोका निरामयाः ।
भवन्ति सामयानेतान्न शक्नोमि निरीक्षितुम् ॥ १९ ॥
दयालुरहमत्यर्थं स्वभावो दुरतिक्रमः ।
एतेषां दुःखतो दुःखं ममापि हृदयेऽधिकम् ॥ २० ॥

आयुर्वेदं पठिष्यामि नैरुज्याय शरीरिणाम् ।
इति निश्चित्य गतवानात्रेयस्त्रिदशालयम् ॥ २१ ॥
तत्र मन्दिरमिन्द्रस्य गत्वा शक्रं ददर्श सः ।
सिंहासनसमासीनं स्तूयमानं सुरर्षिभिः ॥ २२ ॥
भासयन्तं दिशो भासा भास्करप्रतिमं त्विषा ।
आयुर्वेदमहाऽऽचार्य्यं शिरोधार्य्यं दिवौकसाम् ॥ २३ ॥
शक्रस्तु तं निरीक्ष्यैव त्यक्तसिंहासनः स्थितः ।
तमग्रे पूजयामास भृशं भूरितपःकृशम् ॥ २४ ॥
कुशलं परिपप्रच्छ तथाऽऽगमनकारणम् ।
स मुनिर्वक्तुमारेभे निजागमनकारणम् ॥ २५ ॥
देवराज ! न राजाऽसि दिव एव यतो भवान् ।
विधात्रा विहितो यत्नात्त्रिलोकीलोकपालकः ॥ २६ ॥
व्याधिभिर्व्यथिता लोकाः शोकाकुलितचेतसः ।
भूतले सन्ति सन्तापं तेषां हन्तुं कृपां कुरु ॥ २७ ॥
आयुर्वेदोपदेशं मे कुरु कारुण्यतो नृणाम् ।
तथेत्युक्त्वा सहस्राक्षोऽध्यापयामास तं मुनिम् ॥ २८ ॥
मुनीन्द्र इन्द्रतः सांगमायुर्वेदमधीत्य सः ।
अभिनन्द्य तमाशीर्भिराजगाम पुनर्महीम् ॥ २९ ॥
अथात्रेयो मुनिश्रेष्ठो भगवान्करुणाऽऽकरः ।
स्वनाम्ना संहितां चक्रे नरवर्गानुकम्पया ॥ ३० ॥
ततोऽग्निवेशं भेडञ्च जातूकर्णं पराशरम् ।
क्षीरपाणिञ्च हारीतमायुर्वेदमपाठयत् ॥ ३१ ॥
तन्त्रस्य कर्त्ता प्रथममग्निवेशोऽभवत्पुरा ।
ततो भेडादयश्चक्रुः स्वं स्वं तन्त्रं कृतानि च ॥ ३२ ॥
श्रावयामासुरात्रेयं मुनिवृन्देन वन्दितम् ।
श्रुत्वा च तानि तन्त्राणि हृष्टोऽभूदत्रिनन्दनः ॥ ३३ ॥
यथावत्सूत्रितं दृष्ट्वा प्रहृष्टा मुनयोऽभवन् ।
दिवि देवर्षयो देवाः श्रुत्वा साध्विति चाब्रुवन् ॥ ३४ ॥

अथ भरद्वाजात् प्रादुर्भावमाह—

एकदा हिमवत्पार्श्वे दैवादागत्य सङ्गताः ।
मुनयो बहवस्तेषां नामभिः कथयाम्यहम् ॥ ३५ ॥
भरद्वाजो मुनिवरः प्रथमं समुपागतः ।
ततोऽङ्गिरास्ततो गर्गो मरीचिर्भृगुभार्गवौ ॥ ३६ ॥
पुलस्त्योऽगस्तिरसितो वसिष्ठः सपराशरः ।
हारीतो गौतमः सांख्यो मैत्रेयश्च्यवनोऽपि च ॥ ३७ ॥
जमदग्निश्च गार्ग्यश्च कश्यपः काश्यपोऽपि च ।
नारदो वामदेवश्च मार्कण्डेयः कपिञ्जलः ॥ ३८ ॥
शाण्डिल्यः सहकौण्डिन्यः शाकुनेयश्च शौनकः ।
आश्वलायनसांकृत्यौ विश्वामित्रः परीक्षकः ॥ ३९ ॥
देवलो गालवो धौम्यः काप्यकात्यायनावुभौ ।
काङ्कायनो वैजवापः कुशिको बादरायणः ॥ ४० ॥
हिरण्याक्षश्च लौगाक्षिः शरलोमा च गोभिलः ।
वैखानसा बालखिल्यास्तथैवान्ये महर्षयः ॥ ४१ ॥
ब्रह्मज्ञानस्य निधयो यमस्य नियमस्य च ।
तपसस्तेजसा दीप्ता हूयमाना इवाग्नयः ॥ ४२ ॥
सुखोपविष्टास्ते तत्र सर्वे चक्रुः कथामिमाम् ॥
धर्मार्थकाममोक्षाणां मूलमुक्तं कलेवरम् ।
तच्च सर्वार्थसंसिद्ध्यै भवेद्यदि निरामयम् ॥ ४३ ॥
तपःस्वाध्यायधर्माणां ब्रह्मचर्यव्रतायुषाम् ।
हर्त्तारः प्रसृता रोगा यत्र तत्र च सर्वतः ॥ ४४ ॥
रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहरा—
दृष्टा इन्द्रियशक्तिसंक्षयकराः सर्वाङ्गपीडाकराः ।
धर्मार्थाखिलकाममुक्तिषु महाविघ्नस्वरूपा बलात्—
प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम् ॥ ४५ ॥
तत्तेषां प्रशमाय कश्चन विधिश्चिन्त्यो भवद्भिर्बुधै—
र्योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिं तेऽब्रुवन् ।

त्वं योग्यो भगवन्सहस्रनयनं याचस्व लब्धं क्रमा-
दायुर्वेदमधीत्य यं गदभयान्मुक्ता भवामो वयम् ॥ ४६ ॥
इत्थं स मुनिभिर्योग्यैः प्रार्थितो विनयान्वितैः ।
भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयम् ॥ ४७ ॥
तत्रेन्द्रभवनं गत्वा सुरर्षिगणमध्यगम् ।
दृष्टवान् वृत्रहन्तारं दीप्यमानमिवानलम् ॥ ४८ ॥
दृष्ट्वैव स मुनिं प्राह भगवान्मघवा मुदा ।
धर्म्मज्ञ ! स्वागतं तेऽथ मुनिं तं समपूजयत् ॥ ४९ ॥
सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम् ।
ऋषीणां वचनं सम्यक् श्रावयामास तत्त्वतः ॥ ५० ॥
व्याधयो हि समुत्पन्नाः सर्वप्राणिभयङ्कराः ।
तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि ॥ ५१ ॥
अपाठयन्मुनिं साङ्गमायुर्वेदं शतक्रतुः ।
जीवेद्वर्षसहस्राणि देही नीरुङ् निशम्य यम् ॥ ५२ ॥
सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामुनिः ।
यथावदचिरात्सर्वं बुबुधे तन्मना मुनिः ॥ ५३ ॥
तेनायुः सुचिरं लेभे भरद्वाजो निरामयम् ।
अन्यानपि मुनींश्चक्रे नीरुजः सुचिरायुषः ॥ ५४ ॥
तत्तन्त्रजनितज्ञानचक्षुषा ऋषयोऽखिलाः ।
गुणान्द्रव्याणि कर्माणि दृष्ट्वा तद्विधिमाश्रिताः ॥ ५५ ॥
आरोग्यं लेभिरे दीर्घमायुश्च सुखसंयुतम् ।
आयुर्वेदोक्तविधिनाऽन्येऽपि स्युर्मुनयो यथा ॥ ५६ ॥

अथ चरकात् प्रादुर्भावमाह –

यदा मत्स्यावतारेण हरिणा वेद उद्धृतः ।
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान् ॥ ५७ ॥
अथर्वान्तर्गतं सम्यगायुर्वेदं च लब्धवान् ।
एकदा स महीवृत्तं द्रष्टुं चर इवागतः ॥ ५८ ॥
तत्र लोकान्गदैर्ग्रस्तान्व्यथया परिपीडितान् ।

स्थलेषु बहुषु व्यग्रान् म्रियमाणांश्च दृष्टवान् ॥ ५९ ॥
तान्दृष्ट्वाऽतिदयायुक्तस्तेषां दुःखेन दुःखितः ।
अनन्तश्चिन्तयामास रोगोपशमकारणम् ॥ ६० ॥
सञ्चिन्त्य स स्वयं तत्र मुनेः पुत्रो बभूव ह ।
प्रसिद्धस्य विशुद्धस्य वेदवेदाङ्गवेदिनः ॥ ६१ ॥
यतश्चर इवायातो न ज्ञातः केनचिद्यतः ।
तस्माच्चरकनाम्नाऽसौ ख्यातश्च क्षितिमण्डले ॥ ६२ ॥
स भाति चरकाचार्यो देवाचार्यो यथा दिवि ।
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ॥ ६३ ॥
आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन् ।
मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम् ॥ ६४ ॥
तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता ।
चरकेणात्मनो नाम्ना ग्रन्थोऽयं चरकः कृतः ॥ ६५ ॥

अथ धन्वन्तरेः प्रादुर्भावमाह –

एकदा देवराजस्य दृष्टिर्निपतिता भुवि ।
तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीडिताः ॥ ६६ ॥
तान्दृष्ट्वा हृदयं तस्य दयया परिपीडितम् ।
दयाऽऽर्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह ॥ ६७ ॥
धन्वन्तरे ! सुरश्रेष्ठ ! भगवन् ! किञ्चिदुच्यते ।
योग्यो भवसि भूतानामुपकारपरो भव ॥ ६८ ॥
उपकाराय लोकानां केन किं न कृतं पुरा ।
त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान् ॥ ६९ ॥
तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपो भव ।
प्रतीकाराय रोगाणामायुर्वेदं प्रकाशय ॥ ७० ॥
इत्युक्त्वा सुरशार्दूलः सर्वभूतहितेप्सया ।
समस्तमायुषो वेदं धन्वन्तरिमुपादिशत् ॥ ७१ ॥
अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा ।
आगत्य पृथिवीं काश्यां जातो बाहुजवेश्मनि ॥ ७२ ॥

नाम्ना तु सोऽभवत्ख्यातो दिवोदास इति क्षितौ ।
बाल एव विरक्तोऽभूच्चचार सुमहत्तपः ॥ ७३ ॥
यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम् ।
ततो धन्वन्तरिर्लोकैः काशीराजोऽभिधीयते ॥ ७४ ॥
हिताय देहिनां स्वीया संहिता विहिताऽमुना ।
अथ विद्याऽर्थिनो लोकान्संहितां तामपाठयत् ॥ ७५ ॥

अथ सुश्रुतात् प्रादुर्भावमाह –

अथ ज्ञानदृशा विश्वामित्रप्रभृतयोऽविदन् ।
अयं धन्वन्तरिः काश्यां काशिराजोऽयमुच्यते ॥ ७६ ॥
विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमुक्तवान् ।
वत्स ! वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ॥ ७७ ॥
तत्र नाम्ना दिवोदासः काशिराजोऽस्ति बाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्वेदविदां वरः ॥ ७८ ॥
आयुर्वेदं पठस्व त्वं लोकोपकृतिहेतवे ।
सर्वप्राणिदया तीर्थमुपकारो महामखः ॥ ७९ ॥
पितुर्वचनमाकर्ण्य सुश्रुतः काशिकां गतः ।
तेन सार्द्धं समध्येतुं मुनिसूनुशतं ययौ ॥ ८० ॥
अथ धन्वन्तरिं सर्वे वानप्रस्थाश्रमे स्थितम् ।
भगवन्तं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम् ॥ ८१ ॥
काशिराजं दिवोदासं तेऽपश्यन्विनयान्विताः ।
स्वागतं च तदा चाह दिवोदासो यशोधनः ॥ ८२ ॥
कुशलं परिपप्रच्छ तथाऽऽगमनकारणम् ।
ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम् ॥ ८३ ॥
भगवन्मानवान्दृष्ट्वा व्याधिभिः परिपीडितान्
क्रन्दतो म्रियमाणांश्च जाताऽस्माकं हृदि व्यथा ॥ ८४ ॥
आमयानां शमोपायं विज्ञातुं वयमागताः ।
आयुर्वेदं भवानस्मानध्यापयतु यत्नतः ॥ ८५ ॥
अङ्गीकृत्य वचस्तेषां नृपतिस्तानुपादिशत् ।

व्याख्यातं तेन ते यत्नाज्जगृहुर्मुनयो मुदा ॥ ८६ ॥
काशिराजं जयाशीर्भिरभिनन्द्य मुदाऽन्विताः ।
सुश्रुताद्याः सुसिद्धार्था जग्मुर्गेहं स्वकं स्वकम् ॥ ८७ ॥
प्रथमं सुश्रुतस्तेषु स्वतन्त्रं कृतवान्स्फुटम् ।
सुश्रुतस्य सखायोऽपि पृथक्तन्त्राणि तेनिरे ॥ ८८ ॥
सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्यतः ।
तस्मात्तत्सुश्रुतं नाम्ना विख्यातं क्षितिमण्डले ॥ ८९ ॥

इत्यायुर्वेदप्रवक्तृप्रादुर्भावप्रकरणं समाप्तम् ॥ १ ॥

अथ सृष्टिप्रकरणं ग्रन्थारम्भश्च २ ।

आयुर्वेदाब्धिमध्यादतिमतिमुनयो योगरत्नानि यत्ना-
ल्लब्ध्वा स्वे स्वे निबन्धे दधुरखिलजनव्याधिविध्वंसनाय ।
तत्तद्ग्रन्थाद् गृहीतैः सुवचनमणिभिर्भावमिश्रश्चिकित्सा-
शास्त्रे जाड्यान्धकारं प्रशमयितुमिमं संविधत्ते प्रकाशम् ॥ १ ॥
श्रीपतिपदप्रसादादाशीर्भिर्भूमिदेवानाम् ।
भावप्रकाशनाम्ना ग्रन्थोऽयं पठ्यतां सर्वैः ॥ २ ॥

एतस्य निबन्धस्य फलं चिकित्सा, चिकित्सा च पुरुषस्य, पुरुषस्तु चतुर्विंशतितत्त्वजीवात्मसमवायस्तस्माच्चतुर्विंशतितत्त्वानां जीवात्मनश्च स्वरूपनिरूपणाय सृष्टिक्रममाह —

आत्मा ज्योतिश्चिदानन्दरूपो नित्यश्च निःस्पृहः ।
निर्गुणः प्रकृतेर्योगात्सगुणः कुरुते जगत् ॥ ३ ॥
*सगुणः = इच्छाऽऽदियुक्तः ॥ ३ ॥

अथ प्रकृतेः स्वरूपमाह —

सत्त्वं रजस्तमश्चेति गुणास्ते प्रकृतिः समाः ।
सा जडाऽपि जगत्कर्त्री परमात्मचिदन्वयात् ॥ ४ ॥
*सतः साधोर्भावः सत्त्वं प्रकाशकं ज्ञानसुखहेतुः, रजोरागात्मकं दुःखहेतुः, ताम्यति ग्लानिं प्राप्नोत्यनेनेति तम आवरकं मोहहेतुः, ते

गुणाः समाः प्रकृतिरित्यर्थः। तथा सति न्यूनाधिकगुणा विकृतिः ॥४॥

अथ सुश्रुतमुपदिशन् धन्वन्तरिः प्रकृतेः स्वरूपविशेषमाह —

"सर्वभूतानां कारणमकारणं सत्त्वरजस्तमोलक्षण—
मष्टरूपमखिलस्य जगतः सम्भवहेतुरव्यक्तं नामे"ति ॥ क ॥

*अस्यायमर्थः-अव्यक्तं=न व्यज्यते स्मेत्यव्यक्तं मूलप्रकृत्यपरपर्य्यायम् ,ततः सर्वभूतानां कारणं =समवायिकारणम् , अकारणं=न विद्यते कारणं यस्य तत् , सत्त्वरजस्तमोलक्षणं=समसत्त्वरजस्तमःस्वरूपम = अष्टरूपम्=अव्यक्तं-महान्-अहङ्कारः-पञ्चतन्मात्राणीत्यष्टौ रूपाणि यस्य तत् , यत इन्द्रियाणां महाभूतानां च कारणतया महदादयोऽपि सप्त प्रकृतयः, एवमखिलस्य जगतः सम्भवहेतुरव्यक्तमित्युपसंहारः ॥ क ॥

अथ प्रकृतिपुरुषयोः साधर्म्यमाह —

"उभावप्यनादी उभावप्यनन्तौ उभावप्यलिङ्गौ
उभावपि नित्यौ उभावप्यपरौ उभावपि सर्वगतौ" इति ॥ ख ॥

*उभावप्यलिङ्गौ =लयं क चिदपि न यातः, उभावप्यपरौ =न विद्यते परोऽपरो याभ्यां तावपरौ ॥ ख ॥

अथातस्तयोर्वैधर्म्यमाह —

"एका तु प्रकृतिरचेतना त्रिगुणा बीजधर्मिणी प्रसवधर्मिण्यमध्यस्थधर्मिणी चे"ति ॥ ग ॥

*अचेतना =जडा, त्रिगुणा =तुल्यगुणत्रयात्मिका, बीजधर्मिणी =सर्वेषां महदादीनां विकाराणां बीजत्वेनावस्थिता, प्रसवधर्मिणी = पुरुषेणाक्रान्ता क्षोभं प्राप्य साम्यमतिक्रम्य महदहङ्कारादिक्रमेण जगतः प्रसवित्री, अमध्यस्थधर्मिणी =सुखदुःखभोगिनी, न तु सुखदुःखभोगादुदासीना ॥ ग ॥

"पुरुषस्तु चेतनावान् निर्गुणोऽप्रसवधर्माऽबीजधर्मा मध्यस्थधर्मा चे"ति ॥ घ ॥

*निर्गुणः =अविद्यमानसत्त्वादिगुणः, अबीजधर्मा =महाप्रलये महदादीनां विकाराणां प्रकृताविव तस्मिन्ननवस्थानाद्, मध्यस्थधर्मा = सुखदुःखेच्छाद्वेषादिभ्य उदासीनः ॥ घ ॥

अथ प्रकृतेर्नामान्याह –

प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा ।
एतानि तस्या नामानि पुरुषं या समाश्रिता ॥ ५ ॥

अथ प्रकृतेर्गुणानाह –

सत्त्वं रजस्तमस्त्रीणि विज्ञेयाः प्रकृतेर्गुणा ।
तैश्च युक्तस्य चित्तस्य कथयाम्यखिलान् गुणान् ॥ ६ ॥

अथ सत्त्वगुणयुक्तस्य मनसो लक्षणमाह –

आस्तिक्यं प्रविभज्य भोजनमनुत्तापश्च तथ्यं वचो-
मेधाबुद्धिधृतिक्षमाश्च करुणा ज्ञानं च निर्दम्भता ।
कर्मानिन्दितमस्पृहं च विनयो धर्म्मः सदैवादरा-
देते सत्त्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः ॥ ७ ॥

*अस्ति धर्ममोक्षपरलोकादिकमिति बुद्ध्या चरतीत्यास्तिकस्तस्य भाव आस्तिक्यम्, अनुत्तापः=अक्रोधः, धृतिः=भूतप्रेतस्मरक्रोधलोभाद्यावेशराहित्यम्, ज्ञानम्=आत्मज्ञानम्, निर्दम्भता=कपटाभावः, कर्म-अनिन्दितम्, अस्पृहम्=निष्कामं च ॥ ७ ॥

अथ रजोगुणयुक्तस्य मनसो लक्षणमाह –

क्रोधस्ताडनशीलता च बहुलं दुःखं सुखेच्छाऽधिका
दम्भः कामुकताऽप्यलीकवचनं चाधीरताऽहङ्कृतिः ।
ऐश्वर्य्यादभिमानिताऽतिशयितानन्दोऽधिकश्चाटनं-
प्रख्याता हि रजोगुणेन सहितस्यैते गुणाश्चेतसः ॥ ८ ॥

*अलीकवचनं=मिथ्याकथनम्, अटनं=पृथ्वीपरिभ्रमणम् ॥ ८ ॥

अथ तमोगुणयुक्तस्य मनसो लक्षणमाह –

नास्तिक्यं सुविषण्णताऽतिशयितालस्यं च दुष्टा मतिः-
प्रीतिर्निन्दितकर्मशर्मणि सदा निद्रालुताऽहर्निशम् ।
अज्ञानं किल सर्वतोऽपि सततं क्रोधान्धता मूढता
प्रख्याता हि तमोगुणेन सहितस्यैते गुणाश्चेतसः ॥ ९ ॥
तत्र प्रभूतसत्त्वस्तु सात्त्विकः पुरुषः स्मृतः ।
राजसस्तामसश्चैव त्रिविधस्तेन मानवः ॥ १० ॥

अथ महत्तत्वोत्पत्तिमाह—

ततोऽभवन्महत्तत्त्वं बुद्धितत्त्वापराभिधम् ।
त्रिगुणं सत्त्वबहुलं निर्मलं स्फटिकोपमम्
चिच्छायाप्राप्तचैतन्यं तदिच्छामयमीरितम् ॥ ११ ॥

*ततः प्रकृतेस्त्रिगुणं=त्रयो गुणा यत्र तत्, तच्च सत्त्वबहुलम्, अत्रायमभिप्रायः—यथा निश्चले ह्रदादौ बहुद्रव्यपातात् तदीयं जलं वर्द्धते तथा चिद्रूपपुरुषेणाक्रमणात् तुल्यगुणत्रयात्मिकायाः प्रकृतेर्ज्ञानहेतुः प्रकाशकः सत्त्वगुणो बृद्धः प्रबृद्धसत्त्वतः प्रकृतेः सत्त्वबहुलं बुद्धितत्त्वमभवत् ॥ ११ ॥

अथाहङ्कारस्योत्पत्तिं तस्य च त्रैविध्यमप्याह—

महतस्त्रिगुणाज्जातोऽहङ्कारस्त्रिगुणान्वितः ।
सात्त्विको राजसश्चापि तामसश्चेति स त्रिधा ॥ १२ ॥

*महतो=बुद्धितत्त्वात्=त्रयो गुणा यत्र ततः, ननु महत्तत्त्वं त्रिगुणमुक्तमेव, किमर्थं महतस्त्रिगुणादिति विशेषणम्, सत्यम्, त्रिगुणादिति पुनर्विशेषणादुक्तं सत्त्वबहुलमिति विशेषणमत्र नानुवर्त्तते, तेनाहङ्कारोत्पादकं महत्तत्वं त्रिगुणमपि रजोबहुलं बोद्धव्यम् , अहङ्कारस्य रजोगुणान्वितस्य मनोधर्मत्वात् । अहङ्कारोऽभिमानव्यापारः । अहङ्कारस्त्रिविधस्तमाह—सात्त्विक इत्यादि ॥ १२ ॥

अथ त्रिविधस्याहङ्कारस्य कार्यमाह—

जातानि सात्त्विकात्तस्मादिन्द्रियाणि सराजसात् ।
तानि श्रोत्रं त्वचो नेत्रं रसना नासिका तथा ॥ १३ ॥
वाग्घस्तचरणोपस्थगुदान्येकादशं मनः ।
पञ्च बुद्धीन्द्रियाण्याहुः प्राक्तनानीतराणि च ॥ १४ ॥
कर्मेन्द्रियाणि पञ्चैव कथयन्ति विपश्चितः ॥ १५ ॥

*बुद्धीन्द्रियाणि बुद्धेराश्रयत्वात्,कर्मेन्द्रियाणि कर्माश्रयत्वात्,सात्त्विकाहङ्काराज्जातत्वादिन्द्रियाणि प्रकाशलक्षणानि, सत्त्वस्य प्रकाशकत्वात् ॥ १३-१५ ॥

अथ मनस उभयेन्द्रियत्वमाह—

मनो बुद्धीन्द्रियं विज्ञैः कर्मेन्द्रियमपि स्मृतम् ।

मनोऽधिष्ठितमेवेदमिन्द्रियं यत्प्रवर्त्तते ॥ १६ ॥

अथेन्द्रियाणां विषयानाह—

शब्दः स्पर्शश्च रूपञ्च रसो गन्धो ह्यनुक्रमात् ।
बुद्धीन्द्रियाणां विषयाः समाख्याता महर्षिभिः ॥ १७ ॥
वाच्यं ग्राह्यञ्च गन्तव्यमानन्दं त्याज्यमेव च ।
कर्मेन्द्रियाणां विषया ज्ञानञ्च विषयो हृदः ॥ १८ ॥

*हृदः—मनसः ॥ १७ ॥ १८ ॥

अथ पञ्चतन्मात्रोत्पत्तिमाह—

तामसादप्यहङ्काराचन्मात्राणि सराजसात् ।
पञ्चाल्पसत्त्वसम्बन्धात्तल्लिङ्गानि भवन्ति हि ॥ १९ ॥
शब्दतन्मात्रकं स्पर्शतन्मात्रं रूपमात्रकम् ।
रसतन्मात्रकं गन्धतन्मात्रमिति तानि तु ॥ २० ॥

*तल्लिङ्गानि=मोहादिलिङ्गानि, तान्यनुद्भूतस्वभावानि बाह्येन्द्रियाग्राह्याणि, शब्दादीन्येव तन्मात्राणि, तानि च योगिभिरेव ग्राह्याणि, सा सा मात्रा यस्मिंस्तत् तन्मात्रम् ॥ १९ ॥ २० ॥

अथ महाभूतोत्पत्तिमाह—

तन्मात्रेभ्यो वियद्वायुर्वह्निर्वारि वसुन्धरा ।
एतानि पंच जायन्ते महाभूतानि तत्क्रमात् ॥ २१ ॥

*एकोत्तरपरिवृद्ध्या वियदादयो जायन्त इत्यर्थः । तद्यथा—शब्दतन्मात्राच्छब्दगुणं वियज्जायते, शब्दतन्मात्रसहितात्स्पर्शतन्मात्राच्छब्दस्पर्शगुणो वायुर्जायते, शब्दतन्मात्रस्पर्शतन्मात्रसहिताद्रूपतन्मात्राच्छब्दस्पर्शरूपगुणो वह्निर्जायते, शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्रसहिताद्रसतन्मात्राच्छब्दस्पर्शरूपरसगुणं वारि जायते, शब्दतन्मात्रस्पर्शतन्मात्ररसतन्मात्रसहिताद्गन्धतन्मात्राच्छब्दस्पर्शरूपरसगन्धगुणा वसुन्धरा जायते ॥ २१ ॥

अथ महाभूतानां गुणानाह, तत्रादौ वियद्गुणानाह—

शब्दः श्रोत्रेन्द्रियं वाऽपि च्छिद्राणि च विविक्तता ।
वियतः कथिता एते गुणा गुणविचारिभिः ॥ २२ ॥

*विविक्तता=शारीराणां भावानां शिरास्नाय्वस्थिपेशीप्रभृतीनां जातिव्यक्तिभ्यां मिथः पृथक्त्वम् ॥ २२ ॥

अथ वायोर्गुणानाह—

स्पर्शस्त्वगिन्द्रियञ्चापि लघुता स्पन्दनं तनोः ।
चेष्टा सर्वशरीरस्य वायोरेते गुणाः स्मृताः॥ २३ ॥

अथ वह्नेर्गुणानाह—

रूपं नेत्रेन्द्रियं पाकः सन्तापस्तीक्ष्णता तथा ।
वर्णो भ्राजिष्णुताऽमर्षः शौर्य्यं वह्नेर्गुणा अमी ॥ २४ ॥

*रूपं=लावण्यम् । पाकः=उदराग्निना आहारपाकः । सन्तापः=औष्ण्यम्, तीक्ष्णता=आशुकारिता । वर्णो=गौरादिः । भ्राजिष्णुता=दीप्तिः । अमर्षः=क्रोधः ॥ २४ ॥

अथ वारिगुणानाह—

रसो रसेन्द्रियं शैत्यं स्नेहश्च गुरुता तथा ।
सर्वद्रवसमूहश्च शुक्रं वारिगुणाः स्मृताः ॥ २५ ॥

अथ वसुन्धरागुणानाह—

गन्धो घ्राणेन्द्रियं चापि काठिन्यं गौरवं तथा ।
वसुन्धरागुणा एते गदिता गुणवेदिभिः ॥ २६ ॥
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च तत्क्रमात् ।
तन्मात्राणां विशेषाः स्युः स्थूलभावमुपागताः ॥ २७ ॥

*तत्क्रमात्=शब्दतन्मात्रादिक्रमाद्, अनुभवयोग्यैः सुखदुःखमोहरूपैर्धर्मैर्विशेष्यन्त इति विशेषाः । अत्र कर्मणि घञ् प्रत्ययः । तन्मात्राणि त्वविशेषाणि यतस्तान्यनुभवयोग्यैः सुखादिभिर्विशेष्टुं न शक्यन्ते सूक्ष्मत्वात् ॥ २७ ॥

अथाष्टानां प्रकृतीनां मध्ये तावत् प्रथमां प्रकृतिमाह—

प्रकृतेः कारणायोगान्मता प्रकृतिरेव सा ।
महत्तत्त्वादयः सप्त शक्तेर्विकृतयः स्मृताः ॥ २८ ॥

*प्रकृतिरेव कारणमेव, न तु कस्य चित् कार्य्यमित्यर्थः । शक्तेः प्रकृतेर्विकृतयः कार्य्याणि ॥ २८ ॥

अथ सप्त प्रकृतीराह—

इन्द्रियाणां च भूतानां कारणत्वान्महर्षिभिः ।
महत्तत्त्वादयः सप्त प्रोक्ताः प्रकृतयोऽपि च ॥ २९ ॥

* कार्य्याणि, इन्द्रियाणां सर्वभूतानां कारणत्वान्महर्षिभिर्महत्तत्त्वादयः सप्त महानहङ्कारः पञ्च तन्मात्राणीति प्रकृतयोऽपि प्रोक्ताः । तथा सति प्रकृतिर्महानहङ्कारः पञ्चतन्मात्राणि चेत्यष्टौ प्रकृतयः ॥२९॥

अथ षोडश विकारानाह—

दशेन्द्रियाणि चित्तश्च महाभूतानि पञ्च च ।
एतानि सृष्टिं जानद्भिर्विकाराः षोडश स्मृताः ॥ ३० ॥

अथ चतुर्विंशतितत्त्वान्युपसंहरन् जीवात्मनः स्थानमाह ।

एवं चतुर्विंशतिभिस्तत्त्वैः सिद्धे वपुर्गृहे ।
जीवात्मा नियतेर्निघ्नो वसति स्वान्तदूतवान् ॥ ३१ ॥

*अत्र शब्दादीनां वियदादिमहाभूतगुणानां धर्म्मिभ्योऽभिन्नतया पृथक्त्वं निरस्यन्नुक्तानां तत्त्वानामुपसंहारमाह-चतुर्विंशतिभिरिति । तानि च प्रकृतयोऽष्टौ विकाराः षोडशेति । महत्तत्त्वादीनि प्रकृत्यादीनां भावाः, नियतेः=शुभाशुभकर्म्मणः, निघ्नः=आयत्तः, स्वान्तदूतवान्=मनोदूतयुक्तः ॥ ३१ ॥

अथ जीवात्मा शरीरीत्युच्यत इत्याह—

स देही कथ्यते पापपुण्यदुःखसुखादिभिः ।
व्याप्तो बद्धश्च मनसा कृत्रिमैः कर्म्मबन्धनैः ॥ ३२ ॥

*सः=जीवात्मा ॥ ३२ ॥

अथजीवात्मगुणानाह—

इच्छाद्वेषसुखासुखानि विषयज्ञानं प्रयत्नो मनः-
संकल्पश्च विचारणा स्मृतिरथो बुद्धिः कलाविज्ञता ।
प्राणस्योपरि यापनं गुदवशाद्वायोरधः प्रेरणम्
नेत्रोन्मेष निमेष कृत्यकरणोत्साहाश्च जीवे गुणाः ॥ ३३ ॥

*इच्छा=सुखहेतुरभिलाषः। द्वेषो=दुःखहेतुर्मनोऽप्रवृत्तिः । सुखं=प्रीतिः। असुखमप्रीतिः। विषयज्ञानं=शब्दादिज्ञानम् । प्रयत्नः=कार्ये

तात्पर्य्यम् । मनः संशयात्मकं,तस्य कर्म संकल्पः। विचारणा = ऊहापोहाभ्यां वस्तुविमर्शः । स्मृतिः = पूर्व्वानुभूतस्यार्थस्य स्मरणम् । बुद्धिर्निश्चयात्मिका। कलाविज्ञता = शिल्पशास्त्रादिबोधः। प्राणस्य हृदयस्थितस्य वायोरुपरियापनम् मुखादिप्रतिनयनम् । गुदवशाद्वायोरधःप्रेरणमपानस्याधः प्रेरणम् । नेत्रोन्मेषनिमेषौ = नेत्रयोरुन्मीलननिमीलने । कृत्यकरणोत्साहः = कार्य्यारम्भे सामर्थ्येनोत्साहः । जीवे = मनोयुक्तस्य जीवात्मनः । अमी = इच्छाऽऽदयो गुणाः ॥ ३३ ॥

इति श्रीमिश्रलटकनतनयश्रीमन्मिश्रभावविरचिते भावप्रकाशे द्वितीयं सृष्टिप्रकरणं समाप्तम् ॥२॥

अथ तृतीयं गर्भप्रकरणम् ३

चिकित्सायां शरीरी ह्यधिकृतः स शरीरी यथोत्पद्यते तद्बोधयितुं गर्भोत्पत्तिक्रममाह –

गर्भोत्पत्तिभूमिस्तु रजस्वला स्त्री, ततो रजस्वलास्वरूपमाह –

द्वादशाद्वत्सरादूर्ध्वमापञ्चाशत्समाः स्त्रियः ।
मासि मासि भगद्वारा प्रकृत्यैवार्त्तवं स्रवेत् ॥ १ ॥

अथ गर्भग्रहणयोग्यं समयमाह –

आर्त्तवस्रावदिवसादृतुः षोडश रात्रयः ।
गर्भग्रहणयोग्यस्तु स एव समयः स्मृतः ॥२॥

*सर्वासामेव चतुर्वर्णस्त्रीणां सर्ववादिसम्मतः पूर्वोक्तः समयः । ग्रन्थान्तरे तु विशेषः । तद्यथा—स्नानदिवसादूर्ध्वं द्वादशरात्रावधि ब्राह्मण्याः, दशरात्रावधि क्षत्रियायाः, अष्टरात्रावधि वैश्यायाः, षड्रात्रावधि शूद्राया गर्भधारणे शक्तिः ॥ २ ॥

अथ रजस्वलाया नियमानाह –

आर्त्तवस्रावदिवसादहिंसा ब्रह्मचारिणी ।
शयीतदर्भशय्यायां पश्येदपि पतिं न च ॥ ३ ॥
करे शरावे पर्णे वा हविष्यं त्र्यहमाहरेत् ।
अश्रुपातं नखच्छेदमभ्यङ्गमनुलेपनम् ॥ ४ ॥
नेत्रयोरञ्जनं स्नानं दिवास्वापं प्रधावनम् ।

अत्युच्चशब्दश्रवणं हसनं बहुभाषणम् ॥
आयासं भूमिखननं प्रवातञ्च विवर्ज्जयेत् ॥ ५ ॥

एतस्या नियमाकरणे दोषानाह—

अज्ञानाद्वा प्रमादाद्वा लोभाद्वा दैवतश्च वा ॥ ६ ॥
सा चेत् कुर्य्यान्निषिद्धानि गर्भो दोषांस्तदाऽऽप्नुयात् ।
एतस्या रोदनाद्गर्भो भवेद्विकृतलोचनः ॥ ७ ॥
नखच्छेदेन कुनखी कुष्ठी त्वभ्यङ्गतो भवेत् ।
अनुलेपात्तथा स्नानात् दुःखशीलोऽञ्जनाद्दृक् ॥ ८ ॥
स्वापशीलो दिवास्वापाच्चञ्चलः स्यात् प्रधावनात् ।
अत्युच्चशब्दश्रवणाद्बधिरः खलु जायते ॥ ९ ॥
तालुदन्तौष्ठजिह्वासु श्यावो हसनतो भवेत् ।
प्रलापी भूरिकथनादुन्मत्तस्तु परिश्रमात् ॥
स्खलते भूमिखननादुन्मत्तो वातसेवनात् ॥ १० ॥

अथ रजस्वलाकृत्यमाह—

पूर्वं पश्येदृतुस्नाता यादृशं नरमङ्गना ।
तादृशं जनयेत् पुत्रं ततः पश्येत्पतिं प्रियम् ॥ ११ ॥
*प्रियमिति । भर्त्तर्य्यनासन्ने पुत्रादिकमपि पश्येत् ॥ ११ ॥

चतुर्थदिवसेऽपि रजोनिवृत्तौ स्त्री पत्या सङ्गच्छेन्न तु रजोऽनुवृत्तौ, यतआह—

प्रवहत्सलिले क्षिप्तं द्रव्यं गच्छत्यधो यथा ।
तथा वहति रक्ते तु क्षिप्तं वीर्य्यमधो व्रजेत् ॥ १२ ॥

अथ भर्तृकृत्यमाह—

तत्र गर्भाधाने निषिद्धं विहितं च कालं तयोः फलञ्चाह—

आयुःक्षयभयाद्भर्त्ता प्रथमे दिवसे स्त्रियम् ॥ १३ ॥
द्वितीयेऽपि दिने रत्यै त्यजेदृतुमतीं तथा ।
तत्र यश्चाहितो गर्भो जायमानो न जीवति ॥
आहितो यस्तृतीयेऽह्नि स्वल्पायुर्विकलाङ्गकः ॥ १४ ॥
अतश्चतुर्थी षष्ठी स्यादष्टमी दशमी तथा ।
द्वादशी वाऽपि या रात्रिस्तस्यां तां विधिना भजेत् ॥१५॥
*विधिना गर्भाधानोक्तविधिना ॥ १५ ॥

तन्त्रान्तरे—

अत्रोत्तरोत्तरं विद्यादायुरारोग्यमेव च ।
प्रजासौभाग्यमैश्वर्यं बलञ्चाभिगमात् फलम् ॥ १६ ॥

अथ सर्वासां स्त्रीणां योनिमध्ये नाडीत्रयमस्तीत्याह—

मनोभवागारमुखेऽबलानां तिस्रो भवन्ति प्रमदाजनानाम् ।
समीरणा चन्द्रमुखी च गौरी विशेषमासामुपवर्णयामि ॥ १७ ॥

अथ तासां विशेषमाह—

प्रधानभूता मदनातपत्रे समीरणा नाम विशेषनाडी ।
तस्या मुखे यत् पतितं तु वीर्य्यं तन्निष्फलं स्यादिति चन्द्रमौलिः ॥१८॥
या चापरा चान्द्रमसी च नाडी कन्दर्पगेहे भवति प्रधाना ।
सा सुन्दरी योषितमेव सूते साध्या भवेदल्परतोत्सवेषु ॥ १९ ॥
गौरीति नाडी यदुपस्थगर्भे प्रधानभूता भवति स्वभावात् ।
पुत्रं प्रसूते बहुधाऽङ्गना सा कष्टोपभोग्या सुरतोपविष्टा ॥ २० ॥

अथ युग्मायुग्मरात्रीणां फलमाह—

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ॥ २१ ॥

तत्र दम्पत्योः सम्भोगे यादृक्पुमान्युक्तस्तादृगुच्यते—

स्नातश्चन्दनलिप्ताङ्गः सुगन्धसुमनोऽञ्चितः ।
भुक्तवृष्यः सुवसनः सुवेशः समलङ्कृतः ॥ २२ ॥
ताम्बूलवदनस्तस्यामनुरक्तोऽधिकस्मरः ।
पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे ॥ २३ ॥

तत्रायोग्यं पुरुषमाह—

अत्याशितोऽधृतिः क्षुद्रान् सव्यथाङ्गः पिपासितः ।
बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम् ॥ २४ ॥

तत्र स्त्री यादृशी योग्या तादृश्युच्यते—

पुरुषस्य गुणैर्युक्ता विहिता न्यूनभोजना ।
नारी ऋतुमती पुंसा सङ्गच्छेत्तु सुतार्थिनी ॥ २५ ॥

तत्रायोग्यां स्त्रियमाह—

रजस्वला व्याधिमती विशेषाद्योनिरोगिणी ।
वयोऽधिका च निष्कामा मलिना गर्भिणी तथा ॥
एतासां सङ्गमात्पुंसां वैगुण्यानि भवन्ति हि ॥ २६ ॥

*तत्र रजस्वला दिनत्रयं यावदृतौ निषिद्धा यत उक्तम्—

*"प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी ।
तृतीये रजकी पुसां यथा वर्ज्या तथाऽङ्गना ॥ १ ॥"

*व्याधिमती च वर्ज्या । तत्र स्त्रीणां व्याधयः प्रदरादयस्तद्युक्ता निषिद्धा तत्रापि विशेषाद्योनिरोगिणी ॥ २६ ॥

अथ गर्भावतरणक्रममाह—

कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः ।
गर्भः सञ्जायते नार्य्याः स जातो बाल उच्यते ॥ २७ ॥

*गर्भः शुद्धः, अशुद्धस्तु गर्भोऽशुद्धशुक्रशोणितयोरपि दम्पत्योर्भवति आह—

*"दम्पत्योः कुष्ठबाहुल्याद् दुष्टशोणितशुक्रयोः ।
यदपत्यन्तयोर्जातं ज्ञेयं तदपि कुष्ठितम्" इति ॥ २ ॥

*कुष्ठं सञ्जातं यस्य तत् कुष्ठितम् । अत्र तारकादित्वादितच् प्रत्ययः ॥ २ ॥

*यत्तु—"वातादिदुष्टरेतसः प्रजोत्पादने न समर्थाः" इति सुश्रुतः । तत्र शुद्धप्रजोत्पादने न समर्था इति बोद्धव्यम् । रोगादिनाऽशुद्धास्तु प्रजा वातादिदुष्टशुक्रा अपि जनयन्ति जन्मान्धबधिरपङ्ग्वादिसम्भवात् ॥ २७ ॥

ऋतौ स्त्रीपुंसयोर्योगे मकरध्वजवेगतः ।
मेढ्रयोन्यभिसंघर्षाच्छरीरोष्माऽनिलाहतः ॥ २८ ॥
पुंसः सर्वशरीरस्थं रेतो द्रावयतेऽथ तत् ।
वायुर्मेहनमार्गेण पातयत्यङ्गनाभगे ॥ २९ ॥
तत् संस्रुत्य व्यात्तमुखं याति गर्भाशयं प्रति ।
तत्र शुक्रवदायातेनार्त्तवेन युतं भवेत् ॥ ३० ॥

अथ गर्भाशयस्य स्वरूपमाह—

शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता ।
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता ॥ ३१ ॥
यथा रोहितमत्स्यस्य मुखं भवति रूपतः ।
तत्संस्थानां तथारूपां गर्भशय्यां विदुर्बुधाः ॥ ३२ ॥

*अयमर्थः । गर्भशय्याया मुखं रोहितमत्स्यस्येव भवति यथा च रोहितमत्स्यस्य स्थितिर्जले भवति तथा पित्ताशयपक्वाशयमध्ये गर्भशय्यायाः स्थितिर्भवति रूपमपि तस्येव भवति यथा रोहितस्य मुखं स्वल्पमाशयस्तु महानित्यर्थः ॥ ३२ ॥

अथ गर्भे जीवप्रवेशप्रकारमाह—

शुक्रार्त्तवसमाश्लेषो यदैव खलु जायते ॥
जीवस्तदैव विशति युक्तः शुक्रार्त्तवान्तरः ॥ ३३ ॥
सूर्य्यांशोः सूर्य्यमणित उभयस्माद् युताद्यथा ।
वह्निः सञ्जायते जीवस्तथा शुक्रार्त्तवाद्युतात् ॥ ३४ ॥
आत्माऽनादिरनन्तश्चाव्यक्तो वक्तुं न शक्यते ॥
चिदानन्दैकरूपोऽयं मनसाऽपि न गम्यते ॥३५॥
एवंभूतोऽपि जगतो भाविनोबलवत्तया ।
अविद्यास्वीकृते कर्म्मवशो गर्भं विशत्यसौ ॥ ३६ ॥

*गर्भं चतुर्विंशतितत्त्वमये ॥ ३५–३६ ॥

स एव वेत्ता रसनो द्रष्टा घ्राता स्पृशत्यसौ ।
श्रोता वक्ता च कर्त्ता च गन्ता रन्तोत्सृजत्यपि ॥ ३७ ॥

अथ गर्भाशयद्वारमुखसंवरणकालमाह—

दिने व्यतीते नियतं सङ्कुचत्यम्बुजं यथा ।
ऋतौ व्यतीते नार्य्यास्तु योनिः संव्रियते तथा ॥ ३८ ॥

*ऋतौ रजोदर्शनात् षोडशनिशाऽऽत्मके काले ।
योनिरत्र धराद्वारम् ॥ ३८ ॥

अथ यमजसन्तानोत्पत्तौ हेतुमाह—

बीजेऽन्तर्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ ।
यमावित्यभिधीयेते धर्म्मेतरपुरःसरौ ॥ ३९ ॥

*तौ धर्मेतरपुरःसरौ = धर्म्मस्तदितरोऽधर्म्मस्तौ पुरःसरौ ययोः, तेन यमौ धर्माधर्माभ्यां भवत इत्यर्थः ॥ ३९ ॥

अथ स्त्रीपुंसनपुंसकसन्तानोत्पत्तौ हेतुमाह—

आधिक्ये रेतसः पुत्रः कन्या स्यादार्त्तवेऽधिके ।
नपुंसकं तयोः साम्ये यथेच्छा पारमेश्वरी ॥ ४० ॥

*नन्वेवं सति कथं पुत्रोत्पत्तिः सदैवार्त्तवस्यैव बाहुल्यात् । यत-उक्तम्—

"आर्त्तवं चतुरञ्जलिप्रमाणं शुक्रं प्रसृतिमात्रम्" इति ।

वाग्भटेऽप्युक्तमात्रेयादिभिः—

"मज्जा मेदो वसा मूत्रपित्तश्लेष्मशकृन्त्यसृक् ।
रसो जलं च देहेऽस्मिन्त्वेकैकाञ्जलिबर्द्धितम् ॥ ३ ॥
पृथक् च प्रसृतं प्रोक्तमोजोमस्तिष्करेतसाम् ।
द्वावञ्जली तु दुग्धस्य चत्वारो रजसः स्त्रियः ॥
समधातोरिदं मानं विद्याद् बृद्धिक्षयादृते" ॥ ४ ॥

*नैवं, यतो गर्भाशयस्थमेव शुक्रमार्त्तवं च गर्भोत्पत्तिहेतुः, शुक्रं कदाचिदत्यन्तहर्षवशाद् दुग्धादिशुक्रलद्रव्यसेवनाद् शुक्रबाहुल्याद् गर्भाशये बहु स्रवति कदा चिद्वैमनस्यादिना शुक्राल्पत्वात्त्वल्पमिति, एवमार्त्तवमपीति न दोषः ॥

सुश्रुतः पुनराह—

"वैलक्षण्याच्छरीराणामस्थायित्वात्तथैव च ।
दोषधातुमलानां तु परिमाणं न विद्यते" ॥ ५ ॥

*वैलक्षण्याद् दीर्घह्रस्वकृशादिभेदेन सादृश्याभावाद् अस्थायित्वाद् वयोऽहर्निशर्त्तुभुक्तेष्वेकमात्रानवस्थानात्(५) ॥ ४० ॥

एवं तामभिसङ्गम्य पुनर्मासाद् भजेदसौ ॥ ४१ ॥

*मासादूर्ध्वमिति शेषः । अर्वाग्गमनेन गर्भद्वारविघट्टनाद् गर्भच्युतिप्रसङ्गः स्यात्, के चित्तु, पुनः पुष्पदर्शनेन गर्भालाभनिश्चये मासादूर्ध्वं गच्छेद् लब्धगर्भं नैव गच्छेदिति वदन्ति ॥ ४१ ॥

तत्र परिहार्य्यपरिहारार्थं सद्योगृहीतगर्भाया लक्षणमाह—

शुक्रशोणितयोर्योनेरस्रावोऽथ श्रमोद्भवः ।
सक्थिसादः पिपासा च ग्लानिः स्फूर्त्तिभंगे भवेत् ॥४२॥

अथ तस्या एवोत्तरकालीनं लक्षणमाह—

स्तनयोर्मुखकार्ष्ण्यं स्याद्रोमराज्युद्गमस्तथा ।
अक्षिपक्ष्माणि चाप्यस्याः सम्मील्यन्ते विशेषतः ॥ ४३ ॥

छर्दयेत्पथ्यभुक् चापि गन्धादुद्विजते शुभात् ।
प्रसेकः सदनं चैव गर्भिण्या लिङ्गमुच्यते ॥ ४४ ॥

तत्र पुत्रगर्भवत्या लक्षणमाह—

पुत्रगर्भयुतायास्तु नार्य्या मासि द्वितीयके ।
गर्भो गर्भाशये लक्ष्यः पिण्डाकारोऽपरं शृणु ॥ ४५ ॥

*पिण्डो=वर्त्तुलाकृतिः, "मासि द्वितीयके" इत्यस्य "गर्भः पिण्डाकारो लक्ष्यः" इत्यनेनैवान्वयो न त्वग्रिमश्लोकेऽपि ॥ ४५ ॥

दक्षिणाक्षिमहत्त्वं स्यात् प्राक्क्षीरं दक्षिणे स्तने ।
दक्षिणोरुः सुपुष्टः स्यात्प्रसन्नमुखवर्णता ॥ ४६ ॥
पुन्नामधेयद्रव्येषु स्वप्नेष्वपि मनोरथः ।
आम्रादिफलमाप्नोति स्वप्नेषु कमलादि च ॥४७॥

अथ कन्यागर्भवत्या लक्षणमाह—

कन्यागर्भवती गर्भे पेशी मासि द्वितीयके ।
पुत्रगर्भस्य लिङ्गानि विपरीतानि चेक्षते ॥ ४८ ॥

*पेशी=दीर्घाकृतिः ॥ ४८ ॥

अथ नपुंसकगर्भवत्या लक्षणमाह—

नपुंसकं यदा गर्भे भवेद् गर्भोऽर्बुदाकृतिः ।
उन्नते भवतः पार्श्वे पुरस्तादुदरं महत् ॥ ४९ ॥

*अर्बुदं=वर्त्तुलफलार्द्धतुल्यम ॥ ४९ ॥

नपुंसकविशेषानाह—

आसेक्यश्च सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा ।
अमी सशुक्रा बोद्धव्या अशुक्रः षण्ढसंज्ञकः ॥ ५० ॥

एतेषां लक्षणान्याह, तत्रादावासेक्यलक्षणमाह—

पित्रोस्तु स्वल्पवीर्यत्वादासेक्यः पुरुषो भवेत् ।
स शुक्रं प्राश्य लभते ध्वजोन्नतिमसंशयम् ॥ ५१ ॥

*पित्रोर्मातापित्रोः स्वल्पवीर्यत्वात् स्वल्पशुक्रार्त्तवत्वाद्, आसेक्यनामा मुखयानीति नामान्तरम् । स शुक्रं प्राश्येति स पुरुषोऽन्यपुरुषेण स्वमुखे मैथुनं कारयित्वा तस्य शुक्रं प्राश्य मेहनोत्थानं लभत इत्यर्थः ॥ ५१ ॥

अथ सुगन्धिनपुंसकलक्षणमाह—

यः पूतियोनौ जायेत स हि सौगन्धिको भवेत् ।
स योनिशेफसोर्गन्धमाघ्राय लभते बलम् ॥ ५२ ॥

*सौगन्धिकः=सौगन्धिकनामा, नासायोनीति नामान्तरम् । बलं=मैथुने शक्तिम् ॥ ५२ ॥

अथ कुम्भीकनपुंसकलक्षणमाह—

स्वे गुदेऽब्रह्मचर्य्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते ।
स कुम्भीक इति ज्ञेयो गुदयोनिस्तु स स्मृतः ॥ ५३ ॥

*अब्रह्मचर्य्याद्=ब्रह्मचर्य्यममैथुनम्; अब्रह्मचर्य्यं=मैथुनम्; किन्तु स्त्रीवदधोभूतः स्वेगुदे पुरुषान्तरेण मैथुनं कारयति, तस्मात् ॥५३॥

अथेर्ष्यकनपुंसकलक्षणमाह—

दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते ।
ईर्ष्यकः स तु विज्ञेयो दृष्टियोनिस्तु स स्मृतः ॥५४॥

अथ षण्ढनपुंसकलक्षणमाह—

यो भार्य्यायामृतौ मोहादङ्गनेव प्रवर्त्तते ।
तत्र स्त्रीचेष्टिताकारो जायते षण्ढसंज्ञकः ॥ ५५ ॥

*स्त्रीचेष्टिताकारः=स्त्रीचेष्टितः=समेहनोऽपि पुरुषशक्तिरहितः, स्त्र्याकारः=श्मश्रुरहितः ॥५५॥

अथ नरचेष्टितायाः कन्याया उत्पत्तौ हेतुमाह—

ऋतौ ऋतौ पुरुषवत् प्रवर्त्तताङ्गना यदि ।
तत्र कन्या यदि भवेत् सा भवेन्नरचेष्टिता ॥ ५६ ॥

*पुरुषवत् स्त्रियमारुह्य सा तस्या योनौ स्वयोनिघर्षणं करोति॥५६॥

अपरा अपि गर्भप्रकृतीराह—

यदा नार्य्यावुपेयातां वृषस्यन्त्यौ कथञ्चन ।
मुञ्चन्त्यौ शुक्रमन्योन्यमनस्थिस्तत्र जायते ॥ ५७ ॥

*अनस्थिः=अत्रेषदर्थे नञ् तेनाल्पकोमलास्थिरित्यर्थः ॥ ५७ ॥

ऋतुस्नाता तु या नारी स्वप्ने मैथुनमाचरेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥ ५८ ॥
मासि मासि प्रवर्द्धेत स गर्भो गर्भलक्षणः ।

कललं जायते तस्य बर्जितं पैतृकैर्गुणैः ॥ ५८ ॥

*गर्भलक्षणः = प्रकृतगर्भलक्षणः । पैतृकैर्गुणैः = केशश्मश्रुलोमनखदन्तशिरास्नायुधमनीरेतःप्रभृतिभिः ॥ ५८ ॥ ५९ ॥

सर्पवृश्चिककूष्माण्डाकृतयो विकृताश्च ये ।
गर्भास्ते योषितस्ताश्च ज्ञेयाः पापकृतो भृशम् ॥६०॥
गर्भो वातप्रकोपेण दोहदे चापमानिते ।
भवेत् कुब्जः कुणिः पङ्गुर्मूको मिन्मिन एव च ॥ ६१ ॥

अथ पुरुषाणामाहाराचारचेष्टाभेदस्य हेतुमाह—

आहाराचारचेष्टाभिर्यादृशीभिः समन्वितौ ।
स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः ॥ ६२ ॥

*समुपेयातां=संयोगं गच्छेताम् ॥ ६२ ॥

अथ गर्भलक्षणमाह—

गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकः ।
प्रकृतिः सविकारा च तत्सर्वं गर्भसंज्ञकम् ॥ ६३ ॥
कालेन बर्द्धितो गर्भो यद्यङ्गोपाङ्गसंयुतः ।
भवेत्तदा स मुनिभिः शरीरीति निगद्यते ॥ ६४ ॥

*अङ्गोपाङ्गसंयुतः = व्यक्ताङ्गोपाङ्गः ॥ ६३ ॥ ६४ ॥

तस्य त्वङ्गान्युपाङ्गानि ज्ञात्वा सुश्रुतशास्त्रतः ।
मस्तकादभिधीयन्ते शिष्याः ! शृणुत यत्नतः ॥ ६५ ॥
आद्यमङ्गं शिरः प्रोक्तं तदुपाङ्गानि कुन्तलाः ।
तस्यान्तर्मस्तुलुङ्गं च ललाटं भ्रूयुगन्तथा ॥ ६६ ॥
नेत्रद्वयं तयोरन्तर्वर्त्तते द्वे कनीनिके ।
दृष्टिद्वयं कृष्णगोलौ श्वेतभागौ च वर्त्मनी ॥६७॥
पक्ष्माण्यपाङ्गौ शङ्खौ च कर्णौ तच्छष्कुलीद्वयम् ।
पालिद्वयं कपोलौ च नासिका च प्रकीर्त्तिता ॥ ६८ ॥
ओष्ठाधरौ च सृक्किण्यौ मुखं तालु हनुद्वयम् ।
दन्ताश्च दन्तवेष्टश्च रसना चिबुकङ्गलः ॥ ६९ ॥
द्वितीयमङ्गं ग्रीवा तु यया मूर्द्धा विधार्यते ।
तृतीयं बाहुयुगलं तदुपाङ्गान्यथ ब्रुवे ॥ ७० ॥

तत्रोपरि मतौ स्कन्धौ प्रगण्डौ भवतस्त्वधः ।
कफोणियुग्मं तदधः प्रकोष्ठयुगलन्तथा ॥ ७१ ॥
मणिबन्धौ तले हस्तौ तयोश्चाङ्गुलयो दश ।
नखाश्च दश ते स्थाप्या दशच्छेद्याः प्रकीर्त्तिताः ॥७२॥
चतुर्थमङ्गं वक्षस्तु तदुपाङ्गान्यथ ब्रुवे ।
स्तनौ पुंसस्तथा नार्य्या विशेष उभयोरयम् ॥ ७३ ॥
यौवनागमने नार्याः पीवरौ भवतः स्तनौ ।
गर्भवत्याः प्रसूतायास्तावेव क्षीरपूरितौ ॥ ७४ ॥

अथ हृदयस्य स्वरूपमाह—

हृदयं पुण्डरीकेण सदृशं स्यादधोमुखम् ।
जाग्रतस्तद्विकसति स्वपतस्तु निमीलति ॥ ७५ ॥
आशयस्तत्तु जीवस्य चेतनास्थानमुत्तमम् ।
अतस्तस्मिंस्तमोव्याप्ते प्राणिनः प्रस्वपन्ति हि ॥ ७६ ॥

*चेतनास्थानमुत्तममिति । अयमभिप्रायः—
"चेतनानामधिष्ठानं मनो देहश्च सेन्द्रियः ।
केशलोमनखाग्रान्नमलद्रवगुणैर्विना" ॥ ६ ॥
इत्युक्तवता चरकेण सकलं शरीरं चेतनास्थानमुक्तं तदपेक्षया हृदयं विशेषतश्चेतनास्थानमिति ॥ ७५ ॥ ७६ ॥

कक्षयोर्वक्षसः सन्धी जत्रुणी समुदाहृते ।
कक्षे उभे समाख्याते तयोः स्यातां च वङ्क्षणौ ॥ ७७ ॥
उदरं पञ्चमञ्चाङ्गं षष्ठं पार्श्वद्वयं मतम् ।
सपृष्ठवंशं पृष्ठं तु समस्तं सप्तमं स्मृतम ॥ ७८ ॥
उपाङ्गानि च कथ्यन्ते तानि जानीहि यत्नतः ।
शोणिताज्जायते प्लीहा वामतो हृदयादधः ॥ ७९ ॥
रक्तवाहिशिराणां स मूलं ख्यातो महर्षिभिः ।
हृदयाद्वामतोऽधश्च फुप्फुसो रक्तफेनजः ॥ ८० ॥
अधो दक्षिणतश्चापि हृदयाद्यकृतः स्थितिः ।
तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम् ॥ ८१ ॥

अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति ।
जलवाहिशिरामूलं तृष्णाऽऽच्छादनकृन्मतम् ॥ ८२ ॥

*क्लोम = तिलकम्, एतत्तु वातरक्तजम् । अत्र बृद्धवाग्भटोऽप्याह—

"रक्तादनिलसंयुक्तात्कालीयकसमुद्भवः" इति ॥ ८२ ॥
मेदः शोणितयोः साराद् वृक्कयोर्युगलं भवेत् ।
तौ तु पुष्टिकरौ प्रोक्ता जठरस्थस्य मेदसः ॥ ८३ ॥
उक्ताः सार्द्धास्त्रयो व्यामाः पुंसामन्त्राणि सूरिभिः ।
अर्द्धव्यामेन हीनानि योषितोऽन्त्राणि निर्दिशेत् ॥ ८४ ॥
उन्दुकश्च कटी चापि त्रिकं बस्तिश्च वङ्क्षणौ ।
कण्डराणां प्ररोहः स्यान्मेढ्रोऽध्वा वीर्य्यमूत्रयोः ॥ ८५ ॥
स एव गर्भस्याधानं कुर्य्याद्गर्भाशये स्त्रियाः ।
शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता ॥ ८६ ॥
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता ।
वृषणौ भवतः सारात्कफासृङ्मांसमेदसाम् ॥ ८७ ॥
वीर्य्यवाहिशिराधारौ तौ मतौ पौरुषावहौ ।
गुदस्य मानं सर्वस्य सार्द्धं स्याच्चतुरङ्गुलम् ॥ ८८ ॥
तत्र स्युर्वलयस्तिस्रः शङ्खावर्त्तनिभास्तु ताः ।
प्रवाहिणी भवेत्पूर्वा सार्द्धाङ्गुलमिता मता ॥ ८९ ॥
उत्सर्जनी तु तदधः सा सार्द्धाङ्गुलसम्मिता ।
तस्याधः संवरणी स्यादेकाङ्गुलसमा मता ॥ ९० ॥
अर्द्धाङ्गुलप्रमाणं तु बुधैर्गुदमुखं मतम् ।
मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्मितः ॥ ९१ ॥
पुंसः प्रोथौ स्मृतौ यौ तु तौ नितम्बौ च योषितः ।
तयोः कुकुन्दरे स्यातां सक्थिनी त्वङ्गमष्टमम् ॥ ९२ ॥
तदुपाङ्गानि च ब्रूमो जानुनी पिण्डिकाद्वयम् ।
जङ्घे द्वे घुटिके पार्ष्णी तले च प्रपदे तथा ।
पादावंगुलयस्तत्र दश तासां नखा दश ॥ ९३ ॥

*अथेदं शरीरमपरेणापि येन येन समवायिकारणेनोत्पद्यते तानि सर्वाण्याह—

अथ दोषाः प्रवक्ष्यन्ते धातवस्तदनन्तरम् ।
आहारादेर्गतिस्तस्य परिणामश्च वक्ष्यते ॥ ९४ ॥
आर्त्तवं चाथ धातूनां मलास्तदुपधातवः ।
आशयाश्च कलाश्चापि मर्माण्यथ च सन्धयः ॥ ९५ ॥
शिराश्च स्नायवश्चापि धमन्यः कण्डरास्तथा ।
रन्ध्राणि भूरिस्रोतांसि जालैः कूर्चाश्च रज्जवः ॥ ९६ ॥
सेवन्यश्चाथ संघाताः सीमन्ताश्च तथा त्वचः ।
लोमानि लोमकूपाश्च देह एतन्मयो मतः ॥ ९७ ॥

तत्र दोषस्वरूपमाह वाग्भटः—

वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः ।
विकृताविकृता देहं घ्नन्ति ते वर्द्धयन्ति च ॥ ९८ ॥
ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः
वयोऽहोरात्रिभुक्तानामन्तमध्यादिगाः क्रमात् ॥ ९९ ॥

दोषशब्दस्य निरुक्तिमाह—

धातवश्च मलाश्चापि दुष्यन्त्येभिर्यतस्ततः ।
वातपित्तकफा एते त्रयो दोषा इति स्मृताः ॥ १०० ॥

*दोषा इत्यत्र "दुष-वैकृत्ये" इति दुषधातोर्दुष्यन्त्येभिरिति वाक्येन "अकर्त्तरि च कारके संज्ञायामि"त्यनेन सूत्रेण करणेऽर्थे घञ् प्रत्ययः ॥ १०० ॥

ते धातवोऽपि विद्वद्भिर्गदिता देहधारणात् ॥ १०१ ॥

*यतआह सुश्रुतः—

"विसर्गादानविक्षेपैः सोमसूर्यानिला यथा ।
धारयन्ति जगद्देहं कफपित्तानिलास्तथा"(७) ॥ इति

*अत्र यथासङ्ख्येनान्वयो बोद्धव्यः । विसर्गादानं वातस्यैव । विक्षेपः शीतोष्णादीनां विविधप्रकारेण प्रेरणम्(७) ॥ १०१ ॥

मलाश्च ते रसादीनां मलिनीकरणान्मताः ॥ १०२ ॥

तत्र वायोः स्वरूपमाह—

दोषधातुमलादीनां नेता शीघ्रः समीरणः ।

रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥ १०३ ॥
*नेता = स्थानान्तरं प्रापयिता । शीघ्रः = आशुकारी ॥ १०३ ॥

अन्यच्च —

उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्त्तनैः ।
सम्यग् गत्या च धातूनामिन्द्रियाणाञ्च पाटवैः ॥
अनुगृह्णात्यविकृतो हृदयेन्द्रियचित्तधृक् ॥ १०४ ॥
रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः ।
खरो मृदुर्योगवाही संयोगादुभयार्थकृत् ॥ १०५ ॥
दाहकृत् तेजसा युक्तः शीतकृत्सोमसंश्रयात् ।
विभागकरणाद्वायुः प्रधानं दोषसंग्रहे ॥ १०६ ॥
पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम् ।
स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः ॥ १०७ ॥

एको वायुः पित्तवन्नामस्थानकर्मभेदः पञ्चविधस्तेषां वायूनां नामान्याह—

उदानस्तदनु प्राणः समानोऽपान एव च ।
व्यानश्चैतानि नामानि वायोः स्थानप्रभेदतः ॥ १०८ ॥

अथोदानादीनां स्थानान्याह—

कण्ठे हृदि तथाऽधस्तात्कोष्ठवह्नेर्मलाशये ।
सकलेऽपि शरीरेऽसौ क्रमेण पवनो वसेत् ॥ १०९ ॥

अथ तेषां कर्म्माण्याह—

उदानो नाम यस्तूर्ध्वमुपैति पवनोत्तमः ।
तेन भाषितगीतादिप्रवृत्तिः कुपितस्तु सः ॥ ११० ॥
ऊर्ध्वजत्रुगतान् रोगान्विदधाति विशेषतः ।
यो वायुः *प्राणनामाऽसौ मुखं गच्छति देहधृक् ॥ १११ ॥
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते ।
प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ॥ ११२ ॥
आमपक्वाशयचरः समानो वह्निसङ्गतः ।
सोऽन्नं पचति तज्जांश्च विशेषान्विविनक्ति हि ॥ ११३ ॥
*तज्जानित्यादि । अन्नगतान् रसमलमूत्रादीन् पृथक्करोतीत्यर्थः ११३
स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि ।

पक्वाशयालयोऽपानः काले कर्षति चाप्ययम् ॥ ११४ ॥
समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः ।
क्रुद्धस्तु कुरुते रोगान् घोरान्वस्तिगुदाश्रयान् ॥ ११५ ॥
शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान् ।
कृत्स्नदेहचरो व्यानो रससंवाहनोद्यतः ॥ ११६ ॥
स्वेदासृक्स्रावणश्चापि पञ्चधा चेष्टयत्यपि ।
प्रस्पन्दनश्चोद्वहनं पूरणञ्च विरेचनम् ॥ ११७ ॥
प्रायः सर्व्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम् ॥ ११८ ॥
क्रुद्धः सः कुरुते रोगान् प्रायशः सर्व्वदेहगान् ।
युगपत् कुपिता एते देहं भिन्द्युरसंशयम् ॥ ११९ ॥
*देहं भिन्नं कुर्य्युर्मारयेयुरित्यर्थः ॥ ११९ ॥

अथ पित्तस्य स्वरूपमाह—

पित्तमुष्णं द्रवं पीतं नीलं सत्त्वगुणोत्तरम् ।
सरं कटु लघु स्निग्धं तीक्ष्णमम्लन्तु पाकतः ॥ १२० ॥
*पीतं निरामम् । नीलं सामम् ॥ १२० ॥

एकं पित्तं वातवन्नामस्थानकर्म्मभेदैः पञ्चविधम् । तेषां पित्तानां नामान्याह —

पाचकं रञ्जकञ्चापि साधकालोचके तथा ।
भ्राजकश्चेति पित्तस्य नामानि स्थानभेदतः ॥ १२१ ॥

अथ पाचकादीनां स्थानान्याह—

अग्न्याशये यकृत्प्लीह्नोर्हृदये लोचनद्वये ।
त्वचि सर्वशरीरेषु पित्तं निवसति क्रमात् ॥ १२२ ॥

अथ तेषां कर्माण्याह—

पाचकं पचते भुक्तं शेषाग्निबलवर्द्धनम् ।
रसमूत्रपुरीषाणि विरेचयति नित्यशः ॥ १२३ ॥

*पाचकं पित्तमामपक्वाशयमध्यस्थं षड्विधमाहारं भोज्यं-भक्ष्यं-चर्व्यं-लेह्यं चूष्यं-पेयं पचति, दोषरसमूत्रपुरीषाणि पृथक्करोति च । तदग्न्याशयस्थमेव स्वशक्त्या रसरञ्जनहृदयस्थकफतमोऽपनोदनरूप-ग्रहणप्रभाप्रकाशनाभ्यङ्गलेपादिपाचनाद्यग्निकर्म्मणा शेषाणां पित्तस्थानानामनुग्रहं करोति । शेषाण्यपि पित्तस्थानानि यकृतप्लीहादानि

भागेन गत्वा तत्र तत्र रसरञ्जनादिकर्म्मभिरुपकरोतीत्यर्थः । कथम्भूतं पाचकं पित्तं शेषाग्निबलबर्द्धनम् । शेषा अग्नयः पृथिव्यादिमहाभूतगुणाः । यत उक्तं चरकेण—

"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।" इति ॥ ७ ॥

यत उक्तं वाग्भटे—

"दोषधातुमलादीनामूष्मेत्यात्रेयशासनम् ॥ ८ ॥" इति

दोषधातुमलादीनामूष्मैवाग्निरित्यर्थः ॥ ८ ॥

रसादिधातुगताः सप्त तेषां बलबर्धनम् । यथा गृहे स्थापितानि रत्नानि खद्योतवददूरभास्वराणि तान्यपि दीपज्योतिषा दूरप्रकाशकानि भवन्ति । तथा—अग्न्याशयस्थपाचकाग्नितेजसा सर्वेऽग्नयो बलवन्तो भवन्ति ।

तथा च वाग्भटः—

अन्नस्य पक्ता सर्वेषां पक्तॄणामधिको मतः ।
तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः" इति ॥ ९ ॥

*ननु पित्तादन्योऽग्निराहोस्वित्पित्तमेवाग्निरिति सन्देहः । उच्यते । पित्तस्योष्णादिगुणद्वारा आहारपाचनरञ्जनदर्शनादिकर्म्मणश्च न खलु पित्तव्यतिरेकेणान्योऽग्निः । तस्मादग्निरूपस्यैव पित्तस्य स्थानभेदात्पाचकरञ्जकसाधकालोचकभ्राजकसंज्ञाः ।

तथा च वाग्भटः—

"पाचकं तिलमानं स्यात् काठिन्यान्नास्य दोषता ।
अनुगृह्णात्यविकृतं पित्तं पाकोष्मदर्शनैः ॥
क्षुत्तृड्रुचिप्रभामेधाधीशौर्य्यतनुमार्दवैः ।
पित्तं पञ्चात्मकं तत्र पक्वामाशयमध्यगम् ॥ १० ॥
पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयम् ।
त्यक्तद्रवत्वं पाकादिकर्म्मणाऽनलशब्दितम् ॥ ११ ॥
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा ।
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ।
करोति बलदानेन पाचकं नाम तत्स्मृतम् ॥ १२ ॥

*ननु यदि पित्ताग्न्योरभेदस्तदा कथं घृतं पित्तस्य शमकमग्नेर्दीपकमिति। तथा मत्स्याः पित्तं कुर्वन्ति न च तेऽग्निदीप्तिकरा इति। तथा पित्ताधिक्यात्तीक्ष्णोऽग्निरित्यपि कथं स्यात्। तथा—"समदोषः समाग्निश्चे"त्यपि वक्तुं न युज्यते। तथा—

"द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथेति।"

अत्रोच्यते। पित्तमग्नेः सन्तताधिष्ठानम्।

तथा चोक्तं तन्त्रान्तरे—

अग्निर्भिन्नगुणैर्युक्तः पित्तं भिन्नगुणैस्तथा।
द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथा॥ १३॥
तस्मात्तेजोमयं पित्तं पित्तोष्मा यः स शक्तिमान्।
स सञ्चरति कुक्षिस्थः सर्वतो धमनीमुखैः॥१४॥
स कायाग्निः स कायोष्मा स पक्ता स च जीवनम्।
अनन्यगतिरित्येवं देहे कायाग्निरुच्यते॥ १५॥

अन्यच्च—

*वामपार्श्वाश्रितं नाभेः किञ्चित् सोमस्य मण्डलम्॥१६॥
तन्मध्ये मण्डलं सौर्य्यं तन्मध्येऽग्निर्व्यवस्थितः।
जरायुमात्रप्रच्छन्नः काचकोशस्थदीपवत्॥ १७॥

तथा च मधुकोषे—

*"द्रवतेजः समुदायात्मकस्यापि पित्तस्य तेजोभागोऽग्नि"रिति। तेन पित्तमप्यग्निवन्मन्यते। अतितापितायोगोलकवत्। परमार्थतस्तु—अग्निः पित्ताद्भिन्न एवेति सिद्धान्तः॥

अत एवाह रसप्रदीपे—

जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः।
सौक्ष्म्याद्रसानाददानो विवक्तुं नैव शक्यते॥ १८॥
नाभिमध्ये शरीरस्य विशेषात्सोममण्डलम्।
सोममण्डलमध्यस्थं विद्यात् सूर्य्यस्य मण्डलम्॥ १९॥
प्रदीपवत्तत्र नृणां स्थितो मध्ये हुताशनः।
सूर्यो दिवि यथा तिष्ठंस्तेजोयुक्तैर्गभस्तिभिः॥ २०॥
विशोषयति सर्वाणि पल्वलानि सरांसि च।

तद्वच्छरीरिणां भुक्तं ज्वलनो नाभिमाश्रितः ॥ २१ ॥
मयूखैः पचते क्षिप्रं नानाव्यञ्जनसंस्कृतम् ।
स्थूलकायेषु सत्त्वेषु यवमात्रः प्रमाणतः ॥ २२ ॥
ह्रस्वकायेषु सत्त्वेषु तिलमात्रः प्रमाणतः ।
कृमिकीटपतङ्गेषु बालमात्रोऽवतिष्ठते" ॥ २३ ॥
इत्यलमप्रकृतचिन्तनेन १२३ ॥

पुनः प्रकृतमनुसरति--

रञ्जकं नाम यत्पित्तं तद्रसं शोणितं नयेत् ।
यत्तु साधकसंज्ञं तत्कुर्य्याद् बुद्धिं धृतिं स्मृतिम् ॥ १२४ ॥
*धृतिं=मेधाम् ॥ १२४ ॥
यदालोचकसंज्ञं तद्रूपग्रहणकारणम् ।
भ्राजकं कान्तिकारि स्याल्लेपाभ्यङ्गादिपाचकम् ॥ १२५ ॥

अथ श्लेष्मस्वरूपमाह--

श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीतलस्तथा ।
तमोगुणाधिकः स्वादुर्विदग्धो लवणो भवेत् ॥ १२६ ॥

एकः श्लेष्मा वातपित्तवन्नामस्थानकर्म्मभेदैः पञ्चविधोऽतः श्लेष्मणां नामान्याह–

कफस्यैतानि नामानि क्लेदनश्चावलम्बनः ।
रसनः स्नेहनश्चापि श्लेषणः स्थानभेदतः ॥ १२७ ॥

अथ क्लेदनादीनां स्थानान्याह—

आमाशयेऽथ हृदये कण्ठे शिरसि सन्धिषु ।
स्थानेष्वेषु मनुष्याणां श्लेष्मा तिष्ठत्यनुक्रमात् ॥१२८॥

*"दोषाणां सकलशरीरव्यापिनामपि पञ्च पञ्च स्थानानी"ति बाहुल्याभिप्रायेणोक्तानि ॥

तथा च वाग्भटः—

"इति प्रायेण दोषाणां स्थानान्यविकृतात्मनाम् ।
व्यापिनामपि जानीयात् कर्माणि च पृथक् पृथक् ।" इति

चरकश्च—

"ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः ॥२४॥
इति ॥ १२८ ॥

क्लेदनः क्लेदयत्यन्नमात्मशक्त्याऽपराण्यपि ।
अनुगृह्णाति च श्लेष्मस्थानान्युदककर्म्मणा ॥ १२८ ॥

*अयमर्थः-क्लेदनोऽन्नं क्लेदयति तेन संहतमन्नं भेदं प्राप्नोति । अपराण्यपि श्लेष्मस्थानानि हृदयादीनि भागेन गत्वा तत्र तत्र हृदयालम्बनत्रिकसंधारणरसग्रहणसमस्तेन्द्रियतर्पणसन्धिसंश्लेषणाद्युदककर्म्मभिरनुगृह्णाति=उपकरोति । तदेवोत्तरत्रोच्यते ॥ १२९ ॥

अथावलम्बनकफस्य कर्माण्याह—

रसयुक्तात्मवीर्येण हृदयस्यावलम्बनम् ।
त्रिकसन्धारणं चापि विदधात्यवलम्बनः ॥ १३० ॥

*त्रिकं=शिरोबाहुद्वयसन्धिः ॥ १३० ॥

अथ रसनकफस्य कर्माण्याह—

उभावपि ततः सौम्यौ तिष्ठतश्चान्तिके यतः ।
यतो रसान्विजानीतो रसनारसनौ समौ ॥ १३१ ॥

*रसना=रसनेन्द्रियम्, रसनः=कण्ठस्थकफः ॥ १३१ ॥

अथ स्नेहनश्लेषणकफयोः कर्माण्याह—

स्नेहनः स्नेहदानेन समस्तेन्द्रियतर्पणः ।
श्लेषणः सर्वसन्धीनां संश्लेषं विदधात्यसौ ॥१३२॥

अथ धातुशब्दस्य निरुक्तिमाह—

एते सप्त स्वयं स्थित्वा देहं दधति यन्नृणाम् ।
रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः ॥ १३३ ॥

*धातव इति । धाधातोस्तुप्रत्ययः ॥ १३३ ॥

अथ धातूनां कर्म्माण्याह—

प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे ।
गर्भोत्पादश्च कर्माणि धातूनां कथितानि हि ॥१३४॥

तत्र रसशब्दस्य निरुक्तिमाह—

गत्यर्थो रसधातुर्यस्ततोऽभवदयं रसः ।
सद्रवं सकलं देहं रसतीति रसः स्मृतः' ॥ १३५ ॥

अथ रसस्य स्वरूपमाह—

सम्यक् पक्कस्य भुक्तस्य सारो निगदितो रसः ।

स तु द्रवः सितः शीतः स्वादुः स्निग्धश्चला भवेत् ॥१३६॥

*सारो यथा-गुडमधूकपुष्पबब्बूलत्वग्बदरीमूलादिभवः सारो मदिरा ॥ १३६ ॥

अथ रसस्य स्थानमाह--

सर्वदेहचरस्यापि रसस्य हृदयं स्थलम् ।
समानमरुता पूर्वं यदयं हृदये धृतः ॥ १३७ ॥

अथ रसस्य कर्म्माण्याह--

आरुह्य धमनीर्गत्वा धातून् सर्वानयं रसः ।
पुष्णाति तदनु स्वीयैर्व्याप्नोति च तनुं गुणैः ॥ १३८ ॥

*गुणैः = शीतस्निग्धपोषकत्वगुणैः ॥ १३८ ॥

मन्दवह्निविदग्धस्तु कटुर्वाऽम्लो भवेद्रसः ।
स कुर्य्याद्बहुलान् रोगान् विषकृत्यं करोत्यपि ॥ १३९ ॥

अथ रक्तस्य स्वरूपमाह--

यदा रसो यकृद्याति तत्र रञ्जकपित्ततः ।
रागं पाकं च संप्राप्य स भवेद्रक्तसंज्ञकः ॥ १४० ॥
रक्तं सर्वशरीरस्थं जीवस्याधारमुत्तमम् ।
स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत् ॥१४१॥

*जीवस्याधारमुत्तममिति । यत आह—
"जीवो वसति सर्वस्मिन्देहे तत्र विशेषतः ।
वीर्यें रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणात्" ॥ २६ ॥ इति

*वीर्यें रक्ते मले च शरीरारम्भके वाग्भटोक्तपरिमाणमिते शुद्धे जीवो-वसति न तु दुष्टे प्रवृद्धे च रक्तस्रावणोपदेशस्य वैयर्थ्यप्रसङ्गात् ॥२६॥

*पित्तवद्भवेद् = अम्लं भवेदित्यर्थः ॥ १४१ ॥

अथ रक्तस्य स्थानमाह—

यकृत् प्लीहा च रक्तस्य मुख्यस्थानन्तयोः स्थितम् ।
अन्यत्र संस्थितवतां रक्तानां पोषकं भवेत् ॥ १४२ ॥

अथ मांसस्य स्वरूपमाह—

शोणितं स्वाग्निना पक्वं वायुना च घनीकृतम् ।
तदेव मांसं जानीयात्तस्य भेदानपि ब्रुवे ॥ १४३ ॥

*शोणितमिति। शोणितस्थानगतत्वाद्रस एव शोणितसंज्ञां लभते। एवमग्रे रसस्यैव मांसादिव्यपदेशः॥ १४३॥

अथ मांसस्य पेशीमाह—

यथाऽर्थमूष्मणा युक्तो वायुः स्रोतांसि दारयेत्।
अनुप्रविश्य पिशितं पेशीर्विभजते तथा॥ १४४॥

*यथाऽर्थं=यथाप्रयोजनम्॥ १४४॥

अथ मांसपेशीनां संख्यामाह—

मांसपेश्यः समाख्याता नृणां पञ्च शतानि हि॥
तासां शतानि चत्वारि शाखासु कथितान्यथ॥ १४५॥
कोष्ठे षडुत्तरा षष्टिः कथिता मुनिपुङ्गवैः।
ग्रीवाया ऊर्ध्वगास्तास्तु चतुस्त्रिंशत् प्रकीर्त्तिताः॥१४६॥

ताः शाखागताः प्राह—

*एकैकस्यान्तु पादाङ्गुल्यां तिस्रस्तिस्रस्ताः पञ्चदश १५। पादाग्रे दश १०। पादोपरि कूर्चसन्निविष्टा दश १०। गुल्फतलयोर्दश १०। गुल्फजानुनोरन्तरे विंशतिः २०। जानुनि पञ्च ५। ऊरौ विंशतिः २०। वंक्षणे दश १०। एवमेकस्मिन् सक्थनि शतं १०० भवन्ति। एतेनेतरसक्थिबाहू च व्याख्यातौ। एतासां समष्टिश्चतुःशतम् ४००।

अथ कोष्ठगताः प्राह—

*गुदे तिस्रः ३। शेफस्येका १। सेवन्यामेका १। वृषणयोर्द्वे २। स्फिचोः पञ्च ५ पञ्च ५। वस्तिमूर्द्धनि द्वे २। उदरे पञ्च ५। नाभ्यामेका १। पृष्ठोर्ध्वसन्निविष्टा उभयतः पञ्च ५ पञ्च ५ दीर्घाः। पार्श्वयोः षट् ६। वक्षसि दश १०। अक्षकांसौ प्रतिसमन्तात् सप्त ७। अक्षकौ "अषुआ" इति लोके। अंसौ स्कन्धौ। हृदि द्वे २। यकृति द्वे २। प्लीहृ द्वे २। उण्डुके द्वे २। एतासां समष्टिः ६६ षट्षष्टिः॥

अथ ग्रीवोर्ध्वगाः प्राह—

*ग्रीवायाश्चतस्रः ४। हन्वोरष्टौ ८। एका काकलके कण्ठमणौ घण्टिकायामिति यावत्। गले एका १। तालुनि द्वे २। जिह्वायामेका १। ओष्ठयोर्द्वे २। नासायां द्वे २। नेत्रयोर्द्वे २। गण्डयोश्च तस्रः ४। कर्णयोर्द्वे २। ललाटे चतस्रः ४। शिरस्येका १। आसां समष्टिः ३४

चतुस्त्रिंशत् । एवं मांसपेश्यः पञ्च शतानि ५०० भवन्ति ॥१४५॥१४६॥

स्त्रीणामपि भवन्त्येताः किन्तु विंशतिरुत्तराः ।
गर्भाशये गर्भमार्गे योनौ च स्तनयोरपि ॥ १४७ ॥

*एताः पञ्च शतानि ५०० मांसपेश्यः । स्त्रीणामधिका २० विंशतिर्यथा—गर्भाशये तिस्रः ३ । गर्भच्छिद्रसंस्थिताः शुक्रार्त्तवप्रवेशिन्यस्तिस्रः ३ । योनावभ्यन्तरतो मुखाश्रिते प्रसृते द्वे २ । योनावेव बहिर्निर्गते स्रोतःपार्श्वद्वयश्रिते वर्त्तुले योनिकर्णिकेति यावत् द्वे २ । स्तनयोः पञ्च ५ पञ्च ५ । यौवने तासां वृद्धिर्भवति ॥ १४७ ॥

पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता मेहनमुष्कजाः ।
स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः ॥ १४८ ॥

*अस्यायमर्थः । पुंसां मेहनमुष्कयोश्च यास्तिस्रो मांसपेश्यः पूर्वमुक्तास्ताः स्त्रीणां मेहनमुष्काभावात् फलं गर्भाशयमावृत्य तिष्ठन्ति गयदासस्त्वाह—

स्त्रीणां मांसपेश्यस्त्रिभिर्हीनानि पञ्चशतानि ४९७ ।

तथा च भोजः—

पञ्च पेशीशतान्येव स्त्रीवर्ज्जं विद्धि भूमिप ! ।
अतश्च तिस्रो हीयन्ते स्त्रीणां शेफसि मुष्कयोः २७ इति ॥१४८॥

अथ मांसपेशीनां कर्माण्याह—

शिरास्नाय्वस्थिपर्वाणि सन्धयश्च शरीरिणाम् ।
पेशीभिः संवृतान्येव बलवन्ति भवन्ति हि ॥ १४९ ॥

अथ मेदसः स्वरूपमाह—

यन्मांसं स्वाग्निना पक्वं तन्मेद इति कथ्यते ।
तदतीव गुरु स्निग्धं बलकार्य्यतिबृंहणम् ॥ १५० ॥

अथ मेदसः स्थानमाह

मेदो हि सर्वभूतानामुदरेष्वास्थसंस्थितम् ।
अत एवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ॥ १५१ ॥

अथास्थ्नः स्वरूपमाह—

मेदो यत् स्वाग्निना पक्वं वायुना चातिशोषितम् ।
तदस्थिसंज्ञां लभते स सारः सर्वविग्रहे ॥ १५२ ॥

अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः ।
अस्थिसारैस्तथा देहा ध्रियन्ते देहिनो ध्रुवम् ॥ १५३ ॥
तस्माच्चिरविनष्टेषु त्वङ्मांसेषु शरीरिणाम् ।
अस्थीनि न विनश्यन्ति सारा एतानि सर्वथा ॥ १५४ ॥

अथास्थ्नां संख्यामाह-

शल्यतन्त्रेऽस्थिखण्डानां शतत्रयमुदाहृतम् ।
तान्येवात्र निगद्यन्ते तेषां स्थानानि यानि च ॥ १५५ ॥
सविंशतिशतं त्वस्थ्नां शाखासु कथितं बुधैः ।
पार्श्वयोः श्रोणिफलके वक्षःपृष्ठोदरेषु च ॥ १५६ ॥
जानीयाद्भिषगेतेषु शतं सप्तदशोत्तरम् ।
ग्रीवायामूर्ध्वगां विद्यादस्थ्नां षष्टिं त्रिसंयुताम् ॥ १५७ ॥

तानि शाखागतान्याह-

*एकैकस्यां पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश १५ । पादतले ५ पञ्चास्थिशलाकास्तदाधारभूतमेकमस्थि १ एवं षट् ६ । कूर्चे द्वे २ । गुल्फे द्वे २ । पार्ष्णावेकम् १ । जङ्घायां द्वे २ । जानुन्येकम् १ । ऊरावेकम् १ । एवं ३० त्रिंशदेकस्मिन् सक्थिनि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ ॥

अथ पार्श्वादिगतान्याह-

*पार्श्वयोः षट्त्रिंशद् ३६ एवमेकस्मिन् द्वितीयेऽप्येवम् ३६ । शिश्ने भगे वा एकम् १ । गुदे एकम् १ । नितम्बयोरेकैकम् २ । त्रिके एकम् १ । वक्षस्यष्टौ ८ । पृष्ठे त्रिंशत् ३० । अक्षकसंज्ञे द्वे २ ।

अथ ग्रीवोर्ध्वगतान्याह—

*ग्रीवायां नव ९ । नाड्यां चत्वारि ४ । हन्वोरेकैकम् २ । दन्ताद्वात्रिंशत् ३२ । नासायां त्रीणि ३ । तालुन्येकम् १ । गण्डयोरेकैकम् २ । कर्णयोरेकैकम् २ । भ्रुवोरेकैकम् २ । शिरसि षट् ६ ॥१५५-१५७॥

एतान्यस्थीनि पञ्चविधानि भवन्ति तानि यथा—

तरुणानि कपालानि रुचकानि भवन्ति हि ।
वलयानीति तानि स्युर्नलकानि च कानि चित् ॥ १५८ ॥
अक्षिकोशश्रुतिघ्राणग्रीवासु तरुणानि च ।

शिरःशङ्खकपोलेषु तात्वंसगोथजानुषु ।
कपालानि भवन्त्येषु दन्तेषु रुचकानि च ॥ १५८ ॥

*जानुनितम्बांसगण्डतालुशङ्खशिरःसु कपालानि । दशनास्तु रुचकाः ॥ १५८ ॥ १५९ ॥

पाष्र्ण्योः पार्श्वयुगे पृष्ठे वक्षोजठरपायुषु ।
पादयोर्वलयानि स्युर्नलकानि ब्रुवेऽधुना ॥ १६० ॥
हस्तपादाङ्गुलितले कूर्च्चे च मणिबन्धके ।
बाहुजङ्घाद्वये चापि जानीयान्नलकानि तु ॥ १६१ ॥

अथास्थ्नां प्रयोजनमाह—

मांसान्यन्त्राणि बद्धानि शिराभिः स्नायुभिस्तथा ।
अस्थीन्यालम्बनं कृत्वा न दीर्यन्ते पतन्ति च ॥ १६२ ॥

अथ मज्जस्वरूपमाह—

अस्थि यत् स्वाग्निना पक्वं तस्य सारो भवेद्घनः ।
यः स्वेदवत् पृथग्भूतः स मज्जेत्यभिधीयते ॥ १६३ ॥

अथ मज्जस्थानमाह—

स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तरे स्थितः ॥ १६४ ॥

अथ शुक्रस्योत्पत्तिमाह—

रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते ।
मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रस्य सम्भवः ॥ १६५ ॥

*सुश्रुतस्येति वचनेन शुक्रसम्भव उक्तः ॥ १६५ ॥

ननु "मासेन रसः शुक्रो भवति स्त्रीणाञ्चार्त्तवं भवती"ति सुश्रुतस्यैव वचनेन रसादेव शुक्रस्योत्पत्तिरुच्यते, तदेतत् कथं सङ्गच्छते ?

इममेव सन्देहं दूरीकर्त्तुमाहारादेर्गतिं परिणामञ्चाह—

यात्यामाशयमाहारः पूर्वं प्राणानिलेरितः ।
माधुर्य्यं फेनभावं च षड्रसोऽपि लभेत सः ॥ १६६ ॥

*आहार इत्यत्र "आह्रियते" इत्याहारः ।
"अकर्त्तरि च कारके संज्ञायामि"ति सूत्रेण कर्म्मणि घञ् ।

स च षड्विधः। तथा च—

आहार्य्यं षड्विधं भोज्यं भक्ष्यं चर्व्यन्तथैव च ॥ २८ ॥

लेह्यं चूष्यं तथा पेयं तदुदाहरणानि तु ।
भोज्यमोदनसूपादि भक्ष्यं मोदकमण्डकम् ॥ २९ ॥
चर्व्यं चिपिटधान्यादि रसालादि तु लेह्यते ।
चूष्यमाम्रफलेक्ष्वादि पीयते पानकं पयः ॥ ३० ॥

*आमाशयमाह चरकः—

"नाभिस्तनान्तरे जन्तोराहुरामाशयं बुधाः" ॥ ३१ ॥ इति ।

*अत्र विशेषमाह—

"नाभेर्वितस्तिमात्रं च कण्ठदेशात् षडङ्गुलम् ।
उरसस्तद्विजानीयाच्छेषे तु हृदयं मतम् ॥ ३२ ॥
उरो रक्ताशयस्तस्मादधःश्लेष्माशयः स्मृतः ।
आमाशयस्तु तदधस्तदधो दहनाशयः" इति ॥ ३३ ॥

*प्राणानिलेरित इति । हृदयाधिष्ठानेन प्राणनाम्ना वायुना मुखं-गतेनान्तः प्रवेशितः ।

तथा च सुश्रुतः—

यो वायुः प्राणनामाऽसौ मुखं गच्छति देहधृक् ।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते ॥ ३४ ॥

*क्लेदननामा कफः क्लेदयति क्लेदनात्संहतं भिनत्ति च ।

उक्तं च सुश्रुते—

क्लेदनः क्लेदयत्यन्नं संहतं च भिनत्त्यतः" इति ॥ ३५ ॥

*स आहारः षड्रसोऽप्यामाशये माधुर्यं लभते ।
आमाशयस्थस्य मधुरस्य कफस्य योगात् ।

उक्तञ्च श्लेष्मस्वरूपम्—

श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीतलस्तथा ।
तमोगुणाधिकः स्वादुर्विदग्धो लवणो भवेत् ।
फेनभावञ्च लभते जठरानलतेजसा । इति ॥ ३६ ॥

*यत आह वाग्भटः—

सन्धुक्षितः समानेन पचत्यामाशयस्थितम् ।
औदर्य्योऽग्निर्यथा बाह्यः स्थालीस्थं तोयतण्डुलम्' इति॥३७॥

*अथ स एवाहारः प्राणवायुना प्रेरितस्ततः किञ्चित् स्खलितः-पाचकाख्यपित्तोष्मणेषत्पक्वोऽम्लरसो भवति ।

*उक्तं च--

अथ पाचकपित्तेन विदग्धं चाम्लतां व्रजेत् ॥ ३८ ॥

*पाचकपित्तेन पाचकपित्तस्योष्मणा ॥ ३८ ॥

*ततः स एवाहारो नाभिमण्डलाधिष्ठानेन समाननाम्ना वायुना प्रेरितो ग्रहणीमभिनीयते ॥ १६६ ॥

अथ ग्रहणीलक्षणमाह-

षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता ।

आमपक्वाशयान्तःस्था ग्रहणी साऽभिधीयते ॥ १६७ ॥

*पित्तधरा=पाचकाख्यं पित्तं यदग्न्यधिष्ठानं तद्धारयति ॥१६७॥

तत्र ग्रहण्यामाशयपक्वाशयमध्यवर्त्तिपाचकाख्यपित्ताधिष्ठानेनाग्निनाऽऽहारः पच्यते स कटुश्च भवतीत्याह—

"ग्रहण्यां पच्यते कोष्ठे वह्निना जायते कटुः" इति ॥ १६८ ॥

*अयमर्थः । आहारो ग्रहण्यां कोष्ठवह्निना ग्रहणीस्थितपाचकपित्तेन वह्निना पच्यते पच्यमानः स ग्रहणीस्थितस्य कटुरसस्य योगात् कटुर्भवति ॥ १६८ ॥

एतदाहारपाके विशेषमाह-

शरीरं पाञ्चभौतिकम् । तत्र पञ्चसु भूतेषु पञ्चाग्नयस्तिष्ठन्ति ।

उक्तं च चरकेण—

भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।

पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यनु ॥१६९॥

*अत्रोष्मपदेनाग्निरुच्यते ॥ १६९ ॥

*आहारोऽपि पाञ्चभौतिकः । तत्र पाचकपित्तस्थेनाग्निनोत्तेजितेन शरीरवर्त्तिना भूभागाग्निना आहारवर्त्तिभूभागः पच्यते, पक्वो भूभागः स्वकीयान गुणानभिवर्धयति, एवं जलादिभागा अपि पच्यन्ते ।

तथा च सुश्रुते—

"पञ्चभूतात्मके देहे आहारः पाञ्चभौतिकः ।

विपक्वः पञ्चधा सम्यग् गुणान् स्वानभिवर्द्धयेद् ॥ इति ॥ १७० ॥

*गुणशब्देनात्र गुणिनः पृथिव्यादय उच्यन्ते । तेन गुणान् शरीरवर्त्तिनः पार्थिवादीन् भागानभिवर्द्धयेदित्यर्थः ॥ १७० ॥

एवमहोरात्रेण पक्व आहारो मिष्टः पटुश्च मधुरो भवति । अम्लस्त्वम्लो भवति । कटुस्तिक्तः कषायश्च कटुर्भवति ।

उक्तञ्च—

मिष्टः पटुश्च मधुरमम्लोऽम्लं पच्यते रसः ।
कटुतिक्तकषायाणां विपाको जायते कटुः" इति ॥ १७१ ॥

एवं विपक्वस्याहारस्य सारो निगदितो रसः, शेषो ग्रहणीस्थो मलद्रवः, मलद्रवस्य जलभागः शिराभिर्वस्तिं नीतो मूत्रं भवति ।

उक्तञ्च—

आहारस्य रसः सारः सारहीनो मलद्रवः ।
शिराभिस्तज्जलं नीतं वस्तिं मूत्रत्वमाप्नुयात ॥ १७२ ॥
शेषं किट्टञ्च यत्तस्य तत्पुरीषं निगद्यते ।
समानवायुना नीतं तत्तिष्ठति मलाशये ॥ १७३ ॥

तत्र मलाशयस्थेनापानवायुना प्रेरितं मूत्रं मेढ्रभगमार्गेण ; पुरीषं गुदमार्गेण शरीराद् बहिर्याति ।

उक्तञ्च—

मूत्रञ्चोपस्थमार्गेण पुरीषं गुदमार्गतः ।
अपानवायुना क्षिप्तं बहिर्याति शरीरतः ॥ १७४ ॥

*उपस्थः=शिश्नो भगश्च ॥१७४॥

रसस्तु समानवायुना प्रेरितो धमनीमार्गेण शरीरारम्भकस्य रसस्य स्थानं हृदयं गत्वा तेन सह मिश्रितो भवति ।

उक्तञ्च—

रसस्तु हृदयं याति समानमरुतेरितः ।
स तु व्यानेन विक्षिप्तः सर्वान् धातून् विवर्द्धयेत् ॥ १७५ ॥
केदारेषु यथा कुल्याः पुष्णन्ति विविधौषधीः ।
तथा कलेवरे धातून् सर्वान् वर्द्धयते रसः ॥ १७६ ॥

रसस्तु तत्र तत्र त्रिधा विभज्यते । उक्तञ्च चरके—

स्थूलः सूक्ष्मस्तन्मलश्च तत्र तत्र त्रिधा रसः ।
स्वं स्थूलोंऽशः परं सूक्ष्मस्तन्मलो याति तन्मलम् ॥ १६७ ॥

*अयमर्थः—स्थूलोंऽशः स्वं याति यथास्थितस्तिष्ठति, सूक्ष्मस्त्वंशः-परं द्वितीयं धातुं याति, तन्मलो = रसादिमलः, तन्मलं=शरीरारम्भकं-तत्तद्धातुमलं यातीत्यर्थः ॥ १६७ ॥

यथा लौकिकाग्निनेक्षुरसः पच्यते तथा शरीरारम्भकस्य रसस्याग्निनाऽऽहाररसः पच्यते । पच्यमानः स पञ्चाहोरात्रात् सार्द्धदण्डमेकञ्च यावत् प्राक्तनरसधातावेव तिष्ठति ।

उक्तं च सुश्रुते—

"स खलु रसस्त्रीणि त्रीणि कलासहस्राणि पञ्चदश कला एकैकस्मिन् धातावुपतिष्ठते" इति । अत्र कलानां विंशतिर्मुहूर्तः स च दण्डद्वयात्मक इत्यभिप्रेत्याह—

तथा च भोजः—

धातौ रसादौ मज्जान्ते प्रत्येकं क्रमतो रसः ।
अहोरात्रात्स्वयं पञ्च सार्द्धं दण्डं च तिष्ठति ॥ १७८ ॥

*प्रत्येकमेकैकस्मिन्नित्यर्थः ॥ १७८ ॥

ततो यथा पच्यमानादिक्षुरसान्मलो निर्गच्छति तथा पच्यमानादाहाररसान्मलो निर्गच्छति स कफः ।

उक्तं च सुश्रुते—

कफः पित्तं मलः खेषु प्रस्वेदो नखरोम च ।
नेत्रविट् त्वक्षु च स्नेहो धातूनां क्रमतो मलाः ॥ ३६ ॥

खेषु मलः = कर्णादिस्रोतोमलः ॥ ३६ ॥

स च कफः प्राणानिलप्रेरितो धमनीमार्गेण शरीरारम्भकं क्लेदनाख्यं कफं गत्वा पुष्णाति, ततः सारभूतस्याहाररसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च । तत्र स्थूलो भागः शरीरारम्भकं रसं पोषयति सकलशरीराधिष्ठानेन व्यानवायुना प्रेरितो धमनीभिः सञ्चरन् पोषणस्नेहनजठरानलोष्मकृतसन्तापनिवारणादिभिर्गुणैः सकलं शरीरं पुष्णाति । ततः-सूक्ष्मो भागः प्राणवायुना प्रेरितो धमनीमार्गेण शरीरारम्भकस्य रक्त-

स्य स्थानं यकृत्प्लीहरूपं गत्वा तेन सह मिलितो भवति। ततः प्राक्तनस्य रक्तस्याग्निना पुनः पच्यमानः पञ्चाहोरात्रात् सार्द्धदण्डञ्च यावत् प्राक्तनरक्तधातावेव तिष्ठति। ततो यथा अग्निना पुनःपुनः पच्यमानादिक्षुविकाराद्वारं वारं मलं निर्गच्छति तथा पुनः पुनः पच्यमानादाहाररसात् प्रतिवारं मलं निर्गच्छति। तत्र रक्ताग्निना पच्यमानान्मलं पित्तं निर्गच्छति। तच्च पित्तं समानवायुना प्रेरितं धमनीमार्गेण शरीरारम्भकं पाचकाख्यं पित्त गत्वा पुष्णाति।

ततः सारभूतस्याहाररसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च, स्थूलो भागो रञ्जकाख्येन पित्तेन रक्तीकृतः शरीरारम्भकं रक्तं पोषयन् व्यानवायुना प्रेरितो धमनीभिः सञ्चरन् सकलशरीरगतानि रुधिराणि पुष्णाति। ततः सूक्ष्मो भागो व्यानवायुना प्रेरितो धमनीभिः शिराभिश्च शरीरारम्भकाणि मांसानि याति। ततो मांसाग्निना पुनः पच्यमानः पञ्चाहोरात्रात सार्द्धदण्डञ्च यावन्मांसेष्वेव तिष्ठति। ततः पच्यमानात्तस्मान्मलं निर्गच्छति। तद्व्यानवायुना क्षिप्तं कर्णावागत्य कर्णविड् भवति।

ततः सारभूतस्य रसस्य द्वौ भागौ भवतः। स्थूलः सूक्ष्मश्च। ततः-स्थूलो भागो मांसानि पुष्णाति। ततः सूक्ष्मो भागो व्यानवायुना प्रेरितो धमनीभिः शरीरारम्भकस्य मेदसः स्थानमुदरं याति। ततो-मेदसोऽग्निना पुनः पच्यमानः पञ्चाहोरात्रात सार्द्धदण्डं च यावन्मेदस्येव तिष्ठति। ततः पच्यमानात् तस्मान्मलो निर्गच्छति प्रस्वेदरूपः। स च शीतः स्रोतस्येव तिष्ठति शरीरोष्मणा तप्तश्चेत्तदा व्यानवायुना प्रेरितः शिरामार्गलोमकूपेभ्यो बहिर्याति। "जिह्वादन्तकक्षामेढ्रादिमलञ्च मेदोमलमि"त्येके।

ततः सारभूतरसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च, तत्र स्थूलो-भागो मेदः पुष्णाति, उदरे तिष्ठन् व्यानवायुना प्रेरितः स्रोतोमार्गैः-सूक्ष्मास्थिस्थितान्यपि मेदांसि पुष्णाति। सूक्ष्मो भागो व्यानवायुना प्रेरितो धमनीभिः शिराभिश्च शरीरारम्भकाण्यस्थीनि याति ततो-ऽस्थ्याग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डञ्च यावदस्थि-

ष्येव तिष्ठति । ततः पच्यमानात् तस्मान्मलो निर्गच्छति । स च व्यानवायुना प्रेरितः शिरामार्गैर्गत्वाऽङ्गुलिषु नखास्तनौ लोमानि भवन्ति।

ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च । तत्र स्थूलो भागोऽस्थीनि पुष्णाति ततः सूक्ष्मो भागो व्यानवायुना प्रेरितः स्रोतोमार्गैर्मज्जस्थानानि स्थूलास्थ्यभ्यन्तराणि याति । ततो मज्जाग्निना पुनः पच्यमानः पञ्चाहोरात्रात् सार्द्धदण्डञ्च यावन्मज्जन्येव तिष्ठति, ततः पच्यमानात्तस्मान्मलं निर्गच्छति । तच्च व्यानवायुना प्रेरितं शिरामार्गैर्नयनयोरागत्य नेत्रविट् त्वक्षु स्नेहश्च भवति ।

ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च, तत्र स्थूलो भागो मज्जानं पुष्णाति । ततः सूक्ष्मो भागो व्यानवायुना प्रेरितोधमनीभिः शिराभिश्च शुक्रस्य स्थानं सकलं शरीरं गत्वा शरीरारम्भकेण शुक्रेण सह मिश्रितो भवति । ततः शुक्रस्याग्निना पुनः पच्यते पच्यमाने तस्मिन्मलं नास्ति स हि सहस्रधा ध्मातसुवर्णवद् । इत्युत्तरत्रोपदिश्यते—

स्वाग्निभिः पच्यमानेषु मज्जान्तेषु रसादिषु ।
षट्सु धातुषु जायन्ते मलानि मुनयो जगुः ॥ १७९ ॥
यथा सहस्रधा ध्माते न मलं किल काञ्चने ।
तथा रसे मुहुः पक्वे न मलं शुक्रताङ्गते ॥ १८० ॥

ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च । तत्र स्थूलो भागः शरीरारम्भकं शुक्रं याति, सूक्ष्मः स्नेहभाग ओजस्तस्य लक्षणमाह—

ओजः सर्वशरीरस्थं स्निग्धं शीतं स्थिरं सितम् ।
सोमात्मकं शरीरस्य बलपुष्टिकरं मतम् ॥ १८१ ॥

*बलं=चेष्टापाटवम् ।

तथा च—

"चेष्टासु पाटवं यत्तु बलं तदभिधीयते ।"

यत्तु सुश्रुते—

"रसादीनां शुक्रान्तानां धातूनां यत्परं तेजस्तत्खलु ओजस्तदेव ब-

लमि"ति । तेजस्तेजोद्रवः । अत्रायमभिप्रायः—यस्माद्रसादोजो भवति स रसः सर्वधातुस्थानगतत्वात्तत्तद्धातुवन्मन्यत इति । सर्वधातूनां-स्नेहमोजः, क्षीरे घृतमिव । तदेव बलमिति । तत्कार्यकारणयोरभेदो-पचाराद् । अभेदकथनञ्च चिकित्सैक्यार्थम् ॥ १८१ ॥

अन्यच्च—

गुरु शीतं मृदु स्निग्धं सान्द्रं स्वादु स्थिरं तथा ।
प्रसन्नं पिच्छिलं सूक्ष्ममोजो दशगुणं स्मृतम् ॥ १८२ ॥

चरके तु—

अष्टबिन्दुप्रमाणं तदीषद्रक्तं सपीतकम् ।
अग्नीषेमात्मकत्वेन द्विरूपं वर्णितन्तु तत् ॥ १८३ ॥

वाग्भटश्च—

ओजश्च तेजो धातूनां शुक्रान्तानां परं स्मृतम् ।
हृदयस्थमपि व्यापि देहस्थितिनिबन्धनम् ॥ १८४ ॥
यस्य प्रवृद्धौ देहस्य तुष्टिपुष्टिबलोदयाः ।
यन्नाशे नियतो नाशो यस्मिंस्तिष्ठति जीवनम् ॥ १८५ ॥
निष्पद्यन्ते यतो भावा विविधा देहसंश्रयाः ।
उत्साहप्रतिभाधैर्य्यलावण्यसुकुमारताः ॥ १८६ ॥

ततः स्थूलो भागो रसो मासेन पुंसां शुक्रं स्त्रीणान्त्वार्त्तवं शुक्रञ्च भवति ।

उक्तञ्च सुश्रुते—

"एवं मासेन रसः शुक्रो भवति स्त्रीणामार्त्तवञ्चे"ति । चकारात् स्त्रीणामपि शुक्रं भवति ।

अत एवोक्तं सुश्रुते—

योषितोऽपि स्रवत्येव शुक्रं पुंसः समागमे ।
तत्र गर्भस्य किञ्चित्त करोतीति न चिन्त्यते ॥ १८७ ॥

*गर्भस्य शुद्धस्य । विकृतस्य तु गर्भस्य कारणं तदपि भवति ।

यत उक्तम्—

"यदा नार्यावुपेयातां वृषस्यन्त्यौ कथञ्चन ।
मुञ्चन्त्यौ शुक्रमन्योऽन्यमनस्थिस्तत्र जायते"॥४०॥इति १८७॥

एवञ्च—

स्त्रीणां गर्भोपयोगि स्यादार्त्तवं सर्वसम्मतम् ।
तासामपि बलं वर्णं शुक्रं पुष्टिं करोति हि ॥ १८८ ॥

*एतेन स्त्रीणां सप्तमो धातुरार्त्तवं शुक्रमष्टममिति बोधितम् । आशयाधिक्यवत् ॥ १८८ ॥

एवं च—

रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते ।
मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रस्य सम्भवः ॥ १८९ ॥

*एवं रस एव "केदारकुल्या" न्यायेन सर्वान् धातून् पूरयन् मासेन नवदण्डोत्तरेण शुक्रमार्त्तवं भवतीति सिद्धान्तः। एवं सति रसाद्रक्तमित्यादि सङ्गतमेव । ततो मांसं=ततो रक्तोत्पत्तेरनन्तरं मांसं जायते रसादेवेत्यर्थः। मांसान्मेदः प्रजायत इति । मांसादनन्तरं मेदः प्रजायते रसादेवेत्यर्थः। मेदसोऽस्थि जायते, रसादेवेत्यर्थः। एवं ततो मज्जा जायते, रसादेवेत्यर्थः । ततः शुद्धं शुक्रं रसादेव सम्भवतीत्यर्थः ॥ १८९ ॥

रसः शरीरे त्रिधा सञ्चरतीत्याह—

रसः शरीरे शब्दार्चिर्जलसन्तानवत् त्रिधा ।
सञ्चरत्यनुरूपोऽयं नित्यमेव हि देहिनाम् ॥ १९० ॥

*अस्यायमभिप्रायः। पुरुषास्तीक्ष्णाग्नयो मध्यमाग्नयो मन्दाग्नयश्च भवन्ति, तत्र तीक्ष्णाग्नीनां स रसः शब्दसन्तानवच्छीघ्रं सञ्चरति, मध्यमाग्नीनामर्चिःसन्तानवन्मध्यवेगेन चरति, मन्दाग्नीनां जलसन्तानवन्मन्दं चरति । तेन मासेन रसाच्छुक्रं भवतीति, यदुक्तं तन्मध्यमाग्नीनधिकृत्योक्तं, दीप्ताग्नीनान्तु रसः किञ्चिन्न्यूनेन मासेन शुक्रं भवति, मन्दाग्नेः किञ्चिदधिकेन मासेनेति सिद्धान्तः ॥ १९० ॥

तर्हि वाजीकरिणीनामोषधीनां किं प्रयोजनमित्याह—

वाजीकरिण्य ओषध्यः स्वप्रभावगुणोच्छ्रयात् ।
विरेचयन्ति ताः शुक्रं विरेकिद्रव्यवन्नृणाम् ॥ १९१ ॥

*वाजीकरिण्यः— याभिरोषधीभिः पुरुषः शुक्राधिक्यात स्त्रीषु वाजिवत् सामर्थ्यं प्राप्नोति ता वाजीकरिण्यः, स्वप्रभावगुणोच्छ्रयात्=

तत्र काश्चिद्दोषध्यः स्वप्रभावाधिक्यात्, काश्चित् स्वगुणाधिक्यात्, काश्चित् स्वप्रभावगुणाधिक्यात्। तत्र सङ्कल्पपादलेपविशिष्टकान्तास्पर्शादयः स्वप्रभावाधिक्यात् शुक्रं विरेचयन्ति। घृतक्षीरादयः स्वगुणाधिक्यात्=स्निग्धत्वाधिक्याद्, माषादयः स्वप्रभावस्निग्धत्वादिगुणाधिक्यात्। वाजीकरिण्य इति बहुवचनमाद्यर्थानुवर्त्तनम्। बल्यबृंहणजीवनीयगणादयः, तद्वद् बोद्धव्याः। विरेचयन्ति=स्वप्रभावगुणाधिक्याच्छीघ्रमेव रसाद्युत्पादनपूर्वकं शुक्रं जनयित्वा प्रवर्त्तयन्ति॥ १८१॥

यत आह—

दुग्धं माषाश्च भल्लातफलमज्जाऽऽमलानि च।
जनकानि निगद्यन्ते रेचनानि च रेतसः॥ १८२॥

ननु बालानां कथं शुक्रं न दृश्यत इत्याह—

बालानां शुक्रमस्त्येव किन्तु सौक्ष्म्यान्न दृश्यते।
पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते॥ १८३॥
तेषां तदेव तारुण्ये पुष्टत्वाद्व्यक्तिमेति हि।
कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा॥ १८४॥
रोमराज्यादयः पुंसां नारीणामपि यौवने।
जायतेऽत्र च यो भेदो ज्ञेयो व्याख्यानतः स च॥ १८५॥

*व्याख्यानं यथा-पुंसां रोमराजीश्मश्रुप्रभृतयः। नारीणान्तु रोमराजीस्तनस्तन्यार्त्तवप्रभृतयः॥ १८५॥

ननु अन्नरसो वृद्धस्य धातुवृद्धिं कथं न करोतीत्याह—

वार्द्धके वर्द्धमानेन वायुना रसशोषणात्।
न तथा धातुवृद्धिः स्यात्ततस्तत्रानिलं जयेत्॥ १८६॥

अथ शुक्रस्य स्वरूपमाह—

शुक्रं सौम्यं सितं स्निग्धं बलपुष्टिकरं स्मृतम्।
गर्भबीजं वपुःसारो जीवस्याश्रय उत्तमः॥ १८७॥

जीवस्याश्रय उत्तम इत्यत आह—

जीवो वसति सर्वस्मिन्देहे तत्र विशेषतः।
वीर्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणात्॥ १८८॥

अथ गर्भसञ्जननशुक्रस्य लक्षणमाह —

स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च ।
शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभञ्च तत् ॥ १९९ ॥

अथ शुक्रस्य स्थानमाह —

यथा पयसि सर्पिस्तु गूढश्चेक्षौ रसो यथा ।
एवं हि सकले काये शुक्रं तिष्ठति देहिनाम् ॥ २०० ॥

*अत्र सर्पिर्दृष्टान्तो बहुशुक्रेऽल्पमथनेन सर्पिःशुक्रयोर्लाभात् । इ-क्षुरसदृष्टान्तस्तु स्वल्पशुक्रे पुंस्यतिपीडनेनेक्षुरसशुक्रयोर्लाभात् ॥२००॥

अथ शुक्रस्य क्षरणमार्गमाह —

द्व्यङ्गुले दक्षिणे पार्श्वे बस्तिद्वारस्य चाप्यधः ।
मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्त्तते ॥ २०१ ॥

*वृद्धवाग्भटोऽप्याह —

"सप्तमी शुक्रधरा द्व्यंगुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधो-मूत्रमार्गमाश्रिता सकलशरीरव्यापिनी शुक्रं प्रवर्त्तयती"ति । सप्तमी कला ॥ २०१ ॥

अथ शुक्रक्षरणकारणमाह —

कृत्स्नदेहस्थितं शुक्रं प्रसन्नमनसस्तथा ।
स्त्रीषु व्यायच्छतश्चापि हर्षात्तत् सम्प्रवर्त्तते ॥ २०२ ॥

*स्त्रीषु व्यायच्छतः = स्त्रीसुरतरूपं व्यायामं कुर्वतः ॥ २०२ ॥

अन्यच्च —

शुक्रं कामेन कामिन्या दर्शनात् स्पर्शनादपि ।
शब्दसंश्रवणाद् ध्यानात् संयोगाच्च प्रवर्त्तते ॥ २०३ ॥

अथार्त्तवस्य स्वरूपमाह —

स्त्रीणां रस एव मासेनार्त्तवं भवतीत्युक्त्वा पुनराह सुश्रुत एव—

रसादेव रजः स्त्रीणां मासि मासि त्र्यहं स्रवेत् ।
तद्वर्षाद् द्वादशादूर्ध्वं याति पञ्चाशतः क्षयम् ॥ २०४ ॥
मासेनोपचितं काले धमनीभ्यस्तदार्त्तवम् ।
ईषत्कृष्णविवर्णं च वायुर्योनिमुखं नयेत् ॥ २०५ ॥

अथ गर्भग्रहणयोग्यस्यार्त्तवस्य लक्षणमाह—

शशासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमम् ।
तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत् ॥ २०६ ॥

*आर्त्तवस्य वर्णद्वयाभिधानं वातादिप्रकृतिभेदेन वर्णभेदात् । "यद्वासो न विरञ्जयेत् ।" यद्वासोलग्नं प्रक्षालितं तद्वासस्त्यजति न तु विकृतरक्तं कुर्य्यात । ऋतुः=स्त्रीणां रजोदर्शनात् षोडशनिशाः, तत्र भवमार्त्तवम् , गृहीतगर्भाणां स्त्रीणामार्त्तववहानां स्रोतसां गर्भेणाव-रोधादार्त्तवं न स्रवति । किन्तु तदेवाधःप्रतिहतमूर्ध्वमागतमुपचीयमा-नमपरा भवति । अपरा तु "खीवर" इति लोके । शेषं चोर्ध्वतरमागतं पयोधरौ याति, तस्माद् गर्भिण्यः पीवरपयोधरा भवन्ति ॥ २०६ ॥

अथ धातुष्वतिरिक्तान् गुणानाह—

अतिरिक्ता गुणा रक्ते वह्नेर्मांसे तु पार्थिवाः ।
मेदस्यपां भुवश्चास्थ्नि पृथिव्यनिलतेजसाम् ॥ २०७ ॥
मज्ज्ञि शुक्रे च सोमस्य मूत्रे च शिखिनो गुणाः ।
भुवस्तथाऽऽर्त्तवे त्वग्ने रसे क्षीरे तथाऽम्भसः ॥ २०८ ॥

अथ धातूनां मलानाह—

कफः पित्तं मलः खेषु प्रस्वेदो नखलोम च ।
नेत्रविट् त्वक्षु च स्नेहो धातूनां क्रमतो मलाः ॥२०९॥

*"नेत्रजिह्वाकपोलानां जलञ्च रसजं मलम्" इत्येके ।
खेषु मलः=कर्णादिस्रोतःसु मलः,
"रसनादन्तकक्षामेढ्रादिमलमपि मेदोमलम्" इत्येके ।
नेत्रविट् त्वचां स्नेहश्च मज्जमलः, शुक्रस्य मलमेव नास्ति स-हस्रधा ध्मातसुवर्णस्येव ॥ २०९ ॥

अथोपधातूनाह—

वनितानां प्रसूतानां धमनीभ्यां स्तनौ गतात् ।
रसादेव हि जायेत स्तन्यं स्तनयुगाशयम् ॥ २१० ॥
शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिता ।
मेदसस्ताप्यमानस्य स्नेहो वा कथिता वसा ॥ २११ ॥

शार्ङ्गधरे तु —

स्तन्यं रजो वसा स्वेदो दन्ताः केशास्तथैव च ।
ओजश्च सप्तधातूनां क्रमात् सप्तोपधातवः ॥ २१२ ॥

अथाशयानाह —

उरो रक्ताशयस्तस्मादधः श्लेष्माशयः स्मृतः ।
आमाशयस्तु तदधस्तल्लिङ्गं चरकोऽवदत् ॥ २१३ ॥

*तद्यथा —

"नाभिस्तनान्तरं जन्तोराहुरामाशयं बुधाः" इति ॥ २१३ ॥
आमाशयादधः पक्वाशयादूर्ध्वन्तु या कला ।
ग्रहणीनामिका सैव कथितः पाचकाशयः ॥ २१४ ॥
ऊर्ध्वमग्न्याशयो नाभेर्मध्यभागे व्यवस्थितः ।
तस्योपरि तिलं ज्ञेयं तदधः पवनाशयः ॥ २१५ ॥
पक्वाशयस्तु तदधः स एव तु मलाशयः ।
तदधः कथितो वस्तिः स हि मूत्राशयो मतः ॥ २१६ ॥

आशयानुक्रमस्तु वाग्भटेनोक्तः स यथा —

कफाऽऽमपित्तवातानामाशया मलमूत्रयोः ।
पुरुषेभ्योऽधिकाश्चान्ये नारीणामाशयास्त्रयः ॥ २१७ ॥
धरा गर्भाशयः प्रोक्तः पित्तपक्वाशयान्तरे ।
स्तनौ प्रवृद्धौ तावेव बुधैः स्तन्याशयौ मतौ ॥ २१८ ॥

अथ कलास्वरूपमाह —

स्नायुभिश्च प्रतिच्छन्नान् सन्ततांश्च जरायुणा ।
श्लेष्मणा वेष्टितांश्चापि कलाभागांस्तु तान्विदुः ॥ २१९ ॥
धात्वाशयान्तरे धातोर्यः क्लेदस्त्वधितिष्ठति ।
देहोष्मणाऽभिपक्वश्च सा कलेत्यभिधीयते ॥ २२० ॥

ताः सप्त

आद्या मांसधरा प्रोक्ता द्वितीया रक्तधारिणी ।
मेदोधरा तृतीया तु चतुर्थी श्लेष्मधारिणी ॥ २२१ ॥
पञ्चमी तु मलं धत्ते षष्ठी पित्तधरा मता ।
रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः ॥ २२२ ॥

अथ मर्म्माण्याह –

सन्निपातः शिरास्नायुसन्धिमांसास्थिसम्भवः ।
मर्म्माणि तेषु तिष्ठन्ति प्राणाः खलु विशेषतः ॥ २२३ ॥

तेषां सङ्ख्याः स्थानं चाह –

सप्तोत्तरशतं सन्ति देहे मर्म्माणि देहिनाम् ।
तान्येकादश मांसे स्युरष्टावस्थिषु सन्ति हि ॥ २२४ ॥
सन्धीनां विंशतिस्तानि स्नायूनां सप्तविंशतिः ।
चत्वारिंशत्तथैकञ्च शिरामर्म्माणि तत्र तु ॥ २२५ ॥
द्वाविंशतिः सक्थियुगे तावत्येव भुजद्वये ।
द्वादशोरसि कुक्षौ च पृष्ठदेशे चतुर्दश ॥ २२६ ॥
ग्रीवायामूर्ध्वभागे तु सप्तत्रिंशन्मतानि हि ।
मर्म्माणि तानि सन्तीह पञ्चधा च भवन्ति हि ॥ २२७ ॥

तान्याह –

सद्यःप्राणहराणि स्युर्मर्म्माण्येकोनविंशतिः ।
मर्म्मदेशास्त्रयस्त्रिंशत् स्युः कालान्तरमारकाः ॥२२८ ॥
चत्वारिंशच्च चत्वारि वैकल्यं जनयन्ति हि ।
मर्माष्टकं रुजाकारि विशल्यघ्नं त्रिकं मतम् ॥ २२९ ॥

तत्र सद्योमारकाणि मर्माण्याह –

शृङ्गाटकान्यधिपतिः शङ्खौ कण्ठशिरा गुदम् ।
हृदयं वस्तिनाभी च सद्यो घ्नन्ति हतानि चेत् ॥ २३० ॥

*शृङ्गाटकानि–घ्राणश्रोत्राक्षिजिह्वासन्तर्पकाणां शिरामुखानां शिरसो मध्ये संयोगस्थानं, तानि चत्वारि शिरामर्म्माणि चतुरङ्गुलप्रमाणानि हतानि घ्नन्ति=सद्योमारकाणि भवन्ति ।

*अधिपतिः––मस्तकस्याभ्यन्तरे शिरासन्धिसन्निपात उपरिष्टाद्रोमावर्त्तः, स एकः, सन्धिमर्म्मंदमर्द्धाङ्गुलप्रमाणं सद्योमारकम् ।

*शंखौ—भ्रुवोरन्तोपरि कर्णललाटयोर्मध्ये तौ द्वौ, अस्थिमर्म्मणी सार्द्धाङ्गुले सद्योमारके ।

*कण्ठशिराः, शिरामातृकाः-ग्रीवाया उभयपार्श्वयोश्चतस्रश्चतस्रः-शिरास्ता अष्टौ शिरामर्म्माणि चतुरङ्गुलानि सद्योमारकाणि ॥

*गुदमर्म-गुदस्प्रसिद्धमेकं मांसमर्म चतुरङ्गलं सद्योमारकम् ।

*हृदयं-स्तनयोर्मध्यमधिष्ठायोरस्यामाशयद्वारं सत्त्वरजस्तमसामधिष्ठानं हृदयं नामैकं शिरामर्मेदं चतुरङ्गलं सद्योमारकम् ।

*वस्तिमर्म –

वस्तिर्नाभिपृष्ठकटीगुदवङ्क्षणशेफसाम् ।
मध्ये वस्तिस्तनुत्वक् च एकद्वारो ह्यधोमुखः ॥ ४१ ॥

*स्नायुमर्मेदश्चतुरङ्गुलं सद्योमारकम्

*नाभिमर्म—नाभिः प्रसिद्धा, शिरामर्मेदश्चतुरङ्गलं सद्योमारकम् ॥ २३० ॥

अथ कालान्तरप्राणहराणि मर्माण्याह –

वक्षोमर्माणि सीमन्ततलक्षिप्रेन्द्रवस्तयः ।
वृहत्यौ पार्श्वयोः सन्धी कटीकतरुणे च ये ।
नितम्बाविति चैतानि कालान्तरहराणि तु ॥ २३१ ॥

*वक्षोमर्माणि—स्तनमूलस्तनरोहितापलापापस्तम्बाः ।

तत्र स्तनमूले—स्तनयोरधस्ताद् द्व्यङ्गुलं यावद् स्तनमूले नाम द्वे शिरामर्मणी, तत्र कफपूर्णकोष्ठतया कालान्तरमारके ।

*स्तनरोहिते-स्तनयोरुपरि द्व्यङ्गुलं यावद् । द्वे मांसमर्मणी रक्तपूरितकोष्ठतया कालान्तरमारके ।

*अपलापौ—अंसकूटयोरधस्तात् पार्श्वयोरुपरि द्वे शिरामर्मणी । अर्द्धाङ्गुले रक्तेन पूयताङ्गतेन कालान्तरमारके ।

*अपस्तम्बौ—उरस उभयतो नाड्यौ वातवहे शिरामर्म्मणी । अर्द्धाङ्गुले वातपूर्णकोष्ठतया कासश्वासाभ्यां च कालान्तरमारके ।

*सीमन्ताः—शिरसि पञ्च सन्धयः सन्धिमर्माणि चतुरङ्गुलानि, उन्मादभयचित्तविनाशः कालान्तरमारकाणि ।

*तलानि—मध्याङ्गुलिमनुक्रम्य हस्तस्य मध्यन्तलमेवमपरस्य हस्तस्य, पादयोश्चैवं चत्वारि तलानि मांसमर्माणि द्व्यङ्गुलानि रुजाभिः कालान्तरमारकाणि ।

*क्षिप्राणि—अङ्गुष्ठाङ्गल्योर्मध्यं क्षिप्रम् । तच्च हस्तयोर्द्वे पादयोर्द्वे

चैवं चत्वारि स्नायुमर्माण्यर्द्धाङ्गुलान्याक्षेपकेण कालान्तरमारकाणि ।

*इन्द्रवस्तयः—प्रकोष्ठयोर्मध्ये द्वौ जङ्घयोर्मध्ये द्वौ । एवं चत्वारि मांसमर्माणि द्व्यङ्गुलानि शोणितक्षयेण कालान्तरमारकाणि ।

*बृहत्यौ—स्तनमूलादुभयतः पृष्ठवंशं यावद् । शिरामर्मणी अर्द्धाङ्गुले शोणितातिप्रवृत्तिनिमित्तैरुपद्रवैः कालान्तरमारके ।

*पार्श्वसन्धी—जघनपार्श्वयोः सन्धी, शिरामर्मणी अर्द्धाङ्गुले शोणितपूर्णकोष्ठतया कालान्तरमारके ।

*कटीकतरुणे—त्रिकसन्निधाने उभयतः श्रोणिकाण्डं लक्ष्यीकृत्यास्थिस्थिते अस्थिमर्मणी अर्द्धाङ्गुले शोणितक्षयात्पाण्डुविवर्णरूपं कृत्वा कालान्तरमारके ।

*नितम्बौ-प्रसिद्धौ । द्वे अस्थिमर्मणी अर्द्धाङ्गुलावधःकायशोषेण दौर्बल्येन च कालान्तरमारके ॥ २३१ ॥

अथ वैकल्यकराणि मर्माण्याह—

लोहिताक्षाणिजानूर्वीकूर्चा विटपकूर्पराः ।
कुकुन्दरे कक्षधरे विधुरे सकृकाटिके ॥ २३२ ॥
अंसांसफलकापाङ्गा नीले मन्ये फणे तथा ।
वैकल्यकरणान्याहुरावर्त्तौ द्वौ तथैव च ॥ २३३ ॥

*लोहिताक्षाणि—ऊर्व्या ऊर्ध्वमधो वङ्क्षणसन्धेर्लोहिताक्षम् , ते च द्वे बाह्वोर्द्वे ऊर्व्वोरेवं तानि चत्वारि शिरामर्म्माण्यर्द्धाङ्गुलानि वैकल्यकराणि । तत्र शोणितक्षयेण पक्षाघातः सक्थिसादो वा ।

*आणयः—जानुन ऊर्ध्वमुभयोः पार्श्वयोस्त्र्यङ्गुला एकस्मिन् जानुनि द्वे अपरस्मिन्द्वे एवञ्चतस्रः, स्नायुमर्माण्यर्द्धाङ्गुलानि वैकल्यकराणि, तत्र शोथाभिवृद्धिः सक्थिस्तम्भश्च ।

*जानुनी-जङ्घोर्वोः सन्धी सन्धिमर्मणी द्व्यङ्गुले वैकल्यकरे तत्र खञ्जता ।

*ऊर्व्यः-द्वे ऊर्व्वोर्मध्ये द्वे प्रगण्डयोर्मध्ये एवं चतस्रः, शिरामर्माण्येकाङ्गुल्यो वैकल्यकारिण्यस्तत्र शोणितक्षयात्सक्थिबाह्वोः शोषः ।

*कूर्चाः—पादयोरङ्गुष्ठाङ्गुल्योर्मध्ये तयोरूर्ध्वमधश्च, एवं चत्वारि स्नायुमर्माणि वैकल्यकराणि, तत्र पादयोर्भ्रमणवेपने भवतः ।

*विटपे-द्वे वङ्क्षणवृषणयोर्मध्ये स्नायुमर्मणी एकाङ्गुले वैकल्यकरे च तत्र षाण्ढ्यमल्पशुक्रता वा ।

*कूर्परौ-कफोणिजौ द्वौ सन्धिमर्मणी द्व्यङ्गुलौ वैकल्यकरौ तत्र बाहुमध्ये सङ्कोचः ।

*कुकुन्दरे-नितम्बकूपकौ द्वे सन्धिमर्मणी अर्द्धाङ्गुले वैकल्यकरे, तत्र स्पर्शाज्ञानमधःकायस्य चेष्टोपघातश्च ।

*कक्षधरे—वक्षःकक्षयोर्मध्ये द्वे स्नायुमर्मणी एकाङ्गुले वैकल्यकरे, तत्र पक्षाघातः ।

*विधुरे—कर्णपृष्ठतोऽधःसंश्रिते किञ्चिन्निम्नाकारे द्वे स्नायुमर्मणी अर्द्धाङ्गुले वैकल्यकरे, तत्र बाधिर्य्यम् ।

*कृकाटिके--शिरोग्रीवयोरुभयतः सन्धी द्वे सन्धिमर्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र शिरःकम्पः ।

*अंसौ-स्कन्धौ स्नायुमर्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र बाहुस्तम्भः ।

*अंसफलके--पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसम्बद्धे, (ग्रीवायामंसद्वयस्य च संयोगो यत्र तत्त्रिकम् ।) अस्थिमर्मणी अर्द्धाङ्गुले वैकल्यकरे, तत्र बाह्वोः शून्यता शोषश्च ।

*अपाङ्गौ-नेत्रयोरन्तौ शिरामर्मणी अर्द्धाङ्गुलौ वैकल्यकरौ, तत्रान्ध्यं दृष्ट्युपघातो वा ।

*नीले मन्ये च—कण्ठनाडीमुभयतश्चतस्रो धमन्यः, द्वे नीले द्वे मन्ये । तत्र एका मन्या एका नीला एकस्मिन् पार्श्वे, एवमन्या मन्या नीला चापरस्मिन् पार्श्वे द्वे द्वे शिरामर्मणी द्व्यङ्गुले द्व्यङ्गुले वैकल्यकरे, तत्र मूकता विकृतस्वरताऽरसग्राहिता च ।

*फणे-घ्राणमार्गमुभयतः स्रोतोमार्गप्रतिबद्धे अभ्यन्तरतो मांसमर्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र गन्धाज्ञानम् ।

*आवर्त्तौ-भ्रुवोरुपरिनिम्नयोः सन्धिमर्मणी अर्द्धाङ्गुले वैकल्यकरे । तत्रान्ध्यं दृष्ट्युपघातो वा ॥ २३२ ॥ २३३ ॥

अथ रुजाकराणि मर्माण्याह—

गुल्फौ द्वौ मणिबन्धौ द्वौ तथा कूर्चशिरांसि च ।
रुजाकराणि जानीयादष्टावेतानि बुद्धिमान् ॥ २३४ ॥

*गुल्फौ–घुण्टिके सन्धिमर्मणी द्व्यङ्गुले रुजाकरे तत्र रुजा पादस्तम्भः खञ्जता च ।

*मणिबन्धौ द्वौ–हस्तप्रकोष्ठसन्धौ सन्धिमर्मणी द्व्यङ्गुलौ रुजाकरौ । तत्र हस्तयोः क्रियाराहित्यम् ।

*कूर्चशिरांसि--पादसन्धेरधो गुल्फसन्धेरध उभयत एकस्मिन् पादे द्वे, द्वे च द्वितीये, एवञ्चत्वारि स्नायुमर्माण्येकाङ्गुलानि रुजाकराणि तत्र रुजा शोफश्च ॥ २३४ ॥

अथ विशल्यघ्नानि मर्माण्याह—

उत्क्षेपौ स्थपनी चैव विशल्यघ्नं त्रिकम्मतम् ॥ २३५ ॥

*उत्क्षेपौ=शङ्खयोरुपरि केशान् यावत् । स्नायुमर्मणी अर्द्धाङ्गुले तयोर्विद्धयोः सशल्यो जीवेत्पाकात्पतितशल्यो वा, उद्धृतशल्यस्तु म्रियेत । अत एव विशल्यमुद्धृतशल्यं हन्तीति विशल्यघ्नं मर्म ।

*स्थपनी–एका भ्रुवोर्मध्ये शिरामर्मैदमर्द्धाङ्गुलं विशल्यघ्नम्॥२३५॥

सप्तरात्रान्तरे हन्युः सद्यः प्राणहराणि हि ।
कालान्तरप्राणहरं पक्षे मासे च मारकम् ॥ २३६ ॥
सद्यःप्राणहरश्चान्ते विद्धं कालेन मारयेत् ।
कालान्तरप्राणहरमन्ते विद्धन्तु दुःखदम् ॥ २३७ ॥

*अन्ते=मर्मसमीपे ॥ २३७ ॥

मर्माण्यधिष्ठाय हि ये विकारा मूर्च्छन्ति काये विविधा नराणाम् ।
प्रायेण ते कृच्छ्रतमा भवन्ति वैद्येन यत्नैरपि साध्यमानाः ॥ २३८ ॥

अथ सन्धयः ।

ते द्विविधाश्चेष्टावन्तः स्थिराश्च ।

शाखासु हन्वोः कट्याञ्च चेष्टावन्तो भवन्ति हि ।
शेषास्तु सन्धयः सर्वे स्थिरास्तज्ज्ञैरुदाहृताः ॥ २३९ ॥

अथ सन्धिसंख्या आह—

कथिता देहिनां देहे सन्धयो द्वे शते दश ।

शाखासु तेऽष्टषष्टिश्च कोष्ठे त्वेकोनषष्टिकाः ॥ २४० ॥
ग्रीवाया ऊर्ध्वदेशे तु त्र्यशीतिस्ते प्रकीर्त्तिताः ।
प्रथमं परिगण्यन्ते तेषु शाखागता इह ॥ २४१ ॥

*एकैकस्यां पादाङ्गुल्यां त्रयस्त्रयो द्वावङ्गुष्ठे ते चतुर्दश १४ । गुल्फजानुवंक्षणेष्वेकैकमेवं सप्तदश १७ एकस्मिन् सक्थिनि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ । एवमष्टषष्टिः ६८ शाखासु ।

अथ कोष्ठगतानाह—

*त्रयः ३ कटीकपालेषु, चतुर्विंशतिः २४ पृष्ठवंशे, तावन्तः २४ एव पार्श्वयोः अष्टौ ८ उरसि, एवमेकोनषष्टिः ५९ कोष्ठे ।

अथ ग्रीवोर्ध्वगतानाह—

*अष्टौ ८ ग्रीवायां त्रयः ३ कण्ठे, नाडीषु हृदयक्लोमफुप्फुसनिबद्धास्वष्टादश १८ । द्वात्रिंशद् ३२ दन्तमूलेषु, एकः १ कण्ठमणौ, नासायाश्च १ एकः, द्वौ २ वर्त्ममण्डलजौ नेत्राश्रयौ, द्वौ २ द्वौ २ गण्डकर्णशङ्खेषु, द्वौ २ हनुसन्ध्यौ, २ द्वावुपरिष्टाद् भ्रुवोः शङ्खयोश्चोपरिष्टात् २ । पञ्च ५ शीर्षकपालेष्वेको १ मूर्ध्नीति । कण्ठमणौ घण्टिकेति प्रसिद्धे । एते सन्धयोऽष्टविधा भवन्तीत्याहोत्तरत्र ॥ २४० ॥ २४१ ॥

ते यथा—

कोरोदूखलसामुद्गाः प्रतरस्तूणसेवनी ।
काकतुण्डं मण्डलश्च शङ्खावर्त्तोऽष्टसन्धयः ॥ २४२ ॥

*कोरः=गर्त्तः । नलिकेत्यन्ये । उदूखलः प्रसिद्धः, समुद्गः=सम्पुटः, समुद्ग एव सामुद्गः, अत्र स्वार्थे अण् । प्रतरत्यनेनेति प्रतरो वेल्लकः । तूणस्य तूणीरस्येव सेवनी स्यूतिस्तूणसेवनी । काकतुण्डं=काकमुखम् । मण्डलं प्रसिद्धम् । शंखस्यावर्त्तः शङ्खावर्त्तः । एते यथानामप्रकृतयः सन्धयो भवन्तीत्यर्थः । एषामङ्गुलिमणिबन्धगुल्फजानुकूर्परेषु कोराः सन्धयः । कक्षावंक्षणदन्तेषूदूखलाः । अंसपीठगुदभगनितम्बेषु समुद्गाः । ग्रीवापृष्ठवंशयोस्तु प्रतराः । शिरःकटीकपालेषु तूणसेवन्यः । हन्वोरुभयतः काकतुण्डाख्याः । कण्ठहृदयक्लोमनाडीषु मण्डलाख्याः । श्रोत्रशृङ्गाटकेषु शङ्खावर्त्ताः ॥ २४२ ॥

अस्थ्नां तु सन्धयो ह्येते केवलाः समुदाहृताः ।
पेशीस्नायुशिराणान्तु सन्धिसंख्या न विद्यते ॥ २४३ ॥

अथ शिरामाह—

सन्धिबन्धनकारिण्यो दोषधातुवहाः शिराः ।
नाभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः ॥२४४॥
शरीरं सकलञ्चैतच्छिराभिः पोष्यते सदा ।
प्रणालीभिरिवारामाः कुल्याभिः क्षेत्रधान्यवत् ॥२४५॥

*अत्र प्रणालीभिः कुल्याभिरिति दृष्टान्तद्वयं स्थूलसूक्ष्मशिराभेदात् ॥ २४५ ॥

अथ शिरासंख्यामाह—

प्रसारणाकुञ्चनादिक्रियाभिः सततं तनौ ।
शिरा एवोपकुर्वन्ति ताः स्युः सप्तशतानि तु ॥ २४६ ॥
यथा द्रुमदले साक्षाद् दृश्यन्ते प्रतताः शिराः ।
तथैव देहिनो देहे वर्त्तन्ते सकले शिराः ॥ २४७ ॥
नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिरुपाश्रिता ।
शिराभिरावृता नाभिश्चक्रनाभिरिवारकैः ॥ २४८ ॥

*ता यथा-तासां खलु मूलशिराश्चत्वारिंशत् ४० । तासां दश १० वातवहाः, दश १० पित्तवहाः, दश १० श्लेष्मवहाः, दश १० रक्तवहाः, तासां खलु वातवहानां वातस्थानगतानां सपञ्चसप्तति शतं १७५ भवति । तावत्यः १७५ एव पित्तवहाः पित्तस्थानगताः । १७५ श्लेष्मवहास्ताः श्लेष्मस्थानगताः । १७५ रक्तवहा यकृत्प्लीहगताः । एवं शिराः सप्त शतानि ७०० भवन्ति । तत्र वातवहा एकस्मिन् सक्थिनि २५ पञ्चविंशतिः, एतेनेतरसक्थिबाहू च व्याख्यातौ । विशेषतः कोष्ठे ३४ चतुस्त्रिंशत्, तासां श्रोण्यां गुदमेढ्रादिसंश्रिता अष्टौ ८ । २ द्वे । २ द्वे पार्श्वयोः । षट् ६ पृष्ठे । तावत्यः ६ एवोदरे । दश १० वक्षसि १० । एकचत्वारिंशद् ४१ जत्रुण ऊर्ध्वम् । तासां चतुर्दश १४ ग्रीवायाम् । ४ चतस्रः कर्णयोः । ९ नव जिह्वायाम् । ६ षट् नासिकायाम् । ८ अष्टौ नेत्रयोः ।

एवं वातवहानां सपञ्चसप्तति शतं १७५ भवति। एवं विभागः पित्तवहानामपि विशेषस्तु पित्तवहा नेत्रयोर्दश १० । कर्णयोर्द्वे २ । एवं रक्तवहाः । श्लेष्मवहास्तु षोडश १६ ग्रीवायाम् , कर्णयोर्द्वे २ । एवं शिराणां सप्तशतानि ७०० व्याख्यातानि ॥ २४६-२४८ ॥

अथ स्वशिरासञ्चारिणो वायोः कर्माण्याह—

क्रियाणामप्रतीघातममोहं बुद्धिकर्म्मणाम् ।
करोत्यन्यान् गुणांश्चापि स्वाः शिराः पवनश्चरन् ॥२४९॥

*क्रियाणां=प्रसारणाकुञ्चनादीनाम् । अमोहं बुद्धिकर्म्मणाम्=बुद्धीन्द्रियाणां मनसो बुद्धेश्च स्वे स्वे विषये ज्ञानं करोतीत्यर्थः । अन्यान् गुणान्=रसादिव्यापनद्वारा शरीरपोषणादीन् ॥ २४९ ॥

अथ स्वशिरासञ्चारिणः कुपितस्य वायोः कर्माण्याह—

यदा तु कुपितो वायुः स्वाः शिराः प्रतिपद्यते ।
तदाऽस्य विविधा रोगा जायन्ते वातसम्भवाः ॥ २५० ॥

अथ स्वशिरासञ्चारिणः पित्तस्य कर्माण्याह—

भ्राजिष्णुतामन्नरुचिमग्निदीप्तिमरोगताम् ।
करोत्यन्यान् गुणांश्चापि पित्तमात्मशिराश्चरद् ॥ २५१ ॥

*अरोगतां=पैत्तिकरोगानुत्पत्तिं करोति । अन्यान् गुणान्=मेधाबुद्धिदर्शनशक्त्यादीन् ॥ २५१ ॥

अथ स्वशिरासञ्चारिणः कुपितस्य पित्तस्य कर्माण्याह—

यदा तु कुपितं पित्तं सेवते स्ववहाः शिराः ।
तदाऽस्य विविधा रोगा जायन्ते पित्तसम्भवाः ॥ २५२ ॥

अथ स्वशिरासंचारिणः कफस्य कर्माण्याह—

स्नेहमङ्गेषु सन्धीनां स्थैर्य्यं बलमरोगताम् ।
करोत्यन्यान् गुणांश्चापि बलासः स्वाः शिराश्चरन् ॥२५३॥

*अरोगतां=श्लैष्मिकरोगानुत्पत्तिम् । अन्यान् गुणान्=बलपुष्ट्यादीन् ॥ २५३ ॥

अथ स्वशिरासञ्चारिणः कुपितस्य कफस्य कर्माण्याह—

यदा तु कुपितः श्लेष्मा स्वाः शिराः प्रतिपद्यते ।
तदाऽस्य विविधा रोगा जायन्ते श्लेष्मसम्भवाः ॥ २५४ ॥

अथ स्वशिरासञ्चारिणो रक्तस्य कर्माण्याह—

धातूनां पूरणं वर्णं स्पर्शज्ञानमसंशयम्।
स्वशिरासु चरद्रक्तं कुर्य्याच्चान्यान गुणानपि ॥ २५५ ॥

अन्यान् गुणान् = बलपुष्ट्यादीन् ॥ २५५ ॥

अथ स्वशिरासञ्चारिणः कुपितस्य रक्तस्य कर्माण्याह—

यदा तु कुपितं रक्तं सेवते स्ववहाः शिराः।
तदाऽस्य विविधा रोगा जायन्ते रक्तसम्भवाः ॥ २५६ ॥

अथ वातवहादिशिराणां वर्णादीनाह—

तत्रारुणा वातवहाः पूर्य्यन्ते वायुना शिराः।
पित्तादुष्णाश्च नीलाश्च शीता गौर्य्यः स्थिराः कफात्।
असृग्धरास्तु ता रक्ताः स्युश्च नात्युष्णशीतलाः ॥ २५७ ॥

अथ स्नायुः।

तत्र स्नायोः स्वरूपमाह—

मेदसः स्नेहमादाय शिरा स्नायुत्वमाप्नुयात्।
शिराणां हि मृदुः पाकः स्नायूनान्तु ततः खरः ॥ २५८ ॥
स्नायवो बन्धनानि स्युर्देहमांसास्थिमेदसाम्।
सन्धीनामपि यचास्तु शिराभ्यः सुदृढाः स्मृताः ॥२५९ ॥
नौर्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता।
नियुक्ताऽगाधसलिले भवेद्भारसहा भृशम् ॥ २६० ॥

*फलकैः=काष्ठपट्टैः। आस्तीर्णा=व्याप्ता ॥ २६० ॥

एवमेव शरीरेऽस्मिन्यावन्तः सन्धयः स्मृताः।
स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः ॥ २६१ ॥

अथ स्नायुसंख्यामाह—

शतानि नव जायन्ते शरीरे स्नायवो नृणाम्।
तासां विवरणं ब्रूमः शिष्याः! शृणुत यत्नतः ॥ २६२ ॥
शाखासु षट्शतानि स्युः कोष्ठे त्रिंशच्छतद्वयम्।
ग्रीवाया ऊर्ध्वदेशे तु स्नायूनां सप्ततिः स्मृता ॥ २६३ ॥

तत्र शाखागताः प्राह—

*एकैकस्यां पादाङ्गुल्यां ६ षट् ६ षट् तास्त्रिंशत ३०। तावत्यः ३०

एव तलकूर्चगुल्फेषु । तावत्यः ३० एव जङ्घायां, दश १० जानुनि । ४० चत्वारिंशदूरौ । दश १० वङ्क्षणे । एवं सार्द्धशतम् १५० एकस्मिन् सक्थिनि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ ।

अथ कोष्ठगताः प्राह—

*षष्टिः ६० कट्यां, तावत्यः ६० एव पार्श्वयोः, अशीतिः ८० पृष्ठे, त्रिंशद् ३० उरसि ।

अथ ग्रीवोर्ध्वगताः प्राह—

*षट्त्रिंशद् ३६ ग्रीवायाम् । चतुस्त्रिंशद् ३४ मूर्ध्नि । एवं स्नायूनां नवशतानि ९०० भवन्ति ॥ २६२-२६३ ॥

अथ धमनीः प्राह—

धमन्यो नाभितो जाताश्चतुर्विंशतिसंख्यया ।
दशोर्ध्वगा दशाधोगाः शेषास्तिर्यग्गताः स्मृताः ॥ २६४ ॥

*तत्रोर्ध्वगाः—शब्दस्पर्शरूपरसगन्धप्रश्वासोच्छ्वासजृम्भितक्षुतहसितकथितरुदितगीतादिविशेषानभिवहन्त्यः शरीरं धारयन्ति ।

प्रश्वासः=अन्तःप्रविशन् वायुः । उच्छ्वासः=ऊर्ध्वं गच्छन् वायुः ।

तास्तु हृदयं गतास्त्रिधा जायन्ते । तास्त्रिंशत् ३० । तासां मध्ये द्वे २ द्वे २ वातपित्तकफशोणितरसान् वहतः । ता दश १० । अष्टभिः ८ शब्दरसरूपगन्धान् गृह्णाति पुरुषः । द्वाभ्यां २ भाषते । द्वाभ्यां २ घोषते । द्वाभ्यां २ स्वपिति । द्वाभ्यां २ जागर्ति । द्वे २ अश्रुवाहिन्यौ । द्वे २ स्तन्यं स्त्रिया वहतः स्तनसंश्रिते । त एव शुक्रं नरस्य स्तनाभ्यामभिवहतः । एतास्त्रिंशत् ३० सविभागा व्याख्याताः । एताभिरूर्ध्वं नाभेरुदरपार्श्वपृष्ठोरःस्कन्धग्रीवाबाहवो धार्यन्ते चाल्यन्ते च ।

अथाधोगताः प्राह—

*अधोगतास्तु वातमूत्रपुरीषशुक्रार्त्तवादीनधो वहन्ति । तास्तु पित्ताशयं गतास्त्रिधा जायन्ते । तास्त्रिंशत् ३० । तासां मध्ये द्वे २ द्वे २ वातपित्तकफशोणितरसान् वहतः । ता दश १० । द्वे २ अन्नवहे अन्त्राश्रिते । द्वे २ वस्तिगते मूत्रवहे । द्वे २ शुक्रस्य प्रादुर्भावाय । द्वे २ तद्विसर्गाय, त एव नारीणामार्त्तवं प्रादुर्भावयतो विसृजतश्च । द्वे २

स्थूलान्त्रप्रतिबद्धे पुरीषं विसृजतः । ८ अष्टावन्यास्तिर्यग्गताः स्वेदमर्पयन्ति । एतास्त्रिंशद् ३० । एताभिरधो नाभेः पक्वाशयकटीमूत्रपुरीषबस्तिगुदमेढ्रसक्थीनि धार्यन्ते चाल्यन्ते च ।

अथ तिर्यग्गताः प्राह—

*तिर्यग्गतानां तु चतसृणामेकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यते । तास्तु असंख्येयास्ताभिरिदं शरीरं गवाक्षितं, निबद्धमायतम् । गवाक्षो=वातायनं, यथा गवाक्षे बहूनि छिद्राणि भवन्ति-तथाऽस्मिन् देहे जालवद् शिरा व्याप्य तिष्ठन्तीति भावः । निबद्धमायतं गवाक्षितम् । गवाक्षाकाररन्ध्रनिकरयुक्तं कृतमित्यर्थः । तासां मुखानि रोमलग्नानि यैर्मुखैः स्वेदः स्रवति रसश्चाभिसन्तर्पयन्ति अन्तर्बहिश्च । तैरेवाभ्यङ्गपरिषेकावगाहनालेपनवीर्य्याणि त्वचि पक्वानि अन्तः प्रवेशयन्ति । तैरेव स्पर्शं शुभमशुभं वा गृह्णन्ति ॥ २६४ ॥

यथा स्वभावतः खानि मृणालेषु बिसेषु च ।
धमनीनां तथा खानि रसो यैरभितश्चरेत् ॥ २६५ ॥
पञ्चाभिभूतास्त्वथ पञ्चकृत्वः पञ्चेन्द्रियं पञ्चसु भावयन्ति ।
पञ्चेन्द्रियं पञ्चसु भावयित्वा पञ्चत्वमायान्ति विनाशकाले ॥२६६ ॥

*अस्यायमर्थः—धमन्यः कथंभूताः पञ्चाभिभूताः, पञ्चभ्य आकाशादिमहाभूतेभ्यः, अभि समन्ताद् भूताः । पञ्चेन्द्रियम्=पञ्च इन्द्रियाणि उभयात्मकं मनश्च यस्य तं पञ्चेन्द्रियं जीवात्मानम् । पञ्चसु=इन्द्रियाधिष्ठानेषु श्रोत्रादिषु । पञ्चकृत्वः=पञ्चवारान्, पर्य्यायेण न तु एकदैव, भावयन्ति=प्रापयन्ति । पञ्चेन्द्रियं=पञ्चानामिन्द्रियाणां समाहारः पञ्चेन्द्रियं श्रोत्रादि तदुपलक्षितं कर्मेन्द्रियं मनश्च । पञ्चसु=पृथिव्यादिषु बुद्धीन्द्रियविषयेषु तदुपलक्षितेषु हस्तादिषु कर्मेन्द्रियविषयेषु मन्तव्ये मनोविषये च । भावयित्वा=प्राप्य, संयोज्येति यावद् । विनाशकाले पञ्चत्वमाकाशादिभावमायान्ति प्राप्नुवन्तीत्यर्थः ॥ २६६ ॥

अथ कण्डराः प्राह—

महत्यः स्नायवः प्रोक्ताः कण्डरास्तास्तु षोडश ।
प्रसारणाकुञ्चनयोर्दृष्टं तासां प्रयोजनम् ॥ २६७ ॥

चतस्रो हस्तयोस्तासां तावत्यः पादयोः स्मृताः ।
ग्रीवायामपि तावत्यस्तावत्यः पृष्ठसङ्गताः ॥ २६८ ॥

*तत्र पादहस्तगतानां कण्डराणां नखाः प्ररोहाः । ग्रीवानिबन्धजानामधोभागगतानां प्ररोहो मेढ्रः । पृष्ठनिबन्धनानां प्ररोहा नितम्बमूर्धोरुवक्षोऽद्विस्तनपिण्डाः ॥ २६८ ॥

अथ रन्ध्राण्याह—

नेत्रश्रवणनासानां द्वे द्वे रन्ध्रे प्रकीर्त्तिते ।
मुखमेहनपायूनामेकैकं रन्ध्रमुच्यते ॥ २६९ ॥
दशमं मस्तके प्रोक्तं रंध्राणीति नृणां विदुः ।
स्त्रीणामन्यानि च त्रीणि स्तनयोर्गर्भवर्त्मनि ॥२७०॥

अथ स्रोतांस्याह—

मनःप्राणान्नपानीयदोषधातूपधातवः ।
धातूनां च मला मूत्रं मलमित्यादयस्तनौ ॥ २७१ ॥
सञ्चरन्ति हि यैर्मार्गैस्तानि स्रोतांसि सञ्जगुः ।
बहूनि तानि संख्याय शक्यन्ते नैव भाषितुम् ॥२७२॥

अथ जालान्याह—

जालानि तु शिरास्नायुमांसास्थ्नामुद्भवन्ति हि ।
तानि चत्वारि चत्वारि सर्वाण्येव च षोडश ॥ २७३ ॥

*निरन्तररन्ध्रनिकरकलितानि समूहितानि च जालानीव जालानि, तानि मणिबन्धगुल्फसंश्रितानि परस्परनिबद्धानि परस्परसंश्लिष्टानि परस्परगवाक्षितानि चेति, यैर्गवाक्षितमिदं शरीरम् ।

*अयमर्थः—एकस्मिन् मणिबन्धे एकं जालं शिरायाः, अपरं स्नायोः, तृतीयं मांसस्य, चतुर्थमस्थ्नः, एवं चत्वारि ४ जालानि । एतेनेतरमणिबन्धो गुल्फौ च व्याख्यातौ । गवाक्षितं विरचितनिरन्तरजालाकाररन्ध्रनिकरपरिकलितमित्यर्थः ॥ २७३ ॥

अथ कूर्चानाह—

कूर्चाः स्युर्हस्तयोर्द्वौ तु तावन्तौ पादयोरपि ।
ग्रीवायामेक एकस्तु मेढ्रे सर्वेऽपि षट् स्मृताः ।
कूर्चा अपि शिरास्नायुमांसास्थिप्रभवाः स्मृताः ॥२७४॥

अथ रज्जूराह—

पृष्ठवंशस्योभयत्र महत्यो मांसरज्जवः ।
चतस्रो मांसपेशीनां बन्धनं तत्प्रयोजनम् ॥ २७५ ॥

अथ सेवनीराह—

सेवन्यः सप्त तासां तु भवेयुः पञ्च मस्तके ।
एका शेफसि जिह्वायामेका विध्येन्न ताः क चित् ॥२७६॥

अथ संघातानाह—

चतुर्दशास्थ्नां सङ्घातास्तेषां त्रयो गुल्फजानुवंक्षणेषु ।
एतेनेतरसक्थिबाहू च व्याख्यातौ त्रिकशिरसोरेकैकम् ॥२७७॥

*अत्र तु त्रिकपदेन वाहुग्रीवास्थिसंघात उच्यते ॥ २७७ ॥

अथ सीमन्तानाह—

चतुर्दशैव सीमन्ताः कथिता मुनिपुङ्गवैः ।
संघाताः सीविता यैस्तु सीमन्तास्ते प्रकीर्त्तिताः ॥२७८॥

*यैः=अस्थिभिः ॥ २७८ ॥

अथ त्वच आह—

क्षीरस्य पच्यमानस्य यथा सन्तानिका भवेत् ।
पच्यमानस्य शुक्रस्य रजसश्च तथा त्वचः ॥
पूर्वाऽवभासिनी तासां सिध्मस्थानं च सा स्मृता ॥ २७९ ॥

*अथावभासिनी–भ्राजकेन पित्तेनावभासनात् । परिणाहेन विस्तारितस्य व्रीहेर्विंशतिभागेष्वष्टादशो भागः प्रमाणं यस्याः । व्रीहिरत्र यवः, सा सिध्मपद्मकण्टकयोरधिष्ठानम् ॥ २७९ ॥

द्वितीया लोहिता ज्ञेया तिलकालकजन्मभूः ॥ २८० ॥

*द्वितीया यवषोडशभागप्रमाणा तिलकालकन्यच्छव्यङ्गानामधिष्ठानम् ॥ २८० ॥

तृतीया तु भवेच्छ्वेता स्थानं चर्मदलस्य सा ॥ २८१ ॥

*सा यवद्वादशभागप्रमाणा चर्मदलाजगल्लिकामशकानामाधिष्ठानम् ॥ २८१ ॥

ताम्रा चतुर्थी विज्ञेया किलासश्वित्रभूमिका ॥ २८२ ॥

*चतुर्थी यवाष्टभागप्रमाणा ॥ २८२ ॥

पञ्चमी वेदिनी नाम्ना पञ्चभागप्रमाणिका ।
विसर्पकुष्ठाधिष्ठाना ज्ञेया षष्ठी तु रोहिणी ॥
विख्याता रोहिणी षष्ठी ग्रन्थिगण्डापचीस्थितिः ॥२८३॥

*व्रीहिमात्रप्रमाणा सा रोहिणी ग्रन्थ्यपचीगलगण्डगण्डमालाऽर्बुदश्लीपदानामधिष्ठानम् ॥ २८३ ॥

स्थूला त्वक्सप्तमी ख्याता विद्रध्यादेः स्थितिश्च सा ॥ २८४ ॥

*सा सप्तमी व्रीहिद्वयप्रमाणा । अत एवोक्तं शार्ङ्गधरेण–"स्थूला व्रीहिद्विमात्रये"ति । सप्तापि त्वचः समुदिता विंशतितमभागोनषडयवप्रमाणाः । षड्यवप्रमाणं तु अङ्गुष्ठोदरतुल्यम् । यत उक्तम्–"एतत् प्रमाणं मांसलेषु स्थलेषु बोद्धव्यं, न तु ललाटसूक्ष्माङ्गुल्यादिषु । उदरे त्वङ्गुष्ठप्रमाणमेव गाढं विध्येदि"ति ॥ २८४ ॥

अथ लोमानि लोमकूपाँश्चाह—

अस्थ्नो मलानि लोमानि चासंख्यानि भवन्ति हि ।
सन्ति यावन्ति लोमानि तावन्तो लोमकूपकाः ॥२८५॥
अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते ।
सन्निवेशश्च गात्राणां नात्रास्ते कारणान्तरम् ॥२८६॥

*निर्वृत्तिः=सिद्धिः । स्वभावाद्=ईश्वरात् । सन्निवेशो=रचनाविशेषः ॥ २८६ ॥

अङ्गप्रत्यङ्गनिर्वृत्तौ ये भवन्त्यगुणा गुणाः ।
ते ते गर्भस्य विज्ञेया धर्माधर्मनिमित्तजाः ॥ २८७ ॥
दन्तानां पतनं जन्म पुनः पाते त्वसम्भवः ।
तलेष्वनुद्भवो लोम्नामेतत्सर्वं स्वभावतः ॥ २८८ ॥

गर्भे मासि मासि यद् भवति तदाह—

गर्भाशये निपतितं यादृक्शुक्रं तथाऽऽर्त्तवम् ।
तादृगेव द्रवीभूतं प्रथमे मासि तिष्ठति ॥ २८९ ॥
मरुत्पित्तकफैस्तत्स्थैः पच्यमानो द्वितीयके ।
कललस्थमहाभूतसमुदायो घनीभवेत् ॥ २९० ॥

*अत्र मरुत्कफयोरपि पाकहेतुत्वमेव तयोरप्यूष्मणोऽधिकरणत्वाद् ।

यत उक्तं चरके—
"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः" इति ॥ २६० ॥

तृतीये मासि शिरसो हस्तयोः पादयोस्तथा ।
पिण्डकाः पञ्च सिध्यन्ति सूक्ष्माङ्गावयवास्तनोः ॥ २६१ ॥
सर्वाण्यङ्गान्युपाङ्गानि चतुर्थे स्युः स्फुटानि हि ।
हृदयव्यक्तभावेन व्यज्यते चेतनाऽपि च ॥ २६२ ॥
तस्माच्चतुर्थे गर्भस्तु नाना वस्तूनि वाञ्छति ।
ततो द्विहृदया यत्स्यान्नारी दौर्हृदिनी मता ॥ २६३ ॥
दौर्हृदावज्ञया कुब्जं कुणिं षण्ढं च वामनम् ।
विकृताक्षमनक्षं वा पुत्रं नारी प्रसूयते ॥ २६४ ॥
यतः स्त्री दौर्हृदं प्राप्य वीर्य्यवन्तं चिरायुषम् ।
पुत्रं प्रसूयते तस्मात्तस्यै वाञ्छितमर्पयेत् ॥ २६५ ॥
इन्द्रियार्थांस्तु यान्यान्सा भोक्तुमिच्छति गर्भिणी ।
गर्भबाधाभयात्तांस्तान्भिषगाहृत्य दापयेत् ॥ २६६ ॥

*भोक्तुमुपभोक्तुमित्यर्थः ॥ २६६ ॥

सा प्राप्तदौर्हृदा पुत्रं जनयेत्तु गुणान्वितम् ।
अलब्धदौर्हृदा गर्भे लभेतात्मनि वा भयम् ॥ २६७ ॥
येषु येष्विन्द्रियार्थेषु दौर्हृदे साऽवमानिता ।
प्रसूयते सुतं स्यार्त्तिं तस्मिंस्तस्मिंस्तदिन्द्रिये ॥ २६८ ॥

*सार्त्तिं=सव्यथम् ॥ २६८ ॥

अथ दौहृदविशेषफलमाह—

राजसंदर्शने यस्या दौर्हृदं जायते स्त्रियाः ।
अर्थवन्तं महाभागं कुमारं सा प्रसूयते ॥ २६९ ॥
दुकूलपट्टकौशेयभूषणादिषु दौर्हृदात् ।
अलङ्कारैषिणं पुत्रं ललितं सा प्रसूयते ॥ ३०० ॥
आश्रमे संयतात्मानं धर्म्मशीलं प्रसूयते ।
देवताप्रतिमायां तु प्रसूते पार्षदोपमम् ॥ ३०१ ॥

*आश्रमे=तपस्विनामाश्रमे दौर्हृदात्, पार्षदोपमं=प्रमथोपमम् ॥ ३०१ ॥

दर्शने व्यालजातीनां हिंसाशीलं प्रसूयते ।
रक्ताक्षं लोमशं शूरं महिषामिषदौर्हृदात् ॥ ३०२ ॥
वाराहमांसे स्वप्नालं शूरं सञ्जनयेत्सुतम् ।
मृगमांसे तु जङ्घालं विक्रान्तं वनचारिणम् ॥ ३०३ ॥
अतोऽनुक्तेषु या नारी दौर्हृदं विदधाति हि ।
शरीराचारशीलैः सा समानं जनयिष्यति ॥ ३०४ ॥
पञ्चमे मानसं षष्ठे बुद्धिश्चातिप्रबुद्ध्यते ।
सर्वाण्यङ्गान्युपाङ्गानि भृशं व्यक्तानि सप्तमे ॥३०५॥
ओजोऽष्टमे सञ्चरति मातापुत्रौ मुहुः क्रमात् ।
तेन तौ म्लानमुदितौ स्यातां जातो न जीवति ॥ ३०६ ॥
न जीवत्यष्टमे जातस्तत्रौजो न स्थिरं यतः ।
तथा नैर्ऋत्यभागत्वाद्दापयेत्तद्बलि ततः ॥ ३०७ ॥

*नैर्ऋत्याय भागश्च बालेषु रुद्रेण दत्तः, यत उक्तं कुमारतन्त्रे—
"अष्टमे मासि नैर्ऋत्याय मांसौदनं बलि दापयेदि"ति ॥ ३०७ ॥

नवमे दशमे मासि नारी बालं प्रसूयते ।
एकादशे द्वादशे वा ततोऽन्यत्र विकारतः ॥ ३०८ ॥

गर्भे यदङ्गं प्रथमं भवति, तदाह—

शिरो भवति चाङ्गस्य पूर्वमित्याह शौनकः ।
शिरस्येवोपजायन्ते प्रधानानीन्द्रियाणि यत ॥ ३०९ ॥
हृदयं जायते पूर्वं कृतवीर्योऽब्रवदन्मुनिः ।
बुद्धेश्च मनसश्चापि यतस्तत्स्थानमीरितम् ॥ ३१० ॥
पाराशर्य इति प्राह पूर्वं नाभिसमुद्भवः ।
प्राणो यत्र स्थितो देहं बर्द्धयत्यूष्मसंयुतः ॥ ३११ ॥
पाणिपादं भवेत्पूर्वं मार्कण्डेयमुनेर्मतम् ।
देहिनः सकलाश्चेष्टाः पाणिपादाश्रया यतः ॥ ३१२ ॥
प्रथमं जायते कोष्ठं ततः सर्वाङ्गसम्भवः ।
एतत्तु कथयामास गौतमो मुनिपुङ्गवः ॥ ११३ ॥
सर्वाण्यङ्गान्युपाङ्गानि युगपत्सम्भवन्ति हि ।

सूक्ष्मत्वान्नोपलभ्यन्ते मतं धन्वन्तरेरिदम् ॥ ३१४ ॥
आम्रस्याणुफले भवन्ति युगपन्मांसास्थिमज्जादयो-
लक्ष्यन्ते न पृथक्पृथक्तनुतया पुष्टास्त एव स्फुटाः ।
एवं गर्भसमुद्भवे त्ववयवाः सर्वे भवन्त्येकदा
लक्ष्याः सूक्ष्मतया न ते प्रकटतामायान्ति वृद्धिं गताः ॥३१५॥

*मज्जादय इत्यादिशब्देन त्वक्केशरमज्जत्वगङ्करवृन्तानि गृह्यन्ते ॥३१५॥

अथ शरीरे पितृज-मातृज-रसजात्मजा भागा उच्यन्ते । तत्र—

केशाः श्मश्रु च लोमानि नखा दन्ताः शिरास्तथा ।
धमन्यः स्नायवः शुक्रमेतानि पितृजानि हि ॥ ३१६ ॥
मांसासृङ्मज्जमेदांसि यकृत्प्लीहान्त्रनाभयः ।
हृदयं च गुदं चापि भवन्त्येतानि मातृतः ॥ ३१७ ॥
शरीरोपचयो वर्णो बलं देहस्थितिस्तथा ।
रसादेतानि जायन्ते भिषजो मुनयो जगुः ॥ ३१८ ॥
ज्ञानं विज्ञानमायुश्च सुखदुःखादिकं तथा ।
इन्द्रियाणि च सर्वाणि भवन्त्येतानि चात्मनः ॥ ३१९ ॥

*सुखदुःखादिकमित्यादिशब्देन नानायोनजन्मादिकमुच्यते । आत्मनः=आत्मसन्निकर्षाद् न त्वात्मनो जायन्ते, आत्मनो निर्विकारात् प्रकृतिभावानुपपत्तेः ॥ ३१९ ॥

गर्भस्य किं किं विशिष्टोपकारकं तदाह—

अग्नीषोमौ मही वायुर्नभः सत्त्वं रजस्तमः ।
पञ्चेन्द्रियाणि भूतात्मा गर्भं सञ्जीवयन्ति हि ॥ ३२० ॥

*अग्निरत्र-पाचकालोचकरञ्जकभ्राजकसाधकानां; तथा पाञ्चभौतिकानां तथा सप्तधातुगतानामग्नीनां शक्तिरूपतयाऽवस्थितो वाचोऽधिदेवत्वं प्राप्तो बोद्धव्यः, स च पाचकादिकर्मणा जीवयति । सोमश्च-पञ्चात्मकश्लेष्मरसशुक्रादीनां तोयात्मकानां भावानां रसनेन्द्रियस्य च शक्तिरूपतयाऽवस्थितो मनसश्चाधिदेवत्वं प्राप्तो बोद्धव्यः, स च सौम्यधातोरोजःप्रभृतेः पोषणेन पवनपावकसंशुष्कभागस्यार्द्रताविधानेन जीवयतीति शेषः । मही च—जलेन क्लिन्नस्यापि कठिन-

विधानेन, वायु-दोषधातुमलाङ्गोपाङ्गादीनां सञ्चारणेनोच्छ्वासनिःश्वासाभ्याञ्च, नभो—ऽनिलानलविदारितस्रोतसामूर्ध्वाधस्तिर्यगवकाशदानेन, सत्वं रजस्तम इति मनोरूपतया परिणतं जीवात्मनः शरीरान्तरे जीवनग्रहणमोक्षणे हेतुरिति तदपि जीवयति। पञ्चेन्द्रियाणि—श्रोत्रत्वङ्नेत्रजिह्वाघ्राणानि शब्दादिग्रहणकर्मणा, भूतात्मा—कर्मपुरुषः स चाशेषस्यैव राशेश्चैतन्यहेतुर्जीवयतीति ॥ ३२० ॥

अपरं गर्भस्य जीवनोपायमाह—

गर्भस्य नाभिनाड्या तु नाडी रसवहा स्त्रियाः।
संलग्ना तेन गर्भस्य वृद्धिर्भवति नित्यशः ॥ ३२१ ॥
निःश्वासोच्छ्वाससंक्षोभस्वप्नांशान्सोऽधिगच्छति।
मातुर्निःश्वसितोच्छ्वाससंक्षोभस्वप्नसम्भवान् ॥ ३२२ ॥

*संक्षोभः = सञ्चलनम्, माता निःश्वासादिका याश्चेष्टाः करोति तास्ता गर्भोऽपि करोतीत्यर्थः ॥ ३२२ ॥

अथ गर्भवृद्धेर्हेतूपायमाह—

गर्भस्य नाभिमध्ये तु ज्योतिःस्थानं ध्रुवं स्मृतम्।
तदा धमति वातश्च देहस्तेनास्य वर्धते ॥ ३२३ ॥
ऊष्मणा सहितश्चापि दारयत्यस्य मारुतः।
ऊर्ध्वं तिर्यगधस्ताच्च स्रोतांसि तु यथा तथा ॥ ३२४ ॥

*यथा दारयति विस्तारयति तथा देहो वर्धत इति पूर्वेणान्वयः ॥ ३२३ ॥ ३२४ ॥

अथ दृष्टिरोमकूपानामवृद्धिमाह—

दृष्टिश्च रोमकूपाश्च न वर्धन्ते कदा चन।
ध्रुवाण्येतानि मर्त्यानामिति धन्वन्तरेर्मतम् ॥ ३२५ ॥

अथ नखकेशानां सदा वृद्धिमाह—

शरीरे क्षीयमाणेऽपि वर्धेते द्वाविमौ सदा।
स्वभावं प्रकृतिं कृत्वा नखकेशाविति स्थितिः ॥ ३२६ ॥

*प्रकृतिं कृत्वा = कारणं कृत्वा। स्थितिः = मर्यादा ॥ ३२६ ॥

अथ चेतनाचेतनान्यङ्गान्याह—

चेतनानामधिष्ठानं मनो देहश्च सेन्द्रियः।

केशलोमनखाग्रान्नमलद्रवगुणैर्विना ॥ ३२७ ॥

अथ गर्भस्य वातविण्मूत्रोत्सर्गाकरणे कारणमाह—

वातालपत्वादयोगाच्च वायोः पक्वाशयस्य च ।
वातमूत्रपुरीषाणि गर्भस्थो न विमुञ्चति ॥ ३२८ ॥

*अयोगाद्=ईषद्योगाद् ॥ ३२८ ॥

अथ गर्भारोदने कारणमाह—

जरायुणा मुखे छन्ने कण्ठे च कफवेष्टिते ।
वायोर्मार्गनिरोधाच्च न गर्भस्थः प्ररोदिति ॥ ३२९ ॥

अथ गर्भवतीकृत्याकृत्यानि ।

तत्रादौ गर्भिणीकृत्यान्याह—

गर्भिणी प्रथमादह्नः प्रहृष्टा भूषिता शुचिः ।
भवेच्छुक्लाम्बरधरा गुरुविप्रार्चने रता ॥ ३३० ॥
भोज्यं तु मधुरप्रायं स्निग्धं हृद्यं द्रवं लघु ।
संस्कृतं दीपनीयं तु नित्यमेवोपयोजयेत् ॥ ३३१ ॥

अथ गर्भिण्या अकृत्यान्याह—

गर्भिणी न तु कुर्वीत व्यायाममपतर्पणम् ।
व्यवायं च न सेवेत न कुर्यादतितर्पणम् ॥ ३३२ ॥
रात्रौ जागरणं शोकं यानस्यारोहणं तथा ।
रक्तमोक्षं वेगरोधं न कुर्यादुत्कटासनम् ॥ ३३३ ॥
दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते ।
स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते ॥ ३३४ ॥
मलिनां विकृताकारां हीनाङ्गीं न स्पृशेत्स्त्रियम् ।
न जिघ्रेदपि दुर्गन्धं न पश्येन्नयनाप्रियम् ॥ ३३५ ॥
वचांसि नापि शृणुयात्कर्णयोरप्रियाणि च ।
नान्नं पर्युषितं शुष्कं भुञ्जीत क्वथितं न च ॥ ३३६ ॥
चैत्यश्मशानवृक्षांश्च भावांश्चाप्ययशस्करान् ।
बहिर्निष्क्रमणं क्रोधं शून्यागारं च वर्जयेत् ॥ ३३७ ॥
नोच्चैर्ब्रूयान्न तत्कुर्याद्येन गर्भो विनश्यति ।
तैलाभ्यङ्गोद्वर्त्तनं च नात्यर्थं कारयेदपि ॥ ३३८ ॥

नामृद्वास्तरणं कुर्यान्नात्युच्चं शयनासनम् ।
एतांस्तु नियमान्सर्वान्यत्नात्कुर्वीत गर्भिणी ॥ ३३९ ॥

अथ प्रसवमासानाह–

नवमे दशमे मासि नारी गर्भं प्रसूयते ।
एकादशे द्वादशे वा ततोऽन्यत्र विकारतः ॥ ३४० ॥

अथ सूतिकागृहाकृतिमाह–

अष्टहस्तायतं चारु चतुर्हस्तविशालकम् ।
प्राचीद्वारमुदग्द्वारं विदध्यात्सूतिकागृहम् ॥ ३४१ ॥

अथासन्नप्रसवाया लक्षणमाह–

जाते हि शिथिले कुक्षौ मुक्ते हृदयबन्धने ।
सशूले जघने नारी विज्ञेया प्रसवोत्सुका ॥ ३४२ ॥
आसन्नप्रसवायास्तु कटीपृष्ठं तु सव्यथम् ।
भवेन्मुहुः प्रवृत्तिश्च मूत्रस्य च मलस्य च ॥ ३४३ ॥

अथासन्नप्रसवाया उपचारमाह–

तैलेनाभ्यक्तगात्रान्तां संस्नातामुष्णवारिणा ।
यवागूं पाययेत्कोष्णां मात्रया घृतसंयुताम् ॥ ३४४ ॥
कृतोपधाने मृदुनि विस्तीर्णे शयने शनैः ।
अभुग्नसक्थी चोत्ताना नारी तिष्ठेद्यथाऽन्विता ॥ ३४५ ॥

*अभुग्नसक्थी = असङ्कोचितोरुः ॥ ३४५ ॥

अथ जनयित्र्य आह–

चतस्रोऽशङ्कनीयाश्च स्रावणे कुशला हिताः ।
वृद्धाः परिचरेयुस्ताः सम्यक्छिन्ननखाः स्त्रियः ॥ ३४६ ॥

अथ जनयित्रीकृत्यमाह–

अपत्यमार्गं तैलेन समभ्यज्य समन्ततः ।
एका तु तासु सुभगे ! प्रवाहस्वेति तां वदेत् ॥ ३४७ ॥
अन्यथा मा प्रवाहिष्ठाः प्रवाहेथा व्यथा यदि ।
प्रवाहेथाः शनैः पूर्वं प्रगाढं च ततः परम् ॥ ३४८ ॥
ततो गाढतमं गर्भे योनिद्वारमुपागते ।
अपरासहितो गर्भो यावत्पतति भूतले ॥ ३४९ ॥

अथ व्यथारहितायाः प्रवाहणाद्वैगुण्यमाह—

मूकं वा बधिरं कुब्जं श्वासकासक्षयान्वितम् ।
सूते स्रस्ततनुं बालमकाले तु प्रवाहणात् ॥ ३५० ॥

इति श्रीमिश्रलटकनतनयश्रीमन्मिश्रभावविरचिते भावप्रकाशे गर्भप्रकरणं तृतीयम् ॥ ३ ॥

अथ चतुर्थं बालप्रकरणम् ४ ।

अथ बालस्य जन्मोत्तरविधिमाह—

अथ बाले समुत्पन्ने विदधीत विधिं तथा ।
यथैव कुलवृद्धस्त्रीव्यवहारपरम्परा ॥ १ ॥

अथ प्रसूताया नियमानाह—

प्रसूता हितमाहारं विहारं च समाचरेत् ।
व्यायामं मैथुनं क्रोधं शीतसेवां विवर्जयेत् ॥ २ ॥
मिथ्याऽऽचारात्सूतिकाया यो व्याधिरुपजायते ।
स कृच्छ्रसाध्योऽसाध्यो वा भवेत्तत्पथ्यमाचरेत् ॥ ३ ॥

अथ प्रसूताया नियमसमयावधिमाह—

सर्वतः परिशुद्धा स्यात्स्निग्धपथ्याऽल्पभोजना ।
स्वेदाभ्यङ्गपरा नित्यं भवेन्मासमतन्द्रिता ॥ ४ ॥

*सर्वतः परिशुद्धा तु अनवसृष्टरुधिरा, अतन्द्रिता = सावधाना॥४॥

प्रसूता सार्धमासान्ते दृष्टे वा पुनरार्त्तवे ।
सूतिकानामहीना स्यादिति धन्वन्तरेर्मतम् ॥ ५ ॥
व्युपद्रवां विशुद्धां च विज्ञाय वरवर्णिनीम् ।
ऊर्ध्वं चतुर्भ्यो मासेभ्यो नियमं परिहारयेत् ॥ ६ ॥

अथ स्तन्यस्वरूपमाह—

रसप्रसादो मधुरः पक्काहारनिमित्तजः ।
कृत्स्नाद्देहात्स्तनौ प्राप्तः स्तन्यमित्यभिधीयते ॥ ७ ॥

*रसप्रसादः=रसस्य सारः ॥ ७ ॥

अथ स्तन्यस्य प्रवृत्त्यवधिमाह—

स्तन्यं त्रिरात्रात्स्त्रीणां वा चतूरात्रादनन्तरम् ।

प्रवर्त्तयन्ति विवृता धमन्यो हृदये स्थिताः ॥ ८ ॥

अथ स्तन्यप्रवृत्तिहेतुमाह—

पयः पुत्रस्य संस्पर्शाद्दर्शनात्स्मरणादपि ।
ग्रहणादप्युरोजस्य शुक्रवत्सम्प्रवर्तते ।
स्नेहो निरन्तरस्तस्य प्रवाहे हेतुरुच्यते ॥ ९ ॥

अथ स्तन्यस्याल्पतायां हेतुमाह—

अवात्सल्याद्भयाच्छोकात्क्रोधादत्यपतर्पणात् ।
स्त्रीणां स्तन्यं भवेत्स्वल्पं गर्भान्तरविधारणात् ॥ १० ॥

अथ स्तन्यस्य वृद्धिहेतुमाह—

शालिषष्टिकगोधूमान्मांसक्षुद्रझषानपि ।
कालशाकमलाबूं च नारिकेलं कसेरुकम् ॥ ११ ॥
शृङ्गाटकं वरीं चापि विदारीकन्दमेव च ।
लशुनं दुग्धवृद्ध्यै स्त्री सेवेत सुमना भवेत् ॥ १२ ॥
कलमस्य तण्डुलानां कल्कं या क्षीरपेषितं पिबति ।
सा भवति भृशं तरुणी क्षीरभरेणैव तुङ्गकुचयुगला ॥१३॥

अथ कलमो धान्यविशेषस्तस्य लक्षणमाह—

कलमः कलिविख्यातो जायते स बृहद्भदे ।
काश्मीरदेश एवोक्तो महातण्डुलसंज्ञकः ॥ १४ ॥
विदारिकन्दस्य रसं पिबेत्स्तन्यस्य वृद्धये ।
तच्चूर्णं तस्य वृद्ध्यर्थं पिबेद्वा क्षीरसंयुतम् ॥ १५ ॥

अथ स्तन्यस्य दुष्टताहेतुमाह—

धात्र्या गुरुभिराहारैर्विहारैर्दोषलैस्तथा ।
देहे दोषाः प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति ॥ १६ ॥
मिथ्याऽऽहारविहारिण्या दुष्टा वातादयः स्त्रियाः ।
दूषयन्ति पयस्तेन शरीरं व्याधयः शिशोः ॥ १७ ॥

अथ दुष्टस्तन्यस्य लक्षणमाह—

कषायं सलिलप्लावि स्तन्यं मारुतदूषितम् ।
पित्तादम्लं च कटुकं राज्योऽम्भसि तु पीतिकाः ॥१८॥
कफदुष्टं तु यत्तोये निमज्जति च पिच्छिलम् ।

द्वन्द्वजं तु द्विलिङ्गं स्यात्त्रिलिङ्गं सान्निपातिकम् ॥१९॥

अथ दुष्टस्तन्यस्य शोधनविधिमाह—

धात्री क्षीरविशुद्ध्यर्थं मुद्गयूषरसाशिनी ।
भार्ङ्गीदारुवचाः पिष्ट्वा पिबेत्साऽतिविषास्तथा ॥ २० ॥
पाठामूर्वाऽब्दभूनिम्बैर्दारुशुण्ठीकलिङ्गकैः ।
सारिवामत्स्यपित्ताऽऽख्यैः क्वाथः स्तन्यविशोधनः ॥२१॥

*मत्स्यपित्ता=कटुकी ॥ २१ ॥

पटोलनिम्बाशनदारुपाठा मूर्वा गुडूची कटुरोहिणी च ।
सनागरं च क्वथितं च तोये धात्री पिबेत् स्तन्यविशुद्धिहेतोः ॥२२॥

अथ शुद्धस्तन्यस्य लक्षणमाह—

नीरे स्तन्यं यदेकि स्यादविवर्णमतन्तुमत् ।
पाण्डुरं तनु शीतं च तद् दुग्धं शुद्धमादिशेत् ॥ २३ ॥

अथ धात्रीलक्षणमाह—

पीताय यदि बालस्य विदध्यादुपमातरम् ।
सुविचार्य गुणान्दोषान्कुर्य्याद्धात्रीं तदेदृशीम् ॥ २४ ॥
सवर्णां मध्यवयसां सच्छीलां मुदितां सदा ।
शुद्धदुग्धां बहुक्षीरां सवत्सामतिवत्सलाम् ॥ २५ ॥
स्वाधीनामल्पसन्तुष्टां कुलीनां सज्जनात्मजाम् ।
कैतवेन परित्यक्तां निजपुत्रदृशं शिशौ ॥ २६ ॥

अथ निषिद्धां धात्रीमाह—

शोकाकुला क्षुधार्त्ता च श्रान्ता व्याधिमती सदा ।
अत्युच्चा नितरां नीचा स्थूलाऽतीव भृशं कृशा ॥ २७ ॥
गर्भिणी ज्वरिणी चापि लम्बोन्नतपयोधरा ।
अजीर्णभोजिनी चापि तथा पथ्यविवर्जिता ॥ २८ ॥
आसक्ता क्षुद्रकार्येषु दुःखार्त्ता चञ्चलाऽपि च ।
एतासां स्तन्यपानेन शिशुर्भवति सामयः ॥ २९ ॥

अथ बालस्य स्तन्यपानविधिमाह—

तत्र माता प्रशस्ताङ्गी चारुवस्त्रा पुरोमुखी ।
उपविश्यासने सम्यग्दक्षिणं स्तनमम्बुना ॥ ३० ॥

प्रक्षाल्येषत्परिस्राव्य मन्त्राभ्याममभिमन्त्रितम् ।
उदङ्मुखं शिशुं क्रोडे शनैः सन्धाय पाययेत् ॥ ३१ ॥

*माता = इत्युपलक्षणम् । धात्री चेषत्परिस्राव्य ॥ ३१ ॥

अन्यथा वैगुण्यमाह सुश्रुतः—

अस्रावितं स्तनं बालः पिबन्स्तन्येन भूयसा ।
पूर्णस्रोता वमीकासश्वासैर्भवति पीडितः ॥ ३२ ॥

अथ स्तन्याभिमन्त्रणमाह—

क्षीरनीरनिधिस्तेऽस्तु स्तनयोः क्षीरपूरकः ।
सदैव सुभगो बालो भवत्वेष महाबलः ॥ ३३ ॥
पयोऽमृतसमं पीत्वा कुमारस्ते शुभानने ! ।
दीर्घमायुरवाप्नोतु देवाः प्राप्यामृतं यथा ॥ ३४ ॥

*इमौ मन्त्रौ पित्रा अन्येन वा ब्राह्मणेन पठनीयौ । यावद् मन्त्रपाठस्तावद् मात्रा धात्र्या वा दक्षिणहस्तेन दक्षिणस्तनस्पर्शः कार्यः ॥ ३३ ॥ ३४ ॥

अथ जनन्याः क्षीराभावे धात्र्याश्चालाभे प्रकारमाह—

क्षीरसात्म्यतया क्षीरमाजं गव्यमथापि वा ।
दद्यादास्तन्यपर्याप्तेर्बालेभ्यो वीक्ष्य मात्रया ॥ ३५ ॥

*क्षीरसात्म्यतयेति । यतः शिशोः क्षीरमेव सात्म्यं भवति न त्वन्नादिकम् । आस्तन्यपर्याप्तेरिति । यावत् स्त्रियाः स्तन्यस्य समन्ततोभावेन प्राप्तिर्भवति । अथवा यावत् स्तन्यपानस्य योग्यता भवेदित्यर्थः ॥ ३५ ॥

अथ बालस्यान्नप्राशनसमयमाह—

यथोक्तविधिना बालं मासि षष्ठेऽष्टमेऽपि च ।
अन्नं सम्प्राशयेत्किञ्चित्ततस्तद्वर्धयेत् क्रमात् ॥ ३६ ॥

अथ बालस्य परिचर्याविधिमाह—

बालमङ्के सुखं दध्यान्न चैनं तर्जयेत्क्वचित् ।
सहसा बोधयेन्नैव नायोग्यमुपवेशयेत् ॥ ३७ ॥

*अयोग्यमुपवेशनासमर्थम् ॥ ३७ ॥

नाकृष्य स्थापयेत्क्रोडे न क्षिप्रं शयने क्षिपेत् ।

रोदयेन्न क्व चित्कार्य्यं विधिमावश्यकं विना ॥ ३८ ॥

*आवश्यको विधिः=भेषजदानतैलाभ्यङ्गोद्वर्त्तनादिः ॥ ३८ ॥

तच्चित्तमनुवर्त्तेत तं सदैवानुमोदयेत् ।
वातातपतडिद्वृष्टिधूमानलजलादितः ।
निम्नोच्चस्थानतश्चापि रक्षेद्बालं प्रयत्नतः ॥३६॥

अथ बालस्य स्वभावतो हितान्याह—

अभ्यङ्गोद्वर्त्तनस्नानं नेत्रयोरञ्जनं तथा ॥
वसनं मृदु यत्तच्च तथा मृद्वनुलेपनम् ।
जन्मप्रभृति पथ्यानि बालस्यैतानि सर्वथा ॥ ४० ॥

अथ बालस्य कवलादेः समयमाह—

कवलः पञ्चमाद्वर्षादष्टमान्नस्यकर्म्म च ।
विरेकः षोडशाद्वर्षाद्विंशतेश्चैव मैथुनम् ॥ ४१ ॥

अथ बाल्यादेरवधिमाह सुश्रुतः—

वयस्तु त्रिविधं बाल्यं मध्यमं वार्धकं तथा ।
ऊनषोडशवर्षस्तु नरो बालो निगद्यते ॥ ४२ ॥
त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथाऽन्नभुक् ।
दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्द्वयम् ॥ ४३ ॥
तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधा मतः ।
मध्ये षोडशसप्तत्योर्मध्यमः कथितो बुधैः ॥ ४४ ॥
चतुर्धा मध्यमं वृद्धियुवपूर्णक्षयान्वितम् ।
भवेदाविंशतेर्वृद्धिर्युवा त्वात्रिंशतो मतः ॥ ४५ ॥
चत्वारिंशत्समा यावत्तिष्ठेद्वीर्य्यादिपूरितः ।
ततः क्रमेण क्षीणः स्याद्यावद्भवति सप्ततिः ॥ ४६ ॥

*वीर्य्यादीत्यादिशब्देन रसादिसर्वधात्विन्द्रियबलोत्साहा उच्यन्ते । क्षीणः=सर्वधात्विन्द्रियबलोत्साहैर्हीनः ॥ ४६ ॥

ततस्तु सप्ततेरूर्ध्वं क्षीणधातुरसादिकः ।
क्षीयमाणेन्द्रियबलः क्षीणरेता दिने दिने ॥ ४७ ॥
बलीपलितखालित्ययुक्तः कर्मसु चाक्षमः ।

कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः ॥४८॥
बाल्ये विवर्धते श्लेष्मा पित्तं स्यान्मध्यमेऽधिकम् ।
वार्धके वर्द्धते वायुर्विचार्य्यैतदुपक्रमेत् ॥ ४६ ॥

*उपक्रमेत् = चिकित्सेत् ॥ ४६ ॥

तन्त्रान्तरे तु—

बाल्यं वृद्धिश्छविर्मेधा त्वग्दृष्टिः शुक्रविक्रमौ ।
बुद्धिः कर्मेन्द्रियं चेतो जीवितं दशतो ह्रसेत् ॥ ५० ॥

अथ प्रकृतिलक्षणान्याह--

सप्त प्रकृतयो नृणां वातात्पित्तात्कफात्तथा ।
संसर्गात्सन्निपाताच्च भवन्ति भिषजां मते ॥ ५१ ॥
शुक्रशोणितसंयोगे यो दोषस्तूत्कटो भवेत् ।
प्रकृतिर्जायते तेन तस्या लक्षणमुच्यते ॥ ५२ ॥

वाग्भटे तु आत्रेयादयः--

शुक्रासृग्गर्भिणीभोज्यचेष्टागर्भाशयार्त्तिषु ।
यः स्याद्दोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता ॥५३॥

*सोऽपि दोषः स्वभावावस्थितो न तु दुष्टः, दुष्टेन तु शुक्रशोणितयोर्दुष्टौ शुद्धगर्भासम्भवात् ॥ ५३ ॥

अथ वातादिप्रकृतयस्तत्रादौ वातप्रकृतिलक्षणमाह—

जागरूकोऽल्पकेशश्च स्फुटिताङ्घ्रिकरः कृशः ॥ ५४ ॥
शीघ्रगो बहुवाग् रूक्षः स्वप्ने वियति गच्छति ।
एवंविधः स विज्ञेयो वातप्रकृतिको नरः ॥ ५५ ॥

अथ पित्तप्रकृतिलक्षणमाह-

पित्तप्रकृतिको लोको यादृशोऽथ निगद्यते ।
अकालपलितो गौरः क्रोधी स्वेदी च बुद्धिमान् ॥५६॥
बहुभुक्ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति ।
एवंविधो भवेद्यस्तु पित्तप्रकृतिको नरः ॥ ५७ ॥

अथ श्लेष्मप्रकृतिलक्षणमाह-

श्यामकेशः क्षमी स्थूलो बहुवीर्यो महाबलः ।
स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः ॥ ५८ ॥

अथ द्वन्द्वजत्रिदोषजप्रकृतिलक्षणमाह—

दृश्यते प्रकृतौ यत्र रूपं दोषद्वयस्य तु।
द्विसंसर्गेण जानीयात्सर्वलिङ्गैस्त्रिदोषजम्॥ ५६॥

अथ वातप्रकृतिलक्षणानि वाग्भटे—

विभुत्वादाशुकारित्वाद् बलित्वादन्यकोपनात्।
स्वातन्त्र्याद् बहुरोगत्वाद्दोषाणां प्रबलोऽनिलः॥ ६०॥

प्रायोऽत एव पवनाध्युषिता मनुष्या दोषात्मकाः स्फुटितधूसरकेशगात्राः।
शीतद्विषश्चलधृतिस्मृतिबुद्धिचेष्टासौहार्ददृष्टिगतयोऽतिबहुप्रलापाः॥६१॥
अल्पपित्तबलजीवितनिद्राः सन्नसक्तचलजर्जरवाचः।
नास्तिका बहुभुजः सविलासा गीतहास्यमृगयाकलिलोलाः॥६२॥
मधुराम्लकटूष्णसात्म्यकांक्षाः कृशदीर्घाकृतयः सशब्दयाताः।
न दृढा न जितेन्द्रिया न चार्या न च कान्तादयिता बहुप्रजा वा॥६३॥
नेत्राणि चैषां खरधूसराणि वृत्तान्यचारूणि मृतोपमानि।
उन्मीलितानीव भवन्ति सुप्ते शैलद्रुमांस्ते गगनं च यान्ति॥६४॥
अधन्या मत्सराध्माताः स्तेनाः प्रोद्बद्धपिण्डिकाः।
श्वश्रृगालोष्ट्रगृध्राखुकाकानूकाश्च वातिकाः॥ ६५॥

अथ पित्तप्रकृतिलक्षणान्याह—

पित्तं वह्निर्वह्निजं वा यदस्मात्पित्तोद्रिक्तस्तीक्ष्णतृष्णाबुभुक्षः।
गौरोष्णाङ्गस्ताम्रहस्ताङ्घ्रिवक्त्रः शूरो मानी पिङ्गकेशोऽल्परोमा॥६६॥
दयितमाल्यविलेपनमण्डनः सुचरितः शुचिराश्रितवत्सलः।
विभवसाहसबुद्धिबलान्वितो भवति भीषु गतिर्द्विषतामपि॥ ६७॥
मेधावी प्रशिथिलसन्धिबन्धमांसो नारीणामनभिमतोऽल्पशुक्रकामः।
आवासः पलिततरङ्गनीलिकानां भुङ्क्तेऽन्नं मधुरकषायतिक्तशीतम्॥६८॥
घर्मद्वेषी स्वेदनः पूतिगन्धिर्भूर्य्युच्चारक्रोधपानाशनेर्ष्यः।
सुप्तः पश्येत्कर्णिकारान्पलाशान्दिग्दाहोल्काविद्युदर्कानलांश्च॥ ६९॥
तनूनि पिङ्गानि चलानि चैषां तन्वल्पपक्ष्माणि हिमप्रियाणि।
क्रोधेन मद्येन रवेश्च भासा रागं व्रजन्त्याशु विलोचनानि॥ ७०॥
मध्यायुषो मध्यबलाः पण्डिताः क्लेशभीरवः।
व्याघ्रर्क्षकपिमार्जारवृकानूकाश्च पैत्तिकाः॥ ७१॥

अथ कफप्रकृतिलक्षणान्याह—

श्लेष्मा सोमः श्लेष्मलस्तेन सौम्यो गूढस्निग्धश्लिष्टसन्ध्यस्थिमांसः।
क्षुत्तृड्दुःखक्लेशधर्मैरतप्तो बुद्ध्या युक्तः सात्त्विकः सत्यसन्धः ॥७२॥
प्रियंगुदूर्वाशरकाण्डदर्भगोरोचनापद्मसुवर्णवर्णः।
प्रलम्बबाहुः पृथुपीनवक्षा महाललाटो घननीलकेशः॥ ७३॥
मृद्वङ्गः समसुविभक्तचारुदेहो बह्वोजोरतिरसशुक्रपुत्रभृत्यः।
धर्मात्मा वदति न निष्ठुरं च जातु प्रच्छन्नं वहति दृढं चिरं च वैरम् ॥७४॥
समदद्विरदेन्द्रतुल्ययातो जलदाम्भोधिमृदङ्गसिंहघोषः।
स्मृतिमानभियोगवान्विनीतो न च बाल्येऽप्यतिरोदनो न लोलः ॥७५॥
तिक्तं कषायं कटुकोष्णरूक्षमल्पं स भुङ्क्ते बलवाँस्तथाऽपि।
रक्तान्तसुस्निग्धविशालदीर्घसुव्यक्तशुक्लासितपक्ष्मलाक्षः॥ ७६॥
अल्पव्याहारक्रोधपानाशनेर्ष्यः प्राज्यायुर्वित्तो दीर्घदर्शी वदान्यः।
श्राद्धो गम्भीरः स्थूललक्षः क्षमावानार्यो निद्रालुर्दीर्घसूत्रः कृतज्ञः ॥७७॥
ऋजुर्विपश्चित्सुभगः सलज्जो भक्तो गुरूणां स्थिरसौहृदश्च।
स्वप्ने सपद्मान्सविहङ्गमालांस्तोयाशयान्पश्यति तोयदांश्च ॥ ७८॥
ब्रह्मरुद्रेन्द्रवरुणतार्क्ष्यहंसगजाधिपैः।
श्लेष्मप्रकृतयस्तुल्यास्तथा सिंहाश्वगोवृषैः॥ ७९॥

ननु प्रकृतिहेतूनां मध्ये योऽधिकः स स्वव्याधीन्कथं न करोतीत्याशंकायामाह—

विषजातो यथा कीटो न विषेण प्रबाध्यते।
तद्वत्प्रकृतयो मर्त्यं शक्नुवन्ति न बाधितुम्॥ ८०॥

*एतौ द्वौ नञौ अपि ईषदर्थे। तेन विषेण विषजदाहादिना ईषत प्रबाध्यते, न तु भृशम्। तथा च प्रकृतयः प्रकृतिहेतवो दोषा बाधितुं न शक्नुवन्ति। करचरणस्फुटितत्वस्वेदनिद्राऽऽधिक्यादिना ईषद्बाधितुं शक्नुवन्त्येव, न तु ज्वरादिभिः॥ ८०॥

प्रकोपो वाऽन्यभावो वा शमो वा नोपजायते।
प्रकृतीनां स्वभावेन जायते तु गतायुषः॥ ८१॥

इति श्रीमिश्रलटकनतनयश्रीमन्मिश्रभावविरचिते भावप्रकाशे बालप्रकरणं चतुर्थम्॥ ४॥

अथ पञ्चमं दिनचर्याऽऽदिप्रकरणम् ॥ ५ ॥

अथ देशमाह—

भूमिदेशस्त्रिधाऽनूपो जांगलो मिश्रलक्षणः ॥ १ ॥

तत्रानूपलक्षणमाह—

नदीपल्वलशैलाढ्यः फुल्लोत्पलकुलैर्युतः ।
हंससारसकारण्डचक्रवाकादिसेवितः ॥ २ ॥
शशवाराहमहिषरुरुरोहिकुलाकुलः ।
प्रभूतद्रुमपुष्पाढ्यो नीलशस्यफलान्वितः ॥ ३ ॥
अनेकशालिकेदारकदलीक्षुविभूषितः ।
अनूपदेशो ज्ञातव्यो वातश्लेष्मामयार्त्तिमान् ॥ ४ ॥

अथ जाङ्गललक्षणमाह—

आकाशसमः उच्चश्च स्वल्पपानीयपादपः ।
शमीकरीरबिल्वार्कपीलुककर्न्धुसङ्कुलः ॥ ५ ॥
हरिणैणर्क्षपृषगोकर्णखरसंकुलः ।
सुस्वादुफलवान्देशो वातलो जांगलः स्मृतः ॥ ६ ॥

तन्त्रान्तरे तु—

बहूदकनगोऽनूपः कफमारुतरोगवान् ।
जाङ्गलोऽल्पाम्बुशाखी च पित्तासृङ्मारुतोत्तरः ॥ ७ ॥

अथ साधारणलक्षणमाह—

संसृष्टलक्षणो यस्तु देशः साधारणो मतः ।
समाः साधारणे यस्माच्छीतवर्षोष्णमारुताः ।
समता तेन दोषाणां तस्मात्साधारणो वरः ॥ ८ ॥

सुश्रुतः—

उचिते वर्त्तमानस्य नास्ति दुर्देशजं भयम् ।
आहारस्वप्नचेष्टाऽऽदौ तद्देशस्य कृते सति ॥ ९ ॥

वृद्धवाग्भटः—

यस्य देशस्य यो जन्तुस्तज्जं तस्यौषधं हितम् ।
देशादन्यत्र वसतस्तत्तुल्यगुणमौषधम् ॥ १० ॥
स्वे देशे निचिता दोषा अन्यस्मिन्कोपमागताः ।

बलवन्तस्तथा न स्युर्जलजाः स्थलजास्तथा ॥ ११ ॥

अथ दिनादिचर्या आह—

मानवो येन विधिना स्वस्थस्तिष्ठते सर्वदा ।
तमेव कारयेद्वैद्यो यतः स्वास्थ्यं सदेप्सितम् ॥ १२ ॥
दिनचर्यां निशाचर्यामृतुचर्यां यथोदिताम् ।
आचरन्पुरुषः स्वस्थः सदा तिष्ठति नान्यथा ॥ १३ ॥

तत्र स्वस्थस्य लक्षणमाह सुश्रुतः—

समदोषः समाग्निश्च समधातुमलक्रियः ।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥ १४ ॥

*क्रिया=अत्र कर्म, तेन समक्रियः=शरीरानुरूपकर्मा ॥ १४ ॥

अथ दिनचर्यामाह—

ब्राह्मे मुहूर्त्ते बुध्येत स्वस्थो रक्षाऽर्थमायुषः ।
तत्र सर्वाघशान्त्यर्थं स्मरेद्धि मधुसूदनम् ॥ १५ ॥
दध्याज्यादर्शसिद्धार्थबिल्वगोरोचनस्रजाम् ।
दर्शनं स्पर्शनं कार्यं प्रबुद्धेन शुभावहम्॥ १६ ॥
स्वमाननं घृते पश्येद् यदीच्छेच्चिरजीवितम् ॥
आयुष्यमुषसि प्रोक्तं मलादीनां विसर्जनम् ।
तदन्त्रकूजनाध्मानोदरगौरववारणम् ॥ १७ ॥

*आदिशब्देन वातमूत्रादीनां ग्रहणम् ॥ १७ ॥

अथ पुरीषवेगाभिघाताद्धानिमाह

आटोपशूलौ परिकर्त्तिका च सङ्गः पुरीषस्य तथोर्ध्ववातः ।
पुरीषमास्यादथवा निरेति पुरीषवेगेऽभिहते नरस्य ॥१८॥

*परिकर्त्तिका=गुदे परिकर्त्तनवत्पीडा । पुरीषस्य सङ्गः=निरोधः । ऊर्ध्ववातः=उद्गारबाहुल्यम् ॥ १८ ॥

अथ वातनिग्रहजान् दोषानाह—

वातमूत्रपुरीषाणां सङ्गो ध्मानं क्लमो रुजा ।
जठरे वातजाश्चान्ये रोगाः स्युर्वातनिग्रहात् ॥ १९ ॥

अथ मूत्रनिग्रहजान् दोषानाह—

वस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा ।

विनामो वङ्क्षणानाहः स्याल्लिङ्गं मूत्रनिग्रहे ॥ २० ॥

*विनामः=शरीरस्य नम्रता । वङ्क्षणानाहः=वङ्क्षणस्याकर्षणवत्पीडा ॥ २० ॥

न वेगितोऽन्यकार्यः स्यान्न वेगानीरयेद्बलात् ।
कामशोकभयक्रोधान्मनोवेगान्विधारयेत् ॥ २१ ॥
गुदादिमलमार्गाणां शौचं कान्तिबलप्रदम् ।
पवित्रकरमाख्यातमलक्ष्मीकलिपापहृत् ॥ २२ ॥
प्रक्षालनं मतं पाण्योः पादयोः शुद्धिकारणम् ।
मलश्रमहरं वृष्यं चक्षुष्यं राक्षसापहम् ॥ २३ ॥

अथ दन्तधावनविधिमाह—

भक्षयेद्दन्तपवनं द्वादशाङ्गुलमायतम् ।
कनिष्ठिकाऽग्रवत्स्थूलमृज्वग्रन्थि तथाऽव्रणम् ॥ २४ ॥
एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन तु ।
दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन् ॥ २५ ॥
क्षौद्रत्रिकटुकाक्तेन तैलसिन्धुभवेन वा ।
चूर्णेन तेजोवत्याश्च दन्तान्नित्यं विशोधयेत् ॥ २६ ॥

*तेजोवती=तेजवल्कल इति लोके प्रसिद्धा ॥ २६ ॥

मधूको मधुरे श्रेष्ठः करञ्जः कटुके तथा ।
निम्बः स्यात्तिक्तके श्रेष्ठः कषाये खदिरस्तथा ॥ २७ ॥
समयं तु समालोक्य दोषं च प्रकृतिं तथा ।
यथोचितै रसैर्वीर्यैर्युक्तं द्रव्यं प्रयोजयेत् ॥ २८ ॥
तेनास्य मुखवैरस्यदन्तजिह्वाऽऽस्यजा गदाः ।
रुचिवैशद्यलघुता न भवन्ति भवन्ति च ॥ २९ ॥
अर्के वीर्यं वटे दीप्तिः करञ्जे विजयो भवेत् ।
प्लक्षे चैवार्थसम्पत्तिर्बदर्यां मधुरो ध्वनिः ॥ ३० ॥
खदिरे मुखसौगन्ध्यं बिल्वे तु विपुलं धनम् ।
उदुम्बरे तु वाक्सिद्धिराम्रे त्वारोग्यमेव च ॥ ३१ ॥
कदम्बे तु धृतिर्मेधा चम्पके च दृढा मतिः ।

शिरीषे कीर्त्तिसौभाग्यमायुरारोग्यमेव च ॥ ३२ ॥
अपामार्गे धृतिर्मेधा प्रज्ञाशक्तिस्तथाऽसने ।
दाडिम्यां सुन्दराकारः ककुभे कुटजे तथा ॥ ३३ ॥
जातीतगरमन्दारैर्दुःस्वप्नं च विनश्यति ॥ ३४ ॥

अथ तृणराजसंज्ञकान् वृक्षानाह—

गुवाकस्तालहिन्तालौ केतकश्च बृहत्तृणः ।
खजूरं नारिकेलं च सप्तैते तृणराजकाः ॥ ३५ ॥

अथ तृणराजदन्तधावननिषेधमाह--

तृणराजसमुत्पन्नं यः कुर्याद्दन्तधावनम् ।
नरश्चाण्डालयोनिः स्याद्यावद्गङ्गां न पश्यति ॥ ३६ ॥

अथ दन्तधावनानर्हजनानाह—

न खादेद्गलताल्वोष्ठजिह्वादन्तगदेषु तत् ।
मुखस्य पाके शोथे च श्वासकासवमीषु च ॥ ३७ ॥
दुर्बलोऽजीर्णभुक्त*श्च हिक्कामूर्च्छामदान्वितः ।
शिरोरुजार्त्तस्तृषितः श्रान्तः पानक्लमान्वितः ॥ ३८ ॥
अर्दितः कर्णशूली च नेत्ररोगी नवज्वरी ।
वर्जयेद्दन्तकाष्ठं तु हृदामययुतोऽपि च ॥ ३९ ॥

*अजीर्णभुक्तः-न जीर्णं भुक्तं यस्य सः ॥ ३८ ॥ ३९ ॥

अथ जिह्वानिर्लेखनमाह—

जिह्वानिर्लेखनं हैमं राजतं ताम्रजं तथा ।
पाटितं मृदु तत्काष्ठं मृदुपत्रमयं तथा ॥ ४० ॥
दशाङ्गुलं मृदु स्निग्धं तेन जिह्वां लिखेत्सुखम् ।
तज्जिह्वामलवैरस्यदुर्गन्धजडताहरम् ॥ ४१ ॥

*तत्काष्ठं=दन्तशोधनयोग्यं काष्ठम् ॥ ४० ॥ ४१ ॥

अथ मुखगण्डूषमाह—

गण्डूषमपि कुर्वीत शीतेन पयसा मुहुः ।
कफतृष्णामलहरं मुखान्तःशुद्धिकारकम् ॥ ४२ ॥
सुखोष्णोदकगण्डूषः कफारुचिमलापहः ।
दन्तजाड्यहरश्चापि मुखलाघवकारकः ॥ ४३ ॥

अथ गण्डूषानर्हजनानाह—

विषमूर्च्छामदार्त्तानां शोषिणां रक्तपित्तिनाम् ।
कुपिताक्षिमलक्षीणरूक्षाणां स न शस्यते ॥ ४४ ॥

*सः=सुखोष्णोदकगण्डूषः ॥ ४४ ॥

अथ मुखप्रक्षालनगुणानाह—

मुखप्रक्षालनं शीतपयसा रक्तपित्तजित् ।
मुखस्य पिडिकाशोषनीलिकाव्यङ्गनाशनम् ॥ ४५ ॥
कुर्याद्वाऽपि कदुष्णेन पयसाऽऽस्यविशोधनम् ।
कफवातहरं स्निग्धं मुखशोषविनाशनम् ॥ ४६ ॥

अथ नस्यविधिमाह—

कटुतैलादि नस्यार्थे नित्याभ्यासेन योजयेत् ।
प्रातः श्लेष्मणि मध्याह्ने पित्ते सायं समीरणे ॥ ४७ ॥
सुगन्धवदनाः स्निग्धनिस्वना विमलेन्द्रियाः ।
निर्वलीपलितव्यङ्गा भवेयुर्नस्यशीलिनः ॥ ४८ ॥

अथाञ्जनविधिमाह—

सौवीरमञ्जनं नित्यं हितमक्ष्णोस्ततो भजेत ।
लोचने भवतस्तेन मनोज्ञे सूक्ष्मदर्शने ॥ ४९ ॥

*सौवीरं="श्वेतसुरमा" इति लोके प्रसिद्धम् ॥ ४९ ॥

स्रोतोऽञ्जनं मतं श्रेष्ठं विशुद्धं सिन्धुसम्भवम् ।
दृष्टेः कण्डूमलहरं दाहक्लेदरुजाऽपहम् ॥ ५० ॥
अक्ष्णो रूपावहं चैव सहते मारुतातपौ ।
नेत्रे रोगा न जायन्ते तस्मादञ्जनमाचरेत ॥ ५१ ॥

*स्रोतोऽञ्जनं="कृष्णसुर्मा" इति लोके । विशुद्धं शोधनं विनाऽपि । सिन्धुसम्भवं=सिन्धुनामा पर्वतस्तत्र सम्भवम् ॥ ५०-५१ ॥

अथाञ्जनायोग्यजनानाह—

रात्रौ जागरितः श्रान्तश्छर्दितो भुक्तवांस्तथा ।
ज्वरातुरः शिरःस्नातो नाक्ष्णोरञ्जनमाचरेत् ॥ ५२ ॥

अथ नखादिकर्त्तनविधिमाह—

पञ्चरात्रान्नखश्मश्रुकेशरोमाणि कर्त्तयेत् ।

केशश्मश्रुनखादीनां कर्त्तनं सम्प्रसाधनम् ॥
पौष्टिकं धन्यमायुष्यं शौचकान्तिकरं परम् ॥ ५३ ॥

*सम्प्रसाधनं = शोभाजनकम् ॥ ५३ ॥

अथ नासालोमोत्पाटने दोषमाह—

उत्पाटयेत्तु लोमानि नासाया न कदा चन ।
तदुत्पाटनतो दृष्टेर्दौर्बल्यं त्वरया भवेत् ॥ ५४ ॥

अथ केशप्रसाधनगुणानाह—

केशपाशे प्रकुर्वीत प्रसाधन्या प्रसाधनम् ।
केशप्रसाधनं केश्यं रजोजन्तुमलापहम् ॥ ५५ ॥

अथ दर्पणालोकनगुणानाह—

आदर्शालोकनं प्रोक्तं मङ्गल्यं कान्तिकारकम् ।
पौष्टिकं बल्यमायुष्यं पापालक्ष्मीविनाशनम् ॥ ५६ ॥

अथ व्यायामगुणानाह—

लाघवं कर्मसामर्थ्यं विभक्तघनगात्रता ।
दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते ॥ ५७ ॥
व्यायामदृढगात्रस्य व्याधिर्नास्ति कदा चन ।
विरुद्धं वा विदग्धं वा भुक्तं शीघ्रं विपच्यते ॥ ५८ ॥
भवन्ति शीघ्रं नैतस्य देहे शिथिलताऽऽदयः ।
न चैवं सहसाऽऽक्रम्य जरा समधिरोहति ॥ ५९ ॥
न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षकम् ।
स सदा गुणमाधत्ते बलिनां स्निग्धभोजिनाम् ॥ ६० ॥
वसन्ते शीतसमये सुतरां स हितो मतः ।
अन्यदाऽपि च कर्त्तव्यो बलार्धेन यथाबलम् ॥ ६१ ॥

अथ बलार्धस्य लक्षणमाह—

हृदयस्थो यदा वायुर्वक्त्रं शीघ्रं प्रपद्यते ।
मुखं च शोषं लभते तद्बलार्धस्य लक्षणम् ॥ ६२ ॥
किं वा ललाटे नासायां गात्रसन्धिषु कक्षयोः ।
यदा संजायते स्वेदो बलार्धं तु तदाऽऽदिशेत् ॥ ६३ ॥

अथ व्यायामअयोग्यजनानाह—

भुक्तवान्कृतसम्भोगः कासी श्वासी कृशः क्षयी ।
रक्तपित्ती क्षती शोषी न तं कुर्यात्कदा चन ॥ ६४ ॥

अथातिव्यायामदोषानाह—

अतिव्यायामतः कासो ज्वरश्छर्दिः श्रमः क्लमः ।
तृष्णा क्षयः प्रतमको रक्तपित्तं च जायते ॥ ६५ ॥

अथाभ्यङ्गगुणानाह—

अभ्यङ्गं कारयेन्नित्यं सर्वेष्वङ्गेषु पुष्टिदम् ।
शिरःश्रवणपादेषु तं विशेषेण शीलयेत् ॥ ६६ ॥
सार्षपं गन्धतैलं च यत्तैलं पुष्पवासितम् ।
अन्यद्रव्ययुतं तैलं न दुष्यति कदा चन ॥ ६७ ॥

*गन्धतैलं = गन्धद्रव्याणामगुर्वादीनामग्नियोगेन निष्कासितः—स्नेहः ॥ ६७ ॥

अथ सर्वाङ्गेष्वभ्यङ्गगुणानाह—

अभ्यङ्गो वातकफहृच्छ्रमशान्तिबलं सुखम् ।
निद्रावर्णमृदुत्वायुष्कुरुत देहपुष्टिकृत् ॥ ६८ ॥

अथ शिरस्यभ्यङ्गगुणानाह—

अभ्यङ्गः शीलितो मूर्ध्नि सकलेन्द्रियतर्पकः ।
दृष्टिपुष्टिकरो हन्ति शिरोभूमिगतान्गदान् ॥ ६९ ॥
केशानां बहुतां दार्ढ्यं मृदुतां दीर्घतां तथा ।
कृष्णतां कुरुते कुर्याच्छिरसः पूर्णतामपि ॥ ७० ॥

अथ कर्णयोस्तैलपूरणगुणानाह—

न कर्णरोगा न मलं न च मन्याहनुग्रहः ।
नोच्चैःश्रुतिर्न बाधिर्यं स्यान्नित्यं कर्णपूरणात् ॥ ७१ ॥

अथ कर्णयोस्तैलादिपूरणस्य योग्यसमयमाह—

रसाद्यैः पूरणं कर्णे भोजनात्प्राक्प्रशस्यते ।
तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते ॥ ७२ ॥

अथ पादाभ्यङ्गगुणानाह—

पादाभ्यङ्गश्च तत्स्थैर्यनिद्रादृष्टिप्रसादकृत् ।

पादसुप्तिश्रमस्तम्भसङ्कोचस्फुटनप्रणुत् ॥ ७३ ॥
व्यायामक्षुण्णवपुषं पद्भ्यां सम्मर्दितं तथा ।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ॥ ७४ ॥

अथ स्नेहयुक्तावगाहनगुणानाह—

लोमकूपशिराजालधमनीभिः कलेवरे ।
तर्पयेद्बलमाधत्ते स्नेहयुक्तोऽवगाहने ॥ ७५ ॥
अद्भिः संसिक्तमूलानां तरूणां पल्लवादयः ।
वर्द्धन्ते हि तथा नृणां स्नेहसंसिक्तधातवः ॥ ७६ ॥

अथाभ्यङ्गायोग्यजनानाह—

नवज्वरी अजीर्णी च नाभ्यक्तव्यः कथञ्चन ।
तथा विरिक्तो वान्तश्च निरूढो यश्च मानवः ॥ ७७ ॥

*निरूढः=दत्तो निरूहबस्तिर्यस्मै सः ॥ ७७ ॥

पूर्वयोः कृच्छ्रताव्याधेरसाध्यत्वमथापि वा ।
शेषाणां च त्विह प्रोक्ता वह्निसादादयो गदाः ॥ ७८ ॥

*पूर्वयोः=तरुणज्वरिणोऽजीर्णिनश्च ॥ ७८ ॥

अथोद्वर्त्तनगुणानाह—

उद्वर्त्तनं कफहरं मेदोघ्नं शुक्रदं परम् ।
बल्यं शोणितकृच्चापि त्वक्प्रसादमृदुत्वकृत् ॥ ७९ ॥
मुखलेपाद् दृढं चक्षुः पीनो गण्डस्तथाऽऽननम् ।
कान्तमव्यङ्गपिडकं भवेत्कमलसन्निभम् ॥ ८० ॥

अथ स्नानविधिमाह—

दीपनं वृष्यमायुष्यं स्नानमोजोबलप्रदम् ।
कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाप्मनुत् ॥ ८१ ॥
बाह्यैश्च सेकैः शीताद्यैरूष्माऽन्तर्याति पीडितः ।
नरस्य स्नातमात्रस्य दीप्यते तेन पावकः ॥ ८२ ॥
शीतेन पयसा स्नानं रक्तपित्तप्रशान्तिकृत् ।
तदेवोष्णेन तोयेन बल्यं वातकफापहम् ॥ ८३ ॥
शिरःस्नानमचक्षुष्यमत्युष्णेनाम्बुना सदा ।
वातश्लेष्मप्रकोपे तु हितं तच्च प्रकीर्त्तितम् ॥ ८४ ॥

अशीतेनाम्भसा स्नानं पयःपानं नवाः स्त्रियः ।
एतद्वो मानवाः ! पथ्यं स्निग्धमल्पं च भोजनम् ॥ ८५ ॥
*हरिश्चन्द्रस्यैतत् ॥ ८५ ॥

अथामलकैः स्नानस्य गुणानाह—

यः सदाऽऽमलकैः स्नानं करोति स विनिश्चितम् ।
वलीपलितनिर्मुक्तो जीवेद्वर्षशतं नरः ॥ ८६ ॥

अथ स्नानानर्हजनानाह—

स्नानं ज्वरेऽतिसारे च नेत्रकर्णानिलार्त्तिषु ।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ॥ ८७ ॥

अथ स्नानोत्तरं वस्त्रेणाङ्गमार्जनस्य गुणानाह—

स्नानस्यानन्तरं सम्यग् वस्त्रेणाङ्गस्य मार्जनम् ।
कान्तिप्रदं शरीरस्य कण्डूत्वग्दोषनाशनम् ॥ ८८ ॥

अथ वस्त्रधारणगुणानाह ।

तत्रादौ शीतकाले धारणार्हवस्त्राणि तद्‌गुणवर्णनपूर्वकमाह—

कौशेयौर्णिकवस्त्रं च रक्तवस्त्रं तथैव च ।
वातश्लेष्महरं तत्तु शीतकाले विधारयेत् ॥ ८९ ॥
*कौशेयं = पट्टाम्बरं तसरवस्त्रं च ॥ ८९ ॥

अथोष्णकाले धारणार्हवस्त्राणि तद्‌गुणांश्चाह—

मेध्यं सुशीतं पित्तघ्नं कषायं वस्त्रमुच्यते ।
तद्धारयेदुष्णकाले तत्रापि लघु शस्यते ॥ ९० ॥
*कषायं = "कौङ्कुमी" इति लोके, कषायरागरक्तं वा ॥ ९० ॥

अथ वर्षाकाले धारणार्हवस्त्राणि तद्‌गुणांश्चाह—

शुक्लं तु शुभदं वस्त्रं शीतातपनिवारणम् ।
न चोष्णं न च वा शीतं तत्तु वर्षासु धारयेत् ॥ ९१ ॥

अथ नवनिर्मलाम्बरधारणगुणानाह—

यशस्यं काम्यमायुष्यं श्रीमदानन्दवर्धनम् ।
त्वच्यं वशीकरं रुच्यं नवनिर्मलमम्बरम् ॥ ९२ ॥
*काम्यं = कामोद्दीपकम् ॥ ९२ ॥

अथ मलिनवस्त्रधारणदोषानाह—

कदाऽपि न जनैः सद्भिर्धार्यं मलिनमम्बरम् ।
तत्तु कण्डूकृमिकरं ग्लान्यलक्ष्मीकरं परम् ॥ ९३ ॥

*अलक्ष्मीः = अशोभा दारिद्र्यं च ॥ ९३ ॥

अथ प्रलेपगुणानाह,

तत्रादौ शीतकाले प्रलेपार्हद्रव्यगुणानाह—

कुङ्कुमं चन्दनं चापि कृष्णागुरु च मिश्रितम् ।
उष्णं वातकफध्वंसि शीतकाले तदिष्यते ॥ ९४ ॥

अथोष्णकाले प्रलेपनार्हद्रव्यगुणानाह—

चन्दनं घनसारेण बालकेन च मिश्रितम् ।
सुगन्धि परमं शीतमुष्णकाले प्रशस्यते ॥ ९५ ॥

*घनसारः = कर्पूरः, बालकं = ह्रीबेरम् ॥ ९५ ॥

अथ वर्षाकाले प्रलेपार्हद्रव्यगुणानाह—

चन्दनं घुसृणोपेतं मृगनाभिसमायुतम् ।
न चोष्णं न च वा शीतं वर्षाकाले तदिष्यते ॥ ९६ ॥

*घुसृणं = कुङ्कुमम् । मृगनाभिः = कस्तूरी ॥ ९६ ॥

अथ सामान्यतोऽनुलेपगुणवर्णनपूर्वकं तदनर्हजनमप्याह—

अनुलेपस्तृषामूर्च्छादुर्गन्धस्वेददाहजित् ।
सौभाग्यतेजस्त्वग्वर्णप्रीत्यौजोबलवर्धनः ॥
स स्नानानर्हलोकानामनुलेपोऽपि नो हितः ॥ ९७ ॥

अथ पुष्पाभरणादिधारणगुणानाह, तत्रादौ सुगन्धिपुष्पपत्रधारणगुणानाह—

सुगन्धिपुष्पपत्राणां धारणं कान्तिकारकम् ।
पापरक्षोग्रहहरं कामदं श्रीविवर्द्धनम् ॥ ९८ ॥

अथ भूषणधारणगुणानाह, तत्रादौ काञ्चनधारणगुणानाह—

भूषणैर्भूषयेदङ्गं यथायोग्यं विधानतः ।
शुचिसौभाग्यसन्तोषदायकं काञ्चनं स्मृतम् ॥ ९९ ॥

अथ रत्नाभरणधारणगुणानाह—

ग्रहदृष्टिहरं पुष्टिकरं दुःस्वप्ननाशनम् ।
पापदौर्भाग्यशमनं रत्नाभरणधारणम् ॥ १०० ॥

अथ सूर्यादिनवग्रहप्रीतिकराणि रत्नान्याह—

माणिक्यं तरणेः सुजातममलं मुक्ताफलं शीतगो-
र्माहेयस्य च विद्रुमो निगदितः सौम्यस्य गारुत्मतम् ।
देवेज्यस्य च पुष्परागमसुराचार्यस्य वज्रं शने-
र्नीलं निर्मलमन्ययोश्च गदिते गोमेदवैदूर्यके ॥ १०१ ॥

अथ वस्त्रशृङ्गाररत्नानां धारणगुणानाह—

वासःशृङ्गाररत्नानां धारणं प्रीतिवर्धनम् ।
रक्षोघ्नमर्थ्यमोजस्यं सौभाग्यकरमुत्तमम् ॥ १०२ ॥

अथ सिद्धमन्त्रमहौषध्यादिधारणगुणानाह—

सततं सिद्धमन्त्रस्य महौषध्यास्तथैव च ।
रोचनासर्षपादीनां मङ्गल्यानां च धारणम् ॥ १०३ ॥
आयुर्लक्ष्मीकरं रक्षोहरं मङ्गलदं शुभम् ।
हिंस्रादिभयविध्वंसि वशीकरणकारणम् ॥ १०४ ॥

अथ भोजनविधिमाह,

तत्रादौ भोजनकाले मङ्गलवस्तुदर्शनगुणानाह—

ततो भोजनवेलायां कुर्यान्मङ्गल्यदर्शनम् ।
तस्य प्रदर्शनं नित्यमायुर्धर्मविवर्धनम् ॥ १०५ ॥

अथ मङ्गलवस्तून्याह—

लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
पुष्पस्रक्सर्पिरादित्य आपो राजा तथाऽष्टमः ॥ १०६ ॥

अथ पादुकाधारणगुणानाह—

पादुकाधारणं कुर्यात्पूर्वं भोजनतः परम् ।
पादरोगहरं वृष्यं चक्षुष्यं चायुषो हितम् ॥ १०७ ॥

अथ क्षुत्तृडाद्यवरोधे हानिमाह—

शरीरे जायते नित्यं वाञ्छा नृणां चतुर्विधा ।
बुभुक्षा च पिपासा च सुषुप्सा च रतिस्पृहा ॥ १०८ ॥

अथ भोजनेच्छाविघाते हानिमाह—

भोजनेच्छाविघातात्स्यादङ्गमर्दोऽरुचिः श्रमः ।
तन्द्रा लोचनदौर्बल्यं धातुदाहो बलक्षयः ॥ १०९

अथ जलपानेच्छाविघाते हानिमाह—

विघातेन पिपासायाः शोषः कण्ठास्ययोर्भवेत् ।
श्रवणस्यावरोधश्च रक्तशोषो हृदि व्यथा ॥ ११० ॥

अथ स्वापेच्छाविघाते हानिमाह—

निद्राविघाततो जृम्भा शिरोलोचनगौरवम् ।
अङ्गमर्दस्तथा तन्द्रा स्यादन्नापाक एव च ॥ १११ ॥

अथ बुभुक्षायां सत्यामपि भोजनाकरणे दोषमाह—

बुभुक्षितो न योऽश्नाति तस्याहारेन्धनक्षयात् ।
मन्दीभवति कायाग्निर्यथा चाग्निर्निरिन्धनः ॥ ११२ ॥
आहारं पचति शिखी दोषानाहारवर्जितः ।
पचेद् दोषक्षये धातून्प्राणान्धातुक्षयेऽपि च ॥ ११३ ॥

अथ भोजनकरणे गुणानाह—

आहारः प्रीणनः सद्यो बलकृद् देहधारणः ।
स्मृत्यायुःशक्तिवर्णौजःसत्त्वशोभाविवर्धनः ॥ ११४ ॥

अथ भोजनसमयमाह —

अथोक्तगुणसम्पन्नं नरः सेवेत भोजनम् ।
विचार्य्य दोषकालादीन्कालयोरुभयोरपि ॥ ११५ ॥

*उभयोः कालयोः=प्रातः सायं च ॥ ११५ ॥

तथा च ।

सायं प्रातर्मनुष्याणामशनं श्रुतिबोधितम् ।
नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः ॥ ११६ ॥

प्रातः-प्रथमयामादुपरि द्वितीययामादर्वाक् तदेवोत्तरत्राह—

तथा च—

याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः ॥ ११७ ॥

अन्यच्च—

क्षुत्सम्भवति पक्वेषु रसदोषमलेषु च ।
काले वा यदि वाऽकाले सोऽन्नकाल उदाहृतः ॥ ११८ ॥

अथ जीर्णाहारस्य लक्षणमाह—

उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः ।
लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम् ॥ ११९ ॥

अथाहारस्थानमाह—

आहारं तु रहः कुर्यान्निर्हारमपि सर्वदा ।
उभाभ्यां लक्ष्म्युपेतः स्यात्प्रकाशे हीयते श्रिया ॥ १२० ॥

निर्हारो=मलमूत्रात्सर्गः ॥ १२० ॥

अन्यच्च—

आहारनिर्हारविहारयोगाः सदैव सद्भिर्विजने विधेयाः ॥ १२१ ॥

अथ भोजनकाले शुभाशुभदृष्टिमाह—

पितृमातृसुहृद्वैद्यपाककृद्धंसबर्हिणाम् ।
सारसस्य चकोरस्य भोजने दृष्टिरुत्तमा ॥ १२२ ॥
दीनहीनक्षुधाऽऽर्त्तानां पापपाषण्डरोगिणाम् ।
कुक्कुटादेः शुनो दृष्टिर्भोजने नैव शोभना ॥ १२३ ॥

अथ भोजनपात्रमाह—

दोषहृद् दृष्टिदं पथ्यं हैमं भोजनभाजनम् ।
रौप्यं भवति चक्षुष्यं पित्तहृत्कफवातकृत् ॥ १२४ ॥
कांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनम् ।
पैत्तलं वातकृद्रूक्षमुष्णं कृमिकफप्रणुत् ॥ १२५ ॥
आयसे काचपात्रे च भोजनं सिद्धिकारकम् ।
शोथपाण्डुहरं बल्यं कामलाऽपहमुत्तमम् ॥ १२६ ॥
शैलेये मृण्मये पात्रे भोजनं श्रीनिवारणम् ।
दारूद्भवे विशेषेण रुचिदं श्लेष्मकारि च ॥
पात्रं पत्रमयं रुच्यं दीपनं विषपापनुत् ॥ १२७ ॥

अथ जलपात्रमाह—

जलपात्रं तु ताम्रस्य तदभावे मृदो हितम् ॥ १२८ ॥
पवित्रं शीतलं पात्रं रचितं स्फटिकेन यत् ।
काचेन रचितं तद्वत्तथा वैदूर्यसम्भवम् ॥ १२९ ॥

अथ भोजने प्रथमभोज्यपदार्थानाह–

भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम् ।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम् ॥ १३० ॥

*ननु लवणस्य पित्तजनकत्वाद्; आर्द्रकस्य कटुकत्वेन पित्तलत्वाद्; बुभुक्षितस्य वृद्धपित्तस्य कथं प्रथमं लवणार्द्रकभक्षणमुचितम् ?

उच्यते–

"लवणं सैन्धवं ज्ञेयं चन्दनं रक्तचन्दनम्" ।
इति वचनाल्लवणमत्र सैन्धवं, तत् त्रिदोषघ्नम् ।

यत आह गुणग्रन्थे–

सैन्धवं लवणं स्वादु दीपनं पाचनं लघु ।
स्निग्धं रुच्यं हिमं वृष्यं सूक्ष्मं नेत्र्यं त्रिदोषहृत् ॥ १ ॥

*आर्द्रकं तु कटुकमपि न पित्तविरोधि मधुरपाकित्वाद् । यत आह तत्रैव—

आर्द्रिका भेदिनी गुर्वी तीक्ष्णोष्णा दीपनी च सा ।
कटुका मधुरा पाके सूक्ष्मा वातकफापहा ॥ २ ॥

*अथ चान्यदपि–लवणमार्द्रकं च नात्र पित्तविरोधि संयोगस्वभावात् । संयोगस्वरूपं चतादृशम् । भोजनस्य पूर्वं लवणार्द्रकभक्षणबोधकवचनमेव प्रमाणयति ॥ १३० ॥

अथ भोजनादौ दृष्टिदोषविनाशाय ब्रह्मादीनां स्मरणमाह–

तद्यथा—

अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः ।
इति सञ्चिन्त्य भुञ्जानं दृष्टिदोषो न बाधते ॥ १३१ ॥
अञ्जनागर्भसम्भूतं कुमारं ब्रह्मचारिणम् ।
दृष्टिदोषविनाशाय हनुमन्तं स्मराम्यहम् ॥ १३२ ॥

अथ भोजनक्रममाह—

अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसम् ।
मध्येऽम्ललवणौ पश्चात्कटुतिक्तकषायकान् ॥ १३३ ॥
फलान्यादौ समश्नीयाद्दाडिमादीनि बुद्धिमान् ।
विना मोचफलं तद्वद् वर्जनीया च कर्कटी ॥ १३४ ॥

मृणालबिसशालूककन्देक्षुप्रभृतीनपि ।
पूर्वमेव हि भोज्यानि न तु भुक्त्वा कदा चन ॥ १३५ ॥

*मृणालं, = पद्मनालं, बिसं = बिससंज्ञकम् । शालूककन्दः— प्रसिद्धः ॥ १३५ ॥

गुरु पिष्टमयं द्रव्यं तण्डुलान्पृथुकानपि ।
न जातु भुक्तवान्खादेन्मात्रां खादेद् बुभुक्षितः ॥ १३६ ॥
घृतपूर्वं समश्नीयात्कठिनं प्राक् ततो मृदु ।
अन्ते पुनर्द्रवाशी तु बलाद्रोगेण मुञ्चति ॥ १३७ ॥

*अयमर्थः-प्राग् घृतपूर्वं कठिनं समश्नीयाद् यथा काश्यादिवासिनः प्रथमं सव्यञ्जनां घृतपूर्वां रोटिकां भुञ्जन्ते, ततो मृदु ससूपादि ओदनं भुञ्जन्ते, अन्ते पुनर्द्रवाशिनः, भोजनान्ते दधितक्रदुग्धादि भुञ्जन्ते ॥ १३७ ॥

अथ स्वाद्वन्नस्य लक्षणमाह –

यद्यत्स्वादुतरं तत्तद्विदध्यादुत्तरोत्तरम् ।
भुक्त्वा यत्प्रार्थ्यते भूयस्तदुक्तं स्वादु भोजनम् ॥ १३८ ॥

अथ स्वाद्वन्नस्य गुणमाह ।

सौमनस्यं बलं पुष्टिमुत्साहं बृद्धिमायुषः ।
स्वादु सञ्जनयत्यन्नमस्वादु च विपर्ययम् ॥ १३९ ॥

अथात्युष्णान्नादिभोजने दोषानाह –

अत्युष्णान्नं बलं हन्ति शीतं शुष्कं च दुर्जरम् ।
अतिक्लिन्नं ग्लानिकरं युक्तियुक्तं हि भोजनम् ॥ १४० ॥

अथातिद्रुतविलम्बिताशनयोर्दोषानाह ।

अतिद्रुताशिताहारे गुणान्दोषान्न बिन्दति ।
भोज्यं शीतमहृद्यं च स्याद्विलम्बितमश्नतः ॥ १४१ ॥

अथ गुर्वन्नं त्रिविधं तन्निवारयन्नाह –

मन्दानलो नरो द्रव्यं मात्रागुरु विवर्जयेत् ।
स्वभावतश्च गुरु यत्तथा संस्कारतो गुरु ॥ १४२ ॥
मात्रागुरुस्तु मुद्गादिर्माषादिः प्रकृतेर्गुरुः ।
संस्कारगु पिष्टान्नं प्रोक्तमित्युपलक्षणम् ॥ १४३ ॥

अथाहारस्य षाड्विध्यमाह—

आहारं षड्विधं चूष्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्याद्यथोत्तरम् ॥ १४४ ॥

*चूष्यम्=इक्षुदाडिमादि, पेयं=पानकशर्करोदकादि, लेह्यं=रसालाकथिताऽऽदि- क्वथिता 'कढी' इति लोके । भोज्यं=भक्तसूपादि, भक्ष्यं=लड्डुकमोदकादि, चर्व्यं=चिपिटचणकादि ॥ १४४ ॥

अथ स्वभावगुरुसंस्कारगुरुणोः स्वभावलघुनश्च भक्ष्यस्य भोजनपरिमाणमाह—

गुरूणामर्धसौहित्यं लघूनां तृप्तिरिष्यते ।
द्रवो द्रवोत्तरश्चापि न मात्रागुरुरिष्यते ॥ १४५ ॥

*अयमर्थः—माषपिष्टान्नादिभिरर्धसौहित्यं कर्त्तव्यं, मुद्गादिभिः-स्वभावादेव लघुभिर्मात्रया तृप्तिः कर्तव्येत्यर्थः । द्रवः=पेयादिः, द्रवोत्तरः=तक्राद्यधिक ओदनादिः, मात्रातोऽधिकोऽपि मात्रागुरुर्न मन्तव्यः,पेयस्य सर्वतो लघुत्वात् ॥ १४५ ॥

*उक्तं च सुश्रुतेन—

पेयलेह्यादिभक्ष्याणां गुरुविद्याद्यथोत्तरम् ॥ ३ ॥

पेयं=पेयाऽऽदि । लेह्यं=रसालाऽऽदि । आदिशब्दाद्भोज्यमोदनसूपादि । भक्ष्यं=मोदकादि ॥ ३ ॥ ॥ १४५ ॥

द्रवाढ्यमपि शुष्कं तु सम्यगेवोपपद्यते ॥ १४६ ॥

*अयमर्थः—शुष्कमपि स्रोतोरोधकमपि द्रवाढ्यं सम्यक्पाकंयाति ॥ ४६ ॥

अथ केवलस्य शुष्कान्नस्य दोषमाह—

विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति ॥ १४७ ॥

अपक्वं तत्किम्भवतीत्यपेक्षायामाह—

पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति ॥ १४८ ॥

*पिण्डीकृतमष्ठीलावद्भूतम् । असंक्लिन्नं=न सम्यगार्द्रम् । विदाहमुपगच्छति=विदग्धं भवतीत्यर्थः ॥ १४८ ॥

अथ शुष्कादीनां वैगुण्यमाह—

शुष्कं विरुद्धं विष्टम्भि वह्निव्यापादकृद्भवेत् ॥ १४९ ॥

*शुष्कं=चिपिटकादि, विरुद्धं=क्षीरमत्स्यादि, विष्टम्भि=चण-कमसूरादि, वह्निव्यापादकृद्=वह्निमान्द्यं कुर्यात् ॥ १४९ ॥

अथ सक्तुभक्षणविधिमाह—

न भुक्त्वा न रदैश्छित्त्वा न निशायां न वा बहून् ।
न जलान्तरितानद्भिः सक्तूनद्यान्न केवलान् ॥ १५० ॥

अथ सक्तुभक्षणे वर्जनीयानि सप्त कर्माण्याह—

पुनर्दानं पृथक्पानं सामिषं पयसा निशि ।
दन्तच्छेदनमुष्णं च सप्त सक्तुषु वर्जयेत् ॥ १५१ ॥

सुश्रुतः—

सक्तूनामाशु जीर्य्येत मृदुत्वादवलेहिका ॥ १५२ ॥

अथ विषमाशनस्य लक्षणमाह—

यथाकालेऽतिमात्रं यत् तद्भवेद्विषमाशनम् ।
बहु स्तोकमकाले वा ज्ञेयं तद्विषमाशनम् ॥ १५३ ॥

अथ बहुनोऽल्पस्य भक्षितस्य दोषमाह—

आलस्यगौरवाटोपसादांश्च कुरुतेऽधिकम् ।
हीनमात्रं तनोः कार्श्यं करोति च बलक्षयम् ॥ १५४ ॥

*अधिकम्=अन्नमिति यावत् ॥ १५४ ॥

अथाकाले भुक्तस्य दोषमाह—

अप्राप्तकाले भुञ्जानो ह्यसमर्थतनुर्नरः ।
तांस्तान् व्याधीनवाप्नोति मरणं चाधिगच्छति ॥ १५५ ॥

*अप्राप्तकाले कालादतिप्राग् भुञ्जानोऽसमर्थशरीरो भवति । तथा सति तांस्तान् व्याधीन् शिरोव्यथाविषूचिकाऽलसकविलम्बिका-ऽऽदीन् प्राप्नोति, तेषामाधिक्ये मरणमपि प्राप्नोतीत्यर्थः ॥ १५५ ॥

अथ भोजनकालेऽतीते सति भोजनकरणे दोषानाह—

कालेऽतीतेऽश्नतो जन्तोर्वायुनोपहतेऽनले ।
कृच्छ्राद्विपच्यते भुक्तं न स्याद्भोक्तुं पुनः स्पृहा ॥ १५६ ॥

अथ भोजनप्रमाणमाह—

कुक्षेर्भागद्वयं भोज्यैस्तृतीये वारि पूरयेत् ।
वायोः सञ्चारणार्थाय चतुर्थमवशेषयेत् ॥

रसेनान्नस्य रसना प्रथमेनोपतर्पिता ।
न तथा स्वादमाप्नोति ततः शोध्याऽम्बुनाऽन्तरा ॥ १५७ ॥

अथाम्बुपानानम्बुपानयोर्निषेधपूर्वकं मुहुर्मुहुः
स्वल्पमात्रया वारिपानमाह –

अत्यम्बुपानान्न विपच्यतेऽन्नमनम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि ॥ १५८ ॥

अथ भुक्तस्यादौ मध्येऽन्ते च जलपानस्य फलान्याह –

भुक्तस्यादौ जलं पीतं काश्यर्मन्दाग्निदोषकृत् ।
मध्येऽग्निदीपनं श्रेष्ठमन्ते स्थौल्यकफप्रदम् ॥ १५९ ॥

*भुक्तं=भोजनम् ॥ १५९ ॥

अन्यच्च वाग्भटे –

समस्थूलकृशा भुक्तमध्यान्तप्रथमाम्बुपाः ॥ १६० ॥

अथ तृषितक्षुधितयोः क्रमेण भोजनजलपानयोः सहेतुकं निषेधमाह –

तृषितस्तु न चाश्नीयात्क्षुधितो न पिबेज्जलम् ।
तृषितस्तु भवेद् गुल्मी क्षुधितस्तु जलोदरी ॥ १६१ ॥

अथ भोजनस्यादौ मध्येऽन्ते च मधुरादिपदार्थानां भोजनविधिं वर्णयन्
भोजनान्ते दुग्धपानविधिं सोपपत्तिकमाह –

ननु शिष्टा भोजनान्ते दुग्धं पिबन्ति तत्कथमुचितं ? यतस्त्रिधा विभक्तस्य भोजनकालस्य प्रथमो भागो वातस्य, द्वितीयः पित्तस्य तृतीयः कफस्य ।

अत एवाह –

अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसम् ।
मध्येऽम्ललवणौ पश्चात्कटुतिक्तकषायकान् ॥ १६२ ॥

*अस्यायमभिप्रायः-भोजने पूर्वं भुक्तो मधुरो रसो बुभुक्षितस्य वातपित्तयोः शमको भवति । भोजनमध्ये भुक्तावम्ललवणौ पित्ताशये च वह्निवृद्धिं कुरुतः । भोजनान्तसमये भुक्ताः कटुतिक्तकषायरसाः-कफं शमयन्तीति ॥ १६२ ॥

अतो भोजनावसानसमयस्य कफकालत्वात् तत्र कथं श्लेष्मजनकं दुग्धं पातुमुचितं भवति ?

यत उक्तम्—

दुग्धं स्वादुरसं स्निग्धमोजस्यं धातुवर्धनम् ।
वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलम् ॥ इति ॥ १६३ ॥

उच्यते—

विदाहीन्यन्नपानानि यानि भुङ्क्ते हि मानवः ।
तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् ॥ १६४ ॥

तथा च ब्रह्मपुराणे—

कुर्य्यात्क्षीरान्तमाहारं न दध्यन्तं कदा चन । इति ।
लवणाम्लकटूष्णानि विदाहीन्यत्ति यानि तु ।
तद्दोषं हर्त्तुमाहारं मधुरेण समापयेत् ॥ १६५ ॥

*भोजनावसानसमये दुग्धादिमधुरभोजनेनैव बर्धितः कफो लवणाम्लकटुभोजनजनितपित्तस्य बृद्धिं विनाशयति; पित्तवृद्धिविनाशनेन कफस्यापि बृद्धिस्तु क्षीणा भवति; क्षीणा कफबृद्धिरग्निमान्द्यादीन् व्याधीनुत्पादयितुं न शक्नोति ॥ १६५ ॥

ननु शत्रोर्नाशिनेन शत्रुहन्तुर्बृद्धिर्दृश्यते न तु क्षीणता, तत् कथं कफः क्षीयत इति ? उच्यते—बलवच्छत्रुविनाशनेन शत्रुहन्तुः क्षीणता च दृश्यते ।

तथा च—

नाशनात्प्रत्यनीकस्य स्वयं च क्षीयते यथा ।
वह्निसन्तप्तलोहस्य तप्ततां नाशयेज्जलम् ॥ १६६ ॥

ननु भोजनावसानसमये भुक्ताः कटुतिक्तकषायरसाः कफं शमयिष्यन्ति वातस्य बृद्धिं विधास्यन्तीति चेत्, तन्न; कट्वादीनां क्षीणशक्तिकत्वात् ।

तथा च—

यदेकं नाशयेद्दोषं तदन्यं वर्धयेत्कुतः ।
नाशने ह्येकदोषस्य यतस्तत्क्षीणशक्तिकम् ॥ इति १६७ ॥

*वस्तुतो य एव रसः प्राचुर्य्येण भुक्तस्तस्यैव सर्वे रसा वश्याभवन्ति ।

यत आह सुश्रुतः-

जग्धाः सर्वेऽपि गच्छन्ति बलिनो वश्यतां रसाः ।
यथा प्रकुपिता दोषा वशं यान्ति बलीयसः ॥ १६८ ॥

*बलिनः = रसस्य । बलीयसः=दोषस्य ॥ १६८ ॥

अथाचमनविधिमाह-

एवं भुक्त्वा समाचामेद्रूक्षग्रहणपूर्वकम् ।
भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत् ॥ १६९ ॥
दन्तान्तरगतं चान्नं शोधनेनाहरेच्छनैः ।
कुर्य्यादनिर्हृतं तद्धि मुखस्यानिष्टगन्धताम् ॥
दन्तलग्नमनिर्हार्यं लेपं मन्येत दन्तवत् ।
न तत्र बहुशः कुर्याद्यत्नं निर्हरणं प्रति ॥ १७० ॥
आचम्य जलयुक्ताभ्यां पाणिभ्यां चक्षुषी स्पृशेत् ।
भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥ १७१ ॥

अथ भोजनानन्तरक्रियामाह -

भुक्त्वा च संस्मरेन्नित्यमगस्त्यादीन्सुखावहान् ॥ १७
विष्णुरात्मा तथैवान्नं परिणामश्च वै यथा ।
सत्येन तेन मद्भुक्तं जीर्यत्वन्नमिदं तथा ॥ १७३ ॥

अगस्तिरग्निर्वडवानलश्च
भुक्तं ममान्नं जरयन्त्वशेषम् ॥
सुखं च मे तत्परिणामसम्भवं-
यच्छन्त्वरोगं मम चास्तु देहम् ॥ १७४ ॥

अङ्गारकमगस्तिं च पावकं सूर्यमश्विनौ ।
पञ्चैतान्संस्मरेन्नित्यं भुक्तं तस्याशु जीर्य्यति ॥ १७५ ॥
इत्युच्चार्य स्वहस्तेन परिमार्ज्य तथोदरम् ।
अनायासप्रदायीनि कुर्यात्कर्माण्यतन्द्रितः ॥ १७६ ॥

*अतन्द्रितः = निरन्तरं जाग्रत् तिष्ठेद् न तु स्वप्यात् ।
"भुक्तमात्रस्य तु स्वप्नाद्धन्त्यग्निं कुपितः कफः" ॥
इति वचनात् ॥ १७६ ॥

अथ भोजनोपरि वातादीनां वृद्धिक्रममाह।

जीर्णेऽन्ने वर्धते वायुर्विदग्धे पित्तमेधते ॥
भुक्तमात्रे कफश्चापि क्रमोऽयं भोजनोपरि ॥ १७७ ॥

*विदग्धे = किञ्चित्पक्वे किञ्चिदपक्वे ॥ १७७ ॥

अथ भुक्तमात्रे सञ्जातस्य कफस्य प्रतीकारमाह—

धूमेनापोह्य हृद्यैर्वा कषायकटुतिक्तकैः ।
पूगैः कर्पूरकस्तूरीलवंगसुमनःफलैः ॥ १७८ ॥
फलैः कटुकषायैर्वा मुखवैशद्यकारिभिः ।
ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः ॥ १७९ ॥

*धूमेन = अगुर्वादिधूमेन, अपोह्य = कफं दूरीकृत्य, कषायकटुतिक्तकैः फलैः = कर्पूरकस्तूरीलवंगादिभिः, पूगैः = क्रमुकैः । सुमनःफलैः = जातीफलैः, कटुकषायैः = एलाहरीतक्यादिफलैः ॥१७८॥१७९॥

अथ ताम्बूलभक्षणसमयमाह—

रतौ सुप्तोत्थिते स्नाते भुक्ते वान्ते च सङ्गरे ।
सभायां विदुषां राज्ञां कुर्यात्ताम्बूलचर्वणम् ॥ १८० ॥

अथ ताम्बूलगुणानाह—

ताम्बूलमुक्तं तीक्ष्णोष्णं रोचनं तुवरं सरम् ।
तिक्तं क्षारोषणं कामरक्तपित्तकरं लघु ॥ १८१ ॥
वश्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम् ।
मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम् ॥ १८२ ॥
हनुदन्तमलध्वंसि जिह्वेन्द्रियविशोधनम् ।
मुखप्रसेकशमनं गलामयविनाशनम् ॥ १८३ ॥

अथ नवीनताम्बूलगुणानाह—

नवं तदेव मधुरं कषायानुरसं गुरु ।
बलासजननं प्रायः पत्रशाकगुणं स्मृतम् ॥ १८४ ॥

अथ वङ्गदेशोद्भवताम्बूलगुणानाह—

वङ्गदेशोद्भवं पर्णं प ं कटुरसं सरम् ।
पाचनं पित्तजनकमुष्णं कफहरं स्मृतम् ॥ १८५ ॥

अथ पुराणताम्बूलगुणानाह—

पर्णं पुराणमकटु क्षुल्लकं तनु पाण्डुरम् ।
विशेषाद् गुणवद्धेयमन्यद्धीनगुणं स्मृतम् ॥ १८६ ॥

अथ पूगीफलगुणानाह—

पूगं गुरु हिमं रूक्षं कषायं कफपित्तनुत् ।
मोहनं दीपनं रुच्यमास्यवैरस्यनाशनम् ॥ १८७ ॥
पूगं स्याद् दृढमध्यं यत्स्विन्नं वाऽपि त्रिदोषनुत् ॥
सरसं गुर्वभिष्यन्दि तद् भृशं वह्निनाशनम् ॥ १८८ ॥

अथ खदिरसुधाताम्बूलगुणानाह—

खदिरः कफपित्तघ्नश्चूर्णं वातबलासनुत् ।
संयोगतस्त्रिदोषघ्नं सौमनस्यं करोति च ॥ १८९ ॥
मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम् ।
प्रभाते पूगमधिकं मध्याह्ने खदिरं तथा ॥
निशासु चूर्णमधिकं ताम्बूलं भक्षयेत्सदा ॥ १९० ॥

अथ ताम्बूलपर्णाग्रमध्यादिभागापरित्यागे दोषानाह—

आयुरग्रे यशो मूले लक्ष्मीर्मध्ये व्यवस्थिता ।
तस्मादग्रं तथा मूलं मध्यं पर्णस्य वर्जयेत् ॥ १९१ ॥
पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः ।
पर्णमध्यं हरत्यायुः शिरा बुद्धिविनाशिनी ॥ १९२ ॥

अथ ताम्बूलस्य पीतद्वयं परित्यज्य तृतीया -
त्पीतादनुपातव्यमित्याह—

आद्यं विषोपमं पीतं द्वितीयं भेदि दुर्जरम् ।
तृतीयादनुपातव्यं सुधातुल्यं रसायनम् ॥ १९३ ॥

अथाधिकताम्बूलभक्षणे दोषानाह—

ताम्बूलं नातिसेवेत न विरिक्तो बुभुक्षितः ॥ १९४ ॥
देहदृक्केशदन्ताग्निश्रोत्रवर्णबलक्षयः ।
शोषः पित्तानिलासृक् स्यादतिताम्बूलचर्वणात् ॥ १९५ ॥

अथ ताम्बूलभक्षणानर्हजनानाह—

ताम्बूलं न हितं दन्तदुर्बलेक्षणरोगिणाम् ।

विषमूर्च्छामदार्त्तानां क्षयिणां रक्तपित्तिनाम् ॥ १९६ ॥

अथ भोजनोत्तरं चङ्क्रमणगुणानाह—

भुक्त्वा शतपदं गच्छेच्छनैस्तेन तु जायते ।
अन्नसंघातशैथिल्यं ग्रीवाजानुकटीषु च ॥ १९७ ॥

अथ भोजनोत्तरमुपवेशनशयनादिफलान्याह—

भुक्त्वोपविशतस्तन्द्रा शयानस्य तु पुष्टता ।
आयुश्चङ्क्रममाणस्य मृत्युर्धावति धावतः ॥ १९८ ॥

*चङ्क्रममाणस्य = पदशतं शनैर्गच्छतः ॥ १९८ ॥

अथ भोजनोत्तरं शयनरीतिमाह—

श्वासानष्टौ समुत्तानस्तान् द्विः पार्श्वे तु दक्षिणे ।
ततस्तद्द्विगुणान्वामे पश्चात्स्वप्याद्यथासुखम् ॥ १९९ ॥

अथ सर्वदा वामपार्श्वेन शयने हेतुमाह—

वामदिशायामनलो नाभेरूर्ध्वेऽस्ति जन्तूनाम् ।
तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थम् ॥ २०० ॥

अथ शयनचर्यामाह ।

तत्रादौ खट्वाऽऽदीनामुपरि शयनफलान्याह—

त्रिदोषशमनी खट्वा तूली वातकफापहा ।
भूशय्या बृंहणी वृष्या काष्ठपट्टी तु वातला ॥ २०१ ॥

अन्यः पुनराह—

भूशय्या वातलाऽतीवरूक्षा पित्तास्रनाशिनी ।
सुशय्याशयनं हृद्यं पुष्टिनिद्राधृतिप्रदम् ॥
श्रमानिलहरं वृष्यं विपरीतमतोऽन्यथा ॥ २०२ ॥

अथ संवाहनगुणानाह—

संवाहनं मांसरक्तत्वक्प्रसादकरं परम् ।
प्रीतिनिद्राकरं वृष्यं कफवातश्रमापहम् ॥ २०३ ॥

अथाप्रवातप्रवातसेवनगुणानाह—

स्वेदमूर्च्छापिपासाघ्नमप्रवातमतोऽन्यथा ।
प्रवातं रौक्ष्यवैवर्ण्यस्तम्भकृद्दाहपित्तनुत् ॥ २०४ ॥
सुखं प्रवातं सेवेत ग्रीष्मे शरदि चान्तरा ।

निर्वातमायुषे सेव्यमारोग्याय च सर्वदा ॥ २०५ ॥

अथ पूर्ववायुसेवनगुणदोषानाह—

पूर्वोऽनिलो गुरुः सोष्णः स्निग्धः पित्तास्रदूषकः ।
विदाही वातलः श्रान्तिकफशोषवतां हितः ॥ २०६ ॥
स्वादुः पटुरभिष्यन्दी त्वग्दोषार्शोविषक्रिमीन् ।
सन्निपातं ज्वरं श्वासमामवातं च कोपयेत् ॥ २०७ ॥

*स्वादुः = भक्ष्यद्रव्येषु बाहुल्येन मधुररसजनकः ॥ २०७ ॥

अथ दक्षिणपश्चिमपवनयोर्गुणदोषानाह—

दक्षिणः पवनः स्वादुः पित्तरक्तहरो लघुः ।
वीर्येण शीतलो बल्यश्चक्षुष्यो न तु वातलः ॥ २०८ ॥
पश्चिमः पवनस्तीक्ष्णः शोषणो बलहृल्लघुः ।
मेदःपित्तकफध्वंसी प्रभञ्जनविवर्धनः ॥ २०९ ॥

अथोत्तरवायोर्गुणदोषानाह—

उत्तरो मारुतः शीतः स्निग्धो दोषप्रकोपकृत् ।
क्लेदनः प्रकृतिस्थानां बलदो मधुरो मृदुः ॥ २१० ॥

*दोषप्रकोपकृद् = आतुराणाम् ॥ २१० ॥

अथाग्नेयादिवायूनां गुणानाह—

आग्नेयो दाहकृद्रूक्षो नैर्ऋतो न विदाहकृत् ।
वायव्यस्तु भवेत्तिक्त ऐशानः कटुकः स्मृतः ॥ २११ ॥
विष्वग्वायुरनायुष्यः प्राणिनां बहुरोगकृत् ।
अतस्तं नैव सेवेत सेवितः स्यान्न शर्मणे ॥ २१२ ॥

अथ व्यजनतालवृन्तादिभववायूनां गुणानाह—

व्यजनस्यानिलो दाहस्वेदमूर्च्छाश्रमापहः ।
तालवृन्तभवो वातस्त्रिदोषशमको मतः ॥ २१३ ॥
वंशव्यजनजस्तूष्णो रक्तपित्तप्रकोपणः ।
चामरो वस्त्रसम्भूतो मायूरो वेत्रजस्तथा ॥ २१४ ॥
एते दोषजितो वाताः स्निग्धा हृद्याः सुपूजिताः ॥ २१५ ॥

अथ दिवास्वापप्रतिषेधमाह—

दिवा स्वापं न कुर्वीत यतोऽसौ स्यात्कफावहः ।

ग्रीष्मवर्ज्येषु कालेषु दिवास्वप्नो निषिध्यते ॥ २१६ ॥

अथ दिवास्वापयोग्यजनानाह—

उचितो हि दिवास्वप्नो नित्यं येषां शरीरिणाम् ।
वातादयः प्रकुप्यन्ति तेषामस्वपतां दिवा ॥ २१७ ॥
व्यायामप्रमदाऽध्ववाहनरतान् क्लान्तानतीसारिणः-
शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडितान् ॥
क्षीणान् क्षीणकफाञ्छिशून्मदहतान्वृद्धान्रसाजीर्णिनो-
रात्रौ जागरितान्नरान्निरशनान्कामं दिवा स्वापयेत् ॥२१८॥
दिवा वा यदि वा रात्रौ निद्रा सात्मीकृता तु यैः ।
न तेषां स्वपतां दोषो जाग्रतां चोपजायते ॥ २१९ ॥

*स्वपतां=दिवा इति यावत् । जाग्रतां=रात्राविति शेषः ॥२१९॥

अथ भोजनानन्तरं शयनफलमाह—

भोजनानन्तरं निद्रा वातं हरति पित्तहृत् ।
कफं करोति वपुषः पुष्टिं सौख्यं तनोति हि ॥ २२० ॥

अथ शयनमर्दनादीनां फलान्याह—

शयनं पित्तनाशाय वातनाशाय मर्दनम् ।
वमनं कफनाशाय ज्वरनाशाय लङ्घनम् ॥ २२१ ॥
आसीनं घूर्णितं यत्तु नाभिष्यंदि न रूक्षणम् ॥ २२२ ॥

अथापरानभ्युदरेऽन्नस्य संस्थापनहेतूनाह—

शब्दान् स्पर्शांश्च रूपाणि रसान्गन्धान्मनःप्रियान् ।
भुक्तवानपि सेवेत तेनान्नं साधु तिष्ठति ॥ २२३ ॥

*उदरे इति शेषः ॥ २२३ ॥

अथान्नस्योदरेऽस्थितिहेतूनाह—

शब्दः स्पर्शस्तथा रूपं रसो गन्धो जुगुप्सितः ।
भुक्तमप्रयतं चान्नमतिहास्यं च वामयेत् ॥ २२४ ॥

*अप्रयतमपवित्रम् ॥ २२४ ॥

अथान्यदपि वर्जनीयमाह—

शयनं चाशनं चाति न भजेन्न द्रवाधिकम् ।
नाग्न्यातपौ न प्लवनं न यानं नापि वाहनम् ॥ २२५ ॥

*प्लवनं=बाहुभ्यां जलप्रतरणं, यानं=मार्गे चलनं, वाहनमश्वादि ॥ २२५ ॥

व्यायामं च व्यवायं च धावनं यानमेव च ।
युद्धं गीतं च पाठं च मुहूर्त्तं भुक्तवांस्त्यजेत् ॥ २२६ ॥

अथाजीर्णस्य हेतूनाह—

अत्यम्बुपानाद्विषमाशनाच्च सन्धारणात् स्वप्नविपर्ययाच्च ॥
कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य ॥२२७॥

*सन्धारणाद्=अधोवातमलमूत्रादीनाम् ॥ २२७ ॥

ईर्ष्याभयक्रोधसमन्वितेन लुब्धेन रुग्दैन्यनिपीडितेन ॥
विद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक्परिपाकमेति ॥२२८॥

अथाध्यशनलक्षणमाह—

अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते ॥ २२९ ॥

तन्निवारयन्नाह—

प्राग्भुक्ते चानले मन्दे द्विरह्नि न समाहरेत् ॥ २३० ॥

*अस्यायमर्थः—प्रातर्भुक्ते अजीर्णे सति अहन्येव पुनर्न भुञ्जीतेत्यर्थः । रात्रौ पुनस्तथाऽपि सति भुञ्जीतैव । अत आह सुश्रुत एव—

"प्रातराशे त्वजीर्णे तु सायमाशो न दुष्यति" इति ॥२३०॥

पूर्वं भुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकम् ॥ २३१ ॥

*अस्य त्वयमर्थः—पूर्वं भुक्ते रात्रिभुक्ते अन्ने विदग्धे किञ्चित पक्वे किञ्चिदपक्वे प्रातर्भुञ्जानः पावकं हन्तीत्यर्थः ॥ २३१ ॥

अत आह—

सायमाशे त्वजीर्णे तु प्रातर्भुक्तं विषोपमम् ॥२३२॥ इति ॥

अथ सायमाशाजीर्णे भोजनोपायमाह—

भवेद्यदि प्रातरजीर्णशङ्का तदाऽभयां नागरसैन्धवाभ्याम् ।
विचूर्णितां शीतजलेन भुक्त्वा भुञ्जीत चान्नं मितमन्नकाले ॥२३३॥

अथ दिवास्त्रीसंगनिषेधमाह—

आयुःक्षयभयाद्विद्वान्नाह्नि सेवेत कामिनीम् ।
अवशो यदि सेवेत तदा ग्रीष्मवसन्तयोः ॥ २३४ ॥

*अवशः=अजितेन्द्रियः ॥ २३४ ॥

अथोपवेशनाटनादिगुणानाह—

आस्या वर्णकफस्थौल्यसौकुमार्यसुखप्रदा ।
अध्वा वर्णकफस्थौल्यसौकुमार्यविनाशनः ॥ २३५ ॥
यत्तु चङ्क्रमणं नातिदेहपीडाकरं भवेत् ।
तदायुर्बलमेधाऽग्निप्रदमिन्द्रियबोधनम् ॥ २३६ ॥

अथोष्णीषधारणगुणानाह—

उष्णीषं कान्तिकृत्केश्यं रजोवातकफापहम् ।
लघु तच्छस्यते यस्माद् गुरु पित्ताक्षिरोगकृत् ॥ २३७ ॥

अथोपानद्धारणगुणानाह—

उपानद्धारणं नेत्र्यमायुष्यं पादरोगहृत् ।
सुखप्रचारमोजस्यं वृष्यं च परिकीर्त्तितम् ॥ २३८ ॥

अथानुपानद्भ्यां पादाभ्यां चङ्क्रमणे दोषानाह—

पादाभ्यामनुपानद्भ्यां सदा चङ्क्रमणं नृणाम् ।
अनारोग्यमनायुष्यमिन्द्रियघ्नमदृष्टिदम् ॥ २३९ ॥

अथ छत्रदण्डधारणगुणानाह—

छत्रस्य धारणं वर्षाऽऽतपवातरजोऽपहम् ।
हिमघ्नं हितमक्ष्णोश्च मङ्गल्यमपि कीर्त्तितम् ॥ २४० ॥
सत्त्वोत्साहबलस्थैर्य्यधैर्यतेजोविवर्धनम् ।
अवष्टम्भकरं चापि भयघ्नं दण्डधारणम् ॥ २४१ ॥

अथ शिविकाऽऽद्यारोहणगुणानाह —

ऊर्ध्वाच्छादनसंयुक्ता शिविका सर्ववल्लभा ।
तस्यामारोहणं नृणां त्रिदोषशमकं मतम् ॥ २४२ ॥
वातश्लेष्मगदार्त्तानामहिता भ्रमकृत्तरिः ।
पित्तानिलकरो हस्ती लक्ष्म्यायुःपुष्टिवर्द्धनः ॥ २४३ ॥
घोटकारोहणं वातपित्ताग्निश्रमकृन्मतम् ।
मेदोवर्णकफघ्नं च हितं तद्बलिनां परम् ॥ २४४ ॥

अथातपादीनां गुणानाह, तत्रादावातपच्छायासेवनयोर्गुणानाह—

आतपः स्वेदमूर्च्छाऽस्रपित्ततृष्णाक्लमश्रमान् ।
दाहं विवर्णतां कुर्यादेतांश्छाया व्यपोहति ॥ २४५ ॥

अथ वृष्टिकुहेल्योः सेवनगुणानाह—

वृष्टिर्वृष्या हिमा वल्या निद्राऽऽलस्यविधायिनी ।
भयावहा मोहकरी कुहेलिः कफवातला ॥ २४६ ॥

*कुहेलिः="कुआशा" इति लोके ॥ २४६ ॥

अथाग्निधूमयोः सेवनगुणानाह—

अग्निर्वातकफस्तम्भशीतवेपथुनाशनः ।
आमाभिष्यन्दशमनो रक्तपित्तप्रकोपणः ॥ २४७ ॥
सद्यः श्लेष्मकरो धूमो नेत्रयोरहितो भृशम् ।
शिरोगौरवकृच्चापि वातपित्तं च कोपयेत् ॥ २४८ ॥

अथ सदाचरणान्याह—

मैत्रीं सद्भिः समं कुर्य्यात्स्नेहं सत्सु तु सर्वथा ।
संसर्गं साधुभिः कुर्य्यादसत्सङ्गं परित्यजेत् ॥ २४९ ॥

*सत्सु=सज्जनेषु । सर्वथा=मनोवाक्कर्मभिः ॥ २४९ ॥

सेवेत देवभूदेववृद्धवैद्यनृपातिथीन् ।
विमुखान्नार्थिनः कुर्यान्नावमन्येत कानपि ॥ २५० ॥
गुरूणां सन्निधौ तिष्ठेत्सदैव विनयान्वितः ।
पादप्रसारणादीनि तत्र नैव समाचरेत् ॥ २५१ ॥
अपकारपरेऽपि स्यादुपकारपरः पुमान् ।
आत्मवत्सकलान्पश्येद्वैरिणो दूरतो वसेत् ॥ २५२ ॥
न कश्चिदात्मनः शत्रुं नात्मानं कस्य चिद्रिपुम् ।
प्रकाशयेन्नापमानं न च निःस्नेहतां प्रभोः ॥ २५३ ॥
नात्मानमुदके पश्येन्न नग्नः प्रविशेज्जलम् ।
तथा नाज्ञातगाम्भीर्य्यं न हिंस्रप्राणिसेवितम् ॥ २५४ ॥
काले हितं मितं सत्यं संवादि मधुरं वदेत् ।
भुञ्जीत मधुरप्रायं स्निग्धं काले हितं मितम् ॥ २५५ ॥
न रात्रौ दधि भुञ्जीत न च निर्लवणं तथा ।
नामुद्गसूपं नाक्षौद्रं न चाप्यघृतशर्करम् ॥ २५६ ॥
जनस्याशयमालक्ष्य यो यथा परितुष्यति ।
तं तथैवानुवर्त्तेत पराराधनपण्डितः ॥ २५७ ॥

नैकः सुखी न सर्वत्र विश्वस्तो न च शङ्कितः ।
नोद्यमे विरमेत्क्वापि हेतावीर्ष्येत्फले न तु ॥ २५८ ॥
*हेतौ=फलहेतौ उद्यमे, फले=धनादौ ॥ २५८ ॥
वेगान्न धारयेज्जातु मनोवेगान्विधारयेत् ।
न पीडयेदिन्द्रियाणि न चैतानतिलालयेत् ॥ २५९ ॥
वर्षाऽऽतपादिषु च्छत्री दण्डी रात्रौ भयेषु च ।
सोपानत्कस्तनुं रक्षेद्विचरेद्युगमात्रदृक ॥ २६० ॥
*युगमात्रदृग् = अग्रतो हस्तचतुष्टयमितां भूमिं पश्यन् ॥२६०॥
नदीं तरेन्न बाहुभ्यां नाग्निस्कन्धमभिव्रजेत् ।
सन्दिग्धनावं वृक्षं च नारोहेद् दुष्टयानकम् ॥ २६१ ॥
*दुष्टयानं = दुष्टगजघोटकादि ॥ २६१ ॥
नासंवृतमुखं कुर्यात्सभायां च विचक्षणः ।
कासं हासं तथोद्गारं जृम्भणं क्षवथुं तथा ॥ २६२ ॥
नासिकां न विकुष्णीयान्नासीतोत्कटकः क्व चित् ।
नोर्ध्वजानुश्चिरं तिष्ठेन्न नखेन लिखेद् भुवम् ॥ २६३ ॥
सम्मार्जनीरजो नैव देहे दद्यात्कदा चन ।
न नखेन तृणं छिन्द्यान्नोच्छिष्टो ब्राह्मणं स्पृशेत् ॥ २६४ ॥
नोपरक्तं न चोद्यन्तं नास्तं यातं दिवाकरम् ।
सर्वथा न समीक्षेत न जले प्रतिबिम्बितम् ॥ २६५ ॥
नेक्षेत सततं सूक्ष्मं दीप्तामेध्याप्रियाणि च ।
पौरन्दरं धनुर्नैव दर्शयेत्कमपि क्व चित् ॥ २६६ ॥
नेच्छेद् बलवता युद्धं न भारं शिरसा वहेत् ।
गात्रं न वादयेत्केशान्हस्तेन धुनुयान्न च ॥ २६७ ॥
न गच्छेत्पूज्ययोर्मध्ये दम्पत्योरन्तरेण च ।
रिपोरन्नं न भुञ्जीत गणिकाऽन्नमपि क्व चित ॥ २६८ ॥
प्रतिभूर्न भवेत्क्वापि न च साक्षी वृथा भवेत ॥ २६९ ॥
*प्रतिभूः = जामिन ॥ २६९ ॥
स्थागं न धारयेज्जातु द्यूतं दूरात् परित्यजेत ॥ २७० ॥

विश्वासं नाचरेत्स्त्रीणां ताः स्वतन्त्रा न चारयेत् ।
रक्षणीयाः सदा यत्नाद्यौवने तु विशेषतः ॥ २७१ ॥
न भिन्ने शयने स्वप्यान्नानेकविवरेऽपि च ।
नैको देवालये नैव रात्रौ तरुतलेऽपि च ॥ २७२ ॥
एवं दिनानि गमयेत्सदाचारपरः सदा ।
ततो रात्रिप्रयुक्तानि कुर्यात्कर्माणि मानवः ॥ २७३ ॥
इत्याचारं समासेन भाषितं यः समाचरेत् ।
स बिंदत्यायुरारोग्यं प्रीतिं धर्मं धनं यशः ॥ २७४ ॥

अथ सन्ध्यायां निषिद्धकर्माण्याह--

एतानि पञ्च कर्माणि सन्ध्यायां वर्जयेद् बुधः ।
आहारं मैथुनं निद्रां सम्पाठं गतिमध्वनि ॥ २७५ ॥

अथ सन्ध्याकालिकनिषिद्धकर्माचरणे दोषानाह--

भोजनाज्जायते व्याधिमैथुनाद्गर्भवैकृतिः ।
निद्राया निःस्वता पाठादायुर्हानिर्गतेर्भयम् ॥ २७६ ॥

अथ रात्रिचर्यामाह ।

तत्रादौ ज्योत्स्नाऽऽदीनां गुणानाह—

ज्योत्स्ना शीता स्मरानन्दप्रदा तृट्पित्तदाहहृत् ।
ततो हीनगुणः कुर्यादवश्यायोऽनिलं कफम् ॥ २७७ ॥
तमो भयावहं मोहदिङ्मोहजनकं भवेत् ।
पित्तहृत्कफहृत्कामवर्धनं क्लमकृच्च तत् ॥ २७८ ॥

अथ रात्रौ भोजनस्य समयं परिमाणं चाह—

रात्रौ च भोजनं कुर्यात्प्रथमप्रहरान्तरे ।
किञ्चिदूनं समश्नीयाद् दुर्जरं तत्र वर्जयेत् ॥ २७९ ॥

अथ मैथुनमाह, तत्रादौ मैथुनेच्छायां—
सत्यामपि तदकरणे दोषानाह—

शरीरे जायते नित्यं देहिनः सुरतस्पृहा ।
अव्यवायान्मेहमेदोवृद्धिः शिथिलता तनोः ॥ २८० ॥

अथ स्त्रीणां बालाऽऽद्यवस्थानामवधिमाह—

बालेति गीयते नारी यावद्वर्षाणि षोडश ।

ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि ॥ २८१ ॥
तदूर्ध्वमधिरूढा स्यात्पञ्चाशद्वत्सरावधि ।
वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्जिता ॥ २८२ ॥

*अधिरूढा = प्रौढा ॥ २८२ ॥

अथ बालाऽऽदिस्त्रीणां सेवनस्य समयं फलञ्चाह—

निदाघशरदोर्बाला हिता विषयिणां मता ।
तरुणी शीतसमये प्रौढा वर्षावसन्तयोः ॥ २८३ ॥
नित्यं बाला सेव्यमाना नित्यं वर्धयते बलम् ।
तरुणी ह्रासयेच्छुक्तिं प्रौढोद्भावयते जराम् ॥ २८४ ॥

अथ सेवनेन सद्यःप्राणकराणि द्रव्याण्याह—

सद्योमांसं नवं चान्नं बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदके स्नानं सद्यःप्राणकराणि षट् ॥ २८५ ॥

*प्राणशब्दोऽत्र बलवाचकः ॥ २८५ ॥

अथ सेवनेन सद्यःप्राणहराणि द्रव्याण्याह—

पूतिमांसं स्त्रियो वृद्धा बालाऽर्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥ २८६ ॥

*बालाऽर्कः = कन्याऽर्कः ॥ २८६

अथ वृद्धस्य तरुणीगमने तरुणस्य च वृद्धागमने फलमाह—

वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात् ।
वयोऽधिकां स्त्रियं गत्वा तरुणः स्थविरायते ॥ २८७ ॥

अथ नियमपूर्वकं स्त्रीगमने गुणानाह—

आयुष्मन्तो मन्दजरा वपुर्वर्णबलान्विताः ।
स्थिरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः ॥ २८८ ॥

अथर्तुभेदेन स्त्रीसेवनप्रकारमाह—

सेवेत कामतः कामं बलाद्वाजीकृतो हिमे ।
प्रकामं तु निषेवेत मैथुनं शिशिरागमे ॥ २८९ ॥

अथ वसन्तादिष्वृतुषु कियता कालेन स्त्रीसेवनं युक्तमित्याह—

त्र्यहाद्वसन्तशरदोः पक्षाद् वृष्टिनिदाघयोः ॥ २९० ॥

सुश्रुतस्तु –

त्रिभिस्त्रिभिरहोभिर्हि समेयात्प्रमदां नरः ।
सर्वेष्वृतुषु घर्मे तु पक्षात्पक्षाद् व्रजेद् बुधः ॥ २६१ ॥

*समेयात् = संगच्छेत् । घर्म=ग्रीष्मे ॥ २६१ ॥

अथर्तुभेदेन स्त्रीसेवनसमयभेदमाह–

शीते रात्रौ दिवा ग्रीष्मे वसन्ते तु दिवा निशि ।
वर्षासु वारिदध्वाने शरत्सु सरसः स्मरः ॥ २९२ ॥

अथ स्त्रीसेवननिषिद्धसमयमाह–

उपेयात्पुरुषो नारीं संध्ययोन च पर्वसु ।
गोसर्गे चार्द्धरात्रे च तथा मध्यंदिनेऽपि च ॥ २६३ ॥

अथ स्त्रीसेवनयोग्यस्थानमाह–

विहारं भार्यया कुर्याद् देशेऽतिशयसंवृते ।
रम्ये श्राव्याङ्गनागाने सुगन्धे सुखमारुते ॥ २६४ ॥

अथ स्त्रीसेवनायोग्यस्थानमाह –

देशे गुरुजनासन्ने विवृतेऽतित्रपाकरे ।
श्रूयमाणे व्यथाहेतुवचने न रमेत ना ॥ २६५ ॥

अथ स्त्रीसेवनकालिकपुरुषाणां वेषादिकमाह ।

स्नातश्चन्दनलिप्ताङ्गः सुगन्धः सुमनोऽन्वितः ।
भुक्तवृष्यः सुवसनः सुवेषः समलङ्कृतः ॥ २६६ ॥
ताम्बूलवदनः पत्न्यामनुरक्तोऽधिकस्मरः ।
पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे ॥ २६७ ॥

अथ मैथुनानर्हपुरुषानाह –

अत्याशितोऽधृतिः क्षुद्वान्सव्यथाङ्गः पिपासितः ।
बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम् ॥ २६८ ॥

*रोगी = मैथुनसंवर्जनीयरोगयुक्तः ॥ २६८ ॥

अथ मैथुनयोग्याः स्त्रिय आह –

भार्यां रूपगुणोपेतां तुल्यशीलां कुलोद्भवाम् ।
अतिकामोऽभिकामां तु हृष्टो हृष्टामलङ्कृताम् ॥
सेवेत प्रमदां युक्त्या वाजीकरणबृंहितः ॥ २६९ ॥

अथ मैथुनायोग्याः स्त्रिय आह—

रजस्वलामकामां च मलिनामप्रियां तथा ॥ ३०० ॥
वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीडिताम् ।
हीनाङ्गीं गर्भिणीं द्वेष्यां योनिरोगसमन्विताम् ॥ ३०१ ॥
सगोत्रां गुरुपत्नीं च तथा प्रव्रजितामपि ।
नाधिगच्छेत् पुमान्नारीं भूरिवैगुण्यशङ्कया ॥ ३०२ ॥

अथ पुनर्विशेषेण रजस्वलागमने दोषानाह—

रजस्वलां गतवतो नरस्यासंयतात्मनः ।
दृष्ट्यायुस्तेजसां हानिरधर्मश्च ततो भवेत् ॥ ३०३ ॥

अथ पुनर्विशेषेण संन्यासिन्यादीनां स्त्रीणां—
गमने पर्वसु च स्त्रीगमने दोषमाह—

लिङ्गिनीं गुरुपत्नीं च सगोत्रामथ पर्वसु ।
वृद्धां च सन्ध्ययोश्चापि गच्छतो जीवनक्षयः ॥ ३०४ ॥

*लिङ्गिनीं = प्रव्रजिताम् ॥ ३०४ ॥

अथ पुनर्विशेषेण गर्भिण्यादिषु गमने प्रकाशे स्त्रीसेवने च दोषानाह—

गर्भिण्यां गर्भपीडा स्याद्व्याधितायां बलक्षयः ॥ ३०५ ॥
हीनाङ्गीं मलिनां द्वेष्यां क्षामां वन्ध्यामसंवृते ।
देशेऽभिगच्छतो रेतः क्षीणं म्लानं मनो भवेत् ॥ ३०६ ॥

*गर्भिणीं गर्भवासदिवसाद् द्वितीये मासि गर्भस्थितेरनिश्चये यथोक्तनक्षत्रादिलाभाभावे वा तृतीये मासि पुंसवने कृते नाभिगच्छेद् ।

यतः पुंसवनानन्तरमाह व्यासः—

ततस्त्यजेन्नदीतीरं देवखातोदकं तथा ।
भर्त्तुः शय्यां मृतापत्यां तथैवामिषभोजनम् ॥ ४ ॥

*अन्यच्च—

आमिषस्याशनं यत्नात्प्रमदा परिवर्जयेत् ।
देवारामनदीयानं प्रयाणं पुरुषस्य च ॥५॥ इति ॥ ३०५ ॥ ३०६ ॥

अथ बुभुक्षितादीनां पुरुषाणां स्त्रीसंभोगे—
मध्याह्ने स्त्रीसेवने च दोषानाह—

क्षुधितः क्षुभितात्मा च मध्याह्ने तृषितोऽबलः ।

स्थितस्य हानिं शुक्रस्य वायोः कोपं च विन्दति ॥ ३०७ ॥

अथ व्याधितस्य पुंसस्तथा प्रत्यूषादिसमये स्त्रीगमने दोषानाह—

व्याधितस्य रुजा प्लीहा मूर्च्छा मृत्युश्च जायते ।
प्रत्यूषे चार्धरात्रे च वातपित्ते प्रकुप्यतः ॥ ३०८ ॥

अथ तिर्यगादियोनौ मैथुने दोषानाह—

तिर्यग्योनावयोनौ वा दुष्टयोनौ तथैव च ।
उपदंशस्तथा वायोः कोपः शुक्रसुग्वक्षयः ॥ ३०९ ॥

अथ मलमूत्रयोर्वेगावस्थायां मैथुने चलितशुक्रधारणे विपरीतमैथुने च दोषमाह—

उच्चारिते मूत्रिते च रेतसश्च विधारणे ।
उत्ताने च भवेच्छीघ्रं शुक्राश्मर्य्यास्तु सम्भवः ॥ ३१० ॥

अथ पुनर्विशेषेणोपस्थितशुक्रधारणनिषेधमाह—

सर्वमेतत्त्यजेत्तस्माद्यतो लोकद्वयाहितम् ।
शुक्रं तूपस्थितं मोहान्न सन्धार्यं कदा चन ॥ ३११ ॥

अथ सुरतान्ते हितकराणि द्रव्याण्याह—

स्नानं सशर्करं क्षीरं भक्ष्यमैक्षवसंस्कृतम् ।
वातो मांसरसः स्वप्नः सुरतान्ते हिता अमी ॥ ३१२ ॥

अथातिव्यवायजान् रोगानाह—

शूलकासज्वरश्वासकार्श्यपाण्ड्वामयक्षयाः ।
अतिव्यवायाज्जायन्ते रोगाश्चाक्षेपकादयः ॥ ३१३ ॥

अथ रात्रौ निद्राजागरणयोर्गुणानाह

रात्रौ जागरणं रूक्षं कफदोषविषार्त्तिजित् ।
निद्रा तु सेविता काले धातुसाम्यमतन्द्रिताम् ॥ ३१४ ॥
पुष्टिं वर्णं बलोत्साहं वह्निदीप्तिं करोति हि ॥ ३१५ ॥

अथ सुखपूर्वकनिद्रालाभार्थमौषधमाह—

यो लेढि शयनसमये मधुमिश्रं बीजपूरदलचूर्णम् ।
स तु लज्जाकरवातप्रसरनिरोधात्सुखं स्वपिति ॥ ३१६ ॥

अथोषःकाले जलपानगुणानाह—

सवितुः समुदयकाले प्रसृतीः सलिलस्य पिबेदष्टौ ।

रोगजरापरिमुक्तो जीवेद्वत्सरशतं साग्रम् ॥ ३१७ ॥
*अस्य जलपानस्योपक्रमकालो रात्रेश्चतुर्थप्रहरे प्रवेशः ।

तथा च भोजः—

पिबति पर्युषितं जलमन्वहं तिमिरिणीचरमे प्रहरे यदि ॥ ६ ॥ इति
*एतज्जलपानकालमर्यादा सूर्योदयातिसन्निहितप्राक्कालः ।

तथा च तन्त्रान्तरे—

अम्भसः प्रसृतीरष्टौ रवावनुदिते पिबेत् ।
वातपित्तकफाञ्जित्वा जीवेद्वर्षशतं सुखी ॥ ७ ॥ इति
*सलिलस्यात्र पर्युषितस्य ग्रहणं भोजवचनानुरोधात् ॥ ३१७ ॥
अर्शःशोथग्रहण्यो ज्वरजठरजराकुष्ठमेदोविकारा-
मूत्राघातास्रपित्तश्रवणगलशिरःश्रोणिशूलाक्षिरोगाः ।
ये चान्ये वातपित्तक्षतजकफकृता व्याधयः सन्ति जन्तो-
स्तांस्तानभ्यासयोगादपहरति पयः पीतमन्ते निशायाः ॥ ३१८ ॥

अथोषःकाले नासावारिपानगुणानाह—

विगतघननिशीथे प्रातरुत्थाय नित्यं-
पिबति खलु नरो यो घ्राणरन्ध्रेण वारि ।
स भवति मतिपूर्णश्चक्षुषा तार्क्ष्यतुल्यो-
बलिपलितविहीनः सर्वरोगैर्विमुक्तः ॥ ३१९ ॥
*निशीथोऽत्र=निशाऽन्धकारः ॥ ३१९ ॥

अथ नासाजलपाने जलपरिमाणमाह—

पातव्यं नासया नीरं प्रसृतित्रयमात्रया ॥ ३२० ॥

अथ पुनर्विशेषेण नासाजलपाने गुणानाह—

व्यङ्गवलीपलितघ्नं पीनसवैस्वर्यकाशशोथहरम् ।
रजनीक्षयेऽम्बुनस्यं रसायनं दृष्टिसञ्जननम् ॥ ३२१ ॥

अथ नासावारिपानानर्हजनानाह—

स्नेहे पीते क्षते शुद्धावाध्माने स्तिमितोदरे ।
हिक्कायां कफवातोत्थे व्याधौ तद्वारि वारयेत् ॥ ३२२ ॥
*तद्वारि=नासापेयम् ॥ ३२२ ॥

अथर्तुचर्यामाह ।

तत्रादौ नामनिर्देशपूर्वकमृतुषट्कमाह –

चयकोपशमा यस्मिन्दोषाणां सम्भवन्ति हि ।
ऋतुषट्कं तदाख्यातं रवे राशिषु संक्रमात् ॥ ३२३ ॥
ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृण्मिथुनकर्कटौ ।
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत् ॥ ३२४ ॥
धनुर्ग्राहौ च हेमन्तो वसन्तः कुम्भमीनयोः ॥ ३२५ ॥

*मेषवृषौ रविणा संक्रान्तौ । एवं मिथुनकर्कटावित्यादि ॥ ३२४-३२५ ॥

अन्येतु –

शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्धिमाः ।
माघादिमासयुग्मैः स्युर्ऋतवः षट् क्रमादमी ॥ ३२६ ॥

अथर्तुषट्कनामविषयकमतभेदे हेतुमाह –

गङ्गाया दक्षिणे देशे वृष्टेर्बहुलभावतः ।
उभौ मुनिभिराख्यातौ प्रावृड्वर्षाऽभिधावृतू ॥ ३२७ ॥
तस्या एवोत्तरे देशे हिमप्रचुरभावतः ।
एतावुभौ समाख्यातौ हेमन्तशिशिरावृतू ॥ ३२८ ॥

अथ दक्षिणोत्तरायणयोर्लक्षणं गुणांश्चाह –

उत्तरायणमाद्यैस्तैः परैः स्याद्दक्षिणायनम् ।
आद्यमुष्णं बलहरं ततोऽन्यद् बलदं हिमम् ॥ ३२९ ॥

अथ ऋतूनां गुणदोषानाह –

हेमन्तः शीतलः स्निग्धः स्वादुर्जठरवह्निकृत् ।
शिशिरः शीतलोऽतीव रूक्षो वाताग्निवर्धनः ॥ ३३० ॥

*हेमन्तः स्वादुः प्रायेण द्रव्येषु स्वादुरसजनकः । एवमन्यत्रापि बोद्धव्यम् ॥ ३३० ॥

वसन्तो मधुरः स्निग्धः श्लेष्मवृद्धिकरश्च सः ।
ग्रीष्मो रूक्षोऽतिकटुकः पित्तकृत्कफनाशनः ॥ ३३१ ॥
वर्षाः शीता विदाहिन्यो वह्निमान्द्यानिलप्रदाः ।
शरदुष्णा पित्तकर्त्री नृणां मध्यबलावहा ॥ ३३२ ॥

अथ कस्मिन्नृतौ कस्य दोषस्य चयप्रकोपोपशमा — भवन्तीति सहेतुकमाह —

चयप्रकोपोपशमा वायोर्ग्रीष्मादिषु त्रिषु ।
वर्षाऽऽदिषु च पित्तस्य श्लेष्मणः शिशिरादिषु ॥ ३३३ ॥
चीयते लघुरूक्षाभिरोषधीभिः समीरणः ।
तद्विधस्तद्विधे देहे कालस्यौष्ण्यान्न कुप्यति ॥ ३३४ ॥

*तद्विधो रूक्षो लघुश्च । तद्विधे रूक्षे लघौ च ॥ ३३४ ॥

अद्भिरम्लविपाकाभिरोषधीभिश्च तादृशम् ।
पित्तं याति चयं कोपं न तु कालस्य शैत्यतः ॥ ३३५ ॥

*तादृशम्=अम्लविपाकम् ॥ ३३५ ॥

चीयते स्निग्धशीताभिरुदकौषधिभिः कफः ।
तुल्ये च काले देहे च स्कन्नत्वान्न प्रकुप्यति ॥ ३३६ ॥

*तुल्येऽपि काले स्निग्धे शीतले च । स्कन्नत्वाद्=देहे शुष्कत्वात् ॥ ३३६ ॥

हिमे याति शमं पित्तं वायुः श्लेष्मा च चीयते ।
स वायुः शिशिरे कोपं यात्येवोपचितः कफः ॥ ३३७ ॥
हेमन्ते सञ्चितः श्लेष्मा शिशिरे त्वतिचीयते ।
शीतस्निग्धगुरुद्रव्यैः शैत्यस्कन्नो न कुप्यति ॥ ३३८ ॥

*स्कन्नः=कठिनीभूतः ॥ ३३८ ॥

इति कालस्वभावोऽयमाहारादिवशात्पुनः ।
चयादीन्यान्ति सद्योऽपि दोषाः काले विशेषतः ॥ ३३६ ॥

*चयादीन् चयकोपशमान् पूर्वाह्णे वसन्तस्य लिङ्गम्, मध्यान्हे ग्रीष्मस्य, अपराह्णे प्रावृषः, प्रदोषे वार्षिकम् । शारदमर्धरात्रे, प्रत्यूषसि हैमन्तमुपलक्षयेद् । एवमहोरात्रमपि वर्षमिव शीतोष्णवर्षादिलक्षणं दोषोपचयप्रकोपोपशमैर्जानीयादिति सुश्रुतः ॥ ३३९ ॥

अथाकाले दोषवृद्धिमाह —

चयकोपमशमान्दोषा विहाराहारसेवनैः ।
समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्ययम् ॥ ३४० ॥

*समानैः=तुल्यैः, चयादियोग्यैरिति यावद्। विपर्य्ययं कालेऽपि वैपरीत्यं बोध्यम् ॥ ३४० ॥

अथ दोषचयलक्षणमाह सुश्रुतः—

स्वस्थानस्थस्य दोषस्य वृद्धिः स्यात्स्तब्धकोष्ठता।
पीतावभासता वह्निमन्दता चाङ्गगौरवम् ॥ ३४१ ॥
आलस्यं चयहेतौ तु द्वेषश्च चयलक्षणम्।
सञ्चयेऽपहता दोषा लभन्ते नोत्तरां गतिम् ॥ ३४२ ॥
ते तूत्तरासु गतिषु भवन्ति बलवत्तराः ॥ ३४३ ॥

अथ वर्षर्त्तौ नियमानाह—

वर्षासु प्रबलो वायुस्तस्मान्मिष्टादयस्त्रयः।
रसाः सेव्या विशेषेण पवनस्योपशान्तये ॥ ३४४ ॥

*मिष्टादयस्त्रयः=मधुराम्ललवणाः ॥ ३४४ ॥

भवेद्वर्षासु वपुषः क्लिन्नत्वं यद्विशेषतः।
तत्क्लेदशान्तये सेव्या अपि कट्वादयस्त्रयः ॥ ३४५ ॥

*कट्वादयस्त्रयः=कटुतिक्तकषायाः ॥ ३४५ ॥

स्वेदनं मर्दनं सेव्यं दध्युष्णं जाङ्गलामिषम्।
शालयो यवगोधूमा जलं कौपं जलं च्युतम् ॥ ३४६ ॥
न भजेत्पूर्वपवनं वृष्टिं घर्मं हिमं श्रमम्।
नदीतीरं दिवास्वप्नं रूक्षं नित्यं च मैथुनम् ॥ ३४७ ॥

अथांशरदृतौ नियमानाह—

सर्पिः स्वादुकषायतिक्तकरसा यच्छीतलं यन्न
क्षीरं स्वच्छसितैक्षवः पटुरसः स्वल्पं पलं जाङ्गलम्।
गोधूमा यवमुद्गशालिसहिता नादेयमंशूदकं-
चन्द्रश्चन्दनमिन्दुरादिरजनो माल्यं पटो निर्मलः ॥ ३४८ ॥

*अथांशूदकलक्षणमाह।

*दिवसेऽर्ककरैर्जुष्टं निशि शीतकरांशुभिः।
ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहम् ॥ ८ ॥

अत्र समग्रदिवसप्राप्त्यर्थं दिवापदमेवं निशापदं च ॥ ८ ॥

*चन्द्रः=कर्पूरः ॥ ३४८ ॥

विश्रामः सुहृदां गणेषु मधुरा वाचः सरःक्रीडनं-
पित्तानां च विरेचनं बलवतो युक्तं शिरामोक्षणम् ।
एतान्यत्र घनावसानसमये पथ्यानि मुञ्चेद्दधि-
व्यायामाम्लकटूष्णतीक्ष्णदिवसस्वप्नं हिमं चातपम् ॥३४९॥
इक्षवः शालयो मुद्गाः सरोऽम्भः क्वथितं पयः ।
शरद्येतानि पथ्यानि प्रदोषे चेन्दुरश्मयः ॥ ३५० ॥

अथ हेमन्तर्तौ नियमानाह—

प्रातर्भोजनमम्लमिष्टलवणानभ्यङ्गघर्मश्रमान्
गोधूमैक्षवशालिमाषपिशितं पिष्टं नवान्नं तिलान् ।
कस्तूरीं वरकुङ्कुमागुरुयुतामुष्णाम्बु शौचं तथा
स्निग्धं स्त्रीषु सुखं गुरूष्णवसनं सेवेत हेमन्तके ॥३५१॥

अथ शिशिरर्तौ नियमानाह—

शिशिरे शीतमधिकं रौद्यं चादानकालजम् ।
विशेषतस्ततस्तत्र हेमन्तस्य मतो विधिः ॥३५२॥

अथ वसन्तर्तौ नियमानाह—

वान्तिं नस्यमथाभयां च मधुना व्यायाममुद्वर्त्तनं-
संसेवेत मधौ कफघ्नकवलं शूल्यं पलं जाङ्गलम् ।
गोधूमान्बहुशालिभेदसहितान्मुद्गान्यवान्षष्टिकां-
ल्लेपश्चन्दनकुङ्कुमागुरुकृतं रूक्षं कटूष्णं लघु ॥३५३॥
मिष्टमम्लं दधि स्निग्धं दिवास्वप्नं च दुर्जरम् ।
अवश्यायमपि प्राज्ञो वसन्ते परिवर्जयेत् ॥ ३५४ ॥

अथ ग्रीष्मर्तुनियमानाह—

स्वादुस्निग्धहिमं लघु द्रवमयं द्रव्यं रसालां सितां-
सक्तुक्षीरमजाङ्गलानि सितया शालिं रसं मांसजम् ।
शीतांशुं शयनं दिवा मलयजं शीतं पयः पानकं
सेवेतोष्णदिने त्यजेत्तु कटुकक्षाराम्लघर्मश्रमान् ॥३५५॥

अथ पूर्वोक्तर्तुचर्याऽऽचरणे फलमाह—

ऋतुष्वेषु य एतैस्तु विधिभिर्वर्त्तते नरः ।
दोषानृतुकृतान्नैव लभते स कदा चन ॥ ३५६ ॥

इति श्रीलटकनतनयश्रीमन्मिश्रभावविरचिते भावप्रकाशे दिनचर्याऽऽदिप्रकरणं पञ्चमम् ॥ ५ ॥

समाप्तम् ।

अथ षष्ठं वर्गप्रकरणम् ॥ ६ ॥

तत्र प्रथमो मिश्रवर्गः ॥ १ ॥

अथ व्याधेर्लक्षणं, तत्र वाग्भटः—

रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता ।
रोगा दुःखस्य दातारो ज्वरप्रभृतयो हि ते ॥ १ ॥
ते च स्वाभाविकाः के चित्के चिदागन्तवः स्मृताः ।
मानसाः के चिदाख्याताः कथिताः केऽपि कायिकाः ॥ २ ॥

*तत्र स्वाभाविकाः=शरीरस्वभावादेव जाताः क्षुत्पिपासासुषुप्तिजरामृत्युप्रभृतयः, अथवा स्वभावादुत्पत्तेर्जाताः स्वाभाविकाः=सहजा इति यावत्, ते च जन्मान्धत्वादयः। आगन्तवोऽभिघातादिजनिताः, अथवा, जन्मोत्तरभाविनः। मानसाः=कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यशोकविषादेर्ष्याऽसूयामात्सर्यप्रभृतयः, अथवा-उन्मादापस्मारमूर्च्छाभ्रममोहतमःसंन्यासप्रभृतयः। कायिकाः=पाण्डुरोगप्रभृतयः ॥ २ ॥

अथ व्याधिभेदानाह—

कर्मजाः कथिताः के चिद्दोषजाः सन्ति चापरे ।
कर्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृताः ॥ ३ ॥

तत्र कर्मजान्व्याधीनाह—

*यत् प्राक्तनं दुष्कर्म प्रबलं केवलभोगनाश्यम्, प्रायश्चित्तनाश्यं वा, ततो जाताः, न तु दुष्टवातादिदोषेण जनितास्तथा—

यथाशास्त्रं तु निर्णीतो यथाव्याधिचिकित्सितः ।
न शमं याति यो व्याधिः स ज्ञेयः कर्मजो बुधैः ॥ १ ॥

अथ दोषजान्व्याधीनाह—

*दोषजाः-मिथ्याऽऽहारविहारप्रकुपितवातपित्तकफजाः । ननु मिथ्याऽऽहारविहारिणामपि प्राक्तनसुकृतेन नैरुज्यं दृश्यत एव। ततो-दोषजेष्वपि प्राक्तनं दुष्कर्मैव कारणं, तत्कथं दोषजा इति? उच्यते-दोषजेष्वपि वस्तुत आदिकारणं दुष्कर्म वर्त्तत एव, किन्तु तत्र मि-

थ्याऽऽहारविहारदूषिता दोषा हेतवो दृश्यन्त इति दोषजा इत्युच्यन्त-इति समाधिः ।

अथ कर्मदोषोद्भवान् व्याधीनाह—

स्वल्पदोषा गरीयांसस्ते ज्ञेयाः कर्मदोषजाः ॥ २ ॥

*अत्र कारणं दुष्कर्म प्रबलं यतो दोषाल्पत्वेऽपि व्याधेर्गरीयस्त्वं-तत्कर्मक्षयादेव क्षीणं भवति । दोषाः स्वल्पा अपि निदानत्वेनोक्ता-दृश्यन्त एवेति दोषाणां कारणतां मन्यत इति कर्मदोषोद्भवाः ॥ ३ ॥

अथ रोगक्षयहेतूनाह—

कर्मक्षयात्कर्मकृता दोषजाः स्वस्वभेषजैः ।
कर्मदोषोद्भवा यान्ति कर्मदोषक्षयात् क्षयम् ॥ ४ ॥

*दोषजाः स्वस्वभेषजैरिति । दोषजेष्वादिकारणं दुष्कर्म तद्भेषजार्थं द्रव्यव्ययादिजनितदुःखभोगेन कटुतिक्तकषायाद्यहृद्यभक्षणा-दिजनितदुःखभोगेन च क्षयं याति । शेषा दुष्टा हेतवो दोषास्ते स्व-स्वभेषजैः क्षयं यान्तीत्यर्थः ॥ ४ ॥

अथ साध्यादिभेदेन त्रिविधान् रोगानाह—

साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः ।
सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते ॥ ५ ॥

अथ याप्यलक्षणमाह—

यापनीयं तु तं विद्यात्क्रिया धारयते हि यम् ।
क्रियायां तु निवृत्तायां सद्यो यश्च विनश्यति ॥ ६ ॥
प्राप्ता क्रिया धारयति सुखिनं याप्यमातुरम् ।
प्रपतिष्यद्विवागारं स्तम्भो यत्नेन योजितः ॥ ७ ॥

अथ साध्ययाप्ययोश्चिकित्साया आवश्यकत्वमाह—

साध्या याप्यत्वमायान्ति याप्यश्चासाध्यतां तथा ।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावतानाम् ॥ ८ ॥

*अक्रियावतां—चिकित्सारहितानाम् ॥ ८ ॥

अथोपद्रवस्य लक्षणमाह—

रोगारम्भकदोषस्य प्रकोपादुपजायते ।
योऽन्यो विकारः स बुधैरुपद्रव इहोदितः ॥ ९ ॥

अथारिष्टस्य लक्षणमाह—

रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्याद्रिष्टं चापि तदुच्यते ॥ १० ॥

अथ चिकित्साया लक्षणमाह—

या क्रिया व्याधिहरणी सा चिकित्सा निगद्यते ।
दोषधातुमलानां या साम्यकृत्सैव रोगहृत् ॥ ११ ॥

*क्रियाऽत्र कर्म । व्याधिर्हन्यतेऽनयेति व्याधिहरणी । करणाधिकरणयोश्चेति सूत्रेण करणार्थं ल्युट् ॥ ११ ॥

तथा च—

याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म तद्भिषजां मतम् ॥ १२ ॥
या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ॥ १३ ॥

*क्रियाऽत्र चिकित्सा ।

तथा चामरसिंहः—

आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम् ।
उपायः कर्म चेष्टा च चिकित्सा च नव क्रिया ॥३॥इति॥१३॥

अथ चिकित्साविध्युपदेशं कुर्वन्नाह—

जातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्योऽल्पतया गदः ।
वह्निशत्रुविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ ॥ १४ ॥
रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म भिषक् पश्चाज्ज्ञानपूर्वं समाचरेत् ॥ १५ ॥

*अयमर्थः—भिषग् आदौ रोगं परीक्षेत=विचारयेत्, ततः=पश्चाद्रोगौषधविचारानन्तरं ज्ञानपूर्वं सावधानो न त्ववज्ञाय, कर्म चिकित्सामौषधदानादिरूपां समाचरेदित्यर्थः ॥ १५ ॥

अथ रोगाज्ञानेन चिकित्साकरणे दोषमाह—

यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक् ।
अप्यौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया ॥ १६ ॥

*स्वैरितया सिद्धिर्भवति नापि भवतीत्यर्थः ॥ १६ ॥

अन्यच्च—

भेषजं केवलं कर्त्तुं यो जानाति न चामयम् ।
वैद्यकर्म स चेत्कुर्याद्वधमर्हति राजतः ॥ १७ ॥

अथ रोगज्ञाने भेषजाज्ञाने दोषमाह—

यस्तु केवलरोगज्ञो भेषजेष्वविचक्षणः ।
तं वैद्यं प्राप्य रोगी स्याद्यथा नौर्नाविकं विना ॥ १८ ॥

*नाविकं=कर्णधारं विना यथा नौः सङ्कटे पतति तथा रोगीत्यर्थः॥१८॥

अन्यच्च--

यस्तु केवलशास्त्रज्ञः क्रियास्वकुशलो भिषक् ।
स मुह्यत्यातुरं प्राप्य यथा भीरुरिवाहवम् ॥ १९ ॥

अथ रोगौषधयोर्ज्ञाने गुणमाह—

यस्तु रोगविशेषज्ञः सर्वभैषज्यकोविदः ।
देशकालविभागज्ञस्तस्य सिद्धिर्न संशयः ॥ २० ॥
आदावन्ते रुजां ज्ञाने प्रयतेत चिकित्सकः ।
भेषजानां विधानेन ततः कुर्याच्चिकित्सितम् ॥ २१ ॥

*चिकित्सितमित्यत्र भावे क्तः ॥ २१ ॥

विकारनामाकुशलो न जिह्रीयात्कदा चन ।
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः ॥ २२ ॥

*न जिह्रीयात्र लज्जेद् । ध्रुवा=नियता ॥ २२ ॥

नास्ति रोगो विना दोषैर्यस्मात्तस्माच्चिकित्सकः ।
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ॥ २३ ॥
ये न कुर्वन्त्यसाध्यानां चिकित्सां ते भिषग्वराः ।
अतो वैद्यैः श्रमः कार्यः साध्यासाध्यपरीक्षणे ॥ २४ ॥

*रोगज्ञानोपाया अग्रे वक्ष्यन्ते ॥ २४ ॥

अथ चिकित्सापद्धतिमाह—

शीते शीतप्रतीकारमुष्णे तूष्णनिवारणम् ।
कृत्वा कुर्यात्क्रियां प्राप्तां क्रियाकालं न हापयेत् ॥ २५ ॥
अप्राप्ते या क्रिया काले प्राप्ते वा न क्रिया कृता ।
क्रिया हीनाऽतिरिक्ता च साध्येष्वपि न सिध्यति ॥ २६ ॥

*अयमर्थः—काले=चिकित्साऽवसरे । अप्राप्ते=अनागते । या क्रिया=चिकित्सा, यथा ज्वरे जीर्णतामप्राप्ते तरुण एव कषायदानक्रिया न सिद्ध्यति । या च क्रिया चिकित्साऽवसरे प्राप्ते न कृता, अर्थात्पश्चात्कृता, यथा दाहे कथञ्चिच्छान्ते पश्चाच्छीतानुलेपनादिक्रिया । तथा हीनाऽतिरिक्ता च क्रिया साध्येष्वपि न सिध्यति ॥२६॥

अथातिरिक्तां हीनां च क्रियां वर्जयन्नाह—

विकारेऽल्पे महत्कर्म क्रिया लघ्वी गरीयसि ।
द्वयमेतदकौशल्यं कौशल्यं युक्तकर्मता ॥ २७ ॥
क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत् ।
पूर्वस्यां शान्तवेगायां न क्रियासङ्करो हितः ॥ २८ ॥

भिन्नरूपाभिस्तु क्रियाभिः सांकर्यमपि न दोषाय ।

यत आह—

क्रियाभिस्तुल्यरूपाभिर्न क्रियासङ्करो हितः ।
ताभिस्तु भिन्नरूपाभिः साङ्कर्यं नैव दुष्यति ॥ २९ ॥

*अत एवोक्तं—

लङ्घनं वालुकास्वेदो नस्यं निष्ठीवनं तथा ।
अवलेहोऽञ्जनं चापि प्राक प्रयोज्यं त्रिदोषजे ॥ ४ ॥

*ज्वर इति शेषः ॥ ४ ॥ २९ ॥

न चैकान्तेन निर्दिष्टे शास्त्रे निविशते बुधः ।
स्वयमप्यत्र भिषजा तर्कणीयं चिकित्सता ॥ ३० ॥

यत आह—

उत्पद्यते च साऽवस्था दोषकालबलं प्रति ।
यस्यां कार्यमकार्यं स्यात्कर्म कार्यं विवर्जितम् ॥ ३१ ॥

*विवर्जितं कर्म कर्त्तव्यं भवतीत्यर्थः ॥ ३१ ॥

अथ चिकित्सायाः फलमाह—

क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्मः क्वचिद्यशः ।
कर्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला ॥ ३२ ॥
आयुर्वेदोदितां युक्तिं कुर्वाणाश्च हिताय ये ।
पुण्यायुर्बुद्धिसंयुक्ता नीरोगाश्च भवन्ति ते ॥ ३३ ॥

अथ धनिभ्योऽर्थग्रहणं वैद्यानां समुचितमित्याह—

नैव कुर्वीत लोभेन चिकित्सापुण्यविक्रयम् ।
ईश्वराणां वसुमतां लिप्सेतार्थं तु वृत्तये ॥ ३४ ॥

अथ निःशुल्ककारितचिकित्साफलमाह—

चिकित्सितं शरीरं यो न निष्क्रीणाति दुर्मतिः ।
स यत्करोति सुकृतं सर्वं तद्भिषगश्नुते ॥ ३५ ॥

अथ वैद्यवृत्तिः सर्वत्र सुसिद्धेत्याह—

न देशो मनुजैर्हीनो न मनुष्या निरामयाः ।
ततः सर्वत्र वैद्यानां सुसिद्धा एव वृत्तयः ॥ ३६ ॥

अथ चिकित्साया अङ्गान्याह—

रोगी दूतो भिषग् दीर्घमायुर्द्रव्यं सुसेवकः ।
सदौषधं चिकित्साया इत्यङ्गानि बुधा जगुः ॥ ३७ ॥

तत्र रोगिणो लक्षणमाह—

रोगो यस्यास्ति रोगी स स चिकित्स्यस्तु यादृशः ।
यादृशश्चाचिकित्स्योऽपि वक्ष्यमाणो निशम्यताम् ॥ ३८ ॥

तत्र चिकित्स्यस्य लक्षणमाह—

निजप्रकृतिवर्णाभ्यां युक्तः सत्त्वेन चक्षुषा ।
चिकित्स्यो भिषजां रोगी वैद्यभक्तो जितेन्द्रियः ॥३९॥

*सत्त्वं=व्यसनाभ्युदयक्रियाऽऽदिष्वविह्वलताकरं, तेन युक्तः । चक्षुषा=चक्षुरुपलक्षितेन, ततोऽन्येनापीन्द्रियेण । चिकित्स्यः=रोगान्मोचयितव्यः ॥ ३९ ॥

अन्यच्च—

आयुष्मान्सत्त्ववान्साध्यो द्रव्यवान्मित्रवानपि ।
चिकित्स्यो भिषजां रोगी वैद्यवाक्यकृदास्तिकः ॥४०॥

*आयुर्वेदोऽस्तीति मतिर्यस्य स आस्तिकः ॥ ४० ॥

अथाचिकित्स्यस्य लक्षणमाह—

चण्डः साहसिको भीरुः कृतघ्नो व्यग्र एव च ।
शोकाकुलो मुमूर्षुश्च विहीनः करणैश्च यः ॥ ४१ ॥

वरी वैद्यविदग्धश्च श्रद्धाहीनश्च शङ्कितः ।
भिषजामविधेयाः स्युर्नोपक्रम्या भिषग्विधाः ॥ ४२ ॥

*चण्डोऽत्यन्तक्रोधशीलः । साहसिकः=अविचार्यकारी। भीरु-भयशीलः । कृतघ्नो=वैद्यकृतोपकारलोपकः । व्यग्रः=व्याकुलः । विहीनः करणैश्च यः=नेत्रादीन्द्रियशक्तिरहितः । वैरी न चिकित्स्यः-कदा चिद्रोगोद्रेकेऽपवादभयात् । वैद्यविदग्धो=वैद्यधूर्त्तः । शङ्कितो=वैद्यविश्वासरहितः । भिषजामविधेयाः=वैद्यवचनाविधायिनः । भिषग्विधाः=वैद्यतुल्याः । एते न उपक्रम्याः=न चिकित्स्याः ।

* तथा च सुश्रुतः—

स न सिद्ध्यति वैद्यस्तु गृहे यस्य न पूज्यते ॥ ४१ ॥ ४२ ॥

अथाचिकित्स्यानां चिकित्सानिषेधमाह—

एतानुपाचरन् वैद्यो बहून् दोषानवाप्नुयात् ॥ ४३ ॥

अथ दूतस्य लक्षणमाह—

यश्चिकित्सकमानेतुं याति दूतः स कथ्यते ।
स च यादृक् समुचितस्तादृगत्र निगद्यते ॥ ४४ ॥
दूताः सुजातयोऽव्यङ्गाः पटवो निर्मलाम्बराः ।
सुखिनोऽश्ववृषारूढाः शुभ्रपुष्पफलैर्युताः ॥ ४५ ॥
सजातयः सुचेष्टाश्च सजीवदिशि सङ्गताः ॥
भिषजं समये प्राप्ता रोगिणः सुखहेतवे ॥ ४६ ॥

*सजातयः=रोगिसमानजातयः ।
यस्यां प्राणमरुद् वाति सा नाडी जीवसंज्ञिता ॥ ५ ॥ ४६ ॥

अथ दूतयात्रायां शकुनविचारमाह—

वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते ।
न शुभं सौम्यशकुनं प्रदीप्तं तु सुखावहम् ॥४७॥

*प्रदीप्तम्=अग्निः ॥ ४७ ॥

अथ दूतो रोगी च रिक्तहस्तो वैद्यं न पश्येदित्याह—

तथा हि—

रिक्तहस्तो न पश्येत्तु राजानं भिषजं गुरुम् ।
दैवज्ञं देवतां मित्रं फलेन फलमादिशेत् ॥ ४८ ॥

अथ सुवैद्यस्य लक्षणमाह—

चिकित्सां कुरुते यस्तु स चिकित्सक उच्यते ।
स च यादृक्समाचीनस्तादृशोऽपि निगद्यते ॥ ४९ ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयंकृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥ ५० ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी प्रियंवदः ।
सत्यधर्मपरो यश्च वैद्य ईदृक् प्रशस्यते ॥ ५१ ॥

*दृष्टकर्मा=दृष्टा परेण कृता चिकित्सा येन सः । स्वयंकृती=स्वयं चिकित्साकुशलः । लघुहस्तः=सिद्धिमद्धस्तः ॥ ४९—५१ ॥

अथ निषिद्धवैद्यस्य लक्षणमाह—

कुचैलः कर्कशः स्तब्धो ग्रामीणः स्वयमागतः ।
पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा यदि ॥ ५२ ॥

*कर्कशः=अप्रियवादी । स्तब्धः=साभिमानः । ग्रामीणः=व्यवहाराचतुरः ॥ ५२ ॥

अथ वैद्यस्य कर्माह—

व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः ।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥ ५३ ॥

*अस्यायमर्थः—व्याधेः सम्यक् परिचयो वेदनायाः शान्तिकरणं च वैद्यस्य कर्म न तु वैद्य आयुषः प्रभुरित्यर्थः। अपरे त्वेवं व्याचक्षते—व्याधेस्तत्त्वतः परिचयो वेदनायाः शान्तिकरणं च । एतदेव न वैद्यस्य वैद्यत्वं किन्तु वैद्य आयुषोऽपि प्रभुः, आगन्तुमृत्युशताहरणात् ।

* तथा च सुश्रुते धन्वन्तरिः—

एकोत्तरं मृत्युशतमथर्वाणः प्रचक्षते ।
तत्रैकः कालसंयुक्तः शेषास्त्वागन्तवः स्मृताः ॥ ६ ॥

*अयमर्थः—अथर्वाणः=अथर्वतत्त्वज्ञत्वेनाथर्वतुल्याः, मृत्युमेकोत्तरं शतं प्रचक्षते तत्रैको मृत्युः कालसंयुक्तः। कालः=आयुषोऽन्ते शरीरिणामवश्यं संहर्त्ता । सर्वैरुपायैर्निवारयितुमशक्यः स ब्रह्मादीनायुषोऽन्ते संहरति । यत आह-लिङ्गपुराणे कार्त्तिकेयं प्रति महादेवः—
"ममायुर्ग्रसते कालः कुतः पुत्र ! रसायनम् ॥" इति ॥ ७ ॥

*तेन कालेन संयुक्तः संहाराय नियुक्तः सोऽवश्यम्भावी । शेषाः- शतमृत्यवः, आगन्तवः=आगन्तुरूपहेतुजन्मानः] कार्यकारणयोरभेदोपचारात् ।

*आगन्तवो हेतवो यथा—

विषभक्षणमजीर्णमत्यन्तभोजनं च, दुर्देशजलपानं, तथाऽतिबलवैरिव्याघ्रवनमहिषमत्तमातङ्गादिभिर्युद्धं, दन्दशूकेन क्रीडनम्, अत्युच्चवृक्षाग्रारोहणम्, बाहुभ्यां महातरङ्गिणीतरणम्, एकाकिनो रात्रौ दुर्गे मार्गे गमनमित्यादि ॥ ६ ॥

*आगन्तुहेतुजा मृत्यवो दुर्निमित्तभाविभावनाबलवत्त्वात्, आयुषि सत्यपि मारयन्ति । यथा मल्लिकातैलवर्त्तिवह्निषु विद्यमानेषु वात्या दीपं नाशयति ।

*तथा च—

यथा सत्यपि तैलादौ दीपं निर्वापयेन्मरुत् ।
एवमायुष्यहीनेऽपि हिंसन्त्यागन्तुमृत्यवः ॥ ८ ॥

*किन्तु-आगन्तुनिमित्तानि निवारयितुं च शक्यन्ते ।

*यत आह सुश्रुते धन्वन्तरिः—

दोषागन्तुनिमित्तेभ्यो रसमन्त्रविशारदौ ।
रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ ॥ ६ ॥

*वैद्यमन्त्रिणौ नृपतिं नित्यं यत्नाद्रक्षेताम् । कुतः ? दोषागन्तुनिमित्तेभ्यः । दोषाः=निषिद्धाहारविहारदूषिता वातपित्तकफा रोगोत्पादकाः, आगन्तवः=निषिद्धा विहारा अतिबलवैरिविग्रहादयः, ते निमित्तानि येषां, तेभ्यः=शतमृत्युभ्यः । ननु वैद्यपुरोहितौ कथं शतं मृत्यून् निवारयितुं शक्तौ ? तत्राह—यतस्तौ रसमन्त्रविशारदौ, प्रथमं वैद्यो दिनचर्यारात्रिचर्यर्तुचर्योक्ताहारविहाराभ्यां वातपित्तकफधातुमलान्समानेव रक्षति ततो रसज्ञत्वाद्रसैर्मृत्युञ्जयादिभिर्निषिद्धाहारविहारदूषितदोषजनितान्विकारान्मृत्युहेतूनपहरति । मन्त्री च सद्बुद्धिदानेन मृत्युहेतुभ्यो निषिद्धविहारेभ्यो नृपतिं निवारयति । तत आगन्तुमृत्यवो निवारयितुं शक्या न त्ववश्यम्भाविनः ॥ ५३ ॥

अथायुर्विचारमाह—

भिषगादौ परीक्षेत रुग्णस्यायुः प्रयत्नतः ।
तत आयुषि विस्तीर्णे चिकित्सा सफला भवेत् ॥ ५४ ॥

अथ दीर्घायुषो लक्षणान्याह—

सौम्या दृष्टिर्भवेद्यस्य श्रोत्रं वक्त्रं तथैव च ।
स्वादुं गन्धं विजानाति स साध्यो नात्र संशयः ॥ ५५ ॥
पाणिपादौ च यस्योष्णौ दाहः स्वल्पतरो भवेत् ।
जिह्वा तु कोमला यस्य स रोगी न विनश्यति ॥ ५६ ॥
स्वेदहीनो ज्वरो यस्य श्वासो नासिकया चरेत् ।
कण्ठश्च कफहीनः स्यात्स रोगी जीवति ध्रुवम् ॥ ५७ ॥
यस्य निद्रा सुखेन स्याच्छरीरं द्युतिमद्भवेत् ।
इन्द्रियाणि प्रसन्नानि स रोगी नैव नश्यति ॥ ५८ ॥

अथ स्वल्पायुषो लक्षणान्याह—

शरीरशीलयोर्यस्य प्रकृतेर्विकृतिर्भवेत् ।
तदरिष्टं समासेन व्यासतश्च निबोध मे ॥ ५९ ॥
शृणोति विविधाञ्छब्दान्विपरीताञ्छृणोति च ।
यो न शृणोति चाकस्मात्तं वदन्ति गतायुषम् ॥ ६० ॥
यस्तूष्णमिव गृह्णाति शीतमुष्णं च शीतवत् ।
उष्णगात्रोऽतिमात्रं यो भृशं शीतेन कम्पते ॥ ६१ ॥
*तमपि गतायुषं वदन्तीत्यन्वयः ॥ ६१ ॥
प्रहारं नैव जानाति यो गच्छेदन्यथाऽपि वा ।
पांशुनेवावकीर्णानि यश्च गात्राणि मन्यते ॥ ६२ ॥
वर्णान्यता वा राज्यो वा यस्य गात्रे भवन्ति हि ।
स्नातानुलिप्तं यं चापि भजन्ते नीलमाक्षिकाः ॥ ६३ ॥
विपरीतेन गृह्णाति रसान्यश्चोपयोजितान् ।
यो वा रसान्न संवेत्ति तं गतासुं प्रचक्षते ॥ ६४ ॥
सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धं च सुगन्धवत् ।
गृह्णाति योऽन्यथा गन्धं शान्ते दीपे निरामयः ॥ ६५ ॥

रात्रौ सूर्य्यं ज्वलन्तं वा दिवा वा चन्द्रवर्चसम् ।
दिवा ज्योतींषि यश्चापि ज्वलितानीव पश्यति ॥ ६६ ॥

*दिवा वा चन्द्रवर्चसं सूर्यमित्यन्वयः । ज्योतींषि = नक्षत्राणि ॥६६॥

विद्युत्वतोऽसितान्मेघान् गगने निर्घने घनान् ।
विमानयानप्रासादैर्यश्च संकुलमम्बरम् ॥ ६७ ॥

यश्चानिलं मूर्त्तिमन्तमन्तरिक्षेऽवलोकते ।
धूमनीहारवासोभिरावृतामिव मेदिनीम् ॥ ६८ ॥

प्रदीप्तमिव यो लोकं यो वा प्लुतमिवाम्भसा ।
भूमिमष्टापदाकारां लेखाभिर्यश्च पश्यति ॥ ६९ ॥

यो न पश्यति ऋक्षाणि यश्च देवीमरुन्धतीम् ।
ध्रुवमाकाशगङ्गां च तं वदन्ति गतायुषम् ॥ ७० ॥

आदर्शेऽम्बुनि घर्मे वा छायां यश्च न पश्यति ।
पश्यत्येकाङ्गहीनां वा विकृतां वाऽन्यसत्त्वजाम् ॥ ७१ ॥

श्वकाककङ्कगृध्राणां प्रेतानां यक्षरक्षसाम् ।
आतुरो लभते मृत्युं स्वस्थो व्याधिमवाप्नुयात् ॥ ७२ ॥

ह्रीश्रियौ नश्यतो यस्य तेज ओजः स्मृतिः प्रभा ।
अकस्माच्च भजन्ते यं स गतासुरसंशयम् ॥ ७३ ॥

*प्रभाऽत्र प्रतिभा ॥ ७३ ॥

यस्याधरौष्ठः पतितः क्षिप्तश्चोर्ध्वं तथोत्तरः ।
उभौ वा जाम्बवाभासौ दुर्लभं तस्य जीवितम् ॥ ७४ ॥

आरक्ता दशना यस्य श्यावा वा स्युः पतन्ति वा ।
खञ्जनप्रतिभा वाऽपि तं गतायुषमादिशेत् ॥ ७५ ॥

कृष्णा तथाऽनुलिप्ता च जिह्वा शून्या च यस्य वै ।
कर्कशा वा भवेद्यस्य सोऽचिराद्विजहात्यसून् ॥ ७६ ॥

कुटिला स्फुटिता वाऽपि शुष्का वा यस्य नासिका ।
अवस्फूर्जति भग्ना वा स न जीवति मानवः ॥ ७७ ॥

*अवस्फूर्जति = श्वासवेगेनोच्चैः शब्दं करोतीत्यर्थः ॥ ७७ ॥

सङ्क्षिप्ते विषमे स्तब्धे रूक्षे सास्रे च लोचने ।
स्याातां परिश्रुते यस्य स गतायुर्नरो ध्रुवम् ॥ ७८ ॥
केशाः सीमन्तिनो यस्य सङ्क्षिप्ते विनते भ्रुवौ ।
लुठन्ति चाक्षिपक्ष्माणि सोऽचिराद्याति मृत्यवे ॥ ७९ ॥

*लुठन्ति=पतन्ति ॥ ७९ ॥

नाहरत्यन्नमास्यस्थं न धारयति यः शिरः ।
एकाग्रदृष्टिर्मूढात्मा सद्यः प्राणान्विमुञ्चति ॥ ८० ॥
उत्थाप्यमानो बहुशः संमोहं योऽधिगच्छति ।
बलवान्दुर्बलो वाऽपि तं पक्वं भिषगादिशेत् ॥ ८१ ॥
निद्रा निरन्तरं यस्य यो जागर्त्ति च सर्वदा ।
मुह्येद्वा वक्तुकामश्च प्रत्याख्येयः स जानता ॥ ८२ ॥
उत्तरौष्ठं च यो लिह्यादुत्करांश्च करोति यः ।
प्रेतैर्वा भाषते सायं प्रेतरूपं तमादिशेत् ॥ ८३ ॥

*उत्करान्=हस्तपादादिविक्षेपान् ॥ ८३ ॥

खेभ्यश्च रोमकूपेभ्यो यस्य रक्तं प्रवर्त्तते ।
पुरुषस्याविषार्त्तस्य स सद्यो जीवितं त्यजेत् ॥ ८४ ॥
सम्यक् चिकित्स्यमानस्य विकारो योऽभिवर्धते ।
प्रक्षीणबलमांसस्य लक्षणं तद् गतायुषः ॥ ८५ ॥

अथ गतायुषां पुरुषाणामोषधिप्रदानमकिञ्चि-

त्करं भवतीत्यत्र हेतुमाह—

भूताः प्रेताः पिशाचाश्च रक्षांसि विविधानि च ।
मरणाभिमुखं जन्तुमुपसृत्य च नित्यशः ॥ ८६ ॥
तानि भेषजवीर्याणि प्रतिघ्नन्ति जिघांसया ।
तस्मान्मोघाः क्रियाः सर्वा भवन्त्येव गतायुषः ॥ ८७ ॥

*नन्वायुषि सति चिकित्सायाः साफल्यमुक्तम्, आयुरस्ति चेत्तदा तदेव जीवनहेतुः, किं चिकित्साविधानेन ? तत्रोच्यते, आयुषि सति चिकित्सायाः फलं वेदनानिग्रहः ।

*उक्तञ्च-

आयुष्मान्पुरुषो जीवेत्सव्यथो भेषजं विना ।
भेषजेन पुनर्जीवेत्स एव हि निरामयः ॥ १० ॥

*किञ्च-आयुषि सत्यपि रोगी चिकित्सां विनोत्थातुं न शक्नोति ।

यत आह चरकः-

सति चायुषि नोपायं विनोत्थातुं क्षमो रुजी ।
दर्शितश्चात्र दृष्टान्तः पङ्कमग्नो यथा गजः ॥ ११ ॥

*किञ्च-चिकित्सां विना आयुष्मानप्यवसीदति ।

यत आह स एव-

सति चायुषि नष्टः स्यादामयैश्चाचिकित्सितः ।
यथा सत्यपि तैलादौ दीपो निर्वाति वात्यया ॥ १२ ॥

*अत एवोक्तं-

साध्या याप्यत्वमायान्ति याप्या गच्छन्त्यसाध्यताम् ।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् ॥१३॥ इति ॥

*चिकित्सा तु अनिश्चितायुषोऽपि कर्त्तव्या ।

यत आह-

तावत्प्रतिक्रिया कार्या यावच्छ्वसिति मानवः ।
कदा चिद्दैवयोगेन दृष्टारिष्टोऽपि जीवति ॥ १४ ॥

*इति तु यस्यासाध्यत्वं सन्दिग्धं तं प्रत्युक्तं । येषु त्वसाध्यता शास्त्रेणानुभवेन विनिश्चिता ते पुनर्न चिकित्स्याः ।

यत उक्तं--

सद्वैद्यास्ते न येऽसाध्यानारभन्ते चिकित्सितुम् ॥१५॥
इति ॥ ८६-८७ ॥

अथ द्रव्यावश्यकतामाह-

सर्वे द्रव्यमपेक्षन्ते रोगिप्रभृतयो यतः ।
विना वित्तं न भैषज्यं चिकित्साऽङ्गं ततो धनम् ॥ ८८ ॥

अथ परिचारकस्य लक्षणमाह—

स्निग्धोऽजुगुप्सुर्बलवान्युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदश्रान्तो युज्यते परिचारकः ॥ ८९ ॥

*स्निग्धः=प्रीतः, अजुगुप्सुः=अनिन्दकः ॥ ८९ ॥

अथ भेषजस्य लक्षणमाह—

वैद्यो व्याधिं हरेद्येन तद्द्रव्यं प्रोक्तमौषधम् ।
तद्यादृशमवश्यं स्याद्रोगघ्नं तादृशं ब्रुवे ॥ ९० ॥

अथौषधग्रहणपरिभाषामाह—

प्रशस्तदेशे सञ्जातं प्रशस्तेऽहनि चोद्धृतम् ।
अल्पमात्रं बहुगुणं गन्धवर्णरसान्वितम् ॥ ९१ ॥
दोषघ्नमग्लानिकरमधिकं न विकारि यत् ।
समीक्ष्य काले दत्तं च भेषजं स्याद् गुणावहम् ॥९२॥
आग्नेया विन्ध्यशैलाद्याः सौम्यो हिमगिरिः स्मृतः ।
अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः ॥९३॥

*आग्नेयाः=अधिकाग्न्यंशाः, सौम्यः=अधिकसोमांशः, औषधय-एवौषधानि । अत्र स्वार्थ अण् । अनुरूपाणि=सदृशानि ॥९३॥

अन्येष्वपि प्ररोहन्ति वनेषूपवनेषु च ।
गृह्णीयात्तानि सुमनाः शुचिः प्रातः सुवासरे ॥ ९४ ॥
आदित्यसम्मुखो मौनी नमस्कृत्य शिवं हृदि ।
साधारणधराद्द्रव्यं गृह्णीयादुत्तराश्रितम् ॥ ९५ ॥

*साधारणधराद्द्रव्यं=सर्वभूमिभवं द्रव्यम् । उत्तराश्रितं=स्वस्मादुत्तरदिग्भवम् ॥९४-९५॥

वल्मीककुत्सितानूपश्मशानोषरमार्गजाः ।
जन्तुवह्निहिमव्याप्ता नौषध्यः कार्यसाधिकाः ॥९६॥
शरद्यखिलकार्यार्थं ग्राह्यं सरसमौषधम् ।
विरेकवमनार्थं तु वसन्तान्ते समाहरेत् ॥ ९७ ॥

*वसन्तान्ते=वसन्तमध्ये । समाहरेत्=संगृह्णीयात् ॥ ९७ ॥

अतिस्थूलजटा याः स्युस्तासां ग्राह्यास्त्वचोऽवम् ।
गृह्णीयात्सूक्ष्ममूलानि सकलान्यपि बुद्धिमान् ॥९८॥

अन्यच्च—

महान्ति येषां मूलानि काष्ठगर्भाणि सर्वतः ।
तेषां तु वल्कलं ग्राह्यं ह्रस्वमूलानि सर्वशः ॥ ९९ ॥
न्यग्रोधादेस्त्वचो ग्राह्याः सारः स्याद् बीजकादितः ।

तालीसादेश्च पत्राणि फलं स्यात्त्रिफलाऽऽदितः ॥ १०० ॥
क चिन्मूलं क्व चित्कन्दः क्व चित्पत्रं क्व चित्फलम् ।
क चित्पुष्पं क चित्सर्वं क चित्सारः क चित्त्वचः ॥ १०१ ॥
चित्रकं सूरणं निम्बो वासा च त्रिफला क्रमात् ।
धातकी कण्टकारी च खदिरः क्षीरिपादपः ॥१०२॥
क चिन्निम्बस्य गृह्णीयात्पत्राभावे त्वचामपि ।
बालं फलं तु बिल्वस्य पक्वमारग्वधस्य च ॥१०३॥
अङ्गेऽनुक्ते जटा ग्राह्या भागेऽनुक्तेऽखिलं समम् ।
पात्रेऽनुक्ते मृदः पात्रं कालेऽनुक्ते त्वहर्मुखम् ॥१०४॥
नवान्येव हि योज्यानि द्रव्याण्यखिलकर्मसु ।
विना विडङ्गकृष्णाभ्यां गुडधान्याज्यमाक्षिकैः ॥ १०५॥

*धान्यमन्नम् ॥ १०५ ॥

पुराणं तु प्रशस्तं स्यात्ताम्बूलं काञ्जिकं तथा ।
शुष्कं नवीनद्रव्यं तु योज्यं सकलकर्मसु ॥ १०६ ॥
आर्द्रं तु द्विगुणं युञ्ज्यादेष सर्वत्र निश्चयः ।
गुडूची कुटजो वासा कूष्माण्डश्च शतावरी ॥ १०७ ॥
अश्वगन्धा सहचरः शतपुष्पा प्रसारिणो ।
प्रयोक्तव्याः सदवार्द्रा द्विगुणं नैव कारयेत ॥ १०८ ॥

*सहचरः=कुरण्टकः, "कटसरैय." इति लोके ॥ १०८ ॥

अन्यच्च—

वासानिम्बपटोलकेतकबलाकूष्माण्डकेन्दीवरी-
वर्षाभूकुटजाश्च कन्दसहिता सा पूतिगन्धाऽमृता ।
ऐन्द्री नागबला कुरुण्टकपुरच्छत्राऽमृताः सर्वदा
सार्द्रा एव तु न क्व चिद् द्विगुणिताः कार्येषु योज्या बुधैः ॥१०९॥

*इन्दीवरी=शतावरी। पूतिगन्धा=गन्धप्रसारणी । ऐन्द्री=इन्द्रवारुणी । नागबला=गुलशकरी। कुरण्टकः=पीतपुष्पः (कटसरैया)। पुरो=गुग्गुलुः ॥ १०९ ॥

घृतं तैलं च पानीयं कषायं व्यञ्जनादिकम् ।
पक्त्वा शीतीकृतं चोष्णं तत्सर्वं स्याद्विषोपमम् ॥ ११० ॥

अथ द्रव्याणां परीक्षामाह—

सूक्ष्मास्थिमांसला पथ्या सर्वकर्मणि पूजिता ।
क्षिप्ताऽम्भसि निमज्जेद्या भल्लातक्यस्तथोत्तमाः ॥ १११ ॥
वराहमूर्द्धवत्कन्दो वाराहीकन्दसंज्ञकः ।
सौवर्चलं तु काचाभं सैन्धवं स्फटिकप्रभम् ॥ ११२ ॥
सुवर्णच्छविकं ज्ञेयं स्वर्णमाक्षिकमुत्तमम् ।
ओड्रपुष्पप्रतीकाशा मनोह्वा चोत्तमा मता ॥ ११३ ॥
श्रेष्ठं शिलाजतु ज्ञेयं प्रक्षिप्तं न विशीर्यते ।
तोयपूर्णे कांस्यपात्रे प्रतानेन विवर्धते ॥ ११४ ॥
कर्पूरस्तुवरः स्निग्ध एला सूक्ष्मफला वरा ।
श्वेतचन्दनमत्यन्तं सुगन्धि गुरुपूजितम् ॥ ११५ ॥
रक्तचन्दनमत्यन्तं लोहितं प्रवरं मतम् ।
काकतुण्डनिभः स्निग्धो गुरुः श्रेष्ठो गुरुर्मतः ॥ ११६ ॥
सुगन्धि लघु रूक्षं च सुरदारु वरं मतम् ।
सरलं स्निग्धमत्यर्थं सुगन्धि च गुणावहम् ॥ ११७ ॥
अतिपीता प्रशस्ता तु ज्ञेया दारुनिशा बुधैः ।
जातीफलं गुरु स्निग्धं समं शुभ्रान्तरं वरम् ॥ ११८ ॥
मृद्वीका सोत्तमा ज्ञेया या स्याद् गोस्तनसन्निभा ।
करमर्दफलाकारा मध्यमा सा प्रकीर्त्तिता ॥ ११९ ॥

*गोस्तनसन्निभा "मुनक्का" इति लोके । करमर्दफलाकारा "करम्वा" इति लोके ॥ ११९ ॥

खण्डं तु विमलं श्रेष्ठं चन्द्रकान्तसमप्रभम् ।
गव्याज्यसदृशं रुच्यं गन्धं मधु वरं मतम् ॥ १२० ॥

अथ स्वभावतो हितानि द्रव्याण्याह—

शालीनां लोहितः शालिः षष्टिकेषु च षष्टिकः ।
शूकधान्येष्वपि यवो गोधूमः प्रवरो मतः ॥ १२१ ॥
शिम्बीधान्ये वरो मुद्गो मसूरश्चाढकी तथा ।
रसेषु मधुरः श्रेष्ठो लवणेषु च सैन्धवः ॥ १२२ ॥
दाडिमामलकं द्राक्षा खर्जूरं च परूषकम् ।

राजादनं मातुलुंगं फलवर्गेषु शस्यते ॥ १२३ ॥

*परूषकं "फालसा" इति लोके । राजादनं "खिरणी" इति लोके । मातुलुंगं "बिजउरा" इति लोके ॥ १२३ ॥

पत्रशाकेषु वास्तूकं जीवन्ती पोतिका वरा ।
पटोलं फलशाकेषु कन्दशाकेषु सूरणम् ॥ १२४ ॥
एणः कुरङ्गो हरिणो जाङ्गलेषु प्रशस्यते ।
पक्षिणां तित्तिरिर्लावो वरो मत्स्येषु रोहितः ॥ १२५ ॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णतया मतः ।
कुरङ्गस्ताम्र उद्दिष्टो हरिणाकृतिको महान् ॥ १२६ ॥
जलेषु दिव्यं दुग्धेषु गव्यमाज्येषु गोभवम् ।
तैलेषु तिलजं तैलमैक्षवेषु सिता हिता ॥ १२७ ॥

अथ स्वभावादहितानि द्रव्याण्याह—

शिम्बीषु माषान्ग्रीष्मर्त्तौ लवणेष्वौषरं त्यजेत ।
फलेषु लकुचं शाके सार्षपं न हितं मतम् ॥ १२८ ॥
गोमांसं ग्राम्यमांसेषु न हितं महिषीवसा ।
मेषीपयः कुसुम्भस्य तैलं त्याज्यं च फाणितम् ॥ १२९ ॥

*इक्षुरसः परिपक्वो योऽर्धघनः फाणितं । तद्धि "छोयाराब" इति लोके ॥ १२६ ॥

अथ संयोगविरुद्धानि द्रव्याण्याह—

मत्स्यमानूपमांसं च दुग्धयुक्तं विवर्जयेत् ।
कपोतं सर्षपस्नेहभर्जितं परिवर्जयेत् ॥ १३० ॥
मत्स्यानिक्षोर्विकारेण तथा क्षौद्रेण वर्जयेत् ।
सक्तून्मांसपयोयुक्तानुष्णे दधि विवर्जयेत् ॥ १३१ ॥
उष्णैर्नभोऽम्बुना क्षौद्रं पायसं कृसरान्वितम् ।
रम्भाफलं त्यजेत्तक्रदधिविल्वफलान्वितम् ॥ १३२ ॥
दशाहमुषितं सर्पिः कांस्ये मधुघृतं समम् ।
कृतान्नं च कषायं च पुनरुष्णीकृतं त्यजेत् ॥ १३३ ॥
एकत्र बहुमांसानि विरुध्यन्ते परस्परम् ।
मधु सर्पिर्वसा तैलं पानीयं वा पयस्तथा ॥ १३४ ॥

अथ भेषजग्रहणसंकेतमाह—

लवणं सैन्धवं प्रोक्तं चन्दनं रक्तचन्दनम् ।
चूर्णलेहासवस्नेहाः साध्या धवलचन्दनैः ॥
कषायलेपयोः प्रायो युज्यते रक्तचन्दनम् ॥ १३५ ॥
अन्तःसम्मार्जने ज्ञेया ह्यजमोदा यवानिका ।
बहिः सम्मार्जने सैव विज्ञातव्याऽजमोदिका ॥ १३६ ॥
पयः सर्पिः प्रयोगेषु गव्यमेव हि गृह्यते ॥
शकृद्रसो गोमयाम्बु मूत्रं गोमूत्रमुच्यते ॥ १३७ ॥

अथ प्रतिनिधिद्रव्याण्याह—

चित्रकाभावतो दन्ती क्षारः शिखरिजोऽथ वा ।
अभावे धन्वयासस्य प्रक्षेप्या तु दुरालभा ॥ १३८ ॥

*शिखरी=अपामार्गः ॥ १३८ ॥

तगरस्याप्यभावे तु कुष्ठं दद्याद्भिषग्वरः ।
मूर्वाऽभावे त्वचो ग्राह्या जिङ्गिनीप्रभवा बुधैः ॥ १३९ ॥
अहिस्राया अभावे तु मानकन्दः प्रकीर्त्तितः ।
लक्ष्मणाया अभावे तु नीलकण्ठशिखा मता ॥ १४० ॥

*नीलकण्ठशिखा=मयूरशिखा ॥ १४० ॥

बकुलाभावतो देयं कह्लारोत्पलपंकजम् ।
नीलोत्पलस्याभावे तु कुमुदं देयमिष्यते ॥ १४१ ॥
जातीपुष्पं न यत्रास्ति लवंगं तत्र दीयते ।
अर्कपर्णादिपयसो ह्यभावे तद्रसो मतः ॥ १४२ ॥
पौष्कराभावतः कुष्ठं तथा लांगल्यभावतः ।
स्थौणेयकस्याभावे तु भिषग्भिर्दीयते गदः ॥ १४३ ॥
चविकागजपिप्पल्यौ पिप्पलीमूलवत्स्मृते ॥ १४४ ॥
अभावे सोमराज्यास्तु प्रपुन्नाडफलं मतम् ।
यदि न स्याद्दारुनिशा तदा देया निशा बुधैः ॥ १४५ ॥

*सोमराजो=बाकुचो । प्रपुन्नाडफलं=चक्रमर्दफलम् । दारुनिशा=दारुहरिद्रा । निशा=हरिद्रा ॥ १४५ ॥

रसाञ्जनस्याभावे तु दार्वीक्काथः प्रयुज्यते ।
सौराष्ट्र्यभावतो देया स्फटिका तद्गुणा जनैः ॥ १४६ ॥

*सौराष्ट्री = "सोरठी माटी" इति लोके । स्फटिका = "फिट्किरी" इति लोके ॥ १४६ ॥

तालीसपत्रकाभावे स्वर्णताली प्रशस्यते ।
भार्ङ्ग्यभावे तु तालीसं कण्टकारीजटाऽथ वा ॥ १४७ ॥
रुचकाभावतो दद्याल्लवणं पांशुपूर्वकम् ।
अभावे मधुयष्ट्यास्तु धातकीं च प्रयोजयेत् ॥ १४८ ॥

*रुचकं = "चौहार" इति लोके । पांशुलवणं = "खारी" अथ वा "रेह" इति लोके ॥ १४८ ॥

अम्लवेतसकाभावे चुक्रं दातव्यमिष्यते ।
द्राक्षा यदि न लभ्येत प्रदेयं काश्मरीफलम् ॥ १४९ ॥
तयोरभावे कुसुमं मधूकस्य मतं बुधैः ।
लवंगकुसुमं देयं नखस्याभावतः पुनः ॥ १५० ॥
कस्तूर्यभावे कंकोलं देयमीयं विदुर्बुधाः ।
कंकोलस्याप्यभावे तु जातीपुष्पं प्रदीयते ॥ १५१ ॥
सुगन्धिमुस्तकं देयं कर्पूराभावतो बुधैः ।
कर्पूराभावतो देयं ग्रन्थिपर्णं विशेषतः ॥ १५२ ॥
कुंकुमाभावतो दद्यात्कुसुम्भकुसुमं नवम् ।
श्रीखण्डचन्दनाभावे कर्पूरं देयमिष्यते ॥ १५३ ॥
अभावे त्वेतयोर्वैद्यः प्रक्षिपेद्रक्तचन्दनम् ।
रक्तचन्दनकाभावे नवोशीरं विदुर्बुधाः ॥ १५४ ॥
मुस्ता चातिविषाऽभावे शिवाऽभावे शिवा मता ।
अभावे नागपुष्पस्य पद्मकेशरमिष्यते ॥ १५५ ॥
मेदाजीवककाकोल्यृद्धिद्वन्द्वेऽपि वाऽसति ।
वरीविदार्यश्वगन्धावाराहीश्च क्रमात् क्षिपेत् ॥ १५६ ॥

*वरी = शतावरी ॥ १५६ ॥

वाराह्याश्च तथाऽभावे चर्मकारालुको मतः ।

वाराहीकन्दसंज्ञस्तु पश्चिमे गृष्टिसंज्ञकः ॥ १५७ ॥
वाराहीकन्द एवान्यश्चर्मकारालुको मतः ।
अनूपसम्भवे देशे वराह इव लोमवान् ॥ १५८ ॥
भल्लातकासहत्वे तु रक्तचन्दनमिष्यते ।
भल्लाताभावतश्चित्रं नलश्चेक्षोरभावतः ॥ १५९ ॥
सुवर्णाभावतः स्वर्णमाक्षिकं प्रक्षिपेद् बुधः ।
श्वेतं तु माक्षिकं ज्ञेयं बुधै रजतवद् ध्रुवम् ॥ १६० ॥
माक्षिकस्याप्यभावे तु प्रदद्यात्स्वर्णगैरिकम् ।
सुवर्णमथ वा रौप्यं मृतं यत्र न लभ्यते ॥ १६१ ॥
तत्र कान्तेन कर्माणि भिषक्कुर्याद्विचक्षणः ।
कान्ताभावे तीक्ष्णलौहं योजयेद्वैद्यसत्तमः ॥ १६२ ॥
अभावे मौक्तिकस्यापि मुक्ताशुक्तिं प्रयोजयेत् ।
मधु यत्र न लभ्येत तत्र जीर्णगुडो मतः ॥ १६३ ॥
मत्स्यण्ड्यभावतो दद्युर्भिषजः सितशर्कराम् ।
असम्भवे सितायास्तु बुधैः खण्डं प्रयुज्यते ॥ १६४ ॥
क्षीराभावे रसो मौद्गो मासूरो वा प्रदीयते ।
अत्र प्रोक्तानि वस्तूनि यानि तेषु च तेषु च ॥ १६५ ॥
योज्यमेकतराभावे परं वैद्येन जानता ।
रसवीर्यविपाकाद्यैः समं द्रव्यं विचिन्त्य च ॥ १६६ ॥
युञ्ज्यात्तद्विधमन्यच्च द्रव्याणां तु रसादिवित् ।
योगे यदप्रधानं स्यात्तस्य प्रतिनिधिर्मतः ॥ १६७ ॥
यत्तु प्रधानं तस्यापि सदृशं नैव गृह्यते ।
व्याधेरयुक्तं यद् द्रव्यं गणोक्तमपि तत्त्यजेत् ॥
अनुक्तमपि युक्तं यद्योजयेत्तद्रसादिवित् ॥ १६८ ॥

अथ द्रव्यगतपञ्चपदार्थकर्माण्याह—

द्रव्ये रसो गुणो वीर्यं विपाकः शक्तिरेव च ।
पदार्थाः पञ्च तिष्ठन्ति स्वं स्वं कुर्वन्ति कर्म च ॥ १६९ ॥

तत्र रसमाह वाग्भटः—

रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः ।
षड्द्रव्यमाश्रितास्ते च यथापूर्वं बलावहाः ॥ १७० ॥

*ऊषणः = कटुः ॥ १७० ॥

तत्राद्या मारुतं घ्नन्ति त्रयस्तिक्तादयः कफम् ।
कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते ॥ १७१ ॥
ये रसा वातशमना भवन्ति यदि तेषु वै ।
रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणम् ॥ १७२ ॥
ये रसाः पित्तशमना भवन्ति यदि तेषु वै ।
तीक्ष्णोष्णलघुताश्चैव नैते तत्कर्मकारिणः ॥ १७३ ॥
ये रसाः श्लेष्मशमना भवन्ति यदि तेषु वै ।
स्नेहगौरवशैत्यानि न ते हन्युः कफं तदा ॥ १७४ ॥

अथ मधुररसस्य गुणानाह—

मधुरो हि रसः शीतो धातुस्तन्यबलप्रदः ।
चक्षुष्यो वातपित्तघ्नः कुर्यात्स्थौल्यमलक्रिमीन् ॥ १७५ ॥
विषघ्नः पिच्छिलश्चापि स्निग्धः प्रीत्यायुषोर्हितः ।
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम् ॥ १७६ ॥
प्रशस्तो बृंहणः कण्ठ्यो गुरुः सन्धानकृन्मतः ॥ १७७ ॥

अथातियुक्तस्य मधुररसस्य गुणानाह—

सोऽतियुक्तो ज्वरश्वासगलगण्डार्बुदक्रिमीन् ।
स्थौल्याग्निमान्द्यमेहांश्च कुर्यान्मेदः कफामयान् ॥ १७८ ॥

अथाम्लस्य गुणानाह—

रसोऽम्लः पाचनो रुच्यः पित्तश्लेष्मास्रदो लघुः ।
लेखितोष्णो बहिःशीतः क्लेदनः पवनापहः ॥ १७९ ॥
स्निग्धस्तीक्ष्णः सरः शुक्रविबन्धानाहहृद्विहा ।
हर्षणो रोमदन्तानामक्षिभ्रूविनिकोचनः ॥ १८० ॥

*लेखितः = लेखनः । बहिःशीतः = स्पर्शे शीतः । विनिकोचनः = सङ्कोचनः ॥ १७९ ॥ १८० ॥

अथातियुक्तस्याम्लस्य गुणानाह—

सोऽतियुक्तो भ्रमं कुर्यात्तृड्दाहतिमिरज्वरान् ।
कण्डूपाण्डुत्ववीसर्पशोथविस्फोटकुष्ठकृत् ॥ १८१ ॥

अथ लवणस्य गुणानाह—

लवणः शोधनो रुच्यः पाचनः कफपित्तदः ।
पुंस्त्ववातहरः कायशैथिल्यमृदुताकरः ।
बलघ्न आस्यजलदः कपोलगलदाहकृत् ॥ १८२ ॥

अथातियुक्तस्य लवणस्य गुणानाह—

सोऽतियुक्तोऽक्षिपाकास्रपित्तकोठक्षतादिकृत् ।
वलीपलितखालित्यकुष्ठवीसर्पतृट्प्रदः ॥ १८३ ॥

*कोठो=वरटीकृतदंशशोथवत् । पलितं=केशशुक्लता । खालित्यं=शिरसि केशनाशः ॥ १८३ ॥

अथ कटुरसस्य गुणानाह —

कटुरुष्णश्च तीक्ष्णश्च विशदः वातपित्तकृत् ।
श्लेष्महृल्लघुराग्नेयः कृमिकण्डूविषापहः ॥ १८४ ॥
शुक्रस्तन्यहरश्चापि मेदःस्थौल्यापकर्षणः ।
अश्रुदो नासिकाऽऽस्याक्षिजिह्वाऽग्रोद्वेजको मतः ॥ १८५ ॥
दीपनः पाचनो रुच्यो नासिकाशोधनो भृशम् ।
क्लेदमेदोवसामज्जशकृन्मूत्रोपशोषणः ॥ १८६ ॥
स्रोतःप्रकाशको रूक्षो मेध्यो वर्चोविबन्धकृत् ॥ १८७ ॥

*आग्नेयः=अधिकाग्न्यंशः । मेध्यो=मेधायै हितः । वर्चोविबन्धकृद्=मलबन्धं करोति ॥ १८४-१८७ ॥

अथातियुक्तस्य कटुरसस्य गुणानाह—

सोऽतियुक्तो भ्रान्तिदाहमुखताल्वोष्ठशोषकृत् ।
कण्ठादिपीडामूर्च्छाऽन्तर्दाहदो बलकान्तिहृत् ॥ १८८ ॥

अथ तिक्तरसस्य गुणानाह—

तिक्तः शीतस्तृषामूर्च्छाज्वरपित्तकफाञ्जयेत् ।
क्रिमिकुष्ठविषोत्क्लेदाहरक्तगदापहः ॥ १८९ ॥
रुच्यः स्वयमरोचिष्णुः कण्ठस्तन्यविशोधनः ।

वातलोऽग्निकरो नासाशोषणो रूक्षणो लघुः ॥ १६० ॥

*रुच्यः=अन्येषु वस्तुषु रुचिमुत्पादयति । स्वयमरोचिष्णुः=यथा निम्बः स्वयं न रोचते अन्येषु वस्तुषु रुचिं करोति ॥१८४-१६०॥

अथातियुक्तस्य तिक्तस्य गुणानाह—

सोऽतियुक्तः शिरःशूलमन्यास्तम्भश्रमार्त्तिकृत् ।
कम्पमूर्च्छातृषाकारी बलशुक्रक्षयप्रदः ॥ १६१ ॥

अथ कषायरसस्य गुणानाह—

कषायो रोपणो ग्राही स्तम्भनः शोधनस्तथा ।
लेखनः पीडनः सौम्यः शोषणो वातकोपनः ॥ १६२ ॥
कफशोणितपित्तघ्नो रूक्षः शीतो लघुर्मतः ।
त्वक्प्रसाधन आमस्य स्तम्भनो विशदो मतः ।
जिह्वाया जाड्यकृत्कण्ठस्रोतसां च विबन्धकृत् ॥ १९३ ॥

*रोपणो व्रणस्य । स्तम्भनो गात्राणाम् । शोधनो व्रणस्य । लेखनो: व्रणादुत्सन्नमांसस्य । पीडनो हृदयस्य वातकारित्वात् । सौम्यः=सोमादुत्पन्नः । शोषणो व्रणमज्जादीनाम् ॥ १९३ ॥

अथातियुक्तस्य कषायस्य गुणानाह—

सोऽतियुक्तो ग्रहाध्मानहृत्पीडाक्षेपणादिकृत् ॥ १९४ ॥

अथ मधुरादीनामपरान् विशेषानाह—

मधुरं श्लेष्मलं प्रायो जीर्णशालियवादृते ।
मुद्गाद् गोधूमतः क्षौद्रात्सितायाः जाङ्गलामिषात् ॥ १६५ ॥
अम्लं पित्तकरं प्रायो विना धात्रीं च दाडिमीम् ।
लवणं प्रायशो द्वेषि नेत्रयोः सैन्धवं विना ॥ १९६ ॥
प्रायः कटु तथा तिक्तमवृष्यं वातकोपनम् ।
शुण्ठीकृष्णारसोनानि पटोलममृतां विना ॥ १६७ ॥

उक्तं च चरकेऽपि—

पिप्पली नागरं वृष्यं कटु चावृष्यमुच्यते ।
प्रायशः स्तम्भनं प्रोक्तं कषायमभयां विना ॥ १६८ ॥
सामान्येनात्र निर्दिष्टा गुणाः षड्रससम्भवाः ।
रसानां योगतस्तु स्यादन्य एव गुणोदयः ॥ १९९ ॥

संयोगाद्विषतां याति सममाज्येन माक्षिकम् ।
अमृतत्वं विषं याति सर्पदंष्ट्रस्य वै यथा ॥ २०० ॥

अथाकाशादिसम्बन्धिद्रव्यगुणानाह—

लघुर्गुरुस्तथा स्निग्धो रूक्षस्तीक्ष्ण इति क्रमात् ।
नभोभूवारिवातानां वह्नेरेते गुणाः स्मृताः ॥ २०१ ॥

अथ लघ्वादिगुणवतां द्रव्याणां गुणानाह—

लघु पथ्यं परं प्रोक्तं कफघ्नं शीघ्रपाकि च ॥ २०२ ॥

*लघु = द्रव्यम् । एवं गुर्वादि ॥

तथा चोक्तं—

गुर्वादयो गुणा द्रव्ये पृथिव्यादौ रसाश्रये ।
रसेषु व्यपदिश्यन्ते साहचर्योपचारतः ॥ १६ ॥ इति २०२ ॥
गुरु वातहरं पुष्टिश्लेष्मकृच्चिरपाकि च ।
स्निग्धं वातहरं श्लेष्मकारि वृष्यं बलावहम् ॥
रूक्षं समीरणकरं परं कफहरं मतम् ॥ २०३ ॥
तीक्ष्णं पित्तकरं प्रायो लेखनं कफवातहृत् ।
सुश्रुते तु गुणा एते विंशतिस्तान्ब्रुवे शृणु ॥ २०४ ॥
गुरुर्लघुः स्निग्धरूक्षौ तीक्ष्णः श्लक्ष्णः स्थिरः सरः ।
पिच्छिलो विशदः शीत उष्णश्च मृदुकर्कशौ ।
स्थूलः सूक्ष्मो द्रवः शुष्क आशुर्मन्दः स्मृता गुणाः ॥ २०५ ॥
*तत्र गुरुलघुस्निग्धरूक्षतीक्ष्णागुणा उक्ता एव ।

अन्येषान्त्वाह—

श्लक्ष्णः स्नेहं विनाऽपि स्यात्कठिनोऽपि हि चिक्कणः ॥२०६॥
स्थिरो वातमलस्तम्भी सरस्तेषां प्रवर्तकः ।
पिच्छिलस्तन्तुलो बल्यः सन्धानः श्लेष्मलो गुरुः ॥ २०७ ॥

*सन्धानो भग्नस्य ॥ २०७ ॥

क्लेदच्छेदकरः ख्यातो विशदो व्रणरोपणः ।
शीतस्तु ह्लादनः स्तम्भी मूर्च्छातृट्स्वेददाहनुत् ।
उष्णो भवति शीतस्य विपरीतश्च पाचनः ॥ २०८ ॥

*ह्लादनः = सुखजनकः, स्तम्भी = रक्तातिप्रवृत्त्यादीनाम् । उष्णः

=शीतस्य विपरीतस्तेनासुखजनकः। रक्तातिप्रवृत्त्यादीनामस्तम्भनः। मूर्च्छातृट्स्वेददाहकृत्। पाचनो व्रणादीनाम्॥ मृदुकर्कशौ प्रसिद्धौ॥ २०८॥

स्थूलः स्थौल्यकरो देहे स्रोतसामवरोधकृत्॥ २०९॥
देहस्य सूक्ष्मच्छिद्रेषु विशेद्यत्सूक्ष्ममुच्यते।
द्रवः क्लेदकरो व्यापी शुष्कस्तद्विपरीतकः॥ २१०॥
आशुराशुकरो देहे धावत्यम्भसि तैलवत्।
मन्दः सकलकार्येषु शिथिलोऽल्पोऽपि कथ्यते॥ २११॥
*अथ गुणप्रस्तावाद्दीपनादयो गुणा सलक्षणा उच्यन्ते।

तत्रादौ दीपनमाह—

पचेन्नामं वह्निकृच्चयद्दीपनं तद्यथा मिसिः॥ २१२॥

वह्निकृद्=वह्निदीप्तिकृत्। ननु यद्वह्निं प्रदीपयति तदामं कथं न पचेदित्याशङ्कायामुच्यते, दीपनद्रव्यं तावन्तं वह्निं प्रदीपयति यद् अन्ने भोक्तुमिच्छामुत्पादयति, न त्वामं पक्तुं क्षमं यथा-सूक्ष्मदीपाग्निरुद्द्योतं करोति न तु बृहत्स्थालीस्थान् तण्डुलानोदनं कर्त्तुं क्षमः॥ २१२॥

अथ पाचनमाह—

*ननु यद्वह्निं न दीपयति तदामं कथं पचतीत्याशङ्कायामाह—
पचत्यामं न वह्निं च कुर्याद्यत्तद्धि पाचनम्।
नागकेशरवद्विद्याच्चित्रो दीपनपाचनः॥ २१३॥
*पाचनं वह्निदीप्तिमकुर्वाणमप्यामं पचति। यथाऽग्न्याधानीस्थोऽङ्गारसमूहोऽन्नं पचति। न तु दीपवत्सर्वतः प्रदीपयति॥ २१३॥

अथ शमनमाह—

न शोधयति यद्दोषान्समान्नोदीरयत्यपि।
समीकरोति विषमाञ्छमनं तद्यथाऽमृता॥ २१४॥
*यद् द्रव्यं दोषत्रयं न शोधयति, नोर्ध्वाधोमार्गाभ्यामानयति, समान्दोषान् नोदीरयति न वर्धयति च शमनं तत्॥ २१४॥

अथानुलोमनमाह—

कृत्वा पाकं मलानां च भित्त्वा बन्धमधो नयेत्।

तच्चानुलोमनं ज्ञेयं यथा प्रोक्ता हरीतकी ॥ २१५ ॥

*मलानामपक्वानां वातपित्तश्लेष्मणां, बन्धं=वायुबन्धं भित्त्वाऽधो नयेद्=मलानधः पातयति ॥ २१५ ॥

अथ स्रंसनमाह—

पक्तव्यं यदपक्त्वैव श्लिष्टं कोष्ठे मलादिकम् ।
नयत्यधः स्रंसनं तद्यथा स्यात्कृतमालकम् ॥ २१६ ॥

*मलादिकम्=आदिशब्दात् कफपित्ते । कृतमालः=धनवहेरा "सोंदालवा" इति लोके ॥ २१६ ॥

अथ भेदनमाह—

मलादिकमबद्धं यद् बद्धं वा पिण्डितं मलैः ।
भित्त्वाऽधः पातयति यद् भेदनं कटुकी यथा ॥ २१७ ॥

*अबद्धं=शिथिलं, बद्धं=गाढं, मलैः=दोषैस्तत्रापि वातैः, बहुत्वमाधिक्यबोधनार्थं तैः । पिण्डितं=गुटिकीकृतम् ॥ २१७ ॥

अथ रेचनमाह—

विपक्वं यदपक्वं वा मलादि द्रवतां नयेत् ।
रेचयत्यपि तज्ज्ञेयं रेचनं त्रिवृता यथा ॥ २१८ ॥

*रेचयत्यपि=अधः पातयति च । त्रिवृता="पनिलर" इति लोके॥ २१५ ॥

अथ वमनमाह—

अपक्वं पित्तश्लेष्माण्नं बलादूर्ध्वं नयेत्तु यत् ।
वमनं तद्धि विज्ञेयं मदनस्य फलं यथा ॥ २१९ ॥

*ऊर्ध्वं नयेद्=मुखमार्गेण बहिष्कुर्याद् । मदनस्य फलं "मयनफल" इति लोके ॥ २१९ ॥

अथ देहसंशोधनमाह—

स्थानाद् बहिर्नयेदूर्ध्वमधो वा मलसञ्चयम् ।
देहसंशोधनं तत्स्याद् देवदालीफलं यथा ॥ २२० ॥

*देवदाली "सोनैआ" इति लोके ॥ २२० ॥

अथ ग्राह्याह—

दीपनं पाचनं यत्स्यादुष्णत्वाद् द्रवशोषकम् ।

ग्राहि तच्च यथा शुण्ठी जीरकं गजपिप्पली ॥ २२१ ॥

अथ स्तम्भनमाह—

रौक्ष्याच्छैत्यात्कषायत्वाल्लघुपाकाच्च यद्भवेत् ।
वातकृत्स्तम्भनं तत्स्याद्यथा वत्सकटुण्टुकौ ॥ २२२ ॥

*वातकृत=प्रतिलोमवातकृत् । स्तम्भनमधोगामि मलादीनाम् । वत्सकः (कुरैआ) टुण्टुकः (सोनापाठा) ॥ २२२ ॥

अथ छेदनमाह—

श्लिष्टान्कफादिकान्दोषानुन्मूलयति यद् बलात् ।
छेदनं तद्यथा क्षारा मरिचानि शिलाजतु ॥ २२३ ॥

*क्षाराः=यवक्षारादयः ॥ २२३ ॥

अथ लेखनमाह—

धातून्मलान्वा देहस्य विशोष्योल्लेखयेच्च यत् ।
लेखनं तद्यथा क्षौद्रं नीरमुष्णं वचा यवाः ॥ २२४ ॥

*उल्लेखयेत्=कृशीकुर्यात । लेखनं=कृशीकारकम् । क्षौद्रं=मधु । यवाः=इन्द्रयवाः ॥ २२४ ॥

अथ वाजीकरमाह—

यस्माद् द्रव्याद्भवेत्स्त्रीषु हर्षो वाजीकरं हि तत् ।
यथाऽश्वगन्धा मुसली शर्करा च शतावरी ॥ २२५ ॥

*हर्षो=रन्तुं समुत्साहः ॥ २२५ ॥

अथ शुक्रलमाह—

यस्माच्छुक्रस्य वृद्धिः स्याच्छुक्रलं हि तदुच्यते ।
यथा नागबलाऽद्याः स्युर्बीजं च कपिकच्छुजम् ॥ २२६ ॥

*नागबला="गुलशकरी" इति लोके ॥ २२६ ॥

अथ शुक्रस्य जनकं रेचकञ्चाह—

दुग्धं माषाश्च भल्लातफलमज्जाऽऽमलानि च ।
एतानि जनकानि स्यू रेचकानि च रेतसः ॥ २२७ ॥

*जनकानि=प्रभावाच्छीघ्रमेव रसाद्युत्पादनपूर्वकं शुक्रं जनयन्ति । रेचकानि=आधिक्यात्प्रवर्त्तयन्ति च ॥ २२७ ॥

अथ शुक्रस्य प्रवर्त्तकं रेचकं स्तम्भकं क्षयकारकञ्चाह—

प्रवर्त्तिनी स्त्री शुक्रस्य रेचनं बृहतीफलम् ।
जातीफलं स्तम्भकं स्यात्कालिङ्गं क्षयकारि च ॥२२८॥

*स्त्री—स्मरणकीर्त्तनदर्शनसम्भाषणस्पर्शनचुम्बनालिङ्गननिधुवनैः समस्तैर्व्यस्तैश्च शुक्रस्य प्रवर्त्तिनी=प्रवृत्तिकारिणी। रेचनं बृहतीफलम्-बृहत्कण्टकारीफलमपि शुक्रस्य रेचकं प्रवर्तकम्। कालिङ्गं=कालिन्दफलम् ॥ २२८ ॥

अथ रसायनमाह—

रसायनन्तु तज्ज्ञेयं यज्जराव्याधिनाशनम् ।
यथा हरीतकी धात्री गुग्गुलुश्च शिलाजतु ॥ २२९ ॥

अथ व्यवाय्याह—

पूर्वं व्याप्याखिलं कायं ततः पाकञ्च गच्छति ।
व्यवायि तद् यथा भङ्गा फेनञ्चाहिसमुद्भवम् ॥ २३० ॥

*अन्यद् द्रव्यं पक्वं तद्गुणं करोति। व्यवायि तु अपक्वमेव स्वगुणैः सकलशरीरं व्याप्य पाकं याति। अहिसमुद्भवं फेनम्=अफीम ॥२३०॥

अथ विकाश्याह—

सन्धिबन्धांस्तु शिथिलान् यत्करोति विकाशि तत् ।
विशोष्यौजश्च धातुभ्यो यथा क्रमुककोद्रवौ ॥ २३१ ॥

*धातुभ्यः=सकलशरीरस्थेभ्यो वीर्येभ्यः। ओजः=उपधातुविशेषं विशोष्य। क्रमुकः=पूगफलम् ॥ २३१ ॥

अथ मदकार्याह—

बुद्धिं लुम्पति यद् द्रव्यं मदकारि तदुच्यते ।
तमोगुणप्रधानञ्च यथा मद्यं सुराऽऽदिकम् ॥ २३२ ॥

*मदकारि=मादकम् ॥ २३२ ॥

अथ विषमाह—

व्यवायि च विकाशि स्याच्छ्लेष्मच्छेदि मदावहम् ।
आग्नेयं जीवितहरं योगवाहि स्मृतं विषम् ॥ २३३ ॥

*व्यवायि=सकलकायगुणव्यापनपूर्वकपाकगमनशीलम्। विकाशि=ओजःशोषणपूर्वकसन्धिबन्धशिथिलीकरणशीलम्। मदावहं=

तमोगुणाधिक्येन बुद्धिविध्वंसकम् । आग्नेयम्=अधिकाग्निगुणम् । योगवाहि=संसर्गिगुणग्राहकम् । विषं लक्ष्यं, दृष्टान्तो वत्सनाभशकुकादिभिः ॥ २३३ ॥

अथ प्रमाथ्याह—

निजवीर्य्येण यद् द्रव्यं स्रोतोभ्यो दोषसञ्चयम् ।
निरस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा ॥ २३४ ॥

*दोषाः=वातादयः ॥ २३४ ॥

अथाभिष्यन्द्याह—

पैच्छिल्याद्गौरवाद् द्रव्यं रुद्ध्वा रसवहाः शिराः ।
धत्ते यद्गौरवं तत्स्यादभिष्यन्दि यथा दधि ॥ २३५ ॥

*गौरवं शरीरे ॥ २३५ ॥

अथ विदाह्याह—

विदाहि द्रव्यमुद्गारमम्लं कुर्यात्तथा तृषाम् ।
हृदि दाहं च जनयेत्पाकं गच्छति तच्चिरात् ॥ २३६ ॥

अथ योगवाह्याह—

गृह्णाति योगवाहि द्रव्यं संसर्गिवस्तुगुणान् ।
पच्यमानं यथैतन्मधुजलतैलाज्यसूतलोहादिः ॥ २३७ ॥

अथ वीर्यमाह—

तत्र वाग्भटः ।

उष्णशीतगुणोत्कर्षाद् बुधैर्वीर्यं द्विधा स्मृतम् ।
यत्सर्वमग्निषोमीयं दृश्यते भुवनत्रयम् ॥ २३८ ॥

अथ तद्गुणानाह—

उष्णं वातकफौ हन्यात् पित्तं तु तनुते जराम् ।
शीतं वातकफातङ्कान्कुरुते पित्तहृत्परम् ॥ २३९ ॥

अन्यच्च—

तत्रोष्णं भ्रमतृड्ग्लानिस्वेददाहाशुपाकताम् ।
शमञ्च वातकफयोः करोति शिशिरं पुनः ॥
ह्लादनं जीवनं स्तम्भं प्रसादं रक्तपित्तयोः ॥ २४० ॥

अथ विपाकमाह—

जाठरेणाग्निना योगाद्यदुदेति रसान्तरम् ।
रसानां परिणामान्ते स विपाक इति स्मृतः ॥ २४१ ॥

अथ मधुरादिरसयुक्तपदार्थानां विपाकरसानाह—

मिष्टः पटुश्च मधुरमम्लोऽम्लं पच्यते रसः ।
कटुतिक्तकषायाणां पाकः स्यात्प्रायशः कटुः ॥ २४२ ॥

*तथा च वाग्भटः—

त्रिधा रसानां पाकः स्यात्स्वाद्वम्लकटुकात्मकः ।
प्रायःपदेन व्रीहिः स्यात्स्वादुरम्लो विपाकतः ॥१७॥

शिवा कषाया मधुरा पाके, शुण्ठी कटुका मधुरपाकेत्यादि । इति१७॥२४२॥

अथ विपाकानां गुणानाह—

श्लेष्मकृन्मधुरः पाको वातपित्तहरो मतः ।
अम्लस्तु कुरुते पित्तं वातश्लेष्मगदापहः ॥ २४३ ॥
कटुः करोति पवनं कफं पित्तञ्च नाशयेत् ।
विशेष एवं रसतो विपाकानां निदर्शितः ॥ २४४ ॥

अथ प्रभावमाह—

रसादिसाम्ये यत्कर्म विशिष्टं तत्प्रभावजम् ।
दन्ती रसाद्यैस्तुल्याऽपि चित्रकस्य विरेचनी ॥ २४५ ॥
मधूकस्य च मृद्वीका घृतं क्षीरस्य दीपनम् ।
प्रभावस्तु यथा धात्री लकुचस्य रसादिभिः ॥ २४६ ॥
समाऽपि कुरुते दोषत्रितयस्य विनाशनम् ॥ २४७ ॥
क्वचित्तु केवलं द्रव्यं कर्म कुर्यात् प्रभावतः ।
ज्वरं हन्ति शिरोबद्धा सहदेवीजटा यथा ॥ २४८ ॥

*तथा नानौषधियोगेषु फलं प्रति स्वभाव एवाश्रयणीयो न तु तत्र रसादिरूपहेतुविचारः कर्त्तव्यः ।

यत आह सुश्रुतः—

अमीमांसान्यचिन्त्यानि प्रसिद्धानि स्वभावतः ।
आगमेनोपयोज्यानि भेषजानि विचक्षणैः ॥ २४९ ॥
प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च स्वभावतः ।

नौषधाहेंतुभिर्विद्वान् परीक्षेत कदा चन ॥ २५० ॥
विरुद्धगुणसंयोगे भूयसाऽल्पं हि जीयते ॥
रसं विपाकस्तौ वीर्यं प्रभावस्तान् व्यपोहति ॥२५१॥

इति वर्गप्रकरणे मिश्रवर्गः प्रथमः समाप्तः ॥ १ ॥

अथ द्वितीयो हरीतक्यादिवर्गः ॥ २ ॥

रसगुणवीर्यविपाकप्रभावाणां स्वरूपाण्यभिधाय कुत्र द्रव्ये के रसगुणवीर्यविपाकप्रभावाः सन्तीति बोधयितुं द्रव्यगतान् रसगुणवीर्यविपाकप्रभावानाह ।

तत्र प्रथमं हरीतक्या उत्पत्तिनामलक्षणगुणानाह—

दक्षं प्रजापतिं स्वस्थमश्विनौ वाक्यमूचतुः ।
कुतो हरीतकी जाता तस्यास्तु कति जातयः ॥१॥
रसाः कति समाख्याताः कति चोपरसाः स्मृताः ।
नामानि कति चोक्तानि किं वा तासां च लक्षणम् ॥२॥
के च वर्णा गुणाः के च का च कुत्र प्रयुज्यते ।
केन द्रव्येण संयुक्ता कांश्च रोगान् व्यपोहति ॥ ३ ॥
प्रश्नमेतद्यथा पृष्टं भगवन् वक्तुमर्हसि ।
अश्विनोर्वचनं श्रुत्वा दक्षो वचनमब्रवीत् ॥ ४ ॥
पपात बिन्दुर्मेदिन्यां शक्रस्य पिबतोऽमृतम् ।
ततो दिव्यात्समुत्पन्ना सप्तजातिर्हरीतकी ॥ ५ ॥

अथ हरीतकीनामान्याह-

हरीतक्यभया पथ्या कायस्था पूतनाऽमृता ।
हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा ॥ ६ ॥
वयस्था विजया चापि जीवन्ती रोहिणीति च ॥ ७ ॥

अथ हरीतक्याः सप्तभेदानाह-

विजया रोहिणी चैव पूतना चामृताऽभया ।
जीवन्ती चेतकी चेति पथ्यायाः सप्त जातयः ॥ ८ ॥

*अथ सप्तजातेर्हरीतक्या उत्पत्तिस्थानान्याह—

विन्ध्याद्रौ विजया हिमाचलभवा स्याच्चेतकी पूतना
सिन्धौ स्यादथ रोहिणी निगदिता जाता प्रतिस्थानके।
चम्पायाममृताऽभया च जनिता देशे सुराष्ट्राह्वये
जीवन्तीति हरीतकी निगदिता सप्त प्रभेदा बुधैः ॥१॥ ८ ॥

अथ तेषां पृथग्लक्षणान्याह—

अलाबुवृत्ता विजया वृत्ता सा रोहिणी स्मृता।
पूतनाऽस्थिमती सूक्ष्मा कथिता मांसलाऽमृता ॥९॥
पञ्चरेखाऽभया प्रोक्ता जीवन्ती स्वर्णवर्णिनी।
त्रिरेखा चेतकी ज्ञेया सप्तानामियमाकृतिः ॥१०॥

अथ हरीतकीप्रयोगानाह—

विजया सर्वरोगेषु रोहिणी व्रणरोहिणी।
प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता ॥११॥
अक्षिरोगेऽभया शस्ता जीवन्ती सर्वरोगहृत्।
चूर्णार्थे चेतकी शस्ता यथायुक्तं प्रयोजयेत् ॥ १२ ॥
चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णतः।
षडङ्गुलायता शुक्ला कृष्णा त्वेकाङ्गुला स्मृता ॥१३॥
का चिदास्वादमात्रेण का चिद्गन्धेन भेदयेत्।
का चित्स्पर्शेन दृष्ट्याऽन्या चतुर्द्धा भेदयेच्छिवा ॥१४॥
चेतकीपादपच्छायामुपसर्पन्ति ये नराः।
भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादयः ॥ १५ ॥
चेतकी तु धृता हस्ते यावत्तिष्ठति देहिनः।
तावद्भिद्येत वेगैस्तु प्रभावान्नात्र संशयः ॥ १६ ॥
नृपाणां सुकुमाराणां कृशानां भेषजद्विषाम्।
चेतकी परमा शस्ता हिता सुखविरेचनी ॥ १७ ॥
सप्तानामपि जातीनां प्रधाना विजया स्मृता।
सुखप्रयोगा सुलभा सर्वरोगेषु शस्यते ॥ १८ ॥

अथ हरीतकीगुणानाह—

हरीतकी पञ्चरसाऽलवणा तुवरा परम्।

रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी ॥१९॥
चक्षुष्या लघुरायुष्या बृंहणी चानुलोमिनी ।
श्वासकासप्रमेहार्शःकुष्ठशोथोदरक्रिमीन् ॥२०॥
वैस्वर्यग्रहणीरोगविबन्धविषमज्वरान् ।
गुल्माध्मानतृषाछर्दिहिक्काकण्डूहृदामयान् ॥२१॥
कामलां शूलमानाहं प्लीहानञ्च यकृत्तथा ।
अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातञ्च नाशयेत् ॥ २२ ॥

अथ हरीतक्या प्रभावनिबन्धनं दोषहन्तृत्वं न तु रसनिबन्धनमित्याह—

स्वादुतिक्तकषायत्वात्पित्तहृत्कफहृत्तु सा ।
कटुतिक्तकषायत्वादम्लत्वाद्वातहृच्छिवा ॥ २३ ॥
पित्तकृत्कटुकाम्लत्वाद्वातकृन्न कथं शिवा ॥ २४ ॥
प्रभावाद्दोषहन्तृत्वं सिद्धं यत्तत्प्रकाश्यते ।
हेतुभिः शिष्यबोधार्थं नापूर्वं क्रियतेऽधुना ॥ २५ ॥
कर्मान्यत्वं गुणैः साम्यं दृष्टमाश्रयभेदतः ।
यतस्ततो नेति चिन्त्यं धात्रीलकुचयोर्यथा ॥२६॥

अथ हरीतक्यां तद्रसादीनां स्थानान्याह—

पथ्याया मज्जनि स्वादुः स्नाय्वामम्लो व्यवस्थितः ।
वृन्ते तिक्तस्त्वचि कटुरस्थिस्थस्तुवरो रसः ॥ २७ ॥

अथोत्तमहरीतक्या लक्षणान्याह—

नवा स्निग्धा घना वृत्ता गुर्वी क्षिप्ता च याऽम्भसि ।
निमज्जेत्सा प्रशस्ता च कथिताऽतिगुणप्रदा ॥२८॥
नवादिगुणयुक्तत्वं तथैकत्र द्विकर्षता ।
हरीतक्याः फले यत्र द्वयं तच्छ्रेष्ठमुच्यते ॥२९॥

अथ हरीतक्याः प्रयोगभेदेन फलभेदानाह—

चर्विता वर्द्धयत्यग्निं पेषिता मलशोधिनी ।
स्विन्ना संग्राहिणी पथ्या भृष्टा प्रोक्ता त्रिदोषनुत् ॥३०॥
उन्मीलिनी बुद्धिबलेन्द्रियाणां निर्मूलिनी पित्तकफानिलानाम् ।
विस्रंसिनी मूत्रशकृन्मलानां हरीतकी स्यात् सह भोजनेन ॥३१॥
अन्नपानकृतान्दोषान्वातपित्तकफोद्भवान् ।

हरीतकी हरत्याशु भुक्तस्योपरि योजिता ॥ ३२ ॥
लवणेन कफं हन्ति पित्तं हन्ति सशर्करा ।
घृतेन वातजान् रोगान्सर्वरोगान्गुडान्विता ॥ ३३ ॥

अथ रसायनगुणार्थिनां कृते हरीतकीप्रयोगविधिमाह—

सिन्धूत्थशर्कराशुण्ठीकणामधुगुडैः क्रमात् ।
वर्षादिष्वभया प्राश्या रसायनगुणैषिणा ॥ ३४ ॥

अथ हरीतकीभक्षणानर्हजनानाह—

अध्वातिखिन्नो बलवर्जितश्च रूक्षः कृशो लङ्घनकर्शितश्च ।
पित्ताधिको गर्भवती च नारी विमुक्तरक्तस्त्वभयां न खादेत् ॥ ३५ ॥

अथ विभीतकस्य नामानि गुणांश्चाह—

विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलस्तु सः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः ॥ ३६ ॥
विभीतकं स्वादुपाकं कषायं कफपित्तनुत् ।
उष्णवीर्यं हिमस्पर्शं भेदनं कासनाशनम् ॥ ३७ ॥
रूक्षं नेत्रहितं केश्यं कृमिवैस्वर्यनाशनम् ।
विभीतमज्जा तृट्छर्दिकफवातहरो लघुः ॥
कषायो मदकृच्चाथ धात्रीमज्जाऽपि तद्गुणः ॥ ३८ ॥

अथामलक्या नामानि गुणांश्चाह—

त्रिष्वामलकमाख्यातं धात्री तिष्यफलाऽमृता ॥ ३९ ॥
हरीतकीसमं धात्रीफलं किन्तु विशेषतः ।
रक्तपित्तप्रमेहघ्नं परं वृष्यं रसायनम् ॥ ४० ॥
हन्ति वातं तदम्लत्वात्पित्तं माधुर्य्यशैत्यतः ।
कफं रूक्षकषायत्वात्फलं धात्र्यास्त्रिदोषजित् ॥ ४१ ॥
यस्य यस्य फलस्येह वीर्यं भवति यादृशम् ।
तस्य तस्यैव वीर्य्येण मज्जानमपि निर्दिशेत् ॥ ४२ ॥

अथ त्रिफलाया लक्षणनामगुणानाह—

पथ्याविभीतधात्रीणां फलैः स्यात्त्रिफला समैः ।
फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्त्तिता ॥ ४३ ॥
त्रिफला कफपित्तघ्नी मेहकुष्ठहरा सरा ।

चक्षुष्या दीपनी रुच्या विषमज्वरनाशिनी ॥ ४४ ॥

अथ शुण्ठ्या नामानि गुणाँश्चाह—

शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम् ।
ऊषणं कटुभद्रञ्च श्रृङ्गवेरं महौषधम् ॥ ४५ ॥
शुण्ठी रुच्याऽऽमवातघ्नी पाचनी कटुका लघुः ।
स्निग्धोष्णा मधुरा पाके कफवातविबन्धनुत् ॥ ४६ ॥
वृष्या स्वर्य्या वमिश्वासशूलकासहृदामयान् ।
हन्ति श्लीपदशोथार्शं आनाहोदरमारुतान् ॥ ४७ ॥
आग्नेयगुणभूयिष्ठात् तोयांशपरिशोषि यत् ।
संगृह्णाति मलं तत्तु ग्राहि शुण्ठ्यादयो यथा ॥ ४८ ॥
विबन्धभेदिनी या तु सा कथं ग्राहिणी भवेत् ।
शक्तिर्विबन्धभेदे स्याद्यतो न मलपातने ॥ ४९ ॥

अथार्द्रकस्य नामानि गुणांश्चाह—

आर्द्रकं श्रृङ्गवेरं स्यात् कटुभद्रं तथाऽऽर्द्रिका ।
आर्द्रिका भेदिनी गुर्वी तीक्ष्णोष्णा दीपनी मता ॥५०॥
कटुका मधुरा पाके रूक्षा वातकफापहा ।
ये गुणाः कथिताः शुण्ठ्यास्तेऽपि सन्त्यार्द्रकेऽखिलाः ॥५१॥
भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम् ।
अग्निसंदीपनं रुच्यं जिह्वाकण्ठविशोधनम् ॥ ५२ ॥
कुष्ठपाण्डवामये कृच्छ्रे रक्तपित्ते व्रणे ज्वरे ।
दाहे निदाघशरदोर्नैव पूजितमार्द्रकम् ॥ ५३ ॥

अथ पिप्पल्या नामानि गुणाँश्चाह—

पिप्पली मागधी कृष्णा वैदेही चपला कणा ।
उपकुल्योषणा शौण्डी कोला स्यात्तीक्ष्णतण्डुला ॥५४॥
पिप्पली दीपनी वृष्या स्वादुपाका रसायनी ।
अनुष्णा कटुका स्निग्धा वातश्लेष्महरी लघुः ॥ ५५ ॥
पिप्पली रेचनी हन्ति श्वासकासोदरज्वरान् ।
कुष्ठप्रमेहगुल्मार्शःप्लीहशूलाममारुतान् ॥ ५६ ॥
आर्द्रा कफप्रदा स्निग्धा शीतला मधुरा गुरुः ।

पित्तप्रशमनी सा तु शुष्का पित्तप्रकोपिणी ॥ ५७ ॥
पिप्पली मधुसंयुक्ता मेदःकफविनाशिनी ।
श्वासकासज्वरहरा वृष्या मेध्याऽग्निवर्द्धिनी ॥ ५८ ॥
जीर्णज्वरेऽग्निमान्द्ये च शस्यते गुडपिप्पली ।
कासाजीर्णारुचिश्वासहृत्पाण्डुक्रमिरोगनुत् ॥
द्विगुणः पिप्पलीचूर्णाद् गुडोऽत्र भिषजां मतः ॥ ५९ ॥

अथ मरीचस्य नामानि गुणांश्चाह—

मरिचं वेल्लजं कृष्णमूषणं धर्मपत्तनम् ॥ ६० ॥
मरिचं कटुकं तीक्ष्णं दीपनं कफवातजित् ।
उष्णं पित्तकरं रूक्षं श्वासशूलक्रमीन्हरेत् ॥ ६१ ॥
तदार्द्रं मधुरं पाके नात्युष्णं कटुकं गुरु ।
किञ्चित्तीक्ष्णगुणं श्लेष्मप्रसेकि स्यादपिच्छलम् ॥ ६२ ॥

अथ त्रिकटुकलक्षणनामगुणांश्चाह—

विश्वोपकुल्या मरिचं त्रयं त्रिकटु कथ्यते ।
कटुत्रिकं तु त्रिकटु त्र्यूषणं व्योष उच्यते ॥ ६३ ॥
त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान् ।
गुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसान् ॥ ६४ ॥

अथ पिप्पलीमूलस्य नामानि गुणांश्चाह—

ग्रन्थिकं पिप्पलीमूलमूषणं चटकाशिरः ।
दीपनं पिप्पलीमूलं कटूष्णं पाचनं लघु ॥ ६५ ॥
रूक्षं पित्तकरं भेदि कफवातोदरापहम् ।
आनाहप्लीहगुल्मघ्नं कृमिश्वासक्षयापहम् ॥ ६६ ॥

अथ चतुरूषणस्य लक्षणगुणानाह—

त्र्यूषणं सकणामूलं कथितं चतुरूषणम् ।
व्योषस्येव गुणाः प्रोक्ता अधिकाश्चतुरूषणे ॥ ६७ ॥

अथ चव्यनामगुणानाह—

भवेच्चव्यं तु चविका कथिता सा तथोषणा ।
कणामूलगुणं चव्यं विशेषाद् गुदजापहम् ॥ ६८ ॥

अथ गजपिप्पल्या नामानि गुणाँश्चाह-

चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली ।
कपिवल्ली कोलवल्ली श्रेयसी वशिरश्च सा ॥ ६९ ॥
गजकृष्णा कटुर्वातश्लेष्महृद्वह्निवर्धिनी ।
उष्णा निहन्त्यतीसारं श्वासकण्ठामयक्रिमीन् ॥ ७० ॥

अथ चित्रकस्य नामानि गुणाँश्चाह-

चित्रकोऽनलनामा च पीठो व्यालस्तथोषणः ।
चित्रकः कटुकः पाके वह्निकृत्पाचनो लघुः ॥ ७१ ॥
रूक्षोष्णो ग्रहणीकुष्ठशोथार्शःकृमिकासनुत् ।
वातश्लेष्महरो ग्राही वातघ्नः श्लेष्मपित्तहृत् ॥ ७२ ॥

अथ पञ्चकोलस्य लक्षणगुणानाह-

पिप्पली पिप्पलीमूलं चव्यचित्रकनागरैः ।
पञ्चभिः कोलमात्रं यत्पञ्चकोलं तदुच्यते ॥ ७३ ॥
पञ्चकोलं रसे पाके कटुकं रुचिकृन्मतम् ।
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत् ॥
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम् ॥ ७४ ॥

अथ षडूषणस्य लक्षणगुणानाह-

पञ्चकोलं समरिचं षडूषणमुदाहृतम् ।
पञ्चकोलगुणं तत्तु रूक्षमुष्णं विषापहम् ॥ ७५ ॥

अथ यवान्या नामानि गुणाँश्चाह-

यवानिकोग्रगन्धा च ब्रह्मदर्भाऽजमोदिका ॥ ७६ ॥
सैवोक्ता दीप्यका दीप्या तथा स्याद्यवसाह्वया ।
यवानी पाचनी रुच्या तीक्ष्णोष्णा कटुका लघुः ॥ ७७ ॥
दीपनी च तथा तिक्ता पित्तला शुक्रशूलहृत् ।
वातश्लेष्मोदरानाहगुल्मप्लीहकृमिप्रणुत् ॥ ७८ ॥

अथाजमोदाया नामानि गुणाँश्चाह-

अजमोदा खराश्वा च मायूरी दीप्यकस्तथा ।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तका ॥ ७९ ॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत् ।

उष्णा विदाहिनी हृद्या वृष्या बलकरी लघुः ॥
नेत्रामयकृमिच्छर्दिहिक्का वस्तिरुजो हरेत् ॥ ८० ॥

अथ पारसीकयवानीगुणानाह—

पारसीकयवानी तु यवानीसदृशी गुणैः ।
विशेषात्पाचनी रुच्या ग्राहिणी मादिनी गुरुः ॥ ८१ ॥

अथ शुक्लजीरककृष्णजीरककालिकानां नामानि गुणाँश्चाह—

जीरको जरणोऽजाजी कणा स्याद्दीर्घजीरकः ॥ ८२ ॥
कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः ।
कालाजाजी तु सुषवी कालिका चोपकालिका ॥ ८३ ॥
पृथ्वीका कारवी पृथ्वी पृथुकृष्णोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च बृहज्जीरक इत्यपि ॥ ८४ ॥
जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु ।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ॥ ८५ ॥
ज्वरघ्नं पाचनं वृष्यं बल्यं रुच्यं कफापहम् ।
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत् ॥ ८६ ॥

अथ धान्यकस्य नामानि गुणाँश्चाह—

धान्यकं धानकं धान्यं धाना धानेयकं तथा ।
कुनटी धेनुका छत्रा कुस्तुम्बुरु वितुन्नकम् ॥ ८७ ॥
धान्यकं तुवरं स्निग्धमवृष्यं मूत्रलं लघु ।
तिक्तं कटूष्णवीर्यञ्च दीपनं पाचनं स्मृतम् ॥ ८८ ॥
ज्वरघ्नं रोचकं ग्राहि स्वादुपाकि त्रिदोषनुत् ।
तृष्णादाहवमिश्वासकासकार्श्यक्रिमिप्रणुत्
आर्द्रन्तु तद्गुणं स्वादु विशेषात्पित्तनाशनम् ॥ ८९ ॥

अथ शतपुष्पामिश्रेययोर्नामानि गुणाँश्चाह—

शतपुष्पा शताह्वा च मधुरा कारवी मिसिः ।
अतिलम्बी सितच्छत्रा संहितच्छत्रिकाऽपि च ॥ ९० ॥
छत्रा शालेयशालीनौ मिश्रेया मधुरा मिसिः ।
शतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः ॥ ९१ ॥
उष्णा ज्वरानिलश्लेष्मव्रणशूलाक्षिरोगहृत् ।

मिश्रेया तद्गुणा प्रोक्ता विशेषाद्योनिशूलनुत् ॥ ९२ ॥
अग्निमान्द्यहरी हृद्या बद्धविट्क्रिमिशुक्रहृत् ।
रूक्षोष्णा पाचनी कासवमिश्लेष्मानिलान् हरेत् ॥ ९३ ॥

अथ मेथीवनमेथीनामगुणानाह —

मेथिका मेथिनी मेथी दीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च ज्योतिर्गन्धफला तथा ॥ ९४ ॥
वल्लरी चक्रिका मन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पीतबीजा मुनिच्छदा ॥ ९५ ॥
मेथिका वातशमनी श्लेष्मघ्नी ज्वरनाशिनी ।
ततः स्वल्पगुणा वन्या वाजिनां सा तु पूजिता ॥ ९६ ॥

अथ चन्द्रशूरस्य नामानि गुणाँश्चाह —

चन्द्रिका चर्महन्त्री च पशुमेहनकारिका ।
नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा ॥ ९७ ॥
चन्द्रशूरं हितं हिक्कावातश्लेष्मातिसारिणाम् ।
असृग्वातगदद्वेषि बलपुष्टिविवर्द्धनम् ॥ ९८ ॥

अथ चतुर्बीजलक्षणगुणानाह—

मेथिका चन्द्रशूरश्च कालाजाजी यवानिका ।
एतच्चतुष्टयं युक्तं चतुर्बीजमिति स्मृतम् ॥ ९९ ॥
तच्चूर्णं भक्षितं नित्यं निहन्ति पवनामयम् ।
अजीर्णं शूलमाध्मानं पार्श्वशूलं कटिव्यथाम् ॥ १०० ॥

अथ हिङ्गुनामगुणानाह —

सहस्रबेधि जतुकं बाह्लीकं हिङ्गु रामठम् ॥ १०१ ॥
हिङ्गूष्णं पाचनं रुच्यं तीक्ष्णं वातबलासनुत् ।
शूलगुल्मोदरानाहक्रिमिघ्नं पित्तवर्द्धनम् ॥ १०२ ॥

अथ वचाया नामानि गुणाँश्चाह —

वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा ॥ १०३ ॥
वचोग्रगन्धा कटुका तिक्तोष्णा वान्तिवह्निकृत् ।
विबन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधिनी ॥

अपस्मारकफोन्मादभूतजन्त्वनिलान् हरेत् ॥ १०४ ॥

अथ पारसीक (खुरासानी) वचाया नामानि गुणाँश्चाह—

पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा ।
हैमवत्युदिता तद्वद्वातं हन्ति विशेषतः ॥ १०५ ॥

अथ महाभरीवचा यस्या लोके "कुलिंजन" इति
नामान्तरं तस्या गुणानाह—

सुगन्धाऽप्युग्रगन्धा च विशेषात्कफकासनुत् ।
सुस्वरत्वकरी रुच्या हृत्कण्ठमुखशोधिनी ॥ १०६ ॥

अथ अपरा सुगन्धा स्थूलग्रन्थिः यस्या लोके महाभरी इति नाम ।
तस्या गुणानाह—

स्थूलग्रन्थिः सुगन्धा स्यात्ततो हीनगुणा स्मृता ॥१०७॥

अथ चोपचीनीति लोके या प्रसिद्धा तस्या नाम गुणाँश्चाह—

द्वीपान्तरवचा किञ्चित्तिक्तोष्णा वह्निदीप्तिकृत् ।
विबन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधिनी ॥ १०८ ॥
वातव्याधीनपस्मारमुन्मादं तनुवेदनाम् ।
व्यपोहति विशेषेण फिरङ्गामयनाशिनी ॥ १०९ ॥

अथ हवुषाद्वयम्,

तन्मध्ये प्रथमं फलं मत्स्यसदृशं विस्रगन्धं द्वितीयमश्वत्थफलसदृशं मत्स्यगन्धम्,

तयोर्नामानि गुणाँश्चाह—

हवुषा वपुषा विस्रा पराऽश्वत्थफला मता ।
मत्स्यगन्धा प्लीहहन्त्री विषघ्नी ध्वांक्षनाशिनी ॥११०॥
हवुषा दीपनी तिक्ता मृदूष्णा तुवरा गुरुः ।
पित्तोदरसमीरार्शोग्रहणीगुल्मशूलहृत् ॥
पराऽप्येतद्गुणा प्रोक्ता रूपभेदो द्वयोरपि ॥१११॥

अथ विडङ्गस्य नामानि गुणाँश्चाह—

पुंसि क्लीबे विडङ्गः स्यात्कृमिघ्नो जन्तुनाशनः ।
तण्डुलाश्च तथा वेल्लममोघा चित्रतण्डुला ॥११२॥
विडङ्गं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु ।
शूलाध्मानोदरश्लेष्मकृमिवातविबन्धनुत् ॥११३॥

अथ तुम्बुरुफलस्य नामानि गुणाँश्चाह—

तुम्बुरुः सौरभः सौरो वनजः सानुजोऽन्धकः ॥ ११४ ॥
तुम्बुरु प्रथितं तिक्तं कटुपाकेऽपि तत्कटु ।
रूक्षोष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च ॥ ११५ ॥
वातश्लेष्माक्षिकर्णौष्ठशिरोरुग्गुरुताकृमीन् ।
कुष्ठशूलारुचिश्वासप्लीहकृच्छ्राणि नाशयेत् ॥ ११६ ॥

अथ वंशलोचनस्य नामानि गुणांश्चाह—

स्याद्वंशरोचना वांशी तुगाक्षीरी तुगाशुभा ।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी ॥ ११७ ॥
वंशजा बृंहणी वृष्या बल्या स्वाद्वी च शीतला ।
तृष्णाकासज्वरश्वासक्षयपित्तास्रकामलाः ॥
हरेत्कुष्ठं व्रणं पाण्डुं कषाया वातकृच्छ्रजित् ॥ ११८ ॥

अथ समुद्रफेनस्य नामानि गुणाँश्चाह—

समुद्रफेनः फेनश्च डिण्डीरोऽब्धिकफस्तथा ॥ ११९ ॥
समुद्रफेनश्चक्षुष्यो लेखनः शीतलश्च सः ॥
कषायो विषपित्तघ्नः कर्णरुक्कफहृत्सरः ॥ १२० ॥

अथाष्टवर्गस्य लक्षणगुणानाह—

जीवकर्षभकौ मेदे काकोल्यौ ऋद्धिवृद्धिके ॥
अष्टवर्गोऽष्टभिर्द्रव्यैः कथितश्चरकादिभिः ॥ १२१ ॥
अष्टवर्गो हिमः स्वादुर्बृंहणः शुक्रलो गुरुः ।
भग्नसन्धानकृत्कामबलासबलवर्द्धनः ॥
वातपित्तास्रतृड्दाहज्वरमेहक्षयप्रणुत् ॥ १२२ ॥

तत्रादौ जीवकर्षभकयोरुत्पत्तिलक्षणनामगुणानाह—

जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ ।
रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ ॥ १२३ ॥
जीवकः कूर्चकाकार ऋषभो वृषशृङ्गवत् ।
जीवको मधुरः शृङ्गो ह्रस्वाङ्गः कूर्चशीर्षकः ॥ १२४ ॥
ऋषभो वृषभो धीरो विषाणी द्राक्ष इत्यपि ॥ १२५ ॥

जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ ।
मधुरौ पित्तदाहास्रकार्श्यवातक्षयापहौ ॥ १२६ ॥

अथ मेदामहामेदयोरुत्पत्तिलक्षणनामगुणानाह—

महामेदाऽभिधः कन्दो मोरङ्गादौ प्रजायते ॥
महामेदा खनीमेदा स्यादित्युक्तं मुनीश्वरैः ॥ १२७ ॥
शुक्लार्द्रकनिभः कन्दो लताजातः सुपाण्डुरः ।
महामेदाऽभिधो ज्ञेयो मेदालक्षणमुच्यते ॥ १२८ ॥
शुक्लकन्दो नखच्छेद्यो मेदोधातुमिव स्रवेत् ।
यः स मेदेति विज्ञेयो जिज्ञासातत्परैर्जनैः ॥ १२९ ॥
शल्यपर्णी मणिच्छिद्रा मेदा मेदोभवाऽध्वरा ।
महामेदा वसुच्छिद्रा त्रिदन्ती देवतामणिः ॥ १३० ॥
मेदायुगं गुरु स्वादु वृष्यं स्तन्यकफावहम् ।
बृंहणं शीतलं पित्तरक्तवातज्वरप्रणुत् ॥ १३१ ॥

अथ काकोलीक्षीरकाकोल्योरुत्पत्तिलक्षणनामगुणानाह—

जायते क्षीरकाकोली महामेदोद्भवस्थले ॥ १३२ ॥
यत्र स्यात्क्षीरकाकोली काकोली तत्र जायते ।
पीवरीसदृशः कन्दः सक्षीरः प्रियगन्धवान् ॥ १३३ ॥
स प्रोक्तः क्षीरकाकोली काकोलीलिङ्गमुच्यते ।
यथा स्यात्क्षीरकाकोली काकोल्यपितथा भवेत् ॥ १३४ ॥
एषा किञ्चिद्भवेत्कृष्णा भेदोऽयमुभयोरपि ।
काकोली वायसोली च वीरा कायस्थिका तथा ॥ १३५ ॥
सा शुक्ला क्षीरकाकोली वयस्था क्षीरवल्लिका ॥
कथिता क्षीरिणी धीरा क्षीरशुक्ला पयस्विनी ॥ १३६ ॥
काकोलीयुगलं शीतं शुक्रलं मधुरं गुरु ।
बृंहणं वातदाहास्रपित्तशोषज्वरापहम् ॥ १३७ ॥

अथ ऋद्धिवृद्ध्योरुत्पत्तिलक्षणनामगुणानाह—

ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोशलेऽचले ।
श्वेतलोमान्वितः कन्दो लताजातः सरन्ध्रकः ॥ १३८ ॥
स एव ऋद्धिर्वृद्धिश्च भेदमप्येतयोर्ब्रुवे ।

तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा ॥ १३९ ॥
वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः ।
ऋद्धिर्योग्यं सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे ॥ १४० ॥
ऋद्धिर्बल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः ।
प्राणैश्वर्यकरी मूर्च्छारक्तपित्तविनाशिनी ॥ १४१ ॥
वृद्धिर्गर्भप्रदा शीता बृंहणी मधुरा स्मृता ।
वृष्या पित्तास्रशमनी क्षतकासक्षयापहा ॥ १४२ ॥
राज्ञामप्यष्टवर्गस्तु यतोऽयमतिदुर्लभः ।
तस्मादस्य प्रतिनिधिं गृह्णीयात्तद्गुणं भिषक् ॥ १४३ ॥

*मुख्यसदृशः प्रतिनिधिः ॥ १४३ ॥

अथाष्टवर्गस्य प्रतिनिधिमाह—

मेदाजीवककाकोलीऋद्धिद्वन्द्वेऽपि चासति ।
वरीविदार्यश्वगन्धावाराहीश्च क्रमात् क्षिपेत् ॥ १४४ ॥

*मेदामहामेदास्थाने शतावरीमूलम् । जीवकर्षभकस्थाने विदारीमूलम् । काकोलीक्षीरकाकोलीस्थाने अश्वगन्धामूलम् । ऋद्धिवृद्धिस्थाने वाराहीकन्दं गुणैस्तत्तुल्यं क्षिपेत् ॥ १४४ ॥

अथ यष्टीमधुनामगुणानाह—

यष्टीमधु तथा यष्टीमधुकं क्लीतकं तथा ।
अन्यत् क्लीतनकं तत्तु भवेत्तोये मधूलिका ॥ १४५ ॥
यष्टी हिमा गुरुः स्वाद्वी चक्षुष्या बलवर्णकृत् ।
सुस्निग्धा शुक्रला केश्या स्वर्या पित्तानिलास्रजित् ॥
व्रणशोथविषच्छर्दितृष्णाग्लानिक्षयापहा ॥ १४६ ॥

अथ काम्पिल्लस्य नामगुणानाह—

काम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि च ॥
काम्पिल्लः कफपित्तास्रकृमिगुल्मोदरव्रणान् ।
हन्ति रेची कटूष्णश्च मेहानाहविषाश्मनुत् ॥ १४७ ॥

अथारग्वधस्य (धनबहेरा, अमलतास) नामगुणानाह—

आरग्वधो राजवृक्षः शम्पाकश्चतुरङ्गुलः ।

आरेवतो व्याधिघातः कृतमालः सुवर्णकः ॥ १४८ ॥
कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः ।
आरग्वधो गुरुः स्वादुः शीतलः स्रंसनोत्तमः ॥ १४६ ॥
ज्वरहृद्रोगपित्तास्रवातोदावर्त्तशूलनुत् ।
तत्फलं स्रंसनं रुच्यं कुष्ठपित्तकफापहम् ॥ १५० ॥
ज्वरे तु सततं पथ्यं कोष्ठशुद्धिकरं परम् ॥ १५१ ॥

अथ कटुकाया (कुटकी) नामगुणानाह—

कटुवी तु कटुका तिक्ता कृष्णभेदा कटम्भरा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ॥ १५२ ॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी ॥
कटुवी तु कटुका पाके तिक्ता रूक्षा हिमा लघुः ॥ १५३ ॥
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा ।
प्रमेहश्वासकासास्रदाहकुष्ठक्रिमिप्रणुत् ॥ १५४ ॥

अथ किरातकस्य (चिरायता) नामगुणानाह—

किराततिक्तः कैरातः कटुतिक्तः किरातकः ॥ १५५ ॥
काण्डतिक्तोऽनार्यतिक्तो भूनिम्बो रामसेनकः ।
किरातकोऽन्यो नैपालः सोऽर्द्धतिक्तो ज्वरान्तकः ॥ १५६ ॥
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ।
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ।
कासशोथतृषाकुष्ठज्वरव्रणक्रिमिप्रणुत् ॥ १५७ ॥

अथेन्द्रयवस्य नामगुणानाह—

उक्तं कुटजबीजं तु यवमिन्द्रयवं तथा ।
कलिङ्गं चापि कालिङ्गं तथा भद्रयवा अपि ॥ १५८ ॥
क्वचिदिन्द्रस्य नामैव भवेत्तदभिधायकम् ।
फलानीन्द्रयवास्तस्य तथा भद्रयवा अपि ॥ १५६ ॥
इन्द्रयवं त्रिदोषघ्नं संग्राहि कटु शीतलम् ॥ १६० ॥
ज्वरातीसाररक्तार्शोवमिवीसर्पकुष्ठनुत् ।
दीपनं गुदकीलास्रवातास्रश्लेष्मशूलजित् ॥ १६१ ॥

अथ मदनः (मयनफल) ।

तस्य नामगुणानाह—

मदनश्छर्दनः पिण्डो नटः पिण्डीतकस्तथा ।
करहाटो मरुवकः शल्यको विषपुष्पकः ॥ १६२ ॥
मदनो मधुरस्तिक्तो वीर्योष्णो लेखनो लघुः ।
वान्तिकृद्विद्रधिहरः प्रतिश्यायव्रणान्तकः ॥
रूक्षः कुष्ठकफानाहशोथगुल्मव्रणापहः ॥ १६३ ॥

अथ रास्ना ।

तस्या नामानि गुणांश्चाह—

रास्ना युक्तरसा रस्या सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥ १६४ ॥
रास्नाऽऽमपाचिनी तिक्ता गुरूष्णा कफवातजित् ॥ १६५ ॥
शोथश्वाससमीरास्रवातशूलोदरापहा ।
कासज्वरविषाशीतिवातिकामयसिध्महृत् ॥ १६६ ॥

अथ नाकुली रास्नाभेदो "नाई" इति लोके

तस्या नामानि गुणांश्चाह—

नाकुली सुरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी ॥ १६७ ॥
नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् ।
भोगिलूतावृश्चिकाखुविषज्वरकृमिव्रणान् ॥ १६८ ॥

अथ माचिका ।

(पश्चिमदेशे "मोइया" इति लोके प्रसिद्धो वृक्षविशेषः)

तस्या नामानि गुणांश्चाह—

माचिका प्रस्थिकाऽम्बष्ठा तथा चाम्बालिकाऽम्बिका ।
मयूरविदला केशी सहस्रा बालमूलिका ॥ १६९ ॥
माचिकाऽम्ला रसे पाके कषाया शीतला लघुः ।
पक्कातिसारपित्तास्रकफकण्ठामयापहा ॥ १७० ॥

अथ तेजवती ।

तेजवल्कल "तेजबल" इति च लोके

तस्या नामानि गुणाँश्चाह—

तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ।
तेजस्विनी कफश्वासकासास्यामयवातहृत् ॥
पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपिनी ॥ १७१ ॥

अथ ज्योतिष्मती (मालकांगुनी) ।

तस्या नामानि गुणाँश्चाह—

ज्योतिष्मती स्यात् कटभी ज्योतिष्का कङ्गुनीति च ।
पारावतपदी पिण्य-लता प्रोक्ता ककुन्दनी ॥ १७२ ॥
ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित् ।
अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा ॥ १७३ ॥

अथ कुष्ठम् (कूठ) ।

तस्य नामानि गुणाँश्चाह—

कुष्ठं रोगाह्वयं वाप्यं पारिभव्यं तथोत्पलम् ॥ १७४ ॥
कुष्ठमुष्णं कटु स्वादु शुक्रलं तिक्तकं लघु ।
हन्ति वातास्रवीसर्प-कासकुष्ठमरुत्कफान् ॥ १७५ ॥

अथ कुष्ठभेदः पुष्करमूलम् ।

तस्य नामानि गुणाँश्चाह—

उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः ॥ १७६ ॥
पौष्करं कटुकं तिक्तमुष्णं वातकफज्वरान् ।
हन्ति शोथारुचिश्वासान् विशेषात्पार्श्वशूलनुत् ॥ १७७ ॥

अथ कटुपर्णी (चोक) ।

तस्या नामगुणानाह—

कटुपर्णी हैमवती हेमक्षीरी हिमावती ।
हेमाह्वा पीतदुग्धा च तन्मूलं चोकमुच्यते ॥ १७८ ॥
हेमाह्वा रेचनी तिक्ता भेदिन्युत्क्लेशकारिणी ।
कृमिकण्डूविषानाह-कफपित्तास्रकुष्ठनुत् ॥ १७९ ॥

अथ कर्कटश्रृङ्गी (काँकड़ाश्रृङ्गी) ।

तस्या नामानि गुणाँश्चाह—

श्रृङ्गी कर्कटश्रृङ्गी च स्यात्कुलीरविषाणिका ।
अजश्रृङ्गी तु चक्रा च कर्कटाख्या च कीर्त्तिता ॥ १८० ॥
श्रृङ्गी कषाया तिक्तोष्णा कफवातक्षयज्वरान् ।
श्वासोर्ध्ववाततृट्कास-हिक्कारुचिवमीन् हरेत् ॥ १८१ ॥

अथ कट्फलः (कायफल) ।

तस्य नामानि गुणाँश्चाह—

कट्फलः सोमवल्कश्च कैटर्यः कुम्भिकाऽपि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च ॥ १८२ ॥
कट्फलस्तुवरस्तिक्तः कटुर्वातकफज्वरान् ।
हन्ति श्वासप्रमेहार्शःकासकण्ठामयारुचीः ॥१८३॥

अथ भार्गी (भारङ्गी) "बभनेटी" इति ।

तस्या नामानि गुणाँश्चाह—

भार्गी भृगुभवा पद्मा फञ्जी ब्राह्मणयष्टिका ।
ब्राह्मणयङ्गारवल्ली च खरशाकश्च हञ्जिका ॥ १८४ ॥
भार्गी रूक्षा कटुस्तिक्ता रुच्योष्णा पाचनी लघुः ।
दीपनी तुवरा गुल्मरक्तनुन्नाशयेद् ध्रुवम् ।
शोथकासकफश्वास-पीनसज्वरमारुतान् ॥ १८५ ॥

अथ पाषाणभेदः ।

तस्य नामानि गुणाँश्चाह—

पाषाणभेदकोऽश्मघ्नो गिरिभिद्भिन्नयोजिनी ।
अश्मभेदो हिमस्तिक्तः कषायो वस्तिशोधनः ॥१८६॥
भेदनो हन्ति दोषार्शो-गुल्मकृच्छ्राश्महृद्रुजः ।
योनिरोगान् प्रमेहांश्च प्लीहशूलव्रणानि च ॥ १८७ ॥

अथ धातकी (धाई) ।

तस्या नामानि गुणाँश्चाह—

धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता ॥१८८॥

धातकी कटुका शीता मृदुकृत् तुवरा लघुः ।
तृष्णाऽतीसारपित्तास्र-विषक्रिमिविसर्पजित् ॥ १८९ ॥

अथ मञ्जिष्ठा (मंजीठ) ।

तस्या नामानि गुणाँश्चाह—

मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ॥१९०॥
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ।
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ॥ १९१ ॥
भण्डीतकी च गम्भीरी मञ्जूषा वस्त्ररञ्जिनी ।
मञ्जिष्ठा मधुरा तिक्ता कषाया स्वरवर्णकृत् ॥ १९२ ॥
गुरुरुष्णा विषश्लेष्मशोथयोन्यक्षिकर्णरुक् ।
रक्तातीसारकुष्ठास्रविसर्पव्रणमेहनुत् ॥ १९३ ॥

अथ कुसुम्भम् ।

तस्य नामानि गुणाँश्चाह—

स्यात्कुसुम्भं वह्निशिखं वस्त्ररञ्जकमित्यपि ।
कुसुम्भं वातलं कृच्छ्ररक्तपित्तकफापहम् ॥ १९४ ॥

अथ लाक्षा (लाही) ।

तस्या नामानि गुणाँश्चाह—

लाक्षा पलङ्कषाऽलक्तो यावो वृक्षामयो जतुः ।
लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा लघुः ॥१९५॥
अनुष्णा कफपित्तास्र-हिक्काकासज्वरप्रणुत् ।
व्रणोरःक्षतवीसर्प-कृमिकुष्ठगदापहा ।
अलक्तको गुणैस्तद्वद् विशेषाद्व्यङ्गनाशनः ॥ १९६ ॥

अथ हरिद्रा ।

तस्या नामानि गुणाँश्चाह—

हरिद्रा काञ्चनी पीता निशाऽऽख्या वरवर्णिनी ।
कृमिघ्नी हलदी योषितप्रिया हट्टविलासिनी ॥ १९७ ॥
हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत् ।
वर्ण्या त्वग्दोषमेहास्र-शोथपाण्डुव्रणापहा ॥१९८॥

अथ कर्पूरहरिद्रा ।

तस्या नामानि गुणाँश्चाह—

दार्वीभेदाऽऽम्रगन्धा च सुरभीदारु दारु च ।
कर्पूरा पद्मपत्रा स्यात्सुरीमत् सुरतारका ॥ १९९ ॥
आम्रगन्धिर्हरिद्रा या सा शीता वातला मता ।
पित्तहृन्मधुरा तिक्ता सर्वकण्डूविनाशिनी ॥ २०० ॥

अथ वनहरिद्रा ।

तन्नामगुणानाह—

अरण्यहलदीकन्दः कुष्ठवातास्रनाशनः ॥ २०१ ॥

अथ दारुहरिद्रा ।

तस्या नामानि गुणाँश्चाह—

दार्वी दारुहरिद्रा च पर्जन्या पर्जनीति च ।
कटङ्कटेरी पीता च भवेत्सैव पचम्पचा ॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ॥ २०२ ॥
पीतद्रुश्च हरिद्रुश्च पीतदारु च पीतकम् ।
दार्वी निशागुणा किन्तु नेत्रकर्णास्यरोगनुत् ॥२०३॥

अथ रसाञ्जनम् ।

तस्य नामानि गुणाँश्चाह—

दार्वीक्वाथसमं क्षीरं पादं पक्त्वा यदा घनम् ।
तदा रसाञ्जनाख्यं तन्नेत्रयोः परमं हितम् ॥ २०४ ॥
रसाञ्जनं तार्क्ष्यशैलं रसगर्भश्च तार्क्ष्यजम् ॥ २०५ ॥
रसाञ्जनं कटु श्लेष्मविषनेत्रविकारनुत् ।
उष्णं रसायनं तिक्तं छेदनं व्रणदोषहृत् ॥ २०६ ॥

अथ वाकुची ।

तस्या नामानि गुणाँश्चाह—

अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च ॥ २०७ ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता
वाकुची मधुरा तिक्ता कटुपाका रसायनी ॥ २०८ ॥

विष्टम्भहृद्धिमा रुच्या सरा श्लेष्मास्रपित्तनुत् ।
रूक्षा हृद्या श्वासकुष्ठमेहज्वरकृमिप्रणुत् ॥ २०९ ॥
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ।
केश्यं त्वच्यं कृमिश्वासकासशोथामपाण्डुनुत् ॥ २१० ॥

अथ चक्रमर्दः ।

तस्य नामानि गुणांश्चाह—

चक्रमर्दः प्रपुन्नाटो दद्रुघ्नो मेषलोचनः ।
पद्माटः स्यादेडगजश्चक्री पुन्नाट इत्यपि ॥ २११ ॥
चक्रमर्दो लघुः स्वादू रूक्षः पित्तानिलापहः ।
हृद्यो हिमः कफश्वासकुष्ठदद्रुक्रिमीन् हरेत् ॥ २१२ ॥
हन्त्युष्णं तत्फलं कुष्ठकण्डूदद्रुविषानिलान् ।
गुल्मकासकृमिश्वासनाशनं कटुकं स्मृतम् ॥ २१३ ॥

अथातिविषा [अतीस] ।

तस्या नामगुणानाह—

विषा त्वतिविषा विश्वा शृङ्गी प्रतिविषाऽरुणा ।
शुक्लकन्दा चोपविषा भंगुरा घुणवल्लभा ॥ २१४ ॥
विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत् ।
कफपित्तातिसारामविषकासवमिक्रिमीन् ॥ २१५ ॥

अथ लोध्रः ।

शावरलोध्र–पठिआलोध इति लोके—

प्रसिद्धयोर्नामगुणानाह—

लोध्रस्तिल्वस्तिरीटश्च शावरो गालवस्तथा ॥ २१६ ॥
द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः ।
जीर्णपत्रो बृहत्पत्रः पट्टी लाक्षाप्रसादनः ॥ २१७ ॥
लोध्रो ग्राही लघुः शीतश्चक्षुष्यः कफपित्तनुत् ।
कषायो रक्तपित्तासृग्ज्वरातीसारशोथहृत् ॥ २१८ ॥

अथ लशुनः ।

तस्य नामान्याह—

लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् ।

अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥ २१९ ॥

अथ लशुनोत्पत्तिमाह—

यदाऽमृतं वैनतेयो जहार सुरसत्तमात् ।
तदा ततोऽपतद् बिन्दुः स रसोनोऽभवद् भुवि ॥ २२० ॥

अथ रसोनशब्दस्य निरुक्तिमाह—

पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्जितः ।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः ॥ २२१ ॥

अथ लशुने रसस्थानान्याह—

कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ॥
बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः ॥ २२२ ॥

अथ लशुनगुणानाह—

रसोनो बृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः ।
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ॥ २२३ ॥
भग्नसन्धानकृत्कण्ठ्यो गुरुः पित्तास्रबृद्धिदः ।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥ २२४ ॥
हृद्रोगजीर्णज्वरकुक्षिशूल-विबन्धगुल्मारुचिकासशोफान् ॥
दुर्नामकुष्ठानलसादजन्तु-समीरणश्वासकफांश्च हन्ति ॥२२५॥

अथ लशुनसेविनां हिताहितपदार्थानाह—

मद्यं मांसं तथाऽम्लञ्च हितं लशुनसेविनाम् ।
व्यायाममातपं रोषमतिनीरं पयो गुडम् ।
रसोनमश्नन्पुरुषस्त्यजेदेतान्निरन्तरम् ॥ २२६ ॥

अथ पलाण्डुः (पियाज) ।

तस्य नामगुणानाह—

पलाण्डुर्यवनेष्टश्च दुर्गन्धो मुखदूषकः ।
पलाण्डुस्तु बुधैर्ज्ञेयो रसोनसदृशो गुणैः ॥ २२७ ॥
स्वादुः पाके रसेऽनुष्णः कफकृन्नातिपित्तलः ।
हरते केवलं वातं बलवीर्यकरो गुरुः ॥ २२८ ॥

अथ भल्लातकः (भिलावा) ।

तन्नाम तत्फलम ज्जवृन्तानां तस्य च गुणानाह—

भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः ।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत् ॥ २२६ ॥
भल्लातकफलं पक्वं स्वादुपाकरसं लघु ।
कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम् ॥ २३० ॥
मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम् ।
कुष्ठार्शोग्रहणीगुल्मशोफानाहज्वरक्रिमीन् ॥ २३१ ॥
तन्मज्जा मधुरो वृष्यो बृंहणो वातपित्तहा ।
वृन्तमारुष्करं स्वादु पित्तघ्नं केश्यमग्निकृत् ॥ २३२ ॥
भल्लातकः कषायोष्णः शुक्लो मधुरो लघुः ।
वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान् ।
हन्ति गुल्मज्वरश्वित्रवह्निमान्द्यकृमिव्रणान् ॥ २३३ ॥

अथ भंगा (भांग) ।

तस्या नामगुणानाह—

भंगा गञ्जा मातुलानी मादिनी विजया जया ॥ २३४ ॥
भंगा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ।
तीक्ष्णोष्णा पित्तला मोहमन्दवाग्वह्निवर्द्धिनी ॥ २३५ ॥

अथ खाखसः (पोस्ता) ।

तस्य नामगुणान्नाह—

तिलभेदः खसतिलः खाखसश्चापि स स्मृतः ।
स्यात् खाखसफलोद्भूतं वल्कलं शीतलं लघु ॥ २३६ ॥
ग्राहि तिक्तं कषायश्च वातकृत् कफकासहृत् ॥ २३७ ॥
धातूनां शोषकं रूक्षं मदकृद्वाग्विवर्धनम् ।
मुहुर्मोहकरं रुच्यं सेवनात्पुंस्त्वनाशनम् ॥ २३८ ॥

अथाहिफेनकम् (अफीम) ।

तस्य नामगुणानाह—

उक्तं खसफलक्षीरमाफूकमहिफेनकम् ।
आफूकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलम् ।

तथा खसफलोद्भूतवल्कलप्रायमित्यपि ॥ २३९ ॥

अथ खाखसतिलाः ।

तेषां नामानि गुणांश्चाह—

उच्यन्ते खसबीजानि ते खाखसतिला अपि ॥२४०॥
खसबीजानि बल्यानि वृष्याणि सुगुरूणि च ।
जनयन्ति कफं तानि शमयन्ति समीरणम् ॥ २४१ ॥

अथ सैन्धवः ।

तस्य नामगुणानाह—

सैन्धवोऽस्त्री शीतशिवं माणिमन्थश्च सिन्धुजम् ।
सैन्धवं लवणं स्वादु दीपनं पाचनं लघु ।
स्निग्धं रुच्यं हिमं वृष्यं सूक्ष्मं नेत्र्यं त्रिदोषहृत् ॥ २४२ ॥

अथ शाकम्भरीयम् ।

तस्य नामगुणानाह—

शाकम्भरीयं कथितं गुडाख्यं रौमकं तथा ॥ २४३ ॥
गुडाख्यं लघु वातघ्नमत्युष्णं भेदि पित्तलम् ।
तीक्ष्णोष्णं चापि सूक्ष्मञ्चाभिष्यन्दि कटुपाकि च ॥ २४४ ॥

अथ सामुद्रं लवणं (पाङ्गा) ।

तस्य नामगुणानाह--

सामुद्रं यत्तु लवणमक्षीवं वशिरञ्च तत् ।
समुद्रजं सागरजं लवणोदधिसम्भवम् ॥ २४५ ॥
सामुद्रं मधुरं पाके सतिक्तं मधुरं गुरु ।
नात्युष्णं दीपनं भेदि सक्षारमविदाहि च ।
श्लेष्मलं वातनुत्तीक्ष्णमरूक्षं नातिशीतलम् ॥ २४६ ॥

अथ विडलवणं (बिरियासंचर) ।

तस्य नामगुणानाह—

विडं पाकञ्च कृतकं तथा द्राविडमासुरम् ।
विडं सक्षारमूर्द्ध्वाधःकफवातानुलोमनम् ॥ २४७ ॥
*ऊर्ध्वं कफमधो वातं सञ्चारयेदित्यर्थः ॥ २४७ ॥
दीपनं लघु तीक्ष्णोष्णं रूक्षं रुच्यं व्यवायि च ।

विबन्धानाहविष्टम्भहृद्रुग्गौरवशूलनुत् ॥ २४८ ॥

अथ सौवर्चलं लवणम् ।

तस्य नामगुणानाह—

सौवर्चलं स्याद् रुचकं मन्थपाकञ्च तन्मतम् ।
रुचकं रोचनं भेदि दीपनं पाचनं परम् ॥ २४९ ॥
सुस्नेहं वातनुन्नातिपित्तलं विशदं लघु ।
उद्गारशुद्धिदं सूक्ष्मं विबन्धानाहशूलजित् ॥ २५० ॥

अथ खानिजं लवणम् ।

तस्य नामगुणानाह—

औद्भिदं पांशुलवणं यज्जातं भूमितः स्वयम् ।
क्षारं गुरु कटु स्निग्धं शीतलं वातनाशनम् ॥ २५१ ॥

अथ चणकाम्लकम् ।

तस्य गुणानाह—

चणकाम्लकमत्युष्णं दीपनं दन्तहर्षणम् ।
लवणानुरसं रुच्यं शूलाजीर्णविबन्धनुत् ॥ २५२ ॥

अथ यवक्षारः स्वर्जिका सुवर्चिका च ।

तन्नामगुणानाह—

पाक्यक्षारो यवक्षारो यावशूको यवाग्रजः ।
स्वर्जिकाऽपि स्मृतः क्षारः कापोतः सुखवर्चकः ॥ २५३ ॥
कथितः स्वर्जिकाभेदो विशेषज्ञैः सुवर्चिका ।
यवक्षारो लघुः स्निग्धः सुसूक्ष्मो वह्निदीपनः ॥ २५४ ॥
निहन्ति शूलवातामश्लेष्मश्वासगलामयान् ।
पाण्डूवर्शोग्रहणीगुल्मानाहप्लीहहृदामयान् ॥ २५५ ॥
स्वर्जिकाऽल्पगुणा तस्माद्विशेया गुल्मशूलहृत् ।
सुवर्चिका स्वर्जिकावद् बोद्धव्या गुणतो जनैः ॥२५६॥

अथ टङ्कणक्षारः (सुहागाखार) ।

तस्य नामगुणानाह—

सौभाग्यं टङ्कणं क्षारो धातुद्रावकमुच्यते ।
टङ्कणं वह्निकृद्रूक्षं कफहृद्वातपित्तकृत् ॥ २५७ ॥

अथ क्षारद्वयं क्षारत्रयं च ।

तयोर्लक्षणं गुणाँश्चाह—

स्वर्जिका यावशकश्च क्षारद्वयमुदाहृतम् ॥ २५८ ॥
टङ्कणेन युतं तत्तु क्षारत्रयमुदीरितम् ।
मिलि.ं तूक्तगुणकृद्विशेषाद् गुल्महृत्परम् ॥ २५९ ॥

अथ क्षाराष्टकम् ।

तल्लक्षणगुणानाह—

पलाशवज्रिशिखरिचिञ्चार्कतिलनालजाः ।
यवजः स्वर्जिका चेति क्षाराष्टकमुदाहृतम् ।
क्षारा एतेऽग्निना तुल्या गुल्मशूलहरा भृशम् ॥ २६० ॥

अथ चुक्रम् [चूक] ।

तन्नामगुणानाह—

चुक्रं सहस्रवेधि स्याद्रसाम्लं शुक्तमित्यपि ।
चुक्रमत्यम्लमुष्णञ्च दीपनं पाचनं परम् ॥ २६१ ॥
शूलगुल्मविबन्धामवातश्लेष्महरं सरम् ।
वमितृष्णाऽऽस्यवैरस्यहृत्पीडावह्निमान्द्यहृत् ॥ २६२ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे द्वितीयो- हरीतक्यादिवर्गः समाप्तः ॥ २ ॥

अथ तृतीयः कर्पूरादिवर्गः ३ ।

अथ कर्पूरम् ।

तस्य नामानि गुणाँश्चाह—

पुंसि क्लीबे च कर्पूरः सिताभ्रो हिमवालुकः ।
घनसारश्चन्द्रसंज्ञो हिमनामाऽपि स स्मृतः ॥ १ ॥
कर्पूरः शीतलो वृष्यश्चक्षुष्यो लेखनो लघुः ।
सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः ॥ २ ॥
दाहतृष्णाऽऽस्यवैरस्यमेदोदौर्गन्ध्यनाशनः ।
कर्पूरो द्विविधः प्रोक्तः पक्वापक्वप्रभेदतः ।

पक्वात्कर्पूरतः प्राहुरपक्वं गुणवत्तरम् ॥ ३ ॥

अथ चीनाककर्पूरः [चिनिया] ।

तस्य नामानि गुणांश्चाह--

चीनाकसंज्ञः कर्पूरः कफक्षयकरः स्मृतः ।
कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च सः ॥ ४ ॥

अथ कस्तूरी ।

तस्या नामभेदगुणानाह—

मृगनाभिर्मृगमदः कथितस्तु सहस्रभित् ।
कस्तूरिका च कस्तूरी वेधमुख्या च सा स्मृता ॥ ५ ॥
कामरूपोद्भवा कृष्णा नैपाली नीलवर्णयुक् ।
काश्मीरी कपिलच्छाया कस्तूरी त्रिविधा स्मृता ॥ ६ ॥
कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत् ।
काश्मीरदेशसम्भूता कस्तूरी ह्यधमा मता ॥ ७ ॥
कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः ।
कफवातविषच्छर्दिशीतदौर्गन्ध्यशोषहृत् ॥ ८ ॥

अथ लताकस्तूरी (मुष्कबीजम्) ।

तस्या नामानि गुणांश्चाह—

लता कस्तूरिका तिक्ता स्वाद्वी वृष्या हिमा लघुः ।
चक्षुष्या छेदिनी श्लेष्मतृष्णावस्त्यास्यरोगहृत् ॥ ९ ॥

अथ गन्धमार्जारवीर्यं (जवादिकस्तूरी) ।

तस्या नामानि गुणांश्चाह—

गन्धमार्जारवीर्यन्तु वीर्य्यकृत्कफवातहृत् ।
कण्डूकुष्ठहरं नेत्र्यं सुगन्धं स्वेदगन्धनुत् ॥ १० ॥

अथ चन्दनम् ।

तस्य नामान्याह—

श्रीखण्डं चन्दनं न स्त्री भद्रश्रीस्तैलपर्णिकः ।
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः ॥ ११ ॥

अथोत्तमचन्दनस्य लक्षणमाह—

स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम् ।

ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते ॥ १२ ॥

अथ चन्दनस्य गुणानाह—

चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु ।
श्रमशोषविषश्लेष्मतृष्णापित्तास्रदाहनुत् ॥ १३ ॥

अथ पीतचन्दनम् । (कलम्बक इति लोके) ।

तस्य नामानि गुणाँश्चाह—

कालीयकं तु कालीयं पीताभं हरिचन्दनम् ॥ १४ ॥
हरिप्रियं कालसारं तथा कालानुसार्य्यकम् ।
कालीयकं रक्तगुणं विशेषाद्व्यङ्गनाशनम् ॥ १५ ॥

अथ रक्तचन्दनम् ।

तस्य नामानि गुणाँश्चाह—

रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम् ॥ १६ ॥
रक्तं शीतं गुरु स्वादु च्छर्दितृष्णाऽस्रपित्तहृत् ।
तिक्तं नेत्राहितं वृष्यं ज्वरव्रणविषापहम् ॥ १७ ॥

अथ पतङ्गम् (बकम्) ।

तस्य नामानि गुणाँश्चाह—

पतङ्गं रक्तसारञ्च सुरङ्गं रञ्जनं तथा ।
पट्टरञ्जकमाख्यातं पत्तूरञ्च कुचन्दनम् ॥ १८ ॥
पतङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्रनुत् ।
हरिचन्दनवद्वेद्यं विशेषाद्दाहनाशनम् ॥ १९ ॥
चन्दनानि तु सर्वाणि सदृशानि रसादिभिः ।
गन्धेन तु विशेषोऽस्ति पूर्वः श्रेष्ठतमो गुणैः ॥ २० ॥

अथागुरु कृष्णागुरु च (अगर) ।

तयोर्नामानि गुणाँश्चाह—

अगुरु प्रवरं लोहं राजार्हं योगजं तथा ।
वंशिकं कृमिजं वाऽपि कृमिजग्धमनार्यकम् ॥ २१ ॥
अगुरूष्णं कटु त्वच्यं तिक्तं तीक्ष्णञ्च पित्तलम् ।
लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत् ॥ २२ ॥

कृष्णं गुणाधिकं तत्तु लोहवद्वारि मज्जति ।
अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः ॥ २३ ॥

अथ देवदारु ।

तस्य नामानि गुणाँश्चाह—

देवदारु स्मृतं दारुभद्रं दार्विन्द्रदारु च ।
मस्तदारु द्रुकिलिमं किलिमं सुरभूरुहः ॥ २४ ॥
देवदारु लघु स्निग्धं तिक्तोष्णं कटुपाकि च ।
विबन्धाध्मानशोथामतन्द्राहिक्काज्वरास्रजित् ।
प्रमेहपीनसश्लेष्मकासकण्डूसमीरनुत् ॥ २५ ॥

अथ सरलः (धूप) ।

तस्य नामानि गुणाँश्चाह—

सरलः पीतवृक्षः स्यात्तथा सुरभिदारुकः ।
सरलो मधुरस्तिक्तो कटुपाकरसो लघुः ॥ २६ ॥
स्निग्धोष्णः कर्णकण्ठाक्षिरोगरक्षोहरः स्मृतः ।
कफानिलस्वेददाहकासमूर्च्छाव्रणापहः ॥ २७ ॥

अथ तगरम् पिण्डतगरं च ।

तयोर्नामानि गुणाँश्चाह—

कालानुसार्यं तगरं कुटिलं नहुषं नतम् ।
अपरं पिण्डतगरं दण्डहस्ती च बर्हिणम् ॥ २८ ॥
तगरद्वयमुष्णं स्यात्स्वादु स्निग्धं लघु स्मृतम् ।
विषापस्मारशूलाक्षिरोगदोषत्रयापहम् ॥ २९ ॥

अथ पद्मकम् ।

तस्य नामानि गुणाँश्चाह—

पद्मकं पद्मगन्धि स्यात्तथा पद्माह्वयं स्मृतम् ।
पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ॥ ३० ॥
वीसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तनुत् ।
गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत् ॥ ३१ ॥

अथ गुग्गुलुः ।

तस्य नामान्याह—

गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः ।
कुस्तोलूखलकं क्लीबे महिषाक्षः पलंकषः ॥ ३२ ॥

अथ गुग्गुलुभेदानाह—

महिषाक्षो महानीलः कुमुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः ॥ ३३ ॥

अथ तेषां लक्षणान्याह—

भृंगाञ्जनसवर्णस्तु महिषाक्ष इति स्मृतः ।
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ॥ ३४ ॥
कुमुदः कुमुदाभः स्यात्पद्मो माणिक्यसन्निभः ॥
हिरण्याक्षस्तु हेमाभः पञ्चानां लिंगमीरितम् ॥ ३५ ॥

अथ तेषां गुणानाह—

महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ ।
हयानां कुमुदः पद्मः स्वस्त्यारोग्यकरौ परौ ॥ ३६ ॥
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ।
कदा चिन्महिषाक्षश्च मतः कैश्चिन्नृणामपि ॥ ३७ ॥

अथ सामान्यतो गुग्गुलुगुणानाह—

गुग्गुलुर्विशदस्तिक्तो वीर्योष्णः पित्तलः सरः ।
कषायः कटुकः पाके कटू रूक्षो लघुः परः ॥ ३८ ॥
भग्नसन्धानकृद् वृष्यः सूक्ष्मः स्वर्यो रसायनः ।
दीपनः पिच्छिलो बल्यः कफवातव्रणापचीः ॥ ३९ ॥
मेदोमेहाश्मवातांश्च क्लेदकुष्ठाममारुतान् ।
पिडिकाग्रन्थिशाफाशोगण्डमालाकृमीञ्जयेत् ॥ ४० ॥
माधुर्याच्छमयेद्वातं कषायत्वाच्च पित्तहा ।
तिक्तत्वात्कफजित्तेन गुग्गुलुः सर्वदोषहा ॥ ४१ ॥

अथ नवीनस्य प्राचीनस्य च गुग्गुलोर्लक्षणं गुणाँश्चाह—

स नवो बृंहणो वृष्यः पुराणस्त्वतिलेखनः ॥ ४२ ॥
स्निग्धः काञ्चनसंकाशः पक्वजम्बूफलोपमः ।

नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः ॥ ४३ ॥
शुष्को दुर्गन्धकश्चैव त्यक्तप्रकृतिवर्णकः ।
पुराणः स तु विज्ञेयो गुग्गुलुर्वीर्यवर्जितः ॥ ४४ ॥

अथ गुग्गुलुसेविनां त्याज्यान्याह—

अम्लं तीक्ष्णमजीर्णञ्च व्यवायं श्रममातपम् ।
मद्यं रोषं त्यजेत्सम्यग् गुणार्थी पुरसेवकः ॥ ४५ ॥

अथ सरलनिर्यासगुग्गुलुः ।

तस्य नामानि गुणांश्चाह—

श्रीवासः सरलस्रावः श्रीवेष्टो वृक्षधूपकः ।
श्रीवासो मधुरस्तिक्तः स्निग्धोष्णस्तुवरः सरः ॥ ४६ ॥
पिच्छलो वातमूर्द्धाक्षिस्वररोगकफापहः ।
रक्षोघ्नः स्वेददौर्गन्ध्ययूकाकण्डूव्रणप्रणुत् ॥ ४७ ॥

अथ रालः ।

तस्य नामानि गुणांश्चाह—

रालस्तु शालनिर्यासस्तथा सर्ज्जरसः स्मृतः ।
देवधूपो यक्षधूपस्तथा सर्वरसश्च सः ॥ ४८ ॥
रालो हिमो गुरुस्तिक्तः कषायो ग्राहको हरेत् ।
दोषास्रस्वेदवीसर्पज्वरव्रणविपादिकाः ॥
ग्रहभग्नाग्निदग्धांश्च शूलातीसारनाशनः ॥ ४९ ॥

अथ कुन्दुरुः [गंधविरोजा] ।

(सुगन्धद्रव्यं शल्लकीनिर्यासः)

तस्य नामानि गुणांश्चाह—

कुन्दुरुस्तु मुकुन्दः स्यात्सुगन्धः कुन्द इत्यपि ॥ ५० ॥
कुन्दुरुर्मधुरस्तिक्तस्तीक्ष्णस्त्वच्यः कटुर्हरेत् ॥
ज्वरस्वेदग्रहालक्ष्मीमुखरोगकफानिलान् ॥ ५१ ॥

अथ शिलारसः ।

तस्य नामानि गुणांश्चाह—

सिह्लकस्तु तुरुष्कः स्याद्यतो यवनदेशजः ।
कपितैलश्च संख्यातस्तथा च कपिनामकः ॥ ५२ ॥

सिह्लकः कटुकः स्वादुः स्निग्धोष्णः शुक्रकान्तिकृत ।
वृष्यः कण्ठ्यः स्वेदकुष्ठज्वरदाहग्रहापहः ॥ ५३ ॥

अथ जातीफलम् ।

तस्य नामानि गुणाँश्चाह—

जातीफलं जातिकोशं मालतीफलमित्यपि ।
जातीफलं रसे तिक्तं तीक्ष्णोष्णं रोचनं लघु ॥
कटुकं दीपनं ग्राहि स्वर्यं श्लेष्मानिलापहम् ॥ ५४ ॥
निहन्ति मुखवैरस्यं मलदौर्गन्ध्यकृष्णताः ।
कृमिकासवमिश्वासशोषपीनसहृद्रुजः ॥ ५५ ॥

अथ जातीपत्री ।

तस्या नामानि गुणाँश्चाह—

जातीफलस्य त्वक् प्रोक्ता जातीपत्री भिषग्वरैः ॥ ५६ ॥
जातीपत्री लघुः स्वादुः कटूष्णा रुचिवर्णकृत् ।
कफकासवमिश्वासतृष्णाकृमिविषापहा ॥ ५७ ॥

अथ लवंगम् ।

तस्य नामानि गुणाँश्चाह—

लवंगं देवकुसुमं श्रीसंज्ञं श्रीप्रसूनकम् ।
लवंगं कटुकं तिक्तं लघु नेत्रहितं हिमम् ॥ ५८ ॥
दीपनं पाचनं रुच्यं कफपित्तास्रनाशकृत् ।
तृष्णां छर्दिं तथाऽऽध्मानं शूलमाशु विनाशयेत् ।
कासं श्वासञ्च हिक्काञ्च क्षयं क्षपयति ध्रुवम् ॥ ५९ ॥

अथ स्थूलैला (बडी इलायची) ।

तस्या नामानि गुणाँश्चाह—

एला स्थूला च बहुला पृथ्वीका त्रिपुटाऽपि च ॥ ६० ॥
भद्रैला बृहदेला च चन्द्रबाला च निष्कुटिः ।
स्थूलैला कटुका पाके रसे चानलकृल्लघुः ॥ ६१ ॥
रूक्षोष्णा श्लेष्मपित्तास्रकण्डूश्वासतृषाऽपहा ।
हृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनुत् ॥ ६२ ॥

अथैला (गुजराती इलायची)

तस्या नामानि गुणांश्चाह—

सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी द्राविडी त्रुटिः ।
एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत् ।
रसे तु कटुका शीता लघ्वी वातहरी मता ॥ ६३ ॥

अथ त्वक्पत्रम् (तज)

तस्य नामानि गुणांश्चाह—

त्वक्पत्रञ्च वरांगं स्याद् भृङ्गं चोचं तथोत्कटम् ।
त्वचं लघूष्णं कटुकं स्वादु तिक्तञ्च रूक्षकम् ॥ ६४ ॥
पित्तलं कफवातघ्नं कण्ड्वामारुचिनाशनम् ।
हृद्वस्तिरोगवाताऽर्शःकृमिपीनसशुक्रहृत् ॥ ६५ ॥

अथ दारुसिता (दालचीनी) ।

तस्या नामानि गुणांश्चाह—

त्वक्स्वाद्वी तु तनुत्वक्स्यात्तथा दारुसिता मता ॥ ६६ ॥
उक्ता दारुसिता स्वाद्वी तिक्ता चानिलपित्तहृत् ।
सुरभिः शुक्रला वर्ण्या मुखशोषतृषापहा ॥ ६७ ॥

अथ पत्रकम् ।

तस्य नामानि गुणांश्चाह—

पत्रं तमालपत्रञ्च तथा स्यात्पत्रनामकम् ।
पत्रकं मधुरं किञ्चित्तीक्ष्णोष्णं पिच्छिलं लघु ।
निहन्ति कफवातार्शोहृल्लासारुचिपीनसान् ॥ ६८ ॥

अथ नागकेशरः ।

तस्य नामानि गुणांश्चाह—

नागपुष्पः स्मृतो नागः केशरो नागकेशरः ।
चाम्पेयो नागकिञ्जल्कः कथितः कांचनाह्वयः ॥ ६९ ॥

*अयं पुष्पे तु क्लीबे ॥ ६९ ॥

नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम् ॥ ७० ॥
ज्वरकण्डूतृषास्वेदच्छर्दिहृल्लासनाशनम् ।
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥ ७१ ॥

अथ त्रिजातकं चातुर्जातकं च ।

तयोर्लक्षणं गुणांश्चाह--

त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् ।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते ॥ ७२ ॥
तद् द्वयं रोचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत् ।
लघुपित्ताग्निकृद्वर्ण्यं कफवातविषापहम् ॥ ७३ ॥

अथ कुङ्कुमम् (केशर) ।

तस्य नामानि सलक्षणभेदान् गुणांश्चाह—

कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
संकोचं पिशुनं धीरं बाह्लीकं शोणिताभिधम् ॥ ७४ ॥
काश्मीरदेशजे क्षेत्रे कुङ्कुमं यद्भवेद्धि तत् ।
सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम् ॥ ७५ ॥
बाह्लीकदेशसञ्जातं कुङ्कुमं पाण्डुरं स्मृतम् ।
केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेशरम् ॥ ७६ ॥
कुङ्कुमं पारसीकं तन्मधुगन्धि तदीरितम् ।
ईषत्पाण्डुरवर्णं तदधमं स्थूलकेशरम् ॥ ७७ ॥
कुङ्कुमं कटुकं स्निग्धं शिरोरुग्व्रणजन्तुजित् ।
तिक्तं वमिहरं वर्ण्यं व्यङ्गदोषत्रयापहम् ॥ ७८ ॥

अथ गोरोचना ।

तस्या नामानि गुणांश्चाह—

गोरोचना तु मङ्गल्या वन्द्या गौरी च रोचना ।
गोरोचना हिमा तिक्ता वश्या मङ्गलकान्तिदा ।
विषालक्ष्मीग्रहोन्मादगर्भस्रावक्षतास्रहृत् ॥ ७९ ॥

अथ नखं नखी च (गन्धद्रव्यम्) ।

तयोर्नामानि गुणांश्चाह—

नखं व्याघ्रनखं व्याघ्रायुधं तच्चक्रकारकम् ॥ ८० ॥
नखं स्वल्पं नखी प्रोक्ता हनुर्हट्टविलासिनी ।
नखद्रव्यं ग्रहश्लेष्मवातास्रज्वरकुष्ठहृत् ॥ ८१ ॥
लघूष्णं शुक्रलं वर्ण्यं स्वादु व्रणविषापहम् ।

अलक्ष्मीमुखदौर्गन्ध्यहृत्पाकरसयोः कटु ॥ ८२ ॥

अथ वालम् [सुगन्धवाला] ।

तस्य नामानि गुणाँश्चाह—

वालं ह्रीबेरवर्हिष्ठोदीच्यं केशाम्बुनाम च ।
बालकं शीतलं रूक्षं लघु दीपनपाचनम् ॥
हृल्लासारुचिवीसर्पहृद्रोगामातिसारजित् ॥ ८३ ॥

अथ वीरणम् ।

तस्य नामानि गुणांश्चाह—

स्याद्वीरणं वीरतरुर्वीरश्च बहुमूलकम् ।
वीरणं पाचनं शीतं वान्तिहृल्लघु तिक्तकम् ॥ ८४ ॥
स्तम्भनं ज्वरनुद्भ्रान्तिमदजित्कफपित्तहृत् ।
तृष्णाऽस्रविषवीसर्पकृच्छ्रदाहव्रणापहम् ॥ ८५ ॥

अथोशीरम् ।

तस्य नामानि गुणाँश्चाह—

वीरणस्य तु मूलं स्यादुशीरं नलदश्च तत् ।
अमृणालश्च सेव्यश्च समगन्धिकमित्यपि ॥ ८६ ॥
उशीरं पाचनं शीतं स्तम्भनं लघु तिक्तकम् ॥ ८७ ॥
मधुरं ज्वरहृद्भ्रान्तिमदनुत्कफपित्तहृत् ।
तृष्णाऽस्रविषवीसर्पदाहकृच्छ्रव्रणापहम् ॥ ८८ ॥

अथ जटामांसी ।

तस्या नामानि गुणाँश्चाह—

जटामांसी भूतजटा जटिला च तपस्विनी ।
मांसी तिक्ता कषाया च मेध्या कान्तिबलप्रदा ॥
स्वाद्वी हिमा त्रिदोषास्रदाहवीसर्पकुष्ठनुत् ॥ ८९ ॥

अथ शैलेयम् [भूरिछरीला] ।

तस्य नामानि गुणांश्चाह—

शैलेयन्तु शिलापुष्पं वृद्धं कालानुसार्य्यकम् ॥ ९० ॥
शैलेयं शीतलं हृद्यं कफपित्तहरं लघु ।
कण्डूकुष्ठाश्मरीदाहविषहृद् गुदरक्तहृत् ॥ ९१ ॥

अथ मुस्तकं-नागरमुस्तकञ्च ।
[मोथा-नागरमोथा] ।
तयोर्नामानि गुणांश्चाह—

मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकम् ।
कुरुविन्दश्च संख्यातोऽपरः क्रोडकसेरुकः ॥ ९२ ॥
भद्रमुस्तश्च गुन्द्रा च तथा नागरमुस्तकः ।
मुस्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम् ॥ ९३ ॥
कषायं कफपित्तास्रतृड्ज्वरारुचिजन्तुहृत् ।
अनूपदेशे यज्जातं मुस्तकं तत्प्रशस्यते ।
तत्रापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम् ॥ ९४ ॥

अथ कर्चूरः ।
तस्य नामानि गुणाँश्चाह—

कर्चूरो वेधमुख्यश्च द्राविडः कल्पकः शटी ।
कर्चूरो दीपनो रुच्यः कटुकस्तिक्त एव च ॥ ९५ ॥
सुगन्धिः कटुपाकः स्यात्कुष्ठार्शोव्रणकासनुत् ।
उष्णो लघुर्हरेच्छ्वासं गुल्मवातकफक्रिमीन् ॥ ९६ ॥

अथ मुरा [मुरहरी, एकाङ्गी] ।
तस्या नामानि गुणाँश्चाह—

मुरा गन्धकुटी दैत्या सुरभिः शालपर्णिका ॥ ९७ ॥
मुरा तिक्ता हिमा स्वाद्वी लघ्वी पित्तानिलापहा ।
ज्वरासृग्भूतरक्षोघ्नी कुष्ठकासविनाशिनी ॥ ९८ ॥

अथ गन्धपलाशी [कपूरकचरी] ।
सुगन्धिद्रव्यं काश्मीरे प्रसिद्धम् ।
तस्या नामानि गुणाँश्चाह—

शठी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ।
गान्धारिका गन्धवधूर्वधूः पृथुपलाशिका ॥ ९९ ॥
भवेद्गन्धपलाशी तु कषाया ग्राहिणी लघुः ।
तिक्ता तीक्ष्णा च कटुकाऽनुष्णाऽऽस्यमलनाशिनी ।
शोथकासव्रणश्वासशूलसिध्मग्रहापहा ॥ १०० ॥

अथ प्रियङ्गुर्गन्धप्रियङ्गुश्च ।

तयोर्नामानि गुणाँश्चाह—

प्रियङ्गुः फलिनी कान्ता लता च महिलाऽऽह्वया ॥१०१॥
गुन्द्रा गन्धफला श्यामा विष्वक्सेनाङ्गना प्रिया ।
प्रियङ्गुः शीतला तिक्ता तुवराऽनिलपित्तहृत् ॥ १०२ ॥
रक्तातियोगदौर्गन्ध्यस्वेददाहज्वरापहा ।
गुल्मतृड्विषमोहघ्नी तद्वद् गन्धप्रियङ्गुका ॥ १०३ ॥

अथ तत्फलगुणानप्याह—

तत्फलं मधुरं रूक्षं कषायं शीतलं गुरु ।
विबन्धाध्मानबलकृत्संग्राहि कफपित्तजित् ॥ १०४ ॥

अथ रेणुका-मरिचसदृशी [सम्हालू] ।

तस्या नामानि गुणाँश्चाह—

रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका ॥१०५॥
रेणुका कटुका पाके तिक्ताऽनुष्णा कटुर्लघुः ।
पित्तला दीपनी मेध्या पाचिनी गर्भपातिनी ।
बलासवातकृच्चैव तृट्कण्डूविषदाहनुत् ॥ १०६ ॥

अथ ग्रन्थिपर्णम [गठिवन] ।

तस्य नामानि गुणाँश्चाह—

ग्रन्थिपर्णं ग्रन्थिकञ्च काकपुच्छञ्च गुच्छकम् ।
नीलपुष्पं सुगन्धञ्च कथितं तैलपर्णकम् ॥ १०७ ॥
ग्रन्थिपर्णं तिक्ततीक्ष्णं कटूष्णं दीपनं लघु ।
कफवातविषश्वासकण्डूदौर्गन्ध्यनाशनम् ॥ १०८ ॥

अथ स्थौणेयकम् ।

(ग्रन्थिपर्णस्यैव भेदः, ईषत्सुगन्धं "थुनेर" इति लोके प्रसिद्धम् ।)

तस्य नामानि गुणाँश्चाह—

स्थौणेयकं बर्हिबर्हं शुकबर्हञ्च कुक्कुरम् ।
शीर्णरोमशुकञ्चापि शुकपुष्पं शुकच्छदम् ॥ १०९ ॥
स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत् ॥ ११० ॥

मेधाशुक्रकरं रुच्यं रक्षोघ्नं ज्वरजन्तुजित्।
हन्ति कुष्ठास्रतृड्दाहदौर्गन्ध्यतिलकालकान् ॥ १११ ॥

अथ ग्रन्थिपर्णस्यैव भेदः।
(भटेउर) इति नैपालदेशे भवति।
तस्य नामानि गुणाँश्चाह—

निशाचरो धनहरः कितवो गणहासकः।
रोचको मधुरस्तिक्तः कटुः पाके कटुर्लघुः ॥ ११२ ॥
तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफानिलान्।
रक्षोऽश्रीस्वेदमेदोऽस्रज्वरगन्धविषव्रणान ॥ ११३ ॥

अथ तालीसपत्रम्।
भूम्यामलकीवद् गुच्छस्तालीसस्तत्पत्रम्।
तस्य नामानि गुणाँश्चाह—

तालीसमुक्तं पत्राढ्यं धात्रीपत्रञ्च तत्स्मृतम्।
तालीसं लघु तीक्ष्णोष्णं श्वासकासकफानिलान्।
निहन्त्यरुचिगुल्मामवह्निमान्द्यक्षयामयान् ॥ ११४ ॥

अथ कङ्कोलं सुगन्धिद्रव्यम्।
"सीतलचीनी" इति लोके।
तस्य नामानि गुणाँश्चाह—

कङ्कोलं कोलकं प्रोक्तं तथा कोषफलं स्मृतम् ॥ ११५ ॥
कङ्कोलं लघु तीक्ष्णोष्णं तिक्तं हृद्यं रुचिप्रदम्।
आस्यदौर्गन्ध्यहृद्रोगकफवातामयान्ध्यहृत् ॥ ११६ ॥

अथ गन्धकोकिला गन्धमालती च।
तयोर्गुणानाह—

स्निग्धोष्णा कफहृत्तिक्ता सुगन्धा गंधकोकिला।
गन्धकोकिलया तुल्या विज्ञेया गन्धमालती ॥ ११७ ॥

अथ लामज्जकम्।
(उशीरवत् पीतच्छवितृणविशेषः)।
लामज्जकं सुनालं स्यादमृणालं लवं लघुः।
इष्टकापथकं सेव्यं नलदञ्चावदातकम् ॥ ११८ ॥

लामज्जकं हिमं तिक्तं लघु दोषत्रयास्रजित् ॥ ११९ ॥

अथैलवालुकम् (कङ्कोलसदृशं कुष्ठगन्धि) ।

तस्य नामानि गुणाँश्चाह—

एलवालुकमैलेयं सुगन्धि हरिवालुकम् ।
ऐलवालुकमेलालु कपित्थं पत्रमीरितम् ॥ १२० ॥
एलालु कटुकं पाके कषायं शीतलं लघु ।
हन्ति कण्डुव्रणच्छर्दितृट्कासारुचिहृद्रुजः ॥
बलासविषपित्तास्रकुष्ठमूत्रगदक्रिमीन् ॥ १२१ ॥

अथ कैवर्तीमुस्तकम् । (केवटी मोथा)

तस्य नामलक्षणगुणानाह—

कुटन्नटं दासपुरं वालेयं परिपेलवम् ।
प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि च ॥ १२२ ॥
मुस्तावत्पेलवपुटं शुकाभं स्याद्वितुन्नकम् ॥ १२३ ॥
वितुन्नकं हिमं तिक्तं कषायं कटु कान्तिदम् ।
कफपित्तास्रवीसर्पकुष्ठकण्डूविषप्रणुत् ॥ १२४ ॥

*"केवटीमोथा"-"गुड़तजी" इति च लोके, इयं तु वितुन्नकनाम्नोवृक्षस्य त्वग् मुस्ताऽऽकृतिः ॥ १२२-१२४ ॥

अथ स्पृक्का (असवरग)

स्पृक्काऽसृग् ब्राह्मणी देवी मरुन्माला लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ॥ १२५ ॥
स्पृक्का स्वाद्वी हिमा वृष्या तिक्ता निखिलदोषनुत् ।
कुष्ठकण्डूविषस्वेददाहाश्रीज्वररक्तहृत् ॥ १२६ ॥

*सुगंधिद्रव्यम् (शाकविशेषः) । "लङ्कोइकपुरी"ति लोके च॥१२५-१२६॥

अथ पर्पटी [पनडी]

तस्या नामानि गुणाँश्चाह—

पर्पटी रञ्जना कृष्णा जतुका जननी जनी ।
जतुकृष्णाऽग्निसंस्पर्शा जतुकृच्चक्रवर्त्तिनी ॥ १२७ ॥
पर्पटी तुवरा तिक्ता शिशिरा वर्णकृल्लघुः ।
विषव्रणहरी कण्डूकफपित्तास्रकुष्ठनुत् ॥ १२८ ॥

*"पर्पटी" इति प्रसिद्धं "पद्मावती" इति चोत्तरदेशे, सुगन्धि द्रव्यम् ॥ १२७-१२८ ॥

अथ नलिका ।

तस्या नामानि गुणाँश्चाह--

नलिका विद्रुमलता कपोतचरणा नटी ।
धमन्यञ्जनकेशी च निर्मध्या सुषिरा नली ॥ १२९ ॥
नलिका शीतला लघ्वी चक्षुष्या कफपित्तहृत ।
कृच्छ्राश्मवाततृष्णाऽस्रकुष्ठकण्डूज्वरापहा ॥ १३० ॥

*उत्तरापथे प्रसिद्धा सुगन्धा प्रबालाकृतिः "य वारी" इति च क्वचित्प्रसिद्धा ॥ १२९-१३० ॥

अथ प्रपौण्डरीकम् ।

तस्य नामानि गुणांश्चाह--

प्रपौण्डरीकं पौण्डर्यं चक्षुष्यं पौण्डरीयकम् ।
पौण्डर्यं मधुरं तिक्तं कषायं शुक्रलं हिमम् ।
चक्षुष्यं मधुरं पाके वर्ण्यं पित्तकफप्रणुत ॥ १३१ ॥

*सुगन्धिद्रव्यम् [पुण्डेरी] इति लोके प्रसिद्धम् ॥ १३१ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे तृतीयः कर्पूरादिवर्गः समाप्तः ॥ ३ ॥

अथ चतुर्थो गुडूच्यादिवर्गः ४ ।

अथ गुडूची ।

तस्या उत्पत्ति नामानि गुणाँश्चाह—

अथ लंकेश्वरो मानो रावणो राक्षसाधिपः ।
रामपत्नीं बलात्सीतां जहार मदनातुरः ॥ १ ॥
ततस्तं बलवान रामो रिपुं जायाऽपहारिणम् ।
हतो वानरसैन्येन जघान रणमूर्धनि ॥ २ ॥
हते तस्मिन्सुराराती रावणे बलगर्विते ।
देवराजः सहस्राक्षः परितुष्टश्च राघवे ॥ ३ ॥

तत्र ये वानराः केचिद्राक्षसैर्निहता रणे ।
तानिन्द्रो जीवयामास संसिच्यामृतवृष्टिभिः ॥ ४ ॥
ततो येषु प्रदेशेषु कपिगात्रात्परिच्युताः ।
पीयूषबिन्दवः पेतुस्तेभ्यो जाता गुडूचिका ॥ ५ ॥
गुडूची मधुपर्णी स्यादमृताऽमृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥ ६ ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धीरा विशल्या च रसायनी ॥ ७ ॥
चन्द्रहासा वयस्था च मण्डली देवनिर्मिता ।
गुडूची कटुका तिक्ता स्वादुपाका रसायनी ॥ ८ ॥
संग्राहिणी कषायोष्णा लघ्वी बल्याऽग्निदीपिनी ।
दोषत्रयामतृड्दाहमेहकासांश्च पाण्डुताम् ॥ ९ ॥
कामलाकुष्ठवातास्रज्वरक्रिमिवमीन्हरेत् ।
प्रमेहश्वासकासार्शःकृच्छ्रहृद्रोगवातनुत् ॥ १० ॥

अथ नागवल्ली (पान)

तस्या नामानि गुणांश्चाह—

ताम्बूलवल्ली ताम्बूली नागिनी नागवल्लरी ।
ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरम् ॥ ११ ॥
वश्यं तिक्तं कटु क्षारं रक्तपित्तकरं लघु ।
बल्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम् ॥ १२ ॥

अथ बिल्वः (बेल) ।

तस्य नामानि गुणांश्चाह—

बिल्वः शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।
श्रीफलस्तुवरस्तिक्तो ग्राही रूक्षोऽग्निपित्तकृत् ॥
वातश्लेष्महरो बल्यो लघुरुष्णश्च पाचनः ॥ १३ ॥

अथ गाम्भारी (खम्भारी) ।

तस्या नामानि गुणांश्चाह—

गाम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।

काश्मारी काश्मरी हीरा काश्मर्यः पीतरोहिणी ॥ १४ ॥
कृष्णवृन्ता मधुरसा महाकुसुमिकाऽपि च ।
काश्मरी तुवरा तिक्ता वीर्योष्णा मधुरा गुरुः ॥ १५ ॥
दीपनी पाचनी मेध्या भेदिनी भ्रमशोषजित् ।
दोषतृष्णाऽऽमशूलार्शोऽविषदाहज्वरापहा ॥ १६ ॥

अथ गाम्भारीफलगुणानाह—

तत्फलं बृंहणं वृष्यं गुरु केश्यं रसायनम् ।
वातपित्ततृषारक्तक्षयमूत्रविबन्धनुत् ॥ १७ ॥
स्वादु पाके हिमं स्निग्धं तुवराम्लं विशुद्धिकृत् ।
हन्याद्दाहतृषावातरक्तपित्तक्षतक्षयान् ॥ १८ ॥

अथ पाटला (पाढल) घण्टापाटलिश्च (घण्टापाढल) ।

तयोर्नामानि गुणांश्चाह—

पाटलिः पाटलाऽमोघा मधुदूती फलेरुहा ।
कृष्णवृन्ता कुबेराक्षी कालस्थाल्यलिवल्लभा ॥ १९ ॥
ताम्रपुष्पी च कथिताऽपरा स्यात्पाटला सिता ।
मुष्कको मोक्षको घण्टापाटलिः काष्ठपाटला ॥ २० ॥
*कालस्थालीत्यत्र काचस्थीलीत्येके ॥ १९-२० ॥
पाटला तुवरा तिक्ताऽनुष्णा दोषत्रयापहा ।
अरुचिश्वासशोथास्रच्छर्दिहिक्कातृषाहरी ॥ २१ ॥

अथ तत्पुष्पफलयोर्गुणानाह—

पुष्पं कषायं मधुरं हिमं हृद्यं कफास्रनुत् ।
पित्तातिसारहृत्कण्ठ्यं फलं हिक्काऽस्रपित्तहृत् ॥२२॥

अथाग्निमन्थः ।

(अगेथू , अरनी इति च लोके) ।

तस्य नामानि गुणाँश्चाह—

अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका ।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥ २३ ॥
अग्निमन्थः श्वयथुनुद्वीर्योष्णः कफवातहृत् ।
पाण्डुनुत्कटुकस्तिक्तस्तुवरो मधुरोऽग्निदः ॥ २४ ॥

अथ श्योनाकः (सोनापाठा-अरलु) ।

तस्य नामानि गुणाँश्चाह—

श्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुण्टुकाः ।
मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः ॥ २५ ॥
दीर्घवृन्तोऽरलुश्चापि पृथुशिम्बः कटम्भरः ।
श्योनाको दीपनः पाके कटुकस्तुवरो हिमः ।
ग्राही तिक्तोऽनिलश्लेष्मपित्तकासप्रणाशनः ॥ २६ ॥

अथ श्योनाकस्य बालप्रौढफलयोर्गुणानाह—

टुण्टुकस्य फलं बालं रूक्षं वातकफापहम् ॥ २७ ॥
हृद्यं कषायं मधुरं रोचनं लघु दीपनम् ।
गुल्मार्शःकृमिहृत् प्रौढं गुरु वातप्रकोपणम् ॥ २८ ॥

अथ बृहत्पञ्चमूलम् ।

तस्य लक्षणं गुणाँश्चाह—

श्रीफलः सर्वतोभद्रा पाटला गणिकारिका ।
श्योनाकः पञ्चभिश्चैतैः पञ्चमूलं महन्मतम् ॥ २९ ॥
पञ्चमूलं महत् तिक्तं कषायं कफवातनुत् ।
मधुरं श्वासकासघ्नमुष्णं लघ्वग्निदीपनम् ॥ ३० ॥

अथ शालिपर्णी (सरिवन) ।

तस्या नामानि गुणाँश्चाह—

शालिपर्णी स्थिरा सौम्या त्रिपर्णी पीवरी गुहा ।
विदारिगन्धा दीर्घाङ्गी दीर्घपत्रांऽशुमत्यपि ॥ ३१ ॥
शालिपर्णी गुरुश्छर्दिज्वरश्वासातिसारजित् ॥ ३२ ॥
शोषदोषत्रयहरी बृंहणयुक्ता रसायनी ।
तिक्ता विषहरी स्वादुः क्षतकासक्रिमिप्रणुत् ॥ ३३ ॥

अथ पृष्टिपर्णी (पिठवन) ।

तस्या नामानि गुणांश्चाह—

पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यहिपर्ण्यपि ।
क्रोष्टुविन्ना सिंहपुच्छी कलशी धावनिगुहा ॥ ३४ ॥
पृश्निपर्णी त्रिदोषघ्नी वृष्योष्णा मधुरा सरा ।

हन्ति दाहज्वरश्वासरक्तातीसारतृड्वमीः ॥ ३५ ॥

अथ वार्त्ताकी (बड़ी कटेरी) ।

तस्या नामानि गणांश्चाह—

वार्त्ताकी क्षुद्रभण्टाकी महती बृहती कुली ।
हिंगुली राष्ट्रिका सिंही महोष्ट्री दुष्प्रधर्षिणी ।
बृहती ग्राहिणी हृद्या पाचनी कफवातकृत् ॥ ३६ ॥
कटुतिक्तास्यवैरस्यमलारोचकनाशिनी ।
उष्णा कुष्ठज्वरश्वासशूलकासाग्निमान्द्यजित् ॥ ३७ ॥

अथ कण्टकारी (भटकटैया, कटेरी) ।

तस्या नामान्याह—

कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका ।
कण्टालिका कण्टकिनी धावनी बृहती तथा ॥ ३८ ॥

अथ श्वेतपुष्पायाः कण्टकार्या नामान्याह—

उभे च बृहत्यौ । यत आह सुश्रुतः—

क्षुद्रा या क्षुद्रभण्टाकी बृहतीति निगद्यते ।
श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षेत्रदूतिका ।
गर्भदा चन्द्रमा चन्द्री चन्द्रपुष्पा प्रियंकरी ॥ ३९ ॥

अथ कण्टकारीगुणानाह—

कण्टकारी सरा तिक्ता कटुका दीपनी लघुः ॥ ४० ॥
रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान् ।
निहन्ति पीनसं पार्श्वपीडाकृमिहृद्रामयान् ॥ ४१ ॥

अथ कण्टकारीद्वयफलगुणानाह—

तयोः फलं कटु रसे पाके च कटुकं भवेत् ।
शुक्रस्य रेचनं भेदि तिक्तं पित्ताग्निकृल्लघु ॥
हन्यात्कफमरुत्कण्डूकासमेदक्रिमिज्वरान् ॥ ४२ ॥

अथ श्वेतपुष्पकण्टकार्या गुणानाह—

तद्वत्प्रोक्ता सिता क्षुद्रा विशेषाद्गर्भकारिणी ॥ ४३ ॥

अथ गोक्षुरः ।

तस्य नामानि गुणांश्चाह—

गोक्षुरः क्षुरकोऽपि स्यात्त्रिकण्टः स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृंगाट इत्यपि ॥ ४४ ॥
पलंकषा श्वदंष्ट्रा च तथा स्यादिक्षुगन्धिका ।
गोक्षुरः शीतलः स्वादुर्बलकृद्बस्तिशोधनः ॥ ४५ ॥
मधुरो दीपनो वृष्यः पुष्टिदश्चाश्मरीहरः ।
प्रमेहश्वासकासार्शःकृच्छ्रहृद्रोगवातनुत् ॥ ४६ ॥

अथ लघुपञ्चमूलम् ।

तस्य लक्षणं गुणाँश्चाह—

शालिपर्णी पृश्निपर्णी वार्त्ताकी कण्टकारिका ।
गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम् ॥ ४७ ॥
पञ्चमूलं लघु स्वादु बल्यं पित्तानिलापहम् ।
नात्युष्णं बृंहणं ग्राहि ज्वरश्वासाश्मरीप्रणुत् ॥ ४८ ॥

अथ दशमूलम् ।

तस्य लक्षणं गुणाँश्चाह—

उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदाहृतम् ।
दशमूलं त्रिदोषघ्नं श्वासकासशिरोरुजः ।
तन्द्राशोथज्वरानाहपार्श्वपीडारुचीर्हरेत् ॥ ४९ ॥

अथ जीवन्ती (शाकविशेषः)

(शर्करावन्मधुरपुष्पा व्रततिर्भवति ।)

तस्या नामानि गुणाँश्चाह—

जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥ ५० ॥
जीवन्ती शीतला स्वादुः स्निग्धा दोषत्रयापहा ।
रसायनी बलकरी चक्षुष्या ग्राहिणी लघुः ॥ ५१ ॥

अथ मुद्गपर्णी ।

तस्या नामानि गुणाँश्चाह—

मुद्गपर्णी काकपर्णी सूर्यपर्ण्यल्पिका सहा ॥ ५२ ॥

काकमुद्गा च सा प्रोक्ता तथा मार्जारगन्धिका ।
मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला ॥ ५३ ॥
चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत् ।
दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारजित् ॥ ५४ ॥

अथ माषपर्णी ।

तस्या नामानि गुणांश्चाह—

माषपर्णी सूर्यपर्णी काम्बोजी हयपुच्छिका ।
पाण्डुलोमशपर्णी च कृष्णवृन्ता महासहा ॥ ५५ ॥
माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलासकृत् ।
मधुरा ग्राहिणी शोथवातपित्तज्वरास्रजित् ॥ ५६ ॥

अथ जीवनीयगणः ।

तस्य लक्षणं गुणांश्चाह—

अष्टवर्गः सयष्टीको जीवन्ती मुद्गपर्णिका ।
माषपर्णीगणोऽयं तु जीवनीय इति स्मृतः ॥ ५७ ॥
जीवनो मधुरश्चापि नाम्ना स परिकीर्त्तितः ।
जीवनीयगणः प्रोक्तः शुक्रकृद् बृंहणो हिमः ॥ ५८ ॥
गुरुर्गर्भप्रदः स्तन्य-कफकृत्पित्तरक्तहृत् ।
तृष्णां शोषं ज्वरं दाहं रक्तपित्तं व्यपोहति ॥ ५९ ॥

अथ शुक्लरक्तैरण्डौ ।

तयोर्नामानि गुणाँश्चाह—

शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्वहस्तकः ।
पञ्चांगुलो वर्द्धमानो दीर्घदण्डो व्यडम्बकः ॥ ६० ॥
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते ।
रक्तोऽपरो रुवूकः स्यादुरुवूको रुवुस्तथा ॥ ६१ ॥
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः ।
एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत् ॥ ६२ ॥
शूलशोथकटीवस्तिशिरःपीडोदरज्वरान् ।
ब्रध्नश्वासकफानाहकासकुष्ठाममारुतान् ॥ ६३ ॥

अथैरण्डपत्राग्रपत्रफलमज्जगुणानाह—

एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम् ।
मूत्रकृच्छ्रहरं चापि पित्तरक्तप्रकोपणम् ।
वातार्यग्रदलं गुल्मं वस्तिशूलहरं परम् ॥ ६४ ॥
कफवातक्रिमीन्हन्ति वृद्धिं सप्तविधामपि ।
एरण्डफलमत्युष्णं गुल्मशूलानिलापहम् ॥ ६५ ॥
यकृत्प्लीहोदराशोंघ्नं कटुकं दीपनं परम् ।
तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहः ॥ ६६ ॥

अथ शुक्लरक्तार्कौ [सफेद आक-लाल आक] ।

तयोर्नामानि गुणाँश्चाह—

श्वेतार्को गणरूपः स्यान्मन्दारो वसुकोऽपि च ।
श्वेतपुष्पः सदापुष्पः स चालर्कः प्रतापसः ॥ ६७ ॥
रक्तोऽपरोऽर्कनामा स्यादर्कपर्णो विकीरणः ।
रक्तपुष्पः शुक्लफलस्तथा स्फोतः प्रकीर्त्तितः ॥ ६८ ॥
अर्कद्वयं सरं वातकुष्ठकण्डूविषव्रणान् ।
निहन्ति प्लीहगुल्मार्शःश्लेष्मोदरशकृत्कृमीन् ॥ ६९ ॥

अथ शुक्लरक्तार्कयोः पुष्पगुणानाह—

अलर्ककुसुमं वृष्यं लघु दीपनपाचनम् ।
अरोचकप्रसेकार्शः कासश्वासनिवारणम् ॥ ७० ॥
रक्तार्कपुष्पं मधुरं सतिक्तं-
कुष्ठक्रिमिघ्नं कफनाशनञ्च ।
अर्शो विषं हन्ति च रक्तपित्तं-
संग्राहि गुल्मे श्वयथौ हितं तत् ॥ ७१ ॥

अथार्कदुग्धगुणानाह—

क्षीरमर्कस्य तिक्तोष्णं स्निग्धं सलवणं लघु ।
कुष्ठगुल्मोदरहरं श्रेष्ठमेतद्विरेचनम् ॥ ७२ ॥

अथ सेहुण्डः [सेहुण्ड, थूहर] ।

तस्य नामानि गुणाँश्चाह—

सेहुण्डः सिंहतुण्डः स्याद्वज्री वज्रद्रुमोऽपि च ।
सुधा समन्तदुग्धा च स्नुक् स्त्रियां स्यात्स्नुही गुडा ॥७३॥

सेहुण्डो रेचनस्तीक्ष्णो दीपनः कटुको गुरुः ।
शूलाष्ठीलिकाऽऽध्मानकफगुल्मोदरानिलान् ॥ ७४ ॥
उन्मादमोहकुष्ठार्शःशोथमेदोऽश्मपाण्डुताः ।
व्रणशोथज्वरप्लीहविषदूषीविषं हरेत् ॥ ७५ ॥

अथ स्नुहीदुग्धगुणानाह—

उष्णवीर्यं स्नुहीक्षीरं स्निग्धश्च कटुकं लघु ।
गुल्मिनां कुष्ठिनाञ्चापि तथैवोदररोगिणाम् ॥ ७६ ॥
हितमेतद्विरेकार्थे ये चान्ये दीर्घरोगिणः ॥ ७७ ॥

अथ सीहुण्डभेदः शातला ।

("शातला" अनेनैव नाम्ना प्रसिद्धा ।)

तस्या नामानि गुणाँश्चाह—

शातला सप्तला सारा विमला विदुला च सा ।
तथा निगदिता भूरिफेना चर्मकषेत्यपि ॥ ७८ ॥
शातला कटुका पाके वातला शीतला लघुः ॥ ७९ ॥

अथ कलिहारी ।

तस्या नामानि गुणाँश्चाह—

कलिहारी तु हलिनी लांगली शक्रपुष्प्यपि ।
विशल्याऽग्निशिखाऽनन्ता वह्निवक्त्रा च गर्भनुत् ।
कलिहारी सरा कुष्ठशोफार्शोव्रणशूलजित् ॥ ८० ॥
सक्षारा श्लेष्मजित्तिक्ता कटुका तुवराऽपि च ।
तीक्ष्णोष्णा कृमिहृल्लघ्वी पित्तला गर्भपातिनी ॥ ८१ ॥

अथ श्वेतरक्तकरवीरौ ।

तयोर्नामानि गुणाँश्चाह—

करवीरः श्वेतपुष्पः शतकुम्भोऽश्वमारकः ।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा ॥ ८२ ॥
करवीरद्वयं तिक्तं कषायं कटुकञ्च तत् ।
व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम् ॥ ८३ ॥
वीर्योष्णं कृमिकण्डूघ्नं भक्षितं विषवन्मतम् ॥ ८४ ॥

अथ धत्तूरः।

तस्य नामानि गुणाँश्चाह—

धत्तूरधूर्त्तधुस्तूरा उन्मत्तः कनकाह्वयः।
देवता कितवस्तूरी महामोही शिवप्रियः॥ ८५॥
मातुलो मदनश्चास्य फले मातुलपुत्रकः।
धत्तूरो मदवर्णाग्निवातकृज्ज्वरकुष्ठनुत्॥ ८६॥
कषायो मधुरस्तिक्तो यूकालिक्षाविनाशकः
उष्णो गुरुर्व्रणश्लेष्मकण्डूकृमिविषापहः॥ ८७॥

अथाटरूषः [अडूसा]।

तस्य नामानि गुणाँश्चाह—

वासको वासिका वासा भिषङ्माता च सिंहिका।
सिंहास्यो वाजिदन्ता स्यादाटरूषोऽटरूषकः॥ ८८॥
आटरूषो वृषस्ताम्रः सिंहपर्णश्च स स्मृतः।
वासको वातकृत्स्वर्यः कफपित्तास्रनाशनः॥ ८९॥
तिक्तस्तुवरको हृद्यो लघुशीतस्तृडर्त्तिहृत्।
श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापहः॥ ९०॥

अथ पर्पटः [पित्तपापडा]।

तस्य नामानि गुणाँश्चाह—

पर्पटो वरतिक्तश्च स्मृतः पर्पटकश्च सः।
कथितः पांशुपर्यायस्तथा कवचनामकः॥ ९१॥
पर्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान्।
संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः॥ ९२॥

अथ निम्बः।

तस्य नामानि गुणाँश्चाह—

निम्बः स्यात्पिचुमर्दश्च पिचुमन्दश्च तिक्तकः।
अरिष्टः पारिभद्रश्च हिंगुनिर्यास इत्यपि॥ ९३॥
निम्बः शीतो लघुर्ग्राही कटुपाकोऽग्निवातनुत्।
अहृद्यः श्रमतृट्कासज्वरारुचिकृमिप्रणुत्।
व्रणपित्तकफच्छर्दिकुष्ठहृल्लासमेहनुत्॥ ९४॥

अथ निम्बस्य पत्रफलयोर्गुणानाह—

निम्बपत्रं स्मृतं नेत्र्यं कृमिपित्तविषप्रणुत्।
वातलं कटुपाकञ्च सर्वारोचककुष्ठनुत् ॥ ९५ ॥
निम्बफलं रसे तिक्तं पाके तु कटुभेदनम्।
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःकृमिमेहनुत् ॥ ९६ ॥

अथ महानिम्बः (बकायन)।

तस्य नामानि गुणाँश्चाह—

महानिम्बः स्मृतो द्रेका रम्यको विषमुष्टिकः।
केशमुष्टिर्निम्बकश्च कार्मुको जीव इत्यपि ॥ ९७ ॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः ॥ ९८ ॥
कफपित्तभ्रमच्छर्दिकुष्ठहृल्लासरक्तजित्।
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः ॥ ९९ ॥

अथ पारिभद्रः (फरहद)।

तस्य नामानि तत्पत्रस्य च गुणाँश्चाह—

पारिभद्रो निम्बतरुर्मन्दारः पारिजातकः।
पारिभद्रोऽनिलश्लेष्मशोथमेदः कृमिप्रणुत्।
तत्पत्रं पित्तरोगघ्नं कर्णव्याधिविनाशनम् ॥ १०० ॥

अथ काञ्चनारः रक्तकाञ्चनारश्च (कचनार)।

तयोर्नामानि तत्पुष्पस्य च गुणाँश्चाह—

काञ्चनारः काञ्चनको गण्डारिः शोणपुष्पकः ॥ १०१ ॥
कोविदारश्च मरिकः कुद्दालो युगपत्रकः।
कुण्डली ताम्रपुष्पश्चाश्मन्तकः स्वल्पकेशरी ॥ १०२ ॥
काञ्चनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत्।
कृमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहः ॥ १०३ ॥
कोविदारोऽपि तद्वत्स्यात्तयोः पुष्पं लघु स्मृतम्।
रूक्षं संग्राहि पित्तास्रप्रदरक्षयकासनुत् ॥ १०४ ॥

अथ शोभाञ्जनः (सहिजना ।)

(श्यामः श्वेतो रक्तश्च ।)

तन्नामानि तद्गुणांश्चाह—

शोभाञ्जनः शिग्रुतीक्ष्णगन्धकाक्षावमोचकाः ।
तद्बीजं श्वेतमरिचं मधुशिग्रुः स लोहितः ॥
शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः ॥ १०५ ॥
दीपनो रोचनो रूक्षः क्षारस्तिक्तो विदाहकृत् ।
संग्राही शुक्रलो हृद्यः पित्तरक्तप्रकोपणः ॥ १०६ ॥
चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रिमीन् ।
मेदोऽपचीविषप्लीहगुल्मगण्डव्रणान्हरेत् ॥ १०७ ॥
श्वेतः प्रोक्तगुणो ज्ञेयो विशेषाद्दाहकृद्भवेत् ।
प्लीहानं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तहृत् ।
मधुशिग्रुः प्रोक्तगुणो विशेषाद्दीपनः सरः ॥ १०८ ॥

अथ शिग्रुवल्कलपत्रस्वरसगुणानाह—

शिग्रुवल्कलपत्राणां स्वरसः परमार्त्तिहृत् ॥ १०९

अथ शिग्रुबीजगुणानाह—

चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम् ।
अवृष्यं कफवातघ्नं तन्नस्येन शिरोऽर्त्तिनुत् ॥ ११० ॥

अथ श्वेतपुष्पा नीलपुष्पा चापराजिता । (कोयल)

तयोर्नामानि गुणांश्चाह—

आस्फोता गिरिकर्णी स्याद्विष्णुक्रान्ताऽपराजिता ।
अपराजिते कटू मेध्ये शीते कण्ठ्ये सुदृष्टिदे ॥ १११ ॥
कुष्ठमूत्रत्रिदोषामशोथव्रणविषापहे ।
कषाये कटुके पाके तिक्ते च स्मृतिबुद्धिदे ॥ ११२ ॥

अथ सिन्दुवारः मेउड़ी-सेन्दुवार इति च ।

(सम्हालू-नीलसम्हालू)

तयोर्नामानि गुणांश्चाह—

सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारकः ।
नीलपुष्पी तु निर्गुण्डी शेफाली सुवहा च सा ॥ ११३ ॥

सिन्दुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः ।
केश्यो नेत्रहितो हन्ति शूलशोथाममारुतान् ।
कृमिकुष्ठारुचिश्लेष्मज्वरान्नीलाऽपि तद्विधा ॥ ११४ ॥

अथ सिन्दुवारपत्रगुणानाह—

सिन्दुवारदलं जन्तुवातश्लेष्महरं लघु ॥ ११५ ॥

अथ कुटजः (कुडा-कोरैया)

तस्य नामगुणानाह—

कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ॥ ११६ ॥
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥ ११७ ॥
कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः ।
अर्शोऽतिसारपित्तास्रकफतृष्णाऽऽमकुष्ठनुत् ॥ ११८ ॥

अथ कण्टकञ्जकरघृतकरञ्जौ ।
(करञ्ज-करञ्जभेद) ।

तयोर्नामानि गुणश्चाह—

करञ्जो नक्तमालश्च करजश्चिरबिल्वकः ।
घृतपूर्णकरञ्जोऽन्यः प्रकीर्यः पूतिकोऽपि च ॥ ११९ ॥
स चोक्तः पूतिकरञ्जः सोमवल्कश्च स स्मृतः ।
करञ्जः कटुकस्तीक्ष्णो वीर्योष्णो योनिदोषहृत् ।
कुष्ठोदावर्त्तगुल्मार्शोव्रणक्रिमिकफापहः ॥ १२० ॥

अथ करञ्जपत्रफलगुणानाह—

तत्पत्रं कफवातार्शःकृमिशोथहरं परम् ।
भेदनं कटुकं पाके वीर्योष्णं पित्तलं लघु ॥ १२१ ॥
तत्फलं कफवातघ्नं मेहार्शःकृमिकुष्ठजित् ॥
घृतपूर्णकरञ्जोऽपि करञ्जसदृशो गुणैः ॥ १२२ ॥

अथ करंजी (अरारी) ।

तस्या नामगुणानाह—

उदकीर्यस्तृतीयोऽन्यः षड्ग्रन्था हस्तिवारुणी ।
मर्कटी वायसी चापि करञ्जी करभञ्जिका ॥ १२३ ॥

करञ्जी स्तम्भनी तिक्ता तुवरा कटुपाकिनी ।
वीर्योष्णा वमिपित्तार्शःकृमिकुष्ठप्रमेहजित् ॥ १२४ ॥

अथ गुञ्जा (श्वेता रक्ता च) ।

तयोर्नामगुणानाह—

श्वेता गुञ्जोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात्काकणन्ती च रक्तिका ॥ १२५ ॥
काकादनी काकपीलुः सा स्मृता काकवल्लरी ।
गुञ्जाद्वयन्तु केश्यं स्याद्वातपित्तज्वरापहम् ॥ १२६ ॥
मुखशोषश्रमश्वासतृष्णामदविनाशनम् ।
नेत्रामयहरं वृष्यं बल्यं कण्डूव्रणं हरेत् ॥ १२७ ॥
कृमीन्द्रलुप्तकुष्ठानि रक्ता च धवलाऽपि च ॥ १२८ ॥

अथ कपिकच्छूः (कोंच) ।

तस्या नामगुणानाह—

कपिकच्छूरात्मगुप्ता वृष्या प्रोक्ता च मर्कटी ।
अजडा कण्डुरा व्यङ्गा दुःस्पर्शा प्रावृषायणी ॥ १२९ ॥
लाङ्गली मूकशिम्बी च सैव प्रोक्ता महर्षिभिः ।
कपिकच्छूर्भृशं वृष्या मधुरा बृंहणी गुरुः ।
तिक्ता वातहरी बल्या कफपित्तास्रनाशिनी ॥ १३० ॥

अथ तद्बीजगुणानाह—

तद्बीजं वातशमनं स्मृतं वाजीकरं परम् ॥ १३१ ॥

अथ मांसरोहिणी ।

तस्या नामगुणानाह—

मांसरोहिण्यतिरुहा वृत्ता चर्मकरी वशा ।
प्रहारवल्ली विकशा वीरवत्यपि कथ्यते ॥
स्यान्मांसरोहिणी वृष्या सरा दोषत्रयापहा ॥ १३२ ॥

अथ चिल्हकः ("चिल्ह" इति लोके) ।

तस्य नामगुणानाह—

चिल्हको वातनिर्हारः श्लेष्मघ्नो धातुपुष्टिकृत् ।
आग्नेयो विषवद्यस्य फलं मत्स्यनिसूदनम् ॥ १३३ ॥

अथ टङ्कारी ।

तस्या गुणानाह—

टङ्कारी वातजित्तिक्ता श्लेष्मघ्नी दीपनी लघुः ।
शोथोदरव्यथाहन्त्री हिता पीठविसर्पिणाम् ॥ १३४ ॥

अथ वेतसः (वेत) ।

तस्य नामगुणानाह—

वेतसो नम्रकः प्रोक्तो वानीरो वञ्जुलस्तथा ।
अभ्रपुष्पश्च विदुलो रथः शीतश्च कीर्त्तितः ॥ १३५ ॥
वेतसः शीतलो दाहशोथार्शोयोनिरुक्प्रणुत् ।
हन्ति वीसर्पकृच्छ्रास्रपित्ताश्मरिकफानिलान् ॥ १३६ ॥

अथ जलवेतसः ।

तस्य नामगुणानाह –

निकुञ्चकः परिव्याधो नादेयो जलवेतसः ।
जलजो वेतसः शीतः कुष्ठहृद्वातकोपनः ॥ १३७ ॥

अथेज्जलः (समुद्र [शोष] फल) इति लोके ।

तस्य नामगुणानाह—

इज्जलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा ।
जलवेतसवद्वेद्यो हिज्जलोऽयं विषापहः ॥ १३८ ॥

अथाङ्कोटः (अंकोल-ढेरा) ।

तस्य नामगुणानाह—

अङ्कोटो दीर्घकीलः स्यादङ्कोलश्च निकोचकः ।
अङ्कोटकः कटुस्तीक्ष्णः स्निग्धोष्णस्तुवरो लघुः ॥ १३९ ॥
रेचनः कृमिशूलामशोफग्रहविषापहः ।
विसर्पकफपित्तास्रमूषकाहिविषापहः ॥ १४० ॥

अथाङ्कोटफलस्य गुणानाह—

तत्फलं शीतलं स्वादु श्लेष्मघ्नं बृंहणं गुरु ।
बल्यं विरेचनं वातपित्तदाहक्षयास्रजित् ॥ १४१ ॥

अथ बलाचतुष्टयम् (खिरैटी) ।

तस्य नामगुणानाह—

बला वाट्यालिका वाट्या सैव वाट्यालकाऽपि च ।

महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥ १४२ ॥
ततोऽन्याऽतिबला ऋष्यप्रोक्ता कङ्कतिका च सा ।
गांगेरुकी नागबला झषा ह्रस्वगवेधुका ॥ १४३ ॥
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं ग्राहिसमीरास्रपित्तास्रक्षतनाशनम् ॥ १४४ ॥
*बरियार, सहदेवो, ककहिया, गुलशकरी, इति बलाचतुष्टयम् १४४॥
बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम् ।
मूत्रातिसारं हरति दृष्टमेतन्न संशयः ॥ १४५ ॥
हरेन्महाबला कृच्छ्रं भवेद्वातानुलोमिनी ।
हन्यादतिबला मेहं पयसा सितया समम् ॥ १४६ ॥

अथ लक्ष्मणा ।

तस्या लक्षणगुणानाह—

पुत्रकाकाररक्ताल्पबिन्दुभिर्लाञ्छितच्छदा ॥ १४७ ॥
लक्ष्मणा पुत्रजननी बस्तगन्धाकृतिर्भवेत् ।
कथिता पुत्रदाऽवश्यं लक्ष्मणा मुनिपुङ्गवैः ॥ १४८ ॥

अथ स्वर्णवल्ली (सोनवेल) ।

तस्या नामगुणानाह—

स्वर्णवल्ली रक्तफला काकायुः काकवल्लरी ।
स्वर्णवल्ली शिरःपीडां त्रिदोषान्हन्ति दुग्धदा ॥ १४९ ॥

अथ कार्पासी (कपास)

तस्या नामगुणानाह—

कार्पासी तुण्डकेरी च समुद्रान्ता च कथ्यते ।
कार्पासकी लघुः कोष्णा मधुरा वातनाशिनी ॥ १५० ॥

अथ तत्पत्रबीजयोर्गुणानाह—

तत्पलाशं समीरघ्नं रक्तकृन्मूत्रवर्द्धनम् ।
तत्कर्णपिडकानादपूयास्रावविनाशनम् ॥ १५१ ॥
तद्बीजं स्तन्यदं वृष्यं स्निग्धं कफकरं गुरु ॥ १५२ ॥

अथ वंशः (वांस) ।

तस्य नामगुणानाह—

वंशस्त्वक्सारकर्मारत्वचिसारतृणध्वजाः ।

शतपर्वा यवफलो वेणुमस्करतेजनाः ॥ १५३ ॥
वंशः सरो हिमः स्वादुः कषायो वस्तिशोधनः ।
छेदनः कफपित्तघ्नः कुष्ठास्रव्रणशोथजित् ॥ १५४ ॥

अथ वंशस्य करीरयवयोर्गुणानाह—

तत्करीरः कटुः पाके रसे रूक्षो गुरुः सरः ।
कषायः कफकृत्स्वादुर्विदाही वातपित्तलः ॥ १५५ ॥
तद्यवास्तु सरा रूक्षाः कषायाः कटुपाकिनः ।
वातपित्तकरा उष्णा बद्धमूत्राः कफापहाः ॥ १५६ ॥

अथ नलः (नरसल) ।

तस्य नामगुणानाह—

नलः पोटगलः शून्यमध्यश्च धमनस्तथा ।
नलस्तु मधुरस्तिक्तः कषायः कफरक्तजित् ।
उष्णो हृद्बस्तियोन्यर्त्तिदाहपित्तविसर्पहृत ॥ १५७ ॥

अथ भद्रमुञ्जः (रामशर-सरपत इति वा) ।

मुञ्जश्च (मूंज) ।

तयोर्नामगुणानाह—

भद्रमुञ्जः शरो बाणस्तेजनश्चेक्षुवेष्टनः ॥ १५८ ॥
मुञ्जो मुञ्जातको वाणः स्थूलदर्भः सुमेखलः ।
मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा ॥ १५९ ॥
दाहतृष्णाविसर्पास्रमूत्रकृच्छ्राक्षिरोगजित् ।
दोषत्रयहरं वृष्यं मेखलासूपयुज्यते ॥ १६० ॥

अथ काशः ।

तस्य नामगुणानाह—

काशः काशेक्षुरुद्दिष्टः स स्यादिक्षुरसस्तथा ।
इक्षवालिकेक्षुगन्धा च तथा पोटगलः स्मृतः ॥ १६१ ॥
काशः स्यान्मधुरस्तिक्तः स्वादुपाको हिमः सरः ।
मूत्रकृच्छ्राश्मदाहास्रक्षयपित्तजरोगजित् ॥ १६२ ॥

अथ गुन्द्रः (पटेर-गोंदपटेर इति च) ।

तस्य नामगुणानाह—

गुन्द्रः पटेरको रुच्छः शृङ्गवेराभमूलकः ।

गुन्द्रः कषायो मधुरः शिशिरः पित्तरक्तजित् ।
स्तन्यशुक्ररजोमूत्रशोधनो मूत्रकृच्छ्रहृत् ॥ १६३ ॥

परका (मोथीतृणविशेषः) ।

तस्या नामगुणानाह—

परका गुन्द्रमूला च शिविर्गुन्द्रा शरीति च ।
परका शिशिरा वृष्या चक्षुष्या वातकोपिनी ।
मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशिनी ॥ १६४ ॥

अथ कुशः (कुशा) क्षुरपत्रश्च (डाभ) ।

तयोर्नामानि गुणाँश्चाह—

कुशो दर्भस्तथा वर्हिः सूच्यग्रो यज्ञभूषणः ।
ततोऽन्यो दीर्घपत्रः स्यात्क्षुरपत्रस्तथैव च ॥ १६५ ॥
दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक्प्रदरास्रजित् ॥ १६६ ॥

अथ कत्तृणम्
(रोहिस, सोधिआ इति च) ।

तस्य नामानि गुणाँश्चाह—

कत्तृणं रौहिषं देवजग्धं सौगन्धिकं तथा ।
भूतिकं ध्यामपौरञ्च श्यामकं धूमगन्धिकम् ॥ १६७ ॥
रौहिषं तुवरं तिक्तं कटुपाकं व्यपोहति ।
हृत्कण्ठव्याधिपित्तास्रशूलकासकफज्वरान् ॥ १६८ ॥

अथ भूतृणम् (शरवाण) ।

तस्य नामगुणानाह

गुह्यबीजं तु भूतीकं सुगन्धं जम्बुकप्रियम् ।
भूतृणं तु भवेच्छत्रा मालातृणकमित्यपि ॥ १६८ ॥
भूतृणं कटुकं तिक्तं तीक्ष्णोष्णं रेचनं लघु ॥ १७० ॥
विदाहि दीपनं रूक्षमनेत्र्यं मुखशोधनम् ।
अवृष्यं बहुविट्कञ्च पित्तरक्तप्रदूषणम् ॥ १७१ ॥

अथ नीलदूर्वा (हरी दूब) ।

तस्या नामानि गुणाँश्चाह—

नीलदूर्वा रुहाऽनन्ता भार्गवी शतपर्विका ।

शष्पं सहस्रवीर्या च शतवल्ली च कीर्त्तिता ॥ १७२ ॥
नीलदूर्वा हिमा तिक्ता मधुरा तुवरा हरेत् ।
कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान् ॥ १७३ ॥

अथ श्वेतदूर्वा ।

तस्या नामानि गुणाँश्चाह—

दूर्वा शुक्ला तु गोलोमी शतवीर्या च कथ्यते ।
श्वेता दूर्वा कषाया स्यात्स्वाद्वी व्रण्या च जीवनी ।
तिक्ता हिमा विसर्पास्रतृट्पित्तकफदाहहृत ॥ १७४ ॥

अथ गण्डदूर्वा (गांडरदूब) ।

तस्या नामगुणानाह—

गण्डदूर्वा तु गण्डाली मत्स्याक्षी शकुलाक्षकः ।
गण्डदूर्वा हिमा लोहद्राविणी ग्राहिणी लघुः ॥ १७५ ॥
तिक्ता कषाया मधुरा वातकृत्कटुपाकिनी ।
दाहतृष्णाबलासास्रकुष्ठपित्तज्वरापहा ॥ १७६ ॥

अथ वाराहीकन्दः ।

(क्षीरविदारी-गेठी इति लोके)

तस्य लक्षणनामगुणानाह—

वाराहीकन्दसंज्ञस्तु पश्चिमे गृष्टिसंज्ञकः ॥ १७७ ॥
वाराहीकन्द एवान्यैश्चर्मकारालुको मतः ।
अनूपसम्भवे देशे वराह इव लोमवान् ॥ १७८ ॥
विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता स्मृता ।
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी ॥ १७९ ॥
वाराहवदना गृष्टिर्वरदेत्यपि कथ्यते ।
विदारी मधुरा स्निग्धा बृंहणी स्तन्यशुक्रदा ॥ १८० ॥
शीता स्वर्या मूत्रला च जीवनी बलवर्णदा ।
गुरुः पित्तास्रपवनदाहान्हन्ति रसायनी ॥ १८१ ॥

अथ मुशलीकन्दः ।

तस्य लक्षणगुणानाह—

तालमूली तु विद्वद्भिर्मुशली परिकीर्त्तिता ।

मुशली मधुरा वृष्या वीर्योष्णा बृंहणी गुरुः ।
तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा ॥ १८२ ॥

अथ शतावरी महाशतावरी च ।

तयोर्नामानि गुणाँश्चाह—

शतावरी बहुसुता भीरुरिन्दीवरी वरी ।
नारायणी शतपदी शतवीर्या च पीवरी ॥ १८३ ॥
महाशतावरी चान्या शतमूल्यर्द्धकण्टिका ।
सहस्रवीर्या हेतुश्च ऋष्यप्रोक्ता महोदरी ॥ १८४ ॥
शतावरी गुरुः शीता तिक्ता स्वाद्वी रसायनी ॥ १८५ ॥
मेधाऽग्निपुष्टिदा स्निग्धा नेत्र्या गुल्मातिसारजित् ।
शुक्रस्तन्यकरी वल्या वातपित्तास्रशोथजित् ॥ १८६ ॥
महाशतावरी मेध्या हृद्या वृष्या रसायनी ।
शीतवीर्या निहन्त्यर्शोग्रहणीनयनामयान् ॥ १८७ ॥

अथाश्वगन्धा ।

तस्या नामगुणानाह—

गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया ।
वराहकर्णी वरदा बलदा कुष्ठगन्धिनी ॥ १८८ ॥
अश्वगन्धाऽनिलश्लेष्मश्वित्रशोथक्षयापहा ।
बल्या रसायनी तिक्ता कषायोष्णाऽतिशुक्रला ॥ १८९ ॥

अथ पाठा (पाढ) ।

तस्या नामानि गुणाँश्चाह—

पाठाऽम्बष्ठाऽम्बष्ठकी च प्राचीना पापचेलिका ।
एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥ १९० ॥
पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः ।
हन्ति शूलज्वरच्छर्दिकुष्ठातीसारहृद्रुजः ।
दाहकण्डूविषश्वासकृमिगुल्मगरव्रणान् ॥ १९१ ॥

अथ श्वेता त्रिवृत् (निसोत-श्वेतपनिलर)

तस्या नामगुणानाह—

श्वेता त्रिवृत्त्रिभण्डी स्यात् त्रिवृता त्रिपुटाऽपि च ।

सर्वानुभूतिः सरला निशोत्रा रेचनीति च ॥ १९२ ॥
श्वेता त्रिवृद्रेचनी स्यात्स्वादुरुष्णा समीरहृत् ।
रूक्षा पित्तज्वरश्लेष्मपित्तशोथोदरापहा ॥ १९३ ॥

अथ श्यामा त्रिवृत् (काला निशोत)।

तस्या नामानि गुणांश्चाह—

त्रिवृच्छ्यामाऽर्द्धचन्द्रा च पालिन्दी च सुषेणिका।
मसूरविदला काली कैषिका कालमेषिका ॥ १९४ ॥
श्यामा त्रिवृत्ततो हीनगुणा तीव्रविरेचिनी ।
मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षणकारिणी ॥ १९५ ॥

अथ लघुदन्ती बृहद्दन्ती च (एरण्डवत्पत्रविटपा)।

तयोर्नामानि गुणांश्चाह—

लघुदन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि ॥ १९६ ॥
तथैरण्डफला शीघ्रा श्येनघण्टा घुणप्रिया ।
वाराहाङ्गी च कथिता निकुम्भश्च मकूलकः ॥ १९७ ॥
द्रवन्ती सम्बरी चित्राप्रत्यक्पर्ण्याखुपर्ण्यपि ।
उपचित्रा श्रुतश्रेणी न्यग्रोधी च तथा वृषा ॥ १९८ ॥
दन्तीद्वयं सरं पाके रसे च कटु दीपनम् ।
गुदाङ्कुराश्मशूलार्शःकण्डूकुष्ठविदाहनुत् ।
तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रिमीन् ॥ १९९ ॥

अथ लघुदन्तीफलम् ।

तस्य गुणानाह—

क्षुद्रदन्तीफलं तु स्यान्मधुरं रसपाकयोः ।
शीतलं सृष्टविण्मूत्रं गरशोथकफापहम् ॥ २०० ॥

अथ जयपालः [जमालगोटा]।

तस्य नामानि गुणांश्चाह—

जयपालो दन्तिबीजं विख्यातं तिन्तिडीफलम् ।
जयपालो गुरुः स्निग्धो रेची पित्तकफापहः ॥ २०१ ॥

अथेन्द्रवारुणी महेन्द्रवारुणी च ।
(इन्द्रायण-बड़ी इन्द्रायण)
तयोर्नामगुणानाह—

ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादिनी ।
वारुणी च पराऽप्युक्ता सा विशाला महाफला ॥ २०२ ॥
श्वेतपुष्पा मृगाक्षी च मृगैर्वारु मृगादनी ।
गवादिनीद्वयं तिक्तं पाके कटु सरं लघु ॥ २०३ ॥
वीर्योष्णं कामलापित्तकफप्लीहोदरापहम् ॥ २०४ ॥
श्वासकासापहं कुष्ठगुल्मग्रन्थिव्रणप्रणुत् ।
प्रमेहमूढगर्भामगण्डामयविषापहम् ॥ २०५ ॥

अथ नीली [लील] ।
तस्या नामानि गुणाँश्चाह—

नीली तु नीलिनी तूणी काला दोला च नीलिका ।
रञ्जनी श्रीफली तुच्छा ग्रामीणा मधुपर्णिका ॥ २०६ ॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता ।
नीलिनी रेचनी तिक्ता केश्या मोहभ्रमापहा ॥ २०७ ॥
उष्णा हन्त्युदरप्लीहवातरक्तकफानिलान् ।
आमवातमुदावर्त्तं मदं च विषमुद्धतम् ॥ २०८ ॥

अथ शरपुङ्खः [सरफोंका] ।
तस्य नामलक्षणगुणानाह—

शरपुङ्खः प्लीहशत्रुर्नीलीवृक्षाकृतिश्च सः ।
शरपुङ्खो यकृत्प्लीहगुल्मव्रणविषापहः ।
तिक्तः कषायः कासास्रश्वासज्वरहरो लघुः ॥ २०९ ॥

अथ यवासो दुरालभा च ।
[जवासा-धमासा]
तयोर्नामानि गुणाँश्चाह—

यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ।
दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी ॥ २१० ॥
गान्धारी कच्छुराऽनन्ता कषाया हरिविग्रहा ।

यासः स्वादुः सरस्तिक्तस्तुवरः शीतलो लघुः ॥ २११ ॥
कफमेदोमदभ्रान्तिपित्तासृक्कुष्ठकासजित् ।
तृष्णाविसर्पवातास्रवमिज्वरहरः स्मृतः ॥ २१२ ॥
यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा ॥ २१३ ॥

अथ मुण्डी महामुण्डी च ।

तयोर्नामगुणानाह—

मुण्डी भिक्षुरपि प्रोक्ता श्रावणी च तपोधना ।
श्रवणाह्वा मुण्डतिका तथा श्रवणशीर्षका ॥ २१४ ॥
महाश्रावणिकाऽन्या तु सा स्मृता भूकदम्बिका ।
कदम्बपुष्पिका च स्यादव्यथाऽतितपस्विनी ॥ २१५ ॥
मुण्डतिका कटुः पाके वीर्योष्णा मधुरा लघुः ।
मेध्या गण्डापचीकृच्छ्रकृमियोन्यर्त्तिपाण्डुनुत ॥ २१६ ॥
श्लीपदारुच्यपस्मारप्लीहमेदोगुदार्तिहृत् ।
महामुण्डी च तत्तुल्या गुणैरुक्ता महर्षिभिः ॥ २१७ ॥

अथापामार्गः [चिरचिटा]।

तस्य नामानि गुणाँश्चाह—

अपामार्गस्तु शिखरी ह्यधःशल्यो मयूरकः ।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी ॥ २१८ ॥
अपामार्गः सरस्तीक्ष्णो दीपनस्तिक्तकः कटुः ।
पाचनो रोचनश्छर्दिकफमेदोऽनिलापहः ।
निहन्ति हृद्रुजाध्मानार्शःकण्डूशूलोदरापचीः ॥ २१९ ॥

अथ रक्तापामार्गः [लाल ओंगा] ।

तस्य नामगुणानाह—

रक्तोऽन्यो वशिरो वृत्तफलो धामार्गवोऽपि च ।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ॥ २२० ॥
अपामार्गोऽरुणो वातविष्टम्भी कफहृद्धिमः ।
रूक्षः पूर्वगुणैर्न्यूनः कथितो गुणवेदिभिः ॥ २२१ ॥

अथापामार्गफलगुणानाह—

अपामार्गफलं स्वादु रसे पाके च दुर्जरम् ।
विष्टम्भि वातलं रूक्षं रक्तपित्तप्रसादनम् ॥ २२२ ॥

अथ कोकिलाक्षः [तालमखाना] ।

तस्य नामानि गुणाँश्चाह—

कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः ।
भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुवालिका ॥ २२३ ॥
क्षुरकः शीतलो वृष्यः स्वाद्वम्लः पिच्छलस्तथा ।
तिक्तो वातामशोथाश्मतृष्णादृष्ट्यनिलास्रजित् ॥ २२४ ॥

अथास्थिसंहारः [हड़संहारी] ।

तस्य नामानि गुणांश्चाह—

ग्रन्थिमानस्थिसंहारी वज्राङ्गी वाऽस्थिशृङ्खला ।
अस्थिसंहारकः प्रोक्तो वातश्लेष्महरोऽस्थियुक् ॥ २२५ ॥
उष्णः सरः कृमिघ्नश्च दुर्नामघ्नोऽक्षिरोगजित् ।
रूक्षः स्वादुर्लघुर्वृष्यः पाचनः पित्तलः स्मृतः ॥ २२६ ॥

अथ तद्वटिकाया निर्माणविधिं गुणं चाह—

काण्डं त्वग्विरहितमस्थिशृङ्खलाया-माषार्द्धद्विदलमकञ्चुकं तदर्द्धम् ।
सम्पिष्टं तदनु ततस्तिलस्य तैले-संपक्वं वटकमतीव वातहारि ॥२२७॥

अथ कुमारी [घीकुआर] ।

तस्या नामगुणानाह—

कुमारी गृहकन्या च कन्या घृतकुमारिका ।
कुमारी भेदिनी शीता तिक्ता नेत्र्या रसायनी २२८ ॥
मधुरा बृंहणी बल्या वृष्या वातविषप्रणुत् ।
गुल्मप्लीहयकृद्वृद्धिकफज्वरहरी हरेत् ॥
ग्रन्थ्यग्निदग्धविस्फोटपित्तरक्तत्वगामयान् ॥ २२९ ॥

अथ श्वेतपुनर्नवा ।

तस्या नामानि गुणांश्चाह—

पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका ।
कटुः कषायानुरसा पाण्डुघ्नी दीपनी परा ।

शोफानिलगरश्लेष्महरी ब्रध्नोदरप्रणुत् ॥ २३० ॥

अथ रक्तपुष्पा पुनर्नवा ।

तस्या नामगुणानाह—

पुनर्नवाऽपरा रक्ता रक्तपुष्पा शिलाटिका ।
शोथघ्नी क्षुद्रवर्षाभूर्वर्षकेतुः कठिल्लकः ॥ २३१ ॥
पुनर्नवाऽरुणा तिक्ता कटुपाका हिमा लघुः ।
वातला ग्राहिणी श्लेष्मपित्तरक्तविनाशिनी ॥ २३२ ॥

अथ गन्धप्रसारणी (पसरन) ।

तस्या नामानि गुणाँश्चाह—

प्रसारणी राजबला भद्रपर्णी प्रतानिनी ।
सरणी सारणी भद्रा बला चापि कटम्भरा ॥ २३३ ॥
प्रसारणी गुरुर्वृष्या बलसन्धानकृत्सरा ।
वीर्योष्णा वातहृत्तिक्ता वातरक्तकफापहा ॥ २३४ ॥

अथ कृष्णशारिवा (करिआबांसा) ।

तस्या नामान्याह—

कृष्णा तु शारिवा श्यामा गोपी गोपवधूश्च सा ॥ २३५ ॥

*इयं जम्बूवत्पत्रा सुगन्धा 'कलघरिएटके'ति प्रसिद्धा । गोपी—गोपस्य स्त्री पुंयोगान्ङीप् ॥ २३५ ॥

अथ श्वेतशारिवा ।

तस्या नामान्याह—

धवला शारिवा गोपा गोपकन्या कृशोदरी ।
स्फोता श्यामा गोपवल्ली लताऽऽस्फोता च चन्दना ॥२३६॥

*इयमपि जम्बूवत्पत्रा दुग्धगर्भा व्रततिर्भवति । गोपा गां पातीति गोपा, गोपकन्या । श्यामापदेन कृष्णा श्वेताऽपि शारिवा कथ्यते, शाश्वतेन शारिवामात्रे शारिवापदस्य प्रयुक्तत्वात् । तद्यथा—
"शारिवायां निशि श्यामाश्यामौ च हरितासितौ" इति ॥२३६॥

अथ सारिवाद्वयस्य गुणानाह—

सारिवा युगलं स्वादु स्निग्धं शुक्रकरं गुरु ।
अग्निमान्द्यारुचिश्वासकासामविषनाशनम् ।

दोषत्रयास्रप्रदरज्वरातीसारनाशनम् ॥ २३७ ॥

अथ भृङ्गराजः (भाँगरा) ।

तस्य नामानि गुणाँश्चाह—

भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥ २३८ ॥
भृङ्गारः कटुकस्तीक्ष्णो रूक्षोष्णः कफवातनुत् ॥ २३९ ॥
केश्यस्त्वच्यः कृमिश्वासकासशोथामपाण्डुनुत् ।
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्तिनुत् ॥ २४० ॥

अथ शणपुष्पी (पटसन) ।

तस्या नामानि गुणाँश्चाह—

शणपुष्पी स्मृता घण्टा शणपुष्पसमाकृतिः ।
शणपुष्पी कटुस्तिक्ता वामिनी कफपित्तजित् ॥ २४१ ॥

अथ त्रायमाणा ।

तस्या नामानि गुणाँश्चाह—

बलभद्रा त्रायमाणा त्रायन्ती गिरिजाऽनुजा ।
त्रायन्ती तुवरा तिक्ता सरा पित्तकफापहा ।
ज्वरहृद्रोगगुल्मार्शोभ्रमशूलविषप्रणुत् ॥ २४२ ॥

अथ मूर्वा (चुरनहार) ।

तस्या नामानि गुणाँश्चाह—

मूर्वा मधुरसा देवी मोरटा तेजनी स्रुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥ २४३ ॥
मूर्वा सरा गुरुः स्वादुस्तिक्ता पित्तास्रमेहनुत् ।
त्रिदोषतृष्णाहृद्रोगकण्डूकुष्ठज्वरापहा ॥ २४४ ॥

अथ काकमाची (मकोय) ।

तस्या नामानि गुणाँश्चाह—

काकमाची ध्वांक्षमाची काकाह्वा चैव वायसी ।
काकमाची त्रिदोषघ्नी स्निग्धोष्णा स्वरशुक्रदा ॥ २४५ ॥
तिक्ता रसायनी शोथकुष्ठार्शोज्वरमेहजित् ।
कटुर्नेत्रहिता हिक्काच्छर्दिहृद्रोगनाशिनी ॥ २४६ ॥

अथ काकनासा (कौआठोडी) ।

तस्या नामगुणानाह—

काकनासा तु काकाङ्गी काकतुण्डफला च सा ॥ २४७ ॥
काकनासा कषायोष्णा कटुका रसपाकयोः ।
कफघ्नी वामनी तिक्ता शोथार्शःश्वित्रकुष्ठहृत् ॥ २४८ ॥

अथ काकजङ्घा "मसी"ति लोके ।

तस्या नामानि गुणाँश्चाह—

काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता ॥ २४६ ॥
काकजङ्घा हिमा तिक्ता कषाया कफपित्तजित् ।
निहन्ति ज्वरपित्तास्रज्वरकण्डूविषक्रिमीन् ॥ २५० ॥

अथ नागपुष्पी ।

तस्या नामानि गुणाँश्चाह—

नागपुष्पी श्वेतपुष्पा नागिनी रामदूतिका ।
नागिनी रोचनी तिक्ता तीक्ष्णोष्णा कफपित्तनुत् ।
विनिहन्ति विषं शूलं योनिदोषवमिक्रिमीन् ॥ २५१ ॥

अथ मेषशृङ्गी (मेढासिङ्गी) ।

तस्या नामानि तत्फलस्य च गुणाँश्चाह—

मेषशृङ्गी विषाणी स्यान्मेषवल्ल्यजशृङ्गिका ।
मेषशृङ्गी रसे तिक्ता वातला श्वासकासहृत् ॥ २५२ ॥
रूक्षा पाके कटुः पित्तव्रणश्लेष्माक्षिशूलनुत् ॥ २५३ ॥
मेषशृङ्गीफलं तिक्तं कुष्ठमेहकफप्रणुत ।
दीपनं स्रंसनं कासकृमिव्रणविषापहम् ॥ २५४ ॥

अथ हंसपदी (हंसराज) ।

तस्या नामानि गुणाँश्चाह—

हंसपादी हंसपदी कीटमाता त्रिपादिका ।
हंसपादी गुरुः शीता हन्ति रक्तविषव्रणान् ।
विसर्पदाहातीसारलूताभूताग्निरोहिणीः ॥ २५५ ॥

अथ सोमलता ।

तस्या नामगुणानाह—

सोमवल्ली सोमलता सोमक्षीरी द्विजप्रिया ।
सोमवल्ली त्रिदोषघ्नी कटुस्तिक्ता रसायनी ॥ २५६ ॥

अथाकाशवल्ली (अमरवेल) ।

तस्या नामानि गुणाँश्चाह—

आकाशवल्ली तु बुधैः कथिताऽमरवल्लरी ॥ २५७ ॥
खवल्ली ग्राहिणी तिक्ता पिच्छिलाऽक्ष्यामयापहा ।
तुवराऽग्निकरी हृद्या पित्तश्लेष्मामनाशिनी ॥ २५८ ॥

अथ पातालगरुडी ।

तस्या नामगुणानाह—

छिलिहिण्टो महामूलः पातालगरुडाह्वयः ।
छिलिहिण्टः परं वृष्यः कफघ्नः पवनापहः ॥ २५९ ॥

अथ वन्दा ।

तस्या नामानि गुणाँश्चाह—

वन्दा वृक्षादनी वृक्षभक्ष्या वृक्षरुहाऽपि च ।
वन्दाकः स्याद्धिमस्तिक्तः कषायो मधुरो रसे ।
मङ्गल्यः कफवातास्ररक्षोव्रणविषापहः ॥ २६० ॥

अथ वटपत्री ।

तस्या नामगुणानाह—

वटपत्री तु कथिता मोहिन्यैरावती बुधैः ।
वटपत्री कषायोष्णा योनिमूत्रगदापहा ॥ २६१ ॥

अथ हिङ्गुपत्री ।

तस्या नामानि गुणाँश्चाह—

हिङ्गुपत्री तु कवरी पृथ्वीका पृथुका पृथुः ॥ २६२ ॥
हिङ्गुपत्री भवेद्रुच्या तीक्ष्णोष्णा पाचनी कटुः ।
हृद्वस्तिरुग्विबन्धार्शःश्लेष्मगुल्मानिलापहा ॥ २६३ ॥

अथ वंशपत्री ।

तस्या नामानि गुणाँश्चाह—

वंशपत्री वेणुपत्री पिण्डा हिङ्गुशिवाटिका ।

हिङ्गुपत्रीगुणा विज्ञैर्वंशपत्री च कीर्त्तिता ॥ २६४ ॥

अथ मत्स्याक्षी (मछेछी) इति लोके ।

तस्या नामानि गुणाँश्चाह—

मत्स्याक्षी वाह्लिका मत्स्यगन्धा मत्स्यादनीति च ।
मत्स्याक्षी ग्राहिणी शीता कुष्ठपित्तकफास्रजित् ।
लघुस्तिक्ता कषाया च स्वाद्वी कटुविपाकिनी ॥ २६५ ॥

अथ सर्पाक्षी ("सरहटी-गरुडनी"ति च) ।

तस्या नामानि गुणांश्चाह—

सर्पाक्षी स्यात्तु गरुडाली तथा नाडीकपालकः ॥ २६६ ॥
सर्पाक्षी कटुका तिक्ता सोष्णा कृमिनिकृन्तनी ।
वृश्चिकोन्दुरसर्पाणां विषघ्नी व्रणरोपिणी ॥ २६७ ॥

अथ शङ्खपुष्पी ।

तस्या नामानि गुणाँश्चाह—

शङ्खपुष्पी तु शङ्खाह्वा मङ्गल्यकुसुमाऽपि च ।
शङ्खपुष्पी सरा मेध्या वृष्या मानसरोगहृत् ॥ २६८ ॥
रसायनी कषायोष्णा स्मृतिकान्तिवलाग्निदा ।
दोषापस्मारभूताश्रीकुष्ठक्रिमिविषप्रणुत् ॥ २६९ ॥

अथार्कपुष्पी ।

तस्या नामगुणानाह—

अर्कपुष्पी क्रूरकर्मा पयस्या जलकामुका ।
अर्कपुष्पी कृमिश्लेष्ममेहपित्तविकारजित् ॥ २७० ॥

अथ लज्जालुः ।

तस्या नामानि गुणांश्चाह—

लज्जालुः स्याच्छमीपत्रा समङ्गा जलकारिका ।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि ॥ २७१ ॥
लज्जालुः शीतला तिक्ता कषाया कफपित्तजित् ।
रक्तपित्तमतीसारं योनिरोगान् विनाशयेत् ॥ २७२ ॥

अथालम्बुषा (लज्जालुभेदः) ।

तस्या नामगुणानाह—

अलम्बुषा खरत्वक् च तथा मेदोगला स्मृता ।

अलम्बुषा लघुः स्वादुः कृमिपित्तकफापहा ॥ २७३ ॥

अथ दुग्धिका (दुद्धी) ।

तस्या नामानि गुणांश्चाह—

दुग्धिका स्वादुपर्णी स्यात्क्षीरा विक्षीरिणी तथा ।
दुग्धिकोष्णा गुरू रूक्षा वातला गर्भकारिणी ॥ २७४ ॥
स्वादुक्षीरा कटुस्तिक्ता सृष्टमूत्रमलापहा ।
स्वादुर्विष्टम्भिनो वृष्या कफकुष्ठक्रिमिप्रणुत् ॥ २७५ ॥

अथ भूम्यामलकी (भुँइआमला) ।

तस्या नामगुणानाह—

भूम्यामलकिका प्रोक्ता शिवा तामलकीति च ।
बहुपत्रा बहुफला बहुवीर्या जटाऽपि च ॥ २७६ ॥
भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा ।
पिपासाकासपित्तास्रकफकण्डूक्षतापहा ॥ २७७ ॥

अथ ब्राह्मी ब्रह्ममाण्डूकी च ।
(बरंभी-मण्डूकपर्णिनी च) ।

तयोर्नामानि गुणांश्चाह—

ब्राह्मी कपोतवङ्का च सोमवल्ली सरस्वती ।
मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौषधी ॥ २७८ ॥
ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या च शीतला ।
कषाया मधुरा स्वादुपाकाऽऽयुष्या रसायनी ॥ २७९ ॥
स्वर्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित् ।
विषशोथज्वरहरी तद्वन्मण्डूकपर्णिनी ॥ २८० ॥

अथ द्रोणा (गूमा) ।

तस्या नामगुणानाह—

द्रोणा च द्रोणपुष्पी च फलेपुष्पा च कीर्त्तिता ।
द्रोणपुष्पी गुरुः स्वादू रूक्षोष्णा वातपित्तकृत् ॥ २८१ ॥
सतीक्ष्णलवणा स्वादुपाका कट्वी च भेदिनी ।
कफामकामलाशोथतमकश्वासजन्तुजित् ॥ २८२ ॥

अथ सुवर्चला (हुरहुर-द्वितीय हुरहुर) ।

तयोर्नामगुणानाह—

सुवर्चला सूर्यभक्ता वरदा बदराऽपि च ।
सूर्यावर्त्ता रविप्रीताऽपरा ब्रह्मसुदुर्लभा ॥ २८३ ॥
सुवर्चला हिमा रूक्षा स्वादुपाका सरा गुरुः ।
अपित्तला कटुः क्षारा विष्टम्भकफवातजित् ॥ २८४ ॥
अन्या तिक्ता कषायोष्णा सरा रूक्षा लघुः कटुः ।
निहन्ति कफपित्तास्रश्वासकासारुचिज्वरान् ।
विस्फोटकुष्ठमेहास्रयोनिरुक्कृमिपाण्डुताः ॥ २८५ ॥

अथ वन्ध्याकर्कोटकी (वनककोडा) ।

तस्या नामानि गुणाँश्चाह—

वन्ध्याकर्कोटकी देवी कन्या योगीश्वरीति च ।
नागारिर्नक्रदमनी विषकण्टकिनी तथा ॥ २८६ ॥
वन्ध्याकर्कोटकी लघ्वी कफनुद् व्रणशोधिनी ।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ॥ २८७ ॥

अथ मार्कण्डिका (भूइँखखसा) ।

वल्ली भूमिप्रसरणशीला ।

तस्या नामगुणानाह—

मार्कण्डिका भूमिवल्ली मार्कण्डी मृदुरेचनी ॥ २८८ ॥
मार्कण्डिका कुष्ठहरी ऊर्द्ध्वाधःकायशोधिनी ।
विषदुर्गन्धकासघ्नी गुल्मोदरविनाशिनी ॥ २८९ ॥

अथ देवदाली पीतदेवदाली च ।

(घघरवेल-सोनैआ) खखसावत्फलव्रततिः ।

तयोर्नामानि गुणाँश्चाह—

देवदाली तु वेणी स्यात्कर्कटी च गरागरी ।
देवताडो वृत्तकोशस्तथा जीमूत इत्यपि ॥ २९० ॥
पीता परा खरस्पर्शा विषघ्नी गरनाशिनी ।
देवदाली रसे तिक्ता कफार्शःशोफपाण्डुताः ।
नाशयेद्वामनी तीक्ष्णा क्षयहिक्काकृमिज्वरान् ॥ २९१ ॥

अथ तत्फलगुणानाह—

देवदालीफलं तिक्तं कृमिश्लेष्मविनाशनम् ।
स्रंसनं गुल्मशूलघ्नमर्शोघ्नं वातजित्परम् ॥ २६२ ॥

अथ जलपिप्पली (पनिसगा) इति लोके ।

तस्या नामानि गुणाँश्चाह—

जलपिप्पल्यभिहिता शारदी शकुलादनी ।
मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता ॥ २९३ ॥
जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः ॥ २९४ ॥
संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा ।
कटुपाकरसा रुच्या कषाया वह्निवर्द्धिनी ॥ २९५ ॥

अथ गोजिह्वा (गोभी) ।

तस्या नामानि गुणांश्चाह—

गोजिह्वा गोजिका गोभी दार्विका खरपर्णिनी ।
गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत् ॥ २९६ ॥
हृद्या प्रमेहकासास्रव्रणज्वरहरी लघुः ।
कोमला तुवरा तिक्ता स्वादुपाकरसा स्मृता ॥ २९७ ॥

अथ नागदमनी (नागदौन) ।

तस्या नामगुणानाह—

विज्ञेया नागदमनी बलामोटा विषापहा ।
नागपुष्पी नागपत्रा महायोगेश्वरीति च ॥ २९८ ॥
बलामोटा कटुस्तिक्ता लघुः पित्तकफापहा
मूत्रकृच्छ्रव्रणान् रक्षो नाशयेज्जालगर्दभम् ॥ २९९ ॥
सर्वग्रहप्रशमनी निःशेषविषनाशिनी ।
जयं सर्वत्र कुरुते धनदा सुमतिप्रदा ॥ ३०० ॥

अथ वीरतरुः (वरवेल) ।

तस्य नामानि गुणाँश्चाह—

वेल्लन्तरो जगति वीरतरुः प्रसिद्धः—
श्वेतासितारुणविलोहितनीलपुष्पः ।
स्याज्जातितुल्यकुसुमः शमिसूक्ष्मपत्रः—

स्यात्कण्टकी विजलदेशज एष वृक्षः ॥ ३०१ ॥
वेल्लन्तरो रसे पाके तिक्तस्तृष्णाकफापहः ।
मूत्राघाताश्मजिद् ग्राही योनिमूत्रानिलार्त्तिजित् ॥ ३०२ ॥

अथ छिक्कनी (नकछिकनी) ।

तस्या नामगुणानाह—

छिक्कनी क्षवकृत्तीक्ष्णा छिक्किका घ्राणदुःखदा ।
छिक्कनी कटुका रुच्या तीक्ष्णोष्णा वह्निपित्तकृत् ।
वातरक्तहरी कुष्ठक्रिमिवातकफापहा ॥ ३०३ ॥

अथ कुकुन्दरः (कुकुरवँदा) ।

तस्य नामानि गुणाँश्चाह—

कुकुन्दरस्ताम्रचूडः सूक्ष्मपत्रो मृदुच्छदः ॥ ३०४ ॥
कुकुन्दरः कटुस्तिक्तो ज्वररक्तकफापहः ।
तन्मूलमार्द्रं निक्षिप्तं वदने मुखशोषहृत् ॥ ३०५ ॥

अथ सुदर्शना ।

तस्या नामगुणानाह—

सुदर्शना सोमवल्ली चक्राह्वा मधुपर्णिका ।
सुदर्शना स्वादुरुष्णा कफशोफास्रवातजित् ॥ ३०६ ॥

अथाखुकर्णी (मूसाकर्णी) ।

तस्या नामानि गुणाँश्चाह—

आखुकर्णी त्वाखुपर्णी पर्णिका भूदरीभवा ।
आखुकर्णी कटुस्तिक्ता कषाया शीतला लघुः ।
विपाके कटुका मूत्रकफामयक्रमिप्रणुत् ॥ ३०७ ॥

अथ मयूरशिखा (मोरसिखा) ।

तस्या नामगुणानाह—

मयूराह्वशिखा प्रोक्ता सहस्राहिर्मधुच्छदा ।
नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित् ॥ ३०८ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे चतुर्थो गुडूच्यादिवर्गः समाप्तः ॥ ४ ॥

अथ पञ्चमः पुष्पवर्गः ५ ।

तत्रादौ कमलम् ।

तस्य नामानि गुणाँश्चाह—

वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥ १ ॥
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
विसप्रसूनराजीवपुष्कराम्भोरुहाणि च ॥ २ ॥
कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् ।
तृष्णादाहास्रविस्फोटविषवीसर्पनाशनम् ॥ ३ ॥

अथ नामोल्लेखपूर्वकं कमलभेदाँस्तद्गुणाँश्चाह—

विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम् ।
रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम् ॥ ४ ॥
धवलं कमलं शीतं मधुरं कफपित्तजित् ।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम् ॥ ५ ॥

अथ पद्मिनी ।

तस्या नामानि गुणाँश्चाह—

मूलनालदलोत्फुल्लफलैः समुदिता पुनः ।
पद्मिनी प्रोच्यते प्राज्ञैर्विसिन्यादि च सा स्मृता ॥ ६ ॥
*आदिशब्दान्नलिनी कमलिनीत्यादि ॥ ६ ॥
पद्मिनी शीतला गुर्वी मधुरा लवणा च सा ।
पित्तासृक्कफनुद्रूक्षा वातविष्टम्भकारिणी ॥ ७ ॥

अथ नवपत्रादि ।

तस्य नामानि गुणाँश्चाह—

संवर्त्तिका नवदलं वीजकोशस्तु कर्णिका ।
किञ्जल्कः केसरः प्रोक्तो मकरन्दो रसः स्मृतः ।
पद्मनालं मृणालं स्यात्तथा विसमिति स्मृतम् ॥ ८ ॥

अथ संवर्त्तिका (नये पत्ते) ।

तस्या गुणानाह—

संवर्त्तिका हिमा तिक्ता कषाया दाहतृट्प्रणुत् ।

मूत्रकृच्छ्रगुदव्याधिरक्तपित्तविनाशिनी ॥ ९ ॥

अथ कर्णिका ।

तस्या गुणानाह—

पद्मस्य कर्णिका तिक्ता कषाया मधुरा हिमा ।
मुखवैशद्यकृल्लघ्वी तृष्णाऽस्रकफपित्तनुत् ॥ १० ॥

अथ किञ्जल्कः (केशर) ।

तस्य गुणानाह—

किञ्जल्कः शीतलो वृष्यः कषायो ग्राहकोऽपि सः ।
कफपित्ततृषादाहरक्तार्शोविषशोथजित् ॥ ११ ॥

अथ मृणालं शालूकञ्च ।

तयोर्गुणानाह—

मृणालं शीतलं वृष्यं पित्तदाहास्रजिद् गुरु ॥ १२ ॥
दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम् ।
संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणम् ॥ १३ ॥

अथ स्थलकमलम् ।

तस्य नामगुणानाह—

पद्मचारिण्यतिचराऽव्यथा पद्मा च शारदा ।
पद्माऽनुष्णा कटुस्तिक्ता कषाया कफवातजित् ।
मूत्रकृच्छ्राश्मशूलघ्नी श्वासकासविषापहा ॥ १४ ॥

अथ कुमुदम् "कमोदनी" इति लोके ।

तस्य नामानि गुणांश्चाह—

श्वेतं कुवलयं प्रोक्तं कुमुदं कैरवं तथा ।
कुमुदं पिच्छिलं स्निग्धं मधुरं ह्लादि शीतलम् ॥ १५ ॥

अथ कुमुदिनी ।

तस्या नामगुणानाह—

कुमुद्वती कैरविका तथा कुमुदिनीति च ॥ १६ ॥
सा तु मूलादिसर्वाङ्गैरुक्ता समुदिता बुधैः ।
पद्मिन्या ये गुणाः प्रोक्ता कुमुदिन्याश्च ते स्मृताः ॥ १७ ॥

अथ कल्हारम् ।

तन्नामगुणानाह—

सौगन्धिकं तु कल्हारं हल्लकं रक्तसन्ध्यकम् ।
कल्हारं शीतलं ग्राहि विष्टम्भि गुरु रूक्षणम् ॥ १८ ॥

अथ वारिपर्णी शैवालश्च (जलकुम्भी-सिवार) ।

तयोर्नामानि गुणाँश्चाह—

वारिपर्णी कुम्भिका स्याच्छैवालं शैवलश्च तत् ।
वारिपर्णी हिमा तिक्ता लघ्वी स्वाद्वी सरा कटुः ॥१९॥
दोषत्रयहरी रूक्षा शोणितज्वरशोषकृत् ।
शैवालं तुवरं तिक्तं मधुरं शीतलं लघु ।
स्निग्धं दाहतृषापित्तरक्तज्वरहरं परम् ॥ २० ॥

अथ शतपत्री [सेवती गुलाब] ।

तस्या नामानि गुणांश्चाह—

शतपत्री तरुण्युक्ता कर्णिका चारुकेशरा ।
महाकुमारी गन्धाढ्या लाक्षापुष्पाऽतिमञ्जुला ॥२१॥
शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघुः ।
दोषत्रयास्रजिद्वर्ण्या कट्वी तिक्ता च पाचनी ॥ २२ ॥

अथ वासंती (नेवारी)

तस्या नामानि गुणाँश्चाह—

नेपाली कथिता तज्ज्ञैः सप्तला नवमालिका ।
वासन्ती शीतला लघ्वी तिक्ता दोषत्रयास्रजित् ॥२३॥

अथ वार्षिकी (वेला)

तस्या नामानि गुणाँश्चाह—

श्रीपदी षट्पदानन्दा वार्षिकी मुक्तबन्धना ॥२४॥
वार्षकी शीतला लघ्वी तिक्ता दोषत्रयापहा ।
कर्णाक्षिमुखरोगघ्नी तत्तैलं तद्गुणं स्मृतम् ॥ २५ ॥

अथ मालती स्वर्णजाती च(जाई-पीलीजाई)

तयोर्नामानि गुणाँश्चाह—

जातिर्जाती च सुमना मालती राजपुत्रिका ।

चेतिका हृद्यगन्धा च सा पीता स्वर्णजातिका ॥२६॥
जातीयुगं तिक्तमुष्णं तुवरं लघु दोषजित् ।
शिरोऽक्षिमुखदन्तार्त्तिविषकुष्ठानिलास्रजित् ॥२७॥

अथ यूथिका पीतयूथिका च (जूही-सुवर्णजूही) ।

तयोर्नामानि गुणाँश्चाह—

यूथिका गणिकाऽम्बष्ठा सा पीता हेमपुष्पिका ।
यूथीयुगं हिमं तिक्तं कटु पाकरसं लघु ॥ २८ ॥
मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम् ।
व्रणास्रमुखदन्ताक्षिशिरोरोगविषापहम् ॥ २९ ॥

अथ चम्पकः (चम्पा) ।

तस्य नामगुणानाह—

चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः ।
एतस्य कलिका गन्धफलीति कथिता बुधैः ॥ ३० ॥
चम्पकः कटुकस्तिक्तः कषायो मधुरो हिमः ।
विषक्रिमिहरः कृच्छ्रकफवातास्रपित्तजित् ॥ ३१ ॥

अथ बकुलः (मौलसरी) इति लोके ।

तस्य नामानि गुणाँश्चाह—

बकुलो मधुगन्धश्च सिंहकेसरकस्तथा ।
बकुलस्तुवरोऽनुष्णः कटुपाकरसो गुरुः ॥
कफपित्तविषश्वित्रक्रिमिदन्तगदापहः ॥ ३२ ॥

अथ बृहद्बकुलः (बड़ी मौलसिरी) ।

तस्य नामगुणानाह—

शिवमल्ली पाशुपत एकाष्ठीलो वको वसुः ॥ ३३ ॥
वकोऽनुष्णः कटुस्तिक्तः कफपित्तविषापहः ।
योनिशूलतृषादाहकुष्ठशोथास्रनाशनः ॥ ३४ ॥

अथ कदम्बः ।

तस्य नामानि गुणांश्चाह—

कदम्बः प्रियको नीपो वृत्तपुष्पो हलिप्रियः ।
कदम्बो मधुरः शीतः कषायो लवणो गुरुः ॥

सरो विष्टम्भकृद्रूक्षः कफस्तन्यानिलप्रदः ॥ ३५ ॥

अथ कुब्जकः (कूजा)।

तस्य नामानि गुणाँश्चाह—

कुब्जको भद्रतरुणो वृत्तपुष्पोऽतिकेसरः।
महासहा कण्टकाढ्या नीलाऽलिकुलसंकुला ॥ ३६ ॥
कुब्जकः सुरभिः स्वादुः कषायानुरसः सरः।
त्रिदोषशमनो वृष्यः शीतहर्त्ता च स स्मृतः ॥ ३७ ॥

अथ मल्लिका।

तस्या नामानि गुणाँश्चाह—

मल्लिका मदयन्ती च शीतभीरुश्च भूपदी ॥ ३८ ॥
मल्लिकोष्णा लघुर्वृष्या तिक्ता च कटुका हरेत्।
वातपित्तास्यदृग्व्याधिकुष्ठारुचिविषव्रणान् ॥ ३९ ॥

अथ माधवी (वासन्ती)।

तस्या नामानि गुणाँश्चाह—

माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥
माधवी मधुरा शीता लघ्वी दोषत्रयापहा ॥ ४० ॥

अथ केतकः सुवर्णकेतकी च (केवडा)।

तयोर्नामानि गुणाँश्चाह—

केतकः सूचिकापुष्पो जम्बुकः क्रकचच्छदः।
सुवर्णकेतकी त्वन्या लघुपुष्पा सुगन्धिनी ॥ ४१ ॥
केतकः कटुकः स्वादुर्लघुस्तिक्तः कफापहः।
उष्णा तिक्तरसा ज्ञेया चक्षुष्या हेमकेतकी ॥ ४२ ॥

अथ किङ्किरातः (गौडादौ प्रसिद्धः)।

तस्य नामानि गुणाँश्चाह—

किङ्किरातो हेमगौरः पीतकः पीतभद्रकः ॥ ४३ ॥
किङ्किरातो हिमस्तिक्तः कषायश्च हरेदसौ।
कफपित्तपिपासाऽस्रदाहशोषवमिक्रिमीन् ॥ ४४ ॥

अथ कर्णिकारः ।
("पांगारा" इति महाराष्ट्रे प्रसिद्धः ।)
तस्य नामानि गुणाँश्चाह—

कर्णिकारः परिव्याधः पादपोत्पल इत्यपि ॥
कर्णिकारः कटुस्तिक्तस्तुवरः शोधनो लघुः ।
रञ्जनः सुखदः शोथश्लेष्मास्रव्रणकुष्ठजित् ॥ ४५ ॥

अथाशोकः (असोगि) ।
तस्य नामानि गुणाँश्चाह—

अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥ ४६ ॥
अशोकः शीतलस्तिक्तो ग्राही वर्ण्यः कषायकः ।
दोषापचीतृषादाहकृमिशोषविषास्रजित् ॥ ४७ ॥

अथाम्लाटनः (बाणपुष्प इति गौडादौ प्रसिद्धः)
तस्य नामानि गुणाँश्चाह—

अम्लातोऽम्लाटनः प्रोक्तस्तथाऽम्लातक इत्यपि ॥ ४८ ॥
कुरण्टको वर्णपुष्पः स एवोक्तो महासहः ।
अम्लाटनः कषायोष्णः स्निग्धः स्वादुश्च तिक्तकः ॥४९॥

अथ सैरेयकः (कटसरैया) ।
तस्य नामानि भेदान् गुणाँश्चाह—

सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।
सहाचरः सहचरः स च भिन्ट्यपि कथ्यते ॥ ५० ॥
कुरण्टकोऽत्र पीते स्याद्रक्ते कुरबकः स्मृतः ।
नीले बाणा द्वयोरुक्तो दासी आर्त्तगलश्च सः ॥ ५१ ॥
सैरेयः कुष्ठवातास्रकफकण्डूविषापहः ।
तिक्तोष्णो मधुरोऽनम्लः सुस्निग्धः केशरञ्जनः ॥ ५२ ॥

अथ कुन्दम् ।
तस्य नामानि गुणाँश्चाह—

कुन्दं तु कथितं माध्यं सदापुष्पश्च तत्स्मृतम् ।
कुन्दं शीतं लघु श्लेष्मशिरोरुग्विषपित्तहृत् ॥ ५३ ॥

अथ मुचुकुन्दः । (नाम्नैव प्रसिद्धः) ।

तस्य नामानि गुणाँश्चाह—

मुचुकुन्दः क्षत्रवृक्षश्चित्रकः प्रतिविष्णुकः ॥
मुचुकुन्दः शिरःपीडापित्तास्रविषनाशनः ॥ ५४ ॥

अथ तिलकः ।

तिलाभपुष्पस्तिलकनाम्नैव प्रसिद्धः ।

तस्य नामानि गुणाँश्चाह—

तिलकः क्षुरकः श्रीमान्पुरुषश्छिन्नपुष्पकः ॥
तिलकः कटुकः पाके रसे चोष्णो रसायनः ॥
कफकुष्ठक्रिमीन्वस्तिमुखदन्तगदान्हरेत् ॥ ५५ ॥

अथ बन्धुजीवः (गेजुनिया) ।

तस्य नामानि गुणाँश्चाह—

बन्धूको बन्धुजीवश्च रक्तो माध्याह्निकोऽपि च ।
बन्धूकः कफकृद्ग्राही वातपित्तहरो लघुः ॥ ५६ ॥

अथ जपापुष्पम् (गुडहर, अढ़ौल) ।

तस्य नामानि गुणाँश्चाह—

ओड्रपुष्पं जपा चाथ त्रिसन्ध्या साऽरुणा सिता ।
जपा संग्राहिणी केश्या त्रिसन्ध्या कफवातजित् ॥ ५७ ॥

अथ सिन्दूरी (सेन्दुरिया) ।

तस्या नामानि गुणाँश्चाह—

सिन्दूरी रक्तबीजा च रक्तपुष्पा सुकोमला ।
सिन्दूरी विषपित्तास्रतृष्णावान्तिहरी हिमा ॥ ५८ ॥

अथ मुनिवृक्षः (अगस्तिया) ।

तस्य नामानि गुणाँश्चाह—

अथागस्त्यो वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ॥ ५९ ॥
अगस्तिः पित्तकफजिच्चातुर्थिकहरो हिमः ।
रूक्षो वातकरस्तिक्तः प्रतिश्यायनिवारणः ॥ ६० ॥

अथ तुलसी शुक्ला कृष्णा च ।

तयोर्नामगुणानाह—

तुलसी सुरसा ग्राम्या सुलभा बहुमञ्जरी ।

अपेतराक्षसी गौरी भूतघ्नी देवदुन्दुभिः ॥ ६१ ॥
तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत् ।
दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित् ।
शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्त्तिता ॥ ६२ ॥

अथ मरुबकः (मरुवा) ।

तस्य नामानि गुणांश्चाह—

मारुतोऽसौ मरुबको मरुन्मरुरपि स्मृतः ।
फणी फणिज्जकश्चापि प्रस्थपुष्पः समीरणः ॥ ६३ ॥
मरुदग्निप्रदो हृद्य तीक्ष्णोष्णः पित्तलो लघुः ॥ ६४ ॥
वृश्चिकादिविषश्लेष्मवातकुष्ठक्रिमिप्रणुत् ।
कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः ॥ ६५ ॥

अथ दमनकः (दवना) ।

तस्य नामानि गुणांश्चाह—

उक्तो दमनको दान्तो मुनिपुत्रस्तपोधनः ।
गन्धोत्कटो ब्रह्मजटो विनीतः कलपत्रकः ॥ ६६ ॥
दमनस्तुवरस्तिक्तो हृद्यो वृष्यः सुगन्धिकः ।
ग्रहणीद्विषकुष्ठास्रक्लेदकण्डूत्रिदोषजित् ॥ ६७ ॥

अथ बर्बरा (वनतुलसी) ।

तस्या भेदसहितं नामानि गुणांश्चाह—

बर्बरी तुवरी तुङ्गी खरपुष्पाऽजगन्धिका ।
पर्णाशस्तत्र कृष्णे तु कठिञ्जककुठेरकौ ॥ ६८ ॥
तत्र शुक्लेऽर्जकः प्रोक्तो वटपत्रस्ततोऽपरः ।
बर्बरात्रितयं रूक्षं शीतं कटु विदाहि च ॥ ६९ ॥
तीक्ष्णं रुचिकरं हृद्यं दीपनं लघुपाकि च ।
पित्तलं कफवातास्रकण्डूक्रिमिविनाशनम् ॥ ७० ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे पञ्चमः—

पुष्पादिवर्गः समाप्तः ॥ ५ ॥

अथ षष्ठो वटादिवर्गः ६ ।

तत्रादौ वटः ।

तस्य नामानि गुणांश्चाह—

वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः ॥ १ ॥
वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः ।
वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत् ॥ २ ॥

अथ पिप्पलः (पीपल) ।

तस्य नामानि गुणांश्चाह—

बोधिद्रुः पिप्पलोऽश्वत्थश्चलपत्रो गजाशनः ।
पिप्पलो दुर्जरः शीतः पित्तश्लेष्मव्रणास्रजित् ।
गुरुस्तुवरको रूक्षो वर्ण्यो योनिविशोधनः ॥ ३ ॥

अथ पिप्पलभेदः (गजदण्डसहोरा) इति लोके ।

तस्य नामानि गुणांश्चाह—

पारीषोऽन्यः पलाशश्च कपिचूतः कमण्डलुः ।
गर्दभाण्डः कन्दरालः कपीतनसुपार्श्वकौ ॥ ४ ॥
पारीषो दुर्जरः स्निग्धः कृमिशुक्रकफप्रदः ।
फलेऽम्लो मधुरो मूले कषायस्वादुमज्जकः ॥ ५ ॥

अथ नन्दीवृक्षः (वेलिया पीपरा) ।

तस्य नामगुणानाह—

नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः ।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्याद् वनस्पतिः ॥ ६ ॥
नन्दीवृक्षो लघुः स्वादुस्तिक्तस्तुवर उष्णकः ।
कटुपाकरसो ग्राही विषपित्तकफास्रजित् ॥ ७ ॥

अथोदुम्बरः (गूलर) ।

तस्य नामानि गुणांश्चाह—

उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥ ८ ॥
उदुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रजित् ।

मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः ॥ ६ ॥

अथ काकोदुम्बरिका (कठूमर) ।

तस्या नामानि गुणांश्चाह—

काकोदुम्बरिका फल्गुर्मलयूर्जघनेफला ।
मलयूः स्तम्भकृत्तिक्ता शीतला तुवरा जयेत् ।
कफपित्तव्रणश्वित्रकुष्ठपाण्ड्वर्शकामलाः ॥ १० ॥

अथ प्लक्षः (पाखर) ।

तस्य नामानि गुणांश्चाह—

प्लक्षो जटी पर्करी च पर्कटी च स्त्रियामपि ॥ ११ ॥
प्लक्षः कषायः शिशिरो व्रणयोनिगदापहः ।
दाहपित्तकफास्रघ्नः शोथहा रक्तपित्तहृत् ॥ १२ ॥

अथ शिरीषः (सिरस) ।

तस्य नामानि गुणांश्चाह—

शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः ।
शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥ १३ ॥
शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः ।
दोषशोथविसर्पघ्नः कासव्रणविषापहः ॥ १४ ॥

अथ क्षीरिवृक्षपञ्चकं त्वक्पञ्चकञ्च ।

तयोर्लक्षणं तत्पत्रस्य च गुणांश्चाह—

न्यग्रोधोदुम्बराश्वत्थपारीषप्लक्षपादपाः ।
पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम् ॥ १५ ॥

*केचित्तु पारीषस्थाने शिरीषं, वेतसं परे, वा वदन्तीति विशेषः ॥ १५ ॥

क्षीरिवृक्षा हिमा वर्ण्या योनिरोगव्रणापहाः ।
रूक्षाः कषाया मेदोघ्ना विसर्पामयनाशनाः ॥ १६ ॥
शोथपित्तकफास्रघ्नाः स्तन्या भग्नास्थियोजकाः ।
त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित् ॥ १७ ॥
तेषां पत्रं हिमं ग्राहि कफवातास्रनुल्लघु ।
विष्टम्भाध्मानजित्तिक्तं कषायं लघु लेखनम् ॥ १८ ॥

अथ शालः (साखू)।

तस्य नामानि गुणाँश्चाह—

शालस्तु सर्जकार्श्याश्वकर्णकाः शस्यशम्बरः ।
अश्वकर्णः कषायः स्याद् व्रणस्वेदकफक्रिमीन् ।
ब्रध्नविद्रधिबाधिर्ययोनिकर्णगदान् हरेत् ॥ १९ ॥

अथ शालभेदः (सर्जकः)।

तस्य नामानि गुणांश्चाह—

सर्जकोऽन्योऽजकर्णः स्याच्छालो मरिचपत्रकः ॥ २० ॥
अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति ।
कफपाण्डुश्रुतिगदान् मेहकुष्ठविषव्रणान् ॥ २१ ॥

अथ शल्लकी (सलई)।

तस्या नामानि गुणांश्चाह—

शल्लकी गजभक्ष्या च सुवहा सुरभी रसा ।
महेरुणा कुन्दुरुकी वल्लकी च बहुस्रवा ॥ २२ ॥
शल्लकी तुवरा शीता पित्तश्लेष्मातिसारजित् ।
रक्तपित्तव्रणहरी पुष्टिकृत्समुदीरिता ॥ २३ ॥

अथ शिंशपा (शीसम)।

तस्या नामानि गुणाँश्चाह—

शिंशपा पिच्छिला श्यामा कृष्णसारा च सा गुरुः
कपिला सैव मुनिभिर्भस्मगर्भेति कीर्त्तिता ॥ २४ ॥
शिंशपा कटुका तिक्ता कषाया शोषहारिणी ।
उष्णवीर्या हरेन्मेदःकुष्ठश्वित्रवमिक्रिमीन् ।
वस्तिरुग्व्रणदाहास्रबलासान् गर्भपातिनी ॥ २५ ॥

अथ ककुभः (कोह)।

तस्य नामानि गुणांश्चाह—

ककुभोऽर्जुननामाख्यो नदीसर्जश्च कीर्त्तितः ।
इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः ॥ २६ ॥
ककुभः शीतलो हृद्यः क्षतक्षयविषास्रजित् ।
मेदोमेहव्रणान् हन्ति तुवरः कफपित्तहृत् ॥ २७ ॥

अथासनः (विजयसार) ।

तस्य नामानि गुणांश्चाह—

बीजकः पीतसारश्च पीतशालक इत्यपि ।
बन्धूकपुष्पः प्रियकः सर्जकश्चासनः स्मृतः ॥ २८ ॥
बीजकः कुष्ठवीसर्पश्वित्रमेहगुदक्रिमीन् ।
हन्ति श्लेष्मास्रपित्तञ्च त्वच्यः केश्यो रसायनः ॥ २९ ॥

अथ खदिरः ।

तस्य नामानि गुणांश्चाह—

खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥ ३० ॥
खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत् ॥ ३१ ॥
तिक्तः कषायो मेदोघ्नः कृमिमेहज्वरव्रणान् ।
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत् ॥ ३२ ॥

अथ श्वेतखदिरः (पपरिया कत्था)

तस्य नामानि गुणांश्चाह—

खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः ।
कदरो विशदो वर्ण्यो मुखरोगकफास्रजित् ॥ ३३ ॥

अथेरिमेदः (दुर्गन्ध खैर) ।

तस्य नामानि गुणांश्चाह—

इरिमेदो विट्खदिरः कालस्कन्धोऽरिमेदकः ।
इरिमेदः कषायोष्णो मुखदन्तगदास्रजित् ।
हन्ति कण्डूविषश्लेष्मकृमिकुष्ठविषव्रणान् ॥ ३४ ॥

अथ रोहीतकः (रोहेडा) ।

तस्य नामानि गुणांश्चाह—

रोहीतको रोहितको रोही दाडिमपुष्पकः ।
रोहीतकः प्लीहघाती रुच्यो रक्तप्रसादनः ॥ ३५ ॥

अथ बब्बूलः (बबूर) ।

तस्य नामानि गुणांश्चाह—

बब्बूलः किङ्किरातः स्यात्किङ्किराटः सपीतकः ॥ ३६ ॥

स एव कथितस्तज्ज्ञैराभाषट्पदमोदिनी ।
बब्बूलः कफनुद् ग्राही कुष्ठक्रिमिविषापहः ॥ ३७ ॥

अथारिष्टकः [रीठा] ।

तस्य नामानि गुणांश्चाह—

अरिष्टकस्तु मङ्गल्यः कृष्णवर्णोऽर्थसाधनः ।
रक्तबीजः पीतफेनः फेनिलो गर्भपातनः ॥
अरिष्टकस्त्रिदोषघ्नो ग्रहजिद् गर्भपातनः ॥ ३८ ॥

अथ पुत्रजीवः (पितौजिया) ।

तस्य नामानि गुणांश्चाह—

पुत्रजीवो गर्भकरो यष्टीपुष्पोऽर्थसाधकः ॥ ३९ ॥
पुत्रजीवो गुरुर्वृष्यो गर्भदः श्लेष्मवातहृत् ।
सृष्टमूत्रमलो रूक्षो हिमः स्वादुः पटुः कटुः ॥ ४० ॥

अथेङ्गुदः (हिङ्गोट) ।

तस्य नामानि गुणांश्चाह

इङ्गुदोऽङ्गारवृक्षश्च तिक्तकस्तापसद्रुमः ।
इङ्गुदः कुष्ठभूतादिग्रहव्रणविषक्रिमीन् ॥
हन्त्युष्णः श्वित्रशूलघ्नस्तिक्तकः कटुपाकवान् ॥ ४१ ॥

अथ जिङ्गिनी ।

तस्या नामानि गुणांश्चाह—

जिङ्गिनी झिङ्गिनी झिङ्गी सुनिर्यासा प्रमोदिनी ॥ ४२ ॥
जिङ्गिनी मधुरा सोष्णा कषाया योनिशोधिनी ।
कटुका व्रणहृद्रोगवातातीसारहृत् पटुः ॥ ४३ ॥

अथ तमालः ।

तस्य गुणानाह—

तमालः शालवद्वेद्यो दाहविस्फोटहृत् पुनः ॥ ४४ ॥

अथ तूणी ।

तस्य नामगुणानाह—

तूणी तुन्नक आपीनस्तुणिकः कच्छकस्तथा ।
कुठेरकः कान्तलको नन्दिवृक्षश्च नन्दकः ॥ ४५ ॥

तूणी रक्तः कटुः पाके कषायो मधुरो लघुः ।
तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्तजित् ॥ ४६ ॥

अथ भूर्जपत्रः (भोजपत्र) ।

तस्य नामानि गुणाँश्चाह--

भूर्जपत्रः स्मृतो भूर्जश्चर्म्मी बहुलवल्कलः ।
भूर्जो भूतग्रहश्लेष्मकर्णरुक्पित्तरक्तजित् ॥
कषायो राक्षसघ्नश्च मेदोविषहरः परः ॥ ४७ ॥

अथ पलाशः (ढाक) ।

तस्य नामानि गुणाँश्चाह—

पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः ॥ ४८ ॥
पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित् ।
भग्नसन्धानकृद् दोषग्रहण्यर्शःक्रिमीन् हरेत् ॥ ४९ ॥
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित् ॥

अथ तत्पुष्पफलयोर्गुणानाह—

तत्पुष्पं स्वादु पाके तु कटु तिक्तं कषायकम् ॥ ५० ॥
वातलं कफपित्तास्रकृच्छ्रजिद् ग्राहि शीतलम् ।
तृड्दाहशमकं वातरक्तकुष्ठहरं परम् ॥ ५१ ॥
फलं लघूष्णं मेहार्शःक्रिमिवातकफापहम् ।
विपाके कटुकं रूक्षं कुष्ठगुल्मोदरप्रणुत् ॥ ५२ ॥

अथ शाल्मलिः (सेमर)) ।

तस्य नामानि गुणाँश्चाह—

शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥ ५३ ॥
शाल्मली शीतला स्वाद्वी रसे पाके रसायनी ॥
श्लेष्मला पित्तवातास्रहारिणी रक्तपित्तजित् ॥ ५४ ॥

अथ मोचरसः ।

तस्य नामानि गुणाँश्चाह—

निर्यासः शाल्मलेः पिच्छा शाल्मलीवेष्टकोऽपि च ।

मोचास्रावो मोचरसो मोचनिर्यास इत्यपि ॥ ५५ ॥
मोचास्रावो हिमो ग्राही स्निग्धो वृष्यः कषायकः ।
प्रवाहिकाऽतिसारामकफपित्तास्रदाहनुत् ॥ ५६ ॥

अथ कूटशाल्मलिः ।

तस्य नामानि गुणाँश्चाह—

कुत्सितः शाल्मलिः प्रोक्तो रोचनः कूटशाल्मलिः ।
कूटशाल्मलिकस्तिक्तः कटुकः कफवातनुत् ॥ ५७ ॥
भेद्युष्णः प्लीहजठरयकृद्गुल्मविषापहः ।
भूतानाहविबन्धास्रमेदःशूलकफापहः ॥ ५८ ॥

अथ धवः (धौ) ।

तस्य नामानि गुणाँश्चाह—

धवो धटो नन्दितरुः स्थिरो गौरो धुरन्धरः ।
धवः शीतः प्रमेहार्शःपाण्डुपित्तकफापहः ।
मधुरस्तुवरस्तस्य फलञ्च मधुरं मनाक् ॥ ५९ ॥

अथ धन्वङ्गः (धामिन) ।

तस्य नामानि गुणाँश्चाह—

धन्वङ्गस्तु धनुर्वृक्षो गोत्रवृक्षः सुतेजनः ॥ ६० ॥
धन्वङ्गः कफपित्तास्रकासहृत्तुवरो लघुः ॥
बृंहणो बलकृद्रूक्षः सन्धिकृद् व्रणरोपणः ॥ ६१ ॥

अथ करीरः ।

तस्य नामानि गुणाँश्चाह—

करीरः क्रकरीपत्रो ग्रन्थिलो मरुभूरुहः ।
करीरः कटुकस्तिक्तः स्वेद्युष्णोभेदनः स्मृतः ।
दुर्नामकफवातामगरशोथव्रणप्रणुत् ॥ ६२ ॥

अथ शाखोटः (सहोरा) ।

तस्य नामानि गुणाँश्चाह—

शाखोटः पीतफलको भूतावासः खरच्छदः ।
शाखोटो रक्तपित्तार्शोवातश्लेष्मातिसारजित् ॥ ६३ ॥

अथ वरुणः (वरना) ।

तस्य नामानि गुणांश्चाह—

वरुणो वरणः सेतुस्तिक्तशाकः कुमारकः ।
वरुणः पित्तलो भेदी श्लेष्मकृच्छ्राश्ममारुतान् ॥ ६४ ॥
निहन्ति गुल्मवातास्रकृमींश्चोष्णोऽग्निदीपनः ।
कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः ॥ ६५ ॥

अथ कटभी ।

तस्या नामानि तत्फलस्य च गुणांश्चाह—

कटभी स्वादुपुष्पश्च मधुरेणुः कटम्भरः ।
कटभी तु प्रमेहार्शोनाडीव्रणविषक्रिमीन् ॥ ६६ ॥
हन्त्युष्णा कफकुष्ठघ्नी कटू रूक्षा च कीर्त्तिता ।
तत्फलं तुवरं ज्ञेयं विशेषात्कफशुक्रहृत् ॥ ६७ ॥

अथ मोक्षः (मोखावृक्ष)

पलाशवत्पर्वतवृक्षः ।

तस्य नामानि गुणांश्चाह—

मोक्षस्तु मोक्षकोऽपि स्याद् गोलीढो गोलिहस्तथा ।
क्षारश्रेष्ठः क्षारवृक्षो द्विविधः श्वेतकृष्णकः ॥ ६८ ॥
मोक्षकः कटुकस्तिक्तो ग्राह्युष्णः कफवातहृत् ।
विषमेदोगुल्मकण्डूवस्तिरुक्कृमिशुक्रनुत् ॥ ६९ ॥

अथ जलशिरीषिका

(जलसिरिस-टिटिन-ढाढोन इति च) ।

तस्या नामानि गुणांश्चाह—

शिरीषिका टिरिटनिका दुर्वलाऽम्बुशिरीषिका ।
त्रिदोषविषकुष्ठार्शोहरी वारिशिरीषिका ॥ ७० ॥

अथ शमी (छोंकरा) ।

तस्या नामानि गुणांश्चाह—

शमी शक्तुफला तुंगा केशहन्त्री शिवाफला ।
मंगल्या च तथा लक्ष्मीः शमारः साऽलिपका स्मृता ॥ ७१ ॥
शमी तिक्ता कटुः शीता कषाया रेचनी लघुः ।

कफकासभ्रमश्वासकुष्ठार्शःकृमिजित् स्मृता ॥ ७२ ॥

अथ सप्तपर्णः [छतिवन-सतौना] ।

तस्य नामानि गुणांश्चाह—

सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ॥ ७३ ॥
सप्तपर्णो व्रणश्लेष्मवातकुष्ठास्रजन्तुजित् ।
दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः सरः ॥ ७४ ॥

अथ तिनिशः [तिरिच्छ] ।

तस्य नामानि गुणांश्चाह—

तिनिशः स्यन्दनो नेमी रथद्रुर्वञ्जुलस्तथा ।
तिनिशः श्लेष्मपित्तास्रमेदःकुष्टप्रमेहजित् ॥
तुवरः श्वित्रदाहघ्नो व्रणपाण्डुकृमिप्रणुत् ॥ ७५ ॥

अथ भूमीसहः [सागोन] ।

तस्य नामानि गुणांश्चाह—

भूमीसहो द्वारदारुवरदारुः खरच्छदः ।
भूमीसहस्तु शिशिरो रक्तपित्तप्रसादनः ॥ ७६ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे षष्ठो वटादिवर्गः समाप्तः ॥ ६ ॥

अथ सप्तम आम्रादिफलवर्गः ७ ।

तत्रादावाम्रः (आम) ।

तस्य नामान्याह—

आम्रश्चूतो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥ १ ॥

अथाम्रपुष्पगुणानाह —

आम्रपुष्पमतीसारकफपित्तप्रमेहनुत् ।
असृग्दुष्टिहरं शीतं रुचिकृद् ग्राहि वातलम् ॥ २ ॥

अथामाम्रफलम् (अमिया) ।

तस्य गुणानाह—

आमं बालं कषायाम्लं रुच्यं मारुतपित्तकृत् ।

तरुणं तु तदत्यम्लं रूक्षं दोषत्रयास्रकृत ॥ ३ ॥

अथ शुष्कामाम्रफलम् [अमचूर] ।

तस्य लक्षणगुणानाह—

आम्रमामं त्वचाहीनमातपेऽतिविशोषितम् ।
अम्लं स्वादु कषायं स्याद्भेदनं कफवातजित् ॥ ४ ॥

अथ पक्वाम्रफलम् [पका आम] ।

तस्य गुणानाह—

पक्वं तु मधुरं वृष्यं स्निग्धं बलसुखप्रदम् ।
गुरु वातहरं हृद्यं वर्ण्यं शीतमपित्तलम् ॥
कषायानुरसं वह्निश्लेष्मशुक्रविवर्द्धनम् ॥ ५ ॥

अथ वृक्षपक्वाम्रफलगुणानाह—

तदेव वृक्षसम्पक्वं गुरु वातहरं परम् ।
मधुराम्लरसं किञ्चिद्भवेत्पित्तप्रकोपणम् ॥ ६ ॥

अथ कृत्रिमपक्वाम्रफलगुणानाह—

आम्रं कृत्रिमपक्वञ्च तद्भवेत्पित्तनाशनम् ।
रसस्याम्लस्य हीनस्तु माधुर्याच्च विशेषतः ॥ ७ ॥
उषितं तत्परं रुच्यं बलवीर्यकरं लघु ।
शीतलं शीघ्रपाकि स्याद्वातपित्तहरं सरम् ॥ ८ ॥

अथ गालिताम्ररसगुणानाह—

तद्रसो गालितो बल्यो गुरुर्वातहरः सरः ।
अहृद्यस्तर्पणोऽतीव बृंहणः कफवर्द्धनः ॥ ९ ॥

अथाम्रखण्डगुणानाह—

तस्य खण्डं गुरु परं रोचनं चिरपाकि च ।
मधुरं बृंहणं बल्यं शीतलं वातनाशनम् ॥ १० ॥

अथ दुग्धयुक्ताम्रगुणानाह—

वातपित्तहरं रुच्यं बृंहणं बलवर्द्धनम् ।
वृष्यं वर्णकरं स्वादु दुग्धाम्रं गुरु शीतलम् ॥ ११ ॥

अथाम्रातियोगः (आम बहुत खाना)

तस्य दोषानाह—

मन्दानलत्वं विषमज्वरं च रक्तामयं बद्धगुदोदरं च।
आम्राति योगो नयनामयं वा करोति तस्मादति तानि नाद्यात् ॥१२॥
एतदम्लाम्रविषयं मधुराम्लपरं न तु।
मधुरस्य परं नेत्रहितं त्वाद्या गुणा यतः ॥ १३ ॥

अथाम्रातियोगजदोषनिवृत्युपायमाह—

शुण्ठ्यम्भसोऽनुपानं स्यादाम्राणामतिभक्षणे।
जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च ॥ १४ ॥

अथाम्रावर्त्तः (अमावट)।

तस्य लक्षणं गुणांश्चाह—

पक्वस्य सहकारस्य पटे विस्तारितो रसः।
घर्मशुष्को मुहुर्दत्त आम्रावर्त्त इति स्मृतः ॥ १५ ॥
आम्रावर्त्तस्तृषाच्छर्दिवातपित्तहरः सरः।
रुच्यः सूर्यांशुभिः पाकाल्लघुश्च स हि कीर्त्तितः ॥ १६ ॥

अथाम्रबीजम् [कोइलीया]।

तस्य गुणानाह—

आम्रबीजं कषायं स्याच्छर्द्यतीसारनाशनम्।
ईषदम्लञ्च मधुरं तथा हृदयदाहनुत् ॥ १७ ॥

अथाम्रनवपल्लवः।

तस्य गुणानाह—

आम्रस्य पल्लवो रुच्यः कफपित्तविनाशनः ॥ १८ ॥

अथाम्रातकः [अम्बाडा]।

तन्नामानि तत्पक्वापक्वफलगुणाँश्चाह—

आम्रातकः पीतनश्च मर्कटाम्रः कपीतनः।
आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकृत्सरम् ॥ १९ ॥
पक्वन्तु तुवरं स्वादु रसे पाके हिमं स्मृतम्।
तर्पणं श्लेष्मलं स्निग्धं वृष्यं विष्टम्भि बृंहणम् ॥
गुरु बल्यं मरुत्पित्तक्षतदाहक्षयास्रजित् ॥ २० ॥

अथ राजाम्रः [कलमी आम] ।

तन्नामानि तत्फलस्य गुणाँश्चाह—

राजाम्रष्टंक आम्रातः कामाह्वो राजपुत्रकः ॥ २१ ॥
राजाम्रं तुवरं स्वादु विशदं शीतलं गुरु ।
ग्राहि रूक्षं विबन्धाध्मवातकृत्कफपित्तनुत् ॥ २२ ॥

अथ कोशाम्रः [कोशम्भ आम] ।

तस्य नामानि तत्फलस्य च गुणाँश्चाह—

कोशाम्र उक्तः क्षुद्राम्रः कृमिवृक्षः सुकोशकः ।
कोशाम्रः कुष्ठशाथास्रपित्तव्रणकफापहः ॥ २३ ॥
तत्फलं ग्राहि वातघ्नमम्लोष्णं गुरु पित्तलम् ।
पक्वन्तु दीपनं रुच्यं लघूष्णं कफवातनुत् ॥ २४ ॥

अथ पनसः [कटहर] ।

तन्नामानि तत्पक्वापक्वफलगुणाँश्चाह—

पनशः कण्टकिफलः पलसोऽतिबृहत्फलः ।
पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम् ॥ २५ ॥
तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशम् ।
बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतव्रणान् ॥ २६ ॥
आमं तदेव विष्टम्भि वातलं तुवरं गुरु ।
दाहकृन्मधुरं बल्यं कफमेदोविवर्द्धनम् ॥ २७ ॥

अथ पनसबीजगुणानाह—

पनसोद्भूतबीजानि वृष्याणि मधुराणि च ।
गुरूणि बद्धविट्कानि सृष्टमूत्राणि संवदेत् ॥ २८ ॥

अथ पनसमज्जगुणानाह—

मज्जा पनसजो वृष्यो वातपित्तकफापहः ।
विशेषात्पनसो वर्ज्यो गुल्मिभिर्मन्दवह्निभिः ॥ २९ ॥

अथ लकुचः [बडहर] ।

तन्नामानि तत्पक्वापक्वफलगुणाश्चाह—

लकुचः क्षुद्रपनसो लिकुचो डहुरित्यपि ।
आमं लकुचमुष्णञ्च गुरु विष्टम्भकृत्तथा ॥ ३० ॥

मधुरश्च तथाऽम्लश्च दोषत्रितयरक्तकृत् ।
शुक्राग्निनाशनं वाऽपि नत्रयोरहितं स्मृतम् ॥ ३१ ॥
सुपक्वं तत्तु मधुरमम्लं चानिलपित्तहृत् ।
कफवह्निकरं रुच्यं वृष्यं विष्टम्भकञ्च तत् ॥ ३२ ॥

अथ कदली [केला] ।

तन्नामानि तत्पक्वापक्वफलगुणाँश्चाह—

कदली वारणा मोचाऽम्बुसाराऽंशुमतीफला ।
मोचाफलं स्वादु शीतं विष्टम्भि कफकृद् गुरु ॥ ३३ ॥
स्निग्धं पित्तास्रतृड्दाहक्षतक्षयसमीरजित् ।
पक्वं स्वादु हिमं पाके स्वादु वृष्यञ्च बृंहणम् ।
क्षुत्तृष्णानेत्रगुदहृन्मेहघ्नं रुचिमांसकृत् ॥ ३४ ॥

अथ कदलीभेदान् गुणनिर्देशपूर्वकमाह—

माणिक्यमर्त्यामृतचम्पकाद्या भेदाः कदल्या बहवोऽपि सन्ति ।
उक्ता गुणास्तेष्वधिका भवन्ति निर्दोषता स्याल्लघुता च तेषाम् ॥ ३५ ॥

अथ चिर्भिटम् [कचरिया, फूट] ।

तन्नामानि पक्वापक्वतत्फलगुणांश्चाह—

चिर्भिटं धेनुदुग्धं च तथा गोरक्षकर्कटी ॥ ३६ ॥
चिर्भिटं मधुरं रूक्षं गुरु पित्तकफापहम् ।
अनुष्णं ग्राहि विष्टम्भि पक्वं तूष्णञ्च पित्तलम् ॥ ३७ ॥

अथ नारिकेलः [नारियल] ।

तन्नामानि तत्फलसाधारणगुणांश्चाह—

नारिकेलो दृढफलो लाङ्गली कूर्चशीर्षकः ।
तुङ्गः स्कन्धफलश्चैव तृणराजः सदाफलः ॥ ३८ ॥
नारिकेलफलं शीतं दुर्जरं वस्तिशोधनम् ।
विष्टम्भि बृंहणं बल्यं वातपित्तास्रदाहनुत् ॥ ३९ ॥

अथ कोमलजीर्णतत्फलयोर्गुणानाह—

विशेषतः कोमलनारिकेलं निहन्ति पित्तज्वरपित्तदोषान् ।
तदेव जीर्णं गुरु पित्तकारि विदाहि विष्टम्भि मतं भिषग्भिः ॥ ४० ॥

अथ नारिकेलजलगुणानाह—

तस्याम्भः शीतलं हृद्यं दीपनं शुक्रलं लघु ।
पिपासापित्तजित्स्वादु वस्तिशुद्धिकरं परम् ॥ ४१ ॥

अथ नारिकेलादीनां शिरोगुणानाह—

नारिकेलस्य तालस्य खर्जूरस्य शिरांसि तु
कषायस्निग्धमधुरबृंहणानि गुरूणि च ॥ ४२ ॥

अथ कालिन्दम् (तरबूज) ।

तन्नामानि पक्वापक्वतत्फलगुणांश्चाह—

कालिन्दं कृष्णबीजं स्यात्कालिङ्गञ्च सुवर्त्तुलम् ।
कालिन्दं ग्राहि दृक्पित्तशुक्रहृच्छीतलं गुरु ।
पक्वन्तु सोष्णं सक्षारं पित्तलं कफवातजित् ॥ ४३ ॥

अथ खर्बूजम् (खर्बूजा) ।

तन्नामानि तत्फलगुणाँश्चाह—

दशांगुलं तु खर्बूजं कथ्यन्ते तद्गुणा अथ ॥ ४४ ॥
खर्बूजं मूत्रलं बल्यं कोष्ठशुद्धिकरं गुरु ।
स्निग्धं स्वादुतरं शीतं वृष्यं पित्तानिलापहम् ॥ ४५ ॥
तेषु यच्चाम्लमधुरं सक्षारञ्च रसाद्भवेत् ।
रक्तपित्तकरं तत्तु मूत्रकृच्छ्रकरं परम् ॥ ४६ ॥

अथ त्रपुसम् [खीरा, बालमखीरा] ।

तस्य नामानि पक्वापक्वतत्फलतद्बीजगुणाँश्चाह—

त्रपुसं कण्टकिफलं सुधावासः सुशीतलम् ।
त्रपुसं लघु नीलञ्च नवं तृट्क्लमदाहजित् ॥ ४७ ॥
स्वादु पित्तापहं शीतं रक्तपित्तहरं परम् ।
तत्पक्वमम्लमुष्णं स्यात्पित्तलं कफवातनुत् ॥
तद्बीजं मूत्रलं शीतं रूक्षं पित्तास्रकृच्छ्रजित ॥ ४८ ॥

अथ गुवाकः (छोटी सुपारी) ।

तन्नामानि तत्फलनामगुणाँश्चाह—

घोरण्टः पूगी पूगश्च गुवाकः क्रमुकोऽस्य तु ।
फलं पूगीफलं प्रोक्तमुद्वेगं च तदीरितम् ॥ ४९ ॥

पूगं गुरु हिमं रूक्षं कषायं कफपित्तजित् ।
मोहनं दीपनं रुच्यमास्यवैरस्यनाशनम् ॥ ५० ॥

अथार्द्रस्विन्नतत्फलगुणानाह—

आर्द्रं तद्‌ गुर्वभिष्यन्दि वह्निदृष्टिहरं स्मृतम् ।
स्विन्नं दोषत्रयच्छेदि दृढमध्यं तदुत्तमम् ॥ ५१ ॥

अथ तालः [ताड] ।

तन्नामानि तत्पक्वफलमज्जगुणाँश्चाह—

तालस्तु लेख्यपत्रः स्यात्तृणराजो महोन्नतः ॥५२॥
पक्वं तालफलं पित्तरक्तश्लेष्मविवर्द्धनम् ।
दुर्जरं बहुमूत्रञ्च तन्द्राऽभिष्यन्दशुक्रदम् ॥ ५३ ॥
तालमज्जा तु तरुणः किञ्चिन्मदकरो लघुः ।
श्लेष्मलो वातपित्तघ्नः सस्नेहो मधुरः सरः ॥ ५४ ॥

अथ तालरसः [ताडी] ।

नवीनस्य प्राचीनस्य च
तस्य नामानि गुणांश्चाह—

तालजं तरुणं तोयमतीव मदकृन्मतम् ।
अम्लीभूतं तदा तु स्यात्पित्तकृद्वातदोषहृत् ॥ ५५ ॥

अथ बिल्वः [बेल] ।

तन्नामानि तद्बालफल—
नामगुणांश्चाह—

बिल्वः शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।
बालं बिल्वफलं बिल्वकर्कटी बिल्वपेशिका ॥
ग्राहिणी कफवातामशूलघ्नी बिल्वपेषिका ॥ ५६ ॥

अन्यच्च-

बालं बिल्वफलं ग्राहि दीपनं पाचनं कटु ।
कषायोष्णं लघु स्निग्धं तिक्तं वातकफापहम् ॥ ५७ ॥

अथ पक्वतत्फलगुणानाह—

पक्वं गुरु त्रिदोषं स्याद्‌ दुर्जरं पूतिमारुतम् ।
विदाहि विष्टम्भकरं मधुरं वह्निमान्द्यकृत् ॥ ५८ ॥

अथ पक्वापेक्षया बालस्य बिल्वफलस्य गुणाधिक्यमाह—

फलेषु परिपक्कं यद् गुणवत्तदुदाहृतम् ॥ ५९ ॥
बिल्वादन्यत्र विज्ञेयमामं तद्धि गुणाधिकम् ।
द्राक्षाबिल्वशिवाऽऽदीनां फलं शुष्कं गुणाधिकम् ॥ ६० ॥

अथ कपित्थः [कैथ]

तन्नामानि तत्पक्वापक्वफलगुणाँश्चाह—

कपित्थस्तु दधित्थः स्यात्तथा पुष्पफलः स्मृतः ।
कपिप्रियो दधिफलस्तथा दन्तशठोऽपि च ॥ ६१ ॥
कपित्थमामं संग्राहि कषायं लघु लेखनम् ।
पक्वं गुरु तृषाहिक्काशमनं वातपित्तजित् ॥
स्यादम्लं तुवरं कण्ठशोधनं ग्राहि दुर्जरम् ॥ ६२ ॥

अथ नारङ्गः । [नारंगी] ।

तन्नामानि मधुराम्लनारङ्गयोर्गुणाँश्चाह—

नारङ्गो नागरङ्गः स्यात्त्वक्सुगन्धो मुखप्रियः ॥ ६३ ॥
नारङ्गो मधुराम्लः स्याद्रोचनो वातनाशनः ।
अपरं त्वम्लमत्युष्णं दुर्जरं वातहृत् सरम् ॥ ६४ ॥

अथ तिन्दुकः [तेंदू] ।

तन्नामानि पक्वापक्वतत्फलगुणाँश्चाह—

तिन्दुकः स्फूर्जकः कालस्कन्धश्चासितकारकः ।
स्यादामं तिन्दुकं ग्राहि वातलं शीतलं लघु ॥
पक्वं पित्तप्रमेहास्रश्लेष्मघ्नं मधुरं गुरु ॥ ६५ ॥

अथ कुपीलुः ।

यस्य फलं (कुचिला) इति लोके "मधुरतेंदुआ" इति च ।

तन्नामानि तत्फलगुणाँश्चाह—

तिन्दुको यस्तु कथितो जलदो दीर्घपत्रकः ॥ ६६ ॥
कुपीलुः कुलकः काकतिन्दुकः काकपीलुकः ।
काकेन्दुर्विषतिन्दुश्च तथा मर्कटतिन्दुकः ॥ ६७ ॥
कुपीलु शीतलं तिक्तं वातलं मदकृल्लघु ।
परं व्यथाहरं ग्राहि कफपित्तास्रनाशनम् ॥ ६८ ॥

अथ राजजम्बूः [वडी जामून] ।

तन्नामानि तत्फलगुणाँश्चाह—

फलेन्द्रा कथिता नन्दो राजजम्बूर्महाफला ।
तथा सुरभिपत्रा च महाजम्बूरपि स्मृता ॥
राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम् ॥ ६६ ॥

अथ जलजम्बुका ।

[छोटी जामुन, नदी जामुन] ।

तस्या नामानि गुणाँश्चाह—

क्षुद्रजम्बूः सूक्ष्मपत्रा नादेयी जलजम्बुका ।
जम्बूः संग्राहिणी रूक्षा कफपित्तास्रदाहजित् ॥ ७० ॥

अथ बदरी [बेर] ।

तस्या नामान्याह—

पुंसि स्त्रियाञ्च कर्कन्धूर्बदरी कोलमित्यपि ॥ ७१ ॥
फेनिलं कुवलं घोण्टा सौवीरं बदरं महत् ।
अजप्रिया कुहा कोलो विषमोभयकण्टका ॥ ७२ ॥

तत्र बदरविशेषाणां लक्षणानि गुणाँश्चाह—

पच्यमानं सुमधुरं सौवीरं बदर महत ।
सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम् ॥ ७३ ॥
बृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् ।
सौवीरं लघु सम्पक्कं मधुरं कोलमुच्यते ॥ ७४ ॥
कोलन्तु बदरं ग्राहि रुच्यमुष्णञ्च वातहृत् ।
कफपित्तकरं चापि गुरु सारकमीरितम् ॥ ७५ ॥
कर्कन्धूः क्षुद्रबदरं कथितं पूर्वसूरिभिः ।
अम्लं स्यात्क्षुद्रबदरं कषायं मधुरं मनाक् ॥ ७६ ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
शुष्कं भेद्यग्निकृत्सर्वं लघु तृष्णाक्लमास्रजित् ॥ ७७ ॥

अथ प्राचीनामलकम् (पानी आँवला) ।

तस्य नामानि गुणाँश्चाह—

प्राचीनामलकं लोके पानीयामलकं स्मृतम् ।

प्राचीनामलकं दोषत्रयजिज्ज्वरघाति च ॥ ७८ ॥

अथ लवली (हरफारेवडी) ।

तस्या नामानि तत्फलगुणाँश्चाह—

सुगन्धमूला लवली पाण्डुः कोमलवल्कला ॥ ७६ ॥
लवलीफलमश्मार्शःकफपित्तहरं गुरु ।
विशदं रोचनं रूक्षं स्वाद्वम्लं तुवरं रसे ॥ ८० ॥

अथ करमर्दः-करमर्दिका च ।
(करौंदा-करौंदी)

तयोर्नामानि पक्वापक्वतत्फलगुणाँश्चाह—

करमर्दः सुषेणः स्यात्कृष्णपाकफलस्तथा ।
तस्माल्लघुफला या तु सा ज्ञेया करमर्दिका ॥ ८१ ॥
करमर्दद्वयं त्वाममम्लं गुरु तृषाहरम् ।
उष्णं रुचिकरं प्रोक्तं रक्तपित्तकफप्रदम् ॥
तत्पक्वं मधुरं रुच्यं लघु पित्तसमीरजित् ॥ ८२ ॥

अथ प्रियालः (चिरौंजी)

तस्य नामानि तत्फलस्य च गुणांश्चाह—

प्रियालस्तु खरस्कन्धश्चारो बहुलवल्कलः ॥
राजादनस्तापसेष्टः सन्नकद्रुर्धनुष्पटः ॥ ८३ ॥
चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु ।
स्निग्धं सरं मरुत्पित्तदाहज्वरतृषाऽपहम् ॥ ८४ ॥

अथ तन्मज्जगुणानाह—

प्रियालमज्जा मधुरो वृष्यः पित्तानिलापहः ।
हृद्योऽतिदुर्जरः स्निग्धो विष्टम्भी चामवर्द्धनः ॥ ८५ ॥

अथ राजादनः (खिरनी) ।

तस्य नामानि तत्फलगुणाँश्चाह—

राजादनः फलाध्यक्षो राजन्या क्षीरिकाऽपि च ॥ ८६ ॥
क्षीरिकायाः फलं वृष्यं बल्यं स्निग्धं हिमं गुरु ।
तृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयास्रजित् ॥ ८७ ॥

अथ विकङ्कतः (कण्टाई)।

तस्य नामानि तत्पक्वफलगुणाँश्चाह—

विकङ्कतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः ।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ॥
विकङ्कतफलं पक्वं मधुरं सर्वदोषजित् ॥ ८८ ॥

अथ पद्माक्षम् (कमलगट्टा)।

तस्य नामानि गुणाँश्चाह—

पद्मबीजं तु पद्माक्षं गालोड्यं पद्मकर्कटी ।
पद्मबीजं हिमं स्वादु कषायं तिक्तकं गुरु ॥ ८९ ॥
विष्टम्भि वृष्यं रूक्षञ्च गर्भसंस्थापकं परम् ॥
कफवातकरं बल्यं ग्राहि पित्तास्रदाहनुत् ॥ ९० ॥

अथ मखान्नम् (मखाना)।

तस्य नामानि गुणाँश्चाह—

मखान्नं पद्मबीजाभं पानीयफलमित्यपि ।
मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्दिशेत् ॥ ९१ ॥

अथ शृङ्गाटकम् (सिंघाडा)।

तस्य नामानि गुणाँश्चाह—

शृङ्गाटकं जलफलं त्रिकोणफलमित्यपि ॥ ९२ ॥
शृङ्गाटकं हिमं स्वादु गुरु वृष्यं कषायकम् ।
ग्राहि शुक्रानिलश्लेष्मप्रदं पित्तास्रदाहनुत ॥ ९३ ॥

अथ कैरविणीफलम् (भेंट)।

तस्य नामानि गुणांश्चाह—

उक्तं कुमुदबीजन्तु बुधैः कैरविणीफलम् ।
भवेत्कुमुद्वतीबीजं स्वादु रूक्षं हिमं गुरु ॥ ९४ ॥

अथ मधूकः (महुआ, वनमहुआ)।

तस्य नामानि तत्पुष्पफलगुणाँश्चाह—

मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलकः ॥ ९५ ॥
मधूकपुष्पं मधुरं शीतलं गुरु बृंहणम् ।

बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम् ॥ ९६ ॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत् ।
अहृद्यं हन्ति तृष्णाऽस्रदाहश्वासक्षतक्षयान् ॥ ९७ ॥

अथ परूषकम् (फालसा) ।

तस्य नामानि तत्पक्वापक्वफलगुणाँश्चाह—

परूषकं तु परुषमल्पास्थि च परापरम् ।
परूषकं कषायाम्लमामं पित्तकरं लघु ॥ ९८ ॥
तत्पक्वं मधुरं पाके शीतं विष्टम्भि बृंहणम् ।
हृद्यन्तु पित्तदाहास्रज्वरक्षयसमीरहृत् ॥ ९९ ॥

अथ तूतः (सहतूत) ।

तस्य नामानि तत्पक्वापक्वफलगुणाँश्चाह—

तूतस्तूलश्च पूगश्च क्रमुको ब्रह्मदारु च ।
तूतं पक्वं गुरु स्वादु हिमं पित्तानिलापहम् ॥
तदेवामं गुरु सरमम्लोष्णं रक्तपित्तकृत् ॥ १०० ॥

अथ दाडिमः (अनार) ।

तस्य नामानि तत्फलभेदाँश्चाह—

दाडिमः करको दन्तबीजो लोहितपुष्पकः ।
तत्फलं त्रिविधं स्वादु स्वाद्वम्लं केवलाम्लकम् ॥ १०१ ॥

अथ तत्फलभेदानां गुणानाह—

तत्तु स्वादु त्रिदोषघ्नं तृड्दाहज्वरनाशनम् ।
हृत्कण्ठमुखगन्धघ्नं तर्पणं शुक्रलं लघु ॥ १०२ ॥
कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम् ॥ १०३ ॥
स्वाद्वम्लं दीपनं रुच्यं किञ्चित्पित्तकरं लघु ।
अम्लन्तु पित्तजनकमम्लं वातकफापहम् ॥ १०४ ॥

अथ बहुवारः (लिसोडा) ।

तस्य नामानि तत्पक्वापक्वफलस्य च गुणाँश्चाह—

बहुवारस्तु शीतः स्यादुद्दालो बहुवारकः ।
शेलुः श्लेष्मातकश्चापि पिच्छिलो भूतवृक्षकः ॥ १०५ ॥
बहुवारो विषस्फोटव्रणवीसर्पकुष्ठनुत् ।

मधुरस्तुवरस्तिक्तः केश्यश्च कफपित्तहृत् ॥ १०६ ॥
फलमामन्तु विष्टम्भि रूक्षं पित्तकफास्रजित् ॥
तत्पक्वं मधुरं स्निग्धं श्लेष्मलं शीतलं गुरु ॥ १०७ ॥

अथ कतकः (निर्मली) ।

तस्य नामानि तत्फलगुणाँश्चाह—

पयःप्रसादी कतकः कतकं तत्फलं च तत्
कतकस्य फलं नेत्र्यं जलनिर्मलताकरम् ॥
वातश्लेष्महरं शीतं मधुरं तुवरं गुरु ॥ १०८ ॥

अथ द्राक्षा (दाख) ।

तस्या नामानि तत्पक्वापक्वफलस्य—
तद्भेदानां च गुणांश्चाह—

द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसाऽपि च ।
मृद्वीका हारहूरा च गोस्तनी चापि कीर्त्तिता ॥ १०९ ॥
द्राक्षा पक्वा सरा शीता चक्षुष्या बृंहणी गुरुः ।
स्वादुपाकरसा स्वर्या तुवरा सृष्टमूत्रविट् ॥ ११० ॥
कोष्ठमारुतकृद् वृष्या कफपुष्टिरुचिप्रदा ॥ १११ ॥
हन्ति तृष्णाज्वरश्वासवातवातास्रकामलाः ।
कृच्छ्रास्रपित्तसंमोहदाहशोषमदात्ययान् ॥ ११२ ॥
आमा स्वल्पगुणा गुर्वी सैवाम्ला रक्तपित्तकृत् ।
वृष्या स्याद् गोस्तनी द्राक्षा गुर्वी च कफपित्तनुत् ॥११३॥

*गोस्तनी 'मुनक्का' इति लोके ॥ ११३ ॥

अबीजाऽन्या स्वल्पतरा गोस्तनीसदृशी गुणैः ।
द्राक्षा पर्वतजा लघ्वी साऽम्ला श्लेष्माम्लपित्तकृत् ॥
द्राक्षा पर्वतजा यादृक् तादृशी करमर्दिका ॥ ११४ ॥

*अबीजा=ईषद्बीजा 'किसमिस' इति लोके। पर्वतजा 'पहाडी' इति लोके। करमर्दिका 'करौंदी' इति लोके ॥ ११४ ॥

अथ क्षुद्रखर्जूरी-पिण्डखर्जूरी-छोहारा च ।

तासां नामानि गुणांश्चाह—

भूमिखर्जूरिका स्वाद्वी दुरारोहा मृदुच्छदा ।

तथा स्कन्धफला काककर्कटी स्वादुमस्तका ॥ ११५ ॥
पिण्डखर्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्जूरी गोस्तनाकारा परद्वीपादिहागता ॥ ११६ ॥
जायते पश्चिमे देशे सा छोहारेति कीर्त्यते ।
खर्जूरीत्रितयं शीतं मधुरं रसपाकयोः ॥ ११७ ॥
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् ॥ ११८ ॥
कोष्ठमारुतहृद् बल्यं वान्तिवातकफापहम् ।
ज्वरातिसारक्षुत्तृष्णाकासश्वासनिवारकम् ॥ ११९ ॥
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् ।
महतीभ्यां गुणैरल्पा स्वल्पखर्जूरिका स्मृता ॥ १२० ॥

अथ खर्जूरीतरुतोयगुणानाह—

खर्जूरीतरुतोयं तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥ १२१ ॥

अथ पिण्डखर्जूरीभेदः (सुलेमानी खजूर) ।

तस्य नामगुणानाह—

सुलेमानी तु मृदुला दलहीनफला च सा ।
सुलेमानी श्रमभ्रान्तिदाहमूर्च्छाऽस्रपित्तहृत् ॥ १२२ ॥

अथ वातादः (बादाम)

तस्य नामानि तन्मज्ज्ञश्च गुणाँश्चाह—

वातादो वातवैरी स्यान्नेत्रोपमफलस्तथा ।
वाताद उष्णः सुस्निग्धो वातघ्नः शुक्रकृद् गुरुः ॥१२३॥
वातादमज्जा मधुरो वृष्यः पित्तानिलापहः ।
स्निग्धोष्णः कफकृन्नेष्टो रक्तपित्तविकारिणाम् ॥१२४॥

अथ सेवम् ।

तस्य नामगुणानाह—

मुष्टिप्रमाणं बदरं सेवं सिवितिकाफलम् ॥ १२५॥
सेवं समीरपित्तघ्नं बृंहणं कफकृद् गुरु ।
रसे पाके च मधुरं शिशिरं रुचिशुक्रकृत् ॥ १२६ ॥

अथामृतफलम् ।
(यद् बदक्सान-काबिल-प्रभृतिषु देशेषु-
"नाशपाती"ति नाम्ना प्रसिद्धम्)
तस्य गुणानाह—
अमृतफलं लघु वृष्यं-सुस्वादु त्रीन्हरेद्दोषान् ।
देशेषु मुद्गलानां-बहुलं तल्लभ्यते लोकैः ॥ १२७ ॥
अथ पीलुः ।
तस्य नामानि तत्फलगुणांश्चाह—
पीलुर्गुडफलः स्रंसी तथा शीतफलोऽपि च ।
पीलु श्लेष्मसमीरघ्नं पित्तलं भेदि गुल्मनुत् ।
स्वादु तिक्तञ्च यत्पीलु तन्नात्युष्णं त्रिदोषहृत् ॥ १२८ ॥
अथाक्षोटः (अखरोट) ।
तस्य नामगुणानाह—
पीलुः शैलभवोऽक्षोटः कर्परालश्च कीर्त्तितः ।
अक्षोटकोऽपि वातादसदृशः कफपित्तकृत् ॥ १२९ ॥
अथ बीजपूरः (बिजौरा) ।
तस्य नामानि तत्फलगुणांश्चाह—
बीजपूरो मातुलुङ्गो रुचकः फलपूरकः ।
बीजपूरफलं स्वादु रसेऽम्लं दीपनं लघु ॥ १३० ॥
रक्तपित्तहरं कण्ठजिह्वाहृदयशोधनम् ।
श्वासकासारुचिहरं हृद्यं तृष्णाहरं स्मृतम् ॥ १३१ ॥
अथ मधुकर्कटी (बिजौराभेद, चकोतरा) ।
तस्या नामगुणानाह—
बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ॥ १३२ ॥
मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः ।
रक्तपित्तक्षयश्वासकासहिक्काभ्रमापहा ॥ १३३ ॥
अथ जम्बीरद्वयम् ।
तस्य नामानि तत्फलगुणांश्चाह—
स्याज्जम्बीरो दन्तशठो जम्भजम्भीरजम्भलाः ।

जम्बीरमुष्णं गुर्वम्लं वातश्लेष्मविबन्धनुत् ॥ १३४ ॥
शूलकासकफोत्क्लेशच्छर्दितृष्णाऽऽमदोषजित् ।
आस्यवैरस्यहृत्पीडावह्निमान्द्यक्रिमीन् हरेत् ॥
स्वल्पजम्बीरिका तद्वत्तृष्णाच्छर्दिनिवारिणी ॥ १३५ ॥

अथ निम्बूकम् (कागजी नींबू]।

तस्य नामगुणानाह –

निम्बूः स्त्री निम्बुकं क्लीबे निम्बूकमपि कीर्त्तितम् ।
निम्बूकमम्लं वातघ्नं दीपनं पाचनं लघु ॥ १३६ ॥

अन्यच्च —

निम्बुकं कृमिसमूहनाशनं-तीक्ष्णमम्लमुदरग्रहापहम् ।
वातपित्तकफशूलिने हितं-कष्टनष्टरुचिरोचनं परम् ॥१३७॥
त्रिदोषवह्निक्षयवातरोग-निपीडितानां विषविह्वलानाम् ।
मन्दानले बद्धगुदे प्रदेयं-विषूचिकायां मुनयो वदन्ति ॥१३८॥

अथ मिष्टनिम्बूफलम (मीठा नींबू) ।

तस्य गुणानाह—

मिष्टनिम्बूफलं स्वादु गुरु मारुतपित्तनुत् ॥ १३९ ॥
गररोगविषध्वंसि कफोत्क्लेशि च रक्तहृत् ।
शोषारुचितृषाच्छर्दिहरं बल्यञ्च बृंहणम् ॥ १४० ॥

अथ कर्मरङ्गम (कमरख) ।

तस्य नामगुणानाह—

कर्मरङ्गं शिरालं च बृहदम्लं रुजाकरम् ।
कर्मरङ्गं हिमं ग्राहि स्वाद्वम्लं कफवातहृत् ॥ १४१ ॥

अथाम्लिका (इमली) ।

तस्या नामानि तत्पक्वापक्वफलगुणाँश्चाह—

अम्लिका चुक्रिकाऽम्ली च चुक्रा दन्तशठाऽपि च ।
अम्ला च चिञ्चिका चिञ्चा तिन्तिडीका च तिन्तिडी ॥१४२॥
अम्लिकाऽम्ला गुरुर्वातहरा पित्तकफास्रकृत् ।
पक्वा तु दीपनी रूक्षा सरोष्णा कफवातनुत् ॥ १४३ ॥

अथाम्लवेतसः [अम्लवेत] ।

तस्य नामानि तत्फलगुणाँश्चाह—

स्यादम्लवेतसश्चुक्रं शतवेधि सहस्रनुत् ।

अम्लवेतसमत्यम्लं भेदनं लघु दीपनम् ॥१४४॥
हृद्रोगशूलगुल्मघ्नं पित्तलं लोमहर्षणम् ।
रूक्षं विण्मूत्रदोषघ्नं प्लीहोदावर्त्तनाशनम् ॥ १४५ ॥
हिक्काऽऽनाहारुचिश्वासकासाजीर्णवमिप्रणुत् ॥
कफवातामयध्वंसि च्छागमांसद्रवत्वकृत् ।
चणकाम्लगुणं ज्ञेयं लोहसूचीद्रवत्वकृत् ॥१४६॥

अथ वृक्षाम्लकम् (विषाम्वल, कोकम) ।

तस्य नामानि तत्पक्वापक्वफलगुणांश्चाह—

वृक्षाम्लं तिन्तिडीकञ्च चुक्रं स्यादम्लवृत्तकम् ।
वृत्ताम्लमाममम्लोष्णं वातघ्नं कफपित्तलम् ॥ १४७ ॥
पक्वन्तु गुरु संग्राहि कटुकं तुवरं लघु ॥ १४८ ॥
अम्लोष्णं रोचनं रूक्षं दीपनं कफवातकृत् ।
तृष्णाऽर्शोग्रहणीगुल्मशूलहृद्रोगजन्तुजित् ॥ १४९ ॥

अथ चतुरम्लं पञ्चाम्लं च ।

तयोर्लक्षणमाह—

अम्लवेतसवृत्ताम्लबृहज्जम्बीरनिम्बुकैः ।
चतुरम्लं हि पञ्चाम्लं बीजपूरयुतैर्भवेत् ॥ १५० ॥

अथ परिभाषामाह—

फलेषु परिपक्वं यद् गुणवत्तदुदाहृतम् ।
बिल्वादन्यत्र विज्ञेयमामं तद्धि गुणाधिकम् ॥
फलेषु सरसं यत्स्याद् गुणवत्तदुदाहृतम् ॥१५१॥
द्राक्षाबिल्वशिवाऽऽदीनां फलं शुष्कं गुणाधिकम् ।
फलतुल्यगुणं सर्वं मज्जानमपि निर्दिशेत् ॥१५२॥
फलं हिमाग्निदुर्वातव्यालकीटादिदूषितम् ।
अकालजं कुभूमीजं पाकातीतं न भक्षयेत् ॥१५३॥
*पाकातीतं=पाकमतिक्रम्य स्थितम् ॥ १५३ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे सप्तम आम्रादिफलवर्गः समाप्तः ॥ ७ ॥

अथाष्टमो धात्वादिवर्गापरनामको धातूपधातुरसोपरसरत्नोपरत्नविषोपविषवर्गः ॥ ८ ॥

तत्र धातूनां लक्षणानि गुणाँश्चाह—

तत्रादौ धातुसंख्यामाह—

स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यसदमेव च ।
सीसं लौहञ्च सप्तैते धातवो गिरिसम्भवाः ॥ १ ॥

अथ धातुशब्दस्य निरुक्तिमाह—

वलीपलितखालित्यकार्श्यावल्यजरामयान् ।
निवार्य देहं दधति नृणां तद्धातवो मताः ॥ २ ॥

तत्रादौ सुवर्णस्योत्पत्तिं नामान्याह—

पुरा निजाश्रमस्थानां सप्तर्षीणां जितात्मनाम् ।
पत्नीर्विलोक्य लावण्यलक्ष्मीः सम्पन्नयौवनाः ॥ ३ ॥
*मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ।
वसिष्ठश्चेति सप्तैते कीर्त्तिताः परमर्षयः ॥ ३ ॥
कन्दर्पदर्पविध्वस्तचेतसो जातवेदसः ।
पतितं यद्धरापृष्ठे रेतस्तद्धेमतामगात् ॥ ४ ॥
कृत्रिमञ्चापि भवति तद्रसेन्द्रस्य वेधतः ।
स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ॥ ५ ॥
तपनीयं च गाङ्गेयं कलधौतं च काञ्चनम् ।
चामीकरं शातकुम्भं तथा कार्त्तस्वरं च तत् ॥ ६ ॥
जांबूनदं जातरूपं महारजतमित्यपि ॥ ७ ॥

अथोत्तमसुवर्णलक्षणमाह—

दाहे रक्तं सितं छेदे निषेके कुङ्कुमप्रभम् ।
तारं शुल्बोज्झितं स्निग्धं कोमलं गुरु हेम सत् ॥ ८ ॥

*सत्=उत्तमम् ॥ ८ ॥

अथ निकृष्टसुवर्णलक्षणमाह—

तच्छ्वेतं कठिनं रूक्षं विवर्णं समलं दलम् ।
दाहे छेदेऽसितं श्वेतं कषे त्याज्यं लघु स्फुटम् ॥९॥

*दलं="जोर" इति लोके । स्फुटं=यद्धनाहतं स्फुटति ॥ ९ ॥

अथ सम्यङ्मारितसुवर्णगुणानाह—

सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनम् ।
स्वादु तिक्तं च तुवरं पाके च स्वादु पिच्छिलम् ॥१०॥
पवित्रं बृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम् ।
हृद्यमायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत् ।
विषद्वयक्षयोन्मादत्रिदोषज्वरशोषजित् ॥ ११ ॥

अथासम्यङ्मारितसुवर्णदोषानाह—

बलं सवीर्यं हरते नराणां रोगव्रजान् पोषयतीह काये ।
असौख्यकृच्चापि सदा सुवर्णमशुद्धमेतन्मरणञ्च कुर्यात् ॥१२॥
असम्यङ्मारितं स्वर्णं बलं वीर्यञ्च नाशयेत् ।
करोति रोगान् मृत्युं च तद्धन्याद्यत्नतस्ततः ॥१३॥

अथ रूप्यम् ।

तस्योत्पत्तिमाह—

त्रिपुरस्य वधार्थाय निर्निमेषैर्विलोचनैः ।
निरीक्षयामास शिवः क्रोधेन परिपूरितः ॥ १४ ॥
अग्निस्तत्कालमपतत्तस्यैकस्माद्विलोचनात् ।
ततो रुद्रः समभवद् वैश्वानर इव ज्वलन् ॥ १५ ॥
द्वितीयादपतन्नेत्रादश्रुबिन्दुस्तु वामकात् ।
तस्माद्रजतमुत्पन्नमुक्तकर्मसु योजयेत् ॥ १६ ॥

अथ कृत्रिमरूप्योत्पत्तिमाह—

कृत्रिमं च भवेत्तद्धि वङ्गादिरसयोगतः ॥१७॥

अथ रूप्यनामान्याह—

रूप्यं तु रजतं तारं चन्द्रकान्ति सितप्रभम् ॥ १८ ॥

अथोत्तमाधमयो रूप्ययोर्लक्षणान्याह—

गुरु स्निग्धं मृदु श्वेतं दाहे छेदे घनक्षमम् ।
वर्णाढ्यं चन्द्रवत्स्वच्छं रूप्यं नवगुणं शुभम् ॥
कठिनं कृत्रिमं रूक्षं रक्तं पीतदलं लघु ।
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥ १९ ॥

अथ सम्यङ्मारितरूप्यगुणानाह—

रूप्यं शीतं कषायाम्लं स्वादुपाकरसं सरम् ।
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ।
प्रमेहादिकरोगाँश्च नाशयत्यचिराद् ध्रुवम् ॥ २० ॥

अथासम्यङ्मारितरूप्यदोषानाह—

तारं शरीरस्य करोति तापं विध्वंसनं यच्छति शुक्रनाशम् ।
वीर्यं बलं हन्ति तनोश्च पुष्टिं महागदान्पोषयति ह्यशुद्धम् ॥२१॥

अथ ताम्रम् ।

तस्योत्पत्तिमाह—

शुक्रं यत्कार्त्तिकेयस्य पतितं धरणीतले ।
तस्मात्ताम्रं समुत्पन्नमिदमाहुः पुराविदः ॥ २२ ॥

अथ ताम्रनामान्याह—

ताम्रमौदुम्बरं शुल्बमुदुम्बरमपि स्मृतम् ।
रविप्रियं म्लेच्छमुखं सूर्यपर्यायनामकम् ॥ २३ ॥

अथोत्तमताम्रलक्षणान्याह—

जपाकुसुमसङ्काशं स्निग्धं मृदु घनक्षमम् ।
लौहनागोज्झितं ताम्रं मारणाय प्रशस्यते ॥ २४ ॥

अथाधमताम्रलक्षणान्याह—

कृष्णं रूक्षमतिस्तब्धं श्वेतञ्चापि घनासहम् ।
लौहनागयुतञ्चेति शुल्बं दुष्टं प्रकीर्त्तितम् ॥ २५ ॥

अथ सम्यङ्मारितताम्रगुणानाह—

ताम्रं कषायं मधुरं च तिक्तमम्लं च पाके कटु सारकं च ।
पित्तापहं श्लेष्महरं च शीतं तद्रोपणं स्याल्लघु लेखनञ्च ॥२६॥
पाण्डूदराऽर्शोज्वरकुष्ठकासश्वासक्षयान् पीनसमम्लपित्तम् ।
शोथं कृमिं शूलमपाकरोति ाहुः परे बृंहणमल्पमेतत् ॥२७॥

अथासम्यङ्मारितताम्रस्य दोषाष्टकमाह—

एको दोषो विषे ताम्र त्वसम्यङ्मारितेऽष्ट ते ।
दाहः स्वेदोऽरुचिर्मूर्च्छा क्लेदो रेको वमिर्भ्रमः ॥२८॥

*रेकः = विरेकः ॥ २८ ॥

अथ रङ्गम् (रांगा)

तस्य नामानि भेदाँश्चाह—

रङ्गं वङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि ।
क्षुरकं मिश्रकं चापि द्विविधं वङ्गमुच्यते ॥ २९ ॥
उत्तमं क्षुरकं तत्र मिश्रकं त्ववरं मतम् ॥ ३० ॥

अथ सम्यङ्मारितरङ्गगुणानाह—

रङ्गं लघु सरं रूक्षमुष्णं मेहकफक्रिमीन् ।
निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक् ॥३१॥
सिंहो यथा हस्तिगणं निहन्ति तथैव वङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति नूनम् ॥३२॥

अथ यसदम् (जस्ता) ।

तस्य नामगुणानाह—

यसदं रङ्गसदृशं रीतिहेतुश्च तन्मतम् ।
यसदं तुवरं तिक्तं शीतलं कफपित्तहृत् ।
चक्षुष्यं परमं मेहान् पाण्डुं श्वासं च नाशयेत् ॥३३॥

अथ सीसम् ।

तस्योत्पत्तिं नामानि चाह—

दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोच यत् ॥३४॥
वीर्यं जातस्ततो नागः सर्वरोगापहो नृणाम् ।
सीसं ब्रध्नं च वप्रं च योगेष्टं नागनामकम् ॥ ३५ ॥
*नागनामकम् = नागोभुजंग इत्यादि ॥ ३५ ॥

अथ सीसस्य गुणानाह—

सीसं रङ्गगुणं ज्ञेयं विशेषान्मेहनाशनम् ॥ ३६ ॥
नागस्तु नागशततुल्यबलं ददाति
व्याधिं विनाशयति जीवनमातनोति ।
वह्निं प्रदीपयति कामबलं करोति
मृत्युं च नाशयति सन्ततसेवितः सः ॥ ३७ ॥

अथाशुद्धवङ्गनागयोर्दोषानाह—

पाकेन हीनौ किल वङ्गनागौ कुष्ठानि गुल्मांश्च तथाऽतिकष्टान् ।

कण्डूं प्रमेहानिलसादशोथभगन्दरादीन् कुरुतः प्रयुक्तौ ॥ ३८ ॥

अथ लोहम्

तस्योत्पत्तिं नामानि चाह—

पुरा लोमिनदैत्यानां निहतानां सुरैर्युधि ।
उत्पन्नानि शरीरेभ्यो लोहानि विविधानि च ॥ ३८ ॥
लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ॥ ३९ ॥

अथ लोहस्य सप्तदोषानाह—

गुरुता दृढतोत्क्लेदः कश्मलं दाहकारिता ।
अश्मदोषः सुदुर्गन्धो दोषाः सप्तायसस्य तु ॥ ४० ॥

अथ लोहगुणानाह—

लोहं तिक्तं सरं शीतं मधुरं तुवरं गुरु ।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् ॥ ४१ ॥
कफं पित्तं गरं शूलं शोथार्शःप्लीहपाण्डुताः ।
मेदोमेहक्रिमीन् कुष्ठं तत्किट्टं तद्वदेव हि ॥ ४२ ॥

अथाशुद्धलोहदोषानाह—

षण्ढत्वकुष्ठामयमृत्युदं भवेद्धृद्रोगशूलौ कुरुतेऽश्मरीञ्च ।
नानारुजानाञ्च तथा प्रकोपं करोति हृल्लासमशुद्धलोहम् ॥४३॥
जीवहारि मदकारि चायसं चेदशुद्धिमदसंस्कृतं ध्रुवम् ।
पाटवं न तनुते शरीरके दारुणां हृदि रुजाञ्च यच्छति ॥४४॥

अथ लोहसेविनां त्याज्यपदार्थानाह—

कूष्माण्डं तिलतैलञ्च माषान्नं राजिकां तथा ।
मद्यमम्लरसं चापि त्यजेल्लोहस्य सेवकः ॥ ४५ ॥

अथ सारलोहस्य लक्षणं गुणांश्चाह—

क्षमाभृच्छिखराकाराण्यङ्गान्यम्लेन लेपिते ।
लौहे स्युर्यत्र सूक्ष्माणि तत्सारमभिधीयते ॥
लोहं साराह्वयं हन्याद् ग्रहणीमतिसारकम् ॥ ४६ ॥
अर्द्धं सर्वाङ्गजं वातं शूलं च परिणामजम् ।
छर्दिं च पीनसं पित्तं श्वासं कासं व्यपोहति ॥ ४७ ॥

अथ कान्तलोहस्य लक्षणं गुणाँश्चाह—

यत्पात्रे न प्रसरति जले तैलबिन्दुः प्रतप्ते-
हिंगुर्गन्धं त्यजति च निजं तिक्ततां निम्बवल्कः ।
तप्तं दुग्धं भवति शिखराकारकं नैति भूमिं-
कृष्णाङ्गः स्यात् सजलचणकः कान्तलोहं तदुक्तम् ॥ ४८ ॥
गुल्मोदरार्शःशूलाममामवातं भगन्दरम् ।
कामलाशोथकुष्ठानि क्षयं कान्तमयो हरेत् ॥ ४९ ॥
प्लीहानमम्लपित्तञ्च यकृच्चापि शिरोरुजम् ॥ ५० ॥
सर्वान् रोगान् विजयते कान्तलोहं न संशयः ।
बलं वीर्यं वपुःपुष्टिं कुरुतेऽग्निं विवर्द्धयेत् ॥ ५१ ॥

अथ किट्टी ।

तस्या नामगुणानाह—

ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते
लोहसिंहानिका किट्टी सिंहानञ्च निगद्यते ।
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥ ५२ ॥

अथोपधातवः ।

तेषां संख्यामाह—

सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकं ।
तुत्थं कांस्यं च रीतिश्च सिन्दूरश्च शिलाजतु ॥ ५३ ॥

*उपधातवः=गौणा धातवः ॥ ५३ ॥

अथोपधातुष्वपि तत्तत्प्रधानधातु गुणाः—
स्वल्पमात्रया सन्तीत्याह—

उपधातुषु सर्वेषु तत्तद्धातुगुणा अपि ।
सन्ति किन्त्वेषु ते गौणास्तत्तदंशाल्पभावतः ॥ ५४ ॥

तत्र सुवर्णमाक्षिकम् (सोनामाखी) ।

तस्य नामानि गुणाँश्चाह—

स्वर्णमाक्षिकमाख्यातं तापीजं मधुमाक्षिकम् ॥ ५५ ॥
ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृतः ।

किञ्चित्सुवर्णसाहित्यात्स्वर्णमाक्षिकमीरितम् ॥ ५६ ॥
उपधातुः सुवर्णस्य किञ्चित्स्वर्णगुणान्वितम् ।
तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम् ॥ ५७ ॥
किन्तु तस्यानुकल्पत्वात्किञ्चिदूनगुणास्ततः ।
न केवलं स्वर्णगुणा वर्त्तन्ते स्वर्णमाक्षिके ॥ ५८ ॥
द्रव्यान्तरस्य संसर्गात्सन्त्यन्येऽपि गुणा यतः ।
सुवर्णमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम् ॥ ५९ ॥
चक्षुष्यं वस्तिरुक्कुष्ठपाण्डुमेहविषोदरान् ।
अर्शः शोथं विषं कण्डूं त्रिदोषमपि नाशयेत् ॥६०॥

अथाशुद्धसुवर्णमाक्षिकदोषानाह—

मन्दानलत्वं बलहानिमुग्रां विष्टम्भितां नेत्रगदान्सकुष्ठान् ।
तथैव मालां व्रणपूर्विकां च करोति तापीजमशुद्धमेतत् ॥६१॥

अथ तारमाक्षिकम् (रूपामाखी)।

तस्य नामानि गुणाँश्चाह—

तारमाक्षिकमन्यत् तु तद्भवेद् रजतोपमम् ।
किञ्चिद्रजतसाहित्यात्तारमाक्षिकमीरितम् ॥६२॥
अनुकल्पतया तस्य ततो हीनगुणाः स्मृताः ।
न केवलं रूप्यगुणा यतः स्यात्तारमाक्षिकम् ॥६३॥
स्वादु पाके रसे किञ्चित्तिक्तं वृष्यं रसायनम् ।
चक्षुष्यं वस्तिरुक्कुष्ठपाण्डुमेहविषोदरान् ।
अर्शः शोथं क्षयङ्कण्डूं त्रिदोषमपि नाशयेत् ॥ ६४ ॥

अथाशुद्धतारमाक्षिकदोषानाह—

मन्दानलत्वं बलहानिमुग्रां विष्टम्भितां नेत्रगदान्सकुष्ठान् ।
तथैव मालां व्रणपूर्विकाञ्च करोति तापीजमिदञ्च तद्वत् ॥६५॥

अथ तुत्थम् (तूतिया) ।

खर्परञ्च (खपरिया) ।

तुत्थनामगुणान् खर्परगुणाँश्चाह—

तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरकम् ।

तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत् ॥६६॥
किञ्चित्ताम्रगुणं तस्माद्वक्ष्यमाणगुणं च तत् ।
तुत्थकं कटुकं क्षारं कषायं वामकं लघु ॥६७॥
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत् ।
विषाश्मकुष्ठकण्डूघ्नं खर्परं चापि तद्गुणम् ॥ ६८ ॥

अथ कांस्यम् (काँसा) ।

तस्य नामानि गुणांश्चाह—

ताम्रत्रपुजमाख्यातं कांस्यं घोषं च कंसकम् ।
उपधातुर्भवेत्कांस्यं द्वयोस्तरणिरङ्गयोः ॥ ६९ ॥
कांस्यस्य तु गुणा ज्ञेयाः स्वयोनिसदृशा जनैः ।
संयोगजप्रभावेण तस्यान्येऽपि गुणाः स्मृताः ॥७०॥
कांस्यं कषायं तिक्तोष्णं लेखनं विशदं सरम् ।
गुरु नेत्रहितं रूक्षं कफपित्तहरं परम् ॥ ७१ ॥

अथारकूटम् (पीतल-कच्चापीतल) ।

तयोर्नामगुणानाह—

पित्तलं त्वारकूटं स्यादारो रीतिश्च कथ्यते ।
राजरीतिर्ब्रह्मरीतिः कपिला पिङ्गलाऽपि च ॥ ७२ ॥
रीतिरप्युपधातुः स्यात्ताम्रस्य यसदस्य च ।
पित्तलस्य गुणा ज्ञेयाः स्वयोनिसदृशा जनैः ॥ ७३ ॥
संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः ॥ ७४ ॥
रीतिकायुगलं रूक्षं तिक्तञ्च लवणं रसे ।
शोधनं पाण्डुरोगघ्नं कृमिघ्नं नातिलेखनम् ॥ ७५ ॥

सिन्दूरम् ।

तस्य नामगुणानाह—

सिन्दूरं रक्तरेणुश्च नागगर्भश्च सीसजम् ।
सीसोपधातुः सिन्दूरं गुणैस्तत्सीसवन्मतम् ॥७६॥
संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः ।
सिन्दूरमुष्णं वीसर्पकुष्ठकण्डूविषापहम् ।

भग्नसन्धानजननं व्रणशोधनरोपणम् ॥ ७ ॥

अथ शिलाजतु (शिलाजीत) ।

तस्योत्पत्ति भेदान् नामानि गुणांश्चाह—

निदाघे घर्मसन्तप्ता धातुसारं धराधराः ।
निर्यासवत्प्रमुञ्चन्ति तच्छिलाजतु कीर्त्तितम् ॥७८॥
सौवर्णं राजतं ताम्रमायसं तच्चतुर्विधम् ।
शिलाजत्वद्रिजतु च शैलनिर्यास इत्यपि ॥७९॥
गैरेयमश्मजं चापि गिरिजं शैलधातुजम् ।
शिलाजं कटु तिक्तोष्णं कटुपाकं रसायनम् ॥८०॥
छेदि योगवहं हन्ति कफमेहाश्मशर्कराः ।
मूत्रकृच्छ्रं क्षयं श्वासं वातार्शांसि च पाण्डुताम् ॥८१॥
अपस्मारं तथोन्माद शोथकुष्ठोदरक्रिमीन् ॥८२॥

अथ गुणलक्षणसहितांस्तद्भेदानाह—

सौवर्णं तु जपापुष्पवर्णं भवति तद्रसात् ।
मधुरं कटु तिक्तं च शीतलं कटुपाकि च ॥ ८३ ॥
राजतं पाण्डुरं शीतं कटुकं स्वादुपाकि च ।
ताम्रं मयूरकण्ठाभं तीक्ष्णमुष्णं च जायते ॥८४॥
लौहं जटायुपक्षाभं तत्तिक्तं लवणं भवेत् ।
विपाके कटुकं शीतं सर्वश्रेष्ठमुदाहृतम् ॥ ८५॥

अथ रसः ।

तत्र रसशब्दस्य निरुक्तिमाह—

रसायनार्थिभिर्लोकैः पारदो रस्यते यतः ।
ततो रस इति प्रोक्तः स च धातुरपि स्मृतः ॥८६॥

अथ पारदः ।

तस्योत्पत्तिं भेदानाह—

शिवाङ्गात्प्रच्युतं रेतः पतितं धरणीतले ।
तद्देहसारजातत्वाच्छुक्लमच्छमभूच्च तत् ॥ ८७ ॥
क्षेत्रभेदेन विज्ञेयं शिववीर्यं चतुर्विधम् ।
श्वेतं रक्तं तथा पीतं कृष्णं तत् तु भवेत्क्रमात् ॥ ८८ ॥

अथ पारदस्य जातिभेदेन कर्मभेदमाह—

ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च खलु जातितः ।
श्वेतं शस्तं रुजां नाशे रक्तं किल रसायने ॥
धातुवादे तु तत्पीतं खे गतौ कृष्णमेव च ॥८९॥

अथ पारदस्य नामगुणानाह—

पारदो रसधातुश्च रसेन्द्रश्च महारसः ॥ ९० ॥
चपलः शिववीर्यश्च रसः सूतः शिवाह्वयः ।
पारदः षड्रसः स्निग्धस्त्रिदोषघ्नो रसायनः ॥९१॥
योगवाही महावृष्यः सदा दृष्टिबलप्रदः ।
सर्वामयहरः प्रोक्तो विशेषात्सर्वकुष्ठनुत् ॥९२॥

अथ पारदस्यावस्थाभेदेन नामानि सर्वश्रेष्ठत्वं चाह—

स्वस्थो रसो भवेद् ब्रह्मा बद्धो ज्ञेयो जनार्दनः ।
रञ्जितः कामितश्चापि साक्षाद्देवो महेश्वरः ॥९३॥
मूर्च्छितो हरति रुजं बन्धनमनुभूय खे गतिं कुरुते ।
अजरीकरोति हि मृतः कोऽन्यः करुणाऽऽकरः सूतात् ॥९४॥
असाध्यो यो भवेद्रोगो यस्य नास्ति चिकित्सितम् ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥ ९५ ॥

अथ फलनिर्देशपूर्वकं पारदस्थितदोषानाह—

मलं विषं वह्निगिरित्वचापलं नैसर्गिकं दोषमुशन्ति पारदे ।
उपाधिजौ द्वौ त्रपुनागयोगजौ दोषौ रसेन्द्रे कथितौ मुनीश्वरैः॥९६॥
मलेन मूर्च्छा मरणं विषेण दाहोऽग्निना कष्टतरः शरीरे ।
देहस्य जाड्यं गिरिणा सदा स्याच्चाञ्चल्यतो वीर्यहृतिश्च पुंसाम्॥
वङ्गेन कुष्ठं भुजगेन षण्ढो भवेदतोऽसौ परिशोधनीयः ॥९७॥
वह्निर्विषं मलं चेति मुख्या दोषास्त्रयो रसे ।
एते कुर्वन्ति सन्तापं मृतिं मूर्च्छां नृणां क्रमात् ॥९८॥
अन्येऽपि कथिता दोषा भिषग्भिः पारदे यदि ।
तथाऽप्येते त्रयो दोषा हरणीया विशेषतः ॥९९॥

अथासंस्कृतपारदसेवननिषेधमाह—

संस्कारहीनं खलु सूतराजं यः सेवते तस्य करोति बाधाम् ।

देहस्य नाशं विदधाति नूनं कष्टांश्च रोगाञ्जनयेन्नराणाम् ॥१००॥

अथोपरसाः।

तेषां संख्यामाह—

गन्धो हिंगुलमभ्रतालकशिलाः स्रोतोऽञ्जनं टङ्कणं-
राजावर्तकचुम्बकौ स्फटिकया शङ्खः खटी गैरिकम्।
कासीसं रसकं कपर्दसिकताबोलाश्च कङ्कुष्ठकं-
सौराष्ट्री च मता अमी उपरसाः सूतस्य किञ्चिद्गुणैः १०१॥

अथ हिंगुलः।

तस्य नामानि सलक्षणभेदान् गुणांश्चाह—

हिङ्गुलं दरदं म्लेच्छं हिङ्गुलिश्चूर्णपारदम्।
दरदस्त्रिविधः प्रोक्तश्चमोरः शुकतुण्डकः ॥१०२।
हंसपादस्तृतीयः स्याद् गुणवानुत्तरोत्तरम् ॥ १०३ ॥
चर्मारः शुक्लवर्णः स्यात्स पीतः शुकतुण्डकः।
जापकुसुमसङ्काशा हंसपादो महोत्तमः ॥ १०४ ॥
तिक्तं कषायं कटु हिङ्गुलं स्यान्नेत्रामयघ्नं कफपित्तहारि।
हृल्लासकुष्ठज्वरकामलाश्च प्लीहामवातौ च गरं निहन्ति ॥ १०५ ॥

अथ हिङ्गुलोत्थं पारदं शुद्धमित्याह—

ऊर्द्ध्वपातनयुक्त्या तु डमरुयन्त्रपाचितम्।
हिङ्गुलं तस्य सूतं तु शुद्धमेव न शोधयेत् ॥ १०६ ॥

अथ गन्धकः।

तस्योत्पत्तिं नामानि भेदांश्चाह—

श्वेतद्वीपे पुरा देव्या क्रीडन्त्या रजसाऽऽप्लुतम्।
दुकूलं तेन वस्त्रेण स्नातायाः क्षीरनीरधौ ॥ १०७ ॥
प्रसृतं यद्रजस्तस्माद्गन्धकः समभूत्ततः।
गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि ॥ १०८ ॥
सौगन्धिकश्च कथितो बलिर्बलरसोऽपि च।
चतुर्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः ॥ १०९ ॥

अथ गन्धकभेदानामुपयोगविषयानाह—

रक्तो हेमक्रियासुक्तः पीतश्चैव रसायने।

व्रणादिलेपने श्वेतः कृष्णः श्रेष्ठः सुदुर्लभः ॥ ११० ॥
*श्रेष्ठः=हेमक्रियाऽऽदिषु सर्वत्र प्रशस्ततरः ॥ ११० ॥

अथ गन्धकगुणानाह—

गन्धकः कटुकस्तिक्तो वीर्योष्णस्तुवरः सरः ।
पित्तलः कटुकः पाके जन्तुकण्डूविसर्पजित् ।
हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः ॥ १११ ॥

अथाशुद्धगन्धकदोषानाह—

अशोधितो गन्धक एष कुष्ठं करोति तापं विषमं शरीरे ।
सौख्यं च रूपं च बलं तथौजः शुक्रं निहन्त्येव करोति चास्रम् ॥११२॥

अथाभ्रकम् ।

तस्योत्पत्तिमाह—

पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतम् ।
विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः ॥ ११३ ॥
ते निपेतुर्घनध्वानाच्छिखरेषु महीभृताम् ।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकम् ॥ ११४ ॥
तद्वज्रं वज्रजातत्वादभ्रमभ्ररवोद्भवात् ।
गगनात्स्खलितं यस्माद्गगनं च ततो मतम् ॥ ११५ ॥

अथाभ्रकभेदांस्तेषामुपयोगविषयानाह—

विप्रक्षत्रियविट्शूद्रभेदात्तत्स्याच्चतुर्विधम् ।
क्रमेणैव सितं रक्तं पीतं कृष्णं च वर्णतः ॥ ११६ ॥
प्रशस्यते सितं तारे रक्तं तत्तु रसायने ।
पीतं हेमनि कृष्णं तु गदेषु द्रुतयेऽपि च ॥ ११७ ॥

अथाभ्रकस्यान्यानपि भेदान् लक्षणगुणनिर्देशपूर्वकमाह—

पिनाकं दर्दुरं नागं वज्रं चेति चतुर्विधम् ।
मुञ्चत्यग्नौ विनिक्षिप्तं पिनाकं दलसञ्चयम् ॥ ११८ ॥
अज्ञानाद्भक्षणं तस्य महाकुष्ठप्रदायकम् ।
दर्दुरं त्वग्निनिक्षिप्तं कुरुते दर्दुरध्वनिम् ॥ ११९ ॥
गोलकान्बहुशः कृत्वा स स्यान्मृत्युप्रदायकः ।
नागं तु नागवद्वह्नौ फूत्कारं परिमुञ्चति ॥ १२० ॥

तद्भक्षितमवश्यं तु विदधाति भगन्दरम् ।
वज्रं तु वज्रवत्तिष्ठेत्तन्नाग्नौ विकृतिं व्रजेत् ॥ १२१ ॥
सर्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत् ॥ १२२ ॥

अथोत्पत्तिस्थानभेदेनाभ्रकस्य गुणभेदानाह—

अभ्रमुत्तरशैलोत्थं बहुसत्त्वं गुणाधिकम् ।
दक्षिणाद्रिभवं स्वल्पसत्त्वमल्पगुणप्रदम् ॥ १२३ ॥

अथ मृताभ्रकगुणानाह—

अभ्रं कषायं मधुरं सुशीतमायुष्करं धातुविवर्द्धनं च ।
हन्यात्त्रिदोषं व्रणमेदकुष्ठप्लीहोदरग्रन्थिविषक्रिमींश्च ॥१२४॥
रोगान्हन्ति द्रढयति वपुर्वीर्यवृद्धिं विधत्ते
तारुण्याढ्यं रमयति शतं योषितां नित्यमेव ।
दीर्घायुष्काञ्जनयति सुतान्विक्रमैः सिंहतुल्यान्-
मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रम् ॥ १२५ ॥

अथाशुद्धाभ्रकदोषानाह—

पीडां विधत्ते विविधां नराणां कुष्ठं क्षयं पाण्डुगदं च शोथम् ।
हृत्पार्श्वपीडां च करोत्यशुद्धमभ्रं त्वशुद्धं गुरु तापदं स्यात् ॥१२६॥

अथ हरितालम् ।

तस्य गुणलक्षणसहितान् भेदान् गुणांश्चाह—

हरितालं तु तालं स्यादालं तालकमित्यपि ।
हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम् ॥ १२७ ॥
तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परम् ।
स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत् ॥ १२८ ॥
पत्राख्यं तालकं विद्याद् गुणाढ्यं तद्रसायनम् ।
निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु ॥ १२९ ॥
स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिण्डतालकम् ।
हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम् ।
कण्डूकुष्ठास्यरोगास्रकफपित्तकचव्रणान् ॥ १३० ॥

अथाशुद्धस्यासम्यङ्मारितस्य च हरितालस्य दोषानाह—

हरति च हरितालं चारुतां देहजातां-

सृजति च बहुतापश्चाङ्गसङ्कोचपीडाम् ।
वितरति कफवातौ कुष्ठरोगं विदध्या-
दिदमशितमशुद्धं मारितं चाप्यसम्यक् ॥ १३१ ॥

अथ मनःशिला (मैनसिल) ।

तस्या नामानि गुणांश्चाह—

मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।
नैपाली कुनटी गोला शिला दिव्यौषधिः स्मृता ॥ १३२ ॥
मनःशिला गुरुर्वर्ण्या सरोष्णा लेखनी कटुः ।
तिक्ता स्निग्धा विषश्वासकासभूतकफास्रनुत् ॥ १३३ ॥

अथाशुद्धायास्तस्या दोषानाह—

मनःशिला मन्दबलं करोति जन्तुं ध्रुवं शोधनमन्तरेण ।
मलानुबन्धं किल मूत्ररोधं सशर्करं कृच्छ्रगदं च कुर्यात् ॥ १३४ ॥

अथ स्रोतोऽञ्जनं सौवीरं च (काला, सफेद सुरमा) ।

तयोर्नामलक्षणगुणानाह—

अञ्जनं यामुनं चापि कापोताञ्जनमित्यपि ।
तत्तु स्रोतोऽञ्जनं कृष्णं सौवीरं श्वेतमीरितम् ॥ १३५ ॥
वल्मीकशिखराकारं भिन्नमञ्जनसन्निभम् ।
घृष्टं तु गैरिकाकारमेतत्स्रोतोऽञ्जनं स्मृतम् ॥ १३६ ॥
स्रोतोऽञ्जनसमं ज्ञेयं सौवीरं तत्तु पाण्डुरम् ।
स्रोतोऽञ्जनं स्मृतं स्वादु चक्षुष्यं कफपित्तनुत ॥ १३७ ॥
कषायं लेखनं स्निग्धं ग्राहि च्छर्दिविषापहम् ।
सिध्मक्षयास्रहच्छीतं सेवनीयं सदा बुधैः ॥ १३८ ॥
स्रोतोऽञ्जनगुणाः सर्वे सौवीरेऽपि मता बुधैः ।
किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्रोतोऽञ्जनं स्मृतम् ॥ १३९ ॥

अथ टङ्कणः (सोहागा) ।

तस्य गुणानाह—

टङ्कणोऽग्निकरो रूक्षः कफघ्नो वातपित्तकृत् ॥ १४० ॥

*अयमुपरसत्वात् पुनरुक्तः ॥ १४० ॥

अथ स्फटिका (फट्किरी) ।

तस्या नामानि गुणांश्चाह—

स्फटी च स्फटिका प्रोक्ता श्वेता शुभ्रा च रङ्गदा ।
दृढरङ्गा रङ्गदृढा रङ्गाङ्गाऽपि च कथ्यते ॥ १४१ ॥
स्फटिका तु कषायोष्णा वातपित्तकफव्रणान् ।
निहन्ति श्वित्रवीसर्पान् योनिसङ्कोचकारिणी ॥ १४२ ॥

अथ राजावर्त्तः (रेवटी) ।

तस्य गुणानाह—

राजावर्त्तः कटुस्तिक्तः शिशिरः पित्तनाशनः ।
राजावर्त्तः प्रमेहघ्नश्छर्दिहिक्कानिवारणः ॥ १४३ ॥

अथ चुम्बकः ।

तस्य नामगुणानाह—

चुम्बकः कान्तपाषाणोऽयस्कान्तो लौहकर्षकः ।
चुम्बको लेखनः शीतो मेदोविषगरापहः ॥ १४४ ॥

अथ गौरिकं सुवर्णगैरिकं च ।

(गेरू-सोनागेरू)

तयोर्नाम गुणानाह—

गैरिकं रक्तधातुश्च गैरेयं गिरिजं तथा ।
सुवर्णगैरिकं त्वन्यत्ततो रक्ततरं हि तत् ॥ १४५ ॥
गैरिकद्वितयं स्निग्धं मधुरं तुवरं हिमम् ।
चक्षुष्यं दाहपित्तास्रकफहिक्काविषापहम् ॥ १४६ ॥

अथ खटिका गौरखटिका च ।

(खडिया, गौरखरिया) ।

तयोर्नामगुणानाह—

खटिका कठिनी चापि लेखनी च निगद्यते ।
खटी दाहास्रजिच्छीता मधुरा विषशोथजित् ॥ १४७ ॥
लेपादेतद्गुणा प्रोक्ता भक्षिता मृत्तिकासमा ।
खटी गौरखटी द्वे च गुणैस्तुल्ये प्रकीर्त्तिते ॥ १४८ ॥

अथ वालुका (बालू)

तस्या नामगुणानाह—

वालुका सिकता प्रोक्ता शर्करा रेतजाऽपि च ।
वालुका लेखनी शीता व्रणोरःक्षतनाशिनी ॥ १४९ ॥

अथ तुत्थभेदः खर्परी (खपरिया) ।

तस्या नाम गुणानाह—

खर्परी तुत्थकं तुत्थादन्यत्तद्रसकं स्मृतम् ।
ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः ॥१५०॥

अथ काशीशम् (कसीस) ।

तस्य नामानि भेदान् गुणांश्चाह—

काशीशं धातुकाशीशं पांशुकाशीशमित्यपि ।
तदेव किञ्चित्पीतं तु पुष्पकाशीशमुच्यते ॥ १५१ ॥
काशीशमम्लमुष्णं च तिक्तञ्च तुवरं तथा ।
वातश्लेष्महरं केश्यं नेत्रकण्डूविषप्रणुत् ॥
मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्त्तितम् ॥ १५२ ॥

अथ सौराष्ट्री मृत्तिका (सोरठी माटी) ।

तस्या नामगुणानाह—

सौराष्ट्री तुवरी काली मृत्तालकसुराष्ट्रजे ॥ १५३ ॥
आढकी चापि सा ख्याता मृत्स्ना च सुरमृत्तिका ।
स्फटिकाया गुणाः सर्वे सौराष्ट्र्या अपि कीर्त्तिताः ॥१५४॥

अथ कृष्णमृत्तिका (काली मट्टी) ।

तस्या गुणानाह—

कृष्णमृत् क्षतदाहास्रप्रदरश्लेष्मपित्तनुत् ॥१५५॥

अथ कर्दमः (कीचड) ।

तस्य गुणानाह—

कर्दमो दाहपित्तास्रशोथघ्नः शीतलः सरः ॥ १५६ ॥

अथ कपर्दकम (कौड़ी) ।

तस्य नामगुणानाह—

कपर्दको वराटश्च कपर्दी च वराटिका ।

कपर्दिका हिमा नेत्रहिता स्फोटक्षयापहा ॥
कर्णस्रावाग्निमान्द्यघ्नी पित्तास्रकफनाशिनी ॥१५७॥

अथ शङ्खः ।

तस्य नामगुणानाह—

शङ्खः समुद्रजः कम्बुः सुनादः पावनध्वनिः ।
शङ्खो नेत्र्यो हिमः शीतो लघुः पित्तकफास्रजित् ॥१५८॥

अथ बोलम् ।

तस्य नामानि गुणांश्चाह—

बोलगन्धरसप्राणपिण्डगोपरसाः समाः ।
बोलं रक्तहरं शीतं मेध्यं दीपनपाचनम् ॥
मधुरं कटु तिक्तञ्च दाहस्वेदत्रिदोषजित् ।
ज्वरापस्मारकुष्ठघ्नं गर्भाशयविशुद्धिकृत् ॥ १५९ ॥

अथ कंकुष्ठः (मुरदासंग) ।

तस्योत्पत्ति भेदौंश्चाह—

हिमवत्पादशिखरे कंकुष्ठमुपजायते ।
तत्रैकं रक्तकालं स्यात्तदन्यदण्डकं स्मृतम् ॥ १६० ॥

*हिमवत् पादशिखरे = हिमवतः प्रत्यन्तपर्वतानां शिखरे ॥१६०॥

अथोत्तमाधमकंकुष्ठयोर्लक्षणमाह—

पीतप्रभं गुरु स्निग्धं श्रेष्ठं कङ्कुष्ठमादिमम् ।
श्यामं पीतं लघु त्यक्तसत्त्वं नेष्टं तथाऽण्डकम् ॥१६१॥

अथ कंकुष्ठगुणानाह—

कंकुष्ठं काककुष्ठं च विरङ्गं कोलकाकुलम् ॥ १६२ ॥
कंकुष्ठं रेचनं तिक्तं कटूष्णं वर्णकारकम् ॥
कृमिशोथोदराध्मानगुल्मानाहकफापहम् ॥ १६३ ॥

अथ रत्नम् ।

तस्य निरुक्तिमाह—

धनार्थिनो जनाः सर्वे रमन्तेऽस्मिन्नतीव यत् ।
ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ॥ १६४ ॥

अथ रत्ननामान्याह—

रत्नं क्लीबे मणिः पुंसि स्त्रियामपि निगद्यते ।
तत्तु पाषाणभेदोऽस्ति मुक्ताऽऽदि च तदुच्यते ॥ १६५ ॥

*तथा चामरसिंहः—

रत्नं मणिर्द्वयोरश्मजातौ मुक्ताऽऽदिकेऽपि च ॥१६५॥

अथ रत्नानां संख्यामाह—

रत्नं गारुत्मतं पुष्परागो माणिक्यमेव च ।
इन्द्रनीलश्च गोमेदस्तथा वैदूर्यमित्यपि ।
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव॥ १६६ ॥

अथ विष्णुधर्मोत्तरेऽपि नवरत्ननिरूपणमाह—

मुक्ताफलं हीरकं च वैदूर्यं पद्मरागकम् ॥ १६७ ॥
पुष्परागं च गोमेदं नीलं गारुत्मतं तथा ।
प्रवालयुक्तान्येतानि महारत्नानि वै नव ॥ १६८ ॥

तत्र हीरकः ।

तस्य नामानि सलक्षणान् भेदानाह—

हीरकः पुंसि वज्रोऽस्त्री चन्द्रो मणिवरश्च सः ।
स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्रियः स्मृतः ।
पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णात्मकश्च सः ॥१६९॥

अथ तद्भेदानां गुणानाह—

रसायने मतो विप्रः सर्वसिद्धिप्रदायकः ।
क्षत्रियो व्याधिविध्वंसी जरामृत्युहरः स्मृतः ॥ १७० ॥
वैश्यो धनप्रदः प्रोक्तस्तथा देहस्य दार्ढ्यकृत् ।
शूद्रो नाशयति व्याधीन् वयःस्तम्भं करोति च ॥१७१॥

अथ पुंस्त्रीनपुंसकभेदात् त्रिविधस्य तस्य लक्षणानि-

गुणानुपयोगविषयाँश्चाह—

पुंस्त्रीनपुंसकानीह लक्षणीयानि लक्षणैः ।
सुवृत्ताः फलसम्पूर्णास्तेजोयुक्ता बृहत्तराः ॥१७२॥
पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिताः ॥

रेखाबिन्दुसमायुक्ताः षडस्रास्ते स्त्रियः स्मृताः ॥१७३॥

*षडस्राः-षट्कोणाः ॥ १७३ ॥

त्रिकोणाश्च सुदीर्घास्ते विज्ञेयाश्च नपुंसकाः ।
तेषु स्युः पुरुषाः श्रेष्ठा रसबन्धनकारिणः ॥ १७४ ॥
स्त्रियः कुर्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः ।
नपुंसकास्त्ववीर्याः स्युरकामाः सत्त्ववर्जिताः ॥१७५॥
स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीवं क्लीवे प्रयोजयेत् ।
सर्वेभ्यः सर्वदा देयाः पुरुषा वीर्यवर्धनाः ॥१७६॥

अथाशुद्धहीरकदोषानाह—

अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा ।
पाण्डुतां पङ्गुलत्वं च तस्मात्संशोध्य मारयेत् ॥१७७॥

अथ मारितस्य वज्रस्य गुणानाह—

आयुः पुष्टिं बलं वीर्यं वर्णं सौख्यं करोति च ।
सेवितं सर्वरोगघ्नं मृतं वज्रं न संशयः ॥ १७८ ॥

अथ गारुत्मतम् (पन्ना इति लोके) ।

तस्य नामान्याह—

गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ॥ १७९ ॥

अथ माणिक्यम् (चुन्नी) ।

तस्य नामान्याह—

माणिक्यं पद्मरागः स्याच्छोणरत्नञ्च लोहितम् ॥१८०॥

अथ पुष्परागः (पुखराज) ।

तस्य नामान्याह—

पुष्परागो मञ्जुमणिः स्याद्वाचस्पतिवल्लभः ॥१८१॥

अथेन्द्रनीलं गोमेदश्च (नीलम और गोमेदमणि) ।

तयोर्नामान्याह—

नीलं तथेन्द्रनीलञ्च गोमेदः पीतरत्नकम् ॥ १८२ ॥

अथ वैदूर्यम् (लहसुनिया) ।

तस्य नामान्याह—

वैदूर्यं दूरजं रत्नं स्यात्केतुग्रहवल्लभम् ॥ १८३ ॥

अथ मौक्तिकम् ।

तस्य नामान्युद्भवस्थानानि गुणाँश्चाह—

मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलञ्च तत् ।
शुक्तिः शङ्खो गजः क्रोडः फणी मत्स्यश्च दर्दुरः ॥
वेणुरेते समाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः ।
मौक्तिकं शीतलं वृष्यं चक्षुष्यं बलपुष्टिदम् ॥ १८४ ॥

अथ प्रवालः (मूँगा) ।

तस्य नामान्याह—

पुंसि क्लीबे प्रवालः स्यात्पुमानेव तु विद्रुमः ॥ १८५ ॥

अथ रत्नानां गुणानाह—

रत्नानि भक्षितानि स्युर्मधुराणि सराणि च ।
चक्षुष्याणि च शीतानि विषघ्नानि धृतानि च ।
मङ्गल्यानि मनोज्ञानि ग्रहदोषहराणि च ॥ १८६ ॥

किं रत्नं कस्य ग्रहस्य प्रीतिकारित्वेन दोषहरं भवतीति प्रश्ने तदुत्तरमाह, रत्नमालायाम्—

माणिक्यं तरणेः सुजातममलं मुक्ताफलं शीतगो-
र्माहेयस्य तु विद्रुमो निगदितः सौम्यस्य गारुत्मतम् ।
देवेज्यस्य च पुष्परागमसुराचार्यस्य वज्रं शने-
र्नीलं निर्मलमन्ययोर्निगदिते गोमेदवैदूर्यके ॥ १८७ ॥

अथोपरत्नानि ।

तेषां निरूपणमाह—

उपरत्नानि काचश्च कर्पूराश्मा तथैव च ।
मुक्ताशुक्तिस्तथा शङ्ख इत्यादीनि बहून्यपि ॥ १८८ ॥

*उपरत्नानि=गौणरत्नानि । कर्पूराश्मा=कर्पूरा, कर्पूरनिया । मुक्ताशुक्तिः='सीप' इति लोके प्रसिद्धा ॥ १८८ ॥

अथ तेषां गुणानाह—

गुणा यथैव रत्नानामुपरत्नेषु ते तथा ।
किन्तु किञ्चित्ततो हीना विशेषोऽयमुदाहृतः ॥ १८९ ॥

अथ विषम् ।

तस्य नामभेदानाह—

विषं तु गरलः क्ष्वेडस्तस्य भेदानुदाहरे ।
वत्सनाभः सहारिद्रः सक्तुकश्च प्रदीपनः ॥
सौराष्ट्रिकः शृङ्गकश्च कालकूटस्तथैव च ।
हालाहलो ब्रह्मपुत्रो विषभेदा अमी नव ॥ १९० ॥

तत्र वत्सनाभम् ।

तस्य स्वरूपनिरूपणमाह—

सिन्दुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा ।
यत्पार्श्वे न तरोर्वृद्धिर्वत्सनाभः स भाषितः ॥ १९१ ॥

अथ हारिद्रः ।

तस्य स्वरूपनिरूपणमाह—

हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः ॥ १९२ ॥

अथ सक्तुकः ।

तस्य स्वरूपमाह—

यद्ग्रन्थिः सक्तुकेनैव पू मध्यः स सक्तुकः ॥ १९३ ॥

अथ प्रदीपनः ।

तस्य स्वरूपमाह—

वर्णतो लोहितो यः स्याद्दीप्तिमान् दहनप्रभः ।
महादाहकरः पूर्वैः कथितः स प्रदीपनः ॥ १९४ ॥

अथ सौराष्ट्रिकः ।

तस्य स्वरूपमाह—

सुराष्ट्रविषये यः स्यात्स सौराष्ट्रिक उच्यते ॥ १९५ ॥

अथ शृङ्गिकः ।

तस्य स्वरूपमाह—

यस्मिन् गोशृङ्गके बद्धे दुग्धं भवति लोहितम् ।
स शृङ्गिक इति प्रोक्तो द्रव्यतत्त्वविशारदैः ॥ १९६ ॥

अथ कालकूटः ।

तस्योत्पत्तिं स्वरूपञ्चाह—

देवासुररणे देवैर्हतस्य पृथुमालिनः ।

दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः ॥
निर्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः ।
सोऽहिच्छत्रे शृङ्गवेरे कोङ्कणे मलये भवेत् ॥ १९७ ॥

अथ हालाहलः ।

तस्य स्वरूपमुत्पत्तिं चाह—

गोस्तनाभफलो गुच्छस्तालपत्रच्छदस्तथा ।
तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः ॥
असौ हालाहलो ज्ञेयः किष्किन्धायां हिमालये ।
दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते ॥ १९८ ॥

अथ ब्रह्मपुत्रः ।

तस्य स्वरूपमाह—

वर्णतः कपिलो यः स्यात्तथा भवति सारतः ।
ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले ॥ १९९ ॥

अथ विषस्य लक्षणोपयोगसहितान् भेदानाह—

ब्राह्मणः पाण्डुरस्तेषु क्षत्त्रियो लोहितप्रभः ।
वैश्यः पीतोऽसितः शूद्रो विष उक्तश्चतुर्विधः ॥ २०० ॥
रसायने विषं विप्रं क्षत्त्रियं देहपुष्टये ।
वैश्यं कुष्ठविनाशाय शूद्रं दद्याद्वधाय हि ॥ २०१ ॥

अथ विषस्य दुर्गुणानाह—

विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च ।
आग्नेयं वातकफहृद्योगवाहि मदावहम् ॥ २०२ ॥

*व्यवायि=सकलकायगुणव्यापनपूर्वकं पाकगमनशीलम् । विकाशि=ओजःशोषणपूर्वकं सन्धिबन्धशिथिलीकरणशीलम् । आग्नेयम्=अधिकाग्न्यंशम् । संयोगवाहि=सङ्गिगुणग्राहकम् । मदावहं=तमोगुणाधिक्येन बुद्धिविध्वंसकम् ॥ २०२ ॥

अथ शोधितविषस्य गुणानाह—

तदेव युक्तियुक्तं तु प्राणदायि रसायनम् ।
योगवाहि त्रिदोषघ्नं बृंहणं वीर्यवर्धनम् ॥ २०३ ॥

अथ विषशोधनस्यावश्यकतामाह—

ये दुर्गुणा विषेऽशुद्धे ते स्युर्हीना विशोधनात् ।
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत् ॥२०४॥

अथोपविषाः ।

तेषां निरूपणमाह—

अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः ।
गुञ्जाऽहिफेनो धत्तूरः सप्तोपविषजातयः ॥२०५॥

उपविषाः=गौणविषाः । एषां गुणास्तत्र तत्र द्रष्टव्याः ॥२०५॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणेऽष्टमो-
धात्वादिवर्गः समाप्तः ॥ ८ ॥

अथ नवमो धान्यवर्गः ९ ।

तत्र धान्यानां भेदाः ।

तानाह—

शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम् ।
शिम्बीधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकम् ॥ १ ॥

अथ शाल्यादीनां भेदानाह—

शालयो रक्तशाल्याद्या व्रीहयः षष्टिकादयः ।
यवादिकं शूकधान्यं मुद्गाद्यं शिम्बिधान्यकम् ॥
कङ्ग्वादिकं क्षुद्रधान्यं तृणधान्यञ्च तत्स्मृतम् ॥२॥

अथ शालिधान्यम् ।

तस्य लक्षणमाह—

कण्डनेन विना शुक्ला हैमन्ताः शालयः स्मृताः ॥३॥

अथ शालयः (चावल) ।

तेषां जातिभेदेन नामान्याह—

रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः ।
सुगन्धकः कर्दमको महाशालिश्च दूषकः ॥ ४ ॥
पुष्पाण्डकः पुण्डरीकस्तथा महिषमस्तकः ।

दीर्घशूकः काञ्चनको हायनो लोध्रपुष्पकः ॥ ५ ॥
इत्याद्याः शालयः सन्ति बहवो बहुदेशजाः ।
ग्रन्थविस्तरभीतेस्ते समस्ता नात्र भाषिताः ॥ ६ ॥

अथ शालीनां गुणानाह—

शालयो मधुराः स्निग्धा बल्या बद्धाल्पवर्चसः ।
कषाया लघवो रुच्याः स्वर्या वृष्याश्च बृंहणाः ॥ ७ ॥
अल्पानिलकफाः शीताः पित्तघ्ना मूत्रलास्तथा ।
शालयो दग्धमृज्जाताः कषाया लघुपाकिनः ।
सृष्टमूत्रपुरीषाश्च रूक्षाः श्लेष्मापकर्षणाः ॥ ८ ॥

अथ कैदारजशालिगुणानाह—

कैदारा वातपित्तघ्ना गुरवः कफशुक्रलाः ।
कषायाश्चाल्पवर्चस्का मेध्याश्चैव बलावहाः ॥ ९ ॥

*कैदाराः=कृष्टक्षेत्रजा उप्ताः ॥ ९ ॥

अथ स्थलजशालिगुणानाह—

स्थलजाः स्वादवः पित्तकफघ्ना वातवह्निदाः ।
किञ्चित्तिक्ताः कषायाश्च विपाके कटुका अपि ॥ १० ॥

*स्थलजाः=अकृष्टभूमिजाताः स्वयं जाताः ॥ १० ॥

अथ वापितशालिगुणानाह—

वापिता मधुरा वृष्या बल्याः पित्तप्रणाशनाः ।
श्लेष्मलाश्चाल्पवचस्काः कषाया गुरवो हिमाः ॥ ११ ॥

*वापिताः=कृष्टक्षेत्रेऽकृष्टक्षेत्रे च ॥ ११ ॥

अथावापितशालिगुणानाह—

वापितेभ्यो गुणैः किञ्चिद्धीनाः प्रोक्ता अवापिताः ॥ १२ ॥

*कृष्टक्षेत्रेऽकृष्टक्षेत्रे वा ॥ १२ ॥

अथ नव-पुराण-रोपित-शालिगुणानाह—

रोपितास्तु नवा वृष्याः पुराणा लघवः स्मृताः ।
तेभ्यस्तु रोपिता भूयः शीघ्रपाका गुणाधिकाः ॥ १३ ॥

अथ छिन्नरूढशालिगुणानाह—

छिन्नरुढा हिमा रूक्षा बल्याः पित्तकफापहाः ।

बद्धविट्काः कषायाश्च लघवश्चाल्पतिक्तकाः ॥ १४ ॥

अथ रक्तशालिः ।

तस्य गुणानाह—

रक्तशालिर्वरस्तेषु बल्यो वर्ण्यस्त्रिदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्यः शुक्रलस्तृड्ज्वरापहः ॥ १५ ॥
विषव्रणश्वासकासदाहनुद् वह्निपुष्टिदः ।
तस्मादल्पान्तरगुणाः शालयो महदादयः ॥ १६ ॥

*रक्तशालिः 'दाउदखानी' इति लोके मगधदेशे प्रसिद्धः॥१५-१६॥

अथ व्रीहिधान्यम् ।

तस्य लक्षणसहितान् भेदान् गुणांश्चाह--

वार्षिकाः कण्डिताः शुक्ला व्रीहयश्चिरपाकिनः ।
कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि ॥ १७ ॥
शालामुखो जतुमुख इत्याद्या व्रीहयः स्मृताः ।
कृष्णव्रीहिः स विज्ञेयो यत्कृष्णतुषतण्डुलः ॥ १८ ॥
पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते ।
कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते ॥ १९ ॥
शालामुखः कृष्णशूकः कृष्णतण्डुल उच्यते ।
लाक्षावर्णं मुखं यस्य ज्ञेयो जतुमुखस्तु सः ॥ २० ॥
व्रीहयः कथिताः पाके मधुरा वीर्यतो हिमाः ।
अल्पाभिष्यन्दिनो बद्धवर्चस्काः षष्टिकैः समाः ॥
कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे ॥ २१ ॥

अथ षष्टिकाः (साठीचावल) ।

तेषां लक्षणमाह--

गर्भस्था एव ये पाकं यान्ति ते षष्टिका मताः ॥ २२ ॥

अथ तेषां नामान्याह--

षष्टिकः शतपुष्पश्च प्रमोदकमुकुन्दकौ ।
महाषष्टिक इत्याद्याः षष्टिकाः समुदाहृताः ।
एतेऽपि व्रीहयः प्रोक्ता व्रीहिलक्षणदर्शनात् ॥ २३ ॥

अथ तेषां गुणानाह—

षष्टिका मधुराः शीता लघवो बद्धवर्चसः ।
वातपित्तप्रशमनाः शालिभिः सदृशा गुणैः ॥ २४ ॥

तत्र षष्टिकाया गुणानाह—

षष्टिका प्रवरा तेषां लघ्वी स्निग्धा त्रिदोषजित् ॥ २५ ॥
स्वाद्वी मृद्वी ग्राहिणी च बलदा ज्वरहारिणी ।
रक्तशालिगुणैस्तुल्या ततः स्वल्पगुणाः परे ॥ २६ ॥

अथ शूकधान्यानि ।

तत्र यवभेदानाह—

यवस्तु सितशूकः स्यान्निःशूकोऽतियवः स्मृतः ।
तोक्यस्तद्वत्स हरितस्ततः स्वल्पश्च कीर्त्तितः ॥ २७ ॥

*शूकधान्यानि तेषु यवः प्रसिद्धः । अतियवो निःशूकः, कृष्णा-रुणवर्णो यवः । तोक्यो हरितो निःशूकः स्वल्पो यवः "जई" इति प्रसिद्धः ॥ २७ ॥

अथ तेषां गुणानाह—

यवः कषायो मधुरः शीतलो लेखनो मृदुः ।
व्रणेषु तिलवत्पथ्यो रूक्षो मेधाऽग्निवर्धनः ॥ २८ ॥
कटुपाकोऽनभिष्यन्दी स्वर्यो बलकरो गुरुः ।
बहुवातमलो वर्णस्थैर्यकारी च पिच्छिलः ॥ २९ ॥
कण्ठत्वगामयश्लेष्मपित्तमेदःप्रणाशनः ।
पीनसश्वासकासोरुस्तम्भलोहिततृट्प्रणुत्
अस्मादतियवो न्यूनस्तोक्यो न्यूनतरस्ततः ॥ ३० ॥

अथ गोधूमः (गेहूँ) ।

तस्य नामानि सलक्षणभेदानाह—

गोधूमः सुमनोऽपि स्यात्त्रिविधः स च कीर्त्तितः ।
महागोधूम इत्याख्यः पश्चाद्देशात्समागतः ॥ ३१ ॥

*महागोधूमः="बड़ा गेहूं" इति लोके ॥ ३१ ॥

मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा ।
निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः ॥ ३२ ॥

अथ गोधूमगुणानाह—

गोधूमो मधुरः शीतो वातपित्तहरो गुरुः ।
कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत्सरः ॥ ३३ ॥
जीवनो बृंहणो वर्ण्यो व्रण्यो रुच्यः स्थिरत्वकृत् ॥ ३४ ॥

*कफप्रदो नवीनो न तु पुराणः ।
"पुराणयवगोधूमक्षौद्रजाङ्गलशूलभुग्" ॥
इति वाग्भटेन वसन्ते गृहीतत्वात् ॥ ३३–३४ ॥

अथ मधूलीनन्दीमुखयोर्गुणानाह—

मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः ।
शुक्रला बृंहणी पथ्या तद्वन्नन्दीमुखः स्मृतः ॥ ३५ ॥

अथ शिम्बीधान्यम् ।

तत्रादौ तस्य नामान्याह—

शमीजाः शिम्बिजाः शिम्बीभवाः सूप्याश्च वैदलाः ॥ ३६ ॥

अथ शिम्बीधान्यस्य गुणानाह—

वैदला मधुरा रूक्षाः कषायाः कटुपाकिनः ।
वातलाः कफपित्तघ्ना बद्धमूत्रमला हिमाः ॥
ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारिणः ॥ ३७ ॥

*मुद्गमसूरयोराध्मानकारित्वमन्यवैदलापेक्षया, न तु सर्वथा, एतयोरपि किञ्चिदाध्मानकारित्वदर्शनात् ॥ ३७ ॥

अथ मुद्गः (मूँग)

तस्य सभेदस्य गुणानाह—

मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरो हिमः ।
स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा ॥ ३८ ॥
मुद्गो बहुविधः श्यामो हरितः पीतकस्तथा ।
श्वेतो रक्तश्च तेषान्तु पूर्वः पूर्वो लघुः स्मृतः ॥ ३९ ॥
सुश्रुतेन पुनः प्रोक्तो हरितः प्रवरो गुणैः ।
चरकादिभिरप्युक्त एष एव गुणाधिकः ॥ ४० ॥

अथ माषः (उरद)।

तस्य गुणानाह—

माषो गुरुः स्वादुपाकः स्निग्धो रुच्योऽनिलापहः।
स्रंसनस्तर्पणो बल्यः शुक्रलो बृंहणः परः ॥ ४१ ॥
भिन्नमूत्रमलः स्तन्यो मेदःपित्तकफप्रदः।
गुदकीलार्दितश्वासपक्तिशूलानि नाशयेत् ॥ ४२ ॥
कफपित्तकरा माषाः कफपित्तकरं दधि ।
कफपित्तकरा मत्स्या वृन्ताकं कफपित्तकृत् ॥ ४३ ॥

अथ राजमाषः (बोड़ा)।

[यस्य च "वेरातरा" "लोविया" इत्यादयो भेदाः]।

तस्य नामानि तद्भेदगुणांश्चाह—

राजमाषो महामाषश्चपलश्च बलः स्मृतः।
राजमाषो गुरुः स्वादुस्तुवरस्तर्पणः सरः ॥ ४४ ॥
रूक्षो वातकरो रुच्यः स्तन्यो भूरिबलप्रदः।
श्वेतो रक्तस्तथा कृष्णस्त्रिविधः स प्रकीर्तितः ॥
यो महांस्तेषु भवति स एवोक्तो गुणाधिकः ॥ ४५ ॥

अथ निष्पावः।

स तु राजशिम्बीबीजं [भटवासु] इति लोके।

तस्य नामानि गुणांश्चाह—

निष्पावो राजशिम्बिः स्याद्वल्लकः श्वेतशिम्बिकः।
निष्पावो मधुरो रूक्षो विपाकेऽम्लो गुरुः सरः ॥ ४६ ॥
कषायः स्तन्यपित्तास्रमूत्रवातविबन्धकृत्।
विदाह्युष्णो विषश्लेष्मशोथहृच्छुक्रनाशनः ॥ ४७ ॥

अथ वनमुद्गः [मोठ]।

तस्य नामानि गुणांश्चाह—

मकुष्ठो वनमुद्गः स्यान्मकुष्ठकमुकुष्ठकौ ॥ ४८ ॥
मकुष्ठो वातलो ग्राही कफपित्तहरो लघुः।
वह्निजिन्मधुरः पाके कृमिकृज्ज्वरनाशनः ॥ ४९ ॥

अथ मसूरः (मसुरी) ।

तस्य नामानि गुणांश्चाह—

मङ्गल्यको मसूरः स्यान्मङ्गल्या च मसूरिका ।
मसूरो मधुरः पाके संग्राही शीतलो लघुः ॥
कफपित्तास्रजिद्रूक्षो वातलो ज्वरनाशनः ॥ ५० ॥

अथाढकी (अरहर) ।

तस्या नामगुणानाह—

आढकी तुवरी चापि सा प्रोक्ता शणपुष्पिका ॥ ५१ ॥
आढकी तुवरा रूक्षा मधुरा शीतला लघुः ।
ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित् ॥ ५२ ॥

अथ चणकः (चना) ।

तस्य नामानि गुणांश्चाह—

चणको हरिमन्थः स्यात्सकलप्रिय इत्यपि ।
चणकः शीतलो रूक्षः पित्तरक्तकफापहः ।
लघुः कषायो विष्टम्भी वातलो ज्वरनाशनः ॥ ५३ ॥

अथ भर्जनादिभेदेन तस्य गुणभेदानाह—

स चाङ्गारेण सम्भृष्टस्तैलभृष्टश्च तद्गुणः ।
आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्त्तितः ॥ ५४ ॥
शुष्कभृष्टोऽतिरूक्षश्च वातकुष्ठप्रकोपणः ।
स्विन्नः पित्तकफं हन्यात् सूपः क्षोभकरो मतः ॥ ५५ ॥
आर्द्रोऽतिकोमलो रुच्यः पित्तशुक्रहरो हिमः
कषायो वातलो ग्राही कफपित्तहरो लघुः ॥ ५६ ॥

अथ कलायः (मटर) ।

तस्य नामगुणानाह—

कलायो वर्त्तुलः प्रोक्तः सतीनश्च हरेणुकः ।
कलायो मधुरः स्वादुः पाके रूक्षश्च शीतलः ॥ ५७ ॥

अथ त्रिपुटः (खेसारी) ।

तस्य नामगुणानाह—

त्रिपुटः खण्डिकोऽपि स्यात्कथ्यन्ते तद्गुणा अथ ।

त्रिपुटो मधुरस्तिक्तस्तुवरो रूक्षणो भृशम् ॥ ५८ ॥
कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा ।
किन्तु खञ्जत्वपङ्गुत्वकारी वातातिकोपनः ॥ ५६ ॥

अथ कुलत्थः (कुलथी) ।

तस्य नामानि गुणाँश्चाह—

कुलत्थिका कुलत्थश्च कथ्यन्ते तद्गुणा अथ ॥ ६० ॥
कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत् ।
लघुर्विदाही वीर्योष्णः श्वासकासकफानिलान् ॥ ६१ ॥
हन्ति हिक्काऽश्मरीशुक्रदाहानाहान् सपीनसान् ।
स्वेदसंग्राहको मेदोज्वरक्रिमिहरः सरः ॥ ६२ ॥

अथ तिलः ।

तस्य तद्भेदानां च गुणानाह—

तिलः कृष्णः सितो रक्तः स वन्योऽल्पतिलः स्मृतः ।
तिलो रसे कटुस्तिक्तो मधुरस्तुवरो गुरुः ॥ ६३ ॥
विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तनुत् ।
बल्यः केश्यो हिमस्पर्शस्त्वच्यः स्तन्यो व्रणे हितः ॥ ६४ ॥
दन्त्योऽल्पमूत्रकृद् ग्राही वातघ्नोऽग्निमतिप्रदः ।
कृष्णः श्रेष्ठतमस्तेषु शुक्लो मध्यमः सितः
अन्ये हीनतराः प्रोक्तास्तज्ज्ञै रक्तादयस्तिलाः ॥ ६५ ॥

अथातसी (तीसी) ।

तस्या नामगुणानाह—

अतसी नीलपुष्पी च पार्वती स्यादुमा क्षुमा ॥ ६६ ॥
अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरुः ।
उष्णा दृक्शुक्रवातघ्नी कफपित्तविनाशिनी ॥ ६७ ॥

अथ तुवरी (तोरी, तोडिस" इति लोके) ।

तस्या गुणानाह—

तुवरी ग्राहिणी प्रोक्ता लघ्वी कफविषास्रजित ।
तीक्ष्णोष्णा वह्निदा कण्डूकुष्ठकोष्ठक्रिमिप्रणुत् ॥ ६८ ॥

अथ सर्षपः रक्तः-पीतश्च ।

(लाल सरसों और पीली सरसों) ।

तयोर्नामगुणानाह—

सर्षपः कटुकः स्नेहस्तुन्तुभश्च कदम्बकः ।
गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते ॥ ६९ ॥
सर्षपस्तु रसे पाके कटुः स्निग्धः सतिक्तकः ।
तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्धनः ॥ ७० ॥
रक्षोहरो जयेत्कण्डूं कुष्ठकोष्ठक्रिमिग्रहान् ।
यथा रक्तस्तथा गौरः किन्तु गौरो वरो मतः ॥ ७१ ॥

अथ राजिका कृष्णराजिका च ।

(राई, कृष्णराई) ।

तयोर्नामानि गुणांश्चाह—

राजी तु राजिका तीक्ष्णगन्धा क्षुज्जनिकाऽऽसुरी ।
क्षवः क्षुताभिजनकः कृमिकृत् कृष्णसर्षपः ॥ ७२ ॥
राजिका कफपित्तघ्नी तीक्ष्णोष्णा रक्तपित्तकृत् ।
किञ्चिद् रूक्षाऽग्निदा कण्डूकुष्ठकोष्ठक्रिमीन्हरेत् ।
अतितीक्ष्णा विशेषेण तद्वत्कृष्णाऽपि राजिका ॥ ७३ ॥

अथ क्षुद्रधान्यम् ।

तस्य नामगुणानाह—

क्षुद्रधान्यं कुधान्यं च तृणधान्यमिति स्मृतम् ।
क्षुद्रधान्यमनुष्णं स्यात्कषायं लघु लेखनम् ॥ ७४ ॥
मधुरं कटुकं पाके रूक्षं च क्लेदशोषकम् ।
वातकृद् बद्धविट्कं च पित्तरक्तकफापहम् ॥ ७५ ॥

अथ कङ्गुः (कङ्गुनी) ।

तस्या नामभेदगुणानाह—

स्त्रियां कङ्गुप्रियङ्गू द्वे कृष्णा रक्ता सिता तथा ।
पीता चतुर्विधा कङ्गुस्ताम्रा पीता वरा स्मृता ॥ ७६ ॥
कङ्गुस्तु भग्नसन्धानवातकृद् बृंहणो गुरुः ।
रूक्षा श्लेष्महराऽतीव वाजिनां गुणकृद् भृशम् ॥ ७७ ॥

अथ चीनाकः (चैना)।

तस्य नामगुणानाह—

चीनाकः कङ्गुभेदोऽस्ति स ज्ञेयः कङ्गुवद् गुणैः ॥ ७८ ॥

अथ श्यामाकः (सामा)।

तस्य गुणानाह—

श्यामाकः शोषणो रूक्षो वातलः कफपित्तहृत् ॥ ७६ ॥

अथ कोद्रवः वनकोद्रवश्च (कोदो-वनकोदो)।

तयोर्नामानि गुणांश्चाह—

कोद्रवः कोरदूषः स्यादुद्दालो वनकोद्रवः ।
कोद्रवो वातलो ग्राही हिमः पित्तकफापहः ॥
उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम् ॥ ८०

अथ चारुकः (सरबीजः)।

तस्य नामगुणानाह—

चारुकः सरबीजः स्यात्कथ्यन्ते तद्गुणा अथ ।
चारुको मधुरो रूक्षो रक्तपित्तकफापहः ॥
शीतलो लघुवृष्यश्च कषायो वातकोपनः ॥ ८१ ॥

अथ वंशयवाः (बांशके बीज)।

तेषां गुणानाह—

यवा वंशभवा रूक्षाः कषायाः कटुपाकिनः ।
बद्धमूत्राः कफघ्नाश्च वातपित्तकराः सराः ॥ ८२ ॥

अथ कुसुम्भबीजम् (कसुमके बीज, कर्रे)।

तस्य नामगुणानाह—

कुसुम्भबीजं वरटा सैव प्रोक्ता वरट्टिका ॥ ८३ ॥
वरटा मधुरा स्निग्धा रक्तपित्तकफापहा ।
कषाया शीतला गुर्वी स्यादवृष्याऽनिलापहा ॥ ८४ ॥

अथ गवेधुका (गरहेडुआ)।

तस्या नामगुणानाह—

गवेधुका तु विद्वद्भिर्गवेधुः कथिता स्त्रियाम् ।
गवेधुः कटुका स्वाद्वी कार्श्यकृत्कफनाशिनी ॥ ८५ ॥

अथ नीवारः (तीनी) ।

तस्य नामगुणानाह—

प्रसाधिका तु नीवारस्तृणान्तमिति च स्मृतम् ।
नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत् ॥ ८६ ॥

अथ यावनालः (पनेरा, जुआर) ।

तस्य गुणानाह—

यावनालो हिमः स्वादुर्लोहितः श्लेष्मपित्तजित् ।
अवृष्यस्तुवरो रूक्षः क्लेदकृत्कथितो लघुः ॥८७॥

अथ परिभाषामाह—

धान्यं सर्वं नवं स्वादु गुरु श्लेष्मकरं स्मृतम् ।
तत्तु वर्षोषितं पथ्यं यतो लघुतरं हि तत् ॥ ८८ ॥
वर्षोषितं सर्वधान्यं गौरवं परिमुञ्चति ।
न तु त्यजति वीर्यं स्वं क्रमान्मुञ्चत्यतः परम् ॥८९॥
एतेषु यवगोधूमतिलमाषा नवा हिताः ।
पुराणा विरसा रूक्षा न तथा गुणकारिणः ॥९०॥

*पुराणा वर्षद्वयादुपरि स्थिताः । यवादयो नवाः स्वस्थान् प्रति हिताः । पथ्याशिनां तु पुराणा हिताः ॥

"पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुग् ।"
इति वसन्ते वाग्भटेनोक्तत्वात् ॥ ९० ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे नवमो धान्यवर्गः समाप्तः ॥ ९ ॥

अथ दशमः शाकवर्गः ।

तत्र शाकनिरूपणमाह—

पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम् ॥ १ ॥

अथ शाकानां गुणानाह—

प्रायः शाकानि सर्वाणि विष्टम्भीनि गुरूणि च ।

रूक्षाणि बहुवर्चांसि सृष्टविण्मारुतानि च ॥ २ ॥
शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रं-
वर्णं विनाशयति रक्तमथापि शुक्रम् ।
प्रज्ञाक्षयं च कुरुते पलितं च नूनं
हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः ॥ ३ ॥
शाकेषु सर्वेषु वसन्ति रोगास्ते हेतवो देहविनाशनाय ।
तस्माद् बुधः शाकविवर्जनं तु कुर्य्यात्तथाऽम्लेषु स एव दोषः॥४॥
*एतानि शाकनिन्दकानि वचनानि सामान्यानि ॥२–४॥
अथ शाकेषु विशिष्टानि वचनानि । तत्र पत्रशाकानि ।
तत्रापि वास्तूकद्वयम् (दोनो वथुआ) ।

तस्य नामानि गुणांश्चाह—

वास्तूकं वास्तुकं च स्यात्क्षारपत्रं च शाकराट् ।
तदेव तु बृहत्पत्रं रक्तं स्याद्गौडवास्तुकम् ॥ ५ ॥
प्रायशो यवमध्ये स्याद्यवशाकमतः स्मृतम् ।
वास्तूकद्वितयं स्वादु क्षारं पाके कटूदितम् ॥ ६ ॥
दीपनं पाचनं रुच्यं लघु शुक्रबलप्रदम् ।
सरं प्लीहास्रपित्तार्शःकृमिदोषत्रयापहम् ॥ ७ ॥

अथ पोतकी (पोई) ।

तस्या नामगुणानाह—

पोतक्युपोदिका सा तु मालवाऽमृतवल्लरी ।
पोतकी शीतला स्निग्धा श्लेष्मला वातपित्तनुत् ॥८॥
अकण्ठ्या पिच्छिला निद्राशुक्रदा रक्तपित्तजित् ।
बलदा रुचिकृत्पथ्या बृंहणी तृप्तिकारिणी ॥९॥
अथ श्वेतरक्तमारिषौ (सफेद व लाल मरसा) ।

तयोर्नामानि गुणांश्चाह—

मारिषो वाष्पको मार्षः श्वेतो रक्तश्च स स्मृतः ।
मारिषो मधुरः शीतो विष्टम्भी पित्तनुद् गुरुः ॥१०॥
वातश्लेष्मकरो रक्तपित्तनुद् विषमाग्निजित् ।

रक्तमार्षो गुरुर्नाति सक्षारो मधुरः सरः ।
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः ॥११॥

अथ तण्डुलीयः (चौलाई) ।

तस्य नामगुणानाह—

तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ।
भण्डीरस्तण्डुलीबीजो विषघ्नश्चाल्पमारिषः ॥१२॥
तण्डुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित् ।
सृष्टमूत्रमलो रुच्यो दीपनो विषहारकः ॥ १३ ॥

अथ पानीयतण्डुलीयम् (जलचौलाई) ।

(चौलाईभेदो जलतण्डुलीयं शास्त्र कञ्चट मिति प्रसिद्धम्) ।

तस्य नामगुणानाह—

पानीयतण्डुलीयं तु कञ्चटं समुदाहृतम् ।
कञ्चटं तिक्तकं रक्तपित्तानिलहरं लघु ॥ १४ ॥

अथ पलक्या (पालक) ।

तस्या नामानि गुणांश्चाह—

पलक्या वास्तुकाकारा छुरिका चीरितच्छदा ॥१५॥
पलक्या वातला शीता श्लेष्मला भेदिनी गुरुः ।
विष्टम्भिनी मदश्वासपित्तरक्तकफापहा ॥ १६ ॥

अथ कालशाकम (नाडीका शाक) ।

तस्य नामगुणानाह—

नाडिकं कालशाकं च श्राद्धशाकं च कालकम् ।
कालशाकं सरं रुच्यं वातकृत्कफशोथहृत् ।
बल्यं रुचिकरं मेध्यं रक्तपित्तहरं हिमम् ॥ १७ ॥

अथ पट्टशाकः (पटुआ शाक) ।

तस्य नामानि गुणाँश्चाह—

पट्टशाकस्तु नाडीको नाडीशाकश्च स स्मृतः ।
नाडीको रक्तपित्तघ्नो विष्टम्भी वातकोपनः ॥१८॥

अथ कलम्बी (कलमी शाक) ।

तस्या नामगुणानाह—

कलम्बी शतपर्वी च कथ्यन्ते तद्गुणा अथ ।
कलम्बी स्तन्यदा प्रोक्ता मधुरा शुक्रकारिणी ॥१९॥

अथ लोणा बृहल्लोणी च ।

(नोनिया, बड़ा नोनिया, कुलफा,) ।

तयोर्नामगुणानाह—

लोणा लोणी च कथिता बृहल्लोणी तु घोटिका ।
लोणी रूक्षा स्मृता गुर्वी वातश्लेष्महरी पटुः ॥२०॥
अर्शोघ्नी दीपनी चाम्ला मन्दाग्निविषनाशिनी ।
घोटिकाऽम्ला सरा चोष्णा वातकृत्कफपित्तहृत् ॥२१॥
वाग्दोषव्रणगुल्मघ्नी श्वासकासप्रमेहनुत् ।
शोथे लोचनरोगे च हिता तज्ज्ञैरुदाहृता ॥ २२ ॥

अथ चाङ्गेरी (अम्बिलोना) ।

तस्या नामानि गुणांश्चाह—

चाङ्गेरी चुक्रिका दन्तशठाऽम्बष्ठाऽम्ललोणिका ।
अश्मन्तकस्तु शफरी कुशली चाम्लपत्रकः ॥ २३ ॥
चाङ्गेरी दीपनी रुच्या रूक्षोष्णा कफवातनुत् ।
पित्तलाऽम्ला ग्रहण्यर्शःकुष्ठातीसारनाशिनी ॥२४॥

अथ चुक्रिका (चूक) ।

तस्या नामगुणानाह—

चुक्रिका स्यात्तु पत्राम्ला रोचनी शतवेधिनी ॥२५॥
चुक्रा त्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत् ।
रुच्या लघुतरा पाके वृन्ताकेनातिरोचनी ॥ २६ ॥

अथ चञ्चुकी (चेवुना) ।

तस्या नामगुणानाह—

चिञ्चा चञ्चुश्चञ्चुकी च दीर्घपत्रा सतिक्तका ।
चञ्चुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा ॥
धातुपुष्टिकरी बल्या मेध्या पिच्छिलका स्मृता ॥२७॥

अथ हिलमोचिका (वामनहाटी-हुरहुर) ।

तस्या नामगुणानाह—

ब्राह्मी शङ्खधराऽऽचारी मत्स्याक्षी हिलमोचिका ।
शोथं कुष्ठं कफं पित्तं हरते हिलमोचिका ॥ २८ ॥

अथ शितिवारः (शिरियारी, चौपती) ।

तस्य नामलक्षगुणानाह—

शितिवारः शितिवरः स्वस्तिकः सुनिषण्णकः ।
श्रीवारकः सूचिपत्रः पर्णकः कुक्कुटः शिखी ॥२९॥
चाङ्गेरीसदृशः पत्रैश्चतुर्दल इतीरितः ।
शाको जलान्विते देशे चतुष्पत्रीति चोच्यते ॥३०॥
सुनिषण्णो हिमो ग्राही मेदोदोषत्रयापहः ॥ ३१ ॥
अविदाही लघुः स्वादुः कषायो रूक्षदीपनः ।
वृष्यो रुच्यो ज्वरश्वासमेहकुष्ठभ्रमप्रणुत् ॥ ३२ ॥

अथ मूलकपत्रम् (मुरई का पत्ता) ।

तस्य गुणानाह—

पाचनं लघु रुच्योष्णं पत्रं मूलकजं नवम् ।
स्नेहसिद्धं त्रिदोषघ्नमसिद्धं कफपित्तकृत् ॥ ३३ ॥

अथ द्रोणपुष्पी (गूमा) ।

तस्या गुणानाह—

द्रोणपुष्पीदलं स्वादु रूक्षं गुरु च पित्तकृत ।
भेदनं कामलाशोथमेहज्वरहरं कटु ॥३४॥

अथ यवानीशाकम् (अजवाइन का शाक) ।

तस्य गुणानाह—

यवानीशाकमाग्नेयं रुच्यं वातकफप्रणुत् ।
उष्णं कटु च तिक्तं च पित्तलं लघु शूलहृत् ॥३५॥

अथ दद्रुघ्नपत्रम् (पमार, चकवड शाक) ।

तस्य गुणानाह—

दद्रुघ्नपत्रं दोषघ्नमम्लं वातकफापहम् ।
कण्डूकासक्रिमिश्वासदद्रकुष्ठप्रणुल्लघु ॥ ३६ ॥

अथ सेहुण्डः (थूहर)।

तत्पत्रस्य गुणानाह—

सेहुण्डस्य दलं तीक्ष्णं दीपनं रेचनं हरेत्।
आध्मानाष्ठीलिकागुल्मशूलशोथोदराणि च ॥ ३७ ॥

अथ पर्पटः (पित्त पापडा)।

तस्य गुणानाह—

पर्पटो हन्ति पित्तास्रज्वरतृष्णाकफभ्रमान्।
संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः ॥ ३८ ॥

अथ गोजिह्वा (गोभीके पत्ते)।

तस्या गुणानाह—

गोजिह्वा कुष्ठमेहास्रकृच्छ्रज्वरहरी लघुः ॥ ३९ ॥

अथ पटोलपत्रम् (पटोलपात)।

तस्य गुणानाह—

पटोलपत्रं पित्तघ्नं दीपनं पाचनं लघु।
स्निग्धं वृष्यं तथोष्णं च ज्वरकासक्रिमिप्रणुत् ॥४०॥

अथ गुडूचीपत्रम् (गिलोयशाक)।

तस्य गुणानाह—

गुडूचीपत्रमाग्नेयं सर्वज्वरहरं लघु।
कषायं कटु तिक्तं च स्वादुपाकं रसायनम् ॥ ४१ ॥
बल्यमुष्णं च संग्राहि हन्याद्दोषत्रयं तृषाम्।
दाहप्रमेहवातासृक्कामलाकुष्ठपाण्डुताः ॥४२॥

अथ कासमर्दः (कसौंदी शाक)।

तस्य नामानि तत्पत्रस्य गुणाँश्चाह—

कासमर्दोऽरिमर्दश्च कासारिः कर्कशस्तथा।
कासमर्ददलं रुच्यं वृष्यं कासविषास्रनुत् ॥४३॥
मधुरं कफवातघ्नं पाचनं कण्ठशोधनम्।
विशेषतः कासहरं पित्तघ्नं ग्राहकं लघु ॥ ४४ ॥

अथ चणकशाकम् (चनेका शाक)।

तस्य गुणानाह—

रुच्यं चणकशाकं स्याद् दुर्जरं कफवातकृत्।

अम्लं विष्टम्भजनकं पित्तनुद्दन्तशोथहृत् ॥ ४५ ॥

अथ कलायशाकम् (मटरका शाक)।

तस्य गुणानाह—

कलायशाकं भेदि स्याल्लघु तिक्तं त्रिदोषजित् ॥४६॥

अथ सार्षपं शाकम् (सरसों का शाक,)।

तस्य गुणानाह—

कटुकं सार्षपं शाकं बहुमूत्रमलं गुरु ।
अम्लपाकं विदाहि स्यादुष्णं रूक्षं त्रिदोषकृत् ।
सक्षारलवणं तीक्ष्णं स्वादु शाकेषु निन्दितम् ॥ ४७ ॥

अथ पुष्पशाकानि ।

तत्रागस्तिपुष्पस्य गुणानाह—

अगस्तिकुसुमं शीतं चातुर्थिकनिवारणम् ।
नक्तान्ध्यनाशनं तिक्तं कषायं कटुपाकि च ।
पीनसश्लेष्मपित्तघ्नं वातघ्नं मुनिभिर्मतम् ॥ ४८ ॥

अथ कदलीपुष्पम् (केले का फूल) ।

तस्य गुणानाह—

कदल्याः कुसुमं स्निग्धं मधुरं तुवरं गुरु ।
वातपित्तहरं शीतं रक्तपित्तक्षयप्रणुत् ॥ ४९ ॥

अथ शोभाञ्जनस्य पुष्पं मधु च ।
(सहँजना का फूल और शहद)

तयोर्गुणानाह—

शिग्रोः पुष्पं तु कटुकं तीक्ष्णोष्णं स्नायुशोथनुत् ।
कृमिहृत्कफवातघ्नं विद्रधिप्लीहगुल्मजित् ।
मधु शिग्रोस्त्वक्षिहितं रक्तपित्तप्रसादनम् ॥ ५० ॥

अथ शाल्मलीपुष्पम् (सेमलके फूल) ।

तस्य गुणानाह—

शाल्मलीपुष्पशाकं तु घृतसैन्धवसाधितम् ।
प्रदरं नाशयत्येव दुःसाध्यं च न संशयः ॥ ५१ ॥
रसे पाके च मधुरं कषायं शीतलं गुरु ।

कफपित्तास्रजिद् ग्राहि वातलं च प्रकीर्त्तितम् ॥ ५२ ॥

अथ फलशाकानि ।

तत्र कूष्माण्डम् (पेठा) ।

तस्य नामानि तद्बाल-मध्यम-वृद्धफलानां च गुणानाह—

कूष्माण्डं स्यात्पुष्पफलं पीतपुष्पं बृहत्फलम् ॥ ५३ ॥
कूष्माण्डं बृंहणं वृष्यं गुरु पित्तास्रवातनुत् ।
बालं पित्तापहं शीतं मध्यमं कफकारकम् ॥ ५४ ॥
वृद्धं नातिहिमं स्वादु सक्षारं दीपनं लघु ।
वस्तिशुद्धिकरं चेतोरोगहृत्सर्वदोषजित् ॥ ५५ ॥

अथ कूष्माण्डी (कुम्हड़ी) ।

तस्या नामगुणानाह—

कूष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता ।
कर्कारुर्ग्राहिणी शीता रक्तपित्तहरा गुरुः ।
पक्वा तिक्ताऽग्निजननी सक्षारा कफवातनुत् ॥ ५६ ॥

अथ अलाबूर्दीर्घा-वर्त्तुला च ।

(लवलौआ-गृहलौआ) ।

तस्या नामानि भेदांस्तत्फलगुणांश्चाह—

अलाबूः कथिता तुम्बी द्विधा दीर्घा च वर्तुला ॥ ५७ ॥
मिष्टतुम्बीफलं हृद्यं पित्तश्लेष्मापहं गुरु ।
वृष्यं रुचिकरं प्रोक्तं धातुपुष्टिविवर्धनम् ॥ ५८ ॥

अथ कटुतुम्बी (कडवी लौकी) ।

तस्या नामगुणानाह—

इक्ष्वाकुः कटुतुम्बी स्यात्सा तुम्बी च महाफला ।
कटुतुम्बी हिमा हृद्या पित्तकासविषापहा ॥
तिक्ता कटुर्विपाके च वातपित्तज्वरान्तकृत् ॥ ५९ ॥

अथ कर्कटी (ककडी) ।

तस्या नामानि तत्पक्वापक्वफलगुणांश्चाह—

एर्वारुः कर्कटी प्रो । कथ्यन्ते तद्गुणा अथ ॥ ६० ॥

कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ।
रुच्या पित्तहरा सामा पक्वा तृष्णाऽग्निपित्तकृत् ॥ ६१ ॥

अथ चिचिण्डः (चिचिण्डा) ।

तस्य नामानि गुणांश्चाह--

चिचिण्डः श्वेतराजिः स्यात्सुदीर्घो गृहकूलकः ।
चिचिण्डो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ॥
शोषणोऽतिहितः किञ्चिद्गुणैर्न्यूनः पटोलतः ॥ ६२ ॥

अथ कारवेल्लं कारवेल्ली च (करेला, करेली) ।

तयोर्नामानि गुणांश्चाह—

कारवेल्लं कठिल्लं स्यात्कारवेल्ली ततो लघुः ।
कारवेल्लं हिमं भेदि लघु तिक्तमवातलम् ॥ ६३ ॥
ज्वरपित्तकफास्रघ्नं पाण्डुमेहकृमीन् हरेत् ।
तद्गुणा कारवेल्ली स्याद्विशेषाद्दीपनी लघुः ॥ ६४ ॥

अथ महाकोशातकी (नेनुआ) ।

तस्या नामानि गुणांश्चाह-

महाकोशातकी प्रोक्ता हस्तिघोषा महाफला ॥ ६५ ॥
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ।
महाकोशातकी स्निग्धा रक्तपित्तानिलापहा ॥ ६६ ॥

अथ राजकोशातकी (तोरई) ।

तस्या नामानि गुणांश्चाह—

धामार्गवः पीतपुष्पो जालिनी कृतवेधना ।
राजकोशातकी चेति तथोक्ता राजिमत्फला ॥ ६७ ॥
राजकोशातकी शीता मधुरा कफवातकृत् ।
पित्तघ्नी दीपनी श्वासज्वरकासकृमिप्रणुत् ॥ ६८ ॥

अथ पटोलः (परवल) ।

तस्य नामानि गुणांश्चाह—

पटोलः कुलकस्तिक्तः पाण्डुकः कर्कशच्छदः ।
राजीफलः पाण्डुफलो राजेयश्चामृताफलः ॥ ६९ ॥
बीजगर्भः प्रतीकश्च कुष्ठहा कासभञ्जनः ।

पटोलं पाचनं हृद्यं वृष्यं लघ्वग्निदीपनम् ॥
स्निग्धोष्णं हन्ति कासास्रज्वरदोषत्रयक्रिमीन् ॥ ७० ॥

अथ पटोलस्य मूलनालपत्रफलानां गुणानाह—

पटोलस्य भवेन्मूलं विरेचनकरं सुखात् ॥ ७१ ॥
नालं श्लेष्महरं पत्रं पित्तहारि फलं पुनः ।
दोषत्रयहरं प्रोक्तं तद्वत्तिक्ता पटोलिका ॥ ७२ ॥

अथ बिंबी (कुंदुरी, कन्दूरी) ।

तस्या नामानि तत्फलगुणांश्चाह—

बिम्बी रक्तफला तुण्डी तुण्डीकेरी च बिम्बिका ।
ओष्ठोपमफला प्रोक्ता पीलुपर्णी च कथ्यते ॥ ७३ ॥
बिम्बीफलं स्वादु शीतं गुरु पित्तास्रवातजित् ।
स्तम्भनं लेखनं रुच्यं विबन्धाध्मानकारकम् ॥ ७४ ॥

अथ शिंबिः-पुस्तशिम्बी च (सेम-सेमभेद) ।

तयोर्नामानि गुणांश्चाह—

शिम्बिः शिम्बी पुस्तशिम्बी तथा पुस्तकशिम्बिका ।
शिम्बोद्वयं च मधुरं रसे पाके हिमं गुरु ॥
बल्यं दाहकरं प्रोक्तं श्लेष्मलं वातपित्तजित् ॥ ७५ ॥

अथ कोलशिम्बिः (सुअरा सेम) ।

तस्या नामानि गुणांश्चाह—

कोलशिम्बिः कृष्णफला तथा पर्यङ्कपट्टिका ॥ ७६ ॥
कोलशिम्बिः समीरघ्नी गुर्व्युष्णा कफपित्तकृत् ।
शुक्राग्निसादकृद् वृष्या रुचिकृद् बद्धविड् गुरुः ॥ ७७ ॥

अथ शोभाञ्जनफलम् (सहँजनेकी फली) ।

तस्य गुणानाह—

शोभाञ्जनफलं स्वादु कषायं कफपित्तनुत् ।
शूलकुष्ठक्षयश्वासगुल्महृद् दीपनं परम् ॥ ७८ ॥

अथ वृन्ताकम् (बैंगन, भण्टा) ।

तस्य नामानि भेदान् गुणांश्चाह—

वृन्ताकं स्त्री तु वार्त्ताकुर्भण्टाकी भाण्टिकाऽपि च ।

वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम् ॥ ७९ ॥

अथ तद्बालवृद्धफलयोर्गुणानाह—

ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु ।
तद् बालं कफपित्तघ्नं वृद्धं पित्तकरं गुरु ॥ ८० ॥

अथाङ्गारपरिपाचितवृन्ताकफलगुणानाह—

वृन्ताकं पित्तलं किञ्चिदङ्गारपरिपाचितम् ।
कफमेदोऽनिलामघ्नमत्यर्थं लघु दीपनम् ॥ ८१ ॥

अथ तैललवणान्वितवृन्ताकफलस्य श्वेतवृन्ताकस्य च गुणानाह—

तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम् ।
अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत् ।
तदर्शःसु विशेषेण हितं हीनं च पूर्वतः ॥ ८२ ॥

अथ डिण्डिशः (ढंढस) ।

तस्य नाम गुणानाह—

डिण्डिशो रोमशफलो मुनिनिर्मित इत्यपि ॥ ८३ ॥
डिण्डिशो रुचिकृद्भेदी पित्तश्लेष्मापहः स्मृतः ।
सुशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः ॥ ८४ ॥

अथ पिण्डारम् (पिण्डालु) ।

तस्य गुणानाह—

पिण्डारं शीतलं बल्यं पित्तघ्नं रुचिकारकम् ।
पाके लघु विशेषेण विषशान्तिकरं स्मृतम् ॥ ८५ ॥

अथ कर्कोटी (ककोडा, खेखसा) ।

तस्या नामानि गुणांश्चाह—

कर्कोटकी पीतपुष्पा महाजालीति चोच्यते ।
कर्कोटी मलहृत्कुष्ठहृल्लासारुचिनाशिनी ।
श्वासकासज्वरान्हन्ति कटुपाका च दीपनी ॥ ८६ ॥

अथ डोडिका (करेरुआ) ।

तस्या नामानि गुणांश्चाह—

डोडिका विषमुष्टिश्च डोडीत्यपि क्षुमुष्टिका ॥ ८७ ॥
डोडिका पुष्टिदा वृष्या रुच्या वह्निप्रदा लघुः ।

हन्ति पित्तकफार्शांसि कृमिगुल्मविषामयान् ॥ ८८ ॥

अथ कण्टकारीफलम् (कटेरी का फल)।

तस्य गुणानाह—

कण्टकारीफलं तिक्तं कटुकं दीपनं लघु ।
रूक्षोष्णं श्वासकासघ्नं ज्वरानिलकफापहम् ॥ ८९ ॥

अथ नालशाकानि ।

तत्र सार्षपनालगुणानाह—

तीक्ष्णोष्णं सार्षपं नालं वातश्लेष्मव्रणापहम् ।
कण्डूकृमिहरं दद्रुकुष्ठघ्नं रुचिकारकम् ॥ ९० ॥

अथ कन्दशाकानि ।

तत्र सूरणम् (जिमीकन्द)।

तस्य नामानि गुणांश्चाह—

सूरणः कन्द ओलश्च कन्दलोऽर्शोघ्न इत्यपि ।
सूरणो दीपनो रूक्षः कषायः कण्डुकृत् कटुः ॥ ९१ ॥
विष्टम्भी विशदो रुच्यः कफार्शःकृन्तनो लघुः ।
विशेषादर्शसे पथ्यः प्लीहगुल्मविनाशनः ॥ ९२ ॥
सर्वेषां कन्दशाकानां सूरणः श्रेष्ठ उच्यते ।
दद्रूणां कुष्ठिनां रक्तपित्तिनां न हितो हि सः ।
सन्धानयोगं सम्प्राप्तः सूरणो गुणवत्तरः ॥ ९३ ॥

अथालुकम (आलू)।

तस्य नामानि भेदांश्चाह—

आरूकं वीरसेनञ्च वीरं वीरारुकं तथा ।
आरुकमप्यालुकं तत्कथितं वीरसेनकम् ॥ ९४ ॥
काष्ठालुकशङ्खालुकहस्त्यालुकानि कथ्यन्ते ।
पिण्डालुकमध्वालुकरक्तालूकानि चोक्तानि ॥ ९५ ॥

*काष्ठालुकं = काठिन्ययुक्तम् (कठालू)। शङ्खालुकं = श्वेततायुक्तम् (शङ्खालु)। हस्त्यालुकं = दीर्घतायुक्तं महाशरीरम् । पिण्डालुकं = वर्त्तुलम् (सुथनी, पिण्डालू)। मध्वालुकं = मधुरतायुक्तं-

रोमान्वितम् (दीर्घसुथनी)। रक्तालुकम्=("रक्तालू, रतालु, रतएडा" इति च) ॥ ९४-९५ ॥

अथालुकमात्रगुणानाह—

आलुकं शीतलं सर्वं विष्टम्भि मधुरं गुरु ॥९६॥
सृष्टमूत्रमलं रूक्षं दुर्जरं रक्तपित्तनुत्।
कफानिलकरं बल्यं वृष्यं स्तम्भविवर्द्धनम् ॥ ९७ ॥

अथालुकी रक्तालुभेदः (अरुई)।

तस्या लक्षणं गुणाँश्चाह—

रक्तालुभेदो या दीर्घा तन्वी च प्रथिताऽऽलुकी।
आलुकी बलकृत्स्निग्धा गुर्वी हृत्कफनाशिनी।
विष्टम्भकारिणी तैले तलिताऽतिरुचिप्रदा ॥ ९८ ॥

अथ मूलकद्वयम् (मूली, बडी मूली)।

तस्य नामानि भेदान् गुणाँश्चाह—

मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम्।
शालामर्कटकं विस्रं शालेयं मरुसम्भवम् ॥ ९९ ॥
चाणक्यमूलकं तीक्ष्णं तथा मूलकपोतिका।
नेपालमूलकं चान्यत्तद्भवेद्गजदन्तवत् ॥ १०० ॥
लघुमूलं कटूष्णं स्याद्रुच्यं लघु च पाचनम्।
दोषत्रयहरं स्वर्यं ज्वरश्वासविनाशनम् ॥ १०१ ॥
नासिकाकण्ठरोगघ्नं नयनामयनाशनम् ॥ १०२ ॥
महत्तदेव रूक्षोष्णं गुरु दोषत्रयप्रदम्।
स्नेहसिद्धं तदेव स्याद्दोषत्रयविनाशनम् ॥ १०३ ॥

अथ गृञ्जनम् (गाजर)।

तस्य नामगुणानाह—

गृञ्जनं गाजरं प्रोक्तं तथा नारङ्गवर्णकम्।
गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु।
संग्राहि रक्तपित्तार्शोग्रहणीकफवातजित् ॥ १०४ ॥

अथ कदलीकन्दः (केराकन्द) ।

तस्य नामानि गुणाँश्चाह—

शीतलः कदलीकन्दो बल्यः केश्योऽम्लपित्तजित् ।
वह्निकृद्दाहहारी च मधुरो रुचिकारकः ॥ १०५ ॥

अथ मानकन्दः ।

तस्य नामगुणानाह—

मानकः स्यान्महापत्रः कथ्यन्ते तद्गुणा अथ ।
मानकः शोथहृच्छीतो रक्तपित्तहरो लघुः ॥ १०६ ॥

अथ वाराहीकन्दः (गेठी) ।

तस्य गुणानाह—

वाराही पित्तला बल्या कटुवी तिक्ता रसायनी ।
आयुःशुक्राग्निकृन्मेहकफकुष्ठानिलापहा ॥ १०७ ॥

अथ हस्तिकर्णा ।

तस्यास्तत्कन्दस्य च गुणानाह—

गजकर्णा तु तिक्तोष्णा तथा वातकफाञ्जयेत् ।
शीतज्वरहरी स्वादुः पाके तस्यास्तु कन्दकः ॥ १०८ ॥
पाण्डुशोथकृमिप्लीहगुल्मानाहोदरापहः ।
ग्रहण्यर्शोविकारघ्नो वनसूरणकन्दवत् ॥ १०९ ॥

अथ केमुकम् (केमुआं) ।

तस्य गुणानाह—

केमुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु ॥११०॥
दीपनं पाचनं हृद्यं कफपित्तज्वरापहम् ।
कुष्ठकासप्रमेहास्रनाशनं वातलं कटु ॥ १११ ॥

अथ कसेरु, चिचोढं च ।

तयोर्गुणानाह—

कसेरु द्विविधं तत्तु महद्राजकसेरुकम् ।
मुस्ताकृति लघु स्याद्यत्तच्चिचोढमिति स्मृतम् ॥११२॥
कसेरुकद्वयं शीतं मधुरं तुवरं गुरु ।
पित्तशोणितदाहघ्नं नयनामयनाशनम् ।

ग्राहि शुक्रानिलश्लेष्मारुचिस्तन्यकरं स्मृतम् ॥ ११३ ॥

अथ शालूकम् (भसींडा) ।

तस्य नामानि गुणांश्चाह—

पद्मादिकन्दः शालूकं करहाटश्च कथ्यते ॥ ११४ ॥
मृणालमूलं भिस्साण्डं जलालूकश्च कथ्यते ।
शालूकं शीतलं वृष्यं पित्तदाहास्रनुद् गुरु ॥११५॥
दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम् ।
संग्राहि मधुरं रूक्षं भिस्साण्डमपि तद्गुणम् ॥ ११६ ॥

अथ निषिद्धशाकान्याह—

बालं ह्यनार्त्तवं जीर्णं व्याधितं कृमिभक्षितम् ।
कन्दं विवर्जयेत्सर्वं यद्वाऽग्न्यादिविदूषितम् ।
अतिजीर्णमकालोत्थं रूक्षसिद्धमदेशजम् ॥ ११७ ॥
कर्कशं कोमलं चातिशीतव्यालादिदूषितम् ।
संशुष्कं सकलं शाकं नाश्नीयान्मूलकं विना ॥ ११८ ॥

*रूक्षसिद्धम् = अतैलादिसिद्धं । अदेशजम् = अशुभस्थानजम् ॥ ११७-११८ ॥

अथ संस्वेदजशाकानि (पसीनासे उत्पन्नशाक) ।

तेषां नामानि गुणानाह—

उक्तं संस्वेदजं शाकं भूमिच्छत्रं शिलीन्ध्रकम् ।
क्षितिगोमयकाष्ठेषु वृक्षादिषु तदुद्भवेत् ॥ ११९ ॥
सर्वे संस्वेदजाः शीता दोषलाः पिच्छिलाश्च ते ।
गुरवश्छर्द्यतीसारज्वरश्लेष्मामयप्रदाः ॥ १२० ॥
श्वेताशुचिस्थलीकाष्ठवंशगोमयसम्भवाः ।
नाति दोषकरास्ते स्युः शेषास्तेभ्यो विगर्हिताः ॥ १२१ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे दशमः शाकवर्गः समाप्तः ॥ १० ॥

अथैकादशो मांसवर्गः ॥ ११ ॥

अथ मांसम् ।

तस्य नामानि गुणांश्चाह—

मांसं तु पिशितं क्रव्यमामिषं पललं पलम् ।
मांसं वातहरं सर्वं बृंहणं बलपुष्टिकृत् ॥
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयोः ॥ १ ॥

अथ मांसभेदानाह—

मांसवर्गो द्विधा ज्ञेयो जाङ्गलानूपभेदतः ॥ २ ॥

तत्र जाङ्गलमांसस्य भेदान् गुणांश्चाह—

मांसवर्गेऽत्र जङ्घाला बिलस्थाश्च गुहाशयाः ।
तथा पर्णमृगा ज्ञेया विष्किराः प्रतुदास्तथा ॥ ३ ॥
प्रसहा अथ च ग्राम्या अष्टौ जाङ्गलजातयः ।
जाङ्गला मधुरा रूक्षास्तुवरा लघवस्तथा ॥ ४ ॥
बल्यास्ते बृंहणा वृष्या दीपना दोषहारिणः ।
मूकतां मिन्मिनत्वं च गद्गदत्वार्दिते तथा ॥ ५ ॥
बाधिर्य्यमरुचिच्छर्दिप्रमेहमुखजान् गदान् ।
श्लीपदं गलगण्डञ्च नाशयत्यनिलामयान् ॥ ६ ॥

अथानूपमांसस्य भेदान् गुणांश्चाह—

कूलेचराः प्लवाश्चापि कोशस्थाः पादिनस्तथा ।
मत्स्या एते समाख्याताः पञ्चधाऽऽनूपजातयः ॥ ७ ॥
आनूपा मधुराः स्निग्धा गुरवो वह्निसादनाः ।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशम् ॥
तथाऽभिष्यन्दिनस्ते हि प्रायः पथ्यतमाः स्मृताः ॥ ८ ॥

अथ जाङ्गलाः ।

तत्र जङ्घालानां गणनां लक्षणानि विशिष्टगुणांश्चाह—

हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुशम्बराः ॥ ९ ॥
राजीवोऽपि च मुण्डी चेत्याद्या जङ्घालसंज्ञकाः ।
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ॥ १०

कुरङ्ग ईषत्ताम्रः स्यादेणतुल्याकृतिर्महान् ।
ऋष्यो नीलाङ्गको लोके स रोझ इति कीर्त्तितः ॥ ११ ॥
पृषतश्चन्द्रबिन्दुः स्याद्धरिणात्किञ्चिदल्पकः ।
न्यङ्कुर्बहुविषाणोऽथ शम्बरो गवयो महान् ॥ १२ ॥
राजीवस्तु मृगो ज्ञेयो राजिभिः परितो वृतः ।
यो मृगः शृङ्गहीनः स्यात्स मुण्डीति निगद्यते ॥१३॥
जङ्घालाः प्रायशः सर्वे पित्तश्लेष्महराः स्मृताः ।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥ १४ ॥

अथ विलेशयाः (बिलनिवासी प्राणी)

तेषां गणनां गुणांश्चाह—

गोधाशशभुजंगाखुशल्लक्याद्या विलेशयाः ।
विलेशया वातहरा मधुरा रसपाकयोः ॥
बृंहणा बद्धविण्मूत्रा वीर्योष्णाश्च प्रकीर्त्तिताः ॥ १५ ॥

अथ गुहाशयाः (गुफानिवासी प्राणी)

तेषां गणनां गुणांश्चाह—

सिंहव्याघ्रवृका ऋक्षतरक्षुद्वीपिनस्तथा ।
बभ्रुजम्बूकमार्जारा इत्याद्याः स्युर्गुहाशयाः ॥१६॥

*तरक्षुः="तेंदुआवाघ" इति लोके । "द्वीपी=चित्रव्याघ्र" इति लोके । स्थूलपुच्छो रक्तनेत्रो बभ्रुर्भेदः स नाकुलः ॥ १६ ॥

गुहाशया वातहरा गुरूष्णा मधुराश्च ते ।
स्निग्धा बल्या हिता नित्यं नेत्रगुह्यविकारिणाम् ॥१७॥

अथ पर्णमृगाः (पत्ते खानेवाले प्राणी) ।

तेषां गणनां गुणांश्चाह—

वनौका वृक्षमार्जारो वृक्षमर्कटिकाऽऽदयः ।
एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः ॥ १८ ॥

*वनौका=वानरः । वृक्षमार्जारो=वृक्षविडालः । वृक्षमर्कटिका="रूपी वानर" इति लोके ॥ १८ ॥

स्मृताः पर्णमृगा वृष्याश्चक्षुष्याः शोषिणे हिताः ।
श्वासार्शःकासशमनाः सृष्टमूत्रपुरीषकाः ॥ १९ ॥

अथ विष्किराः (विष्किरपक्षी)।

तेषां गणनां गुणाँश्चाह—

वर्त्तका लाववर्त्तीरकपिञ्जलकतित्तिराः।
कुलिङ्गकुक्कुटाद्याश्च विष्किराः समुदाहृताः॥ २०॥
विकीर्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किराः।
कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरिः॥ २१॥
विष्किरा मधुराः शीताः कषायाः कटुपाकिनः।
बल्या वृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृताः॥२२॥

अथ प्रतुदाः (चोंच से खानेवाले पक्षी)।

तेषां गणनां गुणाँश्चाह—

कालकण्ठकहारीतकपोतशतपत्रकाः।
पारावतः खञ्जरीटः पिकाद्याः प्रतुदाः स्मृताः।
प्रतुद्य भक्षयन्त्येते तुण्डेन प्रतुदास्ततः॥ २३॥

*हारीतः="हरियल" इति लोके। कपोतो धवलः पाण्डुः। शतपत्रो बृहच्छुक "दार्वाघाटः" इत्यमरः। 'कटफोरा' इति लोके॥२३॥

प्रतुदा मधुराः पित्तकफघ्नास्तुवरा हिमाः।
लघवो बद्धवर्चस्काः किञ्चिद्वातकराः स्मृताः॥ २४॥

अथ प्रसहाः (दूसरे से छीनकर खानेवाले पक्षी)।

तेषां गणनां गुणांश्चाह—

काको गृध्र उलूकश्च चिल्लश्च शशघातकः।
चाषो भासश्च कुरर इत्याद्याः प्रसहाः स्मृताः॥ २५॥

*शशघातकः="बाज" इति लोके। चाषः="नीलकण्ठ" इति लोके। भासः=गृध्रविशेषः स्यात्। कुररः="कुरांकुर" इति लोके॥ २५॥

प्रसहाः कीर्त्तिता एते प्रसह्याच्छिद्य भक्षणात्॥ २६॥
प्रसहाः खलु वीर्योष्णास्तन्मांसं भक्षयन्ति ये।
ते शोषभस्मकोन्मादशुक्रक्षीणा भवन्ति हि॥ २७॥

अथ ग्राम्याः (ग्राम्यपशु)

तेषां गणनां गुणांश्चाह—

छागमेषवृषाश्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः ।
ग्राम्या वातहराः सर्वे दीपनाः कफपित्तलाः ।
मधुरा रसपाकाभ्यां बृंहणा बलवर्द्धनाः ॥ २८ ॥

अथाऽनूपाः ।

तत्र कूलेचराणां गणनां गुणांश्चाह—

लुलायगण्डवाराहचमरीवारणादयः ।
एते कूलेचराः प्रोक्ता यतः कूले चरन्त्यपाम् ॥ २९ ॥

*लुलायो = महिषः । गण्डः = खड्गः । चमरी = चमरपुच्छी गौः ॥ २९ ॥

कूलेचरा मरुत्पित्तहरा वृष्या बलावहाः ।
मधुराः शीतलाः स्निग्धा मूत्रलाः श्लेष्मवर्धनाः ॥ ३० ॥

अथ प्लवाः (पंक्तियों से आकाश में उड़ने वाले पक्षी) ।

तेषां गणनां गुणांश्चाह—

हंससारसकारण्डवकक्रौञ्चशरारिकाः ॥३१॥
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः ।
प्लवन्ति सलिले यस्मादेते तस्मात्प्लवाः स्मृताः ॥३२॥

*कारण्डः = कपर्दिकाख्यो बृहद्धंसभेदः । क्रौञ्चः = शरद्विहङ्गः स्यात्–"टेंक" इति लोके । शरारिका = "सिन्धू" इति लोके) ॥

स्थूला कठोरा वृत्ता च यस्याश्चञ्चूपरि स्थिता ।
गुटिका जम्बुसदृशी प्रोक्ता नन्दीमुखी[?] सा ॥ १ ॥

कादम्बः = "करवा" इति लोके । बलाका = "बगुली" इति लोके ॥ ३१-३२ ॥

प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥ ३३ ॥

अथ कोशस्थाः (ढकनेके मध्यमें रहनेवाले प्राणी) ।

तेषां गणनां गुणाँश्चाह—

शङ्खः शङ्खनखश्चापि शुक्तिशम्बूककर्कटाः ।

जीवा एवंविधाश्चान्ये कोशस्थाः परिकीर्त्तिताः ॥३४॥

*शङ्खनखः=क्षुद्रशङ्खः ॥ ३४ ॥

कोशस्था मधुराः स्निग्धा वातपित्तहरा हिमाः ।
बृंहणा बहुवर्चस्का वृष्याश्च बलवर्द्धनाः ॥ ३५ ॥

अथ पादिनः (पांवोंके प्राणी) ।

तेषां गणनां गुणाँश्चाह—

कुम्भीरकूर्मनक्राश्च गोधामकरशङ्कवः ।
घण्टिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः ॥ ३६ ॥

*कुम्भीरो=मारको जलजन्तुः । "कूर्मः=कच्छपः । नक्रः="नाक" इति लोके (सरय्वादिनदीषु बहुलः) । गोधा="गोहि" जलजन्तुः । मकरः="मगर" इति लोके । शङ्कुः="शाकुचा" इति लोके । घण्टिकः="घडियाल" इति लोके । शिशुमारः="सूस" इति लोके ॥ ३६ ॥

पादिनोऽपि च ये ते तु कोशस्थानां गुणैः समाः ॥३७॥

अथ मत्स्याः (मछली) ।

तेषां नामानि गुणांश्चाह—

मत्स्यो मीनो विसारश्च झषो वैसारिणोऽण्डजः ।
शकुली पृथुरोमा च स सुदर्शन इत्यपि ॥३८॥
रोहिताद्यास्तु ये जीवास्ते मत्स्याः परिकीर्त्तिताः ।
मत्स्याः स्निग्धोष्णमधुरा गुरवः कफपित्तलाः ॥३९॥
वातघ्ना बृंहणा वृष्या रोचका बलवर्द्धनाः ।
मद्यव्यवायसक्तानां दीप्ताग्नीनाञ्च पूजिताः ॥४०॥

अथ जङ्घालाः (जांघवाले प्राणी) ।

तत्र हरिणस्य मांसगुणानाह—

हरिणः शीतलो बद्धविण्मूत्रो दीपनो लघुः ।
रसे पाके च मधुरः सुगन्धिः सन्निपातहा ॥४१॥

अथैणहरिणः (कालाहरिण) ।

तस्य मांसगुणानाह—

एणः कषायो मधुरः पित्तासृक्कफवातहृत् ।

संग्राही रोचनो बल्यो ज्वरप्रशमनः स्मृतः ॥४२॥

अथ कुरङ्गः।

तस्य मांसगुणानाह—

कुरङ्गो बृंहणो बल्यः शीतलः पित्तहृद् गुरुः।
मधुरो वातहृद् ग्राही किञ्चित्कफकरः स्मृतः ॥४३॥

अथ ऋष्यः (रोझ)।

तस्य नामानि मांसगुणांश्चाह—

ऋष्यो नीलाण्डकश्चापि गवयो रोझ इत्यपि।
गवयो मधुरो बल्यः स्निग्धोष्णः कफपित्तलः ॥४४॥

अथ पृषतः (चित्तालमृग)।

तस्य मांसगुणानाह—

पृषतस्तु भवेत्स्वादुर्ग्राहकः शीतलो लघुः।
दीपनो रोचनः श्वासज्वरदोषत्रयास्रजित् ॥ ४५ ॥

अथ न्यङ्कुः (बारहसिंगा)।

तस्य मांसगुणानाह—

न्यङ्कुः स्वादुर्लघुर्बल्यो वृष्यो दोषत्रयापहः ॥४६॥

अथ सावरम्।

तस्य मांसगुणानाह—

सावरं पललं स्निग्धं शीतलं गुरु च स्मृतम्।
रसे पाके च मधुरं कफदं रक्तपित्तहृत् ॥ ४७ ॥

अथ राजीवः

तस्य गुणानाह—

राजीवस्तु गुणैर्ज्ञेयः पृषतेन समो जनैः ॥ ४८ ॥

अथ मुण्डी।

तस्य गुणानाह—

मुण्डी तु ज्वरकासास्रक्षयश्वासापहो हिमः ॥४९॥

अथ विलेशयाः

तत्र शशः (खरगोश)।

तस्य नामानि मांसगुणांश्चाह—

लम्बकर्णः शशः शूली लोमकर्णो विलेशयः।

शशः शीतो लघुर्ग्राही रूक्षः स्वादुः सदा हितः ।
वह्निकृत्कफपित्तघ्नो वातसाधारणः स्मृतः ।
ज्वरातीसारशोषास्रश्वासामयहरश्च सः ॥५०॥

अथ सेधा (सेह, साही) ।

तस्या नामानि मांसगुणाँश्चाह—

सेधा तु शल्यकः श्वावित्कथ्यन्ते तद्गुणा अथ ।
शल्यकः श्वासकासास्रशोषदोषत्रयापहः ॥ ५१ ॥

अथ पक्षिणः (पक्षियां)

तेषां नामानि मांसगुणाँश्चाह—

पक्षी खगो विहङ्गश्च विहगश्च विहङ्गमः ।
शकुनिर्विः पतत्री च विष्किरो विकिरोऽण्डजः ।
धान्याङ्कुरचरा येऽत्र तेषां मांसं लघूत्तमम् ॥
आनूपं बलकृन्मांसं स्निग्धं गुरुतरं स्मृतम् ॥ ५२ ॥

अथ तेषु विष्किरेषु वर्तकः (बटेर) ।

तस्य नामानि मांसगुणाँश्चाह—

वर्तीको वर्त्तकश्चित्रस्ततोऽन्या वर्त्तका स्मृता ।
वर्त्तकोऽग्निकरः शीतो ज्वरदोषत्रयापहः ।
सुरुच्यः शुक्रदो बल्यो वर्तिकाऽल्पगुणा ततः ॥५३॥

अथ लावः (लवा) ।

तस्य मांसगुणसहितान् भेदान् मांसगुणाँश्चाह—

लावा विष्किरवर्गेषु ते चतुर्धा मता बुधैः ॥५४॥
पांशुलो गौरकोऽन्यस्तु पौण्ड्रको दर्भरस्तथा ।
लावा वह्निकराः स्निग्धा गरघ्ना ग्राहका हिताः ॥५५॥
पांशुलः श्लेष्मलस्तेषु वीर्योष्णोऽनिलनाशनः ।
गौरो लघुतरो रूक्षो वह्निकारी त्रिदोषजित् ॥५६॥
पौण्ड्रकः पित्तकृत्किञ्चिल्लघुर्वातकफापहः ।
दर्भरो रक्तपित्तघ्नो हृदामयहरो हिमः ॥ ५७ ॥

अथ वार्त्तीकः (बगेरा, बटेरा)।

तस्य नामानि मांसगुणानाह—

वर्त्तीको वर्तिचटको वार्तीकश्चैव स स्मृतः।
वर्त्तीको मधुरः शीतो रूक्षश्च कफपित्तनुत् ॥५८॥

अथ कृष्णतित्तिरिर्गौरतित्तिरिश्च (तीतर)।

तयोर्नामानि मांसगुणानाह—

तित्तिरिः कृष्णवर्णः स्यात्स तु गौरः कपिञ्जलः।
तित्तिरिर्बलदो ग्राही हिक्कादोषत्रयापहः॥
श्वासकासज्वरहरस्तस्माद्गौरोऽधिको गुणैः ॥५९॥

अथ चटकः (गवरैया, चिडा)।

तस्य नामानि मांसगुणानाह—

चटकः कलविङ्कः स्यात्कुलिङ्गः कालकण्ठकः ॥६०॥
कुलिङ्गः शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः।
सन्निपातहरो वेश्मचटकश्चातिशुक्रलः ॥ ६१ ॥

अथ कुक्कुटो वनकुक्कुटश्च (मुरगा-वनमुरगा)।

तयोर्नामानि मांसगुणाँश्चाह—

कुक्कुटः कृकवाकुः स्यात्कालज्ञश्चरणायुधः।
ताम्रचूडस्तथा दक्षो यामनादी शिखण्डिकः ॥६२॥
कुक्कुटो बृंहणः स्निग्धो वीर्योष्णोऽनिलहृद् गुरुः।
चक्षुष्यः शुक्रकफकृद् बल्यो वृष्यः कषायकः ॥६३॥
आरण्यकुक्कुटः स्निग्धो बृंहणः श्लेष्मलो गुरुः।
वातपित्तक्षयवमिविषमज्वरनाशनः ॥ ६४ ॥

अथ प्रतुदाः।

तत्र हारीतः (हरियल)।

तस्य नामानि माँसगुणानाह—

हारीतो रक्तपीतः स्याद्धरितोऽपि स कथ्यते।
हारीतो रूक्ष उष्णश्च रक्तपित्तकफापहः।
स्वेदस्वरकरः प्रोक्त ईषद्वातकरश्च सः ॥ ६५ ॥

अथ पाण्डुर्धवलपाण्डुश्च (पण्डाक्का) ।

तयोर्नामानि मांसगुणानाह—

पाण्डुस्तु द्विविधो ज्ञयश्चित्रपक्षः कलध्वनिः ॥ ६६ ॥
द्वितीयो धवलः प्रोक्तः स कपोतः स्फुटध्वनिः ।
चित्रपक्षः कफहरो वातघ्नो ग्रहणीप्रणुत् ॥ ६७ ॥
धवलः पाण्डुरुद्दिष्टो रक्तपित्तहरो हिमः ।
रसे पाके च मधुरः संग्राही वातशान्तिकृत् ॥ ६८ ॥

अथ मयूरः (मोर) ।

तस्य नामानि मांसगुणाँश्चाह—

मयूरश्चन्द्रकी केकी मेघरावो भुजङ्गभुक् ।
शिखी शिखावलो बर्ही शिखण्डी नीलकण्ठकः ॥ ६९ ॥
शुक्लापाङ्गः कलापी च मेघनादानुलास्यपि ।
रसे पाके च मधुरः संग्राही वातशान्तिकृत ॥ ७० ॥

अथ पारावतः (कबूतर, परेवा) ।

तस्य नामानि मांसगुणाँश्चाह—

पारावातः कलरवः कपोतो रक्तलोचनः ।
पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः ।
संग्राही शीतलस्तज्ज्ञैः कथितो वीर्यवर्द्धनः ॥ ७१ ॥

अथ पक्ष्यण्डानि (पक्षियोंके अण्डे) ।

तेषां गुणानाह—

नातिस्निग्धानि वृष्याणि स्वादुपाकरसानि च ।
वातघ्नान्यतिशुक्राणि गुरूण्यण्डानि पक्षिणाम् ॥ ७२ ॥

अथ ग्राम्याः ।

तत्रच्छागः (बकरा) ।

तस्य नामानि मांसगुणाँश्चाह—

छागलो बर्करश्छागो बस्तोऽजश्छेलकः स्तुभः ॥ ७३ ॥
अजा छागी स्तुभा चापि छेलिका च गलस्तनी ।
छागमांसं लघु स्निग्धं स्वादुपाकं त्रिदोषनुत् ॥ ७४ ॥

नातिशीतमदाहि स्यात्स्वादु पीनसनाशनम् ।
परं बलकरं रुच्यं बृंहणं वीर्यवर्द्धनम् ॥ ७५ ॥

अथ प्रसूताजाया बालकाजासुतस्य च मांसगुणानाह—

अजायास्त्वप्रसूताया मांसं पीनसनाशनम् ।
शुष्ककासेऽरुचौ शोषे हितमग्नेश्च दीपनम् ॥ ७६ ॥
अजासुतस्य बालस्य मांसं लघुतरं स्मृतम् ।
हृद्यं ज्वर रं श्रेष्ठं सुखदं बलदं भृशम् ॥ ७७ ॥

अथ निष्कासिताण्ड-वृद्ध-व्याधिमृतानां छागानां मांसस्य छागमुण्डस्य च गुणानाह—

मांसं निष्कासिताण्डस्य छागस्य कफकृद् गुरु ।
स्रोतःशुद्धिकरं बल्यं मांसदं वातपित्तनुत् ॥ ७८ ॥
वृद्धस्य वातलं रूक्षं तथा व्याधिमृतस्य च ।
ऊर्द्ध्वजत्रुविकारघ्नं छागमुण्डं रुचिप्रदम् ॥ ७९ ॥

अथ मेषः (मेढा) ।

तस्य नामान्यण्डविहीनस्य तस्य च मांसगुणांश्चाह—

मेढ्रो मेढो हुडो मेष उरणोऽप्येडकोऽपि च ।
अविर्वृष्णिस्तथोर्णायुः कथ्यन्ते तद्गुणा अथ ॥ ८० ॥
मेषस्य मांसं पुष्टौ स्यात्पित्तश्लेष्मकरं गुरु ।
तस्यैवाण्डविहीनस्य मांसं किञ्चिल्लघु स्मृतम् ॥ ८१ ॥

अथैडकः (दुम्बा) मेढा ।

तस्य नामानि तद्भेदस्य च मांसगुणांश्चाह—

एडकः पृथुशृङ्गः स्यान्मेदःपुच्छस्तु दुम्बकः ।
एडकस्य पलं ज्ञेयं मेषामिषसमं गुणैः ॥ ८२ ॥
मेदःपुच्छोद्भवं मांसं हृद्यं वृष्यं श्रमापहम् ।
पित्तश्लेष्मकरं किञ्चिद्वातव्याधिविनाशनम् ॥ ८३ ॥

अथ वृषभः (बैल) ।

तस्य नामानि मांसगुणानाह—

बलीवर्दस्तु वृषभ ऋषभश्च तथा वृषः ।
अनड्वान्सौरभेयोऽपि गौरुक्षा भद्र इत्यपि ॥ ८४ ॥

सुरभिः सौरभेयी च माहेयी गौरुदाहृता ।
गोमांसं सुगुरु स्निग्धं पित्तश्लेष्मविवर्द्धनम् ।
बृंहणं वातहृद् बल्यमपथ्यं पीनसप्रणुत् ॥ ८५ ॥

अथाश्वः (घोड़ा) ।

तस्य नामानि मांसगुणांश्चाह—

घोटकेऽप्यश्वतुरगास्तुरङ्गाश्च तुरङ्गमाः ।
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ॥ ८६ ॥
अश्वमांसन्तु तुवरं वह्निकृत्कफपित्तलम् ।
वातहृद् बृंहणं बल्यं चक्षुष्यं मधुरं लघु ॥ ८७ ॥

अथ कूलेचराः ।

तत्र महिषम् (भैसा) ।

तस्य नामानि मांसगुणानाह—

महिषो घोटकारिः स्यात्कासरश्च रजस्वलः ॥ ८८ ॥
पीनस्कन्धः कृष्णकायो लुलायो यमवाहनः ।
महिषस्यामिषं स्वादु स्निग्धोष्णं वातनाशनम् ॥ ८९ ॥
निद्राशुक्रप्रदं बल्यं तनुदार्ढ्यकरं गुरु ।
वृष्यश्च सृष्टविण्मूत्रं वातपित्तास्रनाशनम् ॥ ९० ॥

अथ मण्डूकः (मेंढक, मेघा) ।

तस्य नामानि मांसगुणांश्चाह—

मण्डूकः प्लवगो भेको वर्षाभूर्दर्दुरो हरिः ।
मण्डूकः श्लेष्मलो नातिपित्तलो बलकारकः ॥ ९१ ॥

अथ पादिनः ।

तत्र कच्छपः (कछुआ) ।

तस्य नामानि मांसगुणानाह—

कच्छपो गूढपात्कूर्मः कमठो दृढपृष्ठकः ।
कच्छपो बलदो वातपित्तनुत्पुंस्त्वकारकः ॥ ९२ ॥

अथ विशेषाः।

तत्र सद्योहतस्य मांसगुणानाह—

सद्योहतस्य मांसं स्याद्व्याधिघाति यथाऽमृतम्।
वयस्यं बृंहणं सात्म्यमन्यथा तद् विवर्जयेत्॥ ९३॥

अथ स्वयं मृतस्य मांसगुणानाह—

स्वयं मृतस्य चाबल्यमतीसारकरं गुरु॥ ९४॥

अथ वृद्धबालयोर्मांसगुणानाह—

वृद्धानां दोषलं मांसं बालानां बलदं लघु॥ ९५॥

अथ सर्पव्यालदष्टयोर्मांसयोः शुष्कमांसस्य च गुणानाह—

सर्पदष्टस्य मांसञ्च शुष्कमांसं त्रिदोषकृत्।
त्रिदोषकृद् व्यालदष्टं शुष्कं शूलकरं परम्॥ ९६॥

अथ विषादिमृतस्य मांसगुणानाह—

विषाम्बुरुङ्मृतस्यैतन्मृत्युदोषरुजाकरम्।
क्लिन्नमुत्क्लेशजनकं कृशं वातप्रकोपणम्।
तोयपूर्णं शिराजालं मृतमप्सु त्रिदोषकृत्॥ ९७॥

अथ जात्यादिपरत्वेन मांसस्य गुणानाह—

विहङ्गेषु पुमाञ्छ्रेष्ठः स्त्री चतुष्पदजातिषु।
परार्द्धं लघु पुंसां स्यात्स्त्रीणां पूर्वार्द्धमादिशेत्।
देहमध्यं गुरुप्रायं सर्वेषां प्राणिनां स्मृतम्॥ ९८॥
पक्षक्षेपाद्विहङ्गानां तदेव लघु कथ्यते।
गुरूण्यण्डानि सर्वेषां गुर्वी ग्रीवा च पक्षिणाम्॥ ९९॥
उरःस्कन्धोदरं कुक्षी पादौ पाणी कटी तथा।
पृष्ठत्वग्यकृदन्त्राणि गुरूणीह यथोत्तरम्॥ १००॥
लघु वातकरं मांसं खगानां धान्यचारिणाम्।
मत्स्याशिनां पित्तकरं वातघ्नं गुरु कीर्त्तितम्॥ १०१॥
पलाशिनां श्लेष्मकरं लघुरूक्षमुदीरितम्।
बृंहणं गुरु वातघ्नं तेषामेव पलाशिनाम्॥ १०२॥
तुल्यजातिष्वल्पदेहा महादेहेषु पूजिताः।
अल्पदेहेषु शस्यन्ते तथैव स्थूलदेहिनः॥ १०३॥

अथ मत्स्याः ।

तत्र रोहितः (रोहू) ।

तस्य लक्षणं मांसमुण्डयोर्गुणांश्चाह—

रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्षतिः ।
कृष्णपुच्छो झषः श्रेष्ठो रोहितः कथितो बुधैः ॥ १०४ ॥
रोहितः सर्वमत्स्यानां वरो वृष्योऽर्दितार्त्तिजित् ।
कषायानुरसः स्वादुर्वातघ्नो नातिपित्तकृत् ।
ऊर्ध्वजत्रुगतान् रोगान् हन्याद्रोहितमुण्डकम् ॥ १०५ ॥

अथ शिलींध्रः (सिलन्ध) ।

तस्य मांसगुणानाह—

शिलीन्ध्रः श्लेष्मलो वल्यो विपाके मधुरो गुरुः ।
वातपित्तहरो हृद्य आमवातकरश्च सः ॥ १०६ ॥

अथ भकुरः (भाकुर) ।

तस्य मांसगुणानाह—

भकुरो मधुरः शीतो वृष्यः श्लेष्मकरो गुरुः ।
विष्टम्भजनकश्चापि रक्तपित्तहरः स्मृतः ॥ १०७ ॥

अथ मोचिका (मोई) ।

तस्या मांसगुणानाह—

मोचिका वातहृद् वल्या बृंहणी मधुरा गुरुः ।
पित्तहृत्कफकृद्रुच्या वृष्या दीप्ताग्नये हिता ॥ १०८ ॥

अथ पाठीनः (बुआरी, वोयल) ।

तस्य मांसगुणानाह—

पाठीनः श्लेष्मलो वल्यो निद्रालुः पिशिताशनः ।
दूषयेद्रुधिरं पित्तं कुष्ठरोगं करोति च ॥ १०९ ॥

अथ शृङ्गी (सींगी) ।

तस्या मांसगुणानाह—

शृङ्गी तु वातशमनी स्निग्धा श्लेष्मप्रकोपणी ।
रसे तिक्ता कषाया च लघ्वी रुच्या स्मृता बुधैः ॥ ११० ॥

अथेल्लीसः (इल्सा) ।

तस्य मांसगुणानाह—

इल्लीसो मधुरः स्निग्धो रोचनो वह्निवर्द्धनः ।
पित्तहृत्कफकृत्किञ्चिल्लघुर्वृष्योऽनिलापहः ॥११११॥

अथ शष्कुली (सौरी) ।

तस्या मांसगुणानाह—

शष्कुली ग्राहिणी हृद्या मधुरा तुवरा स्मृता ॥११२॥

अथ गर्गरः (गर्गरा) ।

तस्य मांसगुणानाह—

गर्गरः पित्तलः किञ्चिद्वातजित्कफकोपनः ॥११३॥

अथ कविका (कवई) ।

तस्या मांसगुणानाह—

कविका मधुरा स्निग्धा कफघ्नी रुचिकारिणी ।
किञ्चित्पित्तकरी वातनाशिनी वह्निवर्द्धिनी ॥११४॥

अथ वर्मिमत्स्यः (वर्मी) ।

तस्य मांसगुणानाह—

वर्मिमत्स्यो हरेद्वातं पित्तं रुचिकरो लघुः ॥११५॥

अथ दण्डमत्स्यः (दण्डारी) ।

तस्य मांसगुणानाह—

दण्डमत्स्यो रसे तिक्तः पित्तरक्तं कफं हरेत् ।
वातसाधारणः प्रोक्तः शुक्रलो बलवर्द्धनः ॥११६॥

अथैरङ्गः (अरंगी) ।

तस्य मांसगुणानाह—

एरङ्गो मधुरः स्निग्धो विष्टम्भी शीतलो लघुः ॥११७॥

अथ महाशफरः (पपता) ।

तस्य मांसगुणानाह—

महाशफरसंज्ञस्तु तिक्तः पित्तकफापहः ।
शिशिरो मधुरो रुच्यो वातसाधारणः स्मृतः ॥११८॥

अथ गरघ्नी (गरई)।

तस्या मांसगुणानाह—

गरघ्नी मधुरा तिक्ता तुवरा वातपित्तहृत्।
कफघ्नी रुचिकृल्लघ्वी दीपनी बलवीर्यकृत ॥११९॥

अथ मद्गुरः (मँगुरी)।

तस्य मांसगुणानाह—

मद्गुरो वातहृद् बल्यो वृष्यः कफकरो लघुः ॥१२०॥

अथ सपादमत्स्यः (टेंगरा)।

तस्य मांसगुणानाह—

सपादमत्स्यो मेधाकृन्मेदःक्षयकरश्च सः।
वातपित्तकरश्चापि रुचिकृत्परमो मतः ॥ १२१ ॥

अथ प्रोष्ठी ("शफरी, पुंठी" इति च)।

तस्या मांसगुणानाह—

प्रोष्ठी तिक्ता कटुः स्वादुः शुक्रदा कफवातजित्।
स्निग्धाऽऽस्यकण्ठरोगघ्नी रोचनी च लघुः स्मृता ॥१२२॥

अथ क्षुद्रमत्स्याः।

तेषां मांसगुणानाह—

क्षुद्रमत्स्याः स्वादुरसा दोषत्रयविनाशनाः।
लघुपाका रुचिकरा बलदास्ते हिता मताः ॥ १२३ ॥

अथातिक्षुद्रमत्स्याः।

तेषां मांसगुणानाह—

अतिक्षुद्रमाः पुंस्त्वहरा रुच्याः कासानिलापहाः ॥ १२४ ॥

अथ मत्स्यगर्भः (मत्स्याण्डः)।

तस्य गुणानाह—

मत्स्यगर्भो भृशं वृष्यः स्निग्धः पुष्टिकरो लघुः।
कफमेदःप्रदो बल्यो ग्लानिकृन्मेहनाशनः ॥ १२५ ॥

अथ शुष्कमत्स्याः (सूखी मछली)।

तेषां मांसगुणानाह—

शुष्कमत्स्या नवा बल्या दुर्जरा विड्विबन्धिनः ॥ १२६ ॥

अथ दग्धमत्स्यः (भूंजी मछली) ।

तस्य मांसगुणानाह—

दग्धमत्स्यो गुणैः श्रेष्ठः पुष्टिकृद् बलवर्द्धनः ॥ १२७ ॥

अथ कूपजादिमत्स्याः ।

तेषां मांसगुणानाह—

कौपमत्स्याः शुक्रमूत्रकुष्ठश्लेष्मविवर्द्धनाः ।
सरोजा मधुराः स्निग्धा बल्या वातविनाशनाः ॥
नादेया बृंहणा मत्स्या गुरवोऽनिलनाशनाः ।
रक्तपित्तकरा वृष्याः स्निग्धोष्णाः स्वल्पवर्चसः ॥
चौञ्ज्याः पित्तकराः स्निग्धा मधुरा लघवो हिमाः ।
ताडागा गुरवो वृष्याः शीतला मलमूत्रदाः ।
ताडागवान्निर्झरजा बलायुर्मतिवृद्धिकराः ॥ १२८ ॥

अथर्तुविशेषे मत्स्यविशेषाणां मांसगुणानाह—

हेमन्ते कूपजा मत्स्याः शिशिरे सारसा हिताः ।
वसन्ते ते तु नादेया ग्रीष्मे चौञ्ज्यसमुद्भवाः ॥
तडागजाता वर्षासु तास्वपथ्या नदीभवाः ।
निर्झराः शरदि श्रेष्ठा विशेषोऽयमुदाहृतः ॥ १२९ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरण-
एकादशो मांसवर्गः समाप्तः ॥ ११ ॥

अथ द्वादशः कृतान्नवर्गः ॥ १२ ॥

तत्रान्नानां साधनप्रकारान्-
सिद्धानां गुणांश्चाह ।

तत्र परिभाषामाह—

समवायिनि हेतौ ये मुनिभिर्गणिता गुणाः ।
कार्य्येऽपि तेऽखिला ज्ञेयाः परिभाषेति भाषिताः ॥ १ ॥
क्व चित्संस्कारभेदेन गुणभेदो भवेद्यतः ।
भक्तं लघु पुराणस्य शालेस्तच्चिपिटो गुरुः ॥ २ ॥

क्व चिद्योगप्रभावेण गुणान्तरमपेक्षते ।
कदन्नं गुरु सर्पिश्च तद्युक्तं सुपचं भवेत् ॥ ३ ॥

अथ भक्तम् (भात) ।

तस्य नामानि साधनं गुणाँश्चाह--

भक्तमन्नं तथाऽन्धश्च क्व चित्कूरं च कीर्त्तितम् ।
ओदनोऽस्त्री स्त्रियां भिस्सा दीदिविः पुंसि भाषितः ॥ ४ ॥
सुधौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत् ।
तदुक्तं प्रस्तुतं चोष्णं विशदं गुणवन्मतम् ॥ ५ ॥
भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु ।
अधौतमस्रुतं शीतं गुर्वरुच्यं कफप्रदम् ॥ ६ ॥

अथ दाली (दाल) ।

तस्या नामानि साधनं गुणाँश्चाह—

दलितन्तु शमीधान्यं दालिर्दाली स्त्रियामुभे ।
दाली तु सलिले सिद्धा लवणार्द्रकहिङ्गुभिः ॥ ७ ॥
संयुक्ता सूपनाम्नी स्यात्कथ्यन्ते तद्गुणा अथ ।
सूपो विष्टम्भको रूक्षः शीतस्तु स विशेषतः ।
निस्तुषो भृष्टसंसिद्धो लाघवं सुतरां व्रजेत् ॥ ८ ॥

अथ कृशरा (खिचरी) ।

तस्याः साधनं गुणाँश्चाह—

तण्डुला दालिसंमिश्रा लवणार्द्रकहिंगुभिः ।
संयुक्ता सलिले सिद्धा कृशरा कथिता बुधैः ॥ ९ ॥
कृशरा शुक्रला बल्या गुरुः पित्तकफप्रदा ।
दुर्जरा बुद्धिवि ष्टम्भमलमूत्रकरी स्मृता ॥ १० ॥

अथ तापहरी (ताताहरी) ।

तस्याः साधनं गुणाँश्चाह—

घृते हरिद्रासंयुक्ते माषजां भर्जयेद्वटीम् ॥ ११ ॥
तण्डुलांश्चापि निर्धौतान्सहैव परिभर्जयेत् ।
सिद्धयोग्य जलं तत्र प्रक्षिप्य कुशलः पचेत् ॥ १२ ॥
लवणार्द्रकहिंगूनि मात्रया तत्र निक्षिपेत्

एषा सिद्धिं समायाता प्रोक्ता तापहरी बुधैः ॥ १३ ॥
भवेत्तापहरी बल्या वृष्या श्लेष्माणमाचरेत् ।
बृंहणी तर्पणी रुच्या गुर्वी पित्तहरी स्मृता ॥ १४ ॥

अथ क्षीरिका (खीर) ।

तस्या नामानि साधनं गुणांश्चाह—

पायसं परमान्नं स्यात्क्षीरिकाऽपि तदुच्यते ।
शुद्धेऽर्द्धपक्वे दुग्धे तु घृताक्तांस्तण्डुलान्पचेत् ॥ १५ ॥
ते सिद्धाः क्षीरिका ख्याता ससिताऽऽज्ययुतोत्तमा ।
क्षीरिका दुर्जरा प्रोक्ता बृंहणी बलवर्द्धिनी ॥
विष्टम्भिनी हरेत् पित्तं रक्तपित्ताग्निमारुतान् ॥ १६ ॥

अथ नारिकेरक्षीरी (नारियलकी खीर) ।

तस्याः साधनं गुणांश्चाह—

नारिकेरं तनूकृत्य छिन्नं पयसि गोः क्षिपेत् ।
सितागव्याज्यसंयुक्ते तत्पचेन्मृदुनाऽग्निना ॥ १७ ॥
नारिकेरोद्भवा क्षीरी स्निग्धा शीताऽतिपुष्टिदा ।
गुर्वी सुमधुरा वृष्या रक्तपित्तानिलापहा १८ ॥

अथ सेविका [सेमई] ।

तस्याः साधनं गुणांश्चाह—

समितावर्त्तिकाः कृत्वा सुसूक्ष्मा यवसन्निभाः ।
शुष्काः क्षीरेण संसाध्या भोज्या घृतसिताऽन्विताः ॥ १९ ॥
सेविका तर्पणी बल्या गुर्वी पित्तानिलापहा ।
ग्राहिणी सन्धिकृद्रुच्या तां खादेन्नातिमात्रया ॥ २० ॥

अथ समिता (मैदा) ।

तस्याः साधनमाह—

गोधूमा धवला धौताः कुट्टिताः शोषितास्ततः ।
प्रोक्षिता यन्त्रनिष्पिष्टाश्चालिताः समिताः स्मृताः ॥ २१ ॥

अथ मण्डकः (मण्डा) ।

तस्य साधनमाह—

वारिणा कोमलां कृत्वा समितां साधु मर्दयेत् ।

हस्तचालनया तस्या लोप्त्रीं सम्यक्प्रसारयेत् ॥ २२ ॥
अधोमुखघटस्यैतद्विस्तृतं प्रक्षिपेद् वहिः ।
मृदुना वह्निना साध्या सिद्धो मण्डक उच्यते ॥ २३ ॥

*लोप्त्री (लोई) इति लोके ॥ २२-२३ ॥

अथ सानुपानं मण्डकगुणानाह—

दुग्धेन साज्यखण्डेन मण्डकं भक्षयेन्नरः ।
अथवा सिद्धमांसेन सतक्रवटकेन वा ॥ २४ ॥
मण्डको बृंहणो वृष्यो बल्यो रुचिकरो भृशम् ।
पाकेऽपि मधुरो ग्राही लघुर्दोषत्रयापहः ॥ २५ ॥

अथ पोलिका (पूरी) ।
(कुत्रापि "दुनौरी" इति च) ।
तस्याः साधनं गुणाँश्चाह—

कुर्यात्समितयाऽतीव तन्वी पर्पटिका ततः ॥ २६ ॥
स्वेदयेत्तप्तके तां तु पोलिकां जगदुर्बुधाः ॥
तां खादेल्लप्सिकायुक्तां तस्या मण्डकवद् गुणाः ॥ २७ ॥

अथ लप्सिका (लप्सी) ।
तस्याः साधनं गुणाँश्चाह—

समितां सर्पिषा भृष्टां शर्करां पयसि क्षिपेत् ।
तस्मिन्घनीकृते न्यस्येल्लवंगं मरिचादिकम् ।
सिद्धैषा लप्सिका ख्याता गुणानस्या वदाम्यहम् ॥ २८ ॥
लप्सिका बृंहणी वृष्या बल्या पित्तानिलापहा ।
स्निग्धा श्लेष्मकरी गुर्वी रोचनी तर्पणी परम् ॥ २९ ॥

अथ रोटिका (रोटी) ।
तस्याः साधनं गुणाँश्चाह—

शुष्कगोधूमचूर्णेन किञ्चित्पुष्टाञ्च पोलिकाम् ॥ ३० ॥
तप्तके स्वेदयेत्कृत्वा भूर्यङ्गारेऽपि तां पचेत्
सिद्धैषा रोटिका प्रोक्ता गुणानस्याः प्रचक्ष्महे ॥ ३१ ॥
रोटिका बलकृद्रुच्या बृंहणी धातुवर्द्धनी ॥
वातघ्नी कफकृद् गुर्वी दीप्ताग्नीनां प्रपूजिता ॥ ३२ ॥

*तप्तकं-"तावा" इति लोके ॥ ३०-३२ ॥

अथाङ्गारकर्कटी (वाटी) ।

तस्याः साधनं गुणाँश्चाह—

शुष्कगोधूमचूर्णं तु साम्बु गाढं विमर्दयेत् ।
विधाय वटकाकारं निर्धूमेऽग्नौ शनैः पचेत् ॥ ३३ ॥
अङ्गारकर्कटी ह्येषा बृंहणी शुक्रला लघुः ।
दीपनी कफकृद्बल्या पीनसश्वासकासजित् ॥ ३४ ॥

अथ यवरोटिका ।

तस्या गुणानाह—

यवजा रोटिका रुच्या मधुरा विशदा लघुः ।
मलशुक्रानिलकरी बल्या हन्ति कफामयान् ॥ ३५ ॥

अथ बलभद्रिका (चमसीरोटिका) (छिल्केदार उरद की रोटी) ।

तस्याः साधनं गुणाँश्चाह—

चूर्णं यच्छुष्कमाषाणां चमसी साऽभिधीयते ।
चमसीरचिता रोटी कथ्यते बलभद्रिका ।
रूक्षोष्णा वातला बल्या दीप्ताग्नीनां सुपूजिता ॥ ३६ ॥

अथ धूमसी (धुआंस) ।

तस्याः साधनविधिमाह—

माषाणां दालयस्तोये स्थापितास्त्यक्तकञ्चुकाः ।
आतपे शोषिता यन्त्रे पिष्टास्ता धूमसी स्मृता ॥ ३७ ॥

अथ झर्झरी ।

तस्याः साधनं गुणाँश्चाह—

धूमसीरचिता चैव प्रोक्ता झर्झरिका बुधैः ।
झर्झरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ॥ ३८ ॥

अथ चणकरोटिका-(चनेकी रोटी)

तस्या गुणानाह—

चणक्या रोटिका रूक्षा श्लेष्मपित्तास्रनुद् गुरुः ।
विष्टम्भिनी न चक्षुष्या तद्गुणा चापि शष्कुली ॥ ३९ ॥

अथ पिष्टिका (पीठी) ।

तस्या निर्माणप्रकारमाह—

दालिः संस्थापिता तोये ततोऽपहृतकञ्चुका ।
शिलायां साधु सम्पिष्टा पिष्टिका कथिता बुधैः ॥ ४० ॥

अथ वेढमिका (वेढई) ।

तस्याः साधनं गुणांश्चाह—

माषपिष्टिकया पूर्णगर्भा गोधूमचूर्णतः ।
रचिता रोटिका सैव प्रोक्ता वेढमिका बुधैः ॥ ४१ ॥
भवेद्वेढमिका बल्या वृष्या रुच्याऽनिलापहा ।
उष्णा सन्तर्पणी गुर्वी बृंहणी शुक्रला परम् ॥ ४२ ॥
भिन्नमूत्रमला स्तन्यमेदःपित्तकफप्रदा ।
गुदकीलार्दितश्वासपक्तिशूलानि नाशयेत् ॥ ४३ ॥

अथ पर्पटः (पापड) ।

तत्र माषोद्भवस्य तस्य साधनं गुणांश्चाह—

धूमसीरचिता हिंगुहरिद्रालवणैर्युताः ।
जीरकस्वर्जिकाभ्याञ्च तनूकृत्य च वेल्लिताः ॥ ४४ ॥
पर्पटास्ते सदाऽङ्गारभृष्टाः परमरोचकाः ।
दीपनाः पाचना रूक्षा गुरवः किञ्चिदीरिताः ॥ ४५ ॥

अथ मुद्ग-चणकोद्भव-स्नेहभृष्टानां पर्पटानां गुणानाह—

मौद्गाश्च तद्गुणाः प्रोक्ता विशेषाल्लघवो हिताः ॥ ४६ ॥
चणकस्य गुणैर्युक्ताः पर्पटाश्चणकोद्भवाः ॥
स्नेहभृष्टास्तु ते सर्व भवेयुर्मध्यमा गुणैः ॥ ४७ ॥

अथ पूरिका घृतपक्वा तैलपक्वा च ।
(घी व तेल में पकी हुई कचौरी)

तयोः साधनं गुणांश्चाह—

माषाणां पिष्टिकां पूर्यांल्लवणार्द्रकहिंगुभिः ।
तया पिष्टिकया पूर्णा समिता कृतपोलिका ॥ ४८ ॥
ततस्तैलेन पक्वा सा पूरिका कथिता बुधैः ।
रुच्या स्वाद्वी गुरुः स्निग्धा बल्या पितास्रदूषिका ॥ ४९ ॥

चक्षुस्तेजोहरी चोष्णा पाके वातविनाशिनी ।
तथैव घृतपक्काऽपि चक्षुष्या रक्तपित्तहृत् ॥ ५० ॥

अथ वटकः शुष्कः सरसश्च च ।

(सूखा व रसादार बरा) ।

तयोः साधनं गुणाँश्चाह—

माषाणां पिष्टिकां युक्तां लवणार्द्रकहिंगुभिः ।
कृत्वा विदध्याद्वटकांस्तांस्तैलेषु पचेच्छनैः ॥ ५१ ॥
विशुष्का वटका बल्या बृंहणा वीर्य्यवर्द्धनाः ।
वातामयहरा रुच्या विशेषादर्दितापहाः ॥ ५२ ॥
विबन्धभेदिनः श्लेष्मकारिणोऽत्यग्निपूजिताः ।
संचूर्ण्य निक्षिपेत्तक्रे भृष्टं जीरकहिंगु च ॥ ५३ ॥
लवणं तत्र वटकान्सकलानपि मज्जयेत् ।
शुक्रलस्तत्र वटको बलकृद्रोचनो गुरुः ॥ ५४ ॥
विबन्धहृद्धिदाही च श्लेष्मलः पवनापहः ।
राज्यक्तयाऽतिरोचन्या पाचन्या तांस्तु भक्षयेत् ॥ ५५ ॥

*राज्यक्ता (राइता) इति लोके ॥ ५५ ॥

अथ काञ्जिकवटकः (काञ्जीवरा) ।

तस्य साधनं गुणाँश्चाह—

मन्थनी नूतना धार्या कटुतैलेन लेपिता ।
निर्मलेनाम्बुनाऽऽपूर्य तस्यां चूर्णं विनिक्षिपेत् ॥
राजिकाजीरलवणहिंगुशुण्ठीनिशाकृतम् ॥ ५६ ॥
निक्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्रयेत् ।
ततो दिनत्रयादूर्ध्वमम्लाः स्युर्वटका ध्रुवम् ॥ ५७ ॥
काञ्जिकवटको रुच्यो वातघ्नः श्लेष्मकारकः ।
शूलघ्नोऽजीर्णदाहनुद् नेत्ररोगे तु नो हितः ॥ ५८ ॥

अथाम्लिकावटकाः (इमलीके बडे) ।

तेषां साधनं गुणाँश्चाह—

अम्लिकां स्वेदयित्वा तु जलेन सह मर्दयेत् ।

तन्नीरे कृतसंस्कारे वटकान्मज्जयेज्जनः ।। ५९ ।।
अम्लिकावटकास्ते तु रुच्या वह्निप्रदीपनाः ।
वटकस्य गुणैः पूर्वैरेतेऽपि च समन्विताः ॥ ६० ॥

अथ मुद्गवटकाः (मूँगबरा) ।

तक्रमज्जितानां तेषां गुणानाह—

मुद्गानां वटकास्तक्रे मज्जिता लघवो हिमाः ।
संस्कारजप्रभावेण त्रिदोषशमना हिताः ॥ ६१ ॥

अथ माषवटिकाः (उरदकी बरी) ।

तेषां साधनं गुणांश्चाह—

माषाणां पिष्टिका हिंगुलवणार्द्रकसंस्कृता ।
तया विरचिता वस्त्रे वटिकाः साधु शोषिताः ॥ ६२ ॥
भर्जितास्तप्ततैलैस्ता अथवाऽम्बुप्रयोगतः ।
वटकस्य गणैर्युक्ता ज्ञातव्या रुचिदा भृशम् ॥ ६३ ॥

अथ कूष्माण्डकवटी (पेठेकी बरी) ।

तस्या गणानाह—

कूष्माण्डकवटी ज्ञेया पूर्वोक्तवटिकागुणा ।
विशेषात्पित्तरक्तघ्नी लघ्वी च कथिता बुधैः ॥ ६४ ॥

अथ मुद्गवटी (मूंगकी बरी) ।

तस्या गुणानाह—

मुद्गानां वटिका तद्वद्रचिता साधिता तथा ।
पथ्या रुच्या तथा लघ्वी मुद्गसूपगुणा स्मृता ॥ ६५ ॥

अथालीकमत्स्यः ।

तस्य साधनप्रकारमाह—

माषपिष्टिकया लिप्तं नागवल्लीदलं महत् ॥ ६६ ॥
तत्तु संस्वेदयेद्युक्त्या स्थाल्यामास्तारकोपरि ।
ततो निष्कास्य तं खण्डयं ततस्तैलेन भर्जयेत् ॥ ६७ ॥

*खण्डयं=खण्डेन योग्यमिति यावत् ॥ ६७ ॥

अलीकमत्स्य उक्तोऽयं प्रकारः पाकपण्डितैः ।
तं वृन्ताकभटित्रेण वास्तूकेन च भक्षयेत् ॥ ६८ ॥

अथ क्वथिता (कढी) ।

तस्याः साधनं गुणाँश्चाह—

स्थाल्यां घृते वा तैले वा हरिद्रां हिङ्गु भर्जयेत् ।
अवलेहनसंयुक्तं तक्रं तत्रैव निक्षिपेत् ।
एषा सिद्धा समरिचा क्वथिता कथिता बुधैः ॥ ६९ ॥

*अवलेहनम् "अरिहन" इति लोके ॥ ६९ ॥

क्वथिता पाचनी रुच्या लघ्वी वह्निप्रदीपिनी ।
कफानिलविबन्धघ्नी किञ्चित्पित्तप्रकोपिणी ॥ ७० ॥

अथालीकमत्स्यस्य गुणानाह—

अलीकमत्स्याः शुष्का वा किं वा क्वथितया पुनः ।
बृंहणा रोचना वृष्या बल्या वातगदापहाः ॥ ७१ ॥
कोष्ठशुद्धिकराः शुष्काः किञ्चित्पित्तप्रकोपणाः ।
अर्दिते सहनुस्तम्भे विशेषेण हिताः स्मृताः ॥ ७२ ॥

अथ मुद्गार्द्रकवटकाः (अदरकवड़ा) ।

तेषां साधनं गुणाँश्चाह—

मुद्गपिष्टीविरचितान् वटकाँस्तैलपाचितान् ।
हस्तेन चूर्णयेत्सम्यक् तस्मिंश्चूर्णे विनिक्षिपेत् ॥ ७३ ॥
भृष्टं हिंग्वार्द्रकं सूक्ष्मं मरिचं जीरकं तथा ।
निम्बूरसं यवानीं च युक्त्या सर्वं विमिश्रयेत् ॥ ७४ ॥
मुद्गपिष्टिं पचेत्सम्यक् स्थाल्यामास्तारकोपरि ।
तस्यास्तु गोलकं कुर्यात्तन्मध्ये पूरणं क्षिपेत् ॥ ७५ ॥
तैले तान्गोलकान्पक्त्वा क्वथितायां निमज्जयेत् ।
गोलकाः पाचकैः प्रोक्तास्ते त्वार्द्रकवटा अपि ॥ ७६ ॥
मुद्गार्द्रकवटा रुच्या लघवो बलकारकाः ।
दीपनास्तर्पणाः पथ्यास्त्रिषु दोषेषु पूजिताः ॥ ७७ ॥

अथ वेसनम् (वेसन) ।

तस्य साधनमाह—

दालयश्चणकानां तु निस्तुषा यन्त्रपेषिताः ।
तच्चूर्णं वेसनं प्रोक्तं पाकशास्त्रविशारदैः ॥ ७८ ॥

अथ वेसनवटिका (फुलौरी) ।

तस्याः साधनं गुणांश्चाह—

वटिका वेसनस्यापि कथितायां निमज्जिता ।
रुच्या विष्टम्भजननी बल्या पुष्टिकरी स्मृता ॥ ७८ ॥

*एवमन्येऽपि वेसनभवाः प्रकाराः खण्डनखण्डप्रभृतयो बोद्धव्याः ॥ ७९ ॥

अथ मांसस्य प्रकाराः ।

तत्र शुद्धमांसम् ।

तस्य प्रकारमाह—

पाकपात्रे घृतं दद्यात्तैलञ्च तदभावतः ।
तत्र हिङ्गु हरिद्रां च भर्ज्जयेत्तदनन्तरम् ॥ ८० ॥
छागादेरस्थिरहितं मांसं तत्खण्डितं ध्रुवम् ।
धौतं निर्गालितं तस्मिन्घृते तद्भर्जयेच्छनैः ॥ ८१ ॥
सिद्धयोग्यं जलं दत्त्वा लवणन्तु पचेत्ततः ।
सिद्धे जलेन सम्पिष्य वेशवारं परिक्षिपेत् ॥ ८२ ॥

अथ वेशवारः (पिसा हुआ मसाला) ।

तद्द्रव्याण्याह—

द्रव्याणि वेशवारस्य नागवल्लीदलानि च ।
तण्डुलाश्च लवङ्गानि मरिचानि समासतः ॥ ८३ ॥

*वेशवारः "वेगर" इति लोके ॥ ८३ ॥

अथ शुद्धमांसस्य गुणानाह—

अनेन विधिना सिद्धं शुद्धमांसमिति स्मृतम् ॥ ८४ ॥
शुद्धमांसं परं वृष्यं बल्यं रुच्यञ्च बृंहणम् ।
त्रिदोषशमकं श्रेष्ठं दीपनं धातुवर्द्धनम् ॥ ८५ ॥

अथ सहद्रकम् ("सेहरडुक, सहर्वासु" इति लोके) ।

तस्य साधनं गुणांश्चाह—

छागादेर्मांसमूर्वादेः कुट्टितं खण्डितं पुनः ।
शुद्धमांसविधानेन पचेदेतत्सहद्रकम् ।
सहद्रकं गुणैर्ग्रन्थे शुद्धमांसगुणं स्मृतम् ॥ ८६ ॥

अथ तक्रमांसम् (अखनी) ।

तस्य साधनं गुणांश्चाह—

पाकपात्रे घृतं दत्त्वा हरिद्रां हिङ्गु भर्जयेत् ।
छागादेः सकलस्यापि खण्डान्यपि च भर्जयेत् ॥ ८७ ॥
सिद्धयोग्यं जलं दत्त्वा पचेन्मृदुतरं तथा ।
जीरकादियुते तक्रे मांसखण्डानि भावयेत् ॥ ८८ ॥
तक्रमांसन्तु वातघ्नं लघु रुच्य बलप्रदम् ।
कफघ्नं पित्तलं किञ्चित्सर्वाहारस्य पाचनम् ॥ ८९ ॥

अथ हरीसा (आस) ।

तस्य साधनं गुणांश्चाह—

पाकपात्रे तु बृहति मांसखण्डानि निक्षिपेत् ।
पानीयं प्रचुरं सर्पिः प्रभूतं हिङ्गु जीरकम् ॥ ९० ॥
हरिद्रामार्द्रकं शुण्ठीं लवणं मरिचानि च ।
तण्डुलांश्चापि गोधूमाञ्जम्बीराणां रसान् बहून् ॥ ९१ ॥
यथा सर्वाणि वस्तूनि सुपक्वानि भवन्ति हि ।
तथा पचेत्तु निपुणो बहुमण्डस्थितिर्यथा ॥ ९२ ॥
एषा हरीसा बलकृद्वातपित्तापहा गुरुः ।
शीतोष्णा शुक्रदा स्निग्धा सरा सन्धानकारिणी ॥ ९३ ॥

अथ तलितमांसम् (तला हुआ मांस) ।

तस्य साधनं गुणांश्चाह—

शुद्धमांसविधानेन मांसं सम्यक्प्रसाधितम् ।
पुनस्तदाज्ये सम्भृष्टं तलितं प्रोच्यते बुधैः ॥ ९४ ॥
तलितं बलमेधाऽग्निमांसौजःशुक्रवृद्धिकृत् ।
तर्पणं लघु सुस्निग्धं रोचनं दृढताकरम् ॥ ९५ ॥

अथ शूल्यपलम् (कबाब) ।

तस्य साधनं गुणांश्चाह—

कालखण्डादिमांसानि ग्रथितानि शलाकया ।
घृतं सलवणं दत्त्वा निर्धूमे दहने पचेत् ॥ ९६ ॥

तत्तु शूल्यमिति प्रोक्तं पाककर्मविचक्षणैः ॥ ९७ ॥
शूल्यं पलं सुधातुल्यं रुच्यं वह्निकरं लघु ।
कफवातहरं बल्यं किञ्चित्पित्तकरं हि तत् ॥ ९८ ॥

अथ मांसशृङ्गाटकम् (मांस का सिंगाड़ा) ।

तस्य साधनं गुणांश्चाह—

शुद्धमांसं तनूकृत्य कर्त्तितं स्वेदितं जले ।
लवङ्गहिङ्गुलवणमरिचार्द्रकसंयुतम् ॥ ९९ ॥
एलाजीरकधान्याकनिम्बूरससमन्वितम् ।
घृते सुगन्धे तद् भृष्टं पूरणं प्रोच्यते बुधैः ॥ १०० ॥
शृङ्गाटकं समितया कृतं पूरणपूरितम् ।
पुनः सर्पिषि संभृष्टं मांसशृङ्गाटकं वदेत् ॥ १०१ ॥
मांसशृङ्गाटकं रुच्यं बृंहणं बलकृद् गुरु ।
वातपित्तहरं वृष्यं कफघ्नं वीर्यवर्धनम् ॥ १०२ ॥

अथ सिद्धमांसरसः (सुरुवा) ।

तस्य गुणानाह—

सिद्धमांसरसो रुच्यः श्रमश्वासक्षयापहः ।
प्रीणनो वातपित्तघ्नः क्षीणानामल्परेतसाम् ॥
विश्लिष्टभग्नसन्धीनां शुद्धानां शुद्धिकाङ्क्षिणाम् ॥ १०३ ॥
स्मृत्योजोबलहीनानां ज्वरक्षीणक्षतोरसाम् ।
शस्यते स्वरहीनानां दृष्ट्यायुःश्रवणार्थिनाम् ॥ १०४ ॥
प्रकाराः कथिताः सन्ति बहवो मांससम्भवाः ।
ग्रन्थविस्तरभीतेस्ते मया नात्र प्रकीर्त्तिताः ॥ १०५ ॥

अथ शाकपाकविधिः ।

तमाह—

हिङ्गुजीरयुते तैले क्षिपेच्छाकं सुखण्डितम् ॥ १०६ ॥
लवणं चात्र चूर्णादि सिद्धे हिङ्गूदकं क्षिपेत् ।
इत्येवं सर्वशाकानां साधनोऽभिहितो विधिः ॥ १०७ ॥

अथ पच्यान्नसाधनविधिमाह ।

तत्र मण्डकः ("मठरी, माड़" इति च लोके)

तस्य साधनविधिमाह—

समितां मर्दयेदाज्यैर्जलेनापि च सन्नयेत् ।
तस्यास्तु वटिकां कृत्वा पचेत्सर्पिषि नीरसम् ॥
एलालवङ्गकर्पूरमरिचाद्यैरलङ्कृते ॥ १०८ ॥
मज्जयित्वा सितापाके ततस्तञ्च समुद्धरेत ।
अयं प्रकारः संसिद्धौ मण्ड इत्यभिधीयते ॥ १०९ ॥

*सन्नयेद् = मर्दयेत् ॥ १०८-१०९ ॥

अथ मण्डस्य गुणानाह—

मण्डस्तु बृंहणो वृष्यो बल्यः सुमधुरो गुरुः ।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः ॥ ११० ॥
समिताशर्करासर्पिर्निर्मिता अपरेऽपि ये ।
प्रकारा अमुना तुल्यास्तेऽपि चेत्तद्गुणाः स्मृताः ॥१११॥

अथ सम्पावः (गुजिया) ।

तस्य साधनं गुणांश्चाह—

पर्पट्यः साज्यसमितानिमिता घृतभर्जिताः ।
कुट्टिताश्चालिताः शुद्धशर्कराभिविमर्दिताः ॥ ११२ ॥
तत्र चूर्णं क्षिपेदेलालवङ्गमरिचानि च ।
नारिकेरं सकर्पूरं चारबीजान्यनेकधा ॥ ११३ ॥
घृताक्तसमिता पुष्टरोटिका रचिता ततः ।
तस्यान्तःपूरणं तस्य कुर्य्यान्मुद्रां दृढां सुधीः ॥ ११४ ॥
सर्पिषि प्रचुरे तान्तु सुपचेन्निपुणो जनः ।
प्रकारज्ञैः प्रकारोऽयं सम्पाव इति कीर्त्तितः ॥ ११५ ॥
मण्डकेन समो ज्ञेयः सम्पावोऽपि गुणैर्जनैः ॥ ११६ ॥

अथ कर्पूरनालिका ।

तस्याः साधनं गुणांश्चाह—

घृताढ्यया समितया लम्बं कृत्वा पुटं ततः ।

लवङ्गोषणकर्पूरयुतया सितयाऽन्वितम् ॥ ११७ ॥
पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका ।
सम्पावसदृशी ज्ञेया गुणैः कर्पूरनालिका ॥ ११८ ॥

अथ फेनिका (फेनी) ।

तस्याः साधनं गुणांश्चाह—

समितायां घृताढ्याया वर्त्तीर्दीर्घाः समाचरेत् ।
तास्तु सन्निहिता दीर्घाः पीठस्योपरि धारयेत् ॥ ११९ ॥
वेल्लयेद्वेल्लनेनैता यथैका पर्पटी भवेत् ।
ततश्छुरिकया तान्तु संलग्नामेव कर्त्तयेत् ॥ १२० ॥
ततस्तु वेल्लयेद्भूयः सट्टकेन च लेपयेत् ।
शालिचूर्णं घृतं तोयं मिश्रितं सट्टकं वदेत् ॥ १२१ ॥
ततः संवृत्य तल्लोप्त्रीं विदधीत पृथक्पृथक् ।
पुनस्तां वेल्लयेल्लोप्त्रीं यथा स्यान्मण्डलाकृतिः ॥ १२२ ॥
ततस्तां सुपचेदाज्ये भवेयुश्च स्फुटाः स्फुटाः ।
सुगन्धया शर्करया तदुद्धूलनमाचरेत् ॥ १२३ ॥
सिद्धैषा फेनिकानाम्नी मण्डकेन समा गुणैः ।
ततः किञ्चिल्लघुरियं विशेषोऽयमुदाहृतः ॥ १२४ ॥

*वेल्लयेत्=प्रसारयेत् । वेल्लनः='वेलन' इति लोके । पर्पटी=रोटी । लोप्त्री 'लोई' इति लोके ॥ ११९—१२३ ॥

अथ शष्कुली (खस्तापूरी) ।

तस्याः साधनं गुणांश्चाह—

समितायां घृताक्ताया लोप्त्रीं कृत्वा च वेल्लयेत् ।
आज्ये तां भर्जयेत्सिद्धा शष्कुली फेनिकागुणा ॥ १२५ ॥

अथ सेविकामोदकाः (सेव के लड्डू) ।

तेषां साधनं गुणांश्चाह—

घृताढ्यया समितया कृत्वा सूत्राणि तानि तु ।
निपुणो भर्जयेदाज्ये खण्डपाकेन योजयेत् ॥
युक्तेन मोदकान्कुर्य्यात्ते गुणैर्मण्डका यथा ॥ १२६ ॥

अथ मुक्तामोदका मुद्गमोदका वा (बूँदी के लड्डू)।

तेषां साधनं गुणांश्चाह—

मुद्गानां धूमसीं सम्यग्गोलयेन्निमलाऽम्बुना ॥ १२७ ॥
कटाहस्य घृतस्योर्ध्वं झर्झरं स्थापयेत्ततः।
धूमसीन्तु द्रवीभूतां प्रक्षिपेज्झर्झरोपरि ॥ १२८ ॥

* "झर्झरं झर्झरा"वेति लोके ॥ १२७-१२८ ॥

पतन्ति बिन्दवस्तस्मात्तान्सुपक्वान्समुद्धरेत्।
सितापाकेन संयोज्य कुर्याद्धरतेन मोदकान् ॥ १२९ ॥
लघुर्ग्राही त्रिदोषघ्नः स्वादुः शीतो रुचिप्रदः।
चक्षुष्यो ज्वरहृद्बल्यस्तर्पणो मुद्गमोदकः ॥ १३० ॥

अथ वेसनमोदकाः (मोतीचूरके लड्डू)।

तेषां साधनं गुणांश्चाह—

एवमेव प्रकारेण कार्य्या वेसनमोदकाः ॥ १३१ ॥
ते बल्या लघवः शीताः किञ्चिद्वातकरास्तथा।
विष्टम्भिनो ज्वरघ्नाश्च पित्तरक्तकफापहाः ॥ १३२ ॥

अथ दुग्धकूपिका।

तस्याः साधनं गुणांश्चाह—

तण्डुलचूर्णविमिश्रितनष्टक्षीरेण सान्द्रपिष्टेन।
दृढकूपिकां विदध्यात्ताञ्च पचेत्सर्पिषा सम्यक् ॥ १३३ ॥
अथ तां कोरितमध्यां घनपयसा पूर्णगर्भाञ्च।
सट्टकमुद्रितवदनां तप्तघृते सुपक्ववदनाञ्च ॥ १३४ ॥
अथ पाण्डुखण्डपाके स्नपयेत्कर्पूरवासिते कुशलः।
अथ दुग्धकूपिका सा बल्या पित्तानिलापहा चैव ॥ १३५ ॥
वृष्या शीता गुर्वी शुक्रकरा च तर्पणी रुच्या।
विदधाति कायपुष्टिं दृष्टिं दूरप्रसारिणीं सुचिरम् ॥ १३६ ॥

अथ कुण्डलिनी ("जलेबी" इति लोके)।

तस्याः साधनं गुणांश्चाह—

नूतनं घटमानीय तस्यान्तः कुशलो जनः।
प्रस्थार्द्धपरिमाणेन दध्नाऽम्लेन प्रलेपयेत् ॥ १३७ ॥

द्विप्रस्थां समितां तत्र दध्यम्लं प्रस्थसम्मितम् ।
घृतमर्द्धशरावञ्च घोलयित्वा घटे क्षिपेत् ॥ १३८ ॥
आतपे स्थापयेत्तावद् यावद्याति तदम्लताम् ।
ततस्तत्प्रक्षिपेत्पात्रे सच्छिद्रे भाजने तु तत् ॥ १३९ ॥
परिभ्राम्य परिभ्राम्य सुसन्तप्ते घृते क्षिपेत् ।
पुनःपुनस्तदावृत्त्या विदध्यान्मण्डलाकृतिम् ॥ १४० ॥
तां सुपक्वां घृतान्नीत्वा सितापाके तनुद्रवे ।
कर्पूरादिसुगन्धञ्च स्नापयित्वोद्धरेत्ततः ॥ १४१ ॥
एषा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा ।
धातुवृद्धिकरी वृष्या रुच्या चेन्द्रियतर्पणी ॥ १४२ ॥

अथ पश्चात् परिवेष्याणि ।

तत्र रसाला (सिखरन) ।

तस्याः साधनं सेवनार्हजनान् गुणांश्चाह—

आदौ माहिषमम्लमम्बुरहितं दध्याढकं शर्करां-
शुभ्रां प्रस्थयुगोन्मितां शुचिपटे किञ्चिच्च किञ्चित्क्षिपेत् ।
दुग्धेनार्द्धघटेन मृण्मयनवस्थाल्यां दृढं स्रावये-
देलाबीजलवङ्गचन्द्रमरिचैर्योग्यैश्च तद्योजयेत् ॥ १४३ ॥
भीमेन प्रियभोजनेन रचिता नाम्ना रसाला स्वयं-
श्रीकृष्णेन पुरा पुनःपुनरियं प्रीत्या समास्वादिता ।
एषा येन वसन्तवर्जितदिने संसेव्यते नित्यश-
स्तस्य स्यादतिवीर्य्यवृद्धिरनिशं सर्वेन्द्रियाणां बलम् ॥ १४४ ॥

ग्रीष्मे तथा शरदि ये रविशोषिताङ्गा-
ये च प्रमत्तवनितासुरतातिखिन्नाः ।
ये चापि मार्गपरिसर्पणशीर्णगात्रा-
स्तेषामियं वपुषि पोषणमाशु कुर्य्यात् ॥ १४५ ॥

रसाला शुक्रला बल्या रोचनी वातपित्तजित् ॥ १४६ ॥
दीपनी बृंहणी स्निग्धा मधुरा शिशिरा सरा ।

रक्तपित्तं तृषां दाहं प्रतिश्यायं विनाशयेत् ॥ १४७ ॥

अथ शर्करोदकम् (सरबत) ।

तस्य साधनं गुणांश्चाह—

जलेन शीतलेनैव घोलिता शुभ्रशर्करा ।
एलालवङ्गकर्पूरमरिचैश्च समन्विता ॥ १४८ ॥
शर्करोदकनाम्ना तत्प्रसिद्धं विदुषां मुखैः ।
शर्करोदकमाख्यातं शुक्लं शिशिरं सरम् ॥ १४९ ॥
बल्यं रुच्यं लघु स्वादु वातपित्तप्रणाशनम् ।
मूर्च्छाछर्दितृषादाहज्वरशान्तिकरं परम् ॥ १५० ॥

अथ प्रपाणकानि (सरबत) ।

तत्राम्रफलप्रपाणकम् ।

तस्य साधनं गुणांश्चाह—

आम्रमामं जले स्विन्नं मर्दितं दृढपाणिना ।
सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम् ॥ १५१ ॥
प्रपाणकमिदं श्रेष्ठं भीमसेनेन निर्मितम् ।
सद्यो रुचिकरं बल्यं शीघ्रमिन्द्रियतर्पणम् ॥ १५२ ॥

अथाम्लिकाफलपानकम् ।

तस्य साधनं गुणांश्चाह—

अम्लिकायाः फलं पक्वं मर्दितं वारिणा दृढम् ।
शर्करामरिचैर्मिश्रं लवङ्गेन्दुसुवासितम् ॥ १५३ ॥
अम्लिकाफलसम्भूतं पानकं वातनाशनम् ।
पित्तश्लेष्मकरं किञ्चित्सुरुच्यं वह्निबोधनम् ॥ १५४ ॥

अथ निम्बुकफलपानकम् ।

तस्य साधनं गुणांश्चाह—

भागैकं निम्बुजं तोयं षड्भागं शर्करोदकम् ।
लवङ्गमरिचैर्मिश्रं पानं पानकमुत्तमम् ॥ १५५ ॥
निम्बूफलभवं पानमत्यम्लं वातनाशनम् ।
वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम् ॥ १५६ ॥

अथ धान्याकपानकम् ।

तस्य साधनं गुणांश्चाह—

शिलायां साधु सम्पिष्टं धान्याकं वस्त्रगालितम् ।
शर्करोदकसंयुक्तं कर्पूरादिसुसंस्कृतम् ॥
नूतने मृण्मये पात्रे स्थितं पित्तहरं परम् ॥ १५७ ॥

अथ काञ्जी ।

तस्या गुणानाह—

काञ्जिकं रोचनं रुच्यं पाचनं वह्निदीपनम् ॥ १५८ ॥
शूलाजीर्णविबन्धघ्नं कोष्ठशुद्धिकरं परम् ।
न भवेत्काञ्जिकं यत्र तत्र जालिः प्रदीयते ॥ १५९ ॥
*काञ्जीविधिर्वटकावसरे लिखितः ॥ १५८-१५८ ॥

अथ जालिः ।

तस्य साधनं गुणांश्चाह—

आममाम्रफलं पिष्टं राजिकालवणान्वितम् ।
भृष्टहिंगुयुतं पूतं घोलितं जालिरुच्यते ॥ १६० ॥
जालिर्हरति जिह्वायाः कुण्ठत्वं कण्ठशोधिनी ।
मन्दं मन्दन्तु पीता सा रोचनी वह्निबोधिनी ॥ १६१ ॥

अथ तक्रम् (छाछ) ।

तस्य साधनं गुणांश्चाह—

तुर्यांशेन जलेन संयुतमतिस्थूलं सदम्लं दधि
प्रायो माहिषमम्बुकेन विमले मृद्भाजने गालयेत् ।
भृष्टं हिंगु च जीरकञ्च लवणं राजीश्च किञ्चिन्मितां-
पिष्टां तत्र विमिश्रयेद्भवति तत्तक्रं न कस्य प्रियम् ॥१६२ ॥
तक्रं रुचिकरं वह्निदीपनं पाचनं परम् ।
उदरे ये गदास्तेषां नाशनं तृप्तिकारकम् ॥ १६३ ॥

अथ दुग्धम् (दूध) ।

तस्य भोजनान्ते पानगुणानाह—

विदाहीन्यन्नपानानि यानि भुङ्क्ते हि मानवः ।
तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् ॥ १६४ ॥

*दुग्धस्यापरे गुणा उक्ता एव दुग्धवर्गे ॥ १६४ ॥

अथ सक्तवः (सत्तू) ।

तस्य साधनविधिमाह—

धान्यानि भ्राष्ट्रभृष्टानि यन्त्रपिष्टानि सक्तवः ॥ १६५ ॥

तत्र यवसक्तवः ।

तेषां गुणानाह—

यवजाः सक्तवः शीता दीपना लघवः सराः ।
कफपित्तहरा रूक्षा लेखनाश्च प्रकीर्त्तिताः ॥ १६६ ॥
ते पीता बलदा वृष्या बृंहणा भेदनास्तथा ।
तर्पणा मधुरा रुच्याः परिणामे बलावहाः ॥ १६७ ॥
कफपित्तश्रमक्षुत्तृड्व्रणनेत्रामयापहाः ।
प्रशस्ता घर्मदाहाध्वव्यायामार्त्तशरीरिणाम् ॥ १६८ ॥

अथ चणकयवसक्तवः ।

तेषां साधनं गुणांश्चाह—

निस्तुषैश्चणकैर्भृष्टैस्तुर्यांशैश्च यवैः कृताः ।
सक्तवः शर्करासर्पिर्युक्ता ग्रीष्मेऽतिपूजिताः ॥ १६९ ॥

अथ शालिसक्तवः ।

तेषां गुणानाह—

सक्तवः शालिसम्भूता वह्निदा लघवो हिमाः ।
मधुरा ग्राहिणो रुच्याः पथ्याश्च बलशुक्रदाः ॥ १७० ॥

अथ सक्तुविषये सामान्यपरिभाषामाह—

न भुक्त्वा न रदैश्छित्त्वा न निशायां न वा बहून् ।
न जलान्तरितानद्भिः सक्तूनद्यान्न केवलान् ॥ १७१ ॥
पृथक्पानं पुनर्दानं सामिषं पयसा निशि ।
दन्तच्छेदनमुष्णञ्च सप्त सक्तुषु वर्जयेत् ॥ १७२ ॥

अथ धानाः (बहुरी) ।

तासां साधनं गुणांश्चाह—

यवास्तु निस्तुषा भृष्टाः स्मृता धाना इति स्त्रियाम् ।
धानाः स्युर्दुर्जरा रूक्षास्तृट्प्रदा गुरवश्च ताः ॥

तथा मेहकफच्छर्दिनाशिन्यः सम्प्रकीर्त्तिताः ॥ १७३ ॥

अथ लाजाः (खील)।

तेषां साधनं गुणांश्चाह—

येषां स्युस्तण्डुलास्तानि धान्यानि सतुषाणि च ।
भृष्टानि स्फुटितान्याहुर्लाजा इति मनीषिणः ॥ १७४ ॥
लाजाः स्युर्मधुराः शीता लघवो दीपनाश्च ते ।
स्वल्पमूत्रमला रूक्षा बल्याः पित्तकफच्छिदः ॥
छर्द्यतीसारदाहास्रमेहमेदस्तृषाऽपहाः ॥ १७५ ॥

अथ चिपिटाः (चिउड़ा)।

तेषां साधनं नामानि गुणांश्चाह—

शालयः सतुषा आर्द्रा भृष्टा अस्फुटितास्ततः ।
कुट्टिताश्चिपिटाः प्रोक्तास्ते स्मृताः पृथुका अपि ॥ १७६ ॥
पृथुका गुरवो वातनाशनाः श्लेष्मला अपि ।
सक्षीरा बृंहणा वृष्या बल्या भिन्नमलाश्च ते ॥ १७७ ॥

अथ होलकः (होरहा)।

तस्य साधनं गुणांश्चाह—

अर्द्धपक्वैः शमीधान्यैस्तृणभृष्टैश्च होलकः ।
होलकोऽल्पानिलो मेदःकफदोषत्रयापहः ।
भवेद्यो होलको यस्य स च तत्तद्गुणो भवेत् ॥ १७८ ॥

अथ ऊची (ऊंबी)।

तस्याः साधनं गुणांश्चाह—

मञ्जरी त्वर्द्धपक्वा या यवगोधूमयोर्भवेत् ।
तृणानलेन संभृष्टा बुधैरूचीति सा स्मृता ॥ ॥
ऊची कफप्रदा बल्या लघ्वी पित्तानिलापहा ॥१७९॥

*ऊंची = उम्बी, उमिया" इति लोके ॥ १७९ ॥

अथ कुल्माषाः (घुघुरी)।

तेषां साधनं गुणांश्चाह—

अर्धस्विन्नास्तु गोधूमा अन्येऽपि चणकादयः ॥ १८० ॥
कुल्माषा इति कथ्यन्ते शब्दशास्त्रेषु पण्डितैः ।

कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः ॥ १८१ ॥

अथ पललम् (तिलकुट) ।

तस्य नामानि साधनं गुणाँश्चाह—

पललन्तु समाख्यातं सैत्तवं तिलपिष्टकम् ।
पललं मलकृद् वृष्यं वातघ्नं कफपित्तकृत् ॥
बृंहणं च गुरु स्निग्धं मूत्राधिक्यनिवर्त्तकम् ॥ १८२ ॥

अथ पिण्याकः (तिलकी खली) ।

तस्य नामानि गुणाँश्चाह—

तिलकिट्टन्तु पिण्याकस्तथा तिलखलिः स्मृता ।
पिण्याको लेखनो रूक्षो विष्टम्भी दृष्टिदूषणः ॥ १८३ ॥

अथ तण्डुलः (चावल) ।

तस्य गुणानाह—

तण्डुलो मेहजन्तुघ्नः स नवस्त्वतिदुर्जरः ॥ १८४ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे द्वादशः-
कृतान्नवर्गः समाप्तः ॥ १२ ॥

अथ त्रयोदशो वारिवर्गः ॥ १३ ॥

तत्र पानीयस्य नामानि गुणाँश्चाह—

पानीयं सलिलं नारं कीलालं जलमम्बु च ।
आपो वार्वारि कं तोयं पयः पाथस्तथोदकम् ॥
जीवनं वनमम्भोऽर्णोऽमृतं घनरसोऽपि च ॥ १ ॥
पानीयं श्रमनाशनं क्लमहरं मूर्च्छापिपासापहं-
तन्द्राच्छर्दिविबन्धहृद् बलकरं निद्राहरं तर्पणम् ।
हृद्यं गुप्तरसं ह्यजीर्णशमकं नित्यं हितं शीतलं-
लघ्वच्छं रसकारणं निगदितं पीयूषवज्जीवनम् ॥ २ ॥

अथ पानीयस्य भेदानाह—

पानीयं मुनिभिः प्रोक्तं दिव्यं भौममिति द्विधा ॥ ३ ॥
दिव्यं चतुर्विधं प्रोक्तं धाराजं करकाभवम् ।
तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम् ॥ ४ ॥

अथ धाराजलस्य लक्षणानि गुणांश्चाह—

धाराभिः पतितं तोयं गृहीतं स्फीतवाससा ।
शिलायां वा सुधायां वा धौतायां पतितञ्च तत् ॥ ५ ॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्मिते ।
भाजने मृण्मये वाऽपि स्थापितं धारमुच्यते ॥ ६ ॥
धारं नीरं त्रिदोषघ्नमनिर्देश्यरसं लघु ।
सौम्यं रसायनं बल्यं तर्पणं ह्लादि जीवनम् ॥ ७ ॥
पाचनं मतिकृन्मूर्च्छातन्द्रादाहश्रमक्लमान् ।
तृष्णां हरति तत् पथ्यं विशेषात्प्रावृषि स्मृतम् ॥ ८ ॥

अथ धाराजलस्य भेदानाह—

धाराजलं च द्विविधं गाङ्गसामुद्रभेदतः ॥ ९ ॥

अथ गाङ्गसामुद्रयोर्जलयोर्लक्षणं गुणांश्चाह—

आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः ।
मेघैरन्तरिता वृष्टिं कुर्वन्तीति वचः सताम् ॥ १० ॥
गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः ।
सर्वथा तज्जलं ज्ञेयं तथैव चरके वचः ॥ ११ ॥
स्थापिते हेमजे पात्रे राजते मृण्मयेऽपि वा ।
शाल्यन्नं येन संसिक्तं भवेदक्लेदि वर्णवत् ॥ १२ ॥
तद्गाङ्गं सर्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा ।
तत्तु सक्षारलवणं शुक्रदृष्टिबलापहम् ॥ १३ ॥
विस्रञ्च दोषलं तीक्ष्णं सर्वकर्मसु नो हितम् ।
सामुद्रं त्वाश्विने मासि गुणैर्गाङ्गवदादिशेत् ॥ १४ ॥

अथ शरदि वर्षासु च जलस्य निर्विषत्वे सविषत्वे च हेतुमाह—

यतोऽगस्त्यस्य दिव्यर्षेरुदयात्सकलं जलम् ।
निर्मलं निर्विषं स्वादु शुक्लं स्याददोषलम् ॥ १५ ॥

अत एवाह—

फूत्कारविषवातेन नागानां व्योमचारिणाम् ।
वर्षासु सविषं तोयं दिव्यमप्याश्विनं विना ॥ १६ ॥

अथानार्त्तवजलस्य गुणानाह—

अनार्त्तवं प्रमुञ्चन्ति वारि वारिधरास्तु यत् ।
तत्त्रिदोषाय सर्वेषां देहिनां परिकीर्त्तितम् ॥ १७ ॥

* अनार्त्तवं पौषादिमासचतुष्टयविषयम् ॥ १७ ॥

अथ करकाजलस्य लक्षणं गुणांश्चाह—

दिव्यवाय्वग्निसंयोगात् संहताः खात् पतन्ति याः ।
पाषाणखण्डवच्चापस्ताः कारक्योऽमृतोपमाः ॥ १८ ॥
करकाजं जलं रूक्षं विशदं गुरु च स्थिरम् ।
दारुणं शीतलं सान्द्रं पित्तहृत्कफवातकृत् ॥ १९ ॥

अथ तौषारजलस्य लक्षणं गुणांश्चाह—

अपि नद्याः समुद्रान्ते वह्विरापस्तदुद्भवाः ।
धूमावयवनिर्मुक्तास्तुषाराख्यास्तु ताः स्मृताः ॥ २० ॥

* अपि नद्याः समुद्रान्ते वह्विः = नदीमारभ्य समुद्रपर्य्यन्ते वह्विरास्ते । तदुद्भवाः = वह्विभवाः, धूमावयवनिर्मुक्ताः = धूमांशरहिताः, आपः = तुषाराख्याः । "तुष" इति लोके "तुषार" इति च ॥ २० ॥

अपथ्याः प्राणिनां प्रायो भूरुहाणान्तु ता हिताः ।
तुषाराम्बु हिमं रूक्षं स्याद्वातलमपित्तलम् ।
कफोरुस्तम्भकण्ठाग्निमेहगण्डादिरोगनुत् ॥ २१ ॥

अथ हैमजलस्य लक्षणं गुणांश्चाह—

हिमवच्छिखरादिभ्यो द्रवीभूयाभिवर्षति ।
यत्तदेव हिम हैमं जलमाहुर्मनीषिणः ।
हिमाम्बु शीतं पित्तघ्नं गुरु वातविवर्द्धनम् ॥ २२ ॥

* हैमं जलम् = कुहेसजलम् ॥ २२ ॥

अन्ये तु—

और्वानलधूमेरितमम्बु समुद्रस्य यद्घनीभूतम् ।
पवनानीतमुदीच्यां तद्धिममिति कथ्यते सद्भिः ॥ २३ ॥

* हिमं = "कुहेस" इति लोके ॥ २३ ॥

हिमन्तु शीतलं रूक्षं दारुणं सूक्ष्ममित्यपि ।
न तद् दूषयते वातं न च पित्तं न वा कफम् ॥ २४ ॥

अथ भौमजलस्य भेदानाह—

भौममम्भो निगदितं प्रथमं त्रिविधं बुधैः ।
जाङ्गलं परमानूपं ततः साधारणं क्रमात् ॥ २५ ॥

अथ भौमभेदस्य जाङ्गलादिजलत्रयस्य लक्षणं गुणांश्चाह—

अल्पोदकोऽल्पवृक्षश्च पित्तरक्तामयान्वितः ।
ज्ञातव्यो जाङ्गलो देशस्तत्रत्यं जाङ्गलं जलम् ॥ २६ ॥
बह्वम्बुर्बहुवृक्षश्च वातश्लेष्मामयान्वितः ।
देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ॥ २७ ॥
मिश्रचिह्नस्तु यो देशः स हि साधारणः स्मृतः ।
तस्मिन्देशे यदुदकं तत्तु साधारणं स्मृतम् ॥ २८ ॥
जाङ्गलं सलिलं रूक्षं लवणं लघु पित्तनुत् ।
वह्निकृत्कफहृत्पथ्यं विकारान्हरते बहून् ॥ २९ ॥
आनूपं वायभिष्यन्दि स्वादु स्निग्धं घनं गुरु ।
वह्निहृत्कफकृद्धृद्यं विकारान्कुरुते बहून् ॥ ३० ॥
साधारणं तु मधुरं दीपनं शीतलं लघु ।
तर्पणं रोचनं तृष्णादाहदोषत्रयप्रणुत् ॥ ३१ ॥

अथ भौमानामेव नादेयादीनां लक्षणानि गुणाश्च ।

तत्र नादेयस्य लक्षणं गुणांश्चाह—

नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ॥ ३२ ॥
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ।
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ॥ ३३ ॥

अथ शीघ्रवहत्वादिभेदेन देशभेदेन च नादेयजलानां गुणभेदानाह—

नद्यः शीघ्रवहा लघ्व्यः सर्वा याश्चामलोदकाः ।
गुर्व्यः शैवलसंछन्ना मन्दगाः कलुषाश्च याः ॥ ३४ ॥
हिमवत्प्रभवाः पथ्या नद्योऽश्माहतपाथसः ।
गङ्गाशतद्रुसरयूयमुनाऽऽद्या गुणोत्तमाः ॥ ३५ ॥
सह्यशैलभवा नद्यो वेणागोदावरीमुखाः ।
कुर्वन्ति प्रायशः कुष्ठमीषद्वातकफावहाः ॥ ३६ ॥

नदीसरस्तडागस्थे कूपप्रस्रवणादिजे ।
उदके देशभेदेन गुणान्दोषांश्च लक्षयेत् ॥ ३७ ॥

अथौद्भिदजलस्य लक्षणं गुणांश्चाह—

विदार्य्य भूमिं निम्नां यन्महत्या धारया स्रवेत् ।
तत्तोयमौद्भिदं नाम वदन्तीति महर्षयः ॥ ३८ ॥
औद्भिदं वारि पित्तघ्नमविदाह्यतिशीतलम् ।
प्रीणनं मधुरं बल्यमीषद्वातकरं लघु ॥ ३९ ॥

अथ नैर्झरजलस्य लक्षणं गुणांश्चाह—

शैलसानुस्रवद्वारिप्रवाहो निर्झरो झरः ।
स तु प्रस्रवणश्चापि तत्रत्यं नैर्झरं जलम् ॥ ४० ॥
नैर्झरं रुचिकृत्तीरं कफघ्नं दीपनं लघु ।
मधुरं कटुपाकं च वातलं स्यादपित्तलम् ॥ ४१ ॥

अथ सारसजलस्य लक्षणं गुणांश्चाह—

नद्याः शैलादिरुद्धाया यत्र संश्रित्य तिष्ठति ।
तत्सरो जलजच्छन्नं तदम्भः सारसं स्मृतम् ॥ ४२ ॥
सारसं सलिलं बल्यं तृष्णाघ्नं मधुरं लघु ।
रोचनं तुवरं रूक्षं बद्धमूत्रमलं स्मृतम् ॥ ४३ ॥

अथ ताडागजलस्य लक्षणं गुणांश्चाह—

प्रशस्तभूमिभागस्थो बहुसंवत्सरोषितः ।
जलाशयस्तडागः स्यात्ताडागं तज्जलं स्मृतम् ॥ ४४ ॥
ताडागमुदकं स्वादु कषायं कटुपाकि च ।
वातलं बद्धविण्मूत्रमसृक्पित्तकफापहम् ॥ ४५ ॥

अथ वाप्यजलस्य लक्षणं क्षारमिष्टयोस्तयोर्गुणांश्चाह—

पाषाणैरिष्टकाभिर्वा बद्धः कूपो बृहत्तरः ।
ससोपानो भवेद्वापी तज्जलं वाप्यमुच्यते ॥ ४६ ॥
वाप्यं वारि यदि क्षारं पित्तकृत्कफवातहृत् ।
तदेव मिष्टं कफकृद्वातपित्तहरं भवेत् ॥ ४७ ॥

अथ कौपजलस्य लक्षणं स्वादुक्षारयोस्तयोर्गुणांश्चाह—

भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः ।

बद्धोऽबद्धः स कूपः स्यात्तदम्भः कौपमुच्यते ॥ ४८ ॥
कौपं पयो यदि स्वादु त्रिदोषघ्नं हितं लघु ।
तत्क्षारं कफवातघ्नं दीपनं पित्तकृत्परम् ॥ ४६ ॥

अथ चौञ्ज्यजलस्य लक्षणं गुणांश्चाह—

शिलाकीर्णं स्वयं श्वभ्रं नीलाञ्जनसमोदकम् ।
लतावितानसंछन्नं चौञ्ज्यमित्यभिधीयते ॥ ५० ॥
अश्मादिभिरबद्धं यत्तचौञ्ज्यमिति वा परे ।
तत्रत्यमुदकं चौञ्ज्यं मुनिभिस्तदुदाहृतम् ॥ ५१ ॥
चौञ्ज्यं वह्निकरं नीरं रूक्षं कफहरं लघु ।
मधुरं पित्तनुद्रुच्यं पाचनं विशदं स्मृतम् ॥५२॥

अथ पाल्वलजलस्य लक्षणं गुणांश्चाह—

अल्पं सरः पल्वलं स्याद्यत्र चन्द्रक्षंगे रवौ ॥५३॥
*रवौ=सूर्ये, चन्द्रक्षंगे=कर्कटराशिस्थे, श्रावणे मासीति यावत् ।
अत्र चन्द्रक्षं मृगशिरस्तत्रग इति मुख्यार्थः ॥ ५३ ॥
न तिष्ठति जलं किञ्चित्तत्रत्यं वारि पाल्वलम् ।
पाल्वलं वार्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत् ॥५४॥

अथ विकिरजलस्य लक्षणं गुणांश्चाह—

नद्यादिनिकटे भूमिर्या भवेद्वालुकामयी ।
उद्घाट्यते ततो यत्तु तज्जलं विकि ं विदुः ॥ ५५ ॥
विकिरं शीतलं स्वच्छं निर्दोषं लघु च स्मृतम् ।
तुवरं स्वादु पित्तघ्नं क्षारं तत्पित्तलं मनाक् ॥ ५६ ॥

अथ कैदारजलस्य लक्षणं गुणांश्चाह—

केदारः क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम् ।
कैदारं वार्यभिष्यन्दि मधुरं गुरु दोषकृत् ॥ ५७ ॥

अथ वृष्टिजलस्य लक्षणं गुणांश्चाह—

वार्षिकं तदहर्वृष्टं भूमिस्थमहितं जलम् ।
त्रिरात्रमुषितं तत्तु प्रसन्नममृतोपमम् ॥ ५८ ॥

अथ हेमन्तादिकालविशेषे विहितं जलविशेषमाह—

हेमन्ते सारसं तोयं ताडागं वा हितं स्मृतम् ।

हेमन्ते विहितं तोयं शिशिरेऽपि प्रशस्यते ॥ ५९ ॥
वसन्तग्रीष्मयोः कौपं वाप्यं वा नैर्झरं जलम् ।
नादेयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः ॥ ६० ॥
विषवद्वनवृक्षाणां पत्राद्यैर्दूषितं यतः ।
औद्भिदं वाऽऽन्तरीक्षं वा कौपं वा प्रावृषि स्मृतम् ।
शस्तं शरदि नादेयं नीरमंशूदकं परम् ॥ ६१ ॥

अथांशूदकजलस्य लक्षणं गुणांश्चाह—

दिवा रविकरैर्जुष्टं निशि शीतकरांशुभिः ।
ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहम् ॥ ६२ ॥
*रविकरैर्जुष्टमित्युक्ते दिवापदं समस्तदिवसप्राप्त्यर्थं, शीतकरांशुभिर्जुष्टमित्युक्ते निशोतिपदं समस्तरात्रिप्राप्त्यर्थम् ॥ ६२ ॥
अनभिष्यन्दि निर्दोषमान्तरीक्षजलोपमम् ।
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥ ६३ ॥

अन्यच्च—

शरदि स्वच्छमुदयादगस्त्यस्याखिलं हितम् ॥ ६४ ॥

वृद्धसुश्रुतस्तु—

पौषे वारि सरोजातं माघे तत्तु तडागजम् ।
फाल्गुने कूपसम्भूतं चैत्रे चौञ्ज्यं हितं मतम् ॥ ६५ ॥
वैशाखे नैर्झरं नारं ज्येष्ठे शस्तं तथौद्भिदम् ।
आषाढे शस्यते कौपं श्रावणे दिव्यमेव च ॥ ६६ ॥
भाद्रे कौपं पयः शस्तमाश्विने चौञ्ज्यमेव च ।
कार्त्तिके मार्गशीर्षे च जलमात्रं प्रशस्यते ॥ ६७ ॥

अथ जलग्रहणस्य समयमाह—

भौमानामम्भसां प्रायो ग्रहणं प्रातरिष्यते ।
शीतत्वं निर्मलत्वञ्च यतस्तेषां मतो गुणः ॥ ६८ ॥

अथ जलस्य पानविधिमाह—

अत्यम्बुपानान्न विपच्यतेऽन्नं निरम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्द्धनाय मुहुर्मुहुर्वारि पिबेदभूरि ॥ ६९ ॥

अथ शीतलजलपानस्य विषयानाह—

मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये ।
श्रमे भ्रमे विदग्धेऽन्ने तमके वमथौ तथा ।
ऊर्ध्वगे रक्तपित्ते च शीतमम्भः प्रशस्यते ॥ ७० ॥

अथ शीतलजलपानस्य निषेधविषयानाह—

पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ।
आध्माने स्तिमिते कोष्ठे सद्यः शुद्धौ नवज्वरे ॥ ७१ ॥
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ ।
हिक्कायां स्नेहपाने च शीताम्बु परिवर्जयेत् ॥ ७२ ॥

अथाल्पजलपानस्य विषयानाह—

अरोचके प्रतिश्याये मन्देऽग्नौ श्वयथौ क्षये ।
मुखप्रसेके जठरे कुष्ठे नेत्रामये ज्वरे ।
व्रणे च मधुमेहे च पिबेत्पानीयमल्पकम् ॥ ७३ ॥

अथ जलपानस्यावश्यकतामाह—

जीवनं जीविनां जीवो जगत् सर्वन्तु तन्मयम् ।
नातोऽत्यन्तनिषेधेन कदा चिद्वारि वार्य्यते ॥ ७४ ॥

हारीतश्च—

तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी ।
तस्माद् देयं तृषाऽऽर्त्ताय पानीयं प्राणधारणम् ॥ ७५ ॥
तृषितो मोहमायाति मोहात्प्राणान्विमुञ्चति ।
अतः सर्वास्ववस्थासु न क्व चिद्वारि वारयेत् ॥ ७६ ॥

अथ गुणवतस्तोयस्य लक्षणान्याह—

अगन्धमव्यक्तरसं सुशीतं तर्षनाशनम् ।
स्वच्छं लघु च हृद्यञ्च तोयं गुणवदुच्यते ॥ ७७ ॥

अथावगुणकारिजलस्य लक्षणानि दुर्गुणांश्चाह—

पिच्छिलं कृमिलं क्लिन्नं पर्णशैवालकर्दमैः ।
विवर्णं विरसं सान्द्रं दुर्गन्धं न हितं जलम् ॥ ७८ ॥
कलुषं छन्नमम्भोजपर्णनालीतृणादिभिः ।
दुःस्पर्शनमसंस्पृष्टं सौरचान्द्रमरीचिभिः ॥ ७९ ॥

अनार्त्तवं वार्षिकं तु प्रथमं तच्च भूमिगम् ।
व्यापन्नं परिहर्त्तव्यं सर्वदोषप्रकोपणम् ॥ ८० ॥
तत् कुर्यात्स्नानपानाभ्यां तृष्णाऽऽध्मानचिरज्वरान् ।
कासाग्निमान्द्याभिष्यन्दकण्डूगण्डादिकं तथा ॥ ८१ ॥

अथ दूषितजलस्य निर्दोषीकरणोपायमाह—

निन्दितं चापि पानीयं क्वथितं सूर्य्यतापितम् ।
सुवर्णं रजतं लौहं पाषाणं सिकतामपि ॥ ८२ ॥
भृशं सन्ताप्य निर्वाप्य सप्तधा साधितं तथा ।
कर्पूरजातिपुन्नागपाटलादिसुवासितम् ॥ ८३ ॥
शुचिसान्द्रपटस्रावि क्षुद्रजन्तुविवर्जितम् ।
स्वच्छं कनकमुक्ताऽऽद्यैः शुद्धं स्याद्दोषवर्जितम् ॥ ८४ ॥
पर्णमूलविषग्रन्थिमुक्ताकनकशैवलैः ।
गोमेदेन च वस्त्रेण कुर्य्यादम्बुप्रसादनम् ॥ ८५ ॥

अथ पीतजलस्य परिपाककालानाह—

पीतं जलं जीर्य्यति यामयुग्माद्यामैकमात्राच्छृतशीतलञ्च ।
तदर्धमात्रेण शृतं कदुष्णं पयःप्रपाके त्रय एव कालाः ॥ ८६ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे
त्रयोदशो वारिवर्गः समाप्तः ॥ १३ ॥

अथ चतुर्दशो दुग्धवर्गः ॥ १४ ॥

अथ दुग्धस्य नामानि गुणाँश्चाह—

दुग्धं क्षीरं पयः स्तन्यं बालजीवनमित्यपि ।
दुग्धं सुमधुरं स्निग्धं वातपित्तहरं सरम् ॥ १ ॥
सद्यःशुक्रकरं शीतं सात्म्यं सर्वशरीरिणाम् ।
जीवनं बृंहणं बल्यं मेध्यं वाजीकरं परम् ।
वयःस्थापनमायुष्यं सन्धिकारि रसायनम् ॥ २ ॥

अथ दुग्धपानार्हजनानाह—

विरेकवान्तिवस्तीनां सेव्यमोजोविवर्द्धनम् ॥ ३ ॥

जीर्णज्वरे मनोरोगे शोषमूर्च्छाभ्रमेषु च ।
ग्रहण्यां पाण्डुरोगे च दाहे तृषि हृदामये ॥ ४ ॥
शूलोदावर्त्तगुल्मेषु वस्तिरोगे गुदाङ्कुरे ।
रक्तपित्तेऽतिसारे च योनिरोगे श्रमे क्लमे ॥ ५ ॥
गर्भस्रावे च सततं हितं मुनिवरैः स्मृतम् ।
बालवृद्धक्षतक्षीणाः क्षुद्व्यवायकृशाश्च ये ।
तेभ्यः सदाऽतिशयितं हितमेतदुदाहृतम् ॥ ६ ॥

अथ गोदुग्धस्य गुणानाह—

गव्यं दुग्धं विशेषेण मधुरं रसपाकयोः ।
दोषधातुमलस्रोतःकिञ्चित्क्लेदकरं गुरु ॥ ७ ॥
शीतलं स्तन्यकृत्स्निग्धं वातपित्तास्रनाशनम् ।
जरासमस्तरोगाणां शान्तिकृत् सेविनां सदा ॥ ८ ॥

अथ कृष्णाऽऽदीनां गवां दुग्धस्य गुणानाह—

कृष्णाया गोर्भवेद् दुग्धं वातहारि गुणाधिकम् ॥ ९ ॥
पीताया हरते पित्तं तथा वातहरं भवेत् ।
श्लेष्मलं गुरु शुक्लाया रक्तचित्रा च वातहृत् ॥१०॥

अथ सद्यःप्रसूताया विवत्सायाश्च गोर्दुग्धगुणानाह—

बालवत्सविवत्सानां गवां दुग्धं त्रिदोषकृत् ॥ ११ ॥

अथ वष्कयिण्या गोः (बाखरीगाय के) ।

दुग्धगुणानाह—

वष्कयिण्यास्त्रिदोषघ्नं तर्पणं बलकृत्पयः ॥ १२ ॥

अथ देशविशेषेण गोदुग्धगुणानाह—

जाङ्गलानूपशैलेषु चरन्तीनां यथोत्तरम् ।
पयो गुरुतरं स्नेहो यथाऽऽहारं प्रवर्त्तते ॥ १३ ॥

अथाहारविशेषेण गोदुग्धस्य गुणविशेषानाह—

स्वल्पान्नभक्षणाज्जातं क्षीरं गुरु कफप्रदम् ।
तत्तु बल्यं परं वृष्यं स्वस्थानां गुणदायकम् ।
पलालतृणकार्पासबीजजं रोगिणे हितम् ॥ १४ ॥

अथ माहिषदुग्धस्य गुणानाह—

माहिषं मधुरं गव्यात्स्निग्धं शुक्रकरं गुरु ।
निद्राकरमभिष्यन्दि क्षुधाऽऽधिक्यहरं हिमम् ॥ १५ ॥

अथाजादुग्धस्य गुणानाह—

छागं कषायं मधुरं शीतं ग्राहि तथा लघु ।
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् ॥ १६ ॥
अजानामल्पकायत्वात्कटुतिक्तनिषेवणात् ।
स्तोकाम्बुपानाद्व्यायामात्सर्वरोगापहं पयः ॥ १७ ॥

अथ मृग्यादिदुग्धस्य गुणानाह—

मृगीणां जाङ्गलोत्थानामजाक्षीरगुणं पयः ॥ १८ ॥

तत्राविकदुग्धस्य गुणानाह—

आविकं लवणं स्वादु स्निग्धोष्णं चाश्मरीप्रणुत् ।
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम् ।
गुरु कासानिलोद्भूते केवले चानिले वरम् ॥ १९ ॥

अथ घोटकीदुग्धस्य गुणानाह—

रूक्षोष्णं वडवाक्षीरं बल्यं शोषानिलापहम् ।
अम्लं पटु लघु स्वादु सर्वमैकशफं तथा ॥ २० ॥

अथौष्ट्रदुग्धस्य गुणानाह—

औष्ट्रं दुग्धं लघु स्वादु लवणं दीपनं तथा ।
कृमिकुष्ठकफानाहशोथोदरहरं सरम् ॥ २१ ॥

अथ हस्तिनीदुग्धस्य गुणानाह—

बृंहणं हस्तिनीदुग्धं मधुरं तुवरं गुरु ।
वृष्यं बल्यं हिमं स्निग्धं चक्षुष्यं स्थिरताकरम् ॥ २२ ॥

अथ नारीदुग्धस्य गुणानाह—

नार्या लघु पयः शीतं दीपनं वातपित्तजित् ।
चक्षुःशूलाभिघातघ्नं नस्नाश्च्योतनयोर्वरम् ॥ २३ ॥

अथ धारोष्णादिदुग्धस्य गुणानाह—

धारोष्णं गोपयो बल्यं लघु शीतं सुधासमम् ।
दीपनञ्च त्रिदोषघ्नं तद्धाराशिशिरं त्यजेत् ॥ २४ ॥

धारोष्णं शस्यते गव्यं धाराशीतन्तु माहिषम् ।
शृतोष्णमाविकं पथ्यं शृतशीतमजापयः ॥ २५ ॥
आमं क्षीरमभिष्यन्दि गुरु श्लेष्मामवर्द्धनम् ।
ज्ञेयं सर्वमपथ्यं तु गव्यमाहिषवर्जितम् ॥ २६ ॥
नारीक्षीरं त्वाममेव हितं न तु शृतं हितम् ।
शृतोष्णं कफवातघ्नं शृतशीतन्तु पित्तनुत् ॥ २७ ॥
अर्द्धोदकं क्षीरशिष्टमामाल्लघुतरं पयः ।
जलेन रहितं दुग्धमतिपक्वं यथा यथा ।
तथा तथा गुरु स्निग्धं वृष्यं बलविवर्द्धनम् ॥ २८ ॥

अथ पीयूष-किलाट-क्षीरशाक-तक्रपिण्ड-मोरटानां-
लक्षणानि गुणाँश्चाह—

क्षीरं तत्कालसूताया घनं पीयूषमुच्यते ।
नष्टदुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटकः ॥ २९ ॥

*पीयूषं "पेवस" इति लोके । किलाटकः 'खरेटा', "गिजिरी" वा इति लोके ॥ २९ ॥

अपक्वमेव यन्नष्टं क्षीरशाकं हि तत्पयः ॥ ३० ॥

*क्षीरशाकं 'तुषिभरा' वा "खिरिसा" इति लोके ॥ ३० ॥

दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा ।
द्रवभावेन सहितं तक्रपिण्डः स उच्यते ॥ ३१ ॥
नष्टदुग्धं भवेत्क्षीरं मोरटं जेज्जटोऽब्रवीत् ।
पीयूषश्च किलाटश्च क्षीरशाकं तथैव च ॥ ३२ ॥
तक्रपिण्ड इमे वृष्या बृंहणा बलवर्द्धनाः ।
गुरवः श्लेष्मला हृद्या वातपित्तविनाशनाः ॥ ३३ ॥
दीप्ताग्नीनां विनिद्राणां विदग्धौ चाभिपूजिताः ।
मुखशोषतृषादाहरक्तपित्तज्वरप्रणुत् ।
लघुर्बलकरो रुच्यो मोरटः स्यात्सितायुतः ॥ ३४ ॥

अथ सन्तानिका(मलाई)गुणानाह—

सन्तानिका गुरुः शीता वृष्या पित्तास्रवातनुत् ।
तर्पणी बृंहणी स्निग्धा बलासबलशुक्रला ॥ ३५ ॥

अथ खण्डादियुक्तस्य दुग्धस्य गुणानाह—

खण्डेन सहितं दुग्धं कफकृत्पवनापहम् ।
सितासितोपलायुक्तं शुक्लं त्रिमलापहम् ।
सगुडं मूत्रकृच्छ्रघ्नं पित्तश्लेष्मकरं परम् ॥ ३६ ॥

अथ प्रभातादिभवस्य दुग्धस्य गुणानाह—

रात्रौ चन्द्रगुणाधिक्याद्व्यायामाकरणात्तथा ।
प्राभातिकं पयः प्रायः प्रादोषाद् गुरु शीतलम् ॥ ३७ ॥
दिवाकरकराघाताद्व्यायामानलसेवनात् ।
प्राभातिकात्तु प्रादोषं लघु वातकफापहम् ॥ ३८ ॥

अथ दुग्धसेवनस्य समयविशेषेण गुणविशेषानाह—

वृष्यं बृंहणमग्निदीपनकरं पूर्वाह्णकाले पयो-
मध्याह्ने तु बलावहं कफहरं पित्तापहं दीपनम् ।
बाले वृद्धिकरं क्षयेऽक्षयकरं वृद्धेषु रेतोवहं-
रात्रौ पथ्यमनेकदोषशमनं चक्षुर्हितं संस्मृतम् ॥ ३९ ॥
वदन्ति पेयं निशि केवलं पयो भोज्यं न तेनेह सहौदनादिकम् ।
भवत्यजीर्णं न शयीत शर्वरीं क्षीरस्य पीतस्य न शेषमुत्सृजेत् ॥ ४० ॥
विदाहीन्यन्नपानानि दिवा भुङ्क्ते हि यन्नरः ।
तद्विदाहप्रशान्त्यर्थं रात्रौ क्षीरं सदा पिबेत् ॥ ४१ ॥
दीप्तानले कृशे पुंसि बाले वृद्धे पयःप्रिये ।
मतं हिततमं दुग्धं सद्यः शुक्रकरं यतः ॥ ४२ ॥

अथ मथितदुग्धस्य गुणानाह—

क्षीरं गव्यमथाजं वा कोष्णं दण्डाहतं पिबेत् ।
लघु वृष्यं ज्वरहरं वातपित्तकफापहम् ॥ ४३ ॥

अथ दुग्धफेनम्—(झाग) ।

तस्य गुणानाह—

गोदुग्धप्रभवं किंवा छागीदुग्धसमुद्भवम् ।
भवेत् फेनं त्रिदोषघ्नं रोचनं बलवर्द्धनम् ॥ ४४ ॥
वह्निवृद्धिकरं वृष्यं सद्यस्तृप्तिकरं लघु ।
अतीसारेऽग्निमान्द्ये च ज्वरे जीर्णे प्रशस्यते ॥ ४५ ॥

अथ निन्दितदुग्धस्य लक्षणमाह—

विवर्णं विरसं चाम्लं दुर्गन्धं ग्रथितं पयः ।
वर्जयेदम्ललवणयुक्तं कुष्ठादिकृद् यतः ॥ ४६ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे चतुर्दशो दुग्धवर्गः समाप्तः ॥ १४ ॥

अथ पञ्चदशो दधिवर्गः ॥ १५ ॥

तत्र दध्नो गुणानाह—

दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु ।
पाकेऽम्लं ग्राहिपित्तास्रशोथमेदःकफप्रदम् ॥ १ ॥
मूत्रकृच्छ्रे प्रतिश्याये शीतगे विषमज्वरे ।
अतीसारेऽरुचौ कार्श्ये शस्यते बलशुक्रकृत् ॥ २ ॥

अथ दधिभेदानाह—

आदौ मन्दं ततः स्वादु स्वाद्वम्लञ्च ततः परम् ।
अम्लं चतुर्थमत्यम्लं पञ्चमं दधि पञ्चधा ॥ ३ ॥

अथ मन्दादिदध्नो लक्षणं गुणांश्चाह—

मन्दं दुग्धवदव्यक्तरसं किञ्चिद्घनं भवेत् ।
मन्दं स्यात्सृष्टविण्मूत्रं दोषत्रयविदाहकृत् ॥ ४ ॥
यत्सम्यग्घनतां यातं व्यक्तस्वादुरसं भवेत् ।
अव्यक्ताम्लरसं तत्तु स्वादु विज्ञैरुदाहृतम् ॥ ५ ॥
स्वादु स्यादत्यभिष्यन्दि वृष्यं मेदःकफावहम् ।
वातघ्नं मधुरं पाके रक्तपित्तप्रसादनम् ॥ ६ ॥
स्वाद्वम्लं सान्द्रमधुरं कषायानुरसं भवेत् ।
स्वाद्वम्लस्य गुणा ज्ञेयाः सामान्यदधिवज्जनैः ॥७॥
यत्तिरोहितमाधुर्य्यं व्यक्ताम्लत्वं तदम्लकम् ।
अम्लं तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ॥ ८ ॥
तदत्यम्लं दन्तरोमहर्षकण्ठादिदाहकृत् ।
अत्यम्लं दीपनं रक्तवातपित्तकरं परम् ॥ ९ ॥

अथ गोदधिगुणानाह—

गव्यं दधि विशेषेण स्वाद्वम्लं च रुचिप्रदम् ।
पवित्रं दीपनं हृद्यं पुष्टिकृत्पवनापहम् ।
उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम् ॥१०॥

अथ माहिषदधिगुणानाह—

माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत् ।
स्वादुपाकमभिष्यन्दि वृष्यं गुर्वस्रदूषकम् ॥११॥

अथाजदधिगुणानाह—

आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम् ।
शस्यते श्वासकासार्शःक्षयकार्श्येषु दीपनम् ॥ १२ ॥

अथ पक्वदुग्धजातस्य दध्नो गुणानाह—

पक्वदुग्धभवं रुच्यं दधि स्निग्धं गुणोत्तमम् ।
पित्तानिलापहं सर्वधात्वग्निबलवर्द्धनम् ॥ १३ ॥

अथ निःसारदुग्धजनितदध्नो गुणानाह—

असारं दधि सङ्ग्राहि शीतलं वातलं लघु ।
विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम् ॥ १४ ॥

अथ गालितदध्नो गुणानाह—

गालितं दधि सुस्निग्धं वातघ्नं कफकृद् गुरु ।
बलपुष्टिकरं रुच्यं मधुरं नातिपित्तकृत् ॥ १५ ॥

अथ शर्कराऽऽदिसहितस्य दध्नो गुणानाह—

सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रदाहजित् ।
सगुडं वातनुद् वृष्यं बृंहणं तर्पणं गुरु ॥ १६ ॥

अथ रात्रौ दधिभक्षणस्य निषेधमाह—

न नक्तं दधि भुञ्जीत न चाप्यघृतशर्करम् ।
नामुद्गसूपं नाक्षौद्रं नोष्णं नामलकैर्विना ॥ १७ ॥

*अयमर्थः—

रात्रौ दधि न भुञ्जीत, भुञ्जीत चेत्तदा-अघृतशर्करममुद्गसूपमक्षौद्रमुष्णं विनाऽऽमलकैश्च दधि न भुञ्जीत । तेन घृतशर्कराऽऽदियुक्तं दधि रात्रावपि भुञ्जीतेत्यर्थः ।

*तथा च—

शस्यते दध्नि नो रात्रौ शस्तं चाम्बुघृतान्वितम् ।
रक्तपित्तकफोत्थेषु विकारेषु तु नैव तत् ॥ १ ॥

तद्=अम्बुघृतान्वितमपि ॥ १ ॥ १७ ॥

अथ ऋतुविशेषेण दध्नो विधिनिषधावाह—

हेमन्ते शिशिरे चापि वर्षासु दधि शस्यते ।
शरद्ग्रीष्मवसन्तेषु प्रायशस्तद्विगर्हितम् ॥ १८ ॥

अथ विधिमन्तरा दधिसेवने दुर्गुणानाह—

ज्वरासृक्पित्तवीसर्पकुष्ठपाण्ड्वामयभ्रमान् ।
प्राप्नुयात्कामलां चोग्रां विधिं हित्वा दधिप्रियः ॥१९॥

अथ दध्नः सरमस्तुनोर्लक्षणं गुणांश्चाह—

दध्नस्तूपरि यो भागो घनः स्नेहसमन्वितः ।
स लोके सर इत्युक्तो दध्नो मण्डस्तु मस्तिवति ॥२०॥
सरः स्वादुर्गुरुर्वृष्यो वातवह्निप्रणाशनः ।
साम्लो वस्तिप्रशमनः पित्तश्लेष्मविवर्द्धनः ॥ २१ ॥
मस्तु क्लमहरं बल्यं लघु भक्ताभिलाषकृत् ॥ २२ ॥
स्रोतोविशोधनं ह्लादि कफतृष्णाऽनिलापहम् ।
अवृष्यं प्रीणनं शीघ्रं भिनत्ति मलसञ्चयम् ॥ २३ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे-
पञ्चदशो दधिवर्गः समाप्तः ॥ १५ ॥

अथ षोडशस्तक्रवर्गः ॥ १६ ॥

तत्र तक्रस्य पृथक्पृथङ् नामानि लक्षणं गुणांश्चाह—

घोलं तु मथितं तक्रमुदश्विच्छच्छिकाऽपि च ।
ससरं निर्जलं घोलं मथितं त्वसरोदकम् ॥ १ ॥
तक्रं पादजलं प्रोक्तमुदश्वित्त्वर्द्धवारिकम् ।
छच्छिका सारहीना स्यात्स्वच्छा प्रचुरवारिका ॥
घोलं तु शर्करायुक्तं गुणैर्ज्ञेयं रसालवत् ॥ २ ॥

*मथितम्='महुवा', "मथुवा" वा इति लोके। छच्छिका=
"छाछ" इति लोके ॥ १—२ ॥

वातपित्तहरं ह्लादि मथितं कफपित्तनुत् ॥ ३ ॥
तक्रं ग्राहि कषायाम्लं स्वादुपाकरसं लघु ।
वीर्य्योष्णं दीपनं वृष्यं प्रीणनं वातनाशनम् ॥ ४ ॥
ग्रहण्यादिमतां पथ्यं भवेत्संग्राहि लाघवात् ।
किञ्च स्वादुविपाकित्वान्न च पित्तप्रकोपणम् ॥५॥
अम्लोष्णं दीपनं वृष्यं प्रीणनं वातनाशनम् ।
कषायोष्णविकाशित्वाद्रौक्ष्याच्चापि कफापहम् ॥६॥
न तक्रसेवी व्यथते कदाचिन्न तक्रदग्धाः प्रभवन्ति रोगाः ।
यथा सुराणाममृतं सुखाय तथा नराणां भुवि तक्रमाहुः ॥७॥
उदश्वित् कफकृद् बल्यमामघ्नं परमं मतम् ।
छच्छिका शीतला लघ्वी पित्तश्रमतृषाहरी ।
वातनुत् कफकृत् सा तु दीपनी लवणान्विता ॥८॥

अथोद्धृतस्तोकोद्धृतानुद्धृतघृतानां तक्राणां गुणानाह—

समुद्धृतघृतं तक्रं पथ्यं लघु विशेषतः ॥९॥
स्तोकोद्धृतघृतं तस्माद् गुरु वृष्यं कफापहम् ।
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम् ॥१०॥

अथ दोषविशेषे व्याधिविशेषे च तक्रविशेषानाह—

वातेऽम्लं शस्यते तक्रं शुण्ठीसैन्धवसंयुतम् ।
पित्ते स्वादु सितायुक्तं व्योषक्षारयुतं कफे ॥ ११ ॥
हिंगुजीरयुतं घोलं सैन्धवेन च संयुतम् ।
भवेदतीव वातघ्नमर्शोऽतीसारहृत्परम् ॥१२॥
रुचिदं पुष्टिदं बल्यं वस्तिशूलविनाशनम् ।
मूत्रकृच्छ्रे तु सगुडं पाण्डुरोगे सचित्रकम् ॥१३॥

अथ पक्वापक्वतक्रयोर्गुणानाह—

तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च ।
पीनसश्वासकासादौ पक्वमेव प्रयुज्यते ॥१४॥

अथ तक्रसेवनविषयानाह—

शीतकालेऽग्निमान्द्ये च तथा वातामयेषु च ।
अरुचौ स्रोतसां रोधे तक्रं स्यादमृतोपमम् ॥१४॥
तत्तु हन्ति गरच्छर्दिप्रसेकविषमज्वरान् ।
पाण्डुमेदोग्रहण्यर्शोमूत्रग्रहभगन्दरान् ॥ १५ ॥
मेहं गुल्ममतीसारं शूलप्लीहोदरारुचीः ।
श्वित्रकोष्ठगतव्याधीन् कुष्ठशोथतृषाक्रमीन् ॥ १६ ॥

अथ तक्रस्य निषेधविषयानाह—

नैव तक्रं क्षये दद्यान्नोष्णकाले न दुर्बले ।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपित्तजे ॥ १७ ॥

अथ गव्यादीनां विशिष्टतक्राणां गुणानाह—

यान्युक्तानि दधीन्यष्टौ तद्गुणं तक्रमादिशेत् ॥ १८ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे षोडशस्तक्रवर्गः समाप्तः ॥ १६ ॥

अथ सप्तदशो नवनीतवर्गः ॥ १७ ॥

तत्र नवनीतस्य नामगुणानाह—

म्रक्षणं सरजं हैयङ्गवीनं नवनीतकम् ।
नवनीतं हितं गव्यं वृष्यं वर्णबलाग्निकृत् ॥ १ ॥
संग्राहि वातपित्तासृक्क्षयार्शोऽर्दितकासहृत् ।
तद्धितं बालके वृद्धे विशेषादमृतं शिशोः ॥ २ ॥

अथ माहिषनवनीतस्य गुणानाह—

नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ।
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥ ३ ॥

अथ दुग्धोत्थनवनीतस्य गुणानाह—

दुग्धोत्थं नवनीतं तु चक्षुष्यं रक्तपित्तनुत् ।
वृष्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलम् ॥ ४ ॥

अथ सद्योनिःसारितनवनीतस्य गुणानाह—

नवनीतं तु सद्यस्कं स्वादु ग्राहि हिमं लघु ।

मेध्यं किञ्चित्कषायाम्लमीषत्तक्रांशसङ्क्रमात् ॥ ५ ॥

अथ चिरन्तननवनीतस्य गुणानाह—

सक्षारकटुकाम्लत्वाच्छर्द्यर्शःकुष्ठकारकम् ।
श्लेष्मलं गुरु मेदस्यं नवनीतं चिरन्तनम् ॥ ६ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे सप्तदशो नवनीतवर्गः समाप्तः ॥१७॥

अथाष्टादशो घृतवर्गः ॥ १८ ॥

तत्र घृतस्य नामगुणानाह—

घृतमाज्यं हविः सर्पिः कथ्यन्ते तद्गुणा अथ ।
घृतं रसायनं स्वादु चक्षुष्यं वह्निदीपनम् ॥ १ ॥
शीतवीर्यं विषालक्ष्मीपापपित्तानिलापहम् ।
अल्पाभिष्यन्दि कान्त्योजस्तेजोलावण्यवृद्धिकृत् ॥ २ ॥
स्वरस्मृतिकरं मेध्यमायुष्यं बलकृद् गुरु ।
उदावर्त्तज्वरोन्मादशूलानाहव्रणान् हरेत् ।
स्निग्धं कफकरं रक्षःक्षयवीसर्परक्तनुत् ॥ ३ ॥

अथ गव्यघृतस्य गुणानाह—

गव्यं घृतं विशेषेण चक्षुष्यं वृष्यमग्निकृत् ।
स्वादुपाककरं शीतं वातपित्तकफापहम् ॥ ४ ॥
मेधालावण्यकान्त्योजस्तेजोवृद्धिकरं परम् ।
अलक्ष्मीपापरक्षोघ्नं वयसः स्थापकं गुरु ॥ ५ ॥
बल्यं पवित्रमायुष्यं सुमङ्गल्यं रसायनम् ।
सुगन्धं रोचनं चारु सर्वाज्येषु गुणाधिकम् ॥ ६ ॥

अथ माहिषघृतस्य गुणानाह—

माहिषं तु घृतं स्वादु पित्तरक्तानिलापहम् ।
शीतलं श्लेष्मलं वृष्यं गुरु स्वादु विपच्यते ॥ ७ ॥

अथाजघृतस्य गुणानाह—

आजमाज्यं करोत्यग्निं चक्षुष्यं बलवर्द्धनम् ।

कासे श्वासे क्षये चापि हितं पाके भवेत् कटु ॥ ८ ॥

अथौष्ट्रघृतस्य गुणानाह—

औष्ट्रं कटु घृतं पाके शोषक्रिमिविषापहम् ।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ॥ ९ ॥

अथाविकघृतस्य गुणानाह—

पाके लघ्वाविकं सर्पिः सर्वरोगविनाशनम् ॥ १० ॥
वृद्धिं करोति चास्थ्नां वै वाऽश्मरीशर्कराऽपहम् ।
चक्षुष्यमग्निसंधुक्ष्यं वातदोषनिवारणम् ॥ ११ ॥

अथ नारीघृतस्य गुणानाह—

कफेऽनिले योनिदोषे पित्ते रक्ते च तद्धितम् ।
चक्षुष्यमाज्यं स्त्रीणां वा सर्पिः स्यादमृतोपमम् ॥ १२ ॥

अथवडवाघृतस्य गुणानाह—

वृद्धिं करोति देहाग्नेर्लघु पाके विषापहम् ।
तर्पणं नेत्ररोगघ्नं दाहनुद् वडवाघृतम् ॥ १३ ॥

अथ दुग्धनिःसृतघृतस्य गुणानाह—

घृतं दुग्धभवं ग्राहि शीतलं नेत्ररोगहृत् ।
निहन्ति पित्तदाहास्रमदमूर्च्छाभ्रमानिलान् ॥ १४ ॥

अथ ह्यस्तनदुग्धोत्थघृतस्य गुणानाह—

हविर्ह्यस्तनदुग्धोत्थं तत्स्याद्धैयङ्गवीनकम् ।
हैयङ्गवीनं चक्षुष्यं दीपनं रुचिकृत्परम् ।
बलकृद् बृंहणं वृष्यं विशेषाज्ज्वरनाशनम् ॥ १५ ॥

अथ पुराणघृतस्य गुणानाह—

वर्षादूर्ध्वं भवेदाज्यं पुराणं तत् त्रिदोषनुत् ।
मूर्च्छाकुष्ठविषोन्मादाऽपस्मारतिमिरापहम् ॥ १६ ॥
यथा यथाऽखिलं सर्पिः पुराणमधिकं भवेत् ।
तथा तथा गुणैः स्वैः स्वैरधिकं तदुदाहृतम् ॥ १७ ॥

अथ नवीनघृतस्य विषयानाह—

योजयेन्नवमेवाज्यं भोजने तर्पणे श्रमे ।
बलक्षये पाण्डुरोगे कामलानेत्ररोगयोः ॥ १८ ॥

अथ घृतप्रयोगस्याविषयानाह—

राजयक्ष्मणि बाले च वृद्धे श्लेष्मकृते गदे ॥ १९ ॥
रोगे सामे विषूच्यां च विबन्धे च मदात्यये ।
ज्वरे च दहने मन्दे न सर्पिर्बहु मन्यते ॥२०॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे-
ऽष्टादशो घृतवर्गः समाप्तः ॥ १८ ॥

अथैकोनविंशो मूत्रवर्गः ॥ १९ ॥

तत्र गोमूत्रगुणानाह—

गोमूत्रं कटु तीक्ष्णोष्णं क्षारं तिक्तकषायकम् ।
लघ्वग्निदीपनं मेध्यं पित्तकृत्कफवातहृत् ॥ १ ॥
शूलगुल्मोदरानाहकण्डूवक्षिमुखरोगजित् ।
किलासगदवातामवस्तिरुक्कुष्ठनाशनम् ।
कासश्वासापहं शोथकामलापाण्डुरोगहृत् ॥ २ ॥
कण्डूकिलासगदशूलमुखाक्षिरोगान्गुल्मातिसारमरुदामयमूत्ररोधान् ।
कासं सकुष्ठजठरक्रिमिपाण्डुरोगान्गोमूत्रमेकमपि पीतमपाकरोति॥३॥
सर्वेष्वपि च मूत्रेषु गोमूत्रं गुणतोऽधिकम् ।
अतोऽविशेषात्कथने मूत्रं गोमूत्रमुच्यते ॥ ४ ॥
प्लीहोदरश्वासकासशोथवर्चोग्रहापहम् ॥ ५ ॥
शूलगुल्मरुजाऽऽनाहकामलापाण्डुरोगहृत् ।
कषायं तिक्ततीक्ष्णं च पूरणात्कर्णशूलनुत् ॥ ६ ॥

अथ मनुष्यमूत्रगुणानाह—

नरमूत्रं गरं हन्ति सेवितं तद्रसायनम् ।
रक्तपामाहरं तीक्ष्णं सक्षारलवणं स्मृतम् ॥ ७ ॥

अथ मूत्रस्य सामान्यां परिभाषामाह—

गोऽजाऽविमहिषीणां तु स्त्रीणां मूत्रं प्रशस्यते ।
खरोष्ट्रेभनराश्वानां पुंसां मूत्रं हितं स्मृतम् ॥ ८ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे
एकोनविंशो मूत्रवर्गः समाप्तः ॥ १९ ॥

अथ विंशस्तैलवर्गः ॥ २० ॥

तत्र तैलस्य स्वरूपं गुणं चाह—

तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् ।
तच्च वातहरं सर्वं विशेषात्तिलसम्भवम् ॥ १ ॥

अथ तिलतैलगुणानाह—

तिलतैलं गुरु स्थैर्यबलवर्णकरं सरम् ।
वृष्यं विकाशि विशदं मधुरं रसपाकयोः ॥ २ ॥
सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम् ।
वीर्येणोष्णं हिमं स्पर्शे बृंहणं रक्तपित्तकृत् ॥ ३ ॥
लेखनं बद्धविण्मूत्रं गर्भाशयविशोधनम् ।
दीपनं बुद्धिदं मेध्यं व्यवायि व्रणमेहनुत् ॥ ४ ॥
श्रोत्रयोनिशिरःशूलनाशनं लघुताकरम् ।
त्वच्यं केश्यं च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा ॥ ५ ॥
छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्छिते ।
भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारिते ॥ ६ ॥
तथाऽभिहतनिर्भुग्नमृगव्याघ्रादिविक्षते ।
वस्तौ पानेऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे ।
सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ॥ ७ ॥

ननु बृंहणलेखनयोः कथं सामानाधिकरण्यमित्याह—

रूक्षादिदुष्टः पवनः स्रोतः संकोचयेद् यदा ।
रसोऽसम्यग्वहन् कार्श्यं कुर्याद्रक्ताग्न्यवर्द्धयन् ॥ ८ ॥
तेषु प्रवेष्टुं सरतासौक्ष्म्यस्निग्धत्वमार्दवैः ।
तैलं क्षमं रसं नेतुं कृशानां तेन बृंहणम् ॥ ९ ॥
व्यवायिसूक्ष्मतीक्ष्णोष्णसरत्वैर्मेदसः क्षयम् ।
शनैः प्रकुरुते तैलं तेन लेखनमीरितम् ॥ १० ॥
द्रुतं पुरीषं बध्नाति स्खलितं तत्प्रवर्त्तयेत् ।
ग्राहकं सारकञ्चापि तेन तैलमुदीरितम् ॥ ११ ॥

अथ घृततैलयोः परिभाषामाह—

घृतमब्दात्परं पक्वं हीनवीर्यं प्रजायते ।

तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम् ॥ १२ ॥

अथ सर्षपराजिकातैलयोर्गुणानाह—

दीपनं सार्षपं तैलं कटुपाकरसं लघु ।
लेखनं स्पर्शवीर्य्योष्णं तीक्ष्णं पित्तास्रदूषकम् ॥ १३ ॥
कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम् ।
कण्डूकुष्ठकृमिश्वित्रकोठदुष्टकृमिप्रणुत् ॥ १४ ॥
तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रकृत् ॥ १५ ॥
*राजिकयोः=कृष्णराजिकारक्तराजिकयोः ॥ १५ ॥

अथ तुवरीतैलगुणानाह—

तीक्ष्णोष्णं तुवरीतैलं लघु ग्राहि कफास्रजित् ।
वह्निकृद्विषहृत्कण्डूकुष्ठकोठकृमिप्रणुत् ।
मेदोदोषापहं चापि व्रणशोथहरं परम् ॥ १६ ॥

अथातसीतैलगुणानाह—

अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तकृत् ।
कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु ॥ १७ ॥
मलकृद्रसतः स्वादु ग्राहि त्वग्दोषहृद् घनम् ॥ १८ ॥
वस्तौ पाने तथाऽभ्यङ्गे नस्ये कर्णस्य पूरणे ।
अनुपानविधौ चापि प्रयोज्यं वातशान्तये ॥ १९ ॥

अथ कुसुम्भतैलगुणानाह—

कुसुम्भतैलमम्लं स्यादुष्णं गुरु विदाहि च ।
चक्षुर्भ्यामहितं बल्यं रक्तपित्तकफप्रदम् ॥ २० ॥

अथ खसबीज (पोस्त) तैलगुणानाह—

तैलं तु खसबीजानां बल्यं वृष्यं गुरु स्मृतम् ।
वातहृत्कफहृच्छीतं स्वादुपाकरसं च तत् ॥ २१ ॥

अथैरण्डतैलगुणानाह—

एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु ।
वृष्यं त्वच्यं वयःस्थापि मेधाकान्तिबलप्रदम् ॥ २२ ॥
कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम् ।
विस्रं स्वादु रसे पाके सतिक्तं कटुकं रसम् ॥ २३ ॥

विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलनुत ।
हन्ति वातोदरानाहगुल्माष्ठीलाकटिग्रहान् ॥ २४ ॥
वातशोणितविड्बन्धब्रध्नशोथामविद्रधीन् ।
आमवातगजेन्द्रस्य शरीरवनचारिणः ।
एक एव निहन्ताऽयमेरण्डस्नेहकेसरी ॥ २५ ॥

अथ सर्जरसतैलगुणानाह—

तैलं सर्जरसोद्भूतं विस्फोटव्रणनाशनम् ।
कुष्ठपामाकृमिहरं वातश्लेष्मामयापहम् ॥ २६ ॥

अथ सर्वतैलानां गुणानाह—

तैलं स्वयोनिगुणकृद्वाग्भटेनाखिलं मतम् ।
अतः शेषस्य तैलस्य गुणा ज्ञेयाः स्वयोनिवत् ॥ २७ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे-
विंशस्तैलवर्गः समाप्तः ॥ २० ॥

अथैकविंशः सन्धानवर्गः ॥ २१ ॥

तत्र काञ्जिकस्य लक्षणं गुणाँश्चाह—

सन्धितं धान्यमण्डादि काञ्जिकं कथ्यते जनैः ।
काञ्जिकं भेदि तीक्ष्णोष्णं रोचनं पाचनं लघु ॥ १ ॥
दाहज्वरहरं स्पर्शात्पानाद्वातकफापहम् ।
माषादिवटकैर्यत्तु क्रियते तद् गुणाधिकम् ॥ २ ॥
लघु वातहरं तत्तु रोचनं पाचनं परम् ।
शूलाजीर्णविबन्धामनाशनं वस्तिशोधनम् ॥ ३ ॥

अथ काञ्जिकसेवनायोग्यजनानाह—

शोषमूर्च्छाभ्रमार्त्तानां मदकण्डूविशोषिणाम् ।
कुष्ठिनां रक्तपित्तिनां काञ्जिकं न प्रशस्यते ॥ ४ ॥
पाण्डुरोगे यक्ष्मणि च तथा शोषातुरेषु च ।
क्षतक्षीणे तथा श्रान्ते मन्दज्वरनिपीडिते ।
एतेषां न हितं प्रोक्तं काञ्जिकं दोषकारकम् ॥ ५ ॥

अथ तुषोदकस्य लक्षणं गुणाँश्चाह—

तुषोदकं यवैरामैः सतुषैः शकलीकृतैः ॥ ६ ॥
*यवैः=उदके संहितैः सन्धानवर्गोक्तत्वात् ॥ ६ ॥
तुषाम्बु दीपनं हृद्यं पाण्डुक्रिमिगदापहम् ।
तीक्ष्णोष्णं पाचनं पित्तरक्तकृद्वस्तिशूलनुत् ॥ ७ ॥

अथ सौवीरस्य लक्षणं गुणाँश्चाह—

सौवीरं तु यवैरामैः पक्वैर्वा निस्तुषैः कृतम् ।
गोधूमैरपि सौवीरमाचार्य्याः केचिदूचिरे ॥ ८ ॥
सौवीरं तु ग्रहण्यर्शःकफघ्नं भेदि दीपनम् ।
उदावर्त्ताङ्गमर्दास्थिशूलानाहेषु शस्यते ॥ ९ ॥

अथारनालस्य लक्षणं गुणाँश्चाह—

आरनालं तु गोधूमैरामैः स्यान्निस्तुषीकृतैः ।
पक्वैर्वा सन्धितैस्तत्तु सौवीरसदृशं गुणैः ॥ १० ॥

अथ धान्याम्लस्य लक्षणं गुणाँश्चाह—

धान्याम्लं शालिचूर्णं च कोद्रवादिकृतं भवेत् ।
धान्याम्लं धान्ययोनित्वात्प्रीणनं लघु दीपनम् ।
अरुचौ वातरोगेषु सर्वेष्वास्थापने हितम् ॥ ११ ॥

अथ शिण्डाक्या लक्षणं गुणाँश्चाह—

शिण्डाकी राजिकायुक्तैः स्यान्मूलकदलद्रवैः ।
सर्षपस्वरसैर्वाऽपि शालिपिष्टकसंयुतैः ॥ १२ ॥
*सन्धितैरिति शेषः ॥ १२ ॥
शिण्डाकी रोचनी गुर्वी पित्तश्लेष्मकरी स्मृता ॥ १३ ॥

अथ शुक्तस्य लक्षणं गुणाँश्चाह—

कन्दमूलफलादीनि सस्नेहलवणानि च ।
यत्र द्रवेऽभिषूयन्ते तच्छुक्तमभिधीयते ॥ १४ ॥
शुक्तं कफघ्नं तीक्ष्णोष्णं रोचनं पाचनं लघु ।
पाण्डुक्रिमिहरं रूक्षं भेदनं रक्तपित्तकृत् ॥ १५ ॥

अथासुतम् (संधान) ।

तस्य लक्षणं गुणाँश्चाह—

कन्दमूलफलाढ्यं यत्तत्तु विज्ञेयमासुतम् ।

तद्वच्चयं पाचनं वातहरं लघु विशेषतः ॥ १६ ॥

अथ मद्यस्य नामानि लक्षणं गुणाँश्चाह—

मद्यन्तु सीधुमैरेयमिरा च मदिरा सुरा ।
कादम्बरी वारुणी च हालाऽपि बलवल्लभा ॥ १७ ॥
पेयं यन्मादकं लोकैस्तन्मद्यमभिधीयते ।
यथाऽरिष्टं सुरा सीधुरासवाद्यमनेकधा ॥ १८ ॥
मद्यं सर्वं भवेदुष्णं पित्तकृद्वातनाशनम् ।
भेदनं शीघ्रपाकं च रूक्षं कफहरं परम् ॥ १९ ॥
अम्लं च दीपनं रुच्यं पाचनं चाशुकारि च ।
तीक्ष्णं सूक्ष्मं च विशदं व्यवायि च विकाशि च ॥ २० ॥

अथारिष्टस्य लक्षणं गुणाँश्चाह—

पक्वौषधाम्बुसिद्धं यन्मद्यं तत्स्यादरिष्टकम् ॥ २१ ॥

*अरिष्टं=मद्यमिति लोके । यथा—द्राक्षारिष्टं, दशमूलारिष्टम्, बब्बूलारिष्टमिति ॥ २१ ॥

अरिष्टं लघु पाकेन सर्वतश्च गुणाधिकम् ।
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥ २२ ॥

अथ सुराया लक्षणं गुणाँश्चाह—

शालिषष्टिकपिष्टादिकृतं मद्यं सुरा स्मृता ।
सुरा गुर्वी बलस्तन्यपुष्टिमेदःकफप्रदा ।
ग्राहिणी शोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् ॥ २३ ॥

अथ सुराभेदस्य वारुण्या लक्षणगुणानाह—

पुनर्नवाशालिपिष्टिविहिता वारुणी स्मृता ।
संहितैस्तालखर्जूररसैर्या साऽपि वारुणी ।
सुरावद्वारुणी लघ्वी पीनसाध्मानशूलनुत् ॥ २४ ॥

* सुरातो भेदार्थं लघ्वीति ॥ २४ ॥

अथ द्विविधसीधोर्लक्षणगुणानाह—

इक्षोः पक्वै रसैः सिद्धः सीधुः पक्वरसश्च सः ।
आमैस्तैरेव यः सीधुः स च शीतरसः स्मृतः ॥ २५ ॥

सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् ।
वातपित्तकरः सद्यः स्नेहनो रोचनो हरेत् ॥ २६ ॥
विबन्धमेदःशोफार्शःशोफोदरकफामयान् ॥
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ॥ २७ ॥

अथासवस्य लक्षणं गुणाँश्चाह—

यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः ॥ २८ ॥

* यथा—लोहासवादिः ॥ २८ ॥

आसवस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥ २९ ॥

अथ नवपुराणमदिरागुणानाह—

मद्यं नवमभिष्यन्दि त्रिदोषजनकं सरम् ।
अहृद्यं बृंहणं दाहि दुर्गन्धं विशदं गुरु ॥ ३० ॥
जीर्णं तदेव रोचिष्णु क्रिमिश्लेष्मानिलापहम् ।
हृद्यं सुगन्धि गुणवल्लघु स्रोतोविशोधनम् ॥ ३१ ॥

अथ सात्त्विकादिमनुष्याणां मद्येन जाताश्चेष्टा आह—

सात्त्विके गीतहास्यादि राजसे साहसादिकम् ।
तामसे निन्द्यकर्माणि निद्राञ्च मदिराऽऽचरेत् ॥ ३२ ॥

* आचरेत् = कुर्यात् ॥ ३२ ॥

अथ मद्यपानप्रकारमाह—

विधिना मात्रया काले हितैरन्नैर्यथाबलम् ।
प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतं यथा ॥ ३३ ॥
किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम् ।
अयुक्तियुक्तं रोगाय युक्तियुक्तं यथाऽमृतम् ॥ ३४ ॥

अथ मद्यगन्धस्य दूरीकरणोपायमाह—

मुस्तैलबालुगदजीरकधान्यकैला-
यश्चर्वयन्सदसि वाचमभिव्यनक्ति ।
स्वाभाविकं मुखजमुज्झति पूतिगन्धं-
गन्धञ्च मद्यलशुनादिभवञ्च नूनम् ॥ ३४ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरण-
एकविंशः सन्धानवर्गः समाप्तः ॥ २१ ॥

अथ द्वाविंशो मधुवर्गः ॥ २२ ॥

तत्र मधुनो नामगुणानाह—

मधु माक्षिकमाध्वीकक्षौद्रसारघमीरितम् ।
मक्षिकावरटीभृङ्गवान्तं पुष्परसोद्भवम् ॥ १ ॥
मधु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनम् ।
चक्षुष्यं दीपनं स्वर्यं व्रणशोधनरोपणम् ॥ २ ॥
सौकुमार्यकरं सूक्ष्मं परं स्रोतोविशोधनम् ।
कषायानुरसं ह्लादि प्रसादजनकं परम् ॥ ३ ॥
वर्ण्यं मेधाकरं वृष्यं विशदं रोचनं हरेत् ।
कुष्ठार्शःकासपित्तास्रकफमेहक्लमक्रिमीन् ॥ ४ ॥
मेदस्तृष्णावमिश्वासहिक्काऽतीसारविड्ग्रहान् ।
दाहक्षतक्षयांस्तत्तु योगवाह्यल्पवातलम् ॥ ५ ॥

अथ मधुभेदानाह—

माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रमित्यपि ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥ ६ ॥

अथ तेषां लक्षणं गुणाश्च ।

तत्र माक्षिकस्य लक्षणगुणानाह—

मक्षिकाः पिङ्गवर्णास्तु महत्यो मधुमक्षिकाः ।
ताभिः कृतं तैलवर्णं माक्षिकं परिकीर्त्तितम् ॥ ७ ॥
माक्षिकं मधुषु श्रेष्ठं नेत्रामयहरं लघु ।
कामलाऽर्शःक्षतश्वासकासक्षयविनाशनम् ॥ ८ ॥

अथ भ्रामरस्य लक्षणगुणानाह—

किञ्चित्सूक्ष्मैः प्रसिद्धेभ्यः षट्पदेभ्योऽलिभिश्चितम् ।
निर्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥ ९ ॥
भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु ।
स्वादुपाकमभिष्यन्दि विशेषात्पिच्छिलं हिमम् ॥ १० ॥

अथ क्षौद्रस्य लक्षणगुणानाह—

मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राऽऽख्यास्तत्कृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात्कपिलं भवेत् ॥

गुणैर्माक्षिकवत्क्षौद्रं विशेषान्मेहनाशनम् ॥ ११ ॥

अथ पौत्तिकमधुनो लक्षणगुणानाह—

कृष्णा या मशकोपमा लघुतराः प्रायो महापीडिका-
वृक्षाणां पृथुकोटरान्तरगताः पुष्पासवं कुर्वते ।
तास्तज्ज्ञैरिह पुत्तिका निगदितास्ताभिः कृतं सर्पिषा-
तुल्यं यन्मधु तद्वनेचरजनैः संकीर्त्तितं पौत्तिकम् ॥ १२ ॥
पौत्तिकं मधु रूक्षोष्णं पित्तदाहास्रवातकृत् ।
विदाहि मेहकृच्छ्रघ्नं ग्रन्थ्यादिक्षतशोषि च ॥ १३ ॥

अथ छात्रमधुनो लक्षणं गुणांश्चाह—

वरटाः कपिलाः पीताः प्रायो हिमवतो वने ॥ १४ ॥
कुर्वन्ति च्छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥
छात्रं कपिलपीतं स्यात्पिच्छिलं शीतलं गुरु ॥ १५ ॥
स्वादुपाकं कृमिश्वित्ररक्तपित्तप्रमेहजित् ।
भ्रमतृण्मोहविषहृत्तर्पणञ्च गुणाधिकम् ॥ १६ ॥

अथार्घ्यस्य लक्षणगुणानाह—

मधूकवृक्षनिर्यासं जरत्कार्वाश्रमोद्भवम् ।
स्रवत्यार्घ्यं तदाख्यातं श्वेतकं मालवे पुनः ॥ १७ ॥
तीक्ष्णं तुण्डासु याः पीता मक्षिकाः षट्पदोपमाः ।
अर्घ्यास्तास्तत्कृतं यत्तदार्घ्यमित्यपरे जगुः ॥ १८ ॥
आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके तिक्तञ्च बलपुष्टिकृत् । १९ ॥

अथौद्दालकमधुनो लक्षणगुणानाह—

प्रायो वल्मीकमध्यस्थाः कपिलाः स्वल्पकीटकाः ।
कुर्वन्ति कपिलं स्वल्पं तत्स्यादौद्दालकं मधु ॥ २० ॥
औद्दालकं रुचिकरं स्वर्यं कुष्ठविषापहम् ।
कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तकृत् ॥ २१ ॥

अथ दालमधुलक्षणगुणानाह—

संस्रुत्य पतितं पुष्पाद्यत्तु पत्रोपरि स्थितम् ।
मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ॥ २२ ॥

दालं मधु लघु प्रोक्तं दीपनीयं कफापहम् ।
कषायानुरसं रूक्षं रुच्यं छर्दिप्रमेहजित ॥ २३ ॥
अधिकं मधुरं स्निग्धं बृंहणं गुरु भारिकम् ॥ २४ ॥

*लघु पाके, गुरु भारिकं, तुलितम् ॥ २३-२४ ॥

अथ नवपुराणमधुगुणानाह—

नवं मधु भवेत्पुष्ट्यै नातिश्लेश्महरं सरम् ।
पुराणं ग्राहकं रूक्षं मेदोघ्नमतिलेखनम् ॥ २५ ॥
मधुनः शर्करायाश्च गुडस्यापि विशेषतः ॥
एकसंवत्सरे वृत्ते पुराणत्वं स्मृतं बुधैः ॥ २६ ॥

अथ शीतलोष्णमधुनोर्गुणदोषानाह—

विषपुष्पादपि रसं सविषा भ्रमरादयः ।
गृहीत्वा मधु कुर्वन्ति तच्छीतं गुणवन्मधु ॥ २७ ॥
विषान्वयात्तदुष्णन्तु द्रव्येणोष्णेन वा सह ।
उष्णार्त्तस्योष्णकाले च स्मृतं विषसमं मधु ॥ २८ ॥

अथ मधूच्छिष्टम् (मोम) ।

तस्य नामगुणानाह—

मयनं तु मधूच्छिष्टं मधुशेषं च सिक्थकम् ।
मध्वाधारो मदनकं मधूषितमपि स्मृतम् ॥ २९ ॥
मदनं मृदु सुस्निग्धं भूतघ्नं व्रणरोपणम् ।
भग्नसन्धानकृद्वातकुष्ठवीसर्परक्तजित् ॥ ३० ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे द्वाविंशो मधुवर्गः समाप्तः ॥ २२ ॥

अथ त्रयोविंश इक्षुवर्गः ॥ २३ ॥

तत्रादाविक्षोर्नामगुणानाह—

इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूरिरसोऽपि च ।
गुडमूलोऽसिपत्रश्च तथा मधुतृणः स्मृतः ॥ १ ॥
इक्षवो रक्तपित्तघ्ना बल्या वृष्याः कफप्रदाः ।
स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः ॥ २ ॥

अथेक्षुभेदानाह—

पौण्ड्रको भीरुकश्चापि वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः॥ ३॥
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
मनोगुप्ता च इत्येता जातयस्तत्र कीर्त्तिताः॥ ४॥

अथ श्वेतपौण्ड्रकभीरुकेक्षुगुणानाह—

वातपित्तप्रशमनो मधुरो रसपाकयोः।
सुशीतो बृंहणो बल्यः पौण्ड्रको भीरुकस्तथा॥ ५॥

अथ कोशकारेक्षुगुणानाह—

(करिया कुशिआर)

कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः॥ ६॥

अथ कान्तारेक्षुगुणानाह—

कान्तारेक्षुर्गुरुर्वृष्यः श्लेष्मलो बृंहणः सरः॥ ७॥

अथवंशकेक्षुगुणानाह—

दीर्घपोरः सुकठिनः सक्षारो वंशकः स्मृतः॥ ८॥

अथ शतपोरकेक्षुगुणानाह—

शतपर्वा भवेत्किञ्चित्कोशकारगुणान्वितः।
विशेषात्किञ्चिदुष्णश्च सक्षारः पवनापहः॥ ९॥

अथ तापसेक्षुगुणानाह—

तापसेक्षुर्भवेन्मृद्वी मधुरा श्लेष्मकोपनी।
तर्पणी रुचिकृच्चापि वृष्या च बलकारिणी॥ १०॥

अथ काण्डेक्षुगुणानाह—

एवंगुणस्तु काण्डेक्षुः स तु वातप्रकोपणः॥ ११॥

अथ सूचीपत्रनैपालदीर्घपत्रनीलपोराणां गुणानाह—

सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः।
वातलाः कफपित्तघ्नाः सकषाया विदाहिनः॥ १२॥

अथ मनोगुप्तेक्षुगुणानाह—

मनोगुप्ता वातहरी तृष्णाऽऽमथविनाशिनी।
सुशीता मधुराऽतीव रक्तपित्तप्रणाशिनी॥ १३॥

अथ बालतरुणवृद्धेक्षुगुणानाह—

वाल इक्षुः कफं कुर्य्यान्मेदोमेहकरश्च सः ।
युवा तु वातहृत् स्वादुरीषत्तीक्ष्णश्च पित्तनुत् ॥
रक्तपित्तहरो वृद्धः क्षतहृद् बलवीर्यकृत् ॥ १४ ॥

अथेक्षोरङ्गभेदेन गुणभेदानाह—

मूले तु मधुरोऽत्यर्थं मध्येऽपि मधुरः स्मृतः ।
अग्रे ग्रन्थिषु विज्ञेय इक्षुः पटुरसो जनैः ॥ १५ ॥

अथ चूषितेक्षुगुणानाह—

दन्तनिष्पीडितस्येक्षो रसः पित्तास्रनाशनः ।
शर्करासमवीर्यः स्यादविदाही कफप्रदः ॥ १६ ॥

अथ यान्त्रिकेक्षुरसगुणानाह—

मूलाग्रजन्तुग्रन्थ्यादिपीडनान्मलसङ्करात् ।
किञ्चित्कालविधृत्या च विकृतिं याति यान्त्रिकः ॥
तस्माद्विदाही विष्टम्भी गुरुः स्याद्यान्त्रिको रसः ॥ १७ ॥

अथ पर्युषितेक्षुरसगुणानाह—

रसः पर्युषितो नेष्टो ह्यम्लो वातापहो गुरुः ।
कफपित्तकरः शोषी भेदनश्चातिमूत्रलः ॥ १८ ॥

अथ पक्वेक्षुरसगुणानाह—

पक्वो रसो गुरुः स्निग्धः सुतीक्ष्णः कफवातनुत् ।
गुल्मानाहप्रशमनः किञ्चित्पित्तकरः स्मृतः ॥ १९ ॥

अथेक्षुरसनिर्मितपदार्थगुणानाह—

इक्षोर्विकारास्तृड्दाहमूर्छापित्तास्रनाशनाः ।
गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः ।
वृष्या मोहहराः शीता बृंहणा विषहारिणः ॥ २० ॥

अथ फाणितस्य लक्षणगुणानाह—

("चरका, राब, छोवा" इति लोके) ।

इक्षो रसस्तु यः पक्वः किञ्चिद्गाढो बहुद्रवः ।
स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया ॥
फाणितं गुर्वभिष्यन्दि बृंहणं कफशुक्रकृत् ।

वात्तपित्तश्रमान्हन्ति मूत्रवस्तिविशोधनम् ॥ २१ ॥

अथ मत्स्यण्डीलक्षणगुणानाह—

("रावकाकव, खण्डराव" इति लोके)

इक्षो रसो यः सम्पक्को घनः किञ्चिद्द्रवान्वितः ॥ २२ ॥

मन्दं यत्स्यन्दते तस्मात्तन्मत्स्यण्डी निगद्यते ।

मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिलापहा ।

मधुरा बृंहणी वृष्या रक्तदोषापहा स्मृता ॥ २३ ॥

अथ गुडस्य लक्षणं गुणांश्चाह—

इक्षो रसो यः सम्पक्को जायते लोष्टवद् दृढः ॥ २४ ॥

स गुडो गौडदेशे तु मत्स्यण्ड्येव गुडो मतः ।

गुडो वृष्यो गुरुः स्निग्धो वातघ्नो मूत्रशोधनः ।

नातिपित्तहरो मेदःकफक्रिमिबलप्रदः ॥ २५ ॥

अथ पुराणगुडस्य गुणानाह—

गुडो जीर्णो लघुः पथ्योऽनभिष्यन्द्यग्निपुष्टिकृत् ।

पित्तघ्नो मधुरो वृष्यो वातघ्नोऽसृक्प्रसादनः ॥ २६ ॥

अथ नवीनगुडस्य गुणानाह—

गुडो नवः कफश्वासकासक्रिमिकरोऽग्निकृत ॥ २७ ॥

अथानुपानभेदेन गुडस्य गुणानाह—

श्लेष्माणमाशु विनिहन्ति सहार्द्रकेण
पित्तं निहन्ति च तदेव हरीतकीभिः ।
शुण्ठ्या समं हरति वातमशेषमित्थं-
दोषत्रयक्षयकराय नमो गुडाय ॥ २८ ॥

अथ खण्डस्य गुणानाह—

खण्डन्तु मधुरं वृष्यं चक्षुष्यं बृंहणं हिमम् ।

वातपित्तहरं स्निग्धं बल्यं वान्तिहरं परम् ॥ २८ ॥

*"खण्डमि" ति प्रसिद्धं (खांड़-गुड़) ॥ २९ ॥

अथ शर्करालक्षणगुणानाह—

("चीनी" इति लोके प्रसिद्धा)

खण्डन्तु सिकतारूपं सुश्वेतं शर्करा सिता ।

सिता सुमधुरा रुच्या वातपित्तास्रदाहहृत् ।
मूर्च्छाच्छर्दिज्वरान्हन्ति सुशीता शुक्रकारिणी ॥ ३० ॥

अथ पुष्पसिता सितोपलयोर्गुणानाह—

(फूल से बनाई हुई चीनी और मिश्री)

भवेत्पुष्पसिता शीता रक्तपित्तहरी लघुः ।
सितोपला सरा लघ्वी वातपित्तहरी हिमा ॥ ३१ ॥

अथ मधुखण्डगुणानाह—

मधुजा शर्करा रूक्षा कफपित्तहरी गुरुः ।
छर्द्यतीसारतृड्दाहरक्तहृत्तुवरा हिमा ॥ ३२ ॥

अथ परिभाषामाह—

यथा यथैषां नैर्मल्यं मधुरत्वं यथा यथा ।
स्नेहलाघवशैत्यादि सरत्वञ्च तथा तथा ॥ ३३ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे
त्रयोविंश इक्षुवर्गः समाप्तः ॥ २३ ॥

अथ चतुर्विंशोऽनेकार्थनामवर्गः ॥ २४ ॥

तत्र द्व्यर्थानि नामान्याह—

यथा–अश्मन्तकः–अम्ललोणिका, कोविदारश्च । कठिल्लकः–कारवेल्लः, रक्तपुनर्नवा च । कुलकः–पटोलः, कुपीलुश्च (कुपीलुः–"कुचिला" इति लोके प्रसिद्धः) ।कोशातकी–महाकोशातकी, राजकोशातकी च । दीप्यकः–यवानी, अजमोदा च । मरुवकः–फणिज्जकः, पिण्डीतकश्च, (फणिज्जकः–"मरुआ" इति लोके) । (पिण्डीतकः ="मैनफल" इति लोके) । मधूलिका–मूर्वा, जलयष्टी च । रुचकम्–सौवर्चलं, बीजपूरकञ्च । लोणिका–लोणीशाकं, चांगेरीशाकञ्च । वसुकः—रक्तार्कः, क्षारलवणं च । वाह्लीकम्–कुङ्कुमं, हिङ्गु च । वितुन्नकम्–धान्यकं, तुत्थञ्च । स्वादुकण्टकः–गोक्षुरः, विकङ्कतश्च । अग्निमुखी–भल्लातकी, लाङ्गली च । अग्निशिखम्–कुङ्कुमं, कुसुम्भञ्च । अजशृङ्गी–मेषशृङ्गी, कर्कटशृङ्गी च । प्रियङ्गुः–फलिनी, कङ्गुश्च । भृङ्गः–भृङ्गराजः, त्वक् च । समङ्गा–मञ्जिष्ठा, लज्जालुश्च । अमोघा–विडङ्गं, पाटला च । मोचा–कदली,

शाल्मलिश्च । कुटन्नटः-श्योनाकः, कैवर्तीमुस्तञ्च । कुनटी-धनिका, मनःशिला च । घोएटा-पूगः, बदरी च । त्रिपुटा-त्रिवृत्, सूक्ष्मैला च । शटी-कर्चूरः, गन्धपलाशी च । दन्तशठः-जम्बीरः, कपित्थश्च । दन्तशठा—अम्लिका, चाङ्गेरी च । अरुणम्-मञ्जिष्ठा, अतिविषा च । कणा-पिप्पली, जीरकञ्च । तालपर्णी-मुशली, मुरा च । पीलुपर्णी-मूर्वा, बिम्बी च । ब्राह्मणी-भार्ङ्गी, स्पृक्का च । अपराजिता-विष्णुक्रान्ता, शालिपर्णी च । आस्फोता-अपराजिता, सारिवा च । पारावतपदी-ज्योतिष्मती, काकजङ्घा च । शारदी-सारिवा, जलपिप्पली च । उग्रगन्धा-वचा, यवानी च । परिव्याधः-कर्णिकारः, जलवेतसश्च । अञ्जनम्-स्रोतोऽञ्जनं, सौवीरञ्च । अग्निः-चित्रकः, भल्लातश्च । कृमिघ्नः-विडङ्गः, हरिद्रा च । तेजनः-शरः, वेणुश्च । तेजनी-तेजस्वती, मूर्वा च । रोचनः-कम्पिल्लः, रोचना च । रोचना—गोरोचना, रक्तकह्लारञ्च । राजादनम्-क्षीरिका, प्रियालश्च । शकुलादनी-कटुका, जलपिप्पली च । गोलोमी—श्वेतदूर्वा, वचा च । पद्मा —पद्मचारिणी, भार्ङ्गी च । श्यामा—सारिवा, प्रियङ्गुश्च । उत्तमा—त्रिफला, सर्वतोभद्रा च । धान्यम्-धान्याकं, शाल्यादि च । सहस्रवीर्या-नीलदूर्वा, महाशतावरी च । सेव्यम्-उशीरं, लामज्जकञ्च । उदुम्बरः-जन्तुफलं, ताम्रञ्च । ऐन्द्री-इन्द्रवारुणी, इन्द्राणी च । कटम्भरा-कटुका, श्योनाकञ्च । क्षारः-यवक्षारः, स्वर्जिका च । गण्डीरः-गण्डारी, मञ्जिष्ठा च । (गण्डारी-शाकविशेषो "गण्डानी"ति लोके)। गन्धारी-दुरालभा, गन्धपलाशी च । चित्रा-इन्द्रवारुणी, बृहद्दन्ती च । तुण्डिकेरी-कार्पासी, बिम्बी च । धारा-गुडूची, क्षीरकाकोली च । बालपत्रः-खदिरः, यवासश्च । वारि-बालकम्, उदकञ्च । श्रृङ्गारवल्ली-भार्ङ्गी, गुञ्जा च । अमृणालम्-लामज्जकम्, उशीरञ्च । कुण्डली-गुडूची, कोविदारश्च । गन्धफली-प्रियङ्गुः, चम्पककलिका च । दीर्घमूलः-यवासः, शालिपर्णी च । पिच्छिला-शाल्मली, शिंशपा च । पुष्पफलः-कपित्थः, कूष्माण्डश्च । पोटगलः-नलः, काशश्च । ध्वफलः-कुटजः, वंशश्च । देवी-मूर्वा, स्पृक्का च । विश्वा-शुण्ठी, अतिविषा च । शीतशिवम्-सैन्धवं, मिश्रेया च । कर्कशः-काम्पिल्यः, कासमर्दश्च । चर्मकषा-शातला, मांसरोहिणी च । नन्दिवृक्षः-अश्वत्थभेदः (अधोमुखपत्रशाखो "बेलिया पीपर" इति लोके) तूणिश्च । पयः-क्षीरम्, उदकञ्च । रुहा-दुर्वा, मांसरोहिणी

च। सिंही–बृहती, वासा च ॥ कतकम्–विडलवणम् , निर्मलीफलं च। कण्टकाढ्यः–कुब्जकः, शाल्मली च। यक्षधूपः–सरलनिर्यासः , रालश्च। द्राविणी–शटी, सूक्ष्मैला च। हट्टविलासिनी–हरिद्रा , नखी च। तिल-पर्णम्–रक्तचन्दनम् , ग्रन्थिपर्णं च। मधुरः–जीवकः , जीवनीयगणश्च । लोह-द्रावणी–गण्डदूर्वा , अम्लवेतसश्च । नागिनी–ताम्बूली , नागपुष्पी च। मृदुरेचनी–त्रिवृत् , मार्कण्डिका च। नटः–श्योनाकः , अशोकश्च । वनस्प-तिः–वटः , नन्दिवृक्षश्च। मन्दारः–श्वेतार्कः, महानिम्बश्च । अम्बुजः–कम-लम् , इज्जलश्च। कवरी–वर्वरी, हिङ्गुपत्री च । कुमारी–घृतकुमारिका, शतपत्री च। वरतिक्तकः–पाढा , पर्पटश्च । चित्रकः–पाठा , अनलनामा च । यज्ञियः–खदिरः, पलाशश्च । रक्तबीजः–अरिष्टकः , कन्दुरी च। क्षारश्रेष्ठः–पलाशः , मोक्षकश्च । श्वेतपुष्पः–श्वेतार्कः , इन्द्रवारुणी च। तुवरी–सौराष्ट्री , आढकी च। कुम्भिका–पूगफला, वारिपर्णी च। राजपु-त्रिका–रेणुका , जाती च। रक्तपुष्पः–रक्तार्कः, कन्दुरी च। शतला–शातला, वासन्ती च। विषमुष्टिकः–महानिम्बः, विषतिन्दुकश्च। रक्तफला–स्वर्णवल्ली, वचश्च। चन्द्रहासा–गुडूची, लक्ष्मणा च।

अथ त्र्यर्थानि नामान्याह—

क्रमुकः–पूगः, तूदः, पट्टिकालोध्रश्च। क्षुरकः–कोकिलाक्षः, गोक्षुरः, तिल-कनामपुष्पविशेषश्च। प्रियकः–प्रियङ्गुः, कदम्बः, असनश्च। पृथ्वीका–कालाजा-जी, बृहदेला, हिङ्गुपत्री च। भूतीकम्–भूनिम्बं, कत्तृणं, भूस्तृणञ्च। सोमव-ल्कः–कट्फलः, श्वेतखदिरः, घृतपूर्णकरञ्जश्च। सौगन्धिकम्–कह्लारं, कत्तृणं, ग-न्धकञ्च। भृङ्गः–भृङ्गराजः, त्वग् , भ्रमरश्च। अरिष्टः–निम्बः, रसोनं, मद्यञ्च। मर्कटी–कपिकच्छुः, अपामार्गः, करञ्जी च। अम्बष्ठा–पाठा, चाङ्गेरी, मोचिका च। कृष्णा—पिप्पली, कालाजाजी, नीली च। क्षीरिणी–दुग्धिका, क्षीरकाकोली, श्वेतसारिवा च। मधुपर्णी–गुडूची, गम्भारी, नीला च। मण्डूकपर्णः–श्योनाकः, स स्त्रियां तु मञ्जिष्ठा, ब्रह्ममाण्डूकी च। श्री-पर्णी–गम्भारी, गणिकारिका, कट्फलं च। अमृता–गुडूची, हरीतकी, धात्री च। अनन्ता–दुरालभा, नीलदूर्वा, लाङ्गली च। ऋष्यप्रोक्ता–अतिबला, महाश-तावरी, कपिकच्छुश्च। कृष्णवृन्ता–पाटली, गाम्भारी, माषपर्णी च। जीवन्ती–

गुडूची, शाकविशेषः, वन्दा च । लता—सारिवा-प्रियङ्गुः, ज्योतिष्मती च । समुद्रान्ता-दुरालभा, कार्पासी, स्पृक्का च । हैमवती-हरीतकी, श्वेतवचा, पीतदुग्धः सेहुण्डश्च, (यस्य मूलं "चोक" इति प्रसिद्धम्) । अव्यथा- हरीतकी, महाश्रावणी, पद्मचारिणी च । षड्ग्रन्था-गन्धपलाशी, वचा, करञ्जी, च । वरदा-सुवर्चला ("हुरहुर" इति लोके), अश्वगन्धा, वाराही ("गेठी"ति लोके) । इक्षुगन्धा-काशः, कोकिलाक्षः, क्षीरविदारी च। कालस्कन्धः-तमालः, तिन्दुकं, कालखदिरश्च । महौषधम्-शुण्ठी, रसोनः, विषञ्च । मधु-क्षौद्रं, पुष्परसः, मद्यञ्च । कपीतनः-आम्रातकः, शिरीषः, गर्दभाण्डश्च । मदनः-पिण्डीतकः, धत्तूरः, सिक्थकञ्च । शतपर्वा-वंशः, दूर्वा, वचा च । सहस्रवेधी-अम्लवेतसः, मृगमदः, हिङ्गु च । ताम्रपुष्पी-धातकी, पाटला, श्यामात्रिवृच्च । सदापुष्पः-श्वेतार्कः, रक्तार्कः, कुन्दश्च । सुरभिः-शल्लकी, मुरा, एलवालुकं च । लक्ष्मीः-ऋद्धिः, वृद्धिः, शमी च । कालानुसार्यम्-कालीयकं, तगरं, शैलेयञ्च । चाम्पेयः-चम्पकः, नागकेसरः, पद्मकेसरश्च । नादेयी-गणिकारिका, जलजम्बूः, जलवेतसश्च । पाक्यम्-विडम् , सौवर्चलम् , यवक्षारश्च । विशल्या-लाङ्गली, गुडूची, लघुदन्ती च । इन्द्रद्रुः-ककुभः, देवदारुः, कुटजश्च । काश्मीरं काश्मीरी च-कुंकुमम्, पुष्करमूलम् , गम्भारी च । गुन्द्रः-पटेरकः, मुञ्जः, शरश्च । गुन्द्रा-प्रियङ्गुः, फलिनी, भद्रमुस्तकश्च । चुक्रम्-शुक्तम्, अम्लवेतसम्, वृक्षाम्लञ्च । पारिभद्रः-निम्बः, पारिजातः, देवदारु च । पीतदारु-हरिद्रा, देवदारु, सरलश्च। वीरः-ककुभः, वीरणं, काकोली च । वीरतरुः-ककुभः, वीरणम् , शरश्च । मयूरः-अपामार्गः अजमोदा, तुत्थञ्च। रक्तसारः-रक्तचन्दनं, पतङ्गः, खदिरश्च । वदरा-सुवर्चला, अश्वगन्धा, वाराही च । वशिरः-रक्तापामार्गः, गजपिप्पली, समुद्रलवणञ्च । सौवीरम्-अञ्जनभेदः, बदरम् , सन्धानभेदश्च । वञ्जुलः-अशोकः, वेतसः, तिनिशश्च । शिला-मनःशिला, शिलाजतु, गैरिकञ्च । सोमवल्ली-बाकुची, गुडूची, ब्राह्मी च । अक्षीवः-शोभाञ्जनः, महानिम्बः, समुद्रलवणञ्च । कारवी-कालाजाजी, शताह्वा, अजमोदा च । धामार्गवः-रक्तापामार्गः, राजकोशातकी, महाकोशातकी च । दुःस्पर्शः-यवासः, कपिकच्छूः, कण्टकारी च । पलाशः-किंशुकः, गन्धपलाशी, पत्रञ्च । कालमेषी-मञ्जिष्ठा, बाकुची, श्यामात्रिवृच्च । पलङ्कषा-गुग्गुलुः, गोक्षुरः, लाक्षा च । मधुरसा-द्राक्षा, मूर्वा, गम्भारी

च । **रसा**–रास्ना, शल्लकी पाठा च । **श्रेयसी**–हरीतकी, रास्ना, गजपिप्पली च । **लोहम्**–अयः, कांस्यम्, अगुरु च । **सहा**-मुद्गपर्णी, बलाभेदः (ककही इति लोके), शतपत्री ("सेवती गुलाब" इति लोके) । **सुवहा**-रास्ना, नाकुली, नीलपुष्पः सिन्दुवारश्च । **कठिल्लकः**-कारवेल्लम्, रक्तपुनर्नवा, कृष्णवर्वरी च। **मधूलिका**–मूर्वा, यष्टी, मधूकश्च। **वितुन्नकम्**—धान्यकम्, तुत्थकम्, गोनर्दश्च । **देवी**–स्पृक्का, मूर्वा, कर्कोटी च । **वसुकः**=शिवमल्ली, श्वेतार्कः, रोमकं च । **गण्डीरः**–शाकविशेषः, मंजिष्ठा, गण्डदूर्वा च । **लाङ्गली**–कलिहारी, जलपिप्पली, नारिकेलश्च। **पिच्छिला**-शिंशिपा, शाल्मलिः, भूतवृक्षश्च । **महासहा**–माषपर्णी, अम्लातकः, कुब्जकश्च । **चन्द्रिका**–मेथी, चन्द्रशूरः, श्वेतकण्टकारी च । इति ।

अथ चतुरर्थकानि नामान्याह—

श्वेतपुष्पा–इन्द्रवारुणी, सिन्दुवारः, श्वेतार्कः, सैरेयकश्च । **कारवी**–पृथ्वीका, शतपुष्पा, कालाजाजी, अजमोदा च । **अम्बष्ठा**–पाठा, चाङ्गेरी, मोचिका, यूथिका च । इति ।

अथ बह्वर्थकानि नामान्याह—

अक्षशब्दः स्मृतोऽष्टासु सौवर्चलविभीतके ।
कर्षपद्माक्षरुद्राक्षशकटेन्द्रियपाशके ॥ १ ॥
काकाख्यः काकमाची च काकोली काकणन्तिका ।
काकजङ्घा काकनासा काकोदुम्बरिकाऽपि च ॥
सप्तस्वर्थेषु कथितः काकशब्दो विचक्षणैः ।। २ ।।
सर्पद्विरदमेषेषु सीसके नागकेसरे ।
नागवल्ल्यां नागदन्त्यां नागशब्दः प्रयुज्यते ।।
मांसे द्रवे चेक्षुरसे पारदे मधुरादिषु ।
बालरोगे विषे नीरे रसो नवसु वर्त्तते ।। ४ ।।

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणे चतुर्विंशोऽनेकार्थवर्गः समाप्तः ॥ २४ ॥

इति भावप्रकाशे पूर्वखण्डे प्रथमभागे द्रव्यगुणप्रकरणापरनामकं षष्ठं वर्गप्रकरणं समाप्तम् ॥ ६ ॥

समाप्तश्चायं पूर्वखण्डे प्रथमो भागः ॥ १ ॥

भावप्रकाशः ।

पूर्वखण्डे

द्वितीयो भागः ।

तत्र

सप्तमं परिभाषाऽऽदिप्रकरणम् ७ ।

अथ प्रथमं मानपरिभाषाप्रकरणम् ॥ १ ॥

तत्रादौ मानोक्तौ हेतुमाह—

न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् ।
अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया ॥ १ ॥

अथ मागधमानमाह—

चरकस्य मतं वैद्यैराद्यैर्यस्मान्मतं ततः ।
विहाय सर्वमानानि मागधं मानमुच्यते ॥ २ ॥
त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः ।
त्रसरेणुस्तु पर्य्यायनाम्ना वंशी निगद्यते ॥ ३ ॥
जालान्तरगतैः सूर्य्यकरैर्वंशी विलोक्यते ।
षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका ॥ ४ ॥
तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः ।
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् ॥ ५ ॥
षड्भिस्तु रत्तिकाभिः स्यान्माषको हेमधानकौ ।
माषैश्चतुर्भिः शाणः स्याद् धरणः स निगद्यते ॥ ६ ॥
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते ।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ॥ ७ ॥
कोलद्वयन्तु कर्षः स्यात्स प्रोक्तः पाणिमानिका ।

अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम् ॥ ८ ॥
विडालपदकं चैव तथा षोडशिका मता ।
करमध्यो हंसपदं सुवर्णं कवलग्रहः ॥ ९ ॥
उदुम्बरश्च पर्य्यायैः कर्षमेव निगद्यते ।
स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा ॥ १० ॥
शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका ।
प्रकुञ्चः षोडशी बिल्वं पलमेवात्र कीर्त्यते ॥ ११ ॥
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते ।
प्रसृतिभ्यामञ्जलिः स्यात्कुडवोऽर्द्धशरावकः ॥ १२ ॥
अष्टमानञ्च स ज्ञेयः कुडवाभ्याञ्च मानिका ।
शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ॥ १३ ॥
शरावाभ्यां भवेत्प्रस्थश्चतुःप्रस्थस्तथाऽऽढकः ।
भाजनं कांस्यपात्रं च चतुःषष्टिपलश्च सः ॥ १४ ॥
चतुर्भिराढकैर्द्रोणः कलशो नल्वणोऽर्मणः ।
उन्मानञ्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः ॥ १५ ॥
द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकः ।
शूर्पाभ्याञ्च भवेद् द्रोणी वाहो गोणी च सा स्मृता ॥१६॥
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः ।
चतुःसहस्रपलिका षण्णवत्यधिका च सा ॥ १७ ॥
पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः ।
तुलापलशतं ज्ञेयं सर्वत्रैवैष निश्चयः ॥ १८ ॥
माषटङ्काक्षबिल्वानि कुडवप्रस्थमाढकम् ।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणम् ॥ १९ ॥

*मागधपरिभाषायां षड्रत्तिको माषश्चतुर्विंशतिरत्तिकष्टङ्कः, षण्णवतिरत्तिकः कर्षः । अयं चरकसम्मतः । सुश्रुतमते तु–पञ्चरत्तिको माषः, विंशतिरत्तिकष्टङ्कः, अशीतिरत्तिकः कर्षः । अयमेव कालिङ्गपरिभाषायामपि । यतस्तत्राष्टरत्तिको माषो द्वात्रिंशद्रत्तिकष्टङ्कः, सार्धटङ्कद्वयमितः कर्षः ॥ २—१९ ॥

अथ द्रवार्द्रशुष्कद्रव्याणां मानविषये परिभाषामाह—

गुञ्जादिमानमारभ्य यावत्स्यात्कुडवस्थितिः ।
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम् ॥ २० ॥
प्रस्थादिमानमारभ्य द्विगुणं तद् द्रवार्द्रयोः ।
मानं तथा तुलायास्तु द्विगुणं न क्वचित्स्मृतम् ॥ २१ ॥

अथ कुडवभाण्डस्य लक्षणमाह—

मृद्वृक्षवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम् ।
विस्तीर्णञ्च तथोच्चञ्च तन्मानं कुडवं वदेत् ॥ २२ ॥

इति मागधमानं समाप्तम् ।

अथ कालिङ्गमानमाह—

यतो मन्दाग्नयो ह्रस्वा हीनसत्त्वा नराः कलौ ।
अतस्तु मात्रा तद्योग्या प्रोच्यते सुज्ञसम्मता ॥ २३ ॥
यवो द्वादशभिर्गौरसर्षपैः प्रोच्यते बुधैः ।
यवद्वयेन गुञ्जा स्यात्त्रिगुञ्जो वल्ल उच्यते ॥ २४ ॥
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत्क्वचित् ।
चतुर्भिर्माषकैः शाणः स निष्कष्टङ्क एव च ॥ २५ ॥
गद्याणो माषकैः षड्भिः कर्षः स्याद्दशमाषकः ।
चतुष्कर्षैः पलं प्रोक्तं दशशाणमितं बुधैः ॥ २६ ॥
चतुष्पलैश्च कुडवः प्रस्थाद्याः पूर्ववन्मताः ।
स्थितिर्नास्त्येव मात्रायाः कालमग्निं वयो बलम् ॥ २७ ॥
प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत् ।
नाल्पं हन्त्यौषधं व्याधिं यथाऽम्भोऽल्पं महानलम् ।
अतिमात्रं च दोषाय यथा शस्ये बहूदकम् ॥ २८ ॥

इति कालिङ्गमानं समाप्तम् ।

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे परिभाषाऽऽदिप्रकरणे प्रथमं मानपरिभाषाऽऽख्यं प्रकरणं समाप्तम् ॥ १ ॥

अथ द्वितीयं भेषजविधानप्रकरणम् ॥ २ ॥

अथ भेषजानां विधानानि ।

तत्रादौ कषायभेदानाह—

स्वरसश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ ।
ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम् ॥ १ ॥

अथ स्वरसविधिमाह—

अहतात्तत्क्षणाकृष्टाद् द्रव्यात्क्षुण्णात्समुद्भवेत् ।
वस्त्रनिष्पीडितो यश्च स्वरसो रस उच्यते ॥ २ ॥

*अहताद् = शीताग्निकीटादिभिरनुपहतात् । क्षुण्णात = संपिष्टात् ॥ २ ॥

कुडवं चूर्णितं द्रव्यं क्षिप्तञ्च द्विगुणे जले ।
अहोरात्रं स्थितं तस्माद्भवेद्वा रस उत्तमः ॥ ३ ॥

*चूर्णितं = चूर्णीकृतम् ॥ ३ ॥

आदाय शुष्कद्रव्यं वा स्वरसानामसंभवे ।
जलेऽष्टगुणिते साध्यं पादशिष्टं च गृह्यते ॥ ४ ॥
स्वरसस्य गुरुत्वाच्च पलमर्द्धं प्रयोजयेत् ।
निशोषितं चाग्निसिद्धं पलमात्रं रसं पिबेत् ॥ ५ ॥

*निशोषितं = निशायामुषितम् ॥ ५ ॥

सितामधुगुडक्षाराञ्जीरकं लवणं तथा ।
घृतं तैलञ्च चूर्णादीन्कोलमात्रान् रसे क्षिपेत् ॥ ६ ॥

*कोलः = टङ्कद्वयम् ॥ ६ ॥

अथ तण्डुलजलविधिमाह—

कण्डितं तण्डुलपलं जलेऽष्टगुणिते क्षिपेत् ।
भावयित्वा जलं ग्राह्यं देयं सर्वत्र कर्मसु ॥ ७ ॥

* भावयित्वा = कोमलीकृत्य ॥ ७ ॥

अथ हिमनिर्माणविधिमाह—

क्षुण्णं द्रव्यपलं सम्यक् षड्भिर्नीरपलैः प्लुतम् ।
निशोषितं हिमः स स्यात्तथा शीतकषायकः ॥
तस्य मानं मतं पाने पलद्वयमितं बुधैः ॥ ८ ॥

*क्षुण्णं=चूर्णीकृतम् ॥ ८ ॥

अथ मन्थनिर्माणविधिमाह—

जले चतुष्पले शीते क्षुण्णं द्रव्यपलं क्षिपेत्।
मृत्पात्रे मन्थयेत् सम्यक् तस्माच्च द्विपलं पिबेत् ॥ ९ ॥

*क्षुण्णं=चूर्णीकृतम्। मन्थयेत्=मथ्नीयात् ॥ ९ ॥

अथ फाण्टनिर्माणविधिमाह—

क्षुण्णे द्रव्यपले सम्यग्जलमुष्णं विनिक्षिपेत्।
मृत्पात्रे कुडवोन्मानं ततस्तु स्रावयेत्पटात् ॥ १० ॥
स स्याच्चूर्णद्रवः फाण्टस्तन्मानं द्विपलोन्मितम्।
क्षौद्रं सितागुडादींस्तु कर्षमात्रान्विनिक्षिपेत् ॥ ११ ॥

*क्षुण्णे=चूर्णीकृते, स चूर्णद्रवः फाण्टः स्यादित्यन्वयः ॥१०-११॥

अथ कल्कविधिमाह—

द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत्।
तदेव कल्को विज्ञेयस्तन्मानं कर्षसम्मितम् ॥ १२ ॥
कल्के मधु घृतं तैलं देयं द्विगुणमात्रया।
सितां गुडं समं दद्याद् द्रवो देयश्चतुर्गुणः ॥ १३ ॥

अथ चूर्णविधिमाह—

अत्यन्तशुष्कं यद् द्रव्यं सुपिष्टं वस्त्रगालितम्।
तत्स्याच्चूर्णं रजः क्षोदस्तन्मात्रा कर्षसम्मिता ॥ १४ ॥
चूर्णे गुडः समो देयः शर्करा द्विगुणा मता।
चूर्णेषु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत ॥ १५ ॥
लिहेच्चूर्णं द्रवैः सर्वैर्घृताद्यैर्द्विगुणोन्मितैः।
पिबेच्चतुर्गुणैरेवं चूर्णमालोडितं द्रवैः ॥ १६ ॥

अथानुपानमाह—

चूर्णावलेहगुटिकाकल्कानामनुपानकम्।
पित्तवातकफातङ्के त्रिद्व्येकपलमाहरेत् ॥ १७ ॥
यथा तैलं जले क्षिप्तं क्षणेनैव विसर्पति।
अनुपानबलादङ्गे तथा सर्पति भेषजम् ॥ १८ ॥

अथ भावनाविधिमाह—

द्रवेण यावता सम्यक् चूर्णं सर्वं प्लुतं भवेत् ।
भावनायाः प्रमाणं तु चूर्णे प्रोक्तं भिषग्वरैः ॥ १९ ॥

अथ पुटपाकविधिमाह—

पुटपाकस्य कल्कस्य स्वरसो गृह्यते यतः ।
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥ २० ॥
पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्णता ।
लेपश्च द्व्यङ्गुलं स्थूलं कुर्य्याद् द्व्यङ्गुलमात्रकम् ॥ २१ ॥
काश्मरीवटजम्ब्वादिपत्रैर्वेष्टनमुत्तमम् ॥ २२ ॥
पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत् ।
कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः ॥ २३ ॥

अथोष्णोदकविधिमाह—

अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा ।
अथ वा क्वथनेनैव सिद्धमुष्णोदकं भवेत् ॥ २४ ॥
श्लेष्मामवातमेदोघ्नं वस्तिशोधनदीपनम् ।
कासश्वासज्वरान् हन्ति पीतमुष्णोदकं निशि ॥ २५ ॥

अथ क्षीरपाकविधिमाह—

क्षीरमष्टगुणं द्रव्यात्क्षीरान्नीरं चतुर्गुणम् ।
क्षीरावशेषं तत्पीतं शूलमामोद्भवं जयेत् ॥ २६ ॥

अथ क्वाथविधिमाह—

पानीयं षोडशगुणं क्षुण्णे द्रव्यपले क्षिपेत् ।
मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितम् ॥ २७ ॥
कर्षादौ तु पलं यावद् दद्यात्षोडशिकं जलम् ।
ततस्तु कुडवं यावत्तोयमष्टगुणं भवेत् ॥
चतुर्गुणमतश्चोर्ध्वं यावत् प्रस्थादिकं जलम् ॥ २८ ॥
*षोडशिकं = षोडशगुणम् ॥ २८ ॥
तज्जलं पाययेद् धीमान्कोष्णं मृद्वग्निसाधितम् ।
शृतः क्वाथः कषायश्च निर्यूहः स निगद्यते ॥ २९ ॥

अथ क्वाथपानमात्रामाह—

मात्रोत्तमा पलेन स्यात्त्रिभिरक्षैस्तु मध्यमा ।
जघन्या च पलार्द्धेन स्नेहक्वाथौषधेषु च ॥ ३० ॥

तन्त्रान्तरे—

क्वाथ्यद्रव्यपले वारि द्विरष्टगुणमिष्यते ।
चतुर्भागावशिष्टन्तु पेयं पलचतुष्टयम् ॥ ३१ ॥
दीप्तानलं महाकायं पाययेदञ्जलिं जलम् ।
अन्ये त्वर्द्धं परित्यज्य प्रसृतिं तु चिकित्सकाः ॥३२॥
क्वाथत्यागमनिच्छन्तस्त्वष्टभागावशेषितम् ।
पारम्पर्य्योपदेशेन वृद्धवैद्याः पलद्वयम् ॥ ३३ ॥

*अष्टभागावशेषितस्य चतुर्भागावशिष्टापेक्षया गुरुत्वाद् दीप्तानलं महाकायं पलद्वयं पाययेत् । मध्यमाग्निमल्पकायं पलमात्रं पाययेत् । "मात्रोत्तमा पलेन स्याद्" इत्यादिवचनात् ॥ ३१-३३ ॥

अथ क्वाथे सिताऽऽदीनां प्रक्षेपमानमाह—

क्वाथे क्षिपेत्सितामंशैश्चतुर्थाष्टमषोडशैः ।
वातपित्तकफातङ्के विपरीतं मधु स्मृतम् ॥ ३४ ॥
जीरकं गुग्गुलं क्षारं लवणं च शिलाजतु ।
हिंगु त्रिकटुकञ्चैव क्वाथे शाणोन्मितं क्षिपेत् ॥ ३५ ॥
क्षीरं घृतं गुडं तैलं मूत्रं चान्यद् द्रवं तथा ।
कल्कं चूर्णादिकं क्वाथे निक्षिपेत् कर्षसम्मितम् ॥ ३६ ॥

अथौषधभक्षणविधिमाह—

तत्रोपविश्य विश्रान्तः प्रसन्नवदनेक्षणः ।
औषधं हेमरजतमृद्भाजनपरिस्थितम् ॥ ३७ ॥
पिबेत् प्रसन्नहृदयः पीत्वा पात्रमधोमुखम् ।
विधायाचम्य सलिलं ताम्बूलाद्युपयोजयेत् ॥ ३८ ॥

अथावलेहविधिमाह—

क्वाथादेर्यत्पुनः पाकाद् घनत्वं सा रसक्रिया ।
सोऽवलेहश्च लेहश्च तन्मात्रा स्यात्पलोन्मिता ॥ ३९ ॥

सिता चतुर्गुणा कार्या चूर्णाच्च द्विगुणो गुडः ।
द्रवं चतुर्गुणं दद्यादिति सर्वत्र निश्चयः ॥ ४० ॥
सुपक्वे तन्तुमत्त्वं स्यादवलेहेऽप्सु मज्जनम् ।
स्थिरत्वं पीडिते मुद्रा गन्धवर्णरसोद्भवः ॥ ४१ ॥
दुग्धमिक्षुरसं यूषं पञ्चमूलकषायकम् ।
वासाक्वाथं यथायोग्यमनुपानं प्रशस्यते ॥ ४२ ॥

अथ गुटिकानिर्माणविधिमाह—

वटका अथ कथ्यन्ते तन्नाम गुटिका वटी ।
मोदको वटिका पिण्डी गुडो वर्त्तिस्तथोच्यते ॥ ४३ ॥
लेहवत्साध्यते वह्नौ गुडो वा शर्कराऽथ वा ।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्मिता वटी ॥ ४४ ॥
*तत्र=वह्निसिद्धे गुडादौ ॥ ४४ ॥
कुर्यादवह्निसिद्धेन क्वचिद् गुग्गुलुना वटीम् ।
द्रवेण मधुना वाऽपि गुटिकां कारयेद् बुधः ॥ ४५ ॥
सिता चतुर्गुणा देया वटीषु द्विगुणो गुडः ।
चूर्णे चूर्णसमः कार्यो गुग्गुलुर्मधु तत्समम् ॥ ४६ ॥
*तत्समं=चूर्णसमम् ॥ ४६ ॥
द्रवं तु द्विगुणं देयं मोदकेषु भिषग्वरैः ॥ ४७ ॥
*द्रवं=द्रवरूपं द्रव्यम् ॥ ४७ ॥
कर्षप्रमाणं तन्मात्रा बलं दृष्ट्वा प्रयुज्यते ॥ ४८ ॥
*बलमिति कालादेरप्युपलक्षणम् ॥ ४८ ॥

अथ घृततैलयोर्विधिमाह—

कल्काच्चतुर्गुणीकृत्य घृतं वा तैलमेव च ।
चतुर्गुणद्रवे साध्यं तस्य मात्रा पलोन्मिता ॥ ४९ ॥
*मात्रा पलोन्मिता भक्षणाय ॥ ४९ ॥
निक्षिप्य क्वाथयेत्तोयं क्वाथ्यद्रव्याच्चतुर्गुणम् ।
पादशिष्टं गृहीत्वा तु स्नेहं तेनैव साधयेत् ॥ ५० ॥
चतुर्गुणं मृदुद्रव्ये कठिनेऽष्टगुणं जलम् ।

मृद्वादिक्वाथ्यसंघाते दद्यादष्टगुणं पयः।
अत्यन्तकठिने द्रव्ये नीरं षोडशिकं मतम् ॥ ५१ ॥

*मृदुद्रव्ये=आर्द्रद्रव्ये गुडूच्यादौ। कठिने=शुष्कद्रव्ये शुण्ठ्यादौ। अत्यन्तकठिने=चिरशुष्के देवदार्वादौ ॥ ५१ ॥

कर्षादितः पलं यावत्क्षिपेत्षोडशिकं जलम्।
तदूर्ध्वं कुडवं यावद् भवेदष्टगुणं पयः।
प्रस्थादितः क्षिपेन्नीरं खारी यावच्चतुर्गुणम् ॥ ५२ ॥

*पूर्वं "चतुर्गुणं मृदुद्रव्य" इत्यादिना क्वाथ्यद्रव्यगतमृदुत्वादिगुणभेदेन जलगतपरिमाणमुक्तम्। इदानीं केचिदाचार्याः "कर्षादितः पलं यावदि"त्यादिवचनेन क्वाथ्यद्रव्यगतपरिमाणभेदेन जलगतपरिमाणं मन्यन्ते ॥ ५२ ॥

अम्बुक्वाथरसैर्यत्र पृथक् स्नेहस्य साधनम्।
कल्कस्यांशं तत्र दद्याच्चतुर्थं षष्ठमष्टमम् ॥ ५३ ॥

*अस्यायमर्थः—अम्बुना स्नेहसाधने कल्कं स्नेहस्य चतुर्थमंशं दद्यात्। क्वाथेन स्नेहसाधने स्नेहस्य षष्ठभागं कल्कं दद्यात्। स्वरसैः स्नेहसाधने स्नेहस्याष्टमभागं कल्कं दद्यात् ॥ ५३ ॥

पुनर्विशेषमाह—

दुग्धे दधिरसे तक्रे कल्को देयोऽष्टमांशकः।
कल्काच्च सम्यक् पाकार्थं तोयमत्र चतुर्गुणम् ॥ ५४ ॥

*कल्कात्=कल्कद्रव्यात्। चतुर्गुणं तोयं पोषणार्थम् ॥ ५४ ॥

द्रवाणि यत्र स्नेहेषु पञ्चादीनि भवन्ति हि।
तत्र स्नेहसमान्याहुर्यथापूर्वं चतुर्गुणम् ॥ ५५ ॥

*अस्यायमर्थः—यत्र स्नेहेषु आदीनि पञ्चद्रवाणि दुग्धदधिस्वरसतक्रकल्कोपयुक्तजलानि प्रत्येकं स्नेहसमानि बोद्धव्यानि। यथापूर्वं दुग्धदधिस्वरसतक्रं समुदितं स्नेहाच्चतुर्गुणं भवति ॥ ५५ ॥

द्रव्येण केवलेनैव स्नेहपाको भवेद् यदि।
तत्राम्बुपिष्टः कल्कः स्याज्जलं चात्र चतुर्गुणम् ॥ ५६ ॥
क्वाथेन केवलेनैव पाको यत्रोदितः क्व चित्।

क्वाथ्यद्रव्यस्य कल्कोऽपि तत्र स्नेहे प्रयुज्यते ॥ ५७ ॥
कल्कहीनस्तु यः स्नेहः स साध्यः केवले द्रवे ॥ ५८ ॥
*केवले द्रवे=क्वाथेतरस्मिन् स्वरसादिरूपे ॥ ५८ ॥
पुष्पकल्कस्तु यः स्नेहस्तत्र तोयं चतुर्गुणम् ।
स्नेहात्स्नेहाष्टमांशश्च पुष्पकल्कः प्रयुज्यते ॥ ५९ ॥

अथ सिद्धस्नेहस्य लक्षणान्याह—

वर्त्तिवत्स्नेहकल्कः स्याद् यदाऽङ्गुल्या विवर्त्तितः ।
शब्दहीनोऽग्निनिक्षिप्तः स्नेहः सिद्धो भवेत्तदा ॥ ६० ॥
यदा फेनोद्गमस्तैले फेनशान्तिश्च सर्पिषि ।
वर्णगन्धरसोत्पत्तिः स्नेहः सिद्धो भवेत्तदा ॥ ६१ ।

अथ स्नेहपाकस्य लक्षणपूर्वकं त्रैविध्यमाह—

स्नेहपाकस्त्रिधा प्रोक्तो मृदुर्मध्यः खरस्तथा ।
ईषत्सरसकल्कस्तु स्नेहपाको मृदुर्भवेत ॥ ६२ ॥
मध्यपाकस्य सिद्धिश्च कल्के नीरसकोमले ।
ईषत्कठिनकल्कश्च स्नेहपाको भवेत्खरः ॥ ६३ ॥

अथ दग्धपाकस्य निष्प्रयोजनत्वं तथाऽऽमपाकस्य दोषानाह—

तदूर्ध्वं दग्धपाकः स्याद्दाहकृन्निष्प्रयोजनः
आमपाकश्च निर्वीर्यो वह्निमान्द्यकरो गुरुः ॥ ६४ ॥

अथ मृद्वादिपाकानां विषयानाह—

नस्यार्थं स्यान्मृदुः पाको मध्यमः सर्वकर्मसु ।
अभ्यङ्गार्थः खरः प्रोक्तो युञ्ज्यादेवं यथोचितम् ॥ ६५ ॥

अथ घृततैलादीनामुषितत्वं गुणकारकमित्याह—

घृततैलगुडादींश्च साधयेन्नैकवासरे ।
प्रकुर्वन्त्युषितास्त्वेते विशेषाद्गुणसञ्चयम् ॥ ६६ ॥

अथ सन्धानविधिमाह—

द्रवेषु चिरकालस्थं द्रव्यं यत्सन्धितं भवेत् ।
आसवारिष्टभेदैस्तु प्रोच्यते भेषजोचितम् ॥ ६७ ॥
*भेषजेषु यदुचितं तद्भेषजोचितम् ॥ ६८ ॥

अथासवारिष्टलक्षणमाह—

यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः।
अरिष्टः क्वाथसाध्यः स्यात्तयोर्मानं पलोन्मितम् ॥ ६८ ॥

अथ सामान्यतोऽरिष्टविधिमाह—

अनुक्तमानारिष्टेषु द्रवाद् द्रोणं गुडात्तुलाम्।
क्षौद्रं क्षिपेद् गुडादर्द्धं प्रक्षेपं दशमांशकम् ॥ ६६ ॥

*दशमांशकं = गुडस्यैव दशमांशकम् ॥ ६९ ॥

अथ द्विविधसीधुमाह—

ज्ञेयः शीतरसः सीधुरपक्वमधुरद्रवैः।
सिद्धः पक्वरसः सीधुः सम्पक्वमधुरद्रवैः ॥ ७० ॥

*मधुरद्रवैः = इक्षुरसादिभिः ॥ ७० ॥

अथ सुरां सुराजातिं चाह—

परिपक्वान्नसंधानात्समुत्पन्नां सुरां जगुः।
सुरामण्डः प्रसन्ना स्यात्ततः कादम्बरी घना ॥ ७१ ॥
तदधो जगलो ज्ञेयो मेदको जगलाद् घनः।
वक्कसो हृतसारः स्यात्सुराबीजं किरावकम् ॥ ७२ ॥

*सुराबीजं = यवगोधूमतण्डुलादि ॥ ७२ ॥

अथ वारुणीमाह—

यत्तालखर्जूररसैः सन्धिता सा हि वारुणी ॥ ७३ ॥

अथ शुक्तलक्षणमाह—

कन्दमूलफलादीनि सस्नेहलवणानि च।
यत्र द्रव्येऽभिषूयन्ते तच्छुक्तमभिधीयते ॥ ७४ ॥

*अभिषूयन्ते = द्रवेणाप्लाव्य सन्धीयन्ते ॥ ७४ ॥

अथ चुक्रलक्षणमाह—

विनष्टमम्लतां यातं मद्यं वा मधुरद्रवः।
विनष्टः सन्धितो यस्तु तच्चुक्रमभिधीयते ॥ ७५ ॥
गुडाम्बुना सतैलेन कन्दशाकफलैस्तथा।
सन्धितं चाम्लतां यातं गुडचुक्रं प्रचक्षते।
एवमेव हि शुक्तं स्यान्मृद्वीकासम्भवं तथा ॥ ७६ ॥

अथ तुषोदकसौवीरारनालकाञ्जिकशिण्डाकीलक्षणान्याह—

तुषाम्बु सन्धितं ज्ञेयमामैर्विदलितैर्यवैः ।
यवैस्तु निस्तुषैः पक्वैः सौवीरं साधितं भवेत् ॥ ७७ ॥
आरनालन्तु गोधूमैरामैः स्यान्निस्तुषीकृतैः ।
पक्वैर्वा संहितैस्तत्तु सौवीरसदृशं गुणैः ॥ ७८ ॥
कुल्माषधान्यमण्डादि संहितं काञ्जिकं विदुः ।
शिण्डाकी संहिता ज्ञेया मूलकैः सर्षपादिभिः ॥ ७९ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे परिभाषाऽऽदिप्रकरणे-
द्वितीयं भेषजविधानप्रकरणं समाप्तम् ॥ २ ॥

अथ तृतीयं धात्वादिशोधनमारणविधिप्रकरणम् ॥३॥

अथ धातूनां शोधनमारणविधिः ।

तत्र मारणयोग्यसुवर्णस्य लक्षणमाह—

दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम् ।
तारशुल्बोज्झितं स्निग्धं कोमलं गुरु हेम सत् ॥ १ ॥

*सत् = उत्तमम् ॥ १ ॥

अथ मारणायोग्यसुवर्णस्य लक्षणमाह—

तच्छेदे कठिनं रूक्षं विवर्णं समलं दलम् ।
दाहे छेदे सितं श्वेतं कषे स्फुटं लघु त्यजेत् ॥ २ ॥

अथ सुवर्णस्य शोधनविधिमाह—

पत्तलीकृतपत्राणि हेम्नो वह्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ ३ ॥
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा ।
एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत् ॥ ४ ॥

अथ शुद्धसुवर्णस्य दोषानाह—

बलं सवीर्यं हरते नराणां रोगव्रजं पोषयतीह काये ।
असौख्यकार्येव सदा सुवर्णमशुद्धमेतन्मरणञ्च कुर्यात् ॥ ५ ॥

अथ सुवर्णस्य मारणविधिमाह—

स्वर्णस्य द्विगुणं सूतमम्लेन सह मर्दयेत् ।

तद्गोलकसमं गन्धं निदध्यादधरोत्तरम् ॥ ६ ॥

*स्वर्णस्य = अतितनूकृतपत्रस्य । गन्धं = गन्धकचूर्णम् ॥ ६ ॥

गोलकञ्च ततो रुद्ध्वा शरावदृढसम्पुटे ।
त्रिंशद्वनोपलैर्दद्यात्पुटान्येवं चतुर्दश ॥
निरुत्थं जायते भस्म गन्धो देयः पुनःपुनः ॥ ७ ॥

*रुद्ध्वा = सवस्त्रकुट्टितचिक्कणमृत्तिकया । वनोपलः "गोइठा" इति लोके । निरुत्थं = यत्पुनर्न जीवति ॥ ७ ॥

अथ सुवर्णमारणस्य द्वितीयं विधिमाह—

काञ्चने गलिते नागं षोडशांशेन निक्षिपेत् ।
चूर्णयित्वा तथाऽम्लेन घृष्ट्वा कृत्वा तु गोलकम् ॥ ८ ॥
गोलकेन समं गन्धं दत्त्वा चैवाधरोत्तरम् ॥ ९ ॥
शरावसम्पुटे धृत्वा पुटेत् त्रिंशद्वनोपलैः ।
एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते ॥ १० ॥

*अत्रापि पूर्ववद्गन्धः प्रदातव्यः ॥ १० ॥

अथ सुवर्णमारणस्य तृतीयं विधिमाह—

काञ्चनाररसैर्घृष्ट्वा समसूतकगन्धयोः ॥
कज्जलीं हेमपत्राणि लेपयेत्समया तया ॥ ११ ॥

*तया समया = हेमपत्रसमया ॥ ११ ॥

काञ्चनारत्वचः कल्कैर्मूषायुग्मं प्रकल्पयेत् ।
धृत्वा तत्संपुटे गोलं मृण्मूषासम्पुटे च तत् ॥ १२ ॥
निधाय सन्धिरोधं च कृत्वा संशोष्य गोलकम् ।
वह्निं खरतरं कुर्यादेवं दत्त्वा पुटत्रयम् ॥ १३ ॥
निरुत्थं जायते भस्म सर्वकर्मसु योजयेत् ।
काञ्चनारप्रकारेण लाङ्गली हन्ति काञ्चनम् ॥ १४ ॥

*लाङ्गली = करिहारी ॥ १४ ॥

ज्वालामुखी तथा हन्याद् यथा हन्ति मनःशिला ॥ १५ ॥

अथ सुवर्णमारणस्य चतुर्थं विधिमाह—

शिलासिन्दूरयोश्चूर्णं समयोरर्कदुग्धकैः ।

सप्तधा भावनां दद्याच्छोषयेच्च पुनःपुनः ॥ १६ ॥
ततस्तु गलिते हेम्नि कल्कोऽयं दीयते क्रमः ।
पुनर्धमेदतितरां यथा कल्को विलीयते ॥
एवं वेलात्रयं दद्यात्कल्कं हेममृतिर्भवेत् ॥ १७ ॥

अथ मारितसुवर्णस्य गुणानाह—

सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनम् ।
स्वादु तिक्तं च तुवरं पाके च स्वादु पिच्छिलम् ॥ १८ ॥
पवित्रं बृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम् ।
हृद्यमायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत् ॥
विषद्वयक्षयोन्मादत्रिदोषज्वरशोषजित् ॥ १६ ॥

*वृष्यं = वृषाय कामुकाय हितम् ॥ १८–१६ ॥

अथ सम्यगङ्मारितसुवर्णस्य दोषानाह—

असम्यङ्मारितं स्वर्णं बलं वीर्यं च नाशयेत् ।
करोति रोगान् मृत्युं च तद्धन्याद् यत्नतस्ततः ॥२०॥

अथ धात्वादिमारणोपयुक्तान् पुटप्रकारानाह—

रसप्रदीपे—

तत्र महापुटस्य प्रकारमाह—

लोहादेरपुनर्भावस्तद्गुणत्वं गुणाढ्यता ।
सलिले तरणं चापि तत्सिद्धिः पुटनाद्भवेत् ॥ २१ ॥
गम्भीरे विस्तृते कुण्डे द्विहस्ते चतुरस्रके ।
वनोपलसहस्रेण पूरिते पुटनौषधम् ॥ २२ ॥
कोष्ठे रुद्धं प्रयत्नेन गोविष्ठोपरि धारयेत् ।
वनोपलसहस्रार्द्धं कोष्ठिकोपरि निक्षिपेत् ॥ २३ ॥
वह्निं विनिक्षिपेत्तत्र महापुटमिति स्मृतम् ॥ २४ ॥

*कोष्ठं = मृण्मूषा । गोविष्ठा = "गोबर" इति लोके ॥ २१–२४ ॥

अथ गजपुटस्य प्रकारमाह—

सपादहस्तमानेन कुण्डे निम्ने तथाऽऽयते ।

वनोपलसहस्रेण पूर्णे मध्ये विधारयेत् ॥ २५ ॥
पुटनद्रव्यसंयुक्तां कोष्ठिकां मुद्रितां मुखे।
अधोऽर्धानि करण्डानि अर्धान्युपरि निक्षिपेत् ॥
एतद्गजपुटं प्रोक्तं ख्यातं सर्वपुटोत्तमम् ॥ २६ ॥

*हस्तश्चतुर्विंशत्यङ्गुलप्रमाणः स सपादस्तेन त्रिंशदङ्गुलप्रमाणेनेत्यर्थः। अत एवोक्तम्—

साधारणनराङ्गुल्या त्रिंशदङ्गुलको गजः ॥ २५-२६ ॥

॥ इति गजपुटम् ॥

अथ वाराहकौक्कुटपुटयोः प्रकारमाह—

अरत्निमात्रके कुण्डे पुटं वाराहमुच्यते ॥
वितस्तिमात्रके खाते कथितं कौक्कुटं पुटम् ॥ २७ ॥

*"अरत्निस्तु निष्कनिष्ठेन मुष्टिना" इत्यमरः। निःसृतकनिष्ठया मुष्ट्योपलक्षितो हस्तोऽरत्निरित्यर्थः ॥ २७ ॥

अथ प्रकारान्तरेण पुनः कौक्कुटपुटस्य प्रकारमाह—

षोडशाङ्गुलके खाते कस्य चित्कौक्कुटं पुटम् ॥ २८ ॥

अथ कपोतपुटप्रकारमाह—

यत्पुटं दीयते खाते ह्यष्टसङ्ख्यैर्वनोपलैः।
कपोतपुटमेतत्तु कथितं पुटपण्डितैः ॥ २९ ॥

अथ गोबरस्य लक्षणमाह—

गोष्ठान्तर्गोखुरक्षुण्णं शुष्कं चूर्णितगोमयम्।
गोवरं तत्समाख्यातं वरिष्ठं रससाधने ॥ ३० ॥

अथ गोबरपुटप्रकारमाह—

बृहद्भाण्डस्थितैर्यत्र गोवरैर्दीयते पुटम्।
तद्गोवरपुटं प्रोक्तं भिषग्भिः सूतभस्मनि ॥ ३१ ॥

अथ भाण्डपुटस्य प्रकारमाह—

बृहद्भाण्डे तुषैः पूर्णे मध्ये मूषां विधारयेत्।
क्षिप्त्वाऽग्निं मुद्रयेद्भाण्डं तद्भाण्डपुटमुच्यते ॥ ३२ ॥

अथ यन्त्रप्रकारानाह।

तत्र वालुकायन्त्रमाह—

भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके।

कूपिकाकण्ठपर्यन्तं वालुकाभिश्च पूरिते ॥ ३३ ॥
भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते ।
वालुकायन्त्रमेतद्धि यन्त्रं तत्र बुधैः स्मृतम् ॥ ३४ ॥

अथ दोलायन्त्रमाह—

निबद्धमौषधं सूतं भूर्जे तत्रिगुणे वरे ॥
रसपोटलिकां काष्ठे दृढं बद्ध्वा गुणेन हि ॥ ३५ ॥
सन्धानपूर्णकुम्भान्तः स्वावलम्बनसन्धितम् ।
अधस्ताज्ज्वालयेदग्निं तत्तदुक्तक्रमेण हि ॥
दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि ॥ ३६ ॥

अथ स्वेदनयन्त्रमाह—

साम्बुस्थालीमुखे बद्धे वस्त्रे स्वेद्यं निधाय च ।
पिधाय पच्यते यत्र तद् यन्त्रं स्वेदनं स्मृतम् ॥ ३७ ॥

अथ विद्याधरयन्त्रमाह—

अधः स्थाल्यां रसं क्षिप्त्वा निदध्यात्तन्मुखोपरि ।
स्थालीमूर्ध्वमुखीं सम्यङ् निरुध्य मृदुमृत्स्नया ॥ ३८ ॥
ऊर्ध्वस्थाल्यां जलं क्षिप्त्वा चुल्ल्यामारोप्य यत्नतः ।
अधस्ताज्ज्वालयेदग्निं यावत्प्रहरपञ्चकम् ॥ ३९ ॥
स्वाङ्गशीतं ततो यन्त्राद् गृह्णीयाद्रसमुत्तमम् ।
विद्याधराभिधं यन्त्रमेतत्तज्ज्ञैरुदाहृतम् ॥ ४० ॥

अथ भूधरयन्त्रमाह—

वालुकाभिः समस्ताङ्गं गर्ते मूषां रसान्विताम् ।
दीप्तोपलैः संवृणुयाद् यन्त्रं भूधरनामकम् ॥ ४१ ॥

अथ डमरुयन्त्रमाह—

यन्त्रं डमरुसंज्ञं स्यात्तत्स्थाल्या मुद्रिते मुखे ॥ ४२ ॥

अथ मारणयोग्यरजतस्य लक्षणमाह—

गुरु स्निग्धं मृदु श्वेतं दाहे च्छेदे घनक्षमम् ।
वर्णाढ्यं चन्द्रवत् स्वच्छं तारं नवगुणं शुभम् ॥ ४३ ॥

अथायोग्यरजतस्य लक्षणमाह—

कठिनं कृत्रिमं रूक्षं रक्तं पीतदलं लघु ।

दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥ ४४ ॥

अथ रजतस्य शोधनमाह—

पत्तलीकृतपत्राणि तारस्याग्नौ प्रतापयेत् ॥
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ ४५ ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं रजतपत्राणां विशुद्धिः संप्रजायते ॥ ४६ ॥

अथाशुद्धरजतस्य दोषमाह—

रूप्यं त्वशुद्धं प्रकरोति तापं विबन्धकं वीर्यबलक्षयं च ।
देहस्य पुष्टिं हरते तनोति रोगांस्ततः शोधनमस्य कुर्यात् ॥४७॥

अथ रजतस्य मारणविधिमाह—

भागैकं तालकं मर्द्य याममम्लेन केन चित् ।
तेन भागत्रयं तारपत्राणि परिलेपयेत् ॥ ४८ ॥
धृत्वा मूषापुटे रुद्ध्वा पुटे त्रिंशद्वनोपलैः ।
समुद्धृत्य पुनस्तालं दत्वा रुद्ध्वा पुटे पचेत् ।
एवं चतुर्दशपुटैस्तारं भस्म प्रजायते ॥ ४९ ॥

अथ रजतमारणस्यापरं विधिमाह—

स्नुहीक्षीरेण सम्पिष्टं माक्षिकं तेन लेपयेत् ॥ ५० ॥
तालकस्य प्रकारेण तारपत्राणि बुद्धिमान् ।
पुटेच्चतुर्दशपुटैस्तारं भस्म प्रजायते ॥ ५१ ॥

अथ मारितरजतस्य गुणानाह—

रौप्यं शीतं कषायं च स्वादुपाकरसं सरम् ।
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ।
प्रमेहादिकरोगांश्च नाशयत्यचिराद् ध्रुवम् ॥ ५२ ॥

अथ मारणयोग्यताम्रस्य लक्षणमाह—

जपाकुसुमसङ्काशं स्निग्धं गुरु घनक्षमम् ।
लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते ॥ ५३ ॥

अथायोग्यताम्रस्य लक्षणमाह—

कृष्णं रूक्षमतिस्वच्छं श्वेतं चापि घनासहम् ।
लोहनागयुतं चेति शुल्वं दुष्टं प्रकीर्त्तितम् ॥ ५४ ॥

अथ ताम्रस्य शोधनविधिमाह--

पत्तलीकृतपत्राणि ताम्रस्याग्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ ५५ ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं ताम्रस्य पत्राणां विशुद्धिः संप्रजायते ॥ ५६ ॥

अथ ताम्रगतं दोषाष्टकमाह--

एको दोषो विषे ताम्रे त्वशुद्धेऽष्टौ भ्रमो वमिः ।
विरेकः स्वेद उत्क्लेदो मूर्च्छा दाहोऽरुचिस्तथा ॥ ५७ ॥
न विषं विषमित्याहुस्ताम्रन्तु विषमुच्यते ।
एको दोषो विषे ताम्रे त्वष्टौ दोषाः प्रकीर्त्तिताः ॥ ५८ ॥

अथ ताम्रस्य मारणविधिमाह—

सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद् बुधः ।
वासरत्रयमम्लेन ततः खल्वे विनिक्षिपेत् ॥ ५९ ॥
पादांशं सूतकं दत्त्वा याममम्लेन मर्दयेत् ।
तत उद्धृत्य पत्राणि लेपयेद् द्विगुणेन च ॥ ६० ॥
गन्धकेनाम्लघृष्टेन तस्य कुर्याच्च गोलकम् ।
ततः पिष्ट्वा च मीनाक्षीं चाङ्गेरीं वा पुनर्नवाम् ॥ ६१ ॥
*चांगेरी=चतुष्पत्राम्ला लोनिकाभेदः ॥ ६१ ॥
तत्कल्केन बहिर्गोलं लेपयेद् द्व्यङ्गुलोन्मितम् ।
धृत्वा तद् गोलकं भाण्डे शरावेण च रोधयेत् ॥ ६२ ॥
वालुकाभिः प्रपूर्याथ विभूतिलवणाम्बुभिः ।
दत्त्वा भाण्डमुखे मुद्रां ततश्चुल्ल्यां विपाचयेत् ॥ ६३ ॥
क्रमवृद्धयाऽग्निना सम्यग् यावद्यामचतुष्टयम्
स्वाङ्गशीतं समुद्धृत्य मर्दयेच्छूरणद्रवैः ॥ ६४ ॥
यामैकं गोलकं तच्च निक्षिपेच्छूरणोदरे ।
मृदा लेपस्तु कर्त्तव्यः सर्वतोऽङ्गुष्ठमात्रकः ॥ ६५ ॥
पाच्यं गजपुटे क्षिप्तं मृतं भवति निश्चितम् ॥ ६६ ॥
वमनं च विरेकं च भ्रमं क्लममथारुचिम् ।

विदाहं स्वेदमुत्क्लेदं न करोति कदा चन ॥ ६७ ॥

अथ मारितताम्रस्य गुणानाह--

ताम्रं कषायं मधुरं सतिक्तमम्लञ्च पाके कटु सारकं च ।
पित्तापहं श्लेष्महरं च शीतं तद्रोपणं स्याल्लघु लेखनं च ॥६८॥
पाण्डूदरार्शोज्वरकुष्ठकासश्वासक्षयान्पीनसमम्लपित्तम् ।
शोथं कृमीञ्शूलमपाकरोति प्राहुर्बुधा बृंहणमल्पमेतत् ॥६९॥

एको दोषो विषे ताम्रे त्वसम्यङ्मारिते पुनः ।
दाहः स्वेदोऽरुचिर्मूर्च्छा क्लेदो रेको वमिर्भ्रमः ॥ ७० ॥

अथ वङ्गस्य स्वरूपमाह—

वङ्गं च गिरिजं तच्च खुरकं मिश्रकं द्विधा ।
तयोस्तु खुरकं श्रेष्ठं मिश्रकं त्वहितं मतम् ॥ ७१ ॥

अथाशुद्धवङ्गस्य दोषानाह—

वङ्गं विधत्ते खलु शुद्धिहीनमाक्षेपकम्पौ च किलासगुल्मौ ।
कुष्ठानि शूलं किल वातशोथं पाण्डुं प्रमेहञ्च भगन्दरञ्च ॥ ७२ ॥
विषोपमं रक्तविकारवृन्दं क्षयञ्च कृच्छ्राणि कफज्वरञ्च ।
मेहाश्मरीविद्रधिमुष्करोगान् नागोऽपि कुर्यात्कथितान्विकारान् ॥७३॥

अथ वङ्गस्य शोधनविधिमाह—

वङ्गनागौ प्रतप्तौ च गलितौ तौ निषेचयेत् ।
त्रिधा त्रिधा विशुद्धिः स्याद् रविदुग्धेऽपि च त्रिधा ॥७४॥

अथ वङ्गस्य मारणविधिमाह—

मृत्पात्रे द्राविते वङ्गे चिञ्चाऽश्वत्थत्वचो रजः ।
पिष्ट्वा वङ्गचतुर्थांशमयोदर्व्या प्रचालयेत् ॥ ७५ ॥
ततो द्वियाममात्रेण वङ्गं भस्म प्रजायते ।
अथ भस्मसमं तालं क्षिप्त्वाऽम्लेन विमर्दयेत् ॥ ७६ ॥
ततो गजपुटे पक्त्वा पुनरम्लेन मर्दयेत् ।
तालेन दशमांशेन याममेकं ततः पुटेत् ।
एवं दशपुटैः पक्वं वङ्गं भवति मारितम् ॥ ७७ ॥

अथ मारितवङ्गस्य गुणानाह—

वङ्गं लघु सरं रूक्षं कुष्ठं मेहकफक्रिमीन् ।

निहन्ति पाण्डुं सश्वासं नेत्र्यमीषत्तु पित्तलम् ॥ ७८ ॥
सिंहो गजौघं तु यथा निहन्ति तथैव वङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति नूनम् ॥७९॥

अथ यशदस्य स्वरूपं गुणाँश्चाह—

यशदं गिरिजं तस्य दोषाः शोधनमारणे ।
वङ्गस्येव हि बोद्धव्या गुणांस्तु गणयाम्यथ ॥ ८० ॥
यशदं च सरं तिक्तं शीतलं कफपित्तहृत् ।
चक्षुष्यं परमं मेहान् पाण्डुं श्वासञ्च नाशयेत् ॥ ८१ ॥

अथ सीसकस्य शोधनविधिमाह—

तस्य साहजिका दोषा वङ्गस्येव निदर्शिताः ।
शोधनञ्चापि तस्येव भिषग्भिर्गदितं पुरा ॥ ८२ ॥

अथ सीसकस्य मारणविधिमाह—

ताम्बूलरससम्पिष्टशिलालेपात् पुनः पुनः ।
द्वात्रिंशद्भिः पुटैर्नागो निरुत्थं भस्म जायते ॥ ८३ ॥
*शिला=मनःशिला ॥ ८३ ॥

अथापरं सीसकमारणविधिमाह—

अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निक्षिपेत् ।
मृत्पात्रे विद्रुते नागे लोहदर्व्या प्रचालितः ॥ ८४ ॥
यामैकेन भवेद्भस्म तत्तुल्या स्यान्मनःशिला ।
काञ्जिकेन द्वयं पिष्ट्वा पचेद्गजपुटेन च ॥ ८५ ॥
स्वाङ्गशीतं पुनः पिष्ट्वा शिलया काञ्जिकेन च ।
पुनः पचेच्छरावाभ्यामेवं षष्टिपुटैर्मृतिः ॥ ८६ ॥

अथ मारितसीसकस्य गुणानाह—

सीसं रङ्गगुणं ज्ञेयं विशेषान्मेहनाशनम् ॥ ८७ ॥
नागस्तु नागशततुल्यबलं ददाति व्याधिं च नाशयति जीवनमातनोति ।
वह्निं प्रदीपयति कामबलं करोति मृत्युञ्च नाशयति सन्ततसेवितः सः॥८८॥

अथाशुद्धलोहस्य दोषानाह—

खञ्जत्वकुष्ठामयमृत्युकारी हृद्रोगशूलौ कुरुतेऽश्मरीञ्च ।

नानारुजानां च तथा प्रकोपं कुर्याच्च हृल्लासमशुद्धलौहम् ॥ ८९ ॥

अथ लौहस्य दोषशान्तये शोधनविधिमाह—

पत्तलीकृतपत्राणि लौहस्याग्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ ९० ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं लौहस्य पत्राणां विशुद्धिः सम्प्रजायते ॥ ९१ ॥

अथ लौहस्य मारणविधिमाह—

शुद्धं लौहभवं चूर्णं पातालगरुडीरसैः ।
मर्दयित्वा पुटेद्वह्नौ दद्यादेवं पुटत्रयम् ॥ ९२ ॥
पुटत्रयं कुमार्याश्च कुठारच्छिन्निकारसैः ।
पुटषट्कं ततो दद्यादेवं तीक्ष्णमृतिर्भवेत् ॥ ९३ ॥

अन्यच्च—

क्षिपेच्च द्वादशांशेन दरदं तीक्ष्णचूर्णतः ।
मर्दयेत्कन्यकाद्रावैर्यामयुग्मं ततः पुटेत्
एवं सप्तपुटैर्मृत्युं लौहचूर्णमवाप्नुयात् ॥ ९४ ॥

अथ लोहमारणस्य तृतीयं विधिमाह—

सत्योऽनुभूतो योगेन्द्रैः क्रमोऽन्यो लोहमारणे ॥ ९५ ॥
कथ्यते रामराजेन कौतूहलधियाऽधुना ।
सूतकाद् द्विगुणं गन्धं दत्वा कुर्याच्च कज्जलीम् ॥ ९६ ॥
द्वयोः समं लौहचूर्णं मर्दयेत्कन्यकाद्रवैः ।
यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके ॥ ९७ ॥
घर्मे धृत्वा रुबूकस्य पत्रैराच्छादयेद् बुधः ।
यामद्वयाद्भवेदुष्णं धान्यराशौ न्यसेत्ततः ॥ ९८ ॥
दत्त्वोपरि शरावं तु त्रिदिनान्ते समुद्धरेत् ।
पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत् ॥ ९९ ॥

अपरश्च—

दाडिमस्य दलं पिष्ट्वा तच्चतुर्गुणवारिणा ।
तद्रसेनायसं चूर्णं सन्नीय प्लावयेदिति ॥ १०० ॥
आतपे शोषयेत्तच्च पुटेदेवं पुनःपुनः ।

एकविंशतिवारैस्तन्म्रियते नात्र संशयः ।
एवं सर्वाणि लोहानि स्वर्णादीन्यपि मारयेत् ॥ १०१ ॥

अथ मारितलौहस्य गुणानाह—

लौहं तिक्तं सरं शीतं कषायं मधुरं गुरु ।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् ॥ १०२ ॥
कफं पित्तं गरं शूलं शोफार्शःप्लीहपाण्डुताः ।
मेदोमेहक्रमीन् कुष्ठं तत्किट्टं तद्वदेव हि ॥ १०३ ॥

अथ लौहभस्मभक्षणे मात्रामाह—

गुञ्जामेकां समारभ्य यावत्स्युर्नवरक्तिकाः ।
तावल्लोहं समश्नीयाद्यथादोषानलं नरः ॥ १०४ ॥

अथ लौहसेवनसमये वर्जनीयद्रव्याण्याह—

कूष्माण्डं तिलतैलं च माषान्नं राजिकां तथा ।
मद्यमम्लरसञ्चैव वर्जयेल्लौहसेवकः ॥ १०५ ॥

अथ सर्वधातूनां मारणे साधारणविधिमाह—

शिलागन्धार्कदुग्धाक्ताः स्वर्णाद्याः सर्वधातवः ।
म्रियन्ते द्वादशपुटैः सत्यं गुरुवचो यथा ॥ १०६ ॥

अथोपधातूनां मारणप्रकारमाह—

तत्राशुद्धस्वर्णमाक्षिकस्य दोषानाह—

मन्दानलत्वं बलहानिमुग्रां विष्टम्भितां नेत्रगदान् सकुष्ठान् ।
मालां तथैव व्रणपूर्विकाञ्च कुर्यादशुद्धं खलु माक्षिकञ्च ॥ १०७ ॥

अथ स्वर्णमाक्षिकस्य शोधनविधिमाह—

माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च ।
मातुलुङ्गद्रवैर्वाऽथ जम्बीरस्य द्रवैः पचेत् ॥ १०८ ॥
चालयेल्लौहजे पात्रे यावत्पात्रं सुलोहितम् ।
भवेत्ततस्तु संशुद्धिः स्वर्णमाक्षिकमृच्छति ॥ १०९ ॥

अथ स्वर्णमाक्षिकस्य मारणविधिमाह—

कुलत्थस्य कषायेण घृष्ट्वा तैलेन वा पुटेत् ।
तक्रेण वाऽऽजमूत्रेण म्रियते स्वर्णमाक्षिकम् ॥ ११० ॥

अथ तारमाक्षिकस्य शोधनविधिमाह—

स्वर्णमाक्षिकवद्दोषा विज्ञेयास्तारमाक्षिके ।
अतस्तद्दोषशान्त्यर्थं शोधनं तस्य कथ्यते ॥ १११ ॥
कर्कोटीमेषश्रृङ्गयुत्थैर्द्रवैर्जम्बीरजैर्दिनम् ।
भावयेदातपे तीव्रे विमला शुद्धयति ध्रुवम् ॥ ११२ ॥

*कर्कोटी = खेखसा, मेषश्रृङ्गी = मेढाश्रृङ्गी, विमला = तारमाक्षिकम् ॥ ११२ ॥

अथ तारमाक्षिकस्य मारणविधिमाह—

कुलत्थस्य कषायेण घृष्ट्वा तैलेन वा पुटेत् ।
मरणं वाऽऽजमूत्रेण तारमाक्षिकमृच्छति ॥ ११३ ॥

अथ स्वर्णमाक्षिकरूप्यमाक्षिकयोर्विशेषगुणानाह—

न केवलं स्वर्णरूप्यगुणास्तापीजयोर्मताः ।
द्रव्यान्तरस्य संसर्गात्सन्त्यन्येऽपि गुणास्तयोः ॥ ११४ ॥
माक्षिकं मधुरं तिक्तं स्वर्यं वृष्यं रसायनम् ।। ११५ ।।
चक्षुष्यं वस्तिरुक्कुष्ठं पाण्डुमेहविषोदरम् ।
अर्शः शोफं क्षयं कण्डूं त्रिदोषञ्च नियच्छति ॥ ११६ ॥

अथाशुद्धतुत्थस्य शोधनविधिमाह—

विष्ठया मर्दयेत्तुत्थं मार्जारककपोतयोः ।
दशांशं टङ्कणं दत्वा पचेल्लघुपुटे ततः ।
पुटं दध्ना पुटं क्षौद्रैर्देयं तुत्थविशुद्धये ॥ ११७ ॥

अथ शुद्धतुत्थस्य गुणानाह—

तुत्थकं कटुकं क्षारं कषायं वामकं लघु ॥ ११८ ॥
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत् ।
विषाश्मकुष्ठकण्डूघ्नं तद्गुणं खर्परं मतम् ॥ ११९ ॥

अथ कांस्यपित्तलयोः शोधनविधिमाह—

पत्तलीकृतपत्राणि कांस्यस्याग्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ १२० ॥
गोमूत्रे च कुलत्थानां कषायेऽत्र त्रिधा त्रिधा ।
एवं कांस्यस्य रीतेश्च विशुद्धिः सम्प्रजायते ॥ १२१ ॥

अथ तयोर्मारणविधिमाह—

अर्कक्षीरेण सम्पिष्टो गन्धकस्तेन लेपयेत् ।
समेन कांस्यपत्राणि शुद्धान्यम्लद्रवैर्मुहुः ॥ १२२ ॥
ततो मूषापुटे धृत्वा पचेद्गजपुटेन च ।
एवं पुटद्वयात् कांस्यं रीतिश्च म्रियते ध्रुवम् ॥ १२३ ॥

अथ मारितकांस्यरीत्योर्गुणानाह—

कांस्यं कषायं तीक्ष्णोष्णं लेखनं विशदं सरम् ।
गुरु नेत्रहितं रूक्षं कफपित्तहरं परम् ॥ १२४ ॥
रीतिका तु भवेद् रूक्षा सतिक्ता लवणा रसे ।
शोधिनी पाण्डुरोगघ्नी कृमिहृन्नातिलेखनी ॥ १२५ ॥

अथ सिन्दूरस्य शोधनविधिमाह—

दुग्धाम्लयोगतस्तस्य विशुद्धिर्गदिता बुधैः ॥ १२६ ॥

अथ सिन्दूरस्यगुणानाह—

सिन्दूर उष्णो वीसर्पकुष्ठकण्डूविषापहः ।
भग्नसन्धानजननो व्रणशोधनरोपणः ॥ १२७ ॥

अथ शिलाजतुनो लक्षणं शोधनविधिञ्चाह—

गोमूत्रगन्धवत्कृष्णं स्निग्धं मृदु तथा गुरु ।
तिक्तं कषायं शीतञ्च सर्वश्रेष्ठं तदायसम् ॥ १२८ ॥

*आयसम् = अयउपधातुसम्बन्धि ॥ १२८ ॥

विन्ध्यादौ बहुलं तत्तु तत्र लोहं यतोऽधिकम् ।
तच्छोधनमृते व्यर्थमनेकमलमेलनात् ॥ १२९ ॥
शिलाजतु समानीय सूक्ष्मं खण्डं विधाय च ।
निक्षिप्यात्युष्णपानीये यामैकं स्थापयेत्सुधीः ॥ १३० ॥
मर्दयित्वा ततो नीरं गृह्णीयाद्वस्त्रगालितम् ।
स्थापयित्वा च मृत्पात्रे धारयेदातपे बुधः ॥ १३१ ॥
उपरिस्थं घनं यत्स्यात्तत्क्षिपेदन्यपात्रके ।
एवं पुनःपुनर्नीतं द्विमासाभ्यां शिलाजतु ॥ १३२ ॥
भवेत्कार्यक्षमं वह्नौ क्षिप्तं लिङ्गोपमं भवेत् ।
निर्धूमञ्च ततः शुद्धं सर्वकर्मसु योजयेत् ॥ १३३

अथान्यं प्रकारमाह—

तत्र प्रथमतस्तस्य बहिर्मलमपाकर्त्तुं केवलजलेन प्रक्षालनं कर्त्तव्यं, ततस्तदन्तर्गतमृत्तिकासिकताऽऽदिदोषदूरीकरणाय वक्ष्यमाणक्वाथेन तत्रभावना देयेत्यत्र वाग्भटस्य मतमाह—

तद्यथा—

व्याधिव्याधितसात्म्यं समनुसरन् भावयेदयःपात्रे।
प्राक् केवलजलधौतं शुष्कं क्वाथैस्ततो भाव्यम् ॥ १३४ ॥
तुल्यं गिरिजेन जले वसुगुणिते भावनौषधं क्वाथ्यम्।
तत्क्वाथे पादांशे पूतोष्णे प्रक्षिपेद्गिरिजम् ॥ १३५ ॥
तत्समरसतां यातं संशुष्कं प्रक्षिपेद्रसे भूयः।
स्वैः स्वैरेवं क्वाथैर्भाव्यं वारान् भवेत् सप्त ॥ १३६ ॥
अथ स्निग्धस्य शुद्धस्य घृतं तिक्तकसाधितम्।
त्र्यहं युञ्जीत गिरिजमेकैकेन तथा त्र्यहम् ॥ १३७ ॥
फलत्रयस्य यूषेण पटोल्या मधुकस्य च।
शिलाजमेवं देहस्य भवत्यत्युपकारकम् ॥ १३८ ॥

अथ क्वाथ्यद्रव्याणां भावनाफलञ्चाह हारीतः—

लोहस्थितं निम्बगुडूचिसर्पिर्यवैर्यथावत्परिभावयेत्तत्।
सन्तानिकाकीटपतङ्गदंशदुष्टौषधीदोषनिवारणाय ॥ १३९ ॥

*सन्तानिका = तद्बहिःसंलग्नमृत्तिकाऽऽदिमयी ॥ १३९ ॥

एवं भावनां दत्त्वा संशोष्य केवलेन जलेन शोधनं कर्त्तव्यं, तत्प्रकारमाहाग्निवेशः—

उष्णे च काले रवितापयुक्ते व्यभ्रे निवाते समभूमिभागे।
चत्वारि पात्राण्यसितायसानि न्यस्यातपे तत्र कृतावधानः ॥ १४० ॥
शिलाजतु श्रेष्ठमवाप्य पात्रे प्रक्षिप्य तस्माद् द्विगुणञ्च तोयम्।
उष्णं तदर्द्धं क्वथितञ्च दत्त्वा विशोधयेत्तन्मृदितं यथावत् ॥ १४१ ॥
ततस्तु यत्कृष्णमुपैति चोर्द्ध्वं सन्तानिकावद्रविरश्मितप्तम्।
पात्रे तदन्यत्र ततो निदध्यात्तत्रापरं कोष्णजलं क्षिपेच्च ॥ १४२ ॥
पुनश्च तस्मादपरत्र पात्रे पश्चाच्च पात्रादपरत्र भूयः।

यदा विशुद्धं जलमेवमूर्ध्वं कृष्णं समस्तं मलमेत्यधस्तात् ।
तदा त्यजेत्तत्सलिलं मलञ्च शिलाजतु स्याज्जलशुद्धमेवम् ॥१४३॥

अथ शोधितशिलाजतुनो गुणानाह—

शिलाजतु स्मृतं तिक्तं कटूष्णं कटुपाकि च ।
रसायनं योगवाहि श्लेष्ममेहाश्मशर्कराः ॥ १४४ ॥
मूत्रकृच्छ्रं क्षयं श्वासं शोथमर्शांसि पाण्डुताम् ।
वातरक्तं तथा कुष्ठमपस्मारोदरं हरेत् ॥ १४५ ॥

अथ रसस्य शोधनविधिमाह ।

तत्रादौ स्वेदनमाह—

नानाधान्यैर्यथाप्राप्तैस्तुषवर्जैर्जलान्वितैः ।
मृद्भाण्डं पूरितं रक्षेद्यावदम्लत्वमाप्नुयात् ॥ १४६ ॥
तन्मध्ये भृङ्गराड् मुण्डी विष्णुक्रान्ता पुनर्नवा ।
मीनाक्षी चैव सर्पाक्षी सहदेवी शतावरी ॥ १४७ ॥
त्रिफला गिरिकर्णी च हंसपादी च चित्रकम् ।
समूलं कुट्टयित्वा तु यथालाभं विनिक्षिपेत् ॥ १४९ ॥

*विष्णुकान्ता गिरिकर्णी चापराजितैव श्वेतनीलपुष्पभेदात् ॥१४७-१४८॥

पूर्वाम्लभाण्डमध्ये तु धान्याम्लकमिदं स्मृतम् ।
स्वेदनादिषु सर्वत्र रसराजस्य योजयेत् ।
अत्यम्लमारनालं वा तदभावे प्रयोजयेत् ॥ १४८ ॥

*तदभावे = धान्याम्लाभावे ॥ १४९ ॥

त्र्यूषणं लवणं राजी रजनी त्रिफलाऽऽर्द्रकम् ।
महाबला नागबला मेघनादः पुनर्नवा ॥ १५० ॥
मेषशृङ्गी चित्रकश्च नवसारं समं समम् ।
एतत्समस्तं व्यस्तं वा पूर्वाम्लेनैव पेषयेत् ॥ १५१ ॥
प्रलिम्पेत्तेन कल्केन वस्त्रमङ्गुलमात्रकम् ॥ १५२ ॥
तन्मध्ये निक्षिपेत्सूतं बद्ध्वा तत्त्रिदिनं पचेत् ।
दोलायन्त्रेऽम्लसंयुक्ते जायते स्वेदितो रसः ॥ १५३ ॥

*मेघनादः = 'चौलाई' इति शाकविशेषः । मेषशृंगी (मेढाशृंगी),

तदलाभे "कर्कटश्रृङ्गी" ग्राह्या। नवसारं=नवसादरम् ॥१५०—१५३॥

अन्यच्च—

मूलकानलसिन्धूत्थत्र्यूषणार्द्रकराजिकाः।
रसस्य षोडशांशेन द्रव्यं युञ्ज्यात् पृथक्पृथक् ॥१५४॥
द्रव्येष्वनुक्तमानेषु मतं मानमितं बुधैः।
पट्टावृतेषु चैतेषु सूतं प्रक्षिप्य काञ्जिके ॥ १५५ ॥
स्वेदयेद्दिनमेकञ्च दोलायन्त्रेण बुद्धिमान्।
स्वेदात्तीव्रो भवेत्सूतो मर्दनाच्च सुनिर्मलः ॥ १५६ ॥

*मूलकम् "मुरई, मूली" वा इति लोके। अनलः=चित्रकम्। त्र्यूषणं=त्रिकटु। राजिका (राई) ॥ १५४—१५६ ॥

अथ मर्दनविधिमाह—

इष्टिकाचूर्णचूर्णाभ्यामादौ मर्द्यो रसस्ततः।
दध्ना गुडेन सिन्धूत्थराजिकागृहधूमकैः ॥ १५७ ॥

अन्यच्च—

कुमारिकाचित्रकरक्तसर्षपः कृतैः कषायैर्बृहतीविमिश्रितैः।
फलत्रिकेणापि विमर्दितो रसो दिनत्रयं सर्वमलैर्विमुच्यते ॥१५८॥

अथ मूर्च्छनविधिमाह—

त्र्यूषणं त्रिफलावन्ध्याकन्दैः क्षुद्राद्वयान्वितैः।
चित्रकोर्णानिशाक्षारकन्याऽर्ककनकद्रवैः ॥ १५९ ॥
सूतं कृतेन यूषेण वारान्सप्त विमर्दयेत्।
इत्थं सम्मूर्च्छितः सूतस्त्यजेत्सप्तापि कञ्चुकान् ॥ १६० ॥

*वन्ध्याकन्दः=वान्दुखेखसाकन्दः (बाँझ कांकुड)। क्षुद्राद्वयम् (छोटी कटाई, बडी कटाई)। ऊर्णा (मेषकी ऊन)। निशा=हरिद्रा। क्षारः=यवक्षारः। कन्या=कुमारिका। अर्कः=अर्कपत्ररसः। कनकद्रवः=धत्तूरपत्ररसः ॥ १५९—१६० ॥

अथोर्ध्वपातनविधिमाह—

मयूरग्रीवताप्याभ्यां नष्टपिष्टीकृतस्य च।
यन्त्रे विद्याधरे कुर्याद्रसेन्द्रस्योर्ध्वपातनम् ॥ १६१ ॥

ताप्यम्=सुवर्णमाक्षिकम्। नष्टपिष्टीकृतस्य=कुमारिकाद्रवयोगेन तावन्मर्दनं कर्त्तव्यं यावत् पारदः पृथङ् न दृश्यत इत्यर्थः। विद्याधर-यन्त्रे=डमरुयन्त्रे ॥१६१॥

अथाधःपातनविधिमाह—

त्रिफलाशिग्रुशिखिभिर्लवणासुरिसंयुतैः।
नष्टपिष्टं रसं कृत्वा लेपयेदूर्ध्वभाजनम् ॥ १६२ ॥
ततो दीप्तैरधःपातमुपलैस्तस्य कारयेत्।
यन्त्रे भूधरसंज्ञे तु ततः सूतो विशुध्यति ॥ १६३ ॥
स्वेदनादिक्रियाभिस्तु शोधितोऽसौ यदा भवेत्।
तदा कार्याणि कुरुते प्रयोज्यः सर्वकर्मसु ॥१६४॥

अथ मुख्यदोषहरणार्थं शोधनविधिमाह—

गृहकन्या हरति मलं त्रिफलाऽग्निं चित्रको विषं हन्ति।
तस्मादेभिर्मिश्रैर्वारान् संमूर्च्छयेत्सप्त ॥ १६५ ॥

अथ सर्वदोषहरसंक्षिप्तशोधनविधिमाह—

कुमारिकाचित्रकरक्तसर्षपैः कृतैः कषायैर्बृहतीविमिश्रितैः।
फलत्रिकेणापि विमर्दितो रसो दिनत्रयं सर्वमलैर्विमुच्यते॥१६६॥
कुमार्या च निशाचूर्णैर्दिनं सूतं विमर्दयेत्।
एवं कदर्थितः सूतो षण्ढो भवति निश्चितम् ॥ १६७ ॥
बह्वौषधिकषायेण स्वेदितः स बली भवेत्।
सर्पाक्षीचिञ्चिकावन्ध्याभृङ्गाब्दैः स्वेदितो बली।
ततः स पावकद्रावैः स्विन्नः स्यादतिदीप्तिमान् ॥ १६८ ॥

*सर्पाक्षी (नागफनी), चिञ्चिका (इमली), वन्ध्या (बांझ-ककोडा, भृङ्गः=भृङ्गराजः। अब्दः=मुस्ता। पावकः=चित्रकम् ॥ १६७—१६८ ॥

अथ पारदस्य मारणविधिमाह—

धूमसारं रसं तोरीं गन्धकं नवसादरम्।
यामैकं मर्दयेदम्लैर्भागं कृत्वा समं समम् ॥ १६९ ॥
काचकूप्यां विनिक्षिप्य ताञ्च मृद्वस्त्रमुद्रया।
विलिप्य परितो वक्त्रे मुद्रां दत्त्वा विशोषयेत् ॥ १७० ॥

अधः सच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीं वालुकापूरैर्भृत्वा चाकूपिकागलम् ॥ १७१॥
निवेश्य चुल्ल्यां तदधो वह्निं कुर्याच्छनैः शनैः ।
तस्मादत्यधिकं किञ्चित्पावकं ज्वालयेत्क्रमात् ॥ १७२ ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत्स्वाङ्गशीतं तमूर्ध्वगं गन्धकं त्यजेत् ॥ १७३ ॥
अधस्थश्च मृतं सूतं गृह्णीयात्तं तु मात्रया ।
यथोचितानुपानेन सर्वकर्मसु योजयेत् ॥ १७४ ॥

अथ पादरमारणेऽपरं विधिमाह—

अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत् ।
तत्सम्पुटे क्षिपेत्सूतं मलयूदुग्धमिश्रितम् ॥ १७५ ॥

*मलयूः=काकोदुम्बरिका ॥ १७५ ॥

द्रोणपुष्पीप्रसूनानि विडङ्गमरिमेदकः ।
एतच्चूर्णमधश्चोर्ध्वं दत्त्वा मुद्रा प्रदीयते ॥ १७६ ॥
तद्गोलं स्थापयेत्सम्यङ् मृन्मूषासम्पुटे पचेत् ॥ १७७ ॥
एवमेकपुटेनैव सूतकं भस्म जायते ।
तत्प्रयोज्यं यथास्थाने यथामात्रं यथाविधि ॥ १७८ ॥

अथ पारदमारणे तृतीयं विधिमाह—

काकोदुम्बरिकादुग्धै रसं किञ्चिद्विमर्दयेत ।
तद्दुग्धघृष्टहिङ्गोश्च मूषायुग्मं प्रकल्पयेत् ॥ १७९ ॥
क्षिप्त्वा तत्संपुटे सूतं तत्र मुद्रां प्रदापयेत् ।
धृत्वा तद् गोलकं प्राज्ञो मृन्मूषासम्पुटेऽधिके ।
पचेद् गजपुटेनैव सूतकं याति भस्मताम् ॥ १८० ॥

अथान्यप्रकारमाह—

नागवल्लीरसैर्घृष्टः कर्कोटीकन्दगर्भितः ।
मृन्मूषासम्पुटे पक्वः सूतो यात्येव भस्मताम् ॥ १८१ ॥

अथ रसकर्पूरनिर्माणविधिमाह—

तत्र पारदस्य संक्षिप्तं शोधनं कर्त्तव्यम् ।
शुद्धसूतसमं कुर्यात्प्रत्येकं गरिकं सुधीः ।

इष्टिकां खटिकां तद्वत्स्फटिकां सिन्धुजन्म च ॥ १८२ ॥
वल्मीकं क्षारलवणं भाण्डरञ्जकमृत्तिकाम् ।
सर्वाण्येतानि संचूर्ण्य वाससा चापि शोधयेत् ॥ १८३ ॥

*खटिका [खड़ी] । स्फटिका [फटकिरी] । सिन्धुजन्म = सैन्धवम् । वल्मीकम् = "वमई" इति लोके । क्षारलवणम् [खारीनोन] । भाण्डरञ्जकमृत्तिका [काविसा] ॥ १८२-१८३ ॥

एभिश्चूर्णैर्युतं सूतं यावद्यामं विमर्दयेत् ।
तच्चूर्णसहितं सूतं स्थालीमध्ये परिक्षिपेत् ॥ १८४ ॥
तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत्समाम् ।
सवस्त्रकुट्टितमृदा मुद्रयेदनयोर्मुखम् ॥ १८५ ॥
संशोष्य मुद्रयेद्भूयो भूयः संशोष्य मुद्रयेत् ।
सम्यग्विशोष्य मुद्रां तां स्थालीं चुल्ल्यां विधारयेत् ॥१८६॥
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम् ।
अङ्गारोपरि तद्यन्त्रं रक्षेद्यत्नादहर्निशम् ॥ १८७ ॥
शनैरुद्घाटयेद्यन्त्रमूर्ध्वस्थालीगतं रसम् ।
कर्पूरवत्सुविमलं गृह्णीयाद् गुणवत्तरम् ॥ १८८ ॥
तद्देवकुसुमचन्दनकस्तूरीकुङ्कुमैर्युक्तम् ।
खादन् हरति फिरङ्गं व्याधिं सोपद्रवं सपदि ॥ १८९ ॥
विन्दति वह्नेर्दीप्तिं पुष्टिं वीर्यं बलं विपुलम् ।
रमयति रमणीशतकं रसकर्पूरस्य सेवकः सततम् ॥१९०॥

अथ सिन्दूररसविधिमाह—

शुद्धसूतस्य गृह्णीयाद्भिषग्भागचतुष्टयम् ।
शुद्धगन्धस्य भागैकं तावत्कृत्रिमगन्धकम् ॥ १९१ ॥
अथ वा पारदस्यार्द्धं शुद्धगन्धकमेव हि ।
तयोः कज्जलिकां कुर्याद्दिनमेकं विमर्दयेत् ॥ १९२ ॥
मृत्तिकां वाससा सार्द्धं कुट्टयेदतियत्नतः ।
तया वारत्रयं सम्यक्काचकूपीं प्रलेपयेत् ॥ १९३ ॥
मृत्तिकां शोषयित्वा तु कूप्यां कज्जलिकां क्षिपेत्

तां कूपीं वालुकायन्त्रे स्थापयित्वा रसं पचेत् ॥ १९४ ॥
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम् ।
गृह्णीयादूर्ध्वसंलग्नं सिन्दूरसदृशं रसम् ॥ १९५ ॥

इति सिन्दूररसः ॥

अथ मारितमूर्छितपारदयोर्गुणानाह—

पारदः कृमिकुष्ठघ्नो जयदो दृष्टिकृत्सरः ।
मृत्युहृच्च महावीर्यो योगवाही ज्वरापहः ॥ १९६ ॥
स्मृत्योजोरूपदो वृष्यो वृद्धिकृद्धातुवर्द्धनः ।
षण्ढत्वनाशनः शूरः खेचरः सिद्धिदः परः ॥ १९७ ॥
पारदः सकलरोगहा स्मृतः षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एष कीर्त्तितस्तेन तद्गुणगणैर्विराजते ॥१९८॥

उक्तञ्च रसामृते—।

यस्य रोगस्य यो योगस्तेनैव सह योजितः ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥ १९९ ॥

अथोपरसानां शोधनविधिमाह—

तत्र हिङ्गुलस्य शोधनविधिमाह—

मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् ।
सप्तवारान्प्रयत्नेन शुद्धिमायाति निश्चितम् ॥ ॥ २०० ॥

अथ शोधितहिङ्गुलस्य गुणानाह—

तिक्तं कषायं कटु हिङ्गुलं स्यान्नेत्रामयघ्नं कफपित्तहारि ।
हृल्लासकण्डज्वरकामलाश्च प्लीहामवातौ च गरं निहन्ति ॥२०१॥

अथ हिंगुलात्पारदनिष्कर्षणविधिमाह—

निम्बूरसैर्निम्बपत्ररसैर्वा याममात्रकम् ।
घृष्ट्वा दरदमूर्ध्वन्तु पातयेत्सूतयुक्तिवत् ॥ २०२ ॥
तत्रोर्ध्वपिठरीलग्नं गृह्णीयाद्रसमुत्तमम् ।
शुद्धमेव हि तं सूतं सर्वकर्मसु योजयेत् ॥ २०३ ॥

अथाशुद्धगन्धकस्य दोषानाह—

अशुद्धो गन्धकः कुर्यात्कुष्ठं पित्तरुजां भ्रमम् ।
हन्ति वीर्यं बलं रूपं तस्माच्छुद्धः प्रयुज्यते ॥ २०४ ॥

अथ गन्धकस्य शोधनविधिमाह—

लौहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत् ।
तप्ते घृते तत्समानं क्षिपेद्गन्धकजं रजः ॥ २०५ ॥
विद्रुतं गन्धकं दृष्ट्वा तनुवस्त्रे विनिक्षिपेत् ।
यथा वस्त्राद्विनिःसृत्य दुग्धमध्येऽखिलं पतेत् ।
एवं स गन्धकः शुद्धः सर्वकर्मोचितो भवेत् ॥ २०६ ॥

अथ शुद्धगन्धकस्य गुणानाह—

गन्धकः कटुकस्तिक्तो वीर्य्योष्णस्तुवरः सरः ॥ २०७ ॥
पित्तलः कटुकः पाके कण्डूवीसर्पजन्तुजित् ।
हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः ॥ २०८ ॥

अथाशुद्धाभ्रकस्य दोषानाह—

पीडां विधत्ते विविधां नराणां कुष्ठं क्षयं पाण्डुगदञ्च कुर्यात् ।
हृत्पार्श्वपीडां च करोत्यसह्यामशुद्धमभ्रं गुरु वह्निहृत्स्यात् ॥२०९॥

अथाभ्रकस्य शोधनविधिमाह—

कृष्णाभ्रकं धमेद्वह्नौ ततः क्षीरे विनिक्षिपेत् ।
भिन्नपत्रं तु तत्कृत्वा तण्डुलीयाम्लयोर्द्रवैः ।
भावयेदष्टयामं तदेवमभ्रं विशुद्ध्यति ॥ २१० ॥

अथाभ्रकस्य मारणविधिमाह—

कृत्वा धान्याभ्रकं तच्च शोषयित्वाऽथ मर्दयेत् ।
अर्कक्षीरैर्दिनं खल्वे चक्राकारं च कारयेत् ॥ २११ ॥
वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत् ।
पुनर्मर्द्यं पुनः पाच्यं सप्तवारान् पुनः पुनः ॥ २१२ ॥
ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्रयम् ।
म्रियते नात्र सन्देहः प्रयोज्यं सर्वकर्मसु ॥ २१३ ॥
तुल्यं घृतं मृताभ्रेण लोहपात्रे विपाचयेत् ।
घृते जीर्णे तदभ्रन्तु सर्वयोगेषु योजयेत् ॥ २१४ ॥

अथ धान्याभ्रकस्य विधिमाह—

पादांशशालिसंयुक्तमभ्रं बद्ध्वाऽथ कम्बले ।
त्रिरात्रं स्थापयेन्नीरे तत्क्लिन्नं मर्दयेत्करैः ॥ २१५ ॥

कम्बलाद्गलितं सूक्ष्मं वालुकारहितञ्च यत् ।
तद् धान्याभ्रमिति प्रोक्तमभ्रमारणसिद्धये ॥ २१६ ॥

अथ मारिताभ्रकस्य गुणानाह—

अभ्रं कषायं मधुरं सुशीतमायुष्करं धातुविवर्द्धनञ्च ।
हन्यात्त्रिदोषं व्रणमेहकुष्ठं प्लीहोदरं ग्रन्थिविषक्रिमींश्च ॥२१७॥
रोगान् हन्ति द्रढयति वपुर्वीर्यवृद्धिं विधत्ते
तारुण्याढ्यं रमयति शतं योषितां नित्यमेव ।
दीर्घायुष्काञ्जनयति सुतान् सिंहतुल्यप्रभावान्
मृत्योर्भीतिं हरति सुतरां सेव्यमानं मृताभ्रम् ॥ २१८ ॥

अथाशुद्धहरितालस्य दोषानाह—

अशुद्धं तालमायुर्हृत्कफमारुतमेहकृत् ।
तापस्फोटाङ्गसंकोचं कुरुते तेन शोधयेत् ॥ २१६ ॥

अथ हरितालस्य शोधनविधिमाह—

तालकं कणशः कृत्वा तच्चूर्णं काञ्जिके पचेत् ।
दोलायन्त्रेण यामैकं ततः कूष्माण्डजद्रवैः ॥ २२० ॥
तिलतैले पचेद्यामं यामञ्च त्रिफलाजले ।
एवं यन्त्रे चतुर्यामं पक्वं शुद्ध्यति तालकम् ॥ २२१ ॥

अथ हरितालस्य मारणविधिमाह—

सदलं तालकं शुद्धं पौनर्नवरसेन तु ।
खल्वे विमर्दयेदेकं दिनं पश्चाद्विशोधयेत् ॥ २२२ ॥
ततः पुनर्नवाक्षारैः स्थाल्यामर्द्धं प्रपूरयेत् ।
तत्र तद्गोलकं धृत्वा पुनस्तेनैव पूरयेत् ॥ २२३ ॥
आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे ।
स्थालीं चुल्ल्यां समारोप्य क्रमाद्वह्निं विवर्धयेत् ॥ २२४ ॥
दिनान्यन्तरशून्यानि पञ्च वह्निं प्रदापयेत् ॥ २२५ ॥
एवं तन्म्रियते तालं मात्रा तस्यैकरक्तिका ।
अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत् ॥ २२६ ॥

अथ शोधितमारितहरितालयोर्गुणानाह—

हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम् ।

कण्डूकुष्ठास्यरोगास्रकफपित्तकचव्रणान् ॥ २२७ ॥

अन्यच्च—

तालकं हरते रोगान्कुष्ठमृत्युज्वरापहम् ।
शोधितं कुरुते कान्ति वीर्यवृद्धिं तथाऽऽयुषम् ॥ २२८ ॥

अथाशुद्धमनःशिलाया दोषानाह—

तालकस्यैव भेदोऽस्ति मनोगुप्तैतदन्तरम् ।
तालकं त्वतिपीतं स्याद्भवेद्रक्ता मनःशिला ॥ २२९ ॥
मनःशिला मन्दबलं करोति जन्तुं ध्रुवं शोधनमन्तरेण ।
मलस्य बन्धं किल मूत्ररोधं सशर्करं कृच्छ्रगदञ्च कुर्य्यात् ॥२३०॥

अथ मनःशिलायाः शोधनविधिमाह—

पचेत्त्र्यहमजामूत्रे दोलायन्त्रे मनःशिलाम् ।
भावयेत्सप्तधा पित्तैरजायाः सा विशुद्ध्यति ॥ २३१ ॥

अथ शोधितमनःशिलाया गुणानाह—

गुर्वी मनःशिला वर्ण्या सरोष्णा लेखनी कटुः ।
तिक्ता स्निग्धा विषश्वासकासभूतकफास्रनुत् ॥ २३२ ॥

अथ खर्परस्तुत्थभेदस्तस्य शोधनविधिमाह—

नरमूत्रे च गोमूत्रे सप्ताहं रसकं पचेत् ।
दोलायन्त्रेण शुद्धः स्यात्ततः कार्येषु योजयेत् ॥ २३३ ॥

अथ शुद्धखर्परस्य गुणानाह—

खर्परं कटुकं क्षारं कषायं वामकं लघु ।
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत् ।
विषाश्मकुष्ठकण्डूनां नाशनं परमं मतम् ॥ २३४ ॥

अथ सर्वोपरसानां साधारणशोधनविधिमाह—

सूर्यावर्त्तो वज्रकन्दः कदली देवदालिका ।
शिग्रुः कोशातकी वन्ध्या काकमाची च वालकम् ॥२३५॥
एषामेकरसेनैव त्रिक्षारैर्लवणैः सह ।
भावयेदम्लवर्गैश्च दिनमेकं प्रयत्नतः ॥ २३६ ॥
ततः पचेच्च तद्द्रावैर्दोलायन्त्रे दिनं सुधीः ।
एवं शुद्ध्यन्ति ते सर्वे प्रोक्ता उपरसा हि ये ॥ २३७ ॥

अथ विशेषशुद्धिमाह—

कङ्कुष्ठं गैरिकं शङ्खः कासीसं टङ्कणं तथा ।
नीलाञ्जनं शुक्तिभेदाः क्षुल्लकाः सवराटकाः ॥ २३८ ॥
जम्बीरवारिणा स्विन्नाः क्षालिताः कोष्णवारिणा ।
शुद्धिमायान्त्यमी योज्या भिषग्भिर्योगसिद्धये ॥ २३९ ॥
*एवंशोधितानामुपरसानां पृथग्गुणा गुणग्रन्थे द्रष्टव्याः ॥ २३९ ॥

अथ रत्नानां शोधनमारणविधिमाह—

तत्राशुद्धवज्रस्य दोषानाह—

अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा ।
पाण्डुत्वं पङ्गुलत्वञ्च तस्मात्संशोध्य मारयेत् ॥ २४० ॥

अथ वज्रस्य शोधनविधिमाह—

कुलत्थकोद्रवक्वाथे दोलायन्त्रे विपाचयेत् ।
व्याघ्रीकन्दगतं वज्रं त्रिदिनात्तद्विशुद्ध्यति ॥ २४१ ॥

अथान्यं शोधनविधिमाह—

गृहीत्वाऽह्नि शुभे वज्रं व्याघ्रीकन्दोदरे क्षिपेत् ।
महिषीविष्ठया लिप्त्वा कारीषाग्नौ विपाचयेत् ॥ २४२ ॥
त्रियामायां चतुर्यामं यामिन्यन्तेऽश्वमूत्रके ।
सेचयेत्पाचयेदेवं सप्तरात्रेण शुद्ध्यति ॥ २४३ ॥
*व्याघ्री = कण्टकारिका ॥ २४२—२४३ ॥

अथ वज्रस्य मारणविधिमाह—

हिङ्गुसैन्धवसंयुक्ते क्षिपेत्क्वाथे कुलत्थजे ।
तप्तं तप्तं पुनर्वज्रं भवेद्भस्म त्रिसप्तधा ॥ २४४ ॥

अथान्यं विधिमाह—

मेषशृङ्गभुजङ्गास्थिकूर्मपृष्ठाम्लवेतसान् ॥ २४५ ॥
शशदन्तं समं पिष्ट्वा वज्रीक्षीरेण गोलकम् ।
कृत्वा तन्मध्यगं वज्रं म्रियते ध्मातमेव हि ॥ २४६ ॥

अथ मारितवज्रस्य गुणानाह—

आयुः पुष्टिं बलं वीर्यं वर्णं सौख्यं करोति च ।
सेवितं सर्वरोगघ्नं मृतं वज्रं न संशयः ॥ २४७ ॥

अथ शेषरत्नानां शोधनमारणविधिमाह—

वज्रवत्सर्वरत्नानि शोधयेन्मारयेत्तथा ।
शुद्धानां मारितानाञ्च तेषां शृणु गुणानपि ॥ २४८ ॥
मणयो वीर्यतः शीता मधुरास्तुवरा रसात् ।
चक्षुष्या लेखनाश्चापि सारका विषहारकाः ।
धारणात्ते तु मङ्गल्या ग्रहदृष्टिहरा अपि ॥ २४६ ॥

*उपरत्नानां शोधनमारणविधिश्चिन्त्यः ॥ २४८—२४९ ॥

अथ विषोपविषाणां शोधनविधिमाह ।

तत्र वत्सनाभस्य स्वरूपमाह—

सिन्धुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा ।
यत्पार्श्वे न तरोर्वृद्धिर्वत्सनाभः स भाषितः ॥ २५० ॥

अथ विषस्य शोधनविधिमाह—

गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुद्ध्यति ।
रक्तसर्षपतैलाक्ते तथा धार्यञ्च वाससि ॥ २५१ ॥
ये गुणा गरले प्रोक्तास्ते स्युर्हीना विशोधनात् ।
तस्माद्विषं प्रयोगे तु शोधयित्वा प्रयोजयेत् ॥ २५२ ॥

अथ विषस्य गुणानाह—

विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च ।
आग्नेयं वातकफहृद्योगवाहि मदावहम् ॥ २५३ ॥

*व्यवायि=सकलकायगुणव्यापनपूर्वकं पाकगमनशीलम् । विकाशि=ओजःशोषणपूर्वकं सन्धिबन्धशिथिलीकरणशीलम् । आग्नेयम्=अधिकाग्न्यंशम् । योगवाहि=सङ्गिगुणग्राहकम् । मदावहम्=तमोगुणप्राधान्येन बुद्धिविध्वंसकम् ॥ २५३ ॥

तदेव युक्तियुक्तन्तु प्राणदायि रसायनम् ।
योगवाहि परं वातश्लेष्मजित्सन्निपातहृत् ॥ २५४ ॥

अथोपविषाणां निरूपणमाह—

अर्कक्षीरं स्नुहीक्षीरं लांगली करवीरकः ।
गुञ्जाऽहिफेनो धत्तूरः सप्तोपविषजातयः ॥ २५५ ॥

*एतेषां शोधनं चिन्त्यम् । गुणास्तत्र तत्र द्रष्टव्याः ॥ २५५ ॥

अथ द्रव्याणां गुणवत्तामवधिमाह—

गुणहीनं भवेद्वर्षादूर्ध्वं तद्रूपमौषधम्।
मासद्वयात्तथा चूर्णं लभते हीनवीर्यताम् ॥ २५६ ॥
हीनत्वं गुटिकालेहौ लभेते वत्सरं यदि।
हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिकास्तथा ॥ २५७ ॥

*घृततैलाद्या इति योगविशेषणम्। चतुर्मासाधिकाः=वत्सरादुपरि चत्वारो मासा अधिका येषु ते ॥ २५६-२५७ ॥

अथ ग्रन्थान्तराद् घृततैलयोर्विशेषमाह—

घृतमब्दात्परं पक्वं हीनवीर्यत्वमाप्नुयात्।
तैलं पक्वमपक्वञ्च चिरस्थायि गुणाधिकम् ॥ २५८ ॥

*तदपि षोडशमासाभ्यन्तरीणं पक्वं तैलं गुणाधिकं बोद्धव्यम् ॥२५८॥

ओषध्यो लघुपाकाः स्युर्निर्वीर्या वत्सरात्परम्।
पुराणाः स्युर्गुणैर्युक्ता आसवा धातवो रसाः ॥ २५९ ॥

*ओषध्यः=धान्यादयः। लघुपाकाः=शीघ्रपाकाः। निर्वीर्याः स्युः ॥ २५९ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे परिभाषाऽऽदिप्रकरणे तृतीयं धात्वादिशोधनमारणविधिप्रकरणं समाप्तम् ॥ ३ ॥

अथ चतुर्थं स्नेहपानविधिप्रकरणम् ॥ ४ ॥

तत्र स्नेहस्य भेदान् विशेषनामानि चाह—

स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा।
मज्जा च तं पिबेन्मर्त्यः किञ्चिदभ्युदिते रवौ ॥ १ ॥
स्थावरो जङ्गमश्चैव द्वियोनिः स्नेह उच्यते।
तिलतैलं स्थावरेषु जङ्गमेषु घृतं वरम्।
द्वाभ्यां त्रिभिश्चतुर्भिर्वा यमकस्त्रिवृतो महान् ॥ २ ॥

*अस्यायमर्थः। द्वाभ्यां स्नेहाभ्यां घृततैलाभ्यां यमकाख्यः स्नेहः स्यात्। त्रिभिः स्नेहैर्घृततैलवसारूपैस्त्रिवृताख्यः स्यात्। चतुर्भिर्घृततैलवसामज्जभिर्महान्=महास्नेहः स्यादित्यर्थः ॥ १-२ ॥

पिबेत्त्र्यहं चतुरहं पञ्चाहं षडहानि वा ॥ ३ ॥

*मृदुमध्यक्रूरकोष्ठापेक्षया त्र्यहं चतुरहं पञ्चाहं षडहानि चेति ।

यदुक्तम्—

मृदुकोष्ठस्त्रिरात्रेण स्निग्धस्नेहोपसेवया ।
मध्यकोष्ठश्चतुर्भिश्च दिवसैः स्निह्यति ध्रुवम् ॥ १ ॥
पञ्चभिर्वाऽथ षड्भिर्वा दिनैः क्रूरो विशुद्ध्यति ।
सप्तरात्रात्परं स्नेहः सात्म्योभवति सेवितः ॥ २ ॥

*मृदुमध्यक्रूरकोष्ठानां सर्वेषां सप्तरात्रात्परं सात्म्योभवति । वातानुलोम्यवह्निदीप्तिकोष्ठशुद्धिमृदुस्निग्धाङ्गलाघवधातुपुष्टिद्विजदार्ढ्यनिर्जरताबलवर्णकारी भवति । न तु भक्तद्वेषग्लान्यादीन् करोति ॥ ३ ॥

दोषकालवयोवह्निबलान्यालोक्य योजयेत् ।
हीनाञ्च मध्यमां ज्येष्ठां मात्रां स्नेहस्य बुद्धिमान् ॥ ४ ॥
अमात्रया तथाऽकाले मिथ्याऽऽहारविहारतः ।
स्नेहः करोति शोथार्शस्तन्द्रानिद्राविसंज्ञिताः ॥ ५ ॥
देया दीप्ताग्नये मात्रा स्नेहस्यैकपलोन्मिता ।
मध्यमाय त्रिकर्षा स्याज्जघन्याय द्विकार्षिकी ॥ ६ ॥

*मध्यमाय = मध्यमाग्नये । जघन्याय = हीनाग्नये ॥ ६ ॥

अथ वा स्नेहमात्राः स्युस्तिस्त्रोऽन्याः सर्वसम्मताः ।
अहोरात्रेण महती जीर्यत्यह्नि तु मध्यमा ।
जीर्यत्यल्पा दिनार्द्धेन सा विज्ञेया सुखावहा ॥ ७ ॥

*अयमर्थः—याऽहोरात्रेण जीर्यति सा मात्रा महती । एवं मध्यमा कनिष्ठा च ज्ञेया ॥ ७ ॥

अल्पा स्याद्दीपनी वृष्या स्वल्पदोषे प्रपूजिता ॥
मध्यमा स्नेहनी ज्ञेया बृंहणी भ्रमहारिणी ।
ज्येष्ठा कुष्ठविषोन्मादग्रहापस्मारनाशिनी ॥ ८ ॥

सुश्रुतः पुनरेवमाह—

या मात्रा प्रथमे यामे गते जीर्यति वासरे ।
सा मात्रा दीपयत्यग्निमल्पदोषे च पूजिता ॥ ९ ॥

या मात्रा वासरस्यार्धे व्यतीते परिजीर्यति ।
सा वृष्या बृंहणी च स्यान्मध्यदोषे प्रपूजिता ॥ ११ ॥
या मात्रा चरमे यामे स्थितेऽह्नः परिजीर्यति ।
सा मात्रा स्नेहनी ज्ञेया बहुदोषेषु पूजिता ॥ १२ ॥
केवलं पैत्तिके सर्पिर्वातिके लवणान्वितम् ।
देयं बहुकफे वा हृव्योषक्षारसमान्वितम् ॥ १३ ॥

अथ सर्पिःपानार्हजनानाह—

रूक्षक्षतविषार्त्तानां वातपित्तविकारिणाम् ।
हीनमेधास्मृतीनां च सर्पिःपानं प्रशस्यते ॥ १४ ॥

अथ वसापानार्हजनानाह—

कृमिकोष्ठानिलाविष्टाः प्रवृद्धकफमेदसः ।
पिबेयुस्तैलसात्म्याश्च तैलं दार्ढ्यार्थिनस्तु ये ॥ १५ ॥
व्यायामकर्षिताः शुष्करेतोरक्ता महारुजः ।
महाग्निमारुतप्राणा वसायोग्या नराः स्मृताः ॥ १६ ॥

अथ मज्ज्ञः सर्पिषोऽपि पानार्हजनानाह—

क्रूराशयाः क्लेशसहा वातार्त्ता दीप्तवह्नयः ।
मज्जानञ्च पिबेयुस्ते सर्पिर्वा सर्वतो हितम् ॥ १७ ॥
*क्रूराशयाः=क्रूरकोष्ठाः । सर्वतः=सर्वस्मात्स्नेहात् ॥ १८ ॥

अथ शीतादिकालवातादिदोषभेदेन स्नेहपानसमयभेदानाह—

शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि ।
वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा ॥ १८ ॥

अथ नस्यादिषु तैलघृतयोः प्रयोगे नियममाह—

नस्याभ्यञ्जनगण्डूषमूर्ध्वकर्णाक्षितर्पणे ।
तैलं घृतं वा युञ्जीत दृष्ट्वा दोषबलाबलम् ॥ १९ ॥

अथ घृतादिपानेऽनुपानान्याह—

घृते कोष्णं जलं पेयं तैले यूषः प्रशस्यते ।
वसामज्ज्ञोः पिबेन्मण्डमनुपानं सुखावहम् ॥ २० ॥

अथ स्नेहद्वेषिणां स्नेहपानविधिमाह—

स्नेहद्विषः शिशून्वृद्धान्सुकुमारान्कृशानपि ।
तृष्णालुकानुष्णकाले सह भक्तेन पाययेत् ॥ २१ ॥

अथ स्नेहकारीणि पदार्थान्तराण्याह—

सर्पिष्मती बहुतिला यवागूः स्वल्पतण्डुला ।
सुखोष्णा सेव्यमाना तु सद्यः स्नेहनकारिणी ॥ २२ ॥
शर्कराचूर्णसंयुक्ते दोहनस्थे घृते तु गाम् ।
दुग्ध्वा क्षीरं पिबेद्रूक्षः सद्यःस्नेहनमुत्तमम् ॥ २३ ॥

अथ स्नेहाजीर्णे कर्त्तव्यकर्म्माण्याह—

मिथ्याऽऽचाराद् बहुत्वाच्च यस्य स्नेहो न जीर्यति ।
विष्टभ्य वाऽपि जीर्येत वारिणोष्णेन वामयेत् ॥ २४ ॥

अथ स्नेहाजीर्णशङ्कायां कर्त्तव्यकर्माण्याह—

स्नेहस्याजीर्णशङ्कायां पिबेदुष्णोदकं नरः ।
तेनोद्गारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा ॥ २५ ॥

अथ स्नेहपानजतृष्णायाः प्रशमोपायमाह—

स्नेहेन पैत्तिकस्याग्निर्यदा तीक्ष्णतरीकृतः
तदाऽस्योदीरयेत् तृष्णां विषमां तस्य पाययेत् ।
शीतलं पायसं तेन तृष्णा तस्य प्रशाम्यति ॥ ॥ २६ ॥

अथ स्नेहपानायोग्यजनानाह—

अजीर्णी वर्जयेत्स्नेहमुदरी तरुणज्वरी ।
दुर्बलोऽरोचकी स्थूलो मूर्च्छालो मदपीडितः ॥ २७ ॥
दत्तवस्तिर्विरिक्तश्च वान्तस्तृष्णाश्रमान्वितः ।
अकालप्रसवा नारी दुर्दिने च विवर्जयेत् ॥ २८ ॥

अथ स्नेहपानयोग्यजनानाह—

स्वेद्यसंशोध्यमद्यस्त्रीव्यायामासक्तचित्तकाः ॥ २९ ॥
वृद्धबालकृशा रूक्षाः क्षीणास्राः क्षीणरेतसः ।
वातार्त्तास्तिमिरार्त्ता ये तेषां स्नेहनमुत्तमम् ॥ ३० ॥

अथ सम्यक्स्निग्धस्य लक्षणान्याह—

वातानुलोम्यं दीप्ताग्निर्वर्चःस्निग्धमसंहतम् ।
मृदुस्निग्धाङ्गताऽग्लानिः स्नेहद्वेषोऽथ लाघवम् ।
विमलेन्द्रियता सम्यक्स्निग्धे रूक्षे विपर्ययः ॥ ३१ ॥

अथातिस्निग्धस्य लक्षणान्याह—

भक्तद्वेषो मुखस्रावो गुदे दाहः प्रवाहिका।
तन्द्रातीसारपाण्डुत्वं भृशं स्निग्धस्य लक्षणम् ॥ ३२ ॥

अथ रूक्षातिस्निग्धयोर्जनयोः कर्त्तव्यकर्माण्याह—

रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणम्।
श्यामाकचणकाद्यैश्च तक्रपिण्याकशक्तुभिः ॥ ३३ ॥

अथ स्नेहसेवनस्य गुणानाह—

दीप्ताग्निः शुद्धकोष्ठश्च पुष्टधातुर्दृढेन्द्रियः।
निर्जरो बलवर्णाढ्यः स्नेहसेवी भवेन्नरः ॥ ३४ ॥

अथ स्नेहसेवने त्याज्यकर्माण्याह—

स्नेहे व्यायामसंशीतवेगाघातप्रजागरान्।
दिवास्वप्नमभिष्यन्दि रूक्षान्नञ्च विवर्जयेत् ॥ ३५ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे परिभाषाऽऽदिप्रकरणे चतुर्थं स्नेहपानविधिप्रकरणं समाप्तम् ॥ ४ ॥

अथ पञ्चमं पञ्चकर्मविधिप्रकरणम् ॥ ५ ॥

अथ पञ्चकर्मनामान्याह—

प्रथमं वमनं पश्चाद्विरेकश्चानुवासनम्।
एतानि पञ्च कर्माणि निरूहो नावनं तथा ॥ १ ॥

अथ वमनम्।

तत्रादौ वमनार्हसमयजनानाह—

शरत्काले वसन्ते च प्रावृट्काले च देहिनाम्।
वमनं रेचनं चैव कारयेत्कुशलो भिषक् ॥ २ ॥
बलवन्तं कफव्याप्तं हृल्लासादिनिपीडितम्।
तथा वमनसात्म्यञ्च धीरचित्तञ्च वामयेत् ॥ ३ ॥
विषदोषे स्तन्यरोगे मन्देऽग्नौ श्लीपदेऽर्बुदे।
हृद्रोगे कुष्ठवीसर्पे मेहाजीर्णभ्रमेषु च ॥ ४ ॥
विदारिकाऽपचीकासश्वासपीनसवृद्धिषु।

अपस्मारे ज्वरोन्मादे तथा रक्तातिसारिषु ॥ ५ ॥
नासाताल्वोष्ठपाकेषु कर्णस्रावेऽधिजिह्वके ।
गलशुण्डयामतीसारे पित्तश्लेष्मगदे तथा ।
मेदोगदेऽरुचौ चैव वमनं कारयेद्भिषक् ॥ ६ ॥

*स्तन्यरोगे = दुष्टदुग्धजनिते वालस्य रोगे ॥१-६॥

अथ वमनानर्हजनानाह—

न वामनीयस्तिमिरी न गुल्मी नोदरी कृशः ।
नातिवृद्धो गर्भिणी च न स्थूलो न क्षतातुरः ॥ ७ ॥
मदार्त्तो वालको रूक्षः क्षुधितश्च निरूहितः ।
उदावर्त्यूर्ध्वरक्ती च दुश्छर्द्यः केवलानिली ॥ ८ ॥
पाण्डुरोगी कृमिव्याप्तः पवनात्स्वरघातवान् ॥ ९ ॥
एतेऽप्यजीर्णव्यथिता वाम्या ये विषपीडिताः ।
कफव्याप्ताश्च ते वाम्या मधुकक्काथपानतः ॥ १० ॥

*ऊर्ध्वरक्ती = यस्य नासाऽक्षिकर्णास्यमार्गैं रक्तं प्रवर्त्तते सः । भुक्तरूक्षकर्कशद्रव्यो दुश्छर्द्यः । मधुकस्थाने मधूकेति द्वितीयः पाठः ॥ ७-१० ॥

अथ वमनविधिमाह—

सुकुमारं कृशं वालं वृद्धं भीरुञ्च वामयेत् ।
पाययित्वा यवागूं वा क्षीरतक्रदधीनि च ॥ ११ ॥
असात्म्यैः श्लेष्मलैर्भोज्यैर्दोषानुत्क्लेश्य देहिनाम् ।
स्निग्धस्विन्नाय वमनं दत्तं सम्यक्प्रवर्त्तते ॥ १२ ॥
वमनेषु च सर्वेषु सैन्धवं मधु वा हितम् ।
बीभत्सं वमनं दद्याद्विपरीतं विरेचनम् ॥ १३ ॥

* बीभत्सम् = अरुच्यम । विपरीतं = रुच्यम् ॥ ११-१३ ॥

क्वाथ्यद्रव्यस्य कुडवं श्रपयित्वा जलाढके ।
अर्द्धभागावशिष्टञ्च वमनेष्ववचारयेत् ॥ १४ ॥
क्वाथपाने नवप्रस्था ज्येष्ठा मात्रा प्रकीर्त्तिता ।
मध्यमा षण्मिता प्रोक्ता त्रिप्रस्था च कनीयसी ॥ १५ ॥
वमने च विरेके च तथा शोणितमोक्षणे ।

अर्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः ॥ १६ ॥

* अर्द्धत्रयोदशपलं=सार्द्धषट्कम् ॥१३-१६॥

कल्कचूर्णावलेहानां त्रिपलं मात्रयोत्तमम् ।
मध्यमं द्विपल विद्यात्कनीयस्तु पलं भवेत् ॥ १७ ॥
वमने चाष्ट वेगाः स्युः पित्तान्ता उत्तमास्तु ते ।
षड् वेगा मध्यमा वेगाश्चत्वारस्त्वपरे मताः ॥ १८ ॥
कफं कटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमैर्जयेत् ।
सुस्वादुलवणाम्लोष्णैः संसृष्टं वायुना कफम् ॥ १९ ॥
कृष्णां राटूफलं सिन्धुं कफे काष्णजलैः पिबेत् ।
पटोलवासानिम्बांश्च पित्ते शीतजलैः पिबेत् ॥ २० ॥

* राटूफलम्=मदनफलम् ॥१७-२०॥

संश्लेष्मवातपीडायां सक्षीरं मदनं पिबेत् ।
अजीर्णे काष्णपानीयं सिन्धुं पीत्वा वमेत्सुधीः ॥ २१ ॥

* मदनं=मयनफलम् ॥ २१ ॥

वमनं पाययित्वा तु जानुमात्रासने स्थितम् ।
कण्ठमेरण्डनालेन स्पृशन्तं वामयेद्भिषक् ॥ २२ ॥
प्रसेको हृद्ग्रहः कोठः कण्डूर्दुश्छर्दिते भवेत् ।
अतिवान्ते भवेत्तृष्णा हिक्कोद्गारो विसंज्ञिता ॥ २३ ॥
जिह्वानिःसरणं चाक्ष्णोर्व्यावृत्तिर्हनुसंहतिः ।
रक्तच्छर्दिः ष्ठीवनञ्च कण्ठपीडा च जायते ॥ २४ ॥

*हनुसंहतिः=हन्वोरमिलनम् ॥२२-२४॥

वमनस्यातियोगे तु मृदु कुर्याद्विरेचनम् ।
वमनेन प्रविष्टायां जिह्वायां कवलग्रहाः ।
स्निग्धाम्ललवणैर्युक्तैर्घृतक्षीररसैर्हिताः ॥ २५ ॥

* रसैः=मांसरसैः ॥ २५ ॥

फलान्यम्लानि खादेयुस्तस्य चान्येऽग्रतो नराः ।
निःसृतान्तु तिलद्राक्षाकल्कलिप्तां प्रवेशयेत् ॥ २६ ॥

*निःसृतां जिह्वाम् ॥ २६ ॥

व्यावृत्तेऽक्षिणि घृताभ्यक्ते पीडनञ्च शनैः शनैः ।
हनुमोक्षे स्मृतः स्वेदो नस्यञ्च श्लेष्मवातहृत् ॥ २७ ॥
रक्तपित्तविधानेन रक्तष्ठीवमुपाचरेत् ।
धात्रीरसाञ्जनोशीरलाजाचन्दनवारिभिः ॥ २८ ॥
मन्थं कृत्वा पाययेच्च सघृतं क्षौद्रशर्करम् ।
शाम्यन्त्यनेन तृष्णाऽऽद्या रोगाश्छर्दिसमुद्भवाः ॥ २९ ॥
हृत्कण्ठशिरसां शुद्धिर्दीप्ताग्नित्वञ्च लाघवम् ।
कफपित्तविनाशश्च सम्यग्वान्तस्य लक्षणम् ॥ ३० ॥
ततोऽपराह्णे दीप्ताग्निं मुद्गषष्टिकशालिभिः ।
हृद्यैश्च जाङ्गलरसैः कृत्वा यूषञ्च भोजयेत् ॥ ३१ ॥
तन्द्रानिद्राऽऽस्यदौर्गन्ध्यं कण्डूश्च ग्रहणी विषम् ।
सुवान्तस्य न पीडायै भवन्त्येते कदा चन ॥ ३२ ॥
अजीर्णं शीतपानीयं व्यायामं मैथुनं तथा ।
स्नेहाभ्यङ्गञ्च रोषञ्च दिनमेकं सुधीस्त्यजेत् ॥ ३३ ॥

इति वमनाधिकारः ।

अथ विरेचनम् ।

तत्रादौ विरेचनार्हसमयजनानाह—

स्निग्धस्विन्नाय वान्ताय दद्यात्सम्यग्विरेचनम् ।
अवान्तस्य त्वधःस्रस्तो ग्रहणीं छादयेत्कफः ॥ ३४ ॥
मन्दाग्निं गौरवं कुर्याज्जनयेद्वा प्रवाहिकाम् ।
अथ वा पाचनैरामं बलासं परिपाचयेत् ॥ ३५ ॥
ऋतौ वसन्ते शरदि देहशुद्धौ विरेचयेत् ।
अन्यदाऽऽत्ययिके कार्ये शोधनं शीलयेद् बुधः ॥ ३६ ॥

*आत्ययिके=प्राणसंकटे ॥ ३४—३६ ॥

पित्ते विरेचनं युञ्ज्यादामोद्भूते गदे तथा ।
उदरे च तथाऽऽध्माने कोष्ठशुद्धौ विशेषतः ॥ ३७ ॥
दोषाः कदा चित्कुप्यन्ति जिता लङ्घनपाचनैः ।
शोधनैः शोधिता ये तु न तेषां पुनरुद्भवः ॥ ३८ ॥

बालो वृद्धो भृशं स्निग्धः क्षतक्षीणो भयान्वितः ।
श्रान्तस्तृषाऽऽर्त्तः स्थूलश्च गर्भिणी च नवज्वरी ॥ ३९ ॥
नवप्रसूता नारी च मन्दाग्निश्च मदात्ययी ।
शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता ॥ ४० ॥
जीर्णज्वरी गरव्याप्तो वातरोगी भगन्दरी ।
अर्शःपाण्डूदरग्रन्थिहृद्रोगारुचिपीडिताः ॥ ४१ ॥
योनिरोगप्रमेहार्त्ता गुल्मप्लीहव्रणार्दिताः ।
विद्रधिच्छर्दिविस्फोटविषूचाकुष्ठसंयुताः ॥ ४२ ॥
कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः ।
प्लीहशोथाक्षिरोगार्त्ताः कृमिक्षारानिलार्दिताः ॥ ४३ ॥
शूलिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः ॥ ४४ ॥

अथ मृदुमध्यमक्रूरकोष्ठौ स्तद्योग्यमात्राद्रव्यादीनि चाह--

बहुपित्तो मृदुः कोष्ठो बहुश्लेष्मा च मध्यमः ।
बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते ॥ ४५ ॥
मृद्वी मात्रा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा ।
क्रूरे तीक्ष्णा मता द्रव्यैर्मृदुमध्यमतीक्ष्णकैः ॥ ४६ ॥
मृदुर्द्राक्षापयश्चञ्चुतैलैरपि विरिच्यते ।
मध्यमस्त्रिवृतातिक्ताराजवृक्षैर्विरिच्यते ।
क्रूरः स्नुकपयसा हेमक्षीरीदन्तीफलादिभिः ॥ ४७ ॥

* चञ्चुतैलम्=एरण्डतैलम् । राजवृक्षः=धनवहेरा । हेमक्षीरी (चोक) । दन्तीफलम्=बृहद्दन्तीफलम्-जयपालेति प्रसिद्धम् ॥४५-४७॥

मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफान्तिका ।
वेगैर्विंशतिभिर्मध्या हीनोक्ता दशवेगिका ॥ ४८ ॥
द्विपलं श्रेष्ठमाख्यातं मध्यमं च पलं भवेत् ।
पलार्द्धं च कषायाणां कनीयस्तु विरेचनम् ॥ ४९ ॥
कल्कमोदकचूर्णानां कर्षो मध्वाज्यलेहतः ।
कर्षद्वयं पलं वाऽपि वयोरोगाद्यपेक्षया ॥ ५० ॥
पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्राथादिभिः पिबेत् ।

त्रिफलाक्वाथगोमूत्रैः पिबेद्योषं कफार्दितः ॥ ५१ ॥
त्रिवृत्सैन्धवशुण्ठीनां चूर्णमम्लैः पिबेन्नरः ।
वातार्दितो विरेकाय जाङ्गलानां रसेन वा ॥ ५२ ॥
एरण्डतैलं त्रिफलाक्वाथेन द्विगुणेन वा ।
युक्तं पीतं पयोभिर्वा न चिरेण विरिच्यते ॥ ५३ ॥
*शीघ्रमेव विरिच्यत इत्यर्थः ॥ ५३ ॥

अथर्तुभेदेन विरेकद्रव्यभेदानाह--

त्रिवृता कौटजं बीजं पिप्पली विश्वभेषजम् ।
समृद्वीकारसं क्षौद्रं वर्षाकाले विरेचनम् ॥ ५४ ॥
त्रिवृद्दुरालभामुस्तशर्करोदीच्यचन्दनम् ।
द्राक्षाऽम्बुना सयष्ट्याह्वशीतलञ्च घनात्यये ॥ ५५ ॥
*उदीच्यं = वाला । घनात्यये = शरदि ॥ ५४—५५ ॥
त्रिवृता चित्रकं पाठामजाजीं सरलं वचाम् ।
हेमक्षीरीं हेमन्ते तु चूर्णमुष्णाम्बुना पिबेत् ॥ ५६ ॥
पिप्पलीं नागरं सिन्धुं श्यामां त्रिवृतया सह ।
लिह्यात्क्षौद्रेण शिशिरे वसन्ते च विरेचनम् ॥ ५७ ॥
त्रिवृता शर्करातुल्या ग्रीष्मकाले विरेचनम् ॥ ५८ ॥
*श्यामा (सारिवा) ॥ ५६—५८ ॥

अभया मरिचं शुण्ठी विडङ्गामलकानि च ।
पिप्पली पिप्पलीमूलं त्वक्पत्रं मुस्तमेव च ॥ ५९ ॥
एतानि समभागानि दन्ती तु त्रिगुणा भवेत् ।
त्रिवृताऽष्टगुणा ज्ञेया षड्गुणा चात्र शर्करा ॥ ६० ॥
मधुना मोदकान्कृत्वा कर्षमात्रान्प्रमाणतः ।
एकैकं भक्षयेत्प्रातः शीतञ्चानु पिबेज्जलम् ॥ ६१ ॥
तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवते ।
पानाहारविहारेषु भवेन्निर्यन्त्रणः सदा ॥ ६२ ॥
विषमज्वरमन्दाग्निपाण्डुकासभगन्दरान् ।
दुर्नामकुष्ठगुल्मार्शोगलगण्डोदरभ्रमान् ॥ ६३ ॥

विदाहप्लीहमेहाँश्च यक्ष्माणं नयनामयान्।
वातरोगांस्तथाऽऽध्मानं मूत्रकृच्छ्रादि चाश्मरीम् ॥ ६४ ॥
पृष्ठपार्श्वोरुजघनजङ्घोदररुजं जयेत्।
स्नेहाभ्यङ्गश्च रोषश्च दिनमेकं सुधीस्त्यजेत् ॥ ६५ ॥
सततं शीलनादेव पलितानि प्रणाशयेत्॥
अभयामोदका ह्येते रसायनवराः स्मृताः ॥ ६६ ॥

इत्यभयाऽऽदिमोदकः।

अथ विरेकोत्तरकर्माण्याह—

पीत्वा विरेचनं शीतजलैः संसिच्य चक्षुषी।
सुगन्धि किञ्चिदाघ्राय ताम्बूलं शीलयेद् बुधः ॥ ६७ ॥
निर्वातस्थो न वेगांश्च धारयेन्न शयीत च।
शीताम्बु न स्पृशेत्क्वापि कोष्णनीरं पिबेन्मुहुः ॥ ६८ ॥
बलासौषधपित्तानि वायुर्वान्ते यथा व्रजेत्।
रेकात्तथा मलं पित्तं भेषजञ्च कफो व्रजेत् ॥ ६९ ॥

अथ दुर्विरिक्तातिविरिक्तयोर्लक्षणानि भेषजं चाह—

दुर्विरिक्तस्य नाभेस्तु स्तब्धता कुक्षिशूलरुक्।
पुरीषवातसङ्गश्च कण्डूमण्डलगौरवम् ॥ ७० ॥
विदाहोऽरुचिराध्मानं भ्रमश्छर्दिश्च जायते।
तं पुनः पाचनैः स्नेहैः पक्त्वा स्निग्धं तु रेचयेत्।
तेनास्योपद्रवा यान्ति दीप्ताग्निर्लघुता भवेत् ॥ ७१ ॥
विरेकस्यातियोगेन मूर्च्छा भ्रंशो गुदस्य च।
शूलं कफातियोगः स्यान्मांसधावनसन्निभम् ॥ ७२ ॥
मेदोनिभं जलाभासं रक्तञ्चापि विरिच्यते।
तस्य शीताम्बुभिः सिक्त्वा शरीरं तण्डुलाम्बुभिः ॥ ७३ ॥
मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृदु।
सहकारत्वचः कल्को दध्ना सौवीरकेण वा ॥ ७४ ॥
पिष्ट्वा नाभिप्रलेपेन हन्त्यतीसारमुल्बणम्।
सौवीरं तु यवैरामैः पक्वैर्वा निस्तुषीकृतैः ॥ ७५ ॥

*सौवीरं=सन्धानम् ॥ ७५ ॥

अजाक्षीरं रसश्चापि वैष्किरं हारिणं तथा ।
शालिभिः षष्टिकैस्तुल्यैर्मसूरैर्वाऽपि भोजयेत् ॥ ७६ ॥

*वर्त्तकालावविकिरकपिञ्जलकतित्तिराः ।
चकोरक्रकराद्याश्च विष्किराः समुदाहृताः ।
कपिञ्जल इति ख्यातो लोके कपिशतित्तिरः ॥
क्रकरः "करार" इति लोके । हरिणस्ताम्रवर्णः स्याद् मृगः ॥७६॥

शीतैः संग्राहिभिर्द्रव्यैः कुर्यात्संग्रहणं भिषक् ।
लाघवे मनसस्तुष्टावनुलोमं गतेऽनिले ॥ ७७ ॥
सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेन्निशि ।
इन्द्रियाणां बलं बुद्धेः प्रसादो वह्निदीप्तता ॥ ७८ ॥
धातुस्थैर्यं वयःस्थैर्यं भवेद्रेचनसेवनात् ।
प्रवातसेवां शीताम्बु स्नेहाभ्यङ्गमजीर्णताम् ॥ ७९ ॥
व्यायामं मैथुनञ्चैव न सेवेत विरेचितः ।
शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत्कृताम् ॥ ८० ॥
जङ्गालविष्किराणां वा रसैः शाल्योदनं हितम् ॥ ८१ ॥

*हरिणैणकुरङ्गर्ष्यवातायुमृगमात्रकाः ।
राजीवः पृषतश्चैव जङ्गालाः शरभादयः ॥ ८१ ॥

अथानुवासनम् ।

तत्रादावनुवासननिरूहयोर्भेदमाह—

वस्तिर्द्विधाऽनुवासाख्यो निरूहश्च ततः परम् ।
यः स्नेहो दीयते स स्यादनुवासननामकः ॥ ८२ ॥
कषायक्षीरतैलैर्यो निरूहः स निगद्यते ।
वस्तिभिर्दीयते यस्मात्तस्माद्वस्तिरिति स्मृतः ॥ ८३ ॥

*वस्तिभिः=मृगादीनां मूत्राशयैः ॥ ८२–८३ ॥

अथ स्नेहवस्तिविधिमाह—

तत्रानुवासनाख्यो हि वस्तिर्यः सोऽत्र कथ्यते ।
अनुवासनभेदश्च मात्रावस्तिरुदीरितः ॥ ८४ ॥

पलद्वयं तस्य मात्रा तस्मादर्द्धोऽपि वा भवेत्।
अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिलो ॥ ८५ ॥
नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी।
नास्थाप्या नानुवास्याश्च जीर्णोन्मादतृडर्दिताः॥
शोथमूर्च्छाऽरुचिभयश्वासकासक्षयातुराः ॥ ८६ ॥
नेत्रं कार्यं सुवर्णादिधातुभिर्वृक्षवेणुभिः।
नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते ॥ ८७ ॥

*नेत्रं=नाडी। तथा चोक्तं विश्वप्रकाशे—
"नेत्रं मन्थगुणे वस्त्रे तरुमूले विलोचने।
नेत्रवन्धे च नाड्याश्च नेत्रो नेतरि भेद्यवदि"ति ॥ ८७ ॥

एकवर्षात्तु षड्वर्षाद्यावन्मानं षडङ्गुलम्।
ततो द्वादशकं यावन्मानं स्यादष्टसम्मितम् ॥ ८८ ॥
ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता।
मुद्गच्छिद्रं कलायाभं छिद्रं कोलास्थिसन्निभम् ॥ ८९ ॥
यथासङ्ख्यं भवेन्नेत्रं श्लक्ष्णं गोपुच्छसन्निभम्।
गोपुच्छसन्निभं मूले स्थूलं तस्मात् क्रमात् कृशम् ॥ ९० ॥

*मुद्गच्छिद्रादिप्रमाणं नेत्रं क्रमेण षड्वर्षाय द्वादशवर्षाय तदूर्द्ध्ववर्षाय ज्ञेयम् ॥ ८८-९० ॥

आतुराङ्गुष्ठमानेन मूले स्थूलं विधीयते।
कनिष्ठिकापरीणाहमग्रे च गुटिकामुखम् ॥ ९१ ॥

*परीणाहोऽत्र स्थौल्यम् ॥ ९१ ॥

तन्मूले कर्णिके द्वे च कार्ये भागाच्चतुर्थकात् ॥ ९२ ॥

*कर्णिका=गवादिकर्णवत् ॥ ९२ ॥

योजयेत्तत्र वस्तिञ्च बन्धद्वयविधानतः।
मृगाजशूकरगवां महिषस्यापि वा भवेत् ॥ ९३ ॥

*वस्तिरिति शेषः ॥ ९३ ॥

मूत्रकोषस्य वस्तिस्तु तदलाभे तु चर्मणः।
कषायरक्तः स मृदुर्वस्तिः स्निग्धो दृढो हितः ॥ ९४ ॥

व्रणवस्तेस्तु नेत्रं स्याच्छ्लक्ष्णमष्टाङ्गुलोन्मितम् ।
मुद्गच्छिद्रं गृध्रपक्षनलिकापरिणाहि च ॥ ९५ ॥
शरीरोपचयं वर्णं बलमारोग्यमायुषः ।
कुरुते परिवृद्धिञ्च वस्तिः सम्यगुपासितः ॥ ९६ ॥
दिवा शीते वसन्ते च स्नेहवस्तिः प्रदीयते ।
ग्रीष्मवर्षाशरत्काले रात्रौ स्यादनुवासनम् ॥ ९७ ॥
न चातिस्निग्धमशनं भोजयित्वाऽनुवासयेत् ।
मदं मूर्च्छां च जनयेद् द्विधा स्नेहः प्रयोजितः ॥ ९८ ॥
*द्विधा=भोजने वस्तौ च ॥ ९८ ॥
रूक्षं भुक्तवतोऽत्यन्तं बलं वर्णञ्च ह्रापयेत् ।
युक्तस्नेहमतो जन्तुं भोजयित्वाऽनुवासयेत् ॥ ९९ ॥
*युक्तस्नेहं=यथोचितस्नेहं भोज्यं भोजयित्वेत्यर्थः ॥ ९९ ॥
हीनमात्रावुभौ वस्ती नातिकार्यकरौ स्मृतौ ।
अतिमात्रौ तथाऽऽनाहक्लमातीसारकारकौ ॥ १०० ॥
*उभौ वस्ती=अनुवासननिरूहाख्यौ ॥ १०० ॥
उत्तमा स्यात्पलैः षड्भिर्मध्यमा स्यात्पलैस्त्रिभिः ।
पलाध्यर्द्धेन हीना स्यादुक्ता मात्राऽनुवासने ॥ १०१ ॥
शताह्वासैन्धवाभ्याञ्च देयं स्नेहे च चूर्णकम् ।
तन्मात्रोत्तममध्यान्त्या षट्चतुर्द्वयमाषकैः ॥ १०२ ॥
विरेचनात्सप्तरात्रे गते जातबलाय च ।
भुक्तान्नायानुवास्याय वस्तिर्देयोऽनुवासनः ॥ १०३ ॥
तथाऽनुवास्यं स्वभ्यक्तमुष्णाम्बुस्वेदितं शनैः ।
भोजयित्वा यथाशास्त्रं कृतचङ्क्रमणं ततः ।
उत्सृष्टानिलविण्मूत्रं योजयेत्स्नेहवस्तिना ॥ १०४ ॥
*उष्णाम्बुस्वेदितम्=उष्णाम्बुना स्नपितम् ॥ १०४ ॥
सुप्तस्य वामपार्श्वेन वामजङ्घाप्रसारिणः ।
कुञ्चितापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत् ॥ १०५ ॥
बद्धं वस्तिमुखं सूत्रैर्वामहस्तेन धारयेत् ।

पीडयेद्दक्षिणेनैव मध्यवेगेन धीरधीः ॥ १०६ ॥
जृम्भाकासक्षवाद्रींश्च वस्तिकाले न कारयेत् ।
त्रिंशन्मात्रामितः कालः प्रोक्तो वस्तेस्तु पीडने ॥ १०७ ॥
ततः प्रणिहिते स्नेह-युत्तानो वाक्शतं भवेत् ।
स्वजानुनः करावर्त्तं कुर्याच्छोटिकया पुनः ॥ १०८ ॥
एषा मात्रा भवेदेका सर्वत्रैवैष निश्चयः ।
निमिषोन्मेषणं पुंसामङ्गुल्या छोटिकाऽथ वा ॥ १०९ ॥
गुर्वक्षरोच्चारणं वा स्यान्मात्रेयं स्मृता बुधैः ।
प्रसारितैः सर्वगात्रैर्यथावीर्यं प्रसर्पति ॥ ११० ॥

*यथावीर्यं स्नेहादि ॥ ११० ॥

ताडयेत्तलयोरेनं त्रींस्त्रीन्वाराञ्छनैः शनैः ।
स्फिजोश्चैव तथा श्रोणीं शय्यां चैवोत्क्षिपेत्ततः ॥ १११ ॥
स्फिजोश्चैनं स्वपाणिभ्यां पूर्ववत्ताडयेद् बुधः ॥ ११२ ॥
शय्याञ्च पादतस्तस्य त्रीन्वारानुत्क्षिपेत्ततः ।
जाते विधाने तु ततः कुर्यान्निद्रां यथासुखम् ॥ ११३ ॥
सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु ।
उपद्रवं विना शीघ्रं स सम्यगनुवासितः ॥ ११४ ॥

*उपद्रवस्थाने "ओषचोषावि"ति सुश्रुते पाठः ॥ ११४ ॥

जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः ।
लघ्वन्नं भोजयेत्कामं दीप्ताग्निस्तु नरो यदि ॥ ११५ ॥
अनुवासिताय दातव्यमितरेऽह्नि सुखोदकम् ।
धान्यशुण्ठीकषायं वा स्नेहव्यापत्तिनाशनम् ॥ ११६ ॥

*सुखोदकम्=उष्णोदकम् । व्यापत्तिः=व्याधिः ॥ ११५-११६ ॥

अनेन विधिना षड् वा सप्त चाष्टौ नवापि वा ।
विधेया वस्तयस्तेषामन्ते चैव निरूहणम् ॥ ११७ ॥
दत्तस्तु प्रथमो वस्तिः स्नेहयेद्वस्तिवङ्क्षणौ ।
सम्यग्दत्तो द्वितीयस्तु मूर्द्धस्थमनिलं जयेत् ॥ ११८ ॥
बलं वर्णञ्च जनयेत्तृतीयस्तु प्रयोजितः ।

चतुर्थपञ्चमौ दत्तौ स्नेहयेतां रसासृजी ॥ ११९ ॥
षष्ठो मांसं स्नेहयति सप्तमो मेद एव च ।
अष्टमो नवमश्चापि मज्जानञ्च यथाक्रमम् ॥ १२० ॥
*यथाक्रममिति वचनादष्टमोऽस्थि स्नेहयेत् ॥ १२० ॥
एवं शुक्रगतान्दोषान्द्विगुणः साधु साधयेत् ॥ १२१ ॥
*द्विगुणः=अष्टादशदिवसावधिको वस्तिः ॥ १२१ ॥
अष्टादशाष्टादशकाह्निनाद्यो ना निषेवते ।
स कुञ्जरबलोऽश्वस्य जवतुल्योऽमरप्रभः ॥ १२२ ॥
रूक्षाय बहुवाताय स्नेहवस्ति दिने दिने ।
दद्याद्वैद्यस्तथाऽन्येषामग्न्याबाधभयात् त्र्यहात् ।
स्नेहोऽल्पमात्रो रूक्षाणां दीर्घकालमनत्ययः ॥ १२३ ॥
*अनत्ययः=अबाधः ॥ १२२-१२३ ॥
तथा निरूहः स्निग्धानामल्पमात्रः प्रशस्यते ।
अथ वा यस्य तत्कालं स्नेहो निर्याति केवलः ।
तस्याप्यल्पतरो देयो न हि स्निग्धेऽवतिष्ठते ॥ १२४ ॥
*अवतिष्ठते दत्तः स्नेह इति शेषः ॥ १२४ ॥
अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः ।
तदाऽङ्गसदनाध्माने शूलं श्वासश्च जायते ॥ १२५ ॥
पक्वाशये गुरुत्वञ्च तत्र दद्यान्निरूहणम् ।
तीक्ष्णं तीक्ष्णौषधैर्युक्तं फलवर्त्तिमथापि वा ॥ १२६ ॥
यथाऽनुलोमनो वायुर्मलः स्नेहश्च जायते ।
तथा विरेचनं दद्यात्तीक्ष्णं नस्यञ्च शस्यते ॥ १२७ ॥
यस्य नोपद्रवं कुर्यात्स्नेहवस्तिरनिःसृतः ।
सर्वोऽल्पो व्यावृतो रौक्ष्यादुपेक्ष्यः स विजानता ॥ १२८ ॥
अनायातं त्वहोरात्रे स्नेहं संशोधनैर्हरेत् ।
स्नेहवस्तावनायाते नान्यः स्नेहो विधीयते ॥ १२९ ॥
गुडूच्येरण्डपूतीकभार्ङ्गीवृषकरौहिषम् ।
शतावरीसहचरौ काकनासां पलोन्मिताम् ॥ १३० ॥

यवमाषातसीकोलकुलत्थान्प्रसृतोन्मितान् ।
चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणशेषेण तेन च ॥ १३१ ॥
पचेत्तैलाढकं सर्वैर्जीवनीयैः पलोन्मितैः ।
अनुवासनमेतद्धि सर्ववातविकारनुत ॥ १३२ ॥

*पूतीकः=करञ्जः । रौहिषम्=ईषत्सुगन्धतृणविशेषः ; काकनासा (कौआठोडी) । प्रसृतम्=पलद्वयम् ॥ १३०—१३२ ॥

षट्सप्ततिर्व्यापदस्तु जायन्ते वस्तिकर्मणः ।
दूषितात्समुदायेन ताश्चिकित्स्यास्तु सुश्रुतात् ॥ १३३ ॥

*समुदायेन=समुचितनेत्रादिसामग्र्या ॥ १३३ ॥

पानाहारविहाराश्च परिहाराश्च कृत्स्नशः ।
स्नेहपानसमाः कार्य्या नात्र कार्या विचारणा ॥ १३४ ॥

अथ निरूहः ।

अथ निरूहवस्तिविधिमाह—

निरूहवस्तिर्बहुधा भिद्यते कारणान्तरैः ।
तैरेव तस्य नामानि कृतानि मुनिपुङ्गवैः ॥ १३५ ॥

* कारणान्तरैः=समवायिकारणभेदैः ॥ १३५ ॥

निरूहस्यापरं नाम प्रोक्तमास्थापनं बुधैः ।
स्वस्थाने स्थापनाद्दोषधातूनां स्थापनं मतम् ॥ १३६ ॥
निरूहस्य प्रमाणं तु प्रस्थं पादोत्तरं परम् ।
मध्यमं प्रस्थमुद्दिष्टं हीनश्च कुडवास्त्रयः ॥ १३७ ॥

*परं=श्रेष्ठम् ॥ १३६—१३७ ॥

अतिस्निग्धोऽक्लिष्टदोषः क्षतोरस्कः कृशस्तथा ॥ १३८ ॥

*अक्लिष्टदोषः=अदत्तोत्क्लेशन इति यावत् । क्षतोरस्कः=उरःक्षतवान् ॥ १३८ ॥

आध्मानच्छर्दिहिक्काऽर्शःकासश्वासप्रपीडितः ।
गुदशोफातिसारार्त्तो विषूचीकुष्ठसंयुतः ॥ १३९ ॥
गर्भिणी मधुमेही च नास्थाप्यश्च जलोदरी ।
वातव्याधावुदावर्त्ते वातासृग्विषमज्वरे ॥ १४० ॥

मूर्च्छातृष्णोदरानाहमूत्रकृच्छ्राश्मरीषु च ।
वृद्ध्यसृग्दरमन्दाग्निप्रमेहेषु निरूहणम् ।
शूलेऽम्लपित्ते हृद्रोगे योजयेद्विधिवद् बुधः ॥ १४१ ॥
उत्सृष्टानिलविण्मूत्रं स्निग्धं स्विन्नमभोजितम् ।
मध्याह्ने गृहमध्ये च यथायोग्यं निरूहयेत् ॥ १४२ ॥

*स्निग्धम्=स्वभ्यक्तम् । स्विन्नम्=उष्णाम्बुस्नापितम् ॥ १४२ ॥

स्नेहवस्तिविधानेन बुधः कुर्यान्निरूहणम् ॥ १४३ ॥
जाते निरूहे च ततो भवेदुत्कटकासनः ।
तिष्ठेन्मुहूर्त्तमात्रन्तु निरूहागमनेच्छया ॥ १४४ ॥

*अत्र मुहूर्त्तमात्रशब्देनैतदपि बोधितम् । निरूहप्रत्यागमनकालो-मुहूर्त्तमात्रः ॥ १४४ ॥

अनायातं मुहूर्त्तं तु निरूहं शोधनैर्हरेत् ।
निरूहैरेव मतिमान्क्षारमूत्राम्लसैन्धवैः ॥ १४५ ॥
यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः ।
लाघवं चोपजायेत सुनिरूढं तमादिशेत् ॥ १४६ ॥
यस्य स्याद्वस्तिरत्यालपवेगो हीनमलानिलः ।
मूर्च्छाऽर्त्तिजाड्यारुचिमान्दुर्निरूढं तमादिशेत् ॥ १४७ ॥
विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः ।
आस्थापने स्नेहवस्त्योः सम्यग्दाने तु लक्षणम् ॥ १४८ ॥

*विविक्तता=दत्तौषधनिःसरणम् ॥ १४८ ॥

अनेन विधिना युञ्ज्यान्निरूहं वस्तिदानवित् ।
द्वितीयं वा तृतीयं वा चतुर्थं वा यथोचितम् ॥ १४९ ॥
सस्नेह एकः पवने पित्ते द्वौ पयसा सह ।
कषायकटुमूत्राद्याः कफयुष्णास्त्रयो हिताः ॥ १५० ॥
पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात् ।
निरूढं भोजयित्वा च ततस्तमनुवासयेत् ॥ १५१ ॥
सुकुमारस्य वृद्धस्य बालस्य च मृदुर्हितः ।
वस्तिस्तीक्ष्णः प्रयुक्तस्तु तेषां हन्याद्बलायुषी ॥ १५२ ॥

दद्यादुत्क्लेशनं पूर्वं मध्ये दोषहरं ततः ।
पश्चात्संशमनीयञ्च दद्याद्वस्तिं विचक्षणः ॥ १५३ ॥

अथोत्क्लेशनवस्तिमाह—

एरण्डबीजं मधुकं पिप्पली सैन्धवं वचा ।
हवुषाफलकल्कश्च वस्तिरुत्क्लेशनः स्मृतः ॥ १५४ ॥

अथ दोषहरवस्तिमाह—

शताह्वा मधुकं बिल्वं कौटजं फलमेव च ।
सकाञ्जिकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः ॥ १५५ ॥

अथ शमनवस्तिमाह—

प्रियङ्गुर्मधुकं मुस्ता तथैव च रसाञ्जनम् ।
सक्षीरः शस्यते वस्तिर्दोषाणां शमनः स्मृतः ॥ १५६ ॥

अथ लखनवस्तिमाह—

त्रिफलाक्काथगोमूत्रक्षौद्रक्षारसमायुताः ।
ऊषकादिप्रतीवापैर्वस्तयो लेखनाः स्मृताः ॥ १५७ ॥

*ऊषकादिप्रतीवापाः = ऊषकादिगणविशेषचूर्णप्रक्षेपाः ॥ १५७ ॥

अथ बृंहणवस्तिमाह—

बृंहणद्रव्यनिक्काथैः कल्कैर्मधुरकैर्युताः ।
सर्पिर्मांसरसोपेता वस्तयो बृंहणाः स्मृताः ॥ १५८ ॥

अथ पिच्छिलवस्तिमाह—

बदर्यैरावतीशेलुशाल्मलीपुष्पजाङ्कुराः ।
क्षीरसिद्धाः क्षौद्रयुक्ता नाम्ना पिच्छिलसंज्ञिताः ।
अजोरभ्रैणरुधिरैर्युक्ता देया विचक्षणैः ॥ १५९ ॥

*अजः = छागः, उरभ्रः = मेषः, एणः = कृष्णमृगः ॥ १५९ ॥

मात्रा पिच्छिलवस्तीनां पलैर्द्वादशभिर्मता ॥ १६० ॥

अथ निरूहमात्राविधिमाह—

दत्त्वाऽऽदौ सैन्धवस्याक्षं मधुनः प्रसृतिद्वयम् ।
विनिर्मथ्य ततो दद्यात्स्नेहस्य प्रसृतित्रयम् ॥ १६१ ॥
एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत् ।
सम्मूर्च्छिते कषायन्तु चतुःप्रसृतिसम्मितम् ॥ १६२ ॥

गृह्णीयाच्च तदा वाऽल्पमन्ते द्विप्रसृतोन्मितम् ।
क्षिप्त्वा विमथ्य दद्याच्च निरूहं कुशलो भिषक् ॥ १६३ ॥
एवं प्रकल्पितो वस्तिर्द्वादशप्रसृतिर्भवेत् ।
वाते चतुष्पलं क्षौद्रं दद्यात् स्नेहस्य षट्पलम् ॥ १६४ ॥
पित्ते चतुष्पलं क्षौद्रं स्नेहं दद्यात्पलत्रयम् ।
कफे तु षट्पलं क्षौद्रं क्षिपेत्स्नेहं चतुष्पलम् ॥ १६५ ॥

अथ मधुतैलकवस्तिमाह—

एरण्डक्वाथतुल्यांशं मधुतैलं पलाष्टकम् ।
शतपुष्पापलार्द्धेन सैन्धवार्द्धेन संयुतम् ॥
मधुतैलकसंज्ञोऽयं वस्तिर्दारुविलोडितः ॥ १६६ ॥
मेदोगुल्मकृमिप्लीहमलोदावर्त्तनाशनः ।
बलवर्णकरश्चैव वृष्यो दीपनबृंहणः ॥ १६७ ॥

अथ यापनवस्तिमाह—

क्षौद्राज्यक्षीरतैलानां प्रसृतं प्रसृतं भवेत् ।
हवुषासैन्धवार्द्धांशो वस्तिः स्याद्यापनः परः ॥ १६८ ॥
*यापनः=सारकः ॥ १६८ ॥

इति यापनवस्तिः ॥

अथ युक्तरथवस्तिमाह—

एरण्डमूलनिक्वाथो मधुतैलं ससैन्धवम् ।
एष युक्तरथो वस्तिः सवचापिप्पलीफलः ॥ १६९ ॥

अथ सिद्धवस्तिमाह—

पञ्चमूलस्य निक्वाथैस्तैलं मागधिका मधु ।
ससैन्धवः सयष्ट्याह्वः सिद्धवस्तिरिति स्मृतः ॥ १७० ॥
स्नानमुष्णोदकैः कुर्याद्दिवास्वप्नमजीर्णताम् ।
वर्जयेदपरं सर्वमाचरेत्स्नेहवस्तिवत् ॥ १७१ ॥

अथोत्तरवस्तिविधिमाह—

अतः परं प्रवक्ष्यामि वस्तिमुत्तरसंज्ञितम् ।
निरूहादुत्तरो यस्मात्तस्मादुत्तरसंज्ञकः ॥ १७२ ॥

द्वादशाङ्गुलकं नेत्रं मध्ये च कृतकर्णिकम्।
मालतीपुष्पवृन्ताभं छिद्रं सर्षपनिर्गमम् ॥ १७३ ॥
पञ्चविंशतिवर्षाणामधो मात्रा द्विकार्षिकी।
तदूर्ध्वं पलमात्रा च स्नेहस्योक्ता भिषग्वरैः ॥ १७४ ॥
अथास्थापनशुद्धस्य तृप्तस्य स्नानभोजनैः।
स्थितस्य जानुमात्रे च पिष्टे स्निग्धे शलाकया ॥ १७५ ॥
स्निग्धया मेढ्रमार्गे तु ततो नेत्रं नियोजयेत्।
शनैःशनैर्घृताभ्यक्तं मेढ्ररन्ध्राङ्गुलानि षट् ॥ १७६ ॥
ततोऽवपीडयेद्बस्तिं शनैर्नेत्रं विनिर्हरेत्।
ततः प्रत्यागते स्नेहे स्नेहवस्तिक्रमो हितः ॥ १७७ ॥
स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्याद्दशाङ्गुलम्।
मुद्गप्रवेशयोग्यञ्च योन्यन्तश्चतुरङ्गुलम् ॥ १७८ ॥
द्व्यङ्गुलं मूत्रमार्गे च सूक्ष्मं नेत्रं वियोजयेत्।
मूत्रकृच्छ्रविकारेषु बालानां त्वेकमङ्गुलम् ॥ १७९ ॥
शनैर्निष्कम्पमाधेयं सूक्ष्मं नेत्रं विचक्षणैः।
मालतीपुष्पवृन्ताभं नेत्रमित्युदितं पुनः ॥ १८० ॥

* सूक्ष्मशब्दाभिधानं-बालानां ततोऽपि नेत्रस्य सूक्ष्मताबोधनार्थम् ॥ १८० ॥

योनिमार्गेषु नारीणां स्नेहमात्रा द्विपालिकी।
मूत्रमार्गे पलोन्माना बालानां च द्विकार्षिकी ॥ १८१ ॥
उत्तानायै स्त्रियै दद्यादूर्ध्वजान्वै विचक्षणः।
अप्रत्यागच्छति भिषग् वस्तावुत्तरसंज्ञिते ॥ १८२ ॥
भूयो वस्तिं विदध्याच्च संयुक्तं शोधनैर्गुणैः।
फलवर्त्तिं विदध्याद्वा योनिमार्गे दृढां भिषक् ॥ १८३ ॥
सूत्रैर्विनिर्मितां स्निग्धां शोधनद्रव्यसंयुताम् ॥ १८४ ॥
दह्यमाने तथा वस्तौ दद्याद्बस्तिं विशारदः।
क्षीरवृक्षकषायेण पयसा शीतलेन वा ॥ १८५ ॥

*दह्यमाने वस्तौ = यस्मिन् स्थाने वस्तिर्दत्तस्तस्मिन् दह्यमाने ॥ १८५ ॥

वस्तिः शुक्ररुजः पुंसां स्त्रीणामार्त्तवजा रुजः ।
हन्यादुत्तरवस्तिस्तु नोचितो मेहिने क चित् ॥ १८६ ॥
सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च ।
वस्तेरुत्तरसंज्ञस्य समानाः स्नेहवस्तिना ॥ १८७ ॥

अथ फलवर्त्तिविधिमाह—

घृताभ्यक्ते गुदे क्षिप्ता श्लक्ष्णा स्वाङ्गुष्ठसन्निभा ।
मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता ॥ १८८ ॥

अथ नावनम्

अथ नस्यग्रहणविधिमाह—

नस्यं तत्कथ्यते धीरैर्नासाग्राह्यं यदौषधम् ।
नावनं नस्यकर्मेति तस्य नामद्वयं मतम् ॥ १८९ ॥

*नस्यकर्म=नासिकायां कर्म चिकित्सा येन तद् नस्यकर्म ॥१८९॥

नस्यभेदो द्विधा प्रोक्तो रेचनं स्नेहनं तथा ।
रेचनं कर्षणं प्रोक्तं स्नेहनं बृंहणं मतम् ॥ १९० ॥
कफपित्तानिलध्वंसि पूर्वमध्यापराह्णके ।
दिनस्य गृह्यते नस्यं रात्रावप्युत्कटे गदे ॥ १९१ ॥

*दिनस्य त्रिधा विभक्तस्य पूर्वभागादौ ॥ १९१ ॥

नस्यं त्यजेद्भोजनान्ते दुर्दिने चापतर्पितः ।
तथा नवप्रतिश्यायी गर्भिणी गरदूषितः ।
अजीर्णी दत्तवस्तिश्च पीतस्नेहोदकासवः ॥ १९२ ॥
क्रुद्धः शोकाभिभूतश्च तृषाऽऽर्त्तो वृद्धबालकौ ।
वेगावरोधी श्रान्तश्च स्नातुकामश्च बर्जयेत् ॥ १९३ ॥

*नस्यमिति शेषः ॥ १९३ ॥

अष्टवर्षस्य बालस्य नस्यकर्म समाचरेत् ।
अशीतिवर्षादूर्ध्वञ्च नावनं नैव दीयते ॥ १९४ ॥

अथ रेचननस्यमात्रामाह—

अथ वैरेचनं नस्यं ग्राह्यं तैलैः सुतीक्ष्णकैः ।
तीक्ष्णं भेषजसिद्धैर्वा स्नेहैः क्वाथै रसैस्तथा ॥ १९५ ॥

अथ रेचननस्यविधिमाह—

नासिकारन्ध्रयोरष्टौ षट् चत्वारश्च बिन्दवः ॥
प्रत्येकं रेचनं योग्यं मुख्यमध्याल्पमात्रया ॥ १९६ ॥

अथ नस्यौषधप्रमाणमाह—

नस्यकर्मणि दातव्यं शाणैकं तीक्ष्णमौषधम् ।
हिङ्गु स्याद्यवमात्रन्तु माषैकं सैन्धवं मतम् ॥ १९७ ॥
क्षीरं चैवाष्टशाणं स्यात्पानीयश्च त्रिकार्षिकम् ॥
कार्षिकं मधुरद्रव्यं नस्यकर्मणि योजयेत् ॥ १९८ ॥

अथ रेचननस्यस्य भेदद्वयमाह—

अवपीडः प्रधमनं द्वौ भेदावपरौ स्मृतौ ।
शिरोविरेचनस्याथ तौ तु देयौ यथायथम् ॥ १९९ ॥

अथ रेचननस्यभेदद्वयस्य लक्षणमाह—

कल्कीकृतादौषधाद्यः पीडितो निःसृतो रसः ।
सोऽवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः ॥ २०० ॥
षडङ्गुला द्विवक्त्रा या नाडी चूर्णं तया धमेत् ।
तीक्ष्णं कोलमितं वक्त्रवातैः प्रधमनं हितम् ॥ २०१ ॥

अथ रेचनस्नेहननस्योपयोगमाह—

ऊर्ध्वजत्रुगते रोगे कफजे स्वरसंक्षये ।
अरोचके प्रतिश्याये शिरःशूले च पीनसे ॥ २०२ ॥
शोफापस्मारकुष्ठेषु नस्यं वैरेचनं हितम् ।
भीरुस्त्रीकृशबालानां नस्यं स्नेहेन शस्यते ॥ २०३ ॥
गलरोगे सन्निपाते निद्रायां विषमज्वरे ।
मनोविकारे कृमिषु पूज्यते चावपीडनम् ॥ २०४ ॥
अत्यन्तोत्कटदोषेषु विसंज्ञेषु च दीयते ।
चूर्णं प्रधमनं धीरैस्तद्धि तीक्ष्णतरं यतः ॥ २०५ ॥

अथ वैरेचननस्यौषधिगुणानाह—

नस्यं स्याद् गुडशुण्ठीभ्यां पिप्पलीसैन्धवेन वा ।
जलपिष्टेन कर्णाक्षिनासामूर्द्धभवा गदाः ॥ २०६ ॥
मन्याहनुगलोद्भूता नश्यन्ति भुजपृष्ठजाः ।

मधूकसारकृष्णाभ्यां वचामरिचसैन्धवैः ॥ २०७ ॥
नस्यं कोष्णाम्भसा पिष्टं दद्यात्संज्ञाप्रबोधनम् ।
अपस्मारे तथोन्मादे सन्निपातेऽपतन्त्रके ॥ २०८ ॥

अथ रेचननस्यस्यापरविधिमाह—

सैन्धवं श्वेतमरिचं सर्षपाः कुष्ठमेव च ।
वस्तमूत्रेण संपिष्टं नस्यं तन्द्रानिवारणम् ॥ २०९ ॥

*श्वेतमरिचम् (सहिजने का बीज) ॥ २०९ ॥

अथ प्रधमननस्यस्यौषधिमाह—

रोहितस्य च पित्तेन भावितं मरिचं वचा ।
कट्फलं चेति तच्चूर्णं देयं प्रधमनं बुधैः ॥ २१० ॥

अथ बृंहणस्नेहननस्यस्य कल्पनामाह—

अथ बृंहणनस्यस्य कल्पना कथ्यतेऽधुना ।
मर्शश्च प्रतिमर्शश्च द्वौ भेदौ स्नेहने मतौ ॥ २११ ॥
मर्शस्य तर्पणी मात्रा मुख्या शाणैः स्मृताऽष्टभिः ।
मध्यमा तु चतुःशाणैर्हीना शाणमिता मता ॥ २१२ ॥
एकैकस्मिंस्तु मात्रेयं देया नासापुटे बुधैः ॥ २१३ ॥
मर्शस्य द्वित्रिवेलं वा वीक्ष्य दोषबलाबलम् ।
एकान्तरं द्व्यन्तरं वा नस्यं दद्याद्विचक्षणः ॥ २१४ ॥

*एकान्तरम् = एकं दिनमन्तरं नस्यशून्यं यत्र तदेकान्तरम् ॥२१४॥

त्र्यहं पञ्चाहमथ वा सप्ताहं वा सुयन्त्रितः ॥ २१५ ॥

*अथ वा त्र्यहम् = त्रीण्यहानि यावत, प्रतिदिनम् । एवं पञ्चाहं सप्ताहं च । सुयन्त्रितः = सावधानः । यथा उच्छिक्कं न भवति ॥२१५॥

मर्शे शिरोविरेके च व्यापदो विविधाः स्मृताः ।
दोषोत्क्लेशात्क्षयाच्चैव विज्ञेयास्ता यथाक्रमम् ।
दोषोत्क्लेशनिमित्तासु युञ्ज्याद्वमनशोधनम् ॥ २१६ ॥

*वमनशोधनम् = वमनरूपं शोधनम् ॥ २१६ ॥

अथ क्षयनिमित्तासु यथास्वं बृंहणं हितम् ।
शिरोनासाऽक्षिरोगेषु सूर्यावर्त्तार्द्धभेदके ॥ २१७ ॥

दन्तरोगे बले हीने मन्याबाहुंशजे गदे ।
मुखशोषे कर्णनादे वातपित्तगदे तथा ॥ २१८ ॥
अकालपलिते चैव केशश्मश्रुप्रपातने ।
पूज्यते बृंहणं नस्यं स्नेहैर्वा मधुरद्रवैः ॥ २१९ ॥

अथ बृंहणनस्यस्य विधिमाह—

सशर्करं पयःपिष्टं भृष्टमाज्येन कुङ्कुमम् ।
नस्यप्रयोगतो हन्याद्वातरक्तभवा रुजः ॥ २२० ॥
भ्रूशङ्खाक्षिशिरःकर्णसूर्यावर्त्तार्द्धभेदकान् ।
नस्यं स्यादणुतैलेन तथा नारायणेन वा ॥
माषादिना वा सर्पिर्भिस्तत्तद्भेषजसाधितैः ॥ २२१ ॥

*अणुतैलमुक्तं सुश्रुतेन । तद्यथा—

"तिलपरिपीडनोपकरणकाष्ठान्याहृत्य यैरनल्पकालं तिलाः परिपीडितास्तान्यणूनि खण्डशः कल्पयित्वा उलूखले संकुट्य कटाहे पानीयेनाप्लाव्य क्वाथयेत् ततस्तैलं निःसरति तत्तैलं शीतलं हस्तेन जलान्निःसार्य वातघ्नौषधकल्केन पचेत् । तदणुतैलमिति । तद्वातरोगहरम्" इति ॥ २२०—२२१ ॥

अथ नस्यस्यान्यं विधिमाह—

तैलं कफे स्याद्वाते च केवले पवने वसाम् ।
दद्यान्नस्यं सदा पित्ते सर्पिर्मज्जानमेव च ॥ २२२ ॥
माषात्मगुप्तारास्नाभिर्बलारुबुकरौहिषैः ।
कृतोऽश्वगन्धया क्वाथो हिङ्गुसैन्धवसंयुतः ॥ २२३ ॥
कोष्णो नस्यप्रयोगेण पक्षाघातं सकम्पनम् ।
जयेदर्दितवातञ्च मन्यास्तम्भावबाहुकौ ॥ २२४ ॥

अथ प्रतिमर्शस्य मात्राविषये आह—

प्रतिमर्शस्य मात्रा तु द्वित्रिबिन्दुमिता मता ।
प्रत्येकशो नासिकया स्नेहनेति विनिश्चितम् ॥ २२५ ॥
स्नेहे ग्रन्थिद्वयं यावन्निमग्ना चोद्धृता ततः ।
तर्जनी यं स्रवेद्बिन्दुं सा मात्रा बिन्दुसंज्ञिता ॥ २२६ ॥
एवंविधैर्बिन्दुसंज्ञैरष्टाभिः शाण उच्यते ।

स देयो मर्शनस्येषु प्रतिमर्शो द्विबिन्दुकः ॥ २२७ ॥

अथ प्रतिमर्शस्य समयमाह—

समयाः प्रतिमर्शस्य बुधैः प्रोक्ताश्चतुर्दश ।
प्रभाते दन्तकाष्ठान्ते गृहान्निर्गमने तथा ॥ २२८ ॥
व्यायामाध्वव्यवायान्ते विण्मूत्रान्तेऽञ्जने कृते ।
कवलान्ते भोजनान्ते दिवास्वप्नोत्थिते तथा ॥ २२९ ॥
वमनान्ते तथा सायं प्रतिमर्शः प्रयुज्यते ॥ २३० ॥
ईषदुच्छिङ्घनात्स्नेहो यथा वक्त्रं प्रपद्यते ।
नस्ये निषिक्तं तं विद्यात्प्रतिमर्शप्रमाणतः ॥ २३१ ॥

* प्रमाणतः=मात्रायुक्तम् ॥ २३१ ॥

उच्छिष्टं न पिबेच्चैतन्निष्ठीवेन्मुखमागतम् ॥ २३२ ॥

*उच्छिष्टम्=नस्यावशिष्टम् ॥ २३२ ॥

अथ प्रतिमर्शस्यविषयानाह—

क्षीणे तृष्णाऽऽस्यशोषार्त्ते बाले वृद्धे च पूज्यते ।
प्रतिमर्शान्न जायन्ते रोगाश्चैवोर्ध्वजत्रुजाः ॥ २३३ ॥
वलीपलितनाशश्च बलमिन्द्रियजं भवेत् ।
बिभीतं निम्बगाम्भारी शिवा शेलुश्च काकिनी ।
एकैकतैलनस्येन पलितं नश्यति ध्रुवम् ॥ २३४ ॥

अथ नस्यस्य सामान्यविधिमाह—

अथ नस्यविधिं वक्ष्ये नस्यग्रहणहेतवे ।
देशे वातरजोमुक्ते कृतदन्तनिघर्षणम् ॥ २३५ ॥
विशुद्धं धूमपानेन स्विन्नभालगलं तथा ।
उत्तानशायिनं किञ्चित्प्रलम्बशिरसं नरम् ॥ २३६ ॥
आस्तीर्णहस्तपादश्च वस्त्राच्छादितलोचनम् ॥
समुन्नामितनासाऽग्रं वैद्यो नस्येन योजयेत् ॥ २३७ ॥
कोष्णेनाच्छिन्नधारेण हेमतारादिशुक्तिभिः ।
शुक्त्या वा यन्त्रयुक्त्या वा प्लोतैर्वा नस्यमाचरेत् ॥२३८॥

*प्लोतैर्वस्त्रैस्तदुपलक्षितैस्तूलैरपि ॥ २३८ ॥

नस्येष्वासिच्यमानेषु शिरो नैव प्रकम्पयेत् ।
न कुप्येन्न प्रभाषेत नोच्छिक्केन्न हसेत्तथा ॥ २३९ ॥
एतैर्हि विहितः स्नेहो नैवान्तः सम्प्रपद्यते ।
ततः कासप्रतिश्यायशिरोऽक्षिगदसम्भवः ॥ २४० ॥
शृङ्गाटकमभिव्याप्य स्थापयेन्न गिलेद् द्रवम् ।
पञ्च सप्त दशैव स्युर्मात्राः स्नेहस्य धारणे ॥ २४१ ॥
उपविश्याथ निष्ठीवेन्नासावक्त्रागतं द्रवम् ।
वामदक्षिणपार्श्वाभ्यां निष्ठीवेत्संमुखं न हि ॥ २४२ ॥

अथ नस्यदानानन्तरमकर्त्तव्यानि कर्माण्याह—

नीते नस्ये मनस्तापं रजः क्रोधञ्च सन्त्यजेत् ।
शयीत निद्रां त्यक्त्वा च प्रोत्तानो वाक्छतं नरः ॥२४३॥
तथा शिरोविरेकान्ते धूमो वा कवलो हितः ।
नस्ये त्रीण्युपदिष्टानि लक्षणानि प्रयोगतः ॥ २४४ ॥
शुद्धहीनातियोगा हि विज्ञेयाः शास्त्रचिन्तकैः ।
लाघवं मलसंशुद्धिः स्रोतसां व्याधिसंक्षयः ॥ २४५ ॥
चित्तेन्द्रियप्रसादश्च शिरसः शुद्धिलक्षणम् ।
कण्डूः प्रदेहो गुरुता स्रोतसां कफसंस्रवः ।
मूर्ध्नि हीनाविशुद्धेस्तु लक्षणं परिकीर्त्तितम ॥ २४६ ॥

*हीनाविशुद्धेः=हीननस्येनाविशुद्धेः ॥ २४६ ॥

मस्तुलुङ्गागमो वातवृद्धिरिन्द्रियविभ्रमः ।
शून्यता शिरसश्चापि मूर्ध्नि गाढं विरेचिते ॥ २४७ ॥

*मस्तुलुङ्गम्=मस्तकान्तःस्नेहः । इन्द्रियविभ्रमः=इन्द्रियाणामयथाविषयग्रहः ॥ २४७ ॥

अथ नस्यहीनयोगातियोगचिकित्सामाह—

हीनातिशुद्धे शिरसि कफवातघ्नमाचरेत् ।
तत्र हीनेन नस्येन शुद्धे वातघ्नमाचरेत् ॥ २४८ ॥
सम्यग्विशुद्धे शिरसि सर्पिर्नस्येन दीयते ।
कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः ॥ २४९ ॥

लक्षणं तदतिस्निग्धे तत्र रूक्षं प्रदापयेत् ।
भोजयेच्चानभिष्यन्दि नस्ये वातिकमादिशेत् ॥ २५० ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे परिभाषाऽऽदिप्रकरणे पञ्चमं पञ्चकर्मविधिप्रकरणं समाप्तम् ॥ ५ ॥

अथ षष्ठं धूमपानादिविधिप्रकरणम् ॥ ६ ॥

तत्रादौ धूमपानविधिमाह—

धूमस्तु षड्विधः प्रोक्तः शमनो बृंहणस्तथा ।
रेचनः कासहा चैव वामनो व्रणधूपनः ॥ १ ॥
शमनस्य तु पर्यायौ मध्यः प्रायोगिकस्तथा ।
बृंहणस्य च पर्यायौ स्नेहनो मृदुरेव च ॥ २ ॥
रेचनस्यापि पर्यायौ शोधनस्तीक्ष्ण एव च ।
अधूमार्हाश्च खल्वेते श्रान्तो भीतश्च दुःखितः ॥ ३ ॥
दत्तवस्तिर्विरिक्तश्च रात्रौ जागरितस्तथा ।
पिपासितश्च दाहार्त्तस्तालुशोषी तथोदरी ॥ ४ ॥
शिरोऽभितापी तिमिरी छर्द्याध्मानप्रपीडितः ।
क्षतोरस्कः प्रमेहार्त्तः पाण्डुरोगी च गर्भिणी ॥ ५ ॥
रूक्षः क्षीणोऽभ्यवहृतक्षीरक्षौद्रघृतासवः ।
भुक्तान्नदधिमत्स्यश्च बालो वृद्धः कृशस्तथा ॥ ६ ॥
अकाले चातिपीतश्च धूमः कुर्यादुपद्रवान् ।
तत्रेष्टं सर्पिषः पानं नावनाञ्जनतर्पणम् ॥ ७ ॥
सर्पिरिक्षुरसं द्राक्षां पयो वा शर्कराम्बु वा ।
मधुराम्लौ रसौ वाऽपि वमनाय प्रदापयेत् ॥ ८ ॥
धूमस्तु द्वादशाद्वर्षाद् गृह्यतेऽशीतिकान्न च ।
कासश्वासप्रतिश्यायान् मन्याहनुशिरोरुजः ॥ ९ ॥
वातश्लेष्मविकारांश्च हन्याद्धूमः सुयोजितः ।
धूमोपयोगात्पुरुषः प्रसन्नेन्द्रियवाङ्मनाः ।

द्रढकेशद्विजश्मश्रुः सुगन्धिवदनो भवेत् ॥ १० ॥

अथ धूमपाननलिकामानमाह—

धूमनाडी भवेत्तत्र त्रिखण्डा च त्रिपर्विका ।
कनिष्ठिकापरीणाहा राजमाषागमान्तरा ॥ ११ ॥

*राजमाषागमा समस्ता नाडी ॥ ११ ॥

धूमनाडी भवेद्दीर्घा शमने रोगिणोऽङ्गुलैः ।
चत्वारिंशन्मितैस्तद्वद् द्वात्रिंशद्भिर्मृदौ मता ॥ १२ ॥

*मृदौ=बृंहणे ॥ १२ ॥

तीक्ष्णे चतुर्विंशतिभिः कासघ्ने षोडशोन्मितैः ॥ १३ ॥

*तीक्ष्णे=रेचने ॥ १३ ॥

दशाङ्गुलैर्वामनीये तथा स्याद् व्रणनाडिका ।
कलायमण्डलस्थूला कुलत्थागमरन्ध्रका ॥ १४ ॥

*तथा=दशाङ्गुलमिता ॥ १४ ॥

अथ धूमपानविधिमाह—

अथेषिकां प्रलिम्पेच्च सुश्लक्ष्णां द्वादशाङ्गुलाम् ।
धूमद्रव्यस्य कल्केन लेपश्चाष्टाङ्गुलः स्मृतः ॥ १५ ॥

*ईषिकाम्=शरकाण्डम् ॥ १५ ॥

कल्कं कर्षमितं लिप्त्वा छायाशुष्कञ्च कारयेत् ।
ईषिकामपनीयाथ स्नेहाक्तां वर्त्तिमादरात् ॥ १६ ॥
अङ्गारैर्दीपितां कृत्वा धृत्वा नेत्रस्य रन्ध्रके ।
वदनेन पिबेद् धूमं वदनेनैव संत्यजेत् ॥ १७ ॥
नासिकाभ्यां ततः पीत्वा मुखेनैव वमेत्सुधीः ।
शरावसम्पुटे क्षिप्त्वा कल्कमङ्गारदीपितम् ।
छिद्रे नेत्रं निवेश्याथ व्रणं तेनैव धूपयेत् ॥ १८ ॥

अथ धूमपानौषधिकल्कमाह—

एलादिकल्कं शमने स्निग्धं सर्जरसं मृदौ ॥ १९ ॥
रेचने तादृणकल्कञ्च श्वासघ्ने क्षुद्रकोषणम् ।
वामने स्नायुचर्माद्यं दद्याद् धूमस्य पानकम् ॥ २० ॥

व्रणे निम्बवचाद्यश्च धूपनं संप्रशस्यते ।
अन्येऽपि धूमा गेहेषु कर्तव्या रोगशान्तये ॥ २१ ॥

अथ गृहदेयधूममाह—

मयूरपिच्छं निम्बस्य पत्राणि बृहतीफलम् ।
मारचं हिङ्गु मांसी च बीजं कार्पाससम्भवम् ॥ २२ ॥
छागरोमाहिनिर्मोको विष्ठा वैडालिकी तथा ।
गजदन्तश्च तच्चूर्णं किञ्चिद्घृतविमिश्रितम् ॥ २३ ॥
गेहेषु धूपनं दत्तं सर्वान् बालग्रहान्हरेत् ।
पिशाचान् राक्षसान्हत्वा सर्वज्वरहरं भवेत् ॥ २४ ॥

*अहिनिर्मोकः=सर्पकञ्चुकः ॥ २२-२४ ॥

इत्यपराजितो धूमः ।

अथ धूमपाने त्याज्यकार्याण्याह—

मनस्तापं रजःक्रोधौ धूमपाने निवारयेत् ।
नेत्राणि धातुजान्याहुर्नलवंशादिजान्यपि ॥ २५ ॥

अथ गण्डूषकवलप्रतिसारणविधिमाह ।

तत्र गण्डूषविधिमाह—

स्नेहक्षीरकषायादिद्रवैः सम्पूर्णमाननम् ।
आपूर्य स्थीयते तावद्विधिर्गण्डूषधारणे ॥ २६ ॥
कफपूर्णास्यता यावच्छेदो दोषस्य वा भवेत् ।
नेत्रघ्राणश्रुतिर्यावत्तावद्गण्डूषधारणम् ॥२७ ॥
गण्डूषान् सुस्थितः कुर्यात्स्विन्नभालगलादिकः ।
मनुष्यस्त्रींस्तथा पंच सप्त वाऽऽदोषनाशनात् ॥ २८ ॥

*गलादिकः=इत्यादिशब्देन गण्डकपोलौ गृह्येते सुश्रुतोक्तत्वात् ॥ २६-२८ ॥

अथ गण्डूषभेदानाह—

चतुर्विधः स्याद् गण्डूषः स्नेहनः शमनस्तथा ।
शोधनो रोपणश्चैव कवलश्चापि तादृशः ॥ २९ ॥
स्निग्धोष्णैः स्नैहिको वाते स्वादुशीतैः प्रसादनः ।

पित्ते कट्वम्ललवणैरुष्णैः संशोधनः कफे ।
कषायतिक्तमधुरैः कटूष्णो रोपणो व्रणे ॥ ३० ॥

अथ गण्डूषकवलौषधमानमाह—

दद्याद् द्रव्येषु चूर्णञ्च गण्डूषे कोलमात्रकम् ।
कर्षप्रमाणः कल्कश्च कवले दीयते बुधैः ॥ ३१ ॥

अथ गण्डूषकवलयोरवस्थामर्य्यादामाह—

धार्यन्ते पञ्चमाद्वर्षाद्गण्डूषाः कवलादयः ॥ ३२ ॥
व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवम् ।
इन्द्रियाणां प्रसादश्च गण्डूषे विधृते भवेत् ॥ ३३ ॥
हरेदास्यस्य वैरस्यं शोषं पाकं व्रणं तृषाम् ।
दन्तचालञ्च गण्डूषो वैशद्यं तु करोति हि ॥ ३४ ॥

अथ कवलविधिमाह—

वातपित्तकफघ्नस्य द्रव्यस्य कवलं मुखे ।
अर्द्धं निक्षिप्य संचर्व्य निष्ठीवेत्कवले विधिः ॥ ३५ ॥
कवलः कुरुते काङ्क्षां भक्ष्येषु हरते कफम् ।
तृष्णां शोषञ्च वैरस्यं दन्तचालञ्च नाशयेत् ॥ ३६ ॥

अथ प्रतिसारणविधिमाह—

दन्तजिह्वामुखानां यच्चूर्णकल्कावलेहकैः ।
शनैर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ॥ ३७ ॥
वैरस्यं मुखदौर्गन्ध्यं मुखशोषं तथा तृषाम् ।
अरुचिं दन्तपीडाञ्च निहन्ति प्रतिसारणम् ॥ ३८ ॥
हीने जाड्यकफोत्क्लेशावरसज्ञानमेव च ।
अतियोगान्मुखे पाकः शोषस्तृष्णा वमिः क्लमः ॥ ३९ ॥

अथ स्वेदविधिमाह ।

स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञितः ।
उपनाहो द्रवः स्वेदः सर्वे वातार्त्तिहारिणः ॥ ४० ॥

*तापस्वेद उष्मस्वेदश्च ताभ्यां संज्ञितः । उपनाहः=उपनाहस्वेद इत्यर्थः ॥ ४० ॥

स्वेदौ तापोष्मजौ प्रायः श्लेष्मघ्नौ समुदीरितौ ।
उपनाहस्तु वातघ्नः पित्तसङ्गे द्रवो हितः ॥ ४१ ॥

*द्रवो हि द्रवस्वेदः ॥ ४१ ॥

महाबले महाव्याधौ शीते स्वेदो महान्स्मृतः ।
दुर्बले दुर्बलः स्वेदो मध्यमे मध्यमो मतः ।
बलासे रूक्षणः स्वेदो रूक्षस्निग्धः कफानिले ॥ ४२ ॥

*रूक्षणः = रूक्षयतीति रूक्षणः । नन्द्यादित्वाल्ल्युट् प्रत्ययः ॥ ४२ ॥

कफमेदोवृते वाते कोष्णं गेहं रवेः करान् ।
नियुद्धं मार्गगमनं गुरु प्रावरणं ध्रुवम् ॥ ४३ ॥
चिन्ताव्यायामभारांश्च सेवेतामयमुक्तये ।
येषां नस्यं प्रदातव्यं वस्तिश्चापि हि देहिनाम् ॥ ४४ ॥
शोधनीयाश्च ये के चित् पूर्वं स्वेद्याश्च ते मताः ।
स्वेद्या ऊर्द्ध्वं त्रयोऽपीह भगन्दर्यर्शसस्तथा ॥ ४५ ॥
अश्मर्या चातुरो जन्तुः शमयेच्छस्त्रकर्मणः ॥ ४६ ॥

*शस्त्रकर्मण ऊर्ध्वं पश्चाच्चेति सुश्रुते ॥ ४६ ॥

पश्चात्स्वेद्याहृते शल्ये मूढगर्भगदे तथा ।
काले प्रजाताऽकाले वा पश्चात्स्वेद्या नितम्बिनी ॥ ४७ ॥
सर्वान्स्वेदान्निवाते च जीर्णेऽन्ने वा विचारयेत् ।
स्वेदाद्धातुस्थिता दोषाः स्नेहक्लिन्नस्य देहिनः ॥ ४८ ॥
द्रवत्वं प्राप्य कोष्ठान्तर्गत्वा यान्ति विरेकताम् ।
स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी ।
स्वेद्यमानशरीरस्य हृदयं शीतलैः स्पृशेत् ॥ ४९ ॥

*शीतलैः = आर्द्रवस्त्रादिभिः ॥ ४९ ॥

अजीर्णी दुर्बली मेही क्षतक्षीणः पिपासितः ॥ ५० ॥
अतिसारी रक्तपित्ती पाण्डुरोगी तथोदरी ।
मेदस्वी गर्भिणी चैव न हि स्वेद्या विजानता ॥ ५१ ॥
स्वेदादेषां याति देहो विनाशं-
नो साध्यत्वं यान्ति तेषां विकाराः ॥ ५२ ॥

एतानपि मृदुस्वेदैः स्वेदसाध्यानुपाचरेत् ।
मृदुस्वेदं प्रयुञ्जीत तथा हृन्मुष्कदृष्टिषु ॥ ५३ ॥
अतिस्वेदात्सन्धिपीडा दाहस्तृष्णा क्लमो भ्रमः ।
पित्तास्रक्पिडिकाकोपस्तत्र शीतैरुपाचरेत् ॥ ५४ ॥

अथ तापस्वेदविधिमाह—

तेषु तापाभिधः स्वेदो वालुकावस्त्रपाणिभिः ॥ ५५ ॥

अथोष्मस्वेदविधिमाह—

कपालकन्दुकाङ्गारैर्यथायोग्यं हि जायते ।
प्रतप्तैरम्लसिक्तैश्च कायेऽलक्तकवेष्टिते ।
उष्मस्वेदः प्रयोक्तव्यो लोहपिण्डे वृकाक्षिभिः ।
अथ वा वातनिर्णाशिद्रव्यक्वाथरसादिभिः ॥ ५६ ॥
उष्णैर्घटं पूरयित्वा पार्श्वे छिद्रं विधाय च ।
विमुद्रयास्यं त्रिखण्डां च धातुजां काष्ठजामुत ॥ ५७ ॥
षडङ्गुलास्यां गोपुच्छां नाडीं युञ्ज्याद् द्विहस्तकाम् ।
सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतम् ।
हस्तिशुण्डिकया नाड्या स्वेदयेद्वातरोगिणम् ॥ ५८ ॥

*त्रिखण्डामिति स्वेदसौकर्यार्थम् । षडङ्गुलास्यामिति मूले षडङ्गुलविशालमुखीं गोपुच्छमिव क्रमकृशाम् । तेनाग्रे गोपुच्छाग्रपरिमाणेन कृशाम् । नाडीम् = अन्तःसरन्ध्राम् । द्विहस्तकां = हस्तद्वयपरिमाणाम् । हस्तिशुण्डिकयेति हस्तिशुण्डेव क्रमकृशत्वान्नाड्या इयं संज्ञा ॥५६-५८॥

पुरुषायाममात्रां वा भूमिं सम्मार्ज्य खादिरैः ।
काष्ठैर्दग्ध्वा तथाऽभ्युक्ष्य क्षीरधान्याम्लवारिभिः ॥५९॥
वातघ्नपत्रैराच्छाद्य शयानं स्वेदयेन्नरम् ।
एवं माषादिभिः स्विन्नैः शयानं स्वेदमाचरेत् ॥ ६० ॥

अथोपनाहस्वेदविधिमाह—

अथोपनाहस्वेदश्च कुर्याद्वातहरौषधैः ।
प्रदिह्य देहं वातार्तं क्षीरमांसरसादिभिः ॥ ६१ ॥
अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः ।

अथ ग्राम्यानूपमांसैर्जीवनीयगणेन च ॥ ६२ ॥
दधिसौवीरकक्षीरर्वीरतर्वादिना तथा ।
कुलत्थमाषगोधूमैरतसीतिलसर्षपैः ॥ ६३ ॥
शतपुष्पादेवदारुशेफालीस्थूलजीरकैः ।
एरण्डमूलजीरश्च रास्नामूलकशिग्रुभिः ॥ ६४ ॥
मिसिकृष्णाकुठेरैश्च लवणैरम्लसंयुतैः ।
प्रसारण्यश्वगन्धाभ्यां बलाभिर्दशमूलकैः ॥ ६५ ॥
गुडूच्या वानरीबीजैर्यथालाभसमाहृतैः ।
क्षुण्णैः स्विन्नैश्च वस्त्रेण बद्धैः संस्वेदयेन्नरम् ॥ ६६ ॥
महाशाल्वणसंज्ञोऽयं योगः सर्वानिलार्त्तिहृत् ॥ ६७ ॥

*अस्यायमर्थः-उपनाहस्वेदश्च कुर्यात् । केन प्रकारेण ? इत्याकाङ्क्षायां तत्प्रकारमाह-वातहरौषधैः । कथम्भूतैः ? अम्लपिष्टैः=अम्लेन काञ्जिकतक्रादिना पिष्टैः । सलवणैः । स्नेहसंयुतैः । क्षीरमांसरसान्वितैः । सुखोष्णैः । वातार्त्तं देहं प्रदिह्य प्रलिप्य स्वेदयेदित्यर्थः ॥६१-६७॥

अथ वाऽम्लेन सम्पिष्टैः कोष्णैः सूक्ष्मपटस्थितैः ।
भेषजैः स्वेदयेत् किं वा स्विन्नैः कोष्णैः पटस्थितैः ॥ ६८ ॥

अथ द्रवस्वेदविधिमाह—

द्रवस्वेदस्तु वातघ्नद्रव्यक्वाथेन पूरिते ।
कटाहे कोष्ठके वाऽपि सूपविष्टोऽवगाहयेत् ॥ ६८ ॥

*अयमर्थः-प्रथमतो वातघ्नद्रव्यक्वाथेन कण्ठपूरिते कोष्ठके कटाहे वा सूपविष्टस्तिष्ठेत् ।। ६९ ।।

सौवर्णं राजतं वाऽपि ताम्रं लौहञ्च दारुजम् ।
कोष्ठकं तत्र कुर्वीतोच्छ्राये षड्विंशदङ्गुलम् ।
आयामे वा तदेव स्याच्चतुष्कोणन्तु चिक्कणम् ॥ ७० ॥

पक्षान्तरमाह—

नाभेः षडङ्गुलं यावन्मग्नं क्वाथस्य धारया ।
कोष्णया स्कन्धयोः सिक्तस्तिष्ठेत्स्निग्धतनुर्नरः ॥ ७१ ॥

*अथ वा नाभेः षडङ्गुलमूर्ध्वं यावत् क्वाथे मग्न उपवि-

ष्टः। पश्चात् क्वाथस्य धारया स्कन्धयोः सिच्यमानस्तिष्ठेत् यावत्। कोष्ठकं परिपूर्णं भवतीत्यर्थः। क्वाथपक्षे प्रथमतः स्नेहाभ्यक्ततनुः प्रविशेत् ॥ ७१ ॥

मुहूर्त्तैकं समारभ्य यावत्स्यात्तच्चतुष्टयम्।
तावत्तदवगाहेत यावदारोग्यनिश्चयः ॥ ७२ ॥
एवं तैलेन दुग्धेन सर्पिषा स्वेदयेन्नरम्।
एकान्तरो द्व्यन्तरो वा युक्तः स्नेहोऽवगाहने ॥ ७३ ॥

*एतावता क्वाथो दुग्धश्च नित्यमेव युज्यते। स्नेहस्तु दिनमेकं द्वे वा दिने गमयित्वा युक्तः। अग्निमान्द्याशङ्कयेति भावः ॥ ७३ ॥

शिरामुखैर्लोमकूपैर्धमनीभिश्च तर्पयेत्।
शरीरे बलमाधत्ते युक्तः स्नेहोऽवगाहने ॥ ७४ ॥
जलसिक्तस्य वर्द्धन्ते यथा मूलेऽङ्कुरादयः।
तथैव धातुवृद्धिर्हि स्नेहसिक्तस्य जायते ॥ ७५ ॥
नातः परतरः कश्चिदुपायो वातनाशनः।
शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे ॥ ७६ ॥
दीप्तेऽग्नौ मार्दवे जाते स्वेदनाद्विरतिर्मता ॥ ७७ ॥

अथ मूर्द्धतैलविधिमाह—

अभ्यङ्गः परिषेकश्च पिचुर्बस्तिरिति क्रमात्।
मूर्द्धतैलं चतुर्द्धा स्याद्बलवत्तद्यथोत्तरम् ॥ ७८ ॥

*अभ्यङ्गः=तैलेन शिरसो मर्दनम्। परिषेकः=शिरसि धारापातनम्। पिचुः=तैलाक्तं तूलं 'फोहा' इति लोके। वस्तिर्वक्ष्यमाणः ॥ ७८ ॥

त्रयोऽभ्यङ्गादयः पूर्वं प्रसिद्धाः सर्वतः स्मृताः।
शिरोवस्तिविधिश्चात्र प्रोच्यते सुज्ञसम्मतः ॥ ७९ ॥
शिरोवस्तिश्चर्मणः स्याद् द्विमुखो द्वादशाङ्गुलः।
शिरःप्रमाणस्तं बद्ध्वा मस्तके माषपिष्टकैः ॥ ८० ॥
सन्धिरोधं विधायाशु स्नेहैः कोष्णैः प्रपूरयेत्।
तावद्धार्यस्तु यावत्स्यान्नासाकर्णमुखस्रुतिः ॥ ८१ ॥

वेदनोपशमो वाऽपि मात्राणां वा सहस्रकम् ।
स्वजानुनः करावर्त्तं कुर्याच्छोटिकया युतम् ॥ ८२ ॥
एषा मात्रा भवेदेका सर्वत्रैवैष निश्चयः ।
विना भोजनमेवात्र शिरोवस्तिः प्रशस्यते ॥ ८३ ॥
प्रयोज्यस्तु शिरोवस्तिः पञ्च सप्त दिनानि वा ।
विमोच्य शिरसो वस्तिं गृह्णीयाच्च समन्ततः ॥ ८४ ॥
उद्वर्ध्य कायं ततः कोष्णे नीरे स्नानं समाचरेत् ।
अनेन दुर्जया रोगा वातजा यान्ति संक्षयम् ।
शिरःकम्पादयस्तेन सर्वकालेषु युज्यते ॥ ८५ ॥

*पञ्च सप्त दिनानि वेत्युक्त्वा सर्वकालेष्विति शिरःकम्पादिरोगानुवृत्तौ ज्ञेयम् ॥ ७९–८५ ॥

अथ कर्णपूरणविधिमाह—

स्वेदयेत्कर्णदेशन्तु किञ्चिन्नुः पार्श्वशायिनः ।
मूत्रैः स्नेहै रसैरुष्णैः श्रोत्ररन्ध्रं प्रपूरयेत् ॥ ८६ ॥
कर्णञ्च पूरितं रक्षेच्छतं पञ्च शतानि वा ।
सहस्रं वाऽपि मात्राणां श्रोत्रकण्ठशिरोगदे ॥ ८७ ॥
मूत्राद्यैः पूरणं कर्णे भोजनात्प्राक्प्रशस्यते ।
तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते ॥ ८८ ॥

तद्यथा—

कर्णे शूलाकुले कोष्णं वस्तमूत्रं ससैन्धवम् ।
निक्षिपेत्तेन शाम्यन्ति शूलपाकादिजा रुजः ॥ ८९ ॥
शृङ्गवेरञ्च मधुकं सैंधवं तैलमेव च ।
कदुष्णं कर्णयोर्देयमेतत्स्याद्वेदनाऽपहम् ॥ ९० ॥
पीतार्कपत्रमाज्येन लिप्तं वह्नौ प्रतापयेत् ।
तद्रसः श्रवणे क्षिप्तः कर्णशूलहरः परः ॥ ९१ ॥

अथ लेपविधिमाह—

आलेपस्य तु नामानि लेपो लेपनलिप्तकौ ।
दोषघ्नो विषहा वर्ण्यः स च लेपस्त्रिधा मतः ॥ ९२ ॥

त्रिप्रमाणश्चतुर्भागस्त्रिभागार्द्धाङ्गुलोन्नतः ।
आर्द्रो व्याधिहरः स स्याच्छुष्को दूषयति च्छविम् ॥ ९३ ॥

*चतुर्भागत्रिभागार्द्धाङ्गुलोन्नतः, एवं त्रिप्रमाणः ॥ ९३ ॥

दोषघ्नो लेपो यथा—

शोथघ्नीदारुसिद्धार्थशुण्ठीशोभाञ्जनत्वचाम् ।
आरनालेन पिष्टानां प्रलेपः सर्वशोथहा ॥ ९४ ॥

* शोथघ्नी=पुनर्नवा ॥ ९४ ॥

शिरीषं मधुयष्टी च तगरं रक्तचन्दनम् ।
एला मांसी निशायुग्मं कुष्ठं बालकमेव च ॥ ९५ ॥
इति सञ्चूर्ण्य लेपोऽयं पंचमांशघृतप्लुतः ।
जलेन क्रियते सुज्ञैर्दशाङ्ग इति संज्ञितः ॥ ९६ ॥
वीसर्पश्च विषस्फोटाञ्छोथदुष्टव्रणाञ्जयेत् ॥ ९७ ॥

विषहा लेपो यथा—

अजादुग्धतिलैर्लेपो नवनीतेन संयुतः ।
शोथमारुष्करं हन्ति लेपो वा कृष्णमार्त्तिकः ॥ ९८ ॥

* नवनीतेनात्र माहिषेणार्द्धिकेन । कृष्णमार्त्तिकः=कृष्णमृत्तिकाकृतः ॥ ९८ ॥

अपरः कृमिविषापहलेपो यथा—

लाङ्गल्यतिविषाऽलाबूजालिनीबीजमूलकैः ।
लेपो धान्याम्बुसम्पिष्टः कीटविस्फोटनाशनः ॥ ९९ ॥

मुखकान्तिदो लेपो यथा—

रक्तचन्दनमञ्जिष्ठालोध्रकुष्ठप्रियङ्गवः ।
वटाङ्कुरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदाः ॥ १०० ॥
अथ लेपविधिश्चैव प्रोच्यते सुज्ञसम्मतः ।
आलेपश्च प्रदेहश्च द्वौ भेदौ तस्य भाषितौ ॥ १०१ ॥
चर्मार्द्रं माहिषं यद्वत्प्रोन्नतं सा मितिस्तयोः ।
शीतस्तनुर्विशोषी च प्रलेपः पित्तहृन्मतः ॥ १०२ ॥
आर्द्रो घनस्तथोष्णः स्यात्प्रदेहः श्लेष्मवातहा ।
न रात्रौ लेपनं कुर्याच्छुष्यमाणं न धारयेत् ॥ १०३ ॥

शुष्यमाणमुपेक्षेत प्रदेहं पीडनं प्रति ।
तमसा पिहितो ह्यूष्मा लोमकूपमुखे स्थितः ॥
विना लेपेन निर्याति रात्रौ ना लेपयेदतः ॥ १०४ ॥

* तमसा = रात्र्यन्धकारेण ॥ १००-१०४ ॥

रात्रावपि प्रलेपादिर्व्रणे देयो विचक्षणैः ।
अपाकिन्यतिगम्भीरे रक्तश्लेष्मसमुद्भवे ॥ १०५ ॥

प्रलेपो यथा—

मधुकं चन्दनं मूर्वा नलमूलञ्च पर्पटम् ।
उशीरं बालकं पद्मं प्रलेपः पित्तशोथहृत् ॥ १०६ ॥

प्रदेहो यथा—

बीजपूरजटा हिंस्रा देवदारु महौषधम् ।
रास्नाऽरणिः प्रदेहोऽयं वातशोथविनाशनः ॥ १०७ ॥

* अरणिः = अग्निमन्थः ॥ १०७ ॥

कृष्णापुराणपिण्याकशिग्रुत्वक्सिकताशिवाः ।
गोमूत्रपिष्टः कोष्णोऽयं प्रदेहः श्लेष्मशोथहा ॥ १०८ ॥

अथ शोणितस्रावण (फस्त) विधिमाह—

शोणितं स्रावयेज्जन्तोरामयं प्रसमीक्ष्य च ।
प्रस्थं प्रस्थार्द्धमथ वा प्रस्थार्द्धार्द्धमथापि वा ॥ १०९ ॥
शरत्काले स्वभावेन शोणितं स्रावयेन्नरः ।
त्वग्दोषग्रन्थिशोथाद्या नश्यन्ति रुधिरोद्भवा ॥ ११० ॥
व्यभ्रे वर्षासु विध्येत शीते ग्रीष्मे शरद्यपि ।
मध्याह्ने शीतकाले च रुधिरं स्रावयेद् बुधः ॥ १११ ॥
अनुष्णशीतं मधुरं स्निग्धं रक्तञ्च वर्णतः ।
शोणितं गुरु विस्रं स्याद् विदाहश्चास्य पित्तवत् ॥ ११२ ॥
विस्रता द्रवता रागश्चलनं विलयस्तथा ।
भूम्यादिपञ्चभूतानामेते रक्ते गुणाः स्मृताः ॥ ११३ ॥
रक्ते दुष्टे भवेच्छोथो रक्तमण्डलमेव च ।
व्यथा दाहश्च पाकश्च कण्डूश्च पिडकोद्गमः ॥ ११४ ॥

वृद्धे रक्ताङ्गनेत्रत्वं शिराणां पूर्णता तथा।
गात्राणां गौरवं निद्रा मोहो दाहश्च जायते ॥ ११५ ॥
क्षीणेऽस्रे मधुराकाङ्क्षा मूर्च्छा च त्वचि रूक्षता।
शैथिल्यं च शिराणां स्याद्वातादुन्मार्गगामिता ॥ ११६ ॥

* वाताद्रक्तक्षैण्यजनितात् ॥ ११६ ॥

अरुणं फेनिलं रूक्षं परुषं तनु शीघ्रगम्।
आस्कन्दि सूचीनिस्तोदि रक्तं स्याद्वातदूषितम् ॥ ११७ ॥
पित्तेन पीतं हरितं नीलं श्यावं च विस्रकम्।
अस्वादूष्णं मक्षिकाणां पिपीलीनामनिष्टकम् ॥ ११८ ॥
शीतलं बहुलं स्निग्धं गैरिकोदकसन्निभम्।
मांसपेशीप्रभं स्कन्दि मन्दगं कफदूषितम् ॥ ११९ ॥
द्विदोषदुष्टं संसृष्टं त्रिदुष्टं पूतिगन्धकम्।
सर्वलक्षणसंयुक्तं काञ्जिकाभं च जायते ॥ १२० ॥
विषदुष्टं भवेच्छ्यावं नासिकोन्मार्गगं तथा।
विस्रं काञ्जिकसंकाशं सर्वकुष्ठकरं तथा ॥ १२१ ॥
इन्द्रगोपप्रभं ज्ञेयं प्रकृतिस्थमसंहतम्।
शोथे दाहेऽङ्गपाके च रक्तवर्णेऽसृजः स्रुतौ ॥ १२२ ॥
वातरक्ते तथा कुष्ठे सपीडे दुर्जयेऽनिले।
पाण्डुरोगे श्लीपदे च विषदुष्टे च शोणिते ॥ १२३ ॥
ग्रन्थ्यर्बुदापचीक्षुद्ररोगाधिमन्थकाभिधे।
विदारीस्तनरोगेषु गात्राणां सादगौरवे ॥ १२४ ॥
रक्ताभिष्यन्दतन्द्रायां पूतिघ्राणस्य दाहके।
यकृत्प्लीहविसर्पेषु विद्रधौ पिडकोद्गमे ॥ १२५ ॥
कर्णौष्ठघ्राणवक्त्राणां पाके दाहे शिरोरुजि।
उपदंशे रक्तपित्ते रक्तस्रावः प्रशस्यते ॥ १२६ ॥
एषु रोगेषु शृङ्गैर्वा जलौकाऽलाबुकैरपि।
अथ वाऽपि शिरामोक्षैः कारयेद्रक्तपातनम् ॥ १२७ ॥
न कुर्वीत शिरामोक्षं कृशस्यातिव्यवायिनः।

क्लीबस्य भीरोर्गर्भिण्याः सूतायाः पाण्डुरोगिणः ॥ १२८ ॥
पञ्चकर्मविशुद्धस्य पीतस्नेहस्य चार्शसाम् ।
सर्वाङ्गशोथयुक्तानामुदरिश्वासकासिनाम् ॥ १२९ ॥
छर्दतीसारजुष्टानामतिस्विन्नतनोरपि ।
उनषोडशवर्षस्य गतसप्ततिकस्य च ॥ १३० ॥
आघातात्स्रुतरक्तस्य शिरामोक्षो न शस्यते ॥ १३१ ॥

* आघातात् स्रुतरक्तस्य=रक्तपित्तादिना च गतरक्तस्य ॥ १३१ ॥

एषां चात्ययिके रोगे जलौकाभिर्विनिर्हरेत् ।
तथा च विषजुष्टानां शिरामोक्षो न शस्यते ॥ १३२ ॥
गोश्रृङ्गेण जलौकाभिरलावूभिरपि त्रिधा ।
वातपित्तकफैर्दुष्टं शोणितं स्रावयेद् बुधः ॥ १३३ ॥
द्विदोषाभ्यान्तु दुष्टं यत्त्रिदोषैरपि दूषितम् ।
शोणितं स्रावयेद्युक्त्या शिरामोक्षैः पदैस्तथा ॥ १३४ ॥
गृह्णाति शोणितं श्रृङ्गं दशाङ्गुलमितं बलात् ।
जलौका हस्तमात्रं तु तुम्बी तु द्वादशाङ्गुलम् ॥ १३५ ॥
पदमङ्गुलमात्रस्य शिरा सर्वाङ्गशोधिनी ।
शीते निरन्ने मूर्च्छार्त्तिनिद्राभीतिमदश्रमैः १३६ ॥
युक्तानां न स्रवेद्रक्तं तथा विण्मूत्रसङ्गिनाम् ।
शोणिते चाप्रवृत्ते तु कुष्ठत्रिकटुसैन्धवैः ॥ १३७ ॥
मर्दयेद् व्रणवक्त्रञ्च तेन रक्तं प्रवर्त्तते ।
तस्मान्न शीते नात्युष्णे नास्विन्ने नातितापिते ॥ १३८ ॥
पीत्वा यवागूं तृप्तस्य स्रावयेच्छोणितं बुधः ।
अतिस्विन्नस्योष्णकाले तथैवातिशिराव्यधात् ॥ १३९ ॥
अतिप्रवर्त्तते रक्तं तत्र कुर्यात्प्रतिक्रियाम् ।
अतिप्रवृत्ते रक्ते तु लोध्रसर्जरसाञ्जनैः ॥ १४० ॥
यवगोधूमचूर्णैश्च धवधन्वनगैरिकैः ।
सर्पनिर्मोकचूर्णैर्वा भस्मना क्षौमवस्त्रयोः ॥ १४१ ॥

मुखं व्रणस्य बद्ध्वा च शीतैश्चोपचरेद् व्रणम् ।
विध्येदूर्द्ध्वशिरां तावद्दहेत्क्षारेण वह्निना ॥ १४२ ॥
व्रणं कषायः सन्धत्ते रक्तं स्कन्दयते हिमम् ।
व्रणास्यं पाचयेत्क्षारो दाहः संकोचयेच्छिराः ॥ १४३ ॥
रक्ते दुष्टेऽवशिष्टेऽपि व्याधिर्नैव प्रकुप्यति ।
अतो रक्तोत्सावशेषं रक्ते नातिस्रुतिर्हिता ॥ १४४ ॥
आन्ध्यमाक्षेपकं तृष्णां तिमिरं शिरसो रुजः ।
पक्षाघातं श्वासकासौ हिक्कादाहौ च पाण्डुताम् ॥ १४५ ॥
कुरुतेऽतिस्रुतं रक्तं मरणं वा करोति च ।
देहस्योत्पत्तिरसृजा देहस्तेनैव धार्यते ॥ १४६ ॥
रक्तं जीवस्य चाधारस्तस्माद्रक्षेदसृग्बुधः ।
शीतोपचारैः कुपिते स्रुतरक्तस्य मारुते ॥ १४७ ॥
कोष्णेन सर्पिषा शोथं सव्यथं परिषेचयेत् ।
क्षीणस्यैणशशोरभ्रहरिणच्छागमांसजः ॥ १४८ ॥
रसः समुचितः पाने क्षीरं षष्टिकया हितम् ।
पीडाशान्तिर्लघुत्वं च व्याध्युपद्रवसंक्षयः ॥ १४९ ॥
मनःस्वास्थ्यं भवेच्चिह्नं सम्यङ् निःसारितेऽसृजि ।
व्यायाममैथुनक्रोधशीतस्नानप्रवातकान् ॥ १५० ॥
एकाशनं दिवानिद्रां क्षाराम्लकटुभोजनम् ।
शोकं वादमजीर्णञ्च त्यजेदाबलदर्शनात् ॥ १५१ ॥

अथ नेत्रस्वच्छकारिणीः क्रिया आह—

सेकश्चाश्च्योतनं पिण्डो बिडालस्तर्पणं तथा ।
पुटपाकोऽञ्जनं चैभिः कल्पैर्नेत्रमुपाचरेत् ॥ १५२ ॥

तत्रादौ सेकविधिमाह—

सेकस्तु सूक्ष्मधाराभिः सर्वस्मिन्नयने हितः ।
मीलिताक्षस्य मर्त्यस्य प्रदेयश्चतुरङ्गुलः ॥ १५३ ॥
स सस्नेहो भवेद्वाते पित्ते रक्ते च रोपणः ।
लेखनस्तु कफे कार्यस्तस्य मात्राऽभिधीयते ॥ १५४ ॥

षड्भिर्वाचां शतैः स्नेहे चतुर्भिश्चैव रोपणे ।
त्रिभिर्लेखने कार्यः सेको नेत्रप्रसादने ॥ १५५ ॥
निमेषोन्मेषणं पुंसामङ्गुल्या च्छोटिकाऽथ वा ।
गुर्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैः ॥ १५६ ॥
सेकस्तु दिवसे कार्यो रात्रौ चात्यन्तिके गदे ।
एरण्डस्य दलैः पिष्टैः पक्वमाजं पयो हितम् ।
सुखोष्णं नेत्रयोः सिक्तं वाताभिष्यन्दनाशनम् ॥ १५७ ॥

अथाश्च्योतनविधिमाह—

क्वाथक्षौद्रासवस्नेहबिन्दूनां यत्तु पातनम् ।
द्व्यङ्गुलोन्मीलिते नेत्रे प्रोक्तमाश्च्योतनं हि तत् ॥ १५८ ॥
बिन्दवोऽष्टौ लेखनेषु रोपणे दश बिन्दवः ।
स्नेहने द्वादश प्रोक्तास्ते शीते कोष्णरूपिणः ॥ १५९ ॥
उष्णे तु शीतरूपाः स्युः सर्वत्रैवैष निश्चयः ।
वाते तिक्तं तथा स्निग्धं पित्ते मधुरशीतलम् ॥ १६० ॥
कफे तिक्तोष्णरूक्षं च क्रमादाश्च्योतनं हितम् ।
आश्च्योतनानां सर्वेषां मात्रा स्याद्वाक्छतोन्मिता ॥ १६१ ॥
ततः परं लोचनाभ्यां भेषजानामयोगतः ।
आश्च्योतनं न कर्त्तव्यं निशायां केन चित्क्वचित् ॥१६२॥

तद्यथा—

बिल्वादिपञ्चमूलेन बृहत्येरण्डशिग्रुभिः ।
क्वाथ आश्च्योतने कोष्णो वाताभिष्यन्दनाशनः ॥ १६३ ॥

अथ पिण्डिकाविधिमाह—

युक्तभेषजकल्कस्य पिण्डी कवलमात्रया ।
वस्त्रखण्डेन संबद्धा नेत्रेऽभिष्यन्दनाशिनी ॥ १६४ ॥
स्निग्धोष्णा पिण्डिका वाते पित्ते सा शीतला मता ।
रूक्षोष्णा श्लेष्मणि प्रोक्ता विधिरुक्तो बुधैरयम् ॥ १६५ ॥

सा यथा—

एरण्डपत्रमूलत्वङ्निर्मिता वातनाशिनी ।

धात्रीविरचिता पित्ते शिग्रुपत्रकृता कफे ॥ १६६ ॥

अथ विडालकविधिमाह—

विडालको बहिर्लेपो नेत्रपक्ष्मविवर्जितः ।
तस्य मात्रा परिज्ञेया मुखालेपविधानवत् ॥ १६७ ॥
यष्टीगैरिकसिन्धूत्थदार्वीताक्ष्यैः समांशकैः ।
जलपिष्टैर्बहिर्लेपः सर्वनेत्रामयापहः ॥ १६८ ॥

अथ तर्पणविधिमाह—

वातातपरजोहीने वेश्मन्युत्तानशायिनः ।
अभितो माषचूर्णेन क्लिन्नेन परिपिण्डितौ ॥ १६९ ॥
समौ दृढावसम्बाधौ कर्त्तव्यौ नेत्रकोशयोः ।
पूरयेद् घृतमण्डेन विलीनेन सुखोदकैः ॥ १७० ॥
सर्पिषा शतधौतेन क्षीरजेन घृतेन वा ।
निमग्नान्यक्षिपक्ष्माणि यावत्स्युस्तावदेव हि ॥ १७१ ॥
पूरयेन्मीलिते नेत्रे तत उन्मीलयेच्छनैः ।
भिषग्भिरेष विख्यातस्तर्पणस्योदितो विधिः ॥ १७२ ॥
यद्रूक्षञ्च परिष्यन्दि नेत्रं कुटिलमाविलम् ।
शीर्णपक्ष्मशिरोत्पातकृच्छ्रोन्मीलनसंयुतम् ॥ १७३ ॥
तिमिरार्जुनशुक्राद्यैरभिष्यन्दाधिमन्थकैः ।
शुष्काक्षिपाकशोथाभ्यां युतं वातविपर्ययैः ॥ १७४ ॥
तन्नेत्रं तर्पयेत्सम्यङ् नेत्ररोगविशारदः ।
तर्पणं धारयेद्वर्त्मरोगे वाचां शतं बुधः ॥ १७५ ॥
स्वस्थे कफे सन्धिरोगे वाचां पंच शतानि च ।
षट्शतानि कफे कृष्णरोगे सप्त शतानि हि ॥ १७६ ॥
दृष्टिरोगे शतान्यष्टावधिमन्थे सहस्रकम् ।
सहस्रं वातरोगेषु धार्यमेव हि तर्पणम् ॥ १७७ ॥
पूर्णं चापाङ्गमार्गेण स्रावयित्वाऽक्षि शोधयेत् ।
स्विन्नेन यवपिष्टेन स्नेहवीर्येरितं ततः ॥ १७८ ॥
यथास्वं धूमपानेन कफमस्य विरेचयेत् ।

एकाहं वा त्र्यहं वाऽपि पञ्चाहं तर्पणं चरेत् ॥ १७६ ॥

अथ यथार्थतर्पणचिह्नमाह—

तर्पणे तृप्तिलिंगानि नेत्रस्यैतानि लक्षयेत् ।
सुखस्वप्नावबोधत्वं वैशद्यं नेत्रपाटवम् ।
निर्वृतिर्व्याधिशान्तिश्च क्रियालाघवमेव च ॥ १८० ॥

* निर्वृतिः=सुखम् । क्रियालाघवं=नेत्रस्य क्रियायां निमेषोन्मेषादौ लघुता ॥ १८० ॥

अथातितर्पितहीनतर्पितयोर्लक्षणं प्रतीकारमयोग्यसमयं चाह—

गुर्वाविलमतिस्निग्धमश्रुकण्डूपदेहवत् ।
वर्षतोद्युतं नेत्रमतितर्पितमादिशेत् ॥ १८१ ॥
आस्रावशोफरोगाढ्यमुपदेहसमाकुलम् ।
रूक्षमस्रावमरुणं नेत्रं स्याद्धीनतर्पितम् ॥ १८२ ॥
अनयोर्दोषबाहुल्यात्प्रयतेत चिकित्सिते ।
रूक्षस्निग्धोपचाराभ्यामनयोः स्यात्प्रतिक्रिया ॥ १८३ ॥

*अनयोः=अतितर्पितहीनतर्पितयोः ॥ १८१-१८३ ॥

दुर्दिनात्युष्णशीतेषु चिन्तायां संभ्रमेषु च ।
अशान्तोपद्रवे चाक्षिण तर्पणं न प्रशस्यते ॥ १८४ ॥

अथ पुटपाकविधिमाह—

द्वे बिल्वे स्निग्धमांसस्य परद्रव्यपलं मतम् ।
द्रवस्य कुडवोन्मानं सर्वमेकत्र पेषयेत् ॥ १८५ ॥
तदेकत्र समालोड्य पत्रैः सुपरिवेष्टितम् ।
पुटपाकविधानेन तत्पक्त्वा तद्रसं बुधः ॥ १८६ ॥
तर्पणोक्तेन विधिना यथावदवधारयेत् ।
दृष्टिमध्ये निषेच्यः स्यान्नित्यमुत्तानशायिनः ॥ १८७ ॥
स्नेहनो लेखनश्चैव रोपणश्चेति स त्रिधा ।
हितः स्निग्धोऽतिरूक्षस्य स्निग्धस्य स तु लेखनः ॥ १८८ ॥
दृष्टेर्बलार्थमितरः पित्तासृग्व्रणवातनुत् ॥ १८९ ॥

* इतरो=रोपणः ॥ १८९ ॥

स्नेहमांसवसामज्जमेदःस्वाद्वौषधैः कृतः।
स्नेहनः पुटपाकः स्याद्धार्यो द्वे वाक्छते तु सः॥ १९०॥
जाङ्गलानां यकृन्मांसैर्लेखनद्रव्यसंयुतैः।
कृष्णलोहरजस्ताम्रशङ्खविद्रुमसिन्धुजैः॥ १९१॥
समुद्रफेनकासीसस्रोतोऽजदधिमस्तुभिः।
लेखनो वाक्छतं तस्य परं धारणमिष्यते॥ १९२॥
स्तन्यजाङ्गलमध्वाज्यतिक्तद्रव्यविपाचितः।
लेखनात्त्रिगुणो धार्यः पुटपाकस्तु रोपणः॥ १९३॥

अथ तिक्तद्रव्याण्याह—

निम्बामृतावृषपटोलनिदिग्धिकाभिः—
स्यात्पञ्चतिक्तक इति प्रथितो गणोऽयम्॥ १९४॥
आचरेत्तर्पणोक्तां तु क्रियां व्यापत्तिदर्शने॥ १९५॥

* व्यापत्तिदर्शने=मिथ्याकृतपुटपाकजनितव्याधिदर्शने॥१९५॥

तेजांस्यनिलमाकाशमादर्शं भास्वराणि च।
नेक्षेत तर्पिते नेत्रे यश्च वा पुटपाकवान्॥ १९६॥

अथाञ्जनविधिमाह—

अथ सम्पक्वदोषस्य प्राप्तमञ्जनमाचरेत्।
अञ्जनं क्रियते येन तद् द्रव्यं चाञ्जनं मतम्॥ १९७॥

तद्यथा—

रसो वटी तथा चूर्णमिति त्रिविधमञ्जनम्।
यथापूर्वं बलं तेषु स्नेहमाहुर्मनीषिणः॥
तत्प्रत्येकं त्रिधा प्रोक्तं लेखनं रोपणं तथा।
स्नेहनं चेति लिङ्गानि तेषां विस्तरतः शृणु॥ १९८॥
लेखनं क्षारतीक्ष्णाम्लरसैरञ्जनमुच्यते।
नेत्रवर्त्मशिराजालश्रोत्रशृङ्गाटकस्थितम्॥ १९९॥
मुखनासाऽक्षिभिर्दोषमुत्क्लिश्य स्रावयेच्च तत्।
कषायं तिक्तकं चापि सस्नेहं रोपणं मतम्॥ २००॥
स्नेहस्य शैत्याद्वर्ण्यं स्याद् दृष्टेश्च बलवर्द्धनम्।

मधुरं स्नेहमण्डं तदञ्जनं स्यात्प्रसादनम् ॥ २०१ ॥
दृष्टिदोषप्रसादार्थं स्नेहनार्थञ्च तद्धितम् ।
हरेणुमात्रावर्त्तिस्तु लेखनी स्यात्प्रमाणतः ॥ २०२ ॥
सार्द्धैकरेणुकमिता रोपणी वर्त्तिरिष्यते ।
क्रियते स्नेहनी वर्त्तिर्द्विहरेणुकमात्रया ॥ २०३ ॥
रसाञ्जनस्य मात्रा तु पिष्टवर्त्तिमिता मता ।
चूर्णं तु लेखनं वैद्यैर्द्विशलाकं प्रदीयते ॥
रोपणं त्रिशलाकं स्याच्चतस्रः स्नेहनाञ्जने ॥ २०४ ॥

* चतस्रः शलाकाः स्नेहनाञ्जने चूर्णे ॥ २०४ ॥

मुखयोर्मुकुलाकारा कलायपरिमण्डला ।
अष्टाङ्गुला शलाका स्यादश्मजा धातुजाऽथ वा ॥ २०५ ॥

* कलायपरिमण्डला = अग्रे कलायवद्वर्त्तुला ॥ २०५ ॥

ताम्रलोहाश्मसञ्जाता शलाका लेखने मता ।
सुवर्णरजतोद्भूता स्नेहने समुदाहृता ॥ २०६ ॥
अङ्गुली च मृदुत्वेन रोपणे सम्प्रयुज्यते ।
कृष्णभागावधि लिम्पेदपाङ्गं यावदञ्जनम् ॥ २०७ ॥
हेमन्ते, शिशिरे चैव मध्याह्नेऽञ्जनमिष्यते ।
पूर्वाह्णे वाऽपराह्णे वा ग्रीष्मे शरदि चेष्यते ॥ २०८ ॥
वर्षास्वनभ्रे नात्युष्णे वसन्ते तु सदैव हि ।
अथ वा सर्वदा प्रातः सायं वाऽञ्जनमाचरेत् ॥ २०९ ॥
नातिशीतोष्णवाताभ्रवेलायां तत्प्रयुज्यते ।
श्रान्तेऽथ रुदिते भीते पीतमद्ये नवज्वरे ॥ २१० ॥
अजीर्णे वेगघाते च नाञ्जनं सम्प्रयुज्यते ।
रागोपदेहौ तिमिरं शूलं संरम्भमेव च ॥ २११ ॥
निद्राक्षयश्च कुरुते निषिद्धे युक्तमञ्जनम् ॥ २१२ ॥

अथ लेखनकारिणीं वर्त्तिमाह—

शङ्खनाभिर्विभीतस्य मज्जा पथ्या मनःशिला ।
पिप्पली मरिचं कुष्ठं वचा चेति समांशकम् ॥ २१३ ॥

छागक्षीरेण सम्पिष्य वर्त्तिं कुर्याद्यवोन्मिताम् ।
हरेणुमात्रां सम्पिष्य जलैः कुर्याद्यथाऽञ्जनम् ॥ २१४ ॥
तिमिरं मांसवृद्धिश्च काचं पटलमर्बुदम् ।
रात्र्यन्धं कार्ष्णिकं पुष्पं वर्त्तिश्चन्द्रोदया हरेत् ॥ २१५ ॥

इति चन्द्रोदया वर्त्तिर्लेखनी ।

अथ रोपणकारिणीं वर्त्तिमाह—

अशीतिस्तिलपुष्पाणि षष्टिः पिप्पलितण्डुलाः ।
जातीपुष्पाणि पञ्चाशन्मरिचानि तु षोडश ॥ २१६ ॥
सूक्ष्मं पिष्ट्वाऽम्बुना वर्त्तिः कृता कुसुमिकाऽभिधा ।
तिमिरार्जुनशुक्राणां नाशिनी मांसवृद्धिनुत् ।
एतस्या अञ्जने प्रोक्ता मात्रा सार्धहरेणुका ॥ २१७ ॥

इति कुसुमिका रोपणी वर्त्तिः ।

अथ स्नेहनकारिणीं वर्त्तिमाह—

धात्र्यक्षपथ्यावीजानि एकद्वित्रिगुणानि च ॥ २१८ ॥
पिष्ट्वा वर्तिं जलैः कुर्यादञ्जनं द्विहरेणुकम् ।
नेत्रस्रावं हरत्याशु वातरक्तरुजं तथा ॥ २१९ ॥

अथ लेखनकारिणीं रसक्रियामाह—

तुत्थमाक्षिकसिन्धूत्थाः सिताशङ्खमनःशिलाः ।
गैरिकं सिन्धुफेनश्च मरिचं चेति चूर्णयेत् ॥ २२० ॥
संयोज्य मधुना कुर्यादञ्जनार्थं रसक्रियाम् ।
वर्त्मरोगार्मतिमिरकाचशुक्रहरीं पराम् ॥ २२१ ॥

अथ रोपणीं रसक्रियामाह—

रसाञ्जनं सर्जरसो जातिपुष्पं मनःशिला ।
समुद्रफेनो लवणं गैरिकं मरिचं तथा ॥ २२२ ॥
एतत्समांशं मधुना पिष्टं प्रक्लिन्नवर्त्मने ।
अञ्जनं क्लेदकण्डूघ्नं पक्ष्मणाञ्च प्ररोहणम् ॥ २२३ ॥

अथ स्नेहनकारिणीं रसक्रियामाह—

कतकस्य फलं घृष्ट्वा मधुना नेत्रमञ्जयेत् ।
ईषत्कर्पूरसहितं स्मृतं नेत्रप्रसादनम् ॥ २२४ ॥

अथ लेखनचूर्णमाह—

दक्षाण्डत्वक्छिलाकाचशङ्खचन्दनसैन्धवैः ।
अञ्जनं हरते नित्यं सर्वानक्षिगदान्बलात् ॥ २२५ ॥

*दक्षः=कुक्कुटः । तथा च निघण्टुः—
"कृकवाकुस्तथा दक्षः कालज्ञोऽथ शिखण्डिक" इति ॥ २२५ ॥

अथ रोपणचूर्णमाह—

शिलायां रसकं पिष्ट्वा सम्यगाप्लाव्य वारिणा ।
गृह्णीयात्तज्जलं सर्वं त्यजेच्चूर्णमधोगतम् ॥ २२६ ॥
शुष्कं तच्च जलं सर्वं पर्पटीसन्निभं भवेत् ।
विचूर्ण्य भावयेत्सम्यक्त्रिवेलं त्रिफलारसैः ॥ २२७ ॥
कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत् ।
अञ्जयेन्नयनं तेन सर्वदोषप्रशान्तये ।
समस्तनेत्ररोगघ्नं चूर्णमेतन्न संशयः ॥ २२८ ॥

अथ स्नेहनचूर्णमाह—

अग्नितप्तं हि सौवीरं निषिञ्चेत्त्रिफलारसैः ।
सप्तवेलं तथा स्तन्यैः स्त्रीणां सिक्तं विचूर्णितम् ॥ २२९ ॥

*सौवीरं=श्वेतमञ्जनम् ॥ २२९ ॥

अञ्जयेत्तेन नयने प्रत्यहं चक्षुषोर्हितम् ।
सर्वानक्षिविकारांस्तु हन्यादेतन्न संशयः ॥ २३० ॥

अथ प्रत्यञ्जनसेवनविधिमाह—

गतदोषमपेताश्रु प्रपश्यत्सम्यगम्भसि ।
प्रक्षाल्याक्षि यथादोषं कार्यं प्रत्यञ्जनं ततः ॥ २३१ ॥
न वा निर्वातदोषेऽक्षिधावनं सम्प्रयोजयेत् ।
प्रत्यञ्जनं तत्र दद्याच्चूर्णं तीक्ष्णप्रसादनम् ॥ २३२ ॥

अथ नयनामृतचूर्णमाह—

तद्यथा—

शुद्धे नागे द्रुते तुल्यं शुद्धं सूतं विनिक्षिपेत् ।
कृष्णाञ्जनं तयोस्तुल्यं सर्वमेकत्र चूर्णयेत् ॥ २३३ ॥
दशमांशेन कर्पूरं तस्मिंश्चूर्णे विनिक्षिपेत् ।

एतत्प्रत्यञ्जनं नेत्रगदजिन्नयनामृतम् ॥ २३४ ॥

*कृष्णाञ्जनं = स्रोतोऽञ्जनम् । तथा च मदनपालः—
"स्रोतोऽञ्जनन्तु तद्विद्यादञ्जनाभं यदञ्जनम्" ॥ २३३—२३४ ॥

इति नयनामृतं प्रत्यञ्जनम् ।

अथ दृष्टिस्वच्छकारिणीं शलाकामाह—

त्रिफलाभृङ्गशुण्ठीनां रसैस्तद्वच्च सर्पिषा ।
गोमूत्रमध्वजाक्षीरैः सिक्तो नागः प्रतापितः ॥ २३५ ॥
तच्छलाका हरत्येव सर्वान्नेत्रभवान्गदान् ॥ २३६ ॥

इति भेषजानां विधानानि ।

अथ भेषजभक्षणसमयः ।

तस्य पाञ्चविध्यमाह—

भैषज्यमभ्यवहरेत्प्रभाते प्रायशो बुधः ।
कषायांस्तु विशेषेण तत्र भेदस्तु दर्शितः ॥ २३७ ॥
ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम् ।
किञ्चित्सूर्योदये जाते तथा दिवसभोजने ।
सायन्तने भोजने च मुहुश्चापि तथा निशि ॥ २३८ ॥

तत्र प्रथमकालस्य विषयानाह—

प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः ।
लेखनार्थे च भैषज्यं प्रभातेऽनन्नमाहरेत् ॥ २३९ ॥

अथ द्वितीयकालस्य विषयानाह—

भैषज्यं विगुणेऽपाने भोजनाग्रे प्रशस्यते ।
अरुचौ चित्रभोज्यैश्च मिश्रं रुचिरमाहरेत् ॥ २४० ॥
समानवाते विगुणे मन्देऽग्नावग्निदीपनम् ।
दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक् ॥ २४१ ॥
व्यानकोपे तु भैषज्यं भोजनान्ते समाहरेत् ।
हिक्काऽऽक्षेपककम्पेषु पूर्वमन्ते च भोजनात् ॥ २४२ ॥

अथ तृतीयकालस्य विषयानाह—

उदाने कुपिते वाते स्वरभङ्गादिकारिणि ।
ग्रासग्रासान्तरे देयं भैषज्यं सान्ध्यभोजने ॥ २४३ ॥

प्राणे प्रदुष्टे सान्ध्यस्य भुक्तस्यान्ते प्रदीयते ।
औषधं प्रायशो धीरैः कालोऽयं स्यात्तृतीयकः ॥ २४४ ॥

अथ चतुर्थकालस्य विषयानाह

मुहुर्मुहुश्च तृट्छर्दिहिक्काश्वासगरेषु च ।
सान्नञ्च भेषजं दद्यादिति कालश्चतुर्थकः ॥ २४५ ॥

अथ पञ्चमकालस्य विषयानाह—

ऊर्ध्वजत्रुविकारेषु लेखने बृंहणे तथा ।
पाचने शमने देयमनन्नं भेषजं निशि ॥ २४६ ॥

अथ निरन्नकोष्ठ ओषधिसेवनगुणानाह—

वीर्याधिकं भवति भेषजमन्नहीनं-
हन्यात्तदामयमसंशयमाशु चैव ।
तद्बालवृद्धयुवतीमृदुभिश्च पीतं-
ग्लानिं परां नयति चाशु बलक्षयञ्च ॥ २४७ ॥

अथान्नेन सहौषधसेवनगुणानाह—

शीघ्रं विपाकमुपयाति बलं न हिंस्या-
दन्नावृतं न च मुहुर्वदनान्निरेति ।
एतद्धितं स्थविरबालकृशाङ्गनाभ्यः-
प्राग्भोजनाद्यदशितं किल तच्च तद्वत् ॥ २४८ ॥

*तद्वद्=अन्नावृतवद्, भेषजमिति शेषः ॥ २४८ ॥

औषधशेषे भुक्तं भोजनशेषे यदौषधं पीतम् ।
न करोति गदोपशमम्प्रकोपयत्यन्यरोगांश्च ॥ २४९ ॥

*पीतमित्युपलक्षणं लीढादिकं च ॥ २४९ ॥

अथौषधपाकापाकयोश्चिह्नमाह—

अनुलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णासुमनस्कताः ।
लघुत्वमिन्द्रियोद्गारशुद्धिर्जीर्णौषधाकृतिः ॥ २५० ॥
क्लमो दाहोऽङ्गसदनं भ्रममूर्च्छाशिरोरुजाः ।
अरतिर्बलहानिश्च सावशेषौषधाकृतिः ॥ २५१ ॥

अथ चरकोक्तौषधसेवनविधिमाह—

देवान्गुरूंस्तथा विप्रान्पूजयित्वा प्रणम्य च ।

आशिषश्च समादाय श्रद्धया भेषजं भजेत् ॥ २५२ ॥
रसायनमिवर्षीणां देवानाममृतं यथा ।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥ २५३ ॥
ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः ।
देवाश्च सौषधिग्रामा भूमिदेवाश्च पान्तु वः ॥ २५४ ॥
औषधं हेमरजतमृद्भाजनपरिस्थितम् ।
पिबेदाप्तजनस्याग्रे प्रसन्नवदनेक्षणः ॥ २५५ ॥
प्रशान्तस्तूपविश्याथ पीत्वा पात्रमधोमुखम् ।
निक्षिप्याचम्य सलिलं ताम्बूलाद्युपयाजयेत् ॥ २५६ ॥

इति श्रीमिश्रलटकनतनयश्रीमन्मिश्रभावविरचिते भावप्रकाशे परिभाषाऽऽदिप्रकरणे-
षष्ठं धूमपानादिविधिप्रकरणं समाप्तम् ॥ ६ ॥

इति चिकित्सासप्ताङ्गानि च सम्पूर्णानि ।

अथ सप्तमं रोगिपरीक्षाप्रकरणम् ॥ ७ ॥

अथ चिकित्साऽर्थं रोगिणो वाग्भटोक्तपरीक्षामाह—

दर्शनस्पर्शनप्रश्नैस्तं परीक्षेत रोगिणम् ।
आयुरादि दृशा स्पर्शाच्छीतादि प्रश्नतः परम् ॥ १ ॥

*आयुरादि – आदिशब्दात्साध्यत्वासाध्यत्वादि । दृशा = दर्शनेन, अत्र "सम्पदादिभ्यश्चे"ति भावे क्विप् । स्पर्शात = स्पर्शनेन । शीतादि = शीतोष्णमृदुकठिनत्वादि । नाडीपरीक्षणं च । प्रश्नतः = उदरलाघवगौरवतृषाऽतृषाबुभुक्षाऽबुभुक्षाबलाबलादि ॥ १ ॥

मिथ्यादृष्टा विकारा हि दुराख्यातास्तथैव च ।
तथा दुष्परिपृष्टाश्च मोहयेयुश्चिकित्सकान् ॥ २ ॥
तत्र दर्शनं नेत्रजिह्वामूत्रादीनां कर्त्तव्यम् ।

तत्र नेत्रपरीक्षामाह—

नेत्रं स्यात्पवनाद्रूक्षं धूम्रवर्णं तथाऽरुणम् ।
कोटरान्तःप्रविष्टं च तथा स्तब्धविलोकनम् ॥ ३ ॥

हरिद्राखण्डवर्णं वा रक्तं वा हरितं तथा।
दीपद्वेषि सदाहञ्च नेत्रं स्यात्पित्तकोपतः ॥ ४ ॥
चक्षुर्बलासबाहुल्यात्स्निग्धं स्यात्सलिलप्लुतम्।
तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम् ॥ ५ ॥
नेत्रं द्विदोषबाहुल्यात्स्याद्दोषद्वयलक्षणम्।
त्रिदोषलिङ्गसङ्घेन तं मारयति रोगिणम् ॥ ६ ॥
त्रिदोषदूषितं नेत्रमन्तर्मग्नं भृशं भवेत्।
त्रिलिङ्गं सलिलस्रावि प्रान्तेनोन्मीलयत्यपि ॥ ७ ॥

अथ जिह्वापरीक्षामाह—

शाकपत्रप्रभा रूक्षा स्फुटना रसनाऽनिलात्।
रक्ता श्यावा भवेत्पित्ताल्लिप्ताऽऽर्द्रा धवला कफात् ॥ ८ ॥
परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके।
सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा ॥ ९ ॥

अथ मूत्रपरीक्षामाह—

वातेन पाण्डुरं मूत्रं रक्तं नीलञ्च पित्ततः।
रक्तमेव भवेद्रक्ताद्धवलं फेनिलं कफात् ॥ १० ॥
अथ शरीरस्य शैत्योष्णत्वादिज्ञानार्थं स्पर्शनं कार्यम्।

तत्र नाडीपरीक्षामाह—

पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य तु।
अङ्गुष्ठमूलगां नाडीं परीक्षेत भिषग्वरः ॥ ११ ॥
अङ्गुलीभिस्तु तिसृभिर्नाडीमवहितः स्पृशेत्।
तच्चेष्टया सुखं दुःखं जानीयात्कुशलोऽखिलम् ॥ १२ ॥
सद्यःस्नातस्य सुप्तस्य क्षुत्तृष्णाऽऽतपशीलिनः।
व्यायामश्रान्तदेहस्य सम्यङ् नाडी न बुध्यते ॥ १३ ॥
वातेऽधिके भवेन्नाडी प्रव्यक्ता तर्जनीतले।
पित्ते व्यक्ता मध्यमायां तृतीयाङ्गुलिगा कफे ॥ १४ ॥
तर्जनीमध्यमामध्ये वातपित्ताधिके स्फुटा।
अनामिकायां तर्जन्यां व्यक्ता वातकफे भवेत् ॥ १५ ॥

मध्यमाऽनामिकामध्ये स्फुटा पित्तकफेऽधिके।
अङ्गुलित्रितयेऽपि स्यात्प्रव्यक्ता सन्निपाततः॥ १६॥
वाताद्वक्रगतिं धत्ते पित्तादुत्प्लुत्य गामिनी।
कफान्मन्दगतिर्ज्ञेया सन्निपातादतिद्रुता॥ १७॥
वक्रमुत्प्लुत्य चलति धमनी वातपित्ततः।
वहेद्वक्रश्च मन्दश्च वातश्लेष्माधिकत्वतः॥ १८॥
उत्प्लुत्य मन्दं चलति नाडी पित्तकफेऽधिके।
कामात्क्रोधाद्वेगवहा क्षीणा चिन्ताभयप्लुता॥ १६॥
स्थित्वा स्थित्वा चलेद्या सा हन्ति स्थानच्युता तथा।
अतिक्षीणा च शीता च प्राणान्हन्ति न संशयः॥ २०॥
ज्वरकोपेन धमनी सोष्णा वेगवती भवेत्।
मन्दाग्नेः क्षीणधातोश्च सैव मन्दतरा मता॥ २१॥
चपला क्षुधितस्य स्यात्तृप्तस्य भवति स्थिरा।
सुखिनोऽपि स्थिरा ज्ञेया तथा बलवती मता॥ २२॥

अथ येन येन रोगाणां ज्ञानं स्यात्तत्तदाह—

हेतुस्तदनु सम्प्राप्तिः पूर्वरूपश्च लक्षणम्।
तथैवोपशयः पञ्च रोगविज्ञानहेतवः॥ २३॥

तत्र हेतोर्लक्षणमाह—

यत्तु न स्याद्विना येन तस्य तद्धेतुरुच्यते।
शास्त्रे संव्यवहाराय तत्पर्यायान्प्रचक्ष्महे॥ २४॥
निदानं कारणं हेतुर्निमित्तं च निबन्धनम्।
मूलमायतनं तत्र प्रत्ययोऽपि निगद्यते॥ २५॥

*तत्र हेतुः। व्याधीनां ज्ञानाय हेतुर्यथा—वर्षारूक्षश्रमहिमानशनानि मैथुनशोकचिन्ताभयादयो वातप्रकोपहेतवो वातजान् व्याधीन् बोधयन्ति। शरत्कटूष्णलोष्णतीक्ष्णक्रोधतृषाक्षुधाऽभिघातातपादयः पित्तप्रकोपहेतवः पित्तजान् व्याधीन् बोधयन्ति। वसन्तमधुरस्निग्धशीतादयः कफप्रकोपहेतवः कफजान् व्याधीन् बोधयन्ति॥ २४–२५॥

अथ सम्प्राप्तिलक्षणमाह—

यथा दुष्टेन दोषेण यथा चानुविसर्पता।

उत्पत्तिरामयस्यासौ सम्प्राप्तिर्जातिरागतिः ॥ २६ ॥

*यथा दुष्टेन दोषेण यथा कारणभेदेन दुष्टेन दोषेण यथा चानुविसर्पता अनेकधा दोषाणां विसर्पणमूर्ध्वाधस्तिर्यगादिगतिभेदेन तथा च विसर्पता, आमयस्य या उत्पत्तिः, असौ सम्प्राप्तिः । शास्त्रे व्यवहाराय सम्प्राप्तेः पर्यायानाह-जातिरागतिरिति । सम्प्राप्तिर्व्याधीनां ज्ञानाय हेतुः । यथा मिथ्याऽऽहारविहारकुपितवाताद्यामाशयगमनरसदूषणकोष्ठाग्निबहिर्निरसनरूपं ज्वरोत्पत्तिप्रकारं बोधयति । तथा व्याधीनां संख्यादोषांशकल्पनाप्राधान्यकालांश्च बोधयति । तेषु ज्ञातेषु चिकित्साविशेषश्च स्यात् ॥ २६ ॥

अथ सम्प्राप्त्यौपाधिकभेदानाह—

संख्याविकल्पप्राधान्यबलकालविशेषतः ।
सा भिद्यते यथाऽत्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति ॥ २७ ॥

*संख्याऽऽदिरूपा ये विशेषास्तेभ्यः सा संप्राप्तिर्भिद्यते भेदवती क्रियत इत्यर्थः । तत्र संख्यां विवृणोति । यथा ज्वरोऽष्टधा, अतीसारः षड्विध इत्यादि ॥ २७ ॥

अथ विकल्पव्याख्यानमाह—

दोषाणां समवेतानां विकल्पोंऽशांशकल्पना ॥ २८ ॥

*समवेतानां=समुदितानां दोषाणाम् । अंशांशकल्पना=हीनमध्याधिकभेदैर्भागकल्पना विकल्पः ॥ २८ ॥

अथ प्रधानव्याख्यानमाह—

स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत् ॥ २९ ॥

*व्याधेः स्वातन्त्र्येण प्राधान्यं पारतन्त्र्येणाप्राधान्यञ्च वदेदित्यर्थः । यथा स्वतन्त्रस्य ज्वरस्य प्राधान्यं ज्वराधीनानां श्वासादीनामप्राधान्यम् ॥ २९ ॥

अथ बलव्याख्यानमाह—

हेत्वादिकात्स्न्र्यावयवैर्बलाबलविशेषणम् ॥ ३० ॥

*अत्रापि व्याधेरित्यनुवर्त्तते । हेत्वादेः=हेतुपूर्वरूपरूपाणाम्, कात्स्न्र्येन=साकल्येन, अवयवैः=एकदेशेन, व्याधेर्बलाबलयोर्विशेषणं =विशेषबोधः ॥ ३० ॥

अथ कालव्याख्यानमाह—

नक्तंदिनर्त्तुभुक्तांशैर्व्याधिकालो यथामलम् ॥ ३१ ॥

*नक्तमत्राव्ययं रात्रिवाचकम्। एतेनैतदुक्तं यस्मिन्नक्तादिरंशो-यस्य दोषस्य प्रकोप उक्तोऽस्ति सोंऽशस्तस्य दोषजस्य व्याधेः काल-इत्यर्थः ॥ ३१ ॥

नक्तादेरंशेषु वातादिप्रकोप उक्तो वाग्भटेन—

ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः।
वयोऽहोरात्रभुक्तानामन्तमध्यादिगाः क्रमात् ॥ ३२ ॥ इति।

*ते=वातपित्तकफाः ॥ ३२ ॥

ऋतुषु वातादिकोपो यथा—

वर्षासु शिशिरे वायुः पित्तं शरदि उष्णके।
वसन्ते तु कफः कुप्येदेषा प्रकृतिरार्त्तवी ॥ ३३ ॥

अथ पूर्वरूपस्य लक्षणमाह—

पूर्वरूपन्तु तद्येन विद्याद्भाविनमामयम्।
सामान्यं च विशिष्टञ्च द्विविधं तदुदाहृतम् ॥
सामान्यं तत्र दोषाणां विशेषैरनधिष्ठितम्।
विशिष्टमीषद्व्यक्तं स्याद् विशेषैश्च समन्वितम् ॥ ३४ ॥

*दोषाणां विशेषाः=जृम्भाऽतिशयनेत्रदाहाग्निमान्द्यादयः। तत्र पूर्वरूपं व्याधीनां ज्ञानाय हेतुः। यथा-श्रमादयो भाविनं ज्वरं बोधयन्ति। अथ च त एव श्रमादयोऽतिशयितजृम्भायुक्ता भाविनं वातज्वरं, नेत्रदाहयुक्ता भाविनं पित्तज्वरं, वह्निमान्द्ययुक्ता भाविनं कफज्वरं बोधयन्ति ॥ ३४ ॥

अथ लक्षणस्य लक्षणमाह—

पूर्वरूपं विशिष्टं यद्व्यक्तं तल्लक्षणं स्मृतम्।
संस्थानं लिङ्गं चिह्नञ्च व्यञ्जनं रूपमाकृतिः ॥ ३५ ॥

विशिष्टं पूर्वरूपम् ईषद्व्यक्तरूपं तदेव सम्यग्व्यक्तं लक्षणं स्मृतम्। तस्य शास्त्रे व्यवहाराय पर्यायानाह-संस्थानमित्यादि। लक्षणं व्याधेर्ज्ञानाय हेतुर्यथा—

स्वेदावरोधः सन्तापः सर्वाङ्गग्रहणं तथा।

युगपद्यत्र रोगे तु स ज्वरः परिकीर्त्तितः ॥१॥

*युगपदेतल्लक्षणं ज्वरं बोधयति ॥ ३५ ॥

अथोपशयस्य लक्षणमाह--

औषधान्नविहाराणामुपयोगं सुखावहम् ।

नृणामुपशयं विद्यात्स हि सात्म्यमिति स्मृतः ॥ ३६ ॥

*उपशयो व्याधेर्ज्ञानाय हेतुर्यत उक्तं चरकेण—

"गूढलिङ्गं सङ्कीर्णलक्षणं च व्याधिमुपशयानुपशयाभ्यां परीक्षेते" इति। तथा च सुश्रुते—

"अभ्यङ्गस्वेदनस्नेहैर्विकारो वातिकस्तु यः ।

न शाम्येत् तत्र विज्ञेयं रक्तमत्रास्ति दूषितम्" ॥२॥ इति ॥३६॥

तत्र वायोरुपशयमाह—

मधुरलवणसाम्लस्निग्धनस्योष्णनिद्रा-

गुरुरधिकरबस्तिस्वेदसंमर्दनानि ।

दधिघृततिलतैलाभ्यङ्गसन्तर्पणानि

प्रकुपितपवमानं शान्तमेतानि कुर्य्युः ॥ ३७ ॥

अथ पित्तस्योपशयमाह—

तिक्तस्वादुकषायशीतपवनच्छायानिशावीजनं—

ज्योत्स्नाभूगृहयन्त्रवारिजलजं स्त्रीगात्रसंस्पर्शनम् ॥

सर्पिःक्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं—

पानाहारविहारभेषजमिदं पित्तप्रशान्तिं नयेत् ॥ ३८ ॥

अथ कफस्योपशयमाह—

रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवनं—

धूमात्युष्णशिरोविरेकवमनस्वेदोपवासादिकम् ॥

तृड्वाताध्वनियुद्धजागरजलक्रीडाऽङ्गनासेवनं—

पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं हरेत् ॥ ३९ ॥

*जलक्रीडा कफं कथं हरति तदाह—जलक्रीडाजनितशैत्येनावरुद्धोष्मा पङ्कलिप्तोऽभितः पाकाग्निरिवोग्रो भूत्वा कफं शोषयतीति समाधिः ॥ ३३ ॥

अथ रोगनिदानविवेचनमाह—

सर्वेषामेव रोगाणां निदानं कुपिता मलाः।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ॥ ४० ॥

*सर्वेषां रोगाणां निदानं सन्निकृष्टं कारणं, कुपिताः=स्वहेतुदुष्टा मला वातपित्तकफा एवेत्यन्वयः ॥ तथा च वाग्भटः—

"दोषा एव हि सर्वेषां रोगाणामेककारणम्" इति।

ननु आगन्तुजव्याधिषु व्यभिचारः स्यात्। तन्न, तत्राप्युत्पत्यनन्तरं दोषप्रकोपस्यावश्यम्भावित्वात्। उत्पन्नद्रव्येषु गुणयोगस्येव। उक्तश्च चरके—

"आगन्तुर्हि व्यथापूर्वो जायते पश्चान्निजैर्दोषैरनुबध्यत" इति।

तत्प्रकोपस्य तु=दोषप्रकोपस्य तु निदानम्, विविधाहितसेवनम्=विविधानि नानाविधानि यान्यहितान्यसात्म्यान्याहारादीनि तेषां सेवनम् ॥ ४० ॥

अथ वायोः प्रकोपस्य कारणान्याह—

नीवारस्त्रिपुटः सतीनचणकः श्यामाकमुद्गाढकी-
निष्पावश्च मकुष्ठकश्च वरटी भङ्गल्यकः कोद्रवः।
यद् द्रव्यं कटुकं सतिक्ततुवरं शीतञ्च रूक्षं लघु
स्वल्पाशो विषमाशनं निरशनं भुक्ते ह्यजीर्णेऽशनम् ॥ ४१ ॥
भुक्तं जीर्णतरं परिश्रमभरो गर्त्तादिकोष्णं घनं-
बाहुभ्यां तरणं तरोः प्रपतनं मार्गेऽतियानं पदा।
दण्डादिप्रहृतिस्तथोच्चपतनं धातुक्षयो जागरो-
मागस्यावरणं व्यवायभृशता वातादिवेगाहतिः ॥ ४२ ॥
अत्यर्थं वमनं विरेचनमतिस्रावोऽधिकश्चासृजो-
रोगान्मांसविहीनताऽतिमदनश्चिन्ता च शोको भयं।
वर्षा वै शिशिरो दिनस्य रजनेर्भागौ तृतीयौ।घनाः-
प्राग्वातस्तुहिनं शरीरमरुतो दुष्टेरमी हेतवः ॥ ४३ ॥

*नीवारः=प्रसाधिका, "तीनी" इति लोके। त्रिपुटः "खेसारी"

इति लोके । सतीनः=वर्त्तुलकलायः । निष्पावः=कोलशिम्बीसदृशफला राजशिम्बिस्तस्या बीजमन्नं भवति । वरटी=वराटिका, कुसुम्भबीजम्, "बर्रे" इति लोके । मङ्गल्यकः=मसूरः । विषमाशनम्=

"बहु स्तोकमकाले वा भुक्तं तद्विषमाशनम्" ॥

तरोः प्रपतनम्, तरोरित्युपलक्षणम् । अतियानं=पद्भ्यामतिचलनम् । जागरो रात्रौ । वातादिवेगाहतिः=आदिशब्देन विण्मूत्राहिक्कोद्गारच्छर्दिशुक्रक्षुत्तृषोच्छ्वासनिद्राः संगृह्यन्ते ॥ दिनस्य त्रिधा विभक्तस्य । एवं रजनेश्च । यस्य यस्य पुनरुक्तिस्तेन तेन वातस्यातिदुष्टिर्बोद्धया ॥ ४१-४३ ॥

अथ पित्तस्य प्रकोपकारणान्याह—

कट्वम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातप-
स्त्रीसम्भोगतृषाक्षुधाऽभिहननव्यायाममद्यादिभिः ।
भुक्ते जीर्यति भोजने च शरदि ग्रीष्मे तथा प्राणिनां-
मध्याह्ने च तथाऽर्द्धरात्रिसमये पित्तप्रकोपो भवेत् ॥४४॥

अथ विदाहिलक्षणमाह—

विदाहि द्रव्यमुद्गारमम्लं कुर्यात्तथा तृषाम् ।
हृदि दाहञ्च जनयेत्पाकं गच्छति तच्चिरात् ॥ ४५ ॥

अन्यच्च—

माषैस्तिलैः कुलत्थैश्च मत्स्यैमषामिषेण च ।
गव्येन दधितक्रेण नृणां पित्तं प्रकुप्यति ॥ ४६ ॥

अथ कफप्रकोपस्य कारणान्याह—

गुरुपटुमधुराम्लस्निग्धमाषैस्तिलैश्च
द्रवदधिदिननिद्राशीतसर्पिःप्रपूरैः ।
प्रथमदिवसभागे रात्रिभागेऽपि चाद्ये
भवति हि कफकोपो भुक्तमात्रे वसन्ते ॥ ४७ ॥

*प्रथमदिवसभागे त्रिधा विभक्तस्य दिवसस्य प्रथमभागे, । एवं रात्रेश्चाद्यभागे ॥ ४७ ॥

अथैको रोगोऽन्यरोगनिमित्तमित्याह—

*ननु सर्वेषां रोगाणां निदानं दुष्टा दोषा एव किमन्यदप्यस्तीति संशये चरक आह—

निदानार्थकरो रोगो रोगस्याप्युपलक्ष्यते ॥ ४८ ॥

*रोगस्य निदानार्थकरो रोगोऽप्युपलक्ष्यते दृश्यते । अत्र दृष्टान्तमाह—

*तद्यथा ज्वरसन्तापाद्रक्तपित्तमुदीर्यते ।
रक्तपित्ताज्ज्वरस्ताभ्यां श्वासश्चाप्युपजायते ।
प्लीहाभिवृद्ध्या जठरं जठराच्छोफ एव च ॥ ३ ॥
अर्शोभ्यो जाठरं दुःखं गुल्मश्चाप्युपजायते ।
प्रतिश्यायादथो कासः कासात्सञ्जायते क्षयः ॥ ४ ॥

अन्ये त्वाहुर्मधुकोशे-रोगस्य रोगश्चेन्निदानं तथा निदानमित्येवोच्येत तद्विहाय "निदानार्थकर" इति वचनमेतद्बोधयति । रोगस्य रोगो निदानार्थकरः=निदानकार्यकरणे सहायः । निदानन्तु रक्तपित्तादीन्कति चिद्रोगान्प्रति ज्वरादिरेव हेतुरिति सिद्धान्तः । अतएवाग्रे स्पष्टमेवाह चरकः-"कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वे"ति । प्रथमस्य रोगस्य ज्वरादेर्यो दुष्टो दोषो हेतुः स एव पश्चाद्भाविनो रक्तपित्तादेरपि रोगस्य हेतुः "सर्वेषामेव रोगाणां निदानं कुपिता मला" इति नियमात् । तन्न-तदा रक्तपित्तादेरुपद्रवलक्षण एव योगेन रोगत्वविघातः स्यात्ततः सर्वेषामिति वचनं सामान्यम् । "निदानार्थकर" इति विशेषवचनात् ॥ ४८ ॥

अथ रोगस्य हेतो रोगस्य वैचित्र्यमाह—

कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्यति ४९ ॥

*यथा ज्वरो रक्तपित्तमुत्पाद्य स्वयं प्रशाम्यति । ननु येन दोषोद्रेकेण ज्वरो रक्तपित्तमुत्पादितवांस्तस्मिन् सति स तु ज्वरः कथं शाम्यति । तत्र व्याधिस्वभाव एव कारणमिति न दोषः ॥ ४९ ॥

न प्रशाम्यति चाप्यन्यो हेत्वर्थं कुरुतेऽपि च ॥ ५० ॥

*अन्यो हेत्वर्थमपि कुरुते स्वयञ्च न प्रशाम्यति । यथा प्रतिश्या-

यः कासं करोति स्वयञ्च न प्रशाम्यति । तथाऽर्शो जठरगुल्मौ करोति स्वयञ्च न निवर्त्तत इति ॥ ५०॥

अथ वृद्धक्षीणानां दोषधातुमलानां सुश्रुतोक्तचिकित्सामाह—

अत्यन्तकुत्सितावेतौ सदा स्थूलकृशौ नरौ ।
श्रेष्ठो मध्यशरीरस्तु स्थूलः क्षीणो न पूजितः ॥
कर्षयेद् बृंहयेच्चापि सदा स्थूलकृशौ नरौ ।
रक्षणञ्चापि मध्यस्य कुर्वीत कुशलो भिषक् ॥ ५१ ॥

अन्यच्च ।

क्षपयेद् बृंहयेच्चापि दोषधातुमलान्भिषक् ।
नरो रोगान्वितो यावद्रोगेण रहितो भवेत् ॥ ५२ ॥

*क्षपयेद् = अतिप्रवृद्धान्दोषधातुमलांस्तत्र क्षैण्यहेतुभिरौषधान्नविहारैर्ह्रासयित्वा समीकुर्यात् । बृंहयेत् = क्षीणान्दोषादींस्तद्वृद्धिहेतुभिरौषधान्नविहारैर्वर्द्धयित्वा समीकुर्यात् ॥ ५२ ॥

अस्वस्थो येन विधिना स्वस्थो भवति मानवः ।
तमेव कारयेद्वैद्यो यतः स्वास्थ्यं सदेप्सितम् ॥ ५३ ॥

अथ स्वस्थस्य लक्षणमाह—

समदोषः समाग्निश्च समधातुमलक्रियः ।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥ ५४ ॥

*समक्रियः = शरीरानुरूपकर्मा । आत्माऽत्र शरीरम् ॥ ५४ ॥

तन्त्रान्तरेऽपि—

विण्मूत्राखिलदोषधातुसमताकाङ्क्षाऽन्नपाने रुचि-
र्भुक्तं जीर्यति पुष्टये परिणतिः स्वप्नावबोधैः सुखम् ॥
गृह्णीते विषयान्यथास्वमुचितान्वृत्तिं मनोवृत्तितः-
स्वस्थस्याभिहितं चतुर्दशविधं जन्तोरिदं लक्षणम् ॥ ५५ ॥

*रुचिः = शरीरकान्तिः । ननु—अहर्निशर्त्तुभुक्तवत्सु दोषाणां वृद्धेः कथं समदोषता? उच्यते—अहोरात्रप्रथमभागादिषु तत्तद्दोषवृद्धेः स्वस्थवृत्तोक्तविधिभिरुपशमात्समदोषतेति न दोषः । किञ्च—

*यत्समत्वं हि दोषाणां भिषग्भिरवधार्यते ।

न तत्स्वास्थ्यं विना वक्तुं शक्यमन्येन हेतुना ॥ ५ ॥

*तेन समदोषस्वस्थयोर्लक्षणमन्योऽन्यापेक्षया स्वस्थः समदोषः, समदोषः स्वस्थः, स्वस्थेभ्यो हितं च तद्दोषधातुमलानां स्वप्रमाणस्थितानां साम्यानुवृत्तिहेतुर्यद्व्यापच्च स्वस्थानुवृत्तिं करोति । ऋतुचर्याऽध्याये सेव्यत्वेनोक्तम् । तथा मात्राशितीयेऽध्याये रक्तशालिषष्टिकयवगोधूमजाङ्गलमांसजीवन्तीशाकादिमोदकक्षीरादि । तथा यदोजस्करं रसायनं वाजीकरणं सर्वदा शीलनीयत्वेन निर्दिष्टम् ॥ ५५ ॥

अथ दोषधातुमलानां वृद्धेर्निदानान्याह—

तत्तद्वृद्धिकराहारविहारातिनिषेवणात् ।
दोषधातुमलानां हि वृद्धिरुक्ता भिषग्वरैः ॥ ५६ ॥

अथातिवृद्धानां तेषां लक्षणान्याह—

वाते वृद्धे भवेत्कार्श्यं पारुष्यं चोष्णकामिता ।
गाढं मलं बलश्चाल्पं गात्रस्फूर्त्तिर्विनिद्रता ।
विण्मूत्रकेशगात्राणां पीतत्वं क्षीणमिन्द्रियम् ।
शीतेच्छातापमूर्च्छाः स्युः पित्ते वृद्धेऽल्पमूत्रता ॥ ५७ ॥
विडादिशौक्ल्यं शीतत्वं गौरवश्चातिनिद्रता ।
सन्धिशैथिल्यमुत्क्लेदो मुखसेकः कफेऽधिके ॥ ५८ ॥
रसे वृद्धेऽन्नविद्वेषो जायते गात्रगौरवम् ।
लालाप्रसेकश्छर्दिश्च मूर्च्छा सादो भ्रमः कफः ॥ ५९ ॥
प्रवृद्धं रुधिरं कुर्याद्गात्रमारक्तवर्णकम् ।
लोचनञ्च तथा रक्तं शिराः पूरयतेऽपि च ॥ ६० ॥

अन्यच्च—

रक्तन्तु कुरुते वृद्धं विसर्पप्लीहविद्रधीन् ।
कुष्ठं वातास्रकं गुल्मं शिरापूर्णत्वकामले ॥ ६१ ॥
गात्राणां गौरवं निद्रा मदो दाहश्च जायते ।
व्यङ्गाग्निसादसंमोहरक्तत्वङ्नेत्रमूत्रताः ॥ ६२ ॥
गुदमेढ्रास्यपाकार्शःपिडकामशकास्तथा ।
इन्द्रलुप्ताङ्गमर्दासृग्दरास्तापं कराङ्घ्रिषु ॥ ६३ ॥

शमयेद्रक्तवृद्ध्युत्थान् रक्तस्रुतिविरेचनैः ।
मांसं वृद्धन्तु गण्डौष्ठस्फिगुपस्थोरुबाहुषु ॥ ६४ ॥
जङ्घयोः कुरुते वृद्धिं तथा गात्रस्य गौरवम् ।
उदरे पार्श्वयोर्वृद्धिः कासश्वासादयस्तथा ।
दौर्गन्ध्यं स्निग्धता गात्रे मेदोवृद्धौ भवेदिति ॥ ६५ ॥

अन्यच्च—

प्रवृद्धं कुरुते मेदः श्रममल्पेऽपि चेष्टिते ।
तृट्स्वेदगलगण्डौष्ठरोगमेहादिजन्म च ॥ ६६ ॥
श्वासं स्फिग्जठरग्रीवास्तनानां लम्बनं तथा ।
वृद्धान्यस्थीनि कुर्वन्ति अस्थीन्यन्यानि चास्थिषु ॥ ६७ ॥
आचरन्ति तथा दन्तान्विकटान्महतस्तथा ।
मज्जा वृद्धः समस्ताङ्गनेत्रगौरवमाचरेत् ॥ ६८ ॥
शुक्राश्मरी शुक्रवृद्धौ शुक्रस्यातिप्रवर्त्तनम् ।
मलप्रवृद्धावाटोपो जायते जठरे व्यथा ॥ ६९ ॥
मूत्रे वृद्धे मुहुर्मूत्रमाध्मानं बस्तिवेदना ।
स्वेदे वृद्धे तु दौर्गन्ध्यं त्वचि कण्डूश्च जायते ॥ ७० ॥
आर्त्तवातिप्रवृत्तिः स्याद्दौर्गन्ध्यं चार्त्तवे भवेत् ।
अङ्गमर्दश्च जायेत लिङ्गं स्यादार्त्तवेऽधिके ॥ ७१ ॥
स्तनयोरतिपीनत्वं क्षीरस्रावो मुहुर्मुहुः ।
तोदश्च तत्र भवति स्तन्याधिक्यस्य लक्षणम् ॥ ७२ ॥
उदरादिप्रवृद्धिस्तु वृद्धे गर्भेऽभिजायते ।
स्वेदश्च गर्भवत्याः स्यात्प्रसवे व्यसनं महत् ॥ ७३ ॥

अथातिवृद्धानां दोषधातुमलानां ह्रासनमाह—

तत्तद्ध्रासकराहारविहारपरिषेवणात् ।
दोषधातुमलानां हि ह्रासो निगदितो नृणाम् ॥ ७४ ॥
पूर्वः पूर्वोऽतिवृद्धत्वाद् वर्द्धयेद्धि परस्परम् ।
तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितम् ॥ ७५ ॥

अथ दोषधातुमलानां क्षयस्य निदानान्याह—

असात्म्यान्नसदाक्रोधशोकचिन्ताभयश्रमैः ।

अतिव्यवायानशनात्यर्थसंशोधनैरपि ॥ ७६ ॥
वेगानां धारणाच्चापि साहसाद्विघाततः।
दोषाणामथ धातूनां मलानाञ्च भवेत्क्षयः ॥ ७७ ॥

अथ क्षीणानां तेषां लक्षणान्याह—

वातक्षयेऽल्पचेष्टत्वं मन्दवाक्यं विसंज्ञता।
पित्तक्षयेऽधिकः श्लेष्मा वह्निमान्द्यं प्रभाक्षयः ॥ ७८ ॥
सन्धयः शिथिला मूर्च्छा रौक्ष्यं दाहः कफक्षये।
हृत्पीडा कण्ठशोषौ त्वक् शून्या तृट् च रसक्षये ॥ ७९ ॥
शिराः श्लथा हिमा म्लेच्छा त्वक्पारुष्यं क्षयेऽसृजः।
गण्डौष्ठकन्धरास्कन्धवक्षोजठरसन्धिषु ॥ ८० ॥
उपस्थशोथपिण्डीषु शुष्कता गात्ररूक्षता।
तोदो धमन्यः शिथिला भवेयुर्मांससंक्षये ॥ ८१ ॥
प्लीहाभिवृद्धिः सन्धीनां शून्यता तनुरूक्षता।
प्रार्थना स्निग्धमांसस्य लिङ्गं स्यान्मेदसः क्षये ॥ ८२ ॥
अस्थिशूलं तनौ रौक्ष्यं नखदन्तत्रुटिस्तथा।
अस्थिक्षये लिङ्गमेतद्वैद्यैः सर्वैरुदाहृतम् ॥ ८३ ॥
शुक्राल्पत्वं पर्वभेदस्तोदः शून्यत्वमस्थनि।
लिङ्गान्येतानि जायन्ते नराणां मज्जसंक्षये ॥ ८४ ॥
शुक्रक्षये रतेऽशक्तिर्व्यथा शेफसि मुष्कयोः।
चिरेण शुक्रसेकः स्यात्सेके रक्ताल्पशुक्रता ॥ ८५ ॥

अथौजःक्षयस्य निदानमाह—

ओजः संक्षीयते कोपाच्चिन्ताशोकश्रमादिभिः।
रूक्षतीक्ष्णोष्णकटुकैः कर्षणैरपरैरपि ॥ ८६ ॥

अथ क्षीणौजसो लक्षणमाह—

बिभेति दुर्बलोऽभीक्ष्णं चिन्तयेद्व्यथितेन्द्रियः।
अभ्युत्थायोन्मना रूक्षः क्षामः स्यादोजसः क्षये ॥ ८७ ॥

अथ मलक्षयस्य लक्षणमाह—

पुरीषस्य क्षये पार्श्वे हृदये च व्यथा भवेत्।

सशब्दस्यानिलस्योर्ध्वगमनं कुक्षिसंवृतिः ॥ ८८ ॥

*कुक्षिसंवृतिः = उदरसङ्कोचः ॥ ८८ ॥

अथ मूत्रादीनां क्षयस्य लक्षणमाह—

मूत्रक्षयेऽल्पमूत्रत्वं बस्तौ तोदश्च जायते ।
स्वेदनाशस्त्वचो रौक्ष्यं चक्षुषोरपि रूक्षता ॥ ८९ ॥
स्तब्धाश्च रोमकूपाः स्युर्लिङ्गं स्वेदक्षये भवेत् ॥
आर्त्तवस्य स्वकाले चाभावस्तस्याल्पताऽथ वा ॥ ९० ॥
जायते वेदना योनौ लिङ्गं स्यादार्त्तवक्षये ।
अभावः स्वल्पता वा स्यात्स्तन्यस्य भवतस्तथा ॥ ९१ ॥
म्लानौ पयोधरावेतल्लक्षणं स्तन्यसंक्षये ।
अनुन्नतो भवेत्कुक्षिर्गर्भस्यास्पन्दनं तथा ।
इति गर्भक्षये प्राज्ञैर्लक्षणं समुदाहृतम् ॥ ९२ ॥

अथ क्षीणधातुदोषमलानां वर्द्धनविधिमाह—

तत्तत्संवर्द्धनाहारविहारातिनिषेवणात् ।
तत्तत्प्राप्य नरः शीघ्रं तत्तत्क्षयमपोहति ॥ ९३ ॥
ओजस्तु वर्द्धते नृणां सुस्निग्धैः स्वादुभिस्तथा ।
वृष्यैरन्यैर्विशेषात्तु क्षीरमांसरसादिभिः ॥ ९४ ॥

अन्यच्च—

दोषधातुमलक्षीणो बलक्षीणोऽपि मानवः ।
तत्तत्सम्वर्धनं यत्तदन्नपानं प्रकाङ्क्षति ॥ ९५ ॥
यद्यदाहारजातन्तु क्षीणः प्रार्थयते नरः ।
तस्य तस्य स लाभेन तत्तत्क्षयमपोहति ॥ ९६ ॥

तत्र केन क्षीणं किं काङ्क्षतीत्याकाङ्क्षायामाह—

कषायकटुतिक्तानि रूक्षशीतलघूनि च ।
यवमुद्गप्रियङ्गूश्च वातक्षीणोऽभिकाङ्क्षति ॥ ९७ ॥
तिलमाषकुलत्थादिपिष्टान्नविकृतिं तथा ।
मस्तुशुक्ताम्लतक्राणि काञ्जिकञ्च तथा दधि ॥ ९८ ॥
कट्वम्ललवणोष्णानि तीक्ष्णं क्रोधं विदाहि च ।

समयं देशमुष्णञ्च पित्तक्षीणोऽभिकाङ्क्षति ॥ ९९ ॥
मधुरस्निग्धशीतानि लवणाम्लगुरूणि च ।
दधि क्षीरं दिवास्वप्नं कफक्षीणोऽभिकाङ्क्षति ॥ १०० ॥
रसक्षीणो नरः काङ्क्षत्यम्भोऽतिशिशिरं मुहुः ।
रात्रिनिद्रां हिमं चन्द्रं भोक्तुञ्च मधुरं रसम् ॥ १०१ ॥
इक्षुं मांसरसं मन्थं मधु सर्पिर्गुडोदकम् ॥ १०२ ॥
द्राक्षादाडिमशुक्तानि सस्नेहलवणानि च ।
रक्तसिद्धानि मांसानि रक्तक्षीणोऽभिकाङ्क्षति ॥ १०३ ॥
अन्नानि दधिसिद्धानि षाडवांश्च बहूनपि ।
स्थूलक्रव्यादमांसानि मांसक्षीणोऽभिकाङ्क्षति ॥ १०४ ॥

*षाडवाः = मधुराम्लादिरससंयोगपाचिता गुडावप्रभृतयः ॥१०४॥

मेदःसिद्धानि मांसानि ग्राम्यानूपौदकानि च ।
सक्षाराणि विशेषेण मेदःक्षीणोऽभिकाङ्क्षति ॥ १०५ ॥
अस्थिक्षीणस्तथा मांसं मज्जास्थिस्नेहसंयुतम् ।
स्वाद्वम्लसंयुतं द्रव्यं मज्जाक्षीणोऽभिकाङ्क्षति ॥ १०६ ॥
शिखिनः कुक्कुटस्याण्डं हंससारसयोस्तथा ।
ग्राम्यानूपौदकानाञ्च शुक्रक्षीणोऽभिकाङ्क्षति । १०७ ॥
यवान्नं यवकान्नञ्च शाकानि विविधानि च ।
मसूरमाषयूषञ्च मलक्षीणोऽभिकाङ्क्षति ॥ १०८ ॥
पेयमिक्षुरसं क्षीरं सगुडं बदरोदकम् ।
मूत्रक्षीणोऽभिलषति त्रपुसैर्वारुकाणि च ॥ १०९ ॥
अभ्यङ्गोद्वर्त्तने मद्यं निवातशयनासने ।
गुरु प्रावरणं चैव स्वेदक्षीणोऽभिकाङ्क्षति ॥ ११० ॥
कट्वम्ललवणोष्णानि विदाहीनि गुरूणि च ।
फलशाकानि पानानि स्त्री काङ्क्षत्यार्त्तवक्षये ॥ १११ ॥
सुराशाल्यन्नमांसानि गोक्षीरं शर्करां तथा ।
आसवं दधि हृद्यानि स्तन्यक्षीणाऽभिवाञ्छति ॥ ११२ ॥
मृगाजाविवराहाणां गर्भान्वाञ्छति संस्कृतान् ।

चसाशूल्यप्रकारादीन्भोक्तुं गर्भपरिक्षये ॥ ११३ ॥

अथ सुश्रुतोक्तबललक्षणमाह—

रसादिशुक्रपर्य्यन्तं धातुपुष्टिनिमित्तकम् ।
चेष्टासु पाटवं यत्तु बलं तदभिधीयते ॥ ११४ ॥

अथ बलक्षयस्य निदानमाह—

अभिघाताद्भयात्क्रोधाच्चिन्तया च परिश्रमात् ।
धातूनां संक्षयाच्छोकाद् बलं संक्षीयते नृणाम् ॥ ११५ ॥

अथ बलक्षयस्य लक्षणमाह—

गौरवं स्तब्धता गात्रे मुखम्लानिर्विवर्णता ।
तन्द्रा निद्रा वातशोथो बलव्यापत्तिलक्षणम् ॥ ११६ ॥

अथ बलवृद्धेर्निदानमाह—

दोषसाम्यकरं यत्तु वह्निसाम्यकरं च यत् ।
धातुपुष्टिकरं द्रव्यं बलं तदभिवर्द्धयेत् ॥ ११७ ॥

अथ बलाबललक्षणमाह—

कृशोऽपि बलवान्कश्चित् स्थूलोऽप्यल्पबलो यतः ।
तस्माच्चेष्टापटुत्वेन बलवन्तं विदुर्बुधाः ॥ ११८ ॥

इति सप्तमं परिभाषाऽऽदिप्रकरणं समाप्तम् ॥ ७ ॥

इति श्रीमिश्रलटकनतनयश्रीमन्मिश्रभावविरचिते श्रीभावप्रकाशे पूर्वखण्डे परिभाषाऽऽदिप्रकरणे सप्तमं रोगिपरीक्षाप्रकरणं समाप्तम् ॥ ७ ॥

इति पूर्वखण्डे समाप्तो द्वितीयो भागः ।

समाप्तश्च पूर्वखण्डः ।

THE

HARIDAS SANSKRIT SERIES

39

S'RĪ

BHĀVAPRAKĀS'A

By

S'RIBHĀVAMIS'RA

Edited with Introduction & Index,

By

Pandit S'ri Brahma S'ankara Mis'ra

(PART-II)

PUBLISHED & SOLD BY

JAI KRISHNA DÂS HARIDÂS GUPTA

The Chowkhamba Sanskrit Series Office.

Benares City.

1935

PUBLISHED BY
JAI KRISHNA DAS HARI DAS GUPTA
The Chowkhamba Sanskrit Series Office.
BENARES.

Printed at the Vidya Vilas Press, Benares.

1935.

* श्रीः *

हरिदास-संस्कृत-ग्रन्थमाला

३९

॥ श्रीः ॥

श्रीभावप्रकाशः ।

(मध्यमोत्तरखण्डमात्रः)

भिषग्भूषणश्रीमद्भावमिश्रेण विरचितस्तत्कृतया विषमस्थलटीकयोपेतः ।

श्रीमन्मध्वसम्प्रदायाचार्यदार्शनिकसार्वभौमसाहित्यदर्शनाद्याचार्यन्यायरत्नतर्करत्न-
गोस्वामिश्रीदामोदरशास्त्रिणामन्तेवासिना "बस्ती" मण्डलान्तर्गत "मिश्रौ-
लिया" ग्रामवासिना सरयूपारीणपङ्क्तिपावनान्ववायिना गौतमगोत्रोद्भव-
श्रीव्रजमोहनशर्मसूनुना साहित्यशास्त्रिणा मिश्रोपाह्व-

श्रीब्रह्मशङ्करशर्मणा

सम्पादितश्च ।

प्रकाशकः—

जयकृष्णदास हरिदास गुप्तः—
चौखम्बा संस्कृत सीरिज़ आफिस,
बनारस सिटी ।

सं० १९९२ वै०

प्राप्तिस्थानम्—

चौखम्बा-संस्कृत-पुस्तकालय

बनारस सिटी।

श्रीश्रीगौरकृष्णः शरणम् ।

किमपि निवेदनम् ।

अयि ! सर्वदा शर्मदायुर्वेदीयभावप्रकाशपूर्णतामभीप्सवो-

विद्वज्जनाः प्रियच्छात्रगणाश्च !

दिष्ट्या कारुण्यदृष्ट्या परमया परमेशितुः श्रीकृष्णस्य श्रीराधारमणस्यैव; जातमिदं महत् प्रमोदस्थानं यद्—

"नातिदीर्घेण कालेनैव भवतामग्रेऽवशिष्टमध्यमोत्तरखण्डप्रदानेन समग्रं "भावप्रकाश" नाम्ना प्रकाशमानं ग्रन्थं समुपस्थापयितुं प्रभुरभूवमि"ति, अस्तु—

संप्रति भवद्दृष्टिपथं प्राप्तेऽस्मिन् ग्रन्थेऽन्तिमाष्टमचिकित्साप्रकरणमात्रं भावप्रकाशस्य बोध्यम्, तच्च मध्यमोत्तरखण्डद्वयात्मकं द्विसप्तत्यधिकारपूरितम्, तत्र प्रथमं मध्यखण्डं तु सप्तत्यधिकारैर्ज्वरप्रभृतिनामधेयैः संवलितंभागचतुष्टयात्मकम्, द्वितीयमुत्तरखण्डन्तु केवलेनाधिकारद्वयेन पूर्णतामभजत् ।

तत्रादौ मध्यखण्डे ज्वरादयो रोगाः प्रायशो माधवनिदानसरणिमनुसृत्य तत्क्रमेण निदानव्याख्यानपुरस्कृताः समुचितस्वानुभूतसंगृहीतचिकित्साविधानसमन्विताश्च विनिर्दिष्टाः, अत्र क्रमेण ज्वरा—तीसार—ज्वरातिसार—ग्रहण्यधिकाराः प्रथमे भागे तत्तद्विप्रकृष्टसंनिकृष्टनिदानसम्प्राप्तिभेदलक्षणभेषजसमन्विता निवेशिताः सन्ति, द्वितीये भागे—अर्शो—जठराग्निविकार—कृमिरोग—पाण्डुरोगकामलाहलीमक—रक्तपित्ता—म्लपित्तश्लेष्मपित्त—राजयक्ष्म—कास—हिक्का—श्वासस्वरभेदा—रोचक—च्छर्दि—तृष्णा—मूर्च्छाभ्रमनिद्रातन्द्रासंन्यास—मदात्यय—दाहो—न्मादा—पस्मार—वातव्याध्यू—रुस्तम्भा—मवात—पित्तव्याधि—श्लेष्मव्याधि—वातरक्तनामकाश्चतुर्विंशत्यधिकाराः, एवं तृतीये भागे—शूलपरिणामशूलान्नद्रवजरत्पित्तोपनामकशूलो—दावर्त्तानाह-गुल्म—प्लीहयकृद्—धृद्रोग—मूत्रकृच्छ्र—मूत्राघाता—श्मरीरोग—प्रमेहपिडका—स्थौल्य—कार्श्यो—दर-

शोथ-वृद्धिव्रध्न-गलगण्डगण्डमालाग्रन्थ्यर्बुद—श्लीपद-विद्रधि-व्रण-पद-लाञ्छना एकोनविंशत्यधिकारास्तथा चतुर्थे भागे—नाडाव्रण-भगन्दरो-पदंश-लिङ्गार्शः-शूकदोष-कुष्ठ-शीतपित्तोदर्दकोठोत्कोठ-विसर्प-स्नायुरोग-विस्फोटक-फिरङ्गरोग--मसूरिकाशीतला-क्षुद्ररोग-शिरोरोग-नेत्ररोग-कर्ण-रोग-नासारोग-मुखरोग-विष-प्रदर-सोमरोग—योनिरोग-बालरोग-व्यपदे-शभाजस्त्रयोविंशत्यधिकाराः सन्ति ।

तेषु च स्वस्वविप्रकृष्टसंनिकृष्टनिदानसम्प्राप्तिभेदलक्षणौषधानां यथायथं-वर्णनं मनोहरं निबद्धम् ।

किञ्चात्र फिरङ्गरोगस्यार्वाचीनत्वेऽप्युपयोगितामाकलय्य तदधिकारे यद् यथामति ग्रन्थकर्त्रा तच्चिकित्सापद्धतिर्लिपिबद्धा कृता, तेन तस्य वैद्योचितबु-द्धिवैशद्ये केनापि नापि विचिकित्साऽवसरः ।

उत्तरखण्डे तु-वाजीकरण-रसायनाह्वयोर्द्वयोरधिकारयोरेव समुल्लेखः, तत्र यथाक्रमं क्लैब्यस्य भेदलक्षणनिर्देशपुरःसरं तच्चिकित्साऽपि संक्षेपतोऽभि-हिता, अन्ते च-रसायनस्य लक्षणं प्रयोगमप्यल्पीयस्त्वेन वर्णयता ग्रन्थकृता शुभाशीर्वादप्रदानपुरःसरं ग्रन्थः समापि ।

अपि चात्र बहुषु;स्थलेषु प्रतिपुस्तकं भ्रमजनकपाठा यथामति संशोधि-ताः, अस्मत्सविधे पुस्तकद्वयमासीदादर्शपाठावाप्तये, एकं श्रीवेङ्कटेश्वरमुद्रणय-न्त्रालयात् प्रकाशितचरम् , अपरं वङ्गीयलिपिबद्धं "कलिकाता"नगरे मुद्रितम् , अनयोरन्त्यमेवास्माकं प्रायश आदर्शपुस्तकमपेक्षाकृतं शुद्धमिति धारणा ।

अस्य विषमस्थलटीकाऽभिव्यक्त्यै सर्वत्र तत्तत्स्थलेषु पुष्पाकार❀चिह्नानि प्रदत्तान्यस्माभिः स्वप्रकाशितचरैतदीयपूर्वखण्डवत् ।

किञ्च टीकायामोषधीनां नामान्तराभिधाने क चित् संयुक्तप्रान्तीयभाषा-भाषिसम्मतस्य कुत्र चिद् वङ्गदेशीयभाषोदितस्य नाम्नः समुल्लेखेनायं भा-वमिश्रमहोदयो वङ्गीय उत संयुक्तप्रान्तीयोऽथवा किंप्रान्तीय इति विनिश्चेतु-

मशक्यतया विरम्यतेऽस्माभिरेतद्विषयकविचारसरणितोऽतः क्षन्तव्या वयम्, यदि शक्यो भविष्यति तदा पुनः संस्करणान्तरे निश्चयो भविष्यति।

अत्र विषयानुक्रमणिकानिर्माणसमये लेखनसाहाय्येन समयेऽर पाठशोधनावसरे वङ्गाक्षरमुद्रितपुस्तकपाठसाहाय्येन यादृशं बन्धुत्वं वङ्गदेशीयश्री श्री १००८ श्रीकृष्णचैतन्यचरणोपदिष्टैकराजपथपथिकप्रवर "ठाकुरोपाह्वश्रीराखालानन्द" महोदयात्मजतल्लजेनान्वर्थनामकेन "श्रीस्वरूपानन्द" महाशयेन प्रादर्शि, तत्प्रकटीकरणे नितरामसमर्थेन मया केवलं तदभिनन्दनसमर्थेन भूत्वा कर्त्तव्यपालनं क्रियते।

अस्य मुद्रणं विद्याविलासमुद्रणयन्त्रालयाधिपतिना श्रेष्ठिप्रवरसज्जनशिरोभूषण "श्रीहरिदासगुप्ता"त्मज "श्रीजयकृष्णदासगुप्त" महोदयेन सर्वेषां विदुषां सौलभ्यार्थमेव स्वकीयद्रव्यव्ययेन पूर्वखण्डात् पृथक् कृतं,-तदनुरोधपारवश्येन मया यथामति प्राकाशि ग्रन्थोऽयमल्पीयसा कालेनातोझटिति प्रकाशनवशाद् यदि कुत्रापि प्रमादतो दृष्टिदोषस्य नान्तरीयकतया ज्ञानाज्ञानविजृम्भिता काचिदपि मानुष्यकसुलभा त्रुटिरत्र दक्पथमायायात्तदा-

"गच्छतः स्खलनं क्वापि
भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र
समादधति साधवः" ॥

इत्यभियुक्तोक्तिमङ्गीकृत्य साधुपथमूरीकुर्वद्भिस्तत्रभवद्भिरायुर्वेदविद्भिः स्वकीयेव सा क्षम्येतेति सविनयमनुनयो—

श्री राधारमणमन्दिरे	विदुषामेकान्तविनेयस्य
(बुलानाला) काश्याम्	साहित्यशास्त्रिणो
अधिदीपावलि	**ब्रह्मशङ्करमिश्रस्य**
सं० १९९२ वैक्रमीये	

प्राप्तिस्थानम्—

चौखम्बा संस्कृत पुस्तकालय

बनारस सिटी ।

॥ श्रीः ॥

भावप्रकाशः

अथ मध्यखण्डम् ।

तत्र

प्रथमो भागः ।

तत्राष्टमं चिकित्साप्रकरणम् ॥ ८ ॥

तत्रादौ ज्वराधिकारमाह—

यतः समस्तरोगाणां ज्वरो राजेति विश्रुतः ।
अतो ज्वराधिकारोऽत्र प्रथमं लिख्यते मया ॥ १ ॥

तत्र ज्वरस्य प्रथमोत्पत्तिमाह सुश्रुतः—

दक्षापमानसंक्रुद्धरुद्रनिःश्वाससम्भवः ।
ज्वरोऽष्टधा पृथग्द्वन्द्वसंघातागन्तुजः स्मृतः ॥ २ ॥

*अस्यायमर्थः-दक्षकर्तृको योऽपमानस्तेन संक्रुद्धो यो रुद्रः, तस्य यो निःश्वासः, तस्मात्सम्भव उत्पत्तिर्यस्य स ज्वरः । क्रुद्धरुद्रनिःश्वाससम्भूतत्वेन ज्वरः स्वभावात्पैत्तिक इति बोध्यते । यत उक्तं चरकेण-क्रोधात्पित्तमित्यादि । तेन सर्वज्वरेषु पित्तोपशमकारिणी चिकित्सा कर्त्तव्या ।

अत एवाह वाग्भटः—

*उष्मा पित्तादृते नास्ति ज्वरो नास्त्युष्मणा विना ।
तस्मात्पित्तविरुद्धानि त्यजेत्पित्ताधिकेऽधिकम् ॥ १ ॥

*अधिकमिति । रुद्रसम्भूतत्वेन ज्वरस्य देवताऽऽत्मकत्वात्पूजार्हत्वं चोपदर्शितम् ।

अत एव वैदेहः—

*ज्वरः सम्पूजनैर्वाऽपि सहसैवोपशाम्यति । इति ॥ २ ॥

*मूर्त्तिरप्यस्योक्ता सुश्रुतेन—

ज्वरमूर्त्तिमाह—

*रुद्रकोपाग्निसम्भूतः सर्वभूतप्रतापनः ।
त्रिपाद्भस्मप्रहरणस्त्रिशिराः सुमहोदरः ।
वैयाघ्रचर्मवसनः कपिलो माल्यविग्रहः ॥ ३ ॥
पिङ्गेक्षणो ह्रस्वजङ्घो वीभत्सो बलवान्महान् ।
पुरुषो लोकनाशार्थमसौ ज्वर इति स्मृतः ॥ ४ ॥
तैस्तैर्नामभिरन्येषां सत्त्वानां परिकीर्त्यते ।
जन्मादौ निधने चैव प्रायो विशति देहिनाम् ।
ऋते देवमनुष्याभ्यां नान्यो विषहते हि तम् ॥ ५ ॥

*तस्य ज्वरस्य संख्यारूपां सम्प्राप्तिमाह-ज्वरोऽष्टधेति । अष्टधात्वं विवृणोति-पृथगिति । वातिकः, पैत्तिकः, श्लैष्मिकश्चेति त्रयः, द्वन्द्वजाश्च त्रयः—वातपैत्तिकः, वातश्लैष्मिकः, पित्तश्लैष्मिकश्चेति । सङ्घातजः सान्निपातिक एकः ।

*"द्व्युल्वणैकोल्वणैः षट् स्युर्हीनमध्याधिकैश्च षट् ।
समैश्चैको विकारास्ते सन्निपातास्त्रयोदश" ॥ ६ ॥

*इति चरके त्रयोदश सन्निपाता उक्तास्ते यथा-१ वातोल्वणः । २ पित्तोल्वणः । ३ कफोल्वणः । ४वातपित्तोल्वणः । ५वातश्लेष्मोल्वणः । ६ पित्तश्लेष्मोल्वणः । एवं षट् । १ अधिकवातो मध्यपित्तो हीनकफः । २ अधिकवातो मध्यकफो हीनपित्तः । ३ अधिकपित्तो मध्यवातो-हीनकफः । ४ अधिकपित्तो मध्यकफो हीनवातः । ५ अधिककफो-मध्यवातो हीनपित्तः । ६ अधिककफो मध्यपित्तो हीनवातश्चेति षट् । उल्वण एकः १ एवं त्रयोदश । अत्र तु त्रिदोषजत्वेन साम्यात्सान्निपातिक एक एव गणितः । आगन्तुज इति । अत्रागन्तुशब्देनाभिघातादयो हेतव उच्यन्ते । कुत्र चिद्व्याधयः कार्यकारणयोरभेदोपचारात् । आगन्तुजा अभिघाताद्यनेककारणयोगादनेके भवन्ति तथाऽप्यागन्तुजत्वेन साम्यादागन्तुकोऽप्यत्रैक एव गणितः ।

*नन्वागन्तुजेऽपि ज्वरे वातादिलक्षणदर्शनादागन्तुजः कथं दोषजाद्भिन्नः ? । उच्यते—उत्तरकालं दोषोत्पत्तेः । तथा च चरके-

"आगन्तुको हि व्यथापूर्वं जायते पश्चाद्भिन्नैर्दोषैरनुबध्यते" इति॥२॥

अथ ज्वरस्य विप्रकृष्टकारणकथनपूर्विकां सम्प्राप्तिमाह—

मिथ्याऽऽहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः।
बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः ॥ ३ ॥

*मिथ्याऽऽहारविहाराभ्याम्=अनुचिताहारचेष्टाभ्यां हेतुभूताभ्याम्, दोषाः=वातपित्तकफाः, आमाशयाश्रयाः=आमाशयं गताः, रसानुगाः=रसदूषकाः, बहिर्निरस्य कोष्ठाग्निं=कोष्ठगताग्नेरूष्माणं, न तु समस्तमग्निं, तदा दोषपाकासम्भवः स्यात्, बहिः प्रक्षिप्य। ज्वरदाः स्युः=ज्वरकारिणो भवेयुरित्यर्थः॥ ३॥

अथ ज्वरस्य सामान्यविशेषपूर्वरूपमाह—

श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः।
इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ॥ ४ ॥
जृम्भाऽङ्गमर्दो गुरुता रोमहर्षोऽरुचिस्तमः।
अप्रहर्षश्च शीतं च भवत्युत्पत्स्यति ज्वरे ॥ ५ ॥
सामान्यतो विशेषात्तु जृम्भाऽत्यर्थं समीरणात्।
पित्तान्नयनयोर्दाहः कफान्नान्नाभिनन्दनम् ॥ ६ ॥

*श्रमो व्यापारं विनैव। अरतिः=अस्वस्थचित्तत्वम्। विवर्णत्वं=म्लानगात्रता। वैरस्यं=मुखस्याप्रकृतरसता। नयनप्लवः=नयनयोरश्रुपूर्णत्वम्। शीतवातातपादिषु मुहुरिच्छाद्वेषौ। आदिशब्दाज्ज्वलने जले च। यत उक्तं चरकेण—

*"ज्वलनातपवातेषु भक्तिद्वेषावनिश्चितौ" इति ॥ ७ ॥

*शयनादिष्वित्यन्ये। अङ्गमर्दः=अङ्गमोटनम्। गुरुता गात्रस्य। रोमहर्षः=रोमाञ्चता। अरुचिर्भोज्ये, तमः=तमोमग्नस्येव ज्ञानम्। अप्रहर्षः=हर्षाभावः। शीतं लगति। चकाराद् बलहानिः। बालहितोपदेशाद्द्वेषादयोऽपि भवन्ति। तृतीयश्लोकस्थं सामान्यत इति पदं पूर्वश्लोकाभ्यां सम्बन्धनीयम्। तेन सामान्यतो ज्वरे उत्पत्स्यति=भविष्यति, श्रमादयः पूर्वमेव भवन्तीत्यर्थः। उत्पत्स्यतीत्यात्मनेपदिनोऽपि शतृभाव आर्षत्वात्। विशेषादुच्यते। समीरणाज्ज्वर उत्पत्स्यति, अतिशयेन

जृम्भा भवति। पित्तज्वरे उत्पत्स्यति, अत्यर्थो नयनयोर्दाहो भवति कफज्वर उत्पत्स्यति अत्यर्थं न नान्नाभिनन्दनम् = अन्नाकाङ्क्षा न भवति। जृम्भाऽऽदयोऽपि श्रमादिपूर्वा भवन्ति यतः] सामान्यधर्माक्रान्तो-विशिष्टो धर्मो भवति ॥ ४—६ ॥

अथ द्वन्द्वजपूर्वरूपमाह—

रूपैरन्यतराभ्यां तु संसृष्टैर्द्वन्द्वजं विदुः ॥ ७ ॥

*अन्यतराभ्यां = जृम्भानेत्रदाहाभ्यां जृम्भाऽन्नारुचिभ्यां, नेत्रदाहा-न्नारुचिभ्यां वा संसृष्टैः, रूपैः = श्रमादिभिः, द्वन्द्वजं = द्विदोषजं पूर्वरूपं, विदुः = जानीयुः ॥ ७ ॥

अथ सान्निपातिकपूर्वरूपमाह—

सर्वलिङ्गसमावायः सर्वदोषप्रकोपजे ॥ ८ ॥

*सर्वदोषप्रकोपजे (पूर्वरूपे) सर्वलिङ्गसमावायः = अतिशयित-जृम्भानेत्रदाहान्नारुचिसहितानां श्रमादीनां समवायो भवति ॥ ८ ॥

अथ ज्वरस्य सामान्यलक्षणमाह—

स्वेदावरोधः संतापः सर्वाङ्गग्रहणं तथा।
युगपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते ॥ ९ ॥

*स्वेदावरोधः = प्रस्वेदानिर्गमः। न तु पित्तज्वरे स्वेदनिर्गमादे-तल्लक्षणं व्यभिचरति, तत्रोत्सर्गापवादभावादिति जेज्जटकार्त्तिककु-ण्डादयः। अन्ये तु—स्विद्यते उत्स्विद्यतेऽनेनेति स्वेदः = अग्निस्तस्या-वरोधः = दोषैराच्छन्नता, सन्तापः = ताप इति वक्तव्ये सन्तापाभिधानं-देहेन्द्रियमनसां सन्तापबोधनार्थम्। यत उक्तं चरकेण—ज्वरविशेषणं-"देहेन्द्रियमनस्तापी" ति। तत्र देहसन्तापो = देहोष्णता। इन्द्रियस-न्तापः = इन्द्रियतापरूपवैकृत्यम्। यत उक्तम्—

*इन्द्रियाणां तु वैकृत्यं यत्तत् सन्तापलक्षणम्।
वैचित्त्यमरतिर्ग्लानिर्मनःसन्तापलक्षणम् ॥ ८ ॥ इति ॥

*सर्वाङ्गग्रहणम् = सर्वेषामङ्गानां वेदनया ग्रहणं सर्वाण्यङ्गानि स्तम्भेन गृहीतानीव वा भवन्ति। युगपदिति, मिलितमेतल्लक्षणम्, प्रत्ये-कस्य व्यभिचारात्। यथा स्वेदावरोधः कुष्ठपूर्वरूपे। तथा सन्तापो-दाहव्याधौ। तथा सर्वाङ्गग्रहणं सर्वाङ्गरोगाख्यवातव्याधौ ॥ ९ ॥

अथ प्रस्वेदानिर्गमनपक्षे कारणमाह—

रुणद्धि चाप्यपां धातून् यस्मात्तस्माज्ज्वरातुरः।
भवत्यत्युष्णगात्रश्च स्विद्यते न च सर्वशः ॥ १० ॥

*यस्माज्ज्वरोऽपां धातून्=रसधातून् रुणद्धि तस्माद्धेतोर्ज्वरातुरोऽत्युष्णगात्रो भवति सर्वशः स्विद्यते न च ॥ १० ॥

अथ ज्वरस्य सामान्यचिकित्सामाह—

अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात्।
साधारणीं क्रियां तत्र विदध्यात्तु चिकित्सकः।
सामान्यतो ज्वरी पूर्वं निर्वाते निलये वसेत्।
निर्वातमायुषो वृद्धिमारोग्यं कुरुते यतः ॥ ११ ॥

अथ व्यजनानिलस्य गुणानाह—

व्यजनस्यानिलस्तृष्णास्वेदमूर्च्छाश्रमापहः।
तालवृन्तभवो वातस्त्रिदोषशमनो मतः ॥ १२ ॥
वंशव्यजनजः सोष्णो रक्तपित्तप्रकोपणः।
चामरो वस्त्रसम्भूतो मायूरो वेत्रजस्तथा ॥
एते दोषजितो वाताः स्निग्धा हृद्याः सुपूजिताः ॥ १३ ॥

अथान्यान्यान्यपि सामान्यज्वरपथ्यान्याह—

नवज्वरी भवेद्यत्नाद् गुरूष्णवसनावृतः ॥ १४ ॥
यथर्त्तुपक्वपानीयं पिबेत्किञ्चिन्निवारयन्।
विनाऽपि भेषजैर्व्याधिः पथ्यादेव निवर्त्तते ॥
न तु पथ्यविहीनस्य भेषजानां शतैरपि ॥ १५ ॥

अथ तरुणज्वरे त्याज्यान्याह सुश्रुतः—

परिषेकान्प्रदेहांश्च स्नेहान्संशोधनानि च ॥ १६ ॥
दिवास्वप्नं व्यवायश्च व्यायामं शिशिरं जलम्।
क्रोधप्रवादभोज्यांश्च वर्जयेत्तरुणज्वरी ॥ १७ ॥

*परिषेकः=स्नानादिः। प्रदेहः=अनुलेपनाभ्यङ्गादिः। स्नेहान् पाने निषिद्धान् ॥ १७ ॥

अथ त्याज्यसेवनादवगुणानाह—

शोषं छर्दिं मदं मूर्च्छां भ्रमं तृष्णामरोचकम्।

प्राप्नोत्युपद्रवानेतान्परिषेकादिसेवनात् ॥ १८ ॥

*आदिशब्देन प्रदेहादयो गृह्यन्ते ॥ १८ ॥

अथ तरुणज्वरे त्याज्यव्यायामादीनां सेवने पृथक् पृथग् दोषानाह हारीतः—

व्यायामाज्ज्वरसंवृद्धिर्व्यवायात्स्तम्भमूर्च्छनम् ।
मृतिश्च स्नेहपानाद्यैर्मूर्च्छा च्छर्दिर्मदोऽरुचिः ॥ १९ ॥
गुर्वन्नभोजनात्स्वप्नाद्विष्टम्भो दोषकोपनम् ।
अग्निसादः खरत्वञ्च स्रोतसां च प्रवर्त्तनम् ॥ २० ॥

*मृतिरिति व्यवायादित्यत्र सम्बध्यते, स्वप्नाद्=दिवास्वापात् ॥ १९-२० ॥

अन्यच्च वर्जयेत्-

सज्वरो ज्वरमुक्तो वा विदाहीनि गुरूणि च ।
असात्म्यान्नानि पानानि विरुद्धाध्यशनानि च ॥ २१ ॥
व्यायाममतिचेष्टां वाऽभ्यङ्गं स्नानं च वर्जयेत् ।
तेन ज्वरः शमं याति शान्तश्च न पुनर्भवेत् ॥ २२ ॥

अथ "ज्वरी लङ्घनं कुर्यादि" त्याह चरको वाग्भटश्च—

आमाशयस्थो हत्वाऽग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥ २३ ॥

*अस्यायमर्थः—यतो हेतोरामाशयस्थो दोषो वातपित्तकफरूपः, अग्निं हत्वा=आच्छाद्य, सामः=अपक्वाहाररससहितः, मार्गं पिधापयन्=अत्रार्षत्वादहेतावपि कर्त्तरि शतृप्रत्ययस्तेन पिदधातीत्यर्थः । ज्वरं करोति तस्माद्धेतोर्लङ्घनं ज्वरी आचरेदित्यर्थः ॥ २३ ॥

यथा—

ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम् ।
ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम् ॥ २४ ॥
त्रिविधं त्रिविधे दोषे तत्समीक्ष्य प्रयोजयेत् ।
दोषेऽल्पे लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् ॥
प्रभूते शोधनं तच्च मूलादुन्मूलयेन्मलान् ॥ २५ ॥

चक्रदत्तश्च—

तरुणं तु ज्वरं पूर्वं लङ्घनेन क्षयं नयेत् ।

आमदोषमलिङ्गाद्वा लङ्घयेत्तं यथाविधि ॥ २६ ॥

अन्यच्च—

अथ दोषपाकसमयमाह—

वातः पचति सप्ताहात्पित्तं तु दशभिर्दिनैः ॥ २७ ॥
श्लेष्मा द्वादशभिर्घस्त्रैः पच्यते वदतां वर! ।
लङ्घनं लङ्घनीयस्तु कुर्याद्दोषानुरूपतः ।
त्रिरात्रमेकरात्रं वाऽहोरात्रमथ वा ज्वरे ॥ २८ ॥
निर्वातसेवनात्स्वेदाल्लङ्घनादुष्णवारिणः ।
पानादामज्वरे क्षीणे पश्चादौषधमाचरेत् ॥ २९ ॥

आत्रेयेणोक्तम्—

ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम् ।
ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम् ॥ ३० ॥

*अत्र लङ्घनशब्देनानशनमुच्यते । यत आह सुश्रुतः—

आनद्धः स्तिमितैर्दोषैर्यावन्तं कालमातुरः ।
तावत्त्वनशनं कुर्यात्ततः संसर्गमाचरेत् ॥ ९ ॥

*आनद्धः स्तिमितैर्दोषैः = निश्चलैर्दोषैः सम्बद्धः । संसर्गम् = औषधान्नादिप्रसङ्गम् ॥ ८ ॥

*यत आह चरकः—

चतुष्प्रकारा संशुद्धिः पिपासा मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥ १० ॥

*चतुष्प्रकारा संशुद्धिः = वमनविरेचमनिरूहवस्तिशिरोविरेचनानि । न त्वनुवासनं तस्य बृंहणत्वात् । अत्र लङ्घनं कर्षणमित्यर्थः । तथा च सुश्रुतः—

*शरीरलाघवकरं यद्द्रव्यं कर्म वा पुनः ।
तल्लङ्घनमिति ज्ञेयं बृंहणं तु पृथग्विधम् ॥ ११ ॥

*लङ्घनात्कर्षणादन्यत् शरीरपोषकमित्यर्थः ॥ ११ ॥

*ननु "आनद्धः स्तिमितैर्दोषैरि"त्यादि पूर्वोक्तसुश्रुतवचनात्सामान्यतो ज्वरिणा यथाऽनशनरूपं लङ्घनं क्रियते, तथा "चतुष्प्रकारा संशु-

द्धिः" इत्यादिचरकवचनाद्वमनादिरूपं लङ्घनं सर्वैर्ज्वरिभिः कथं न क्रियते? तत्रोच्यते—वमनादिकमवस्थाविशेषेषु क्रियते न तु सर्वज्वरेषु तथा च सुश्रुतः--

*सोत्क्लेशे बलिने देयं वमनं श्लैष्मिकज्वरे ।
पित्तप्राये विरेकस्तु कार्यः प्रशिथिलाशये ॥ १२ ॥

(सोत्क्लेशे = वमनेच्छावति, प्रशिथिलाशये = प्रोपसर्गवैपरीत्येन गाढाशय इत्यर्थः) ॥ १२ ॥

*सरुजेऽनिलजे कार्यं सोदावर्त्ते निरूहणम् ॥
कफाभिपन्ने शिरसि कार्यं मूर्द्धविरेचनम् ॥ १३ ॥

*सोदावर्त्ते = उदरपूरणवति ॥ १३ ॥

*अपि च सर्वज्वरिभिः पिपासानिग्रहश्च न कार्यः । यत आह हारीतः-

*तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी ।
तस्माद्देयं तृषाऽऽर्त्ताय पानीयं प्राणधारणम् ॥ १४ ॥

*अतोऽवस्थाविशेष एव पिपासासहनं ज्वरिभिर्मारुतसेवनं च कार्यम्, सुश्रुतेन प्रवातसेवनस्य सर्वथा निषिद्धत्वात् । अतो मारुतसेवनमवस्थाविशेष एवोक्तम् । आतपसेवनं चाप्यवस्थाविशेष एव युक्तम् ।

*लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते ।
तदा तु मुखवैरस्यतृष्णाऽरोचकनाशनैः ॥
ज्वरघ्नैः पाचनैर्हृद्यैः कषायैः समुपाचरेत् ॥ १५ ॥

*इत्यत्र लङ्घनपाचनयोः स्फुट एव भेदः । व्यायामोऽपि न कार्यस्तस्यातिनिषिद्धत्वात् । अवस्थाविशेषे पुनः पार्श्वपरिवर्त्तनादिरूपः सोऽपि कर्त्तव्यः । तस्मा "चतुष्प्रकारा संशुद्धिरि"त्यादिश्लोके लङ्घनपदं कर्षणपर्यायमिति निर्णीतम् ॥ ३० ॥

दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च ।
लङ्घितश्चाप्यदोषश्चेद्यवागूपानमाचरेत् ॥ ३१ ॥
शालिषष्टिकमुद्गानां यूषं वा शस्तमाचरेत् ॥

पञ्चकोलेन संसिद्धां यवागूं मध्यलङ्घने ॥ ३२ ॥
अत्यर्थं लङ्घितं दृष्ट्वा तस्य संतर्पणं हितम् ॥ ३३ ॥
द्राक्षादाडिमखर्जूरप्रियालैः सपरूषकैः ।
तर्पणार्हस्य कर्त्तव्यं तर्पणं ज्वरशान्तये ॥ ३४ ॥

अथोपवासरूपलङ्घनस्य फलमाह—

लङ्घनेन क्षयं नीते दोषे सन्धुक्षितेऽनले ।
विज्वरत्वं लघुत्वं च क्षुच्चैवास्योपजायते ॥ ३५ ॥

*लङ्घनेन=अनशनेन दोषे प्रवृद्धे क्षयं नीते । यत आह—
"आहारं पचति शिखी दोषानाहारवर्जितः ॥ १६ ॥ इति ।
*पचतीति । सन्धुक्षिते अनले आच्छादकदोष क्षीणेऽग्नौ प्रदीप्ते यथोक्तसम्प्राप्तिसामग्रीविघटनाद्विज्वरत्वम् । शरीरस्य गौरवाभावेन लघुत्वम् । क्षुद्=बुभुक्षा च जायत इत्यर्थः ॥ ३५ ॥

अन्यच्चाह सुश्रुतः—

अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम् ।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम् ॥ ३६ ॥

*अनवस्थितदोषाग्नेः=अनवस्थितः=स्वस्थानादितस्ततो गतो-दोषोऽग्निश्च यस्य तस्य ज्वरिणः । काङ्क्षा=अन्नाभिलाषः, रुचिः=लङ्घनेनामपाकान्मुखशोषादिनाशे मुखस्य यत्प्रकृतत्वं सैव रुचिः=शोभा ।
"रुचिः स्त्री दीप्तिशोभायामभीष्टार्थाभिलाषयोः"
इति मेदिनीकारः ॥ ३६ ॥

अथ सम्यक्कृतस्य लङ्घनस्य लक्षणमाह—

वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते ॥ ३७ ॥
स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये ।
कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि ॥ ३८ ॥

*हृदयस्य शुद्धिः=हृदयानवरोधः । उद्गारशुद्धिः=सधूमाम्लोद्गाराभावः । कण्ठस्य शुद्धिः=कफेनानवलिप्तत्वम् । आस्यशुद्धिः=मुखस्य प्रकृतरसत्वम् । तन्द्राक्लमे=तन्द्रा च क्लमश्च तस्मिन् । तन्द्रा=

निद्रावत् क्लान्तिः, क्लमोऽत्र ग्लानिः। क्षुत्पिपासासहोदये=क्षुत्पिपासयोः सह युगपदुदये। अन्तरात्मनि=मनसि। एतानि लक्षणानि मिलितान्येव सम्यक्कृतं लङ्घनं बोधयन्ति, न तु प्रत्येकम् ॥३७-३८॥

अथ हीनलङ्घनस्य लक्षणमाह—

कफोत्क्लेशः सहृल्लासः ष्ठीवनं च मुहुर्मुहुः।
कण्ठस्य हृदयाशुद्धिस्तन्द्रा स्याद्धीनलङ्घने ॥ ३९ ॥

*कफोत्क्लेशः=कफस्य वमनायोपस्थितिः। हृल्लासः=उपस्थितवमनत्वमिव। ष्ठीवनं=हृदयात्कफनिर्गमः ॥ ३९ ॥

अथातिशयितलङ्घनस्य लक्षणमाह—

पर्वभेदोऽङ्गमर्दश्च कासः शोषो मुखस्य च।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः ॥ ४० ॥
मनसः संभ्रमोऽभीक्ष्णमूर्ध्ववातस्तमो हृदि।
देहाग्निबलहानिश्च लङ्घनेऽतिकृते भवेत् ॥ ४१ ॥

*श्रोत्रनेत्रयोर्दौर्बल्यं=कर्णनेत्रयोः स्वविषयग्रहणासामर्थ्यम्। मनसः संभ्रमः=भ्रान्तिः। ऊर्ध्ववातः=उद्गारबाहुल्यम्। हृदि तमः=अन्धकारप्रविष्टस्येव ज्ञानम् ॥ ४०-४१ ॥

अथ बलरक्षणं लङ्घनं कारयेदित्याह—

बलाविरोधिना चैनं लङ्घनेनोपपादयेत्।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः ॥ ४२ ॥

*अयमर्थः—एनं=रोगिणं, बलाविरोधिना=अनतिबलक्षयकारिणा, लङ्घनेन, उपपादयेद्=उपचरेत्, कुत इति चेत्तत्राह–यदर्थः=यस्मै आरोग्याय, अयं क्रियाक्रमः=चिकित्सोपक्रमः। तद् आरोग्यं बलाधिष्ठानं=बलाश्रयमित्यर्थः ॥ ४२ ॥

अथ केषाञ्चिदनशनस्य निषेधमाह सुश्रुतः—

तद्धि मारुततृष्णाक्षुन्मुखशोषभ्रमान्वितैः।
न कार्यं गुर्विणीबालवृद्धदुर्बलभीरुभिः।
न क्षयाध्वश्रमक्रोधकामशोषचिरज्वरी ॥ ४३ ॥
अवश्यमेव कुर्वीत ज्वरी सामे समीरणे।

लङ्घनं ह्यामपाकार्थं न तदूर्ध्वं यथा कफे ॥ ४४ ॥

*तदनशनम्, उल्वणमारुतयुक्तेन ज्वरिणा न कार्य्यम्। मारुतोऽत्र निरामो बोद्धव्यः, सामे मारुते लङ्घनं कार्य्यमेव। यत आह तन्त्रान्तरे—"अवश्यमि"त्युत्तरश्लोके। तद्वन्मारुततृष्णायां लङ्घनं कार्य्यमेव न। तथा मुखशोषभ्रमावपि निरामावेव विवक्षितौ, सामयोस्तु तयोर्लङ्घनं कार्य्यमेव। गुर्विणीबालवृद्धादिभिरपि निरामैरेव नैव लङ्घनं कार्य्यम्, सामैः पुनस्तैरपि लङ्घनं कार्य्यमेव। क्षयो=धातुक्षयो राजयक्ष्मा च। वातजे ज्वरे लङ्घनं न कार्य्यम्। तदूर्ध्वमामपाकादूर्ध्वम्। अत एवोक्तम्—

*कफपित्ते द्रवे धातू सहेते लङ्घनं बहु।
आमक्षयादूर्ध्वमपि वायुर्न सहते क्षणम् ॥१७॥इति॥४३-४४॥

अथामस्य लक्षणमाह—

अहारस्य रसः सारो यो न पक्वोऽग्निलाघवात्।
आमसंज्ञाञ्च लभते बहुव्याधिसमाश्रयः ॥ ४५ ॥

तन्त्रान्तरे तु—

आममन्नरसं केचित् केचित् तु मलसञ्चयम्।
प्रथमां दोषदुष्टिं वा केचिदामम् प्रचक्षते ॥ ४६ ॥

अन्यच्च—

अविपक्वमसंसक्तं दुर्गन्धं बहु पिच्छिलम्।
सादनं सर्वगात्राणामाम इत्यभिशब्दितः ॥ ४७ ॥
तेनामेन समायुक्ता दोषा दूष्याश्च तादृशाः।
तदुद्भवा आमयाश्च सामा इति बुधैः स्मृताः ॥ ४८ ॥

तत्र सामस्य वातस्य लक्षणमाह—

वायुः सामो विबन्धाग्निसादतन्द्राऽन्त्रकूजनैः।
वेदनाशोथनिस्तोदैः क्रमतोऽङ्गानि पीडयेत् ॥ ४९ ॥
विचरेद् युगपच्चापि गृह्णाति कुपितो भृशम्।
स्नेहाद्यैर्वृद्धिमायाति मेघाः सूर्य्योदये निशि ॥ ५० ॥

*विचरेद्युगपद् वायुरामश्चैककालं विचरेत। कुपितः सामो-

वायुर्भृशम् = अतिशयेन गृह्णात्यङ्गानीत्यर्थः ॥ ४८ ॥ ५० ॥

अथ निरामस्य वातस्य लक्षणमाह—

निरामो विशदो रूक्षो निर्गन्धोऽल्पवेदनः ।
विपरीतगुणैः शान्ति स्निग्धैर्याति विशेषतः ॥ ५१ ॥

अथ प्रसङ्गात् सामस्य पित्तस्य लक्षणमाह—

पित्तं सामम्भवेदम्लं दुर्गन्धं हरितं गुरु ।
अम्लिकाकण्ठहृद्दाह-करं श्यावं तथा स्थिरम् ॥ ५२ ॥

*अम्लिका = अम्बिलीचुकीतिलोके ॥ ५२ ॥

अथ निरामपित्तस्य लक्षणमाह—

निरामं पित्तमाताम्रमत्युष्णं कटुकं सरम् ।
दुर्गन्धि रुचिकृद् वह्निबलवर्धनमीरितम् ॥ ५३ ॥

अथ सामकफस्य लक्षणमाह—

आविलस्तन्तुलः स्त्यानः कण्ठदेशे च तिष्ठति ।
सामो बलासो दुर्गन्धस्तृट्क्षुधोरुपघातकृत् ॥ ५४ ॥

*स्त्यानः = संहतः ॥ ५४ ॥

अथ निरामकफस्य लक्षणमाह—

श्लेष्मा निरामो निर्गन्धः फेनवांश्छेदवानपि ।
भवेत् स पिण्डितः पाण्डुरास्यवैरस्यनाशकृत् ॥ ५५ ॥

अथ सामस्य व्याधेर्लक्षणमाह—

आलस्यतन्द्राहृदयाविशुद्धि-दोषाप्रवृत्याविलमूत्रताभिः ।
गुरूदरत्वारुचिसुप्तताभि-रामान्वितं व्याधिमुदाहरन्ति ॥ ५६ ॥
आमं जयेल्लङ्घनकोष्णपेयालघ्वन्नसूपौदनतिक्तयूषैः ।
विरूक्षणस्वेदनपाचनैश्च संशोधनैरूर्ध्वमधस्तथैव ॥ ५७ ॥

अथ ज्वरी लङ्घनेऽपि जलम्पिबेदित्याह सुश्रुतः—

तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
अतः सर्वास्ववस्थासु न क चिद् वारि वर्जयेत् ॥ ५८ ॥

हारीतेनोक्तम्—

तृष्णा गरीयसी घोरा सद्यः प्राणविनाशिनी ।
तस्माद्देयं तृषाऽऽर्त्ताय पानीयम्प्राणधारणम् ॥ ५९ ॥

*अवश्यं पेयमपि जलं ज्वरी किञ्चित्द्वारयन् पिबेत् । यत आह [सुश्रुत एव—

*जीविनां जीवनं जीवो जगत् सर्वन्तु तन्मयम् ।
ततोऽत्यन्तनिषेधेन न क चिद् वारि वारयेत् ॥ १८ ॥

*जीवनं = जलं, किञ्चित्तु वारयेदेव ॥ १८ ॥

तथा च—

*ज्वरे नेत्रामये कुष्ठे मन्देऽग्नावुदरे तथा ॥ १४ ॥
अरोचके प्रतिश्याये प्रसेके श्वयथौ क्षये ।
व्रणे च मधुमेहे च पानीयं मन्दमाचरेत् ॥ २० ॥

*प्रसके = मुखप्रसेके । मन्दमाचरेद् = अल्पम्पिबेत् ॥ २० ॥

यत आह—

*अतियोगेन साललं तृष्यतोऽपि प्रयोजितम् ।
प्रयाति श्लेष्मपित्तत्व ज्वरितस्य विशेषतः ॥ २१ ॥ ५९ ॥

अथ शीतलजलपानस्य निषेधमाह सुश्रुतः—

नवज्वरे प्रतिश्याये पार्श्वशूले गलग्रहे ।
सद्यः शुद्धौ तथाऽऽध्माने व्याधौ वातकफाद्भवे ॥ ६० ॥
अरुचिग्रहणीगुल्म-श्वासकासेषु विद्रधौ ।
हिक्कायां स्नेहपाने च शीतं वारि विवर्जयेत् ॥ ६१ ॥

*अत्र शीतं जलमक्वथितं निषिद्धम् । तथा सति क्वथि ग्राह्यमायातम् । अत्र क्वथितस्य विधिर्गुणाश्च—

*"क्वाथ्यमानन्तु निर्वेगं निष्फेनं निर्मलं च यत् ।
तत् तोयं क्वथितं ज्ञेयं दोषघ्नं पाचनं लघु" ॥ २२ ॥

*निर्वेगं=शनैः ॥ २२ ॥

*क्वथितस्य विधानमाह सुश्रुतः—

*वातश्लेष्मज्वरार्त्ताय हितमुष्णाम्बु तृष्यते
दीपनं कफविच्छेदि वातपित्तानुलोमनम् ।
तद्धि मार्दवकृद्दोष-स्रोतसां शीतमन्यथा ॥ २३ ॥

वाग्भटश्च—

*तृष्णायां प्राप्तमुष्णाम्बु पिबेद्वातकफज्वरे ।

तत् कफं विलयं नीत्वा तृष्णामाशु निवर्त्तयेत् ॥ २४ ॥
*उदीर्य चाग्निं स्रोतांसि मृदूकृत्य विशोधयेत् ।
वातपित्तकफस्वेद-शकृन्मूत्राणि सारयेत्" ॥२५॥ इति ॥६०-६१॥

अन्यच्च स एव—

सेव्यमानेन शीतेन ज्वरस्तोयेन वर्धते ॥ ६२ ॥

अथोष्णोदकस्य लक्षणं गुणांश्चाह—

क्वाथ्यमानं तु निर्वेगं निष्फेनं निर्मलं तथा ।
अर्धावशिष्टं यत् तोयं तदुष्णोदकमुच्यते ॥ ६३ ॥
ज्वरकासकफश्वास-पित्तवातामभेदसाम् ।
नाशनं पाचनञ्चैव पथ्यमुष्णोदकं सदा ॥ ६४ ॥

अथर्त्तुभेदेन जलस्य पाकभेदमाह—

त्रिपादशेषं सलिलं ग्रीष्मे शरदि शस्यते ।
हिमेऽर्धशेषं शिशिरे तथा वर्षावसन्तयोः ॥ ६५ ॥

अन्ये तु-

निदाघे त्वर्धपादोनं पादहीनन्तु शारदम् ।
शिशिरे च वसन्ते च हिमे चार्धावशेषितम् ॥ ६६ ॥
अष्टमांशावशेषन्तु वारि वर्षासु शस्यते ।
इति केचिद् बुधाः प्राहुर्जैज्जटागमदर्शनात् ॥ ६७ ॥

केचित्-

पक्षयोस्त्रिषु वेदेषु बाणेष्वङ्गेषु वस्तुषु ।
एतद्भागावशेषं स्यादम्बु वर्षाऽऽदिषु क्रमात् ॥ ६८ ॥
*अत्र दोषाणां यथोल्बणता हीनता वा तथा व्यवस्था कल्पनीया॥६८॥
तत्पादहीनं पित्तघ्नमर्धहीनन्तु वातनुत् ।
त्रिपादहीनं श्लेष्मघ्नं संग्राह्यग्निप्रदं लघु ॥ ६९ ॥

अथ ग्रन्थान्तरेऽप्यारोग्याम्बुनाम्नोक्तस्यास्य लक्षणगुणानाह—

पादशेषं तु यत्तोयमारोग्याम्बु तदुच्यते ।
आरोग्याम्बु सदा पथ्यं कासश्वासकफापहम् ॥ ७० ॥
सद्योज्वरहरं ग्राहि दीपनं पाचनं लघु ।
आनाहपाण्डुशूलार्शोगुल्मशोथोदरापहम् ॥ ७१ ॥

अथर्त्तुभेदेन जलग्रहणमाह—

हेमन्ते शिशिरे चाम्बु सारसं वा तडागजम् ।
वसन्तग्रीष्मयोः कौप्यं वाप्यं वा नैर्झरं हितम् ॥ ७२ ॥

*अयमृतुभेदेन जलस्य ग्रहणाय देशभेदो वारिवर्गे बोद्धव्यः ॥७२॥

नादेयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः ।
विषवत्पत्रपुष्पादिदुष्टनिर्झरयोगतः ॥ ७३ ॥
औद्भिदं चान्तरिक्षं वा कौप्यं वा प्रावृषि स्मृतम् ।
शस्तं शरदि नादेयं नीरमंशूदकं परम् ॥ ७४ ॥
दिवा रविकरैर्जुष्टं निशि शीतकरांशुभिः ।
ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहम् ॥ ७५ ॥
अनभिष्यन्दि निर्दोषञ्चान्तरिक्षजलोपमम् ।
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥ ७६ ॥

अन्यच्च—

शरद्यगस्तेरुदयादखिलं सलिलं हितम् ॥ ७७ ॥

वृद्धसुश्रुतः—

कार्त्तिके मार्गशीर्षे च जलमात्रं प्रशस्यते ॥ ७८ ॥

अथ शृतशीतलजलपानविषयानाह—

दाहातिसारपित्तास्रमूर्च्छामद्यविषार्त्तिषु ।
मूत्रकृच्छ्रे पाण्डुरोगे तृष्णाच्छर्दिश्रमेषु च ।
मद्यपानसमुद्भूते रोगे पित्तोत्थिते तथा ।
सन्निपातसमुत्थेषु शृतशीतं प्रशस्यते ॥ ७९ ॥

*अथर्त्तुपक्वमपि जलं विषयविशेषे शीतलं पिबेदित्याह सुश्रुतः दाहेति ॥ ७९ ॥

अथ क्वथितस्य जलस्य शीतलीकरणविशेषे गुणविशेषमाह सुश्रुतः—

शृताम्बु तत्त्रिदोषघ्नं यदन्तर्बाष्पशीतलम् ।
अरूक्षमनभिष्यन्दि कृमितृड्ज्वरहृल्लघु ॥
धारापातेन विष्टम्भि दुर्जरं पवनाहतम् ॥ ८० ॥

*अन्तर्बाष्पशीतलम् = पिहितमेव शीतलम् ॥ ८० ॥

अन्यच्च—

भिनत्ति श्लेष्मसंघातं मारुतं चापकर्षति ।
अजीर्णं जरयत्याशु पीतमुष्णोदकं निशि ॥ ८१ ॥

अथात्रापरानपि विशेषानाह—

दिवा शृतं पयो रात्रौ गुरुतामधिगच्छति ।
रात्रौ शृतं दिवा पीतं गुरुत्वमधिगच्छति ॥ ८२ ॥
तत्तु पर्य्युषितं वह्निगुणोत्सृष्टं त्रिदोषकृत् ।
गुर्वम्लपाकं विष्टम्भि सर्वरोगेषु निन्दितम् ॥ ८३ ॥
शृतशीतं पुनस्तप्तं तोयं विषसमं भवेत् ।
निर्य्यूहोऽपि तथा शीतः पुनस्ततो विषोपमः ॥ ८४ ॥

रात्रौ तूष्णोदकस्य लक्षणमन्यदाह—

अष्टमेनांशशेषेण चतुर्थेनार्धकेन वा ।
अथ वा क्वथनेनैव सिद्धमुष्णोदकं वदेत् ॥ ८५ ॥

अथ तस्य गुणानाह—

श्लेष्मानिलाममेदोघ्नं दीपनं बस्तिशोधनम् ।
श्वासकासज्वरहरं पीतमुष्णोदकं निशि ॥ ८६ ॥

रात्रावुष्णोदकञ्च तप्तमेव पिबेदित्याह—

उष्णं तदग्निजननं लघ्वच्छं बस्तिशोधनम् ॥ ८७ ॥
पार्श्वरुक्पीनसाध्मानं हिक्काऽनिलकफापहम् ।
शस्तं तृट्श्वासशूलेषु सद्यःशुद्धौ नवज्वरे ॥ ८८ ॥

अपक्वशीतलजलपानस्य विषयविशेषमाह सुश्रुतः—

मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये ।
भ्रमश्रमपरीतेषु तमके श्वयथौ तथा ॥ ८९ ॥
धूमोद्गारे विदग्धेऽन्ने शोषे च मुखकण्ठयोः ।
ऊर्ध्वगे रक्तपित्ते च शीतलाम्बु प्रशस्यते ॥ ९० ॥

*शीतलं जलमाममेव न तु क्वथितं, क्वथितन्तु शीतं दाहादिषु यदुक्तं, तत् सज्वरेषु विज्वरेषु तु दाहादिष्वामं शीतं प्रशस्यत इति भेदः ॥ ८९—९० ॥

अथामादिजलानां जठराग्निना पाककालावधिमाह—

आमं जलं पाकमुपैति यामं पक्वं पुनः शीतलमर्द्धयामम् ।
पक्वं कदुष्णञ्च ततोऽर्धकालात्त्रयः सुपीतस्य जलस्य पाके ॥९१॥

अथ रोगविशेषे जलसंस्कारमाह—

पित्तमद्यविषार्त्तेषु तिक्तकैः शृतशीतलम् ॥ ६२ ॥

*जलं हितमिति शेषः ॥ ९२ ॥

अथ तिक्तानि बहुलानि तेभ्यो निश्चित्य योगमाह सुश्रुतः—

मुस्तपर्पटकोदीच्यच्छत्राऽऽख्योशीरचन्दनैः ।
शृतं शीतं जलं दद्यात्तृड्दाहज्वरशान्तये ॥ ६३ ॥

*छत्राऽत्र धान्यकः । यत आह निघण्टौ धन्वन्तरिः—

*"कुस्तुम्बरुः स्वर्णिका च च्छत्रा धान्यं वितुन्नकमि"त्यादि ॥२६॥

*तद्गुणाश्च—

*धान्यकं दीपनं रुच्यं पाचनं स्वादुपाकि च ।
दोषत्रयतृषादाहश्वासकासज्वरप्रणुत् ॥ २७ ॥ इत्यादि ।

*चक्रदत्तवङ्गसेनवृन्दादयश्छत्रास्थाने नागरं पठन्ति । तद्यथा—

*'मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः' ॥ २८ ॥

*नागरं कटुकमपि नात्र पित्तजनकं मधुरपाकित्वादिति तेषामभिप्रायः, नागरं मुस्तकमिति केचित् । कश्चिदेकदेशेन समुदायोऽवगम्यते । यथा भीमो भीमसेन इति । चन्दनैरित्यत्र सहार्थे तृतीया । तेन मुस्तादिभिः षड्भिरामैरेव क्षुण्णैः सहितं जलं शृतं जलमेव केवलं यथत्तुपक्वं पश्चाच्छीतलीकृतं दद्यात्, तथा च वङ्गसेनः—

*यदप्सु शृतशीतासु षडङ्गादि प्रयुज्यते ।
कर्षमात्रं ततो द्रव्यं ग्राहयेत्प्रास्थिकेऽम्भसि ॥ २९ ॥

*अस्यायमर्थः—यद्यस्माद्धेतोरप्सु जले शृतशीतासु शृतासु केवलास्वेव यथत्तुपक्वासु शीतासु तासु शीतलीकृतासु षडङ्गादि द्रव्यं प्रयुज्यते, आममेव संक्षुद्य जले स्थाप्यते ततः प्रक्षेप्यत्वात् कर्षमात्रं द्रव्यं समुचितं षडङ्गादि, प्रास्थिकेऽम्भसि प्रस्थमात्रे क्वथितशीतले जले क्षेप्तुं ग्राहयेत । अत एव षडङ्गमभिधाय षडङ्गपानीयमिति

वङ्गसेनादिभिरुक्तम् , अस्मिन् पक्षे चन्दनं श्वेतमेव ग्राह्यं न तु रक्तं, तत्कषायलेपयोरेव प्रयोक्तुमुक्तम् । यत आह—

*कषायलेपयोः प्रायो युज्यते रक्तचन्दनम् ॥ ३० ॥ इति ।

*षडङ्गपानीयमिदं षडङ्गादेः पानेऽनुविधातव्ये प्रक्रिया विहिता महावङ्गसेनेन—

*कर्षमात्रं तथा द्रव्यं ग्राहयेत्प्रास्थकेऽम्भसि ।
अर्द्धशृतं प्रयोक्तव्यं पाने पेयाऽऽदिसंविधौ ॥ ३१ ॥

*आदिशब्देन यूषयवागूविलेपीभक्तानि गृह्यन्ते ॥ ३१ ॥

*पानप्रक्रियां शार्ङ्गधरोऽप्येतामेवाह—

*क्षुण्णं द्रव्यं पलं साध्यं चतुःषष्टिपले जले ॥
अर्द्धशिष्टन्तु तद्देयं पाने पेयाऽऽदिसंविधौ ॥ ३२ ॥

*पानप्रयोगश्च षडङ्गमुक्तवान् । अस्मिन् पक्षे चन्दनं रक्तं-ग्राह्यम् ॥ ३२ ॥

"कषायलेपयोः प्रायो युज्यते रक्तचन्दनम्" इति वचनात् तथा च रक्तचन्दनस्य गुणाः—

*रक्तं हिमं स्वादुपाकं छर्दितृष्णाऽस्रपित्तजित् ।
तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम् ॥ ३३ ॥

*षडङ्गादि प्रयुज्यत इत्यादिशब्देन वक्ष्यमाणाद्यो योगा· उच्यन्ते । यथा—

*श्रीपर्णीचन्दनोशीरसमधूकपरूषकम् ॥ ३४ ॥

*अत्र श्रीपर्णीपरूषकयोः फलं ग्राह्यं मधूकस्य तु पुष्पम् ॥ ३४ ॥

*पानं पित्तज्वरं हन्यात् सारिवाऽऽद्यं सशर्करम् ॥ ३५ ॥

अन्यच्च

*हन्यात्सयष्टिमधुकं तथैवोत्पलपूर्वकम् ।
पाने शृतं जलं किं वा सोत्पलं शर्करायुतम् ॥ ३६ ॥

*हन्यात्पित्तज्वरमिति शेषः । उत्पलमत्र कमलमित्यादि ॥ ३६ ॥ ९३ ॥

अथ दिननिद्रानिषेधमाह—

दिवास्वापं न कुर्वीत यतोऽसौ स्यात्कफावहः ।

ग्रीष्मवर्ज्येषु कालेषु दिवास्वापो निषिध्यते ॥ ९४ ॥
उचितो हि दिवास्वापो नित्यं येषां शरीरिणाम् ।
वातादयः प्रकुप्यन्ति तेषामस्वपतां दिवा ॥ ९५ ॥

अथ दिवाशयनार्हजनानाह—

व्यायामप्रमदाऽध्ववाहनरतान् क्लान्तानतीसारिणः-
शूलश्वासवमीतृषापरिगतान्हिक्कामरुत्पीडितान् ॥
क्षीणान्क्षीणकफाञ्छिशून्मदहतान्वृद्धांस्तथाऽजीर्णिनो-
रात्रौ जागरितान्नरान्निरशनान्कामं दिवा स्वापयेत् ॥ ९६ ॥

अथ वातिकादिज्वराणां पाकावधिमाह—

वातिकः सप्तरात्रेण दशरात्रेण पैत्तिकः ।
श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि ॥ ९७ ॥

*रसस्यामत्वे अवधिमतिक्रम्यापि ज्वरस्तिष्ठति । यत आह सुश्रुतः—

*बहुदोषस्य मन्दाग्नेः सप्तरात्रात्परं ज्वरे ।
लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते ॥
तदा तं मुखवैरस्यतृष्णाऽरोचकनाशनैः ।
कषायैः पाचनैर्हृद्यैर्ज्वरघ्नैः समुपाचरेत् ॥ ३७ ॥ इति ॥ ९७ ।

अथ ज्वरस्य तारुण्यमध्यावस्थाजीर्णताऽवधिमाह—

आसप्तरात्रात्तरुणं ज्वरमाहुर्मनीषिणः ।
द्वादशाहमभिव्याप्य मध्यं जीर्णं ततः परम् ॥ ९८ ॥

*आसप्तरात्रादिति । अत्राङ् मर्यादायां रात्रिशब्दो दिवसस्योपलक्षकः । तेन सप्तमादिवसादर्वाग् ज्वरस्तरुण इत्यर्थः । तथा चोक्तं तन्त्रान्तरे—

*ज्वरे व्यतीते षडहे जीर्ण इत्युच्यते बुधैः ।
द्वादशाहात्परं जीर्णमाहुरन्ये मनीषिणः ॥ ३८ ॥ इति ।

*अत एव—जातूकर्णः—"जीर्णस्त्रयोदशे दिवसे" इति । अथ ज्वरे युञ्जीत भेषजम् ॥ ९८ ॥

अथ ज्वरौषधदानसमयमाह—

वातिके सप्तरात्रेण दशरात्रेण पैत्तिके ।

श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजम् ॥ ३९ ॥

*सप्तरात्रेणेत्यत्र रात्रिशब्दो दिवसस्योपलक्षकः । अत एवोक्तम्-

*पाययेदातुरं साममौषधं सप्तमे दिने ।
शमनेनाथ वा दृष्ट्वा निरामं तमुपाचरेत् ॥ इति ॥ ३९ ॥

*शार्ङ्गधरेणोक्तं—

*गुडूचीपिप्पलीमूलनागरैः पाचनं श्टतम् ।
वातज्वरे तथा पेयं कालिङ्गं सप्तमेऽह्नि ॥ इति ॥ ४० ॥

*हारीतेनोक्तम्—

*एतां क्रियां प्रयुञ्जीत षड्रात्रं सप्तमेऽहनि ।
पिबेत्कषायसंयोगात्पेयां ज्वरविनाशिनीम् ॥ ४१ ॥

*एतां क्रियां लङ्घनादिरूपां कषायसंयोगात् कषायेण साधितां पेयामित्यर्थः ॥ ४१ ॥

*खरनादेनाप्युक्तम्—

*इति षड्रात्रिकः प्रोक्तो नवज्वरहरो विधिः ।
ततः परं पाचनीयं शमनीयं ज्वरे हितम् ॥ ४२ ॥

*ततो ज्वरमध्ये करणीयमित्यर्थः ॥ ४२ ॥

*वाग्भटश्चाह—

*सप्ताहादौषधं केचिदाहुरन्ये दशाहतः ।
लङ्घने भोजिते केचिद्देयमामोल्बणे न तु ॥ ४३ ॥

*सप्ताहात्सप्ताहमारभ्येत्यर्थः, अत्र ल्यब्लोपे कर्मणि पंचमी ॥४३॥

*अत एव सुश्रुत आह—

*दशरात्रात्परं सर्वैर्दातव्यमिति निश्चितम् ॥ ४४ ॥ इति ॥

*अत एव दशरात्रेण द्वादशाहेन वेति लङ्घनव्रता व्यतीतेनेत्यर्थः ॥ ४४ ॥

*अत्र चरकस्त्वेवमाह—

*ज्वरितं षडहेऽतीते लघ्वन्नप्रतिभोजितम् ।
पाचनं शमनीयं वा कषायं पाययेत्तु तम् ॥ ४५ ॥

*अस्यायमर्थः-ज्वरितं षडहे लङ्घनेन व्यतीते सप्तमेऽहनि लघ्वन्नं दत्त्वा; अष्टमे दिने कषायं पाययेदित्यर्थः ॥ ४५ ॥

*तथा च सुश्रुतः—

*सप्तरात्रात्परं केचिन्मन्यन्ते देयमौषधम् ॥ ४६ ॥ इति ।

*सप्तरात्रात् परम् = अष्टमेऽहनीत्यर्थः । केचिच्चरकादयः ॥ ४६ ॥

*चक्रदत्तोऽपि—

*सप्तरात्रेण पच्यन्ते सप्तधातुगता मलाः ॥

निरामस्तु ततः प्रोक्तो ज्वरः प्रायोऽष्टमे दिने ॥ ४७ ॥

*एवं सति कषायदाने सप्तमाष्टमयोर्दिवसयोर्विकल्पः । तत्रापि वयोबलाग्निदोषदेशकालोचितं कुर्यात् । भेषजमन्नञ्च दोषपाकं दृष्ट्वा दद्यादित्याह सुश्रुतः—

*पैत्तिके च ज्वरे देयमल्पकालसमुत्थिते ।

अचिरज्वरितस्यापि भैषज्यं दोषपाकतः ॥ ४८ ॥ इति ।

*अस्यायमर्थः--अल्पकालसमुत्थिते पैत्तिके ज्वरे दोषपाकं दृष्ट्वा भैषज्यं देयं न तु तत्र दशरात्रापेक्षा, तथा अचिरज्वरितस्यापि पैत्तिकेतरनवज्वरयुक्तस्यापि दोषपाकं दृष्ट्वा भैषज्यं देयमित्यर्थः ॥ ४८ ॥

*अथ दोषपाकलक्षणमाह सुश्रुतः—

*मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च ।

पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधम् ॥ ४९ ॥ इति ॥

*ज्वरे मृदौ = स्वल्पीभूते । मलेषु = वातपित्तकफमूत्रपुरीषेषु । प्रचलेषु = स्वमार्गसञ्चारिषु । पक्वं = निरामम् ॥ ४९ ॥

*"दोषप्रकृतिवैकृत्यादेतेषां पक्वलक्षणम् ॥ ५० ॥

*दोषाणां = दुष्टवातपित्तकफानां, प्रकृतिः = ज्वरस्य तदुपद्रवाणां चोत्पादनम्, तस्या वैकृत्यं = वैपरीत्यं तस्माद्दोषपाकज्ञानम् ॥ ५० ॥

*केषांचिद् मते एवम्—

*क्षुत्क्षामत्वं लघुत्वञ्च गात्राणां ज्वरमार्दवम् ।

दोषप्रकृतिरुत्साहो निरामज्वरलक्षणम ॥ ५१ ॥

*दोषप्रकृतिः = दोषाणां स्वमार्गसञ्चारः ॥ ५१ ॥ इति ॥ ९९ ॥

ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम ॥ १०० ॥

तत्राऽनुक्ते प्रभातं स्यात्कषायेषु विशेषतः ।

मुख्यभैषज्यसम्बन्धो निषिद्धस्तरुणज्वरे ॥ १०१ ॥

*मुख्यभेषजं=क्वाथस्तस्य सम्बन्धः=पानम् । अत आह—

*न कषायं प्रशंसन्ति नराणां तरुणे ज्वरे ।

कषायेणाकुलीभूता दोषा जेतुं सुदुस्तराः ॥ ५२ ॥

*आकुलीभूताः=प्रवृद्धाः स्वमार्गं परित्यज्य इतस्ततो गताः । अत्र कषायशब्देन क्वाथो गृह्यते । उक्ताश्च क्वाथस्य पर्यायाः—

*शृतं क्वाथः कषायश्च निर्यूहः स निगद्यते ॥ ५३ ॥ १००-१०१ ॥

तोयपेयाऽऽदिसंस्कारैर्निर्दोषं तत्र भेषजम् ॥ १०२ ॥

*तोयपेयाऽऽदिसंस्कारैर्निर्दोषं तत्र भेषजमिति । तत्र=तरुणज्वरे मुख्यभेषजं क्वाथरूपं, न तु कल्पनमुद्दिश्य कषायः प्रतिषिध्यत इति । कल्पनं तोयपेयायवाग्वादिकम् ।

ननु—

*स्वरसश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ ।

ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम् ॥ ५४ ॥

*इति वचनात्स्वरसादयोऽपि कथं न निषिध्यन्ते, तत्राह—

*यः कषायः कषायः स्यात्स वर्ज्यस्तरुणज्वरे ॥ ५५ ॥ इति ।

*चतुर्थभागावशेषकरणेन, अष्टमभागावशेषकरणेन च कषायवर्णः कषायरसश्च स्यात् । स कषायः क्वाथः, स तरुणज्वरे निषिद्धः । क्वाथस्य लक्षणमाह—

*पादशिष्टः कषायः स्याद् यः षोडशगुणाम्भसा ।

क्वथितोऽतः षडङ्गादिर्न निषिद्धो नवज्वरे ॥ ५६ ॥

*अस्यायमर्थः-यः क्वाथ्यद्रव्यात् षोडशगुणेनाम्भसा क्वथितः-पक्वः । अथ च पादशिष्टः=चतुर्थभागावशेषः स कषायः स्यात् । अतः षडङ्गादिस्तरुणज्वरे न निषिद्धः । अपाकादर्धपाकाच्चोक्तलक्षणाभावेन कषायत्वाभावात् ॥ १०२ ॥

अथ तरुणज्वरे कषायस्य दोषमाह—

दोषा वृद्धाः कषायेण स्तम्भितास्तरुणज्वरे ।

स्तभ्यन्ते न विपच्यन्ते कुर्वन्ति विषमज्वरम् ॥ १०३ ॥

*कषायेण स्तम्भिताः=प्रवृत्तये निवारिताः। यत आह-कषाय-
रसगुणान्।

*कषायः स्तम्भनः शीतो रूक्षः पित्तकफापहः ॥ ५७ ॥

*इत्यादि। स्तभ्यन्ते=आध्मानं कुर्वन्ति। न विपच्यन्ते=सुखेन न विपच्यन्ते दुःखं दत्त्वा विलम्बेन विपच्यन्त इति यावत् ॥१०३॥

अन्यच्च—

न च्यवन्ते न पच्यन्ते कषायैः स्तम्भिता मलाः।
तिर्यग्विमार्गगा वा ते घोरं कुर्युर्नवज्वरम् ॥ १०४ ॥

अथ तरुणज्वरे वमननिषेधमाह—

अनवस्थितदोषाणां वमनं तरुणज्वरे।
हृद्रोगं श्वासमानाहं मोहं च कुरुते भृशम् ॥ १०५ ॥

*अयमर्थः-कफादिदोषोपस्थितौ स्वयमेव चेद्भवति वमनं न तद्दोषाय। अनवस्थितदोषाणां तरुणज्वरे वमनं यत्नकृतं हृद्रोगादीन्करोतीत्यर्थः। एतेन वचनेन तरुणज्वरे यत्नाद्वमनं निषिद्धम् ॥१०५॥

अथावस्थाविशेषे वमनं कर्त्तव्यमित्याह—

सद्योभुक्तस्य वा जाते ज्वरे सन्तर्पणोत्थिते।
वमनं वमनार्हस्य शस्तमित्याह वाग्भटः ॥ १०६ ॥

*वमनं चेति विकल्पो लङ्घनापेक्षया। वमनार्हस्येत्यनेन गर्भिण्यतिकृशातिवृद्धादिनिषेधः। अत एवात्र वृद्धवाग्भटः—

*वमितं लङ्घयेत्प्राज्ञो लङ्घितं न तु वामयेत्।
वमनं क्लेशबाहुल्याद्धन्याल्लङ्घनकर्षितम्।
न कार्यं गुर्विणीबालवृद्धदुर्बलभीरुभिः ॥ ५८ ॥

*अनशनमिति शेषः। अनेनानशननिषेधेन गुर्विण्यादीनां ज्वरे सामे पाचनं निरामे शमनं पथ्यान्नं मण्डादिकञ्च दद्यात्। पाचनलक्षणं पश्चाद् गुणप्रस्तावे बोद्धव्यम् ॥ १०६ ॥

अथ पाचनशमनौषधदानसमयमाह—

पाययेदातुरं सामं पाचनं सप्तमे दिने।
शमनेनाथ वा दृष्ट्वा निरामं तमुपाचरेत् ॥ १०७ ॥

*ननु—

लालाप्रसेको हृल्लासो हृदयाशुद्ध्यरोचकौ ।
तन्द्राऽऽलस्याविपाकास्यवैरस्यं गुरुगात्रता ॥
क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवाञ्ज्वरः ।
आमज्वरस्य लिङ्गानि न दद्यात्तत्र भेषजम् ॥
भेषजं ह्यामदोषस्य भूयो जनयति ज्वरम् ॥ ५९ ॥

*भूयो बाहुल्येन ॥ ५८ ॥

यच्च—

*पाययेद्दोषहरणं मोहादामज्वरे तु यः ।
स सुप्तं कृष्णसर्पन्तु कराग्रेण परामृशेत् ॥ ६० ॥

*इति वचनादामज्वरे भेषजनिषेधात्कथं सामे ज्वरे वा पाचनं-देयम् ? उच्यते--निरुपद्रवे सामज्वरे पाचनं देयम् । सोपद्रवे तु सामे भेषजं निषिद्धम् । तथा च वाग्भटः--

*सप्ताहात्परतोऽदुष्टे सामे स्यात्पाचनं ज्वरे ।
निरामे शमनं स्तब्धे सामे नौषधमाचरेत् ॥ ६१ ॥

*अदुष्टे=निरुपद्रवे । स्तब्धे=सोपद्रवे ॥ ६१ ॥ १०७ ॥

अन्यच्च—

कृशं चैवाल्पदोषञ्च शमनीयैरुपाचरेत् ॥ १०८ ॥

अथ सामान्यज्वरे पाचनकषायमाह सुश्रुतः—

नागरं देवकाष्ठञ्च ध्यामकं बृहतीद्वयम् ।
दद्यात्पाचनकं पूर्वं ज्वरितेभ्यो ज्वरापहम् ॥ १०६ ॥

*ध्यामकं=रोहिषं तदलाभादुशीरं दद्यात् । बृहतीद्वयं=बृहत्फला सूक्ष्मफला च । बृहती=क्षुद्रा बृहती चेति कण्टकारीद्वयं वा दद्यात् ।

*"कण्टकारीद्वयं शुण्ठी ध्यामकं सुरदारु च" ॥ ६२ ॥

*इति शार्ङ्गधरेणोक्तत्वात् । इति नागरादिक्वाथः ॥ १०६ ॥

अथ सर्वज्वरेषु सामान्यतः संशमनौषधिमाह सुश्रुतः—

अथ संशमनीयानि कषायाणि निबोध मे ।
सर्वज्वरेषु देयानि यानि वैद्येन जानता ॥ ११० ॥

वृश्चीरो बिल्ववर्षाभूः पयः सोदकमेव च ।
पचेत्क्षीरावशेषं तत्पेयं सर्वज्वरापहम् ॥ १११ ॥

*वृश्चीरः = श्वेतपुनर्नवा । वर्षाभूः = रक्तपुनर्नवा । तथा च मदनपालः—

*पुनर्नवा श्वेतमूलो वृश्चीरो दीर्घपत्रकः ।
पुनर्नवाऽपरा रक्ता वर्षाभू रक्तपुष्पकः ॥ ६३ ॥

*पाकप्रकारमाह—

अथ दुग्धपाकमाह—

*क्षीरमष्टगुणं द्रव्यात्क्षीरान्नीरं चतुर्गुणम् ।
क्षीरावशेषं पक्तव्यं क्षीरपाके त्वयं विधिः ॥ ६४ ॥

*द्रव्यात् = पलपरिमितात् ॥ ६४ ॥ १११ ॥

अन्यच्च—

उदकाद् द्विगुणं क्षीरं शिशपोशीरमेव च ।
तत्क्षीरशेषं क्वथितं पेयं सर्वज्वरापहम् ॥ ११२ ॥

अथ गुडूच्यादिक्वाथमाह—

गुडूचीधान्यकारिष्टं पद्मकं रक्तचन्दनम् ।
एषां क्वाथः सुप्रसिद्धः सर्वज्वरहरः स्मृतः ॥
दीपनो दाहहृल्लासतृष्णाछर्द्यरुचीर्हरेत् ॥ ११३ ॥

अथ संशोधननिषेधमाह—

छर्दिमूर्छामदश्वासभ्रमतृड्विषमज्वरान् ।
संशोधनस्य पानेन प्राप्नोति तरुणज्वरी ॥ ११४ ॥

अथ निषिद्धमपि संशोधनमवस्थाविशेषे देयमित्याह—

रोगे शोधनसाध्ये तु यं विद्याद् दोषदुर्बलम् ।
तं समीक्ष्य भिषक्कुर्याद् दोषप्रच्यावनं मृदु ॥ ११५ ॥

*दोषदुर्बलं = दोषैरुपचितैर्दुर्बलं न तूपवासादिकृशम् । अत एव समीक्ष्येति ॥ ११५ ॥

अथ शोधनसाध्यरोगानाह—

सद्योज्वरे विषेऽजीर्णे मन्देऽग्नावुदरे तथा ।
स्तन्यरोगे च हृद्रोगे कासश्वासेषु वामयेत् ॥ ११६ ॥

जीर्णज्वरगरच्छर्दिगुल्मप्लीहोदरेषु च ।
शूले शोथे मूत्रघाते कृमिरोगे विरेचयेत् ॥ ११७ ॥

अन्यच्च—

चले दोषे मृदौ कोष्ठे नेत्तेत्तत्र बलं नृणाम् ।
अव्यापद् दुर्बलस्यापि शोधनं हि तदा भवेत् ॥ ११८ ॥

*कुतो बलं नापेक्षणीयमित्याशङ्कायामाह—तदा तस्यामवस्थायां शोधनं दुर्बलस्यापि=दोषदुर्बलस्यापि, अव्यापद्भवेत्=छर्द्यादिव्याधिकृन्न भवतीत्यर्थः ॥ ११८ ॥

पक्वोऽप्यनिर्हृतो दोषो देहे तिष्ठन्महात्ययम् ।
विषमं वा ज्वरं कुर्याद् बलव्यापदमेव वा ॥ ११९ ॥

*बलवतः पुरुषस्य पक्वस्य दोषस्य स्वस्थानस्थितस्य शोधनाविधाने दोषमाह सुश्रुतः—पक्व इति । पक्वो लंघनतिक्ताम्बुपानपेयाऽऽदिभिः । अनिर्हृतः=अधोमार्गेणानुत्सृष्टः । महात्ययं=विषमं ज्वरं चातुर्थिकं तस्यव महात्ययत्वादिति गदाधरः । गम्भीरमिति कार्त्तिकः । महात्ययं=महाकष्टं वा । बलव्यापदं=बलक्षयम् ॥ ११६ ॥

अथ संशोधनमाह—

आरग्वधग्रन्थिकमुस्ततिक्ताहरीतकीभिः क्वथितः कषायः ।
सामे सशूले कफवातयुक्ते ज्वरे हितो दीपनपाचनश्च ॥ १२० ॥

इत्यारग्वधादिः क्वाथः ।

अन्यच्च—

पथ्याऽऽरग्वधतिक्तात्रिवृदामलकैः शृतं तोयम् ।
पाचनसारकमुक्तं मुनिभिर्जीर्णज्वरे सामे ॥ १२१ ॥
इत्यारोग्यपञ्चकद्वयम् ।

अथ सारिवाऽऽदिकल्कमाह—

अनन्ता वालकं मुस्तं नागरं कटुरोहिणी ।
पिष्ट्वा सुखाम्बुना कल्कं पाययेदक्षसम्मितम् ॥ १२२ ॥
कल्कः स्वल्पेन कालेन हन्यात्सर्वज्वरामयान् ।

विदध्यात्कोष्ठसंशुद्धिं दीपयेच्च हुताशनम् ॥ १२३ ॥

* अनन्ता = सारिवा ॥ १२३ ॥

अथ संशोधनशमनौषधनिषेधमाह—

पीताम्बुर्लङ्घनक्षीणो जीर्णो भुक्तः पिपासितः ।
न पिबेदौषधं जन्तुः संशोधनमथेतरत् ॥ १२४ ॥

*पीताम्बुः = पीततिक्ताम्बुः, भुक्तो = भुक्तवानित्यर्थः । अत्राध्य-
र्थ सितादित्वात् कर्तरि क्तप्रत्ययः । इतरत् = संशमनम् ॥ १२४ ॥

अथ सुदर्शनचूर्णमाह—

त्रिफला रजनीयुग्मं कण्टकारीयुगं शटी ।
त्रिकटु ग्रन्थिकं मूर्वा गुडूची धन्वयासकः ॥ १२५ ॥
कटुका पर्पटो मुस्तं त्रायमाणा च बालकम् ।
निम्बः पुष्करमूलञ्च मधुयष्टी च वत्सकः ॥ १२६ ॥
यवानीन्द्रयवो भार्गी शिग्रुबीजं सुराष्ट्रजा ।
वचात्वक्पद्मकोशीरचन्दनातिविषाबलाः ॥ १२७ ॥
शालिपर्णी पृश्निपर्णी विडङ्गं तगरं तथा ।
चित्रकं देवकाष्ठञ्च चव्यं पत्रं पटोलजम् ॥ १२८ ॥
जीवकर्षभकौ चैव लवङ्गं वंशलोचनम् ।
पुण्डरीकञ्च काकोली पत्रकं जातिपत्रकम् ॥ १२९ ॥
तालीसपत्रमेतानि समभागानि चूर्णयेत् ।
अर्द्धांशं सर्वचूर्णस्य किरातं प्रक्षिपेत्सुधीः ॥ १३० ॥
एतत्सुदर्शनं नाम चूर्णं दोषत्रयापहम् ।
ज्वरांश्च निखिलान्हन्ति नात्र कार्या विचारणा ॥ १३१ ॥
दोषजागन्तुकांश्चापि धातुस्थान्विषमज्वरान् ।
सन्निपातोद्भवांश्चापि मानसानपि नाशयेत् ॥ १३२ ॥
शीतादीनपि दाहादीन्मेहं तन्द्रां भ्रमं तृषाम् ।
कासं श्वासञ्च पाण्डुञ्च हृद्रोगं कामलामपि ॥ १३३ ॥
त्रिकपृष्ठकटीजानुपार्श्वशूलं निवारयेत् ।
शीताम्बुना पिबेदेतत्सर्वज्वरनिवृत्तये ॥ १३४ ॥

सुदर्शनं यथा चक्रं दानवानां विनाशनम् ।
तथा ज्वराणां सर्वेषां चूर्णमेतत्प्रणाशनम् ॥ १३५ ॥

*पुष्करमूलाभावे तु कुष्ठमपि दद्यात् । भार्ग्यभावे कण्टकारीमूलम् । सौराष्ट्र्यभावे स्फटिकां दद्यात् । तगरालाभे कुष्ठं देयम् । जीवकर्षभकयोरलाभे विदारीकन्दस्य भागद्वयं दद्यात् । पुण्डरीकं = श्वेतकमलम् । काकोल्यभावे अश्वगन्धामूलम् । "तालीशपत्रकाभावे स्वर्णताली प्रदीयते" इति, अथवा कण्टकारीजटा देया । इति सुदर्शनचूर्णम् ॥ १२५-१३५ ॥

अथ निम्बादिचूर्णमाह—

निम्बपत्रवराव्योषयवानीलवणत्रयम् ।
क्षारो दिग्वह्निरामेषुत्रिनेत्रान् क्रमतोऽशकान् ॥ १३६ ॥
सर्वमेकीकृतं चूर्णं प्रत्यूषे भक्षयेन्नरः ।
ऐकाहिकं द्व्याहिकञ्च तथा त्रिदिवसज्वरम् ॥ १३७ ॥
चातुर्थिकं महाघोरं सततं सन्ततं दिवा ।
धातुस्थं च त्रिदोषोत्थं ज्वरं हन्ति न संशयः ॥ १३८ ॥

इति निम्बादिचूर्णम् ।

अथ शट्यादिक्वाथमाह —

शटी निशाद्वयं शुण्ठी दारु पुष्करमूलकम् ।
एला गुडूची कटुका पर्पटश्च यवासकः ॥ १३९ ॥
शृङ्गी किराततिक्तश्च दशमूली तथैव च ।
क्वाथमेषां पिबेत्कोष्णं सिन्धुचूर्णयुतं नरः ।
ज्वरान्सर्वान्द्रुतं हन्ति नात्र कार्या विचारणा ॥ १४० ॥

*अनुभूतोऽयम् । इति शट्यादिक्वाथः ॥ १३९-१४० ॥

अथ हरीतक्यादिगुटीमाह —

हरीतकीत्रिवृद्वृद्धदारकाणां पृथग्भवेत् ।
पलद्वयं कणा शुण्ठी गुडूची गोक्षुरो वरी ॥ १४१ ॥
सहदेवी विडङ्गश्च प्रत्येकं पलसम्मितम् ।
मधुना वटिकां कृत्वा खादञ्ज्वरमपोहति ॥ १४२ ॥

कासं श्वासं मलस्तम्भं वह्निमान्द्यं नियच्छति ॥ १४३ ॥

*अनुभूतेयम् ॥ १४१-१४३ ॥

अथ लाक्षाऽऽदितैलमाह—

लाक्षा दशाक्षा त्वरुणा षडक्षा सचन्दनं लोहितचन्दनञ्च ।
त्वक्पत्रकं वारि सुरा समुस्ता प्रत्येकमेतानि पलोन्मितानि॥१४४॥
किराततिक्तात्रिवृतासतिक्ताऽमृताकणापर्पटकण्टकार्यः ।
विडङ्गविश्वाऽऽमलकानि वासारसानिशावीरणसिन्दुवाराः ॥१४५॥
एतानि देयानि पृथक्पलार्द्धमानानि सर्वाणि च भेषजानि ।
कल्कानमीषां विदधीत गव्यदुग्धेन वै सार्द्धतुलामितेन ॥ १४६ ॥
तैलं तिलानां तु तुलाऽनुमानं तेनैव कल्केन शनैः पचेच्च ।
हन्याज्ज्वरांस्तैलमिदं समस्तान् कुर्याद् बलं वीर्यमतीव पुष्टिम्॥१४७॥
विमर्दनादाशु परिश्रमं भ्रमं शमं नयेत्सञ्जनयेद् द्युतिं तनोः ।
तथा व्यथामस्थिसमुद्भवामपि प्रहृत्य निद्रां समुपार्जयेत्सुखम्॥१४८॥

*अरुणा = मञ्जिष्ठा, वारि = वालम्, रसा = रास्ना ॥१४४—१४८॥

अथ द्वितीयं लाक्षाऽऽदितैलमाह—

लाक्षारससमं तैलं तैलान्मस्तु चतुर्गुणम् ।
अश्वगन्धानिशादारुकौन्तीकुष्ठाब्दचन्दनैः ॥ १४९ ॥
समूर्वारोहिणीरास्नाशताह्वामधुकैः समैः ।
सिद्धं लाक्षाऽऽदिकं नाम तैलमभ्यञ्जनादिना ॥ १५० ॥
सर्वज्वरक्षयोन्मादश्वासापस्मारवातनुत् ।
यक्षराक्षसभूतघ्नं गर्भिणीनां च शस्यते ॥ १५१ ॥

*मस्तु = दधिजलम् । कौन्ती = रेणुका । चन्दनमत्र श्वेतमेव न तु रक्तम् । रोहिणी = कटुका । १४९—१५१ ॥

अथ महालाक्षाऽऽदितैलमाह—

लाक्षा हरिद्रा मञ्जिष्ठा फेनिलं मधुकं बला ।
लामज्जकं चन्दनं च चम्पकं नीलमुत्पलम् ॥ १५२ ॥
प्रत्येकमेषां षण्मुष्टीः पक्त्वा तोये चतुर्गुणे ।
चतुर्भागावशेषे तु गर्भे चैतत्समावपेत् ॥ १५३ ॥

रेणुका पद्मकञ्चैव वाजिगन्धा तथैव च ।
वेतसं चोरकं कुष्ठं देवदारु नखं त्वचम् १५४ ॥
शतपुष्पा पुण्डरीकं मांसी मधुकमेव च ।
एभिरक्षमितैः कल्कैः कषायेणैव पेषितैः ॥ १५५ ॥
मस्तुशुक्तारनालानामाढकांशं समावपेत् ।
क्षीराढकसमायुक्तं तैलप्रस्थं विपाचयेत् ॥ १५६ ॥
अभ्यङ्गात्तैलमेतद्धि शीघ्रं दाहमपोहति ।
व्यपोहति तथा वातपित्तश्लेष्मभवज्वरम् ॥ १५७ ॥
सप्रलापं सतृष्णञ्च तालुशोषभ्रमान्वितम् ।
ग्रहोपसृष्टा ये बाला रक्षसा दूषिताश्च ये ।
तेषां कष्टं प्रशमयेत्तैलं लाक्षाऽऽदिकं महत् ॥ १५८ ॥

*फेनिलं=बदरी।लामज्जकम्=उशीरवत् पीतच्छवितृणविशेषः ।
"लामज्जकं यदा न स्यादुशीरं दीयते तदा" ।
चम्पकमित्यस्य स्थाने कुत्रापि गैरिकमिति पाठः ।
"नीलोत्पलस्यालाभे तु कुमुदं देयमिष्यते"
समावपेत्प्रक्षिपेदित्यर्थः । चोरकं=ग्रन्थिपर्णस्य भेदः 'भटिउर' इति नैपालदेशे भवति, तदलाभे ग्रन्थिपर्णं देयम् । पुण्डरीकं=श्वेतकमलम् । मस्तु=दधिजलम् । शुक्तं=सन्धानभेदः । आरनालः=सोऽपि सन्धानभेदः ॥ १५२—१५८ ॥

अथ नववज्वरे रसप्रयोगः ।

अथोदकमञ्जरीरसमाह—

सूतो गन्धष्टङ्कणः शोषणश्च सर्वैस्तुल्या शर्करा मत्स्यपित्तैः ।
भूयो भूयो मर्दयेत्त्रिरात्रं वल्लो देयः शृङ्गवेरद्रवेण ॥ १५९ ॥
तापे शीतं व्यञ्जनैस्तक्रभक्तं-
वृन्ताकाढ्यं पथ्यमेतत्प्रदिष्टम् ।
अह्नायोग्रं हन्ति सद्योज्वरन्तु
पित्ताधिक्ये मूर्ध्नि तोयं च दद्यात् ॥ १६० ॥

*अस्य प्रक्रिया—पारा शुद्ध भाग १, गंधकभाग १, सोहागा

भृष्ट भाग १, मरिचभाग १, शर्कराभाग ४, रोहितमत्स्यपित्तभाग ४, प्रतिदिनं सर्वं दिनत्रयं मर्दयेत् । रसमिमं रक्तिकात्रयमितमार्द्रकरसेन दद्यात् । ओदनं तक्रं वृन्ताकफलं च भोक्तुं दद्यात् व्यञ्जनाद्यैः । शीतलमुपचारं कुर्यात् । अयमुदकमञ्जरीरसो नवज्वरेषु रसरत्नप्रदीपे उक्तः ॥ १५९—१६० ॥

अथ ज्वरधूमकेतुरसमाह—

भवेत् समं सूतसमुद्रफेनहिङ्गूलगन्धं परिमर्द्य यामम् ।
नवज्वरे वल्लयुगं त्रिघस्रमार्द्राम्भसाऽयं ज्वरधूमकेतुः ॥ १६१ ॥

*अस्य प्रक्रिया यथा-पाराशुद्ध, हिंगुलशुद्ध, गन्धकशुद्ध, समुद्रफेनं-समभागं सर्वं याममेकमार्द्रकरसेन संमर्द्य रक्तिकाषट्कमितमार्द्रकरसेन दिनत्रयं नवज्वरी भक्षयेद्दिनत्रयान्नवज्वरो नश्येद् । इति ज्वरधूमकेतुः, रसेन्द्रचिन्तामणौ ॥ १६१ ॥

अथ महाज्वरांकुशरसमाह—

शुद्धसूतो विषं गन्धः प्रत्येकं शाणसम्मितः ।
धूर्त्तबीजं त्रिशाणं स्यात्सर्वेभ्यो द्विगुणा भवेत् ॥ १६२ ॥
हेमाह्वा कारयेदेषां सूक्ष्मं चूर्णं प्रयत्नतः ।
देयं जम्बीरमज्जाभिश्चूर्णं गुञ्जाद्वयोन्मितम् ॥ १६३ ॥
आर्द्रकस्य रसेनापि ज्वरं हन्ति त्रिदोषजम् ।
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकं च चतुर्थकम् ॥ १६४ ॥
विषमञ्च ज्वरं हन्यान्नवं जीर्णञ्च सर्वथा ।
महाज्वरांकुशो नाम्ना रसोऽयं सर्वसम्मतः ॥ १६५ ॥

*प्रक्रिया-शुद्धपारा, शुद्धगन्धक, शुद्धविष, प्रत्येकं टंक १, धत्तूरबीज टंक ३, चोक टंक १२, सर्वेषां चूर्णमतिसूक्ष्मं कर्त्तव्यम् । इति महाज्वरांकुशः सर्वज्वरेषु शार्ङ्गधरे ॥ १६२-१६५ ॥

अथ ज्वरघ्नीं वटिकामाह—

एको भागो रसाच्छुद्धाच्छैलेयः पिप्पली शिवा ।
आकारकरभो गन्धः कटुतैलेन शोधितः ॥ १६६ ॥
फलानि चेन्द्रवारुण्याश्चतुर्भागमिता अमी ।

एकत्र मर्दयेच्चूर्णमिन्द्रवारुणिकारसैः ॥ १६७ ॥
माषोन्मितां वटीं कृत्वा दद्यात्सद्योज्वरे बुधः ।
छिन्नारसानुपानेन ज्वरघ्नी वटिका मता ॥ १६८ ॥

*शैलेयः="छर" इति लोके । शिवा=हरीतकी । आकारकरभः= 'अकरकरा' इति लोके । चतुर्भागमिता अमी शैलेयादयः षट् समुदिता भागचतुष्टयमिताः । इति ज्वरघ्नी वटिका शार्ङ्गधरे ॥१६६-१६८॥

अथ द्वितीयां ज्वरघ्नीं वटिकामाह—

रसं गन्धञ्च दरदं जैपालं क्रमवर्द्धितम् ।
दन्तीरसेन सम्पिष्य वटी गुञ्जामिता भवेत् ॥ १६९ ॥
प्रभाते सितया सार्द्धमशिता शीतवारिणा ।
एकेन दिवसेनैषा नवज्वरहरी भवेत् ॥ १७० ॥

अथ नवज्वरहरीं वटीमाह—

रसो गन्धो विषं शुण्ठी पिप्पली मरिचानि च ।
पथ्या बिभीतकं धात्री दन्तीबीजंच शोधितम् ॥ १७१ ॥
चूर्णमेषां समांशानां द्रोणपुष्पोरसैः पुटेत् ।
वटीं माषनिभां कुर्याद्भक्षयेन्नूतने ज्वरे ॥ १७२ ॥

अथ सर्वज्वरहरं रसमाह—

एकभागो रसो भागद्वयं शुद्धञ्च गन्धकम् ।
गरलस्य त्रयो भागाश्चतुर्भागा हिमावती ॥ १७३ ॥
जैपालकः पञ्चभागो निम्बूद्रवविमर्दितः ।
कृमिघ्नप्रमिता वट्यः कार्याः सर्वज्वरच्छिदः ॥ १७४ ॥
शृङ्गवेरेण दातव्या वटिकैका दिने दिने ।
जीर्णज्वरे तथा जीर्णे सामे वा विषमे तथा ॥ १७५ ॥
ज्वरं सर्वं निहन्त्यसौ दावो वनमिवानलः ॥ १७६ ॥

इति नवज्वरे रसाः ।

अथ सामान्यज्वरे रसाः ।

तत्र महाज्वरांकुशरसः (सर्वज्वरेषु) ।

शुद्धं सूतं विषं गन्धं धूर्त्तबीजं त्रिभिः समम् ।

चतुर्णां द्विगुणं व्योषं चूर्णं गुञ्जाद्वयोन्मितम् ॥ १७७ ॥
आर्द्रकस्य रसैः किं वा जम्बीरस्य रसैर्युतम् ।
महाज्वरांकुशो नाम्ना सर्वज्वरविनाशनः ॥ १७८ ॥
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम् ।
विषमं वा त्रिदोषं वा ज्वरं हन्ति न संशयः ॥ १७९ ॥

*प्रक्रिया—शुद्धपारद टंकः १, शुद्धविष टंकः १, शुद्धगन्धक टंकः १, धत्तूरबीज टंकः ३, त्रिकटु प्रत्येक टंकः ४, सर्वेषां चूर्णमतिसूक्ष्मं कर्त्तव्यम् । इति महाज्वरांकुशः सर्वज्वरेषु ॥ १७७-१७९ ॥

अथ श्वासकुठाररसमाह—

सूतं गन्धं विषं चैव टङ्कणं च मनःशिला ।
एतानि टङ्कमात्राणि मरिचं त्वष्टटङ्ककम् ॥ १८० ॥
कटुत्रयं टङ्कषट्कं खल्ले क्षिप्त्वा विचूर्णयेत् ।
रसः श्वासकुठारोऽयं सर्वज्वरहरः परः ॥ १८१ ॥

*इति श्वासकुठारो रसः । श्वासे सर्वज्वरे, रसरत्नाकरे ॥१८०-१८१॥

अथ ज्वरांकुशमाह—

दारुमुखां शिखिग्रीवां रसकञ्च पृथक् पृथक् ।
टङ्कत्रयानुमानेन गृहीत्वा कनकद्रवैः ॥ १८२ ॥
मर्दयेत्त्रिदिनं कार्या वटी चणकमात्रया ।
मरिचैरेकविंशत्या सप्तभिस्तुलसीदलैः ॥ १८३ ॥
खादेद्वटीद्वयं पथ्यं दुग्धभक्तं सशर्करम् ।
तरुणं विषमं जीर्णं हन्यात्सर्वज्वरं ध्रुवम् ॥ १८४ ॥

*दारुमुखा=दारुमूषम् । शिखिग्रीवा=तुत्थम् । रसकं 'खपरिआ' इति लोके । प्रत्येकं स्यात् टङ्कत्रयम् ३ धत्तूरपत्रस्य रसेन मर्दयेच्च । इति ज्वरांकुशः सर्वज्वरेषु ॥ १८२—१८४ ॥

अथ हुताशनरसमाह—

नागरं कर्षमात्रञ्च टङ्कणं कर्षकद्वयम् ।
मरिचं सार्द्धकर्षं स्याच्चावद्दग्धवराटकम् ॥ १८५ ॥
विषं कर्षचतुर्थांशं सर्वमेकत्र चूर्णयेत् ।

रसो हुताशनो नाम्ना खाद्यो गुञ्जामितो ज्वरे ॥ १८६ ॥

अथ ज्वरघ्नीं वटिकामाह—

शुद्धजैपालटङ्कं तु कटूर्वी टङ्कद्वयोन्मिताम् ।
गैरिकं टङ्कमेकञ्च कन्यानीरेण मर्दयेत् ॥ १८७ ॥
कलायसदृशी कार्या वटिका ताञ्च भक्षयेत् ।
शीतलेन जलेनैव वटी जीर्णज्वरापहा ॥ १८८ ॥

अथ रविसुन्दररसमाह—

द्विभागतालेन हतं च ताम्रं रसं च गन्धं च समीनमायुम् ।
विषं समं च द्विगुणञ्च ताम्रं त्रिःसप्तवारेण दिवाकरांशौ ॥१८९॥
विमर्द्य चारिष्टरसेन चूर्णं गुञ्जैकदत्तं सितया समेतम् ।
ज्वरांकुशोऽयं रविसुन्दराख्यो ज्वरान्निहन्त्यष्टविधान्समस्तान् ॥१९०॥

*अस्य प्रक्रिया—पारद टंकः १, गन्धक टंकः १, विष टंकः १, द्विगुणतालकहतताम्र टंकः २, रोहितमत्स्यपित्त टंकः १, सर्वमेकत्र चूर्णयित्वा निम्बुपत्ररसैर्भावयित्वा २१ घारानुष्णे संशोष्य १ रक्तिकामात्रं श्वेतशर्करया भक्षणीयम् । इति सर्वज्वरे रविसुन्दरो रसः॥१८९–१९०॥

अथ कज्जलीमाह—

(रसरत्नप्रदीपे)

शुद्धं सूतं तथा गन्धं खल्ले तावद्विमर्दयेत् ।
सूतं न दृश्यते यावत्किन्तु तत्कज्जलं भवेत् ॥ १९१ ॥
एषा कज्जलिका ख्याता बृंहणी वीर्यवर्द्धिनी ।
नानाऽनुपानयोगेन सर्वव्याधिविनाशिनी ॥ १९२ ॥

अथ रसपर्पटीमाह—

जपापत्ररसेनाथ बर्द्धमानरसेन च ।
भृङ्गराजरसेनापि काकमाच्या रसेन च ॥ १९३ ॥
रसं संशोधयेत्तेन तत्समं शोधयेद्बलिम् ।
भृङ्गराजरसैः पिष्ट्वा शोषयेदर्करश्मिभिः ॥ १९४ ॥
सप्तधा वा त्रिधा वाऽपि पश्चाच्चूर्णन्तु कारयेत् ।
चूर्णयित्वा समं तेन रसेन सह मर्दयेत् ॥ १९५ ॥
नष्टसूतं यदा चूर्णं भवेत्कज्जलसन्निभम् ।

निर्धूमवदराङ्गारे द्रवीकुर्यात्प्रयत्नतः ॥ १९६ ॥
तत्र तं महिषीविष्ठास्थापिते कदलीदले।
निक्षिपेत्तदुपर्य्यन्यत्पत्रं दत्त्वा प्रपीडयेत् ॥ १९७ ॥
शीतलञ्च ततः पत्रात्समुद्धृत्य विचूर्णयेत्।
एवं सिद्धा भवेद्व्याधिघातिनी रसपर्पटी ॥ १९८ ॥
ज्वरादिव्याधिभिर्व्याप्तं विश्वं दृष्ट्वा पुरा हरः।
चकार कृपया युक्तः सुधावद्रसपर्पटीम् ॥ १९९ ॥
रक्तिकासम्मितां तावद्भृष्टजीरकसंयुताम्।
गुञ्जाऽर्धभृष्टहिङ्ग्वाढ्यां भक्षयेद्रसपर्पटीम् ॥ २०० ॥
रोगानुरूपभैषज्यैरपि तां भक्षयेद् बुधः।
पिबेत्तदनु पानीयं शीतलं चुलुकत्रयम् ॥ २०१ ॥
प्रत्यहं वर्धयेत्तस्या एकैकां रक्तिकां भिषक्।
नाधिकां दशगुञ्जातो भक्षयेत्तां कदा चन ॥ २०२ ॥
एकादशदिनारम्भात्तां ततो वाऽपकर्षयेत्।
एवमेतां समश्नीयान्नरो विंशतिवासरान् ॥ २०३ ॥
शिवं गुरूंस्तथा विप्रान्पूजयित्वा प्रणम्य च।
श्रद्धया भक्षयेदेतां क्षीरमांसरसाशनः ॥ २०४ ॥
ज्वरञ्च ग्रहणीं वाऽपि तथाऽतीसारमेव च।
कामलां पाण्डुरोगञ्च शूलं प्लीहं जलोदरम् ॥ २०५ ॥
एवमादीन् गदान् हत्वा हृष्टः पुष्टश्च वीर्यवान्।
जीवेद्वर्षशतं साग्रं वलीपलितवर्जितः ॥ २०६ ॥

अथ ज्वरिणोऽन्नदानसमयस्तत्र चरकः—

क्षुत्सम्भवति पक्वेषु रसदोषमलेषु च।
काले वा यदि वाऽकाले सोऽन्नकाल उदाहृतः ॥ २०७ ॥

अन्यच्च—

आमे पाकं गते नृणां यदा भोजनलालसा।
भवेत्काले ह्यकाले वा सोऽन्नकाल उदाहृतः ॥ २०८ ॥

*तत्र कारणमाह—ज्वरस्य पाकावस्थाऽन्नदानकालः। तत्र ज्वर-

-स्य पाककालश्च—

*वातिकः सप्तरात्रेषु दशरात्रेण पैत्तिकः ।
श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि ॥ ६५ ॥

*ज्वरस्य पाक उपशमः । ज्वरपाकेनैव रसपाको दोषपाकोऽपि कथितः । यथा दोषपाकं विना ज्वरपाको न भवति रसपाकं विना दोषपाकश्च न भवति । ननु यथा पैत्तिकज्वरो दशाहोरात्रेण पाकं याति, एकादशदिनेऽन्नं दीयते । तथा श्लैष्मिको ज्वरो द्वादशाहोरात्रेण पाकं याति, त्रयोदशे दिवसेऽन्नं दीयते । तथा वातिको ज्वरः सप्ताहोरात्रेण पाकं याति, अष्टमे दिवसेऽन्नं कथं न दीयते ? कथं सप्तम एव दिवसेऽन्नं दीयत इति ? उच्यते—

*कफपित्ते द्रवे धातू सहेते लङ्घनं बहु ।
आमक्षयादूर्ध्वमपि वायुर्न सहते क्षणम् ॥ ६६ ॥

*इति वचनादामरसपाके जाते आहारलाभं विना वायुः क्षणमात्रमपि सोढुं न शक्नोति, स आशुकारित्वात्क्षणादाक्षेपकादान्विकारान्सञ्जनयति । अतो वातिके ज्वरे पाकदिनानामन्तिमे सप्तम एव दिनेऽन्नं दीयते ॥ तथा च धन्वन्तरिः—

*ज्वराभिभूतः षडहे व्यतीते विपक्वदोषः कृतलङ्घनादिः ।
यो भेषजं खादति वैद्यवश्यो निःसंशयं हन्त्यचिरात्स रोगान् ॥६७॥

*ज्वराभिभूतः=वातज्वराभिभूतः । विपक्वदोषः=पक्ववातः । कृतलङ्घनादिः=आदिशब्दात् कृतपक्वजलपाननिवातगृहवासगुरूष्णवसनधारणादिः। भेषजमित्यन्नस्याप्युपलक्षणम्। अत एवाह चरकः—

*ज्वरितं षडहेऽतीते लघ्वन्नं प्रतिभोजितम् ।
पाचनं शमनीयं वा कषायं पाययेत्तु तम् ॥ ६८ ॥ इति ।

*ज्वरितं=वातज्वरिणम् । षडहेऽतीत इत्युपलक्षणम् । पित्तज्वरिणं दशाहेऽतीते । श्लेष्मज्वरिणं द्वादशाहेऽतीते । लघ्वन्नं भोजितं ज्वरिणम्—

*पाचनं शमनीयं वा कषायं पाययेत्पुनः ।
स एव सर्वज्वरिणं दिनान्ते भोजयेल्लघु ॥ ६९ ॥

*दिनान्ते=अन्तशब्दोऽत्र मध्यवाची तेन त्रिधा विभक्तस्य दिवसस्य मध्यभागे पित्तस्य प्राधान्यसमये। उक्तं च वाग्भटेन—

*ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः।
वयोऽहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमात् ॥ ७० ॥

*ते=वातपित्तश्लेष्माणः। पित्तकालेऽपि मध्याह्नादर्वाक्। यत आह—

*याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत्।
याममध्ये रसोत्पत्तिर्यामयुग्माद् बलक्षयः ॥ ७१ ॥

*एतत्संख्यापरिमितिश्चेत्तन्न, यत आह—

*श्लेष्मक्षये प्रवृद्धोष्मा बलवाननलस्तदा।
वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम् ॥ ७२ ॥

*तदा=पित्तप्राधान्यसमये। अन्यथा=उक्तसमयादन्यथा। वेगापाये=जठराग्निवेगनाशे। तद्=भोजनम्। ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः ॥ ७२ ॥ इति ॥ २०८ ॥

अथ विषमज्वरेऽन्नदानसमयविशेषमाह चरकः—

सर्वज्वरेषु सप्ताहं मात्रावल्लघु भोजयेत्।
वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम् ॥ २०९ ॥

*सर्वज्वरेषु=सर्वविषमज्वरेषु, वेगापाये=ज्वरवेगापाये, भोजयेत्। अन्यथा=ज्वरवेगापायं विना, तद्भोजनं ज्वरवेगाभिवर्द्धनं भवति ॥ २०९ ॥

अथ भोजनादिस्थाननिर्णयमाह—

आहारनिर्हारविहारयोगाः सदैव सद्भिर्विजने विधेयाः ॥२१०॥

अथ ज्वरितस्योपवेशनप्रकारमाह—

ज्वरे प्रमेहो भवति स्वल्पैरपि विचेष्टितैः।
निषण्णं भोजयेत्तस्मान्मूत्रोच्चारौ च कारयेत् ॥ २११ ॥

*अत्यबलस्य ज्वरितस्य भोजनायोपवेशनप्रकारमाह सुश्रुतः—ज्वर इति। निषण्णं=यथास्थानस्थितमेव न तु स्थानान्तरंनीतम् ॥२११॥

अथान्नग्रहणसमये ज्वरितेन कवलकरणमित्याह—

यथादोषोचितैर्द्रव्यैः कर्त्तव्यः कवलग्रहः ।
अरोचकास्यवैरस्यमलपूतिप्रसेकहृत् ॥ २१२ ॥
भृष्टजीरकचूर्णेन सिन्धुजन्मयुतेन च ।
जिह्वादन्तान्मुखस्यान्तर्घृष्ट्वा कवलमाचरेत् ॥ २१३ ॥
मुखे मलं विगन्धत्वं विरसत्वं च नश्यति ।
मनः प्रसन्नं भवति भोजनेऽतिरुचिर्भवेत् ॥ २१४ ॥

अथ ज्वरिणे हितवस्तु दातव्यमित्याह—

ज्वरितो हितमश्नीयाद्यद्यप्यस्यारुचिर्भवेत् ।
अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽपि च ॥ २१५ ॥

*अयमर्थः-यद्यपि ज्वरितस्य हिते भक्ष्येऽरुचिर्भवेत्, तथाऽपि ज्वरितो हितमेवाश्नीयादिति नियमः । यत आह सुश्रुतः—

*गुर्वभिष्यन्द्यकाले च ज्वरी नाद्यात्कथञ्चन ।
न तु तस्याहितं भुक्तमायुषे वा सुखाय च ॥ ७३ ॥
आनद्धः स्तिमितैर्दोषैर्यावन्तं कालमातुरः ।
तावत्कालं स लङ्घन्नमश्नीयात्सुविरिक्तवत् ॥ ७४ ॥

*आनद्धः स्तिमितैर्दोषैः=अपक्वैर्दोषैर्व्याप्त इत्यर्थः ।
ननु हिते वस्तुनि कथमरुचिः स्यादत आह—

*सातत्यात्स्वाद्वभावाच्च पथ्यं द्वेष्यत्वमागतम् । इति ।

*सातत्याद्=एकस्यैव भक्ष्यस्य सर्वदोपयोगात् । स्वाद्वभावात्=भक्ष्यान्तरादपि विस्वादुतः । पथ्यमप्रियं स्यात्तथाऽपि तदेव पथ्यम् ।

*कल्पनाविधिभिस्तैस्तैः प्रियत्वं गमयेत्पुनः ॥ ७५ ॥ इति ।

*अथ ज्वरितोऽन्नकालेऽश्नीयादेवेति द्वितीयो नियमः कुत इति चेत्? हि यतो हेतोरभुञ्जानः क्षीयते । पक्वदोषधातुर्भवति ततो म्रियतेऽपि च ॥ २१५ ॥

अथ ज्वरिताय हितान्यन्नादीन्याह—

रक्तशाल्यादयः शस्ताः पुराणाः षष्टिकैः सह ।

यवाग्वोदनलाजार्थे ज्वरितानां ज्वरापहाः ॥ २१६ ॥
मुद्गान् मसूरांश्चणकान्कुलत्थान्समकुष्ठकान् ।
यूषार्थे यूषसात्म्यानां ज्वरितानां प्रदापयेत् ॥ २१७ ॥
पटोलपत्रं वार्त्ताकुं कुलकं कारवेल्लकम् ।
कर्कोटकं पर्पटकं गोजिह्वां बालमूलकम् ॥ २१८ ॥
पत्रं गुडूच्याः शाकार्थे ज्वरितानां ज्वरापहम् ।
लावान् कपिञ्जलानेणान्हरिणान्पृषताञ्छशान् ॥ २१९ ॥
कुरङ्गान्कालपुच्छांश्च तथैव मृगमातृकान् ।
मांसार्थे मांससात्म्यानां ज्वरितानां प्रदापयेत् ॥ २२० ॥
सारसक्रौञ्चशिखिनस्तथा तित्तिरकुक्कुटान् ।
गुरूष्णत्वान्न शंसन्ति के चिदेवं व्यवस्थिताः ॥ २२१ ॥

*तित्तिर इत्यत्र कृष्णतित्तिरः ॥ २२१ ॥

ज्वरितानां प्रकोपं तु यदा याति समीरणः ।
तदैतेऽपि हि शस्यन्ते मात्राकालोपपादिताः ॥ २२२ ॥
निम्बुकं दाडिमं धात्रीफलमम्लं प्रकाङ्क्षते ।
प्रदद्यादम्लसात्म्याय काञ्जिकं वा पुरातनम् ॥ २२३ ॥

*एतेषां गुणनामानि पूर्वोक्तानि ॥ २२३ ॥

अथान्नसाधनप्रक्रियामाह ।

तत्र मण्डस्य लक्षणविधिगुणानाह—

तण्डुलानां सुसिद्धानां चतुर्दशगुणे जले ।
रसः सिक्थविरहितो मण्ड इत्यभिधीयते ॥ २२४ ॥
शुण्ठीसैन्धवसंयुक्तो दीपनः पाचनश्च सः ।
अन्नस्य सम्यक्सिद्धत्वं ज्ञेया मण्डस्य सिद्धता ॥ २२५ ॥
पेयायूषयवागूनां विलेपीभक्तयोरपि ।
मण्डो ग्राही लघुः शीतो दीपनो धातुसाम्यकृत् ।
ज्वरघ्नस्तर्पणो बल्यः पित्तश्लेष्मश्रमापहः ॥ २२६ ॥

अथ पेयाया विधिगुणानाह—

चतुर्दशगुणे नीरे रक्तशाल्यादिभिः कृता ।

द्रवाधिका स्वल्पसिक्था पेया प्रोक्ता भिषग्वरैः ॥ २२७ ॥
साऽतिलघ्वी ग्राहिणी च धातुपुष्टिविधायिनी ।
तृड्ज्वरानिलदौर्बल्यकुक्षिरोगविनाशिनी ॥ २२८ ॥
स्वेदाग्निजननी ज्ञेया वातवर्चोऽनुलोमनी ॥ २२९ ॥
शुण्ठीसैन्धवसंयुक्ता दीपनी पाचनी च सा ।
आमशूलहरी रुच्या स्याद्विबन्धविनाशिनी ॥ २३० ॥

अथ प्रमथ्याया विधिगुणानाह—

प्रमथ्या प्रोच्यते द्रव्यपलात्कल्कीकृताच्छृतात् ।
तोयेऽष्टगुणिते तस्याः पानमाहुः पलद्वयम् ॥
गुणैः प्रमथ्या पेयावत्ततो लघ्वी विशेषतः ॥ २३१ ॥

*द्रव्यं = पाच्यद्रव्यम् । तस्याः = पलद्वयशेषायाः ॥ २३१ ॥

अथ यूषस्य विधिगुणानाह—

अष्टादशगुणे नीरे शिम्बीधान्यशृतो रसः ।
विरलान्नो घनः किञ्चित्पेयातो यूष उच्यते ।
उक्तः स एव निर्यूहो रुचिकृच्च विशेषतः ॥ २३२ ॥

अथ यूषस्य प्रकारान्तरमाह—

कल्कद्रव्यपलं शुण्ठी पिप्पली चार्द्धकार्षिकी ।
वारिप्रस्थेन विपचेत्तद्द्रवो यूष उच्यते ॥ २३३ ॥

*अयमर्थः—यूषधान्यं पलमितं तत्कल्कीकृतम् । शुण्ठी पिप्पली च समुदिताऽर्द्धकर्षमिता कल्कीकृता । उभयमपि प्रस्थमितेन वारिणा पचेत् । तद्द्रवो यूषः ॥ २३३ ॥

यूषो बल्यो लघुः पाके रुच्यः कण्ठ्यः कफापहः ॥ २३४ ॥

अथ मुद्गयूषविधिमाह—

(वृन्दटीकायां तन्त्रान्तरे)

मुद्गानां द्विपलं तोये शृतमर्द्धाढकोन्मिते ।
पादस्थं मर्दितं पूतं दाडिमस्य पलेन तत् ॥ २३५ ॥
युक्तं सैन्धवविश्वाह्वधान्यकैः पादिकांशिकैः ।
कणाजीरकयोश्चूर्णाच्छाणैकेनावचूर्णितम् ।

संस्कृतो मुद्गयूषोऽयं पित्तश्लेष्महरो मतः ॥ २३६ ॥

अथ मुद्गयूषगुणानाह—

मुद्गानामुत्तमो यूषो दीपनः शीतलो लघुः ।
व्रणोर्द्ध्वजत्रुरुग्दाहकफपित्तज्वरास्रजित् ॥ २३७ ॥

अथ मुद्गामलकयूषगुणानाह—

मुद्गामलकयूषस्तु भेदी पित्तानिलापहः ।
तृड्दाहशमनः शीतो मूर्च्छाश्रममदापहः ॥ २३८ ॥

अथ मसूरयूषगुणानाह—

मसूरयूषः संग्राही बृंही स्वादुः प्रमेहनुत् ॥ २३९ ॥

अथ यवाग्वा विधिगुणानाह—

यवागूः षड्गुणे तोये संसिद्धा घनसिक्थका ।
पृथग्द्रवैस्तु विरलैः संयुक्ता ज्वरिणे हिता ॥ २४० ॥
यवागूर्दीपनी लघ्वी तृष्णाघ्नी वस्तिशोधिनी ।
श्रमग्लानिहरी पथ्या ज्वरे चैवातिसारके ॥ २४१ ॥

अथ विलेप्या विधिगुणानाह—

चतुर्गुणाम्बुसंसिद्धा विलेपी घनसिक्थका ।
पृथग्द्रवेण रहिता ख्याता शिथिलभक्तिका ॥ २४२ ॥

*संसिद्धा = अतीव सिद्धा । विलेपी 'गिलहथी' इति लोके ॥२४२॥

विलेपी दोपनी बल्या हृद्या संग्राहिणी लघुः ।
व्रणाक्षिरोगिणां पथ्या तर्पणी तृड्ज्वरापहा ॥ २४३ ॥

अथ भक्तस्य विधिगुणानाह—

जले चतुर्दशगुणे तण्डुलानां चतुष्पलम् ।
विपचेत्स्रावयेन्मण्डं तद्भक्तं मधुरं लघु ॥ २४४ ॥

चक्रदत्तस्तु—

अन्नं पञ्चगुणे तोये यवागूं षड्गुणे पचेत ।
भक्तं वह्निकरं पथ्यं तर्पणं मूत्रलं लघु ॥ २४५ ॥

*तत्रान्नं भक्तम् । तथा च-
*"भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः" इत्यमरः॥२४५॥

सुधौतं प्रस्रु ' चोष्णं विशदं गुणवत्तरम् ।

अधौतमश्रृतं शीतं वृष्यं गुरु कफप्रदम् ॥ २४६ ॥
अत्युष्णं बलहृद्धकं शीतं शुष्कञ्च दुर्जरम् ।
अतिक्लिन्नं ग्लानिकरं दुर्जरं तण्डुलान्वितम् ॥ २४७ ॥
*अतिक्लिन्नं सजलं यत् पर्युषितम् ॥ २४७ ॥
भृष्टतण्डुलजं रुच्यं सुगन्धि कफहल्लघु ॥
वातास्थापितमन्दाग्निविरिक्तानां प्रशस्यते ॥ २४८ ॥

अथ रसौदनस्य विधिमाह—
(वृन्दटीकायां तन्त्रान्तरे)

मांसलं सक्थिजं मांसं तथाऽनस्थि च तैत्तिरम् ।
चतुष्पलोन्मितं सूक्ष्मं कल्पितं क्षालितं जले ॥ २४९ ॥
पिप्पलीपिप्पलीमूलशुण्ठीजीरकधान्यकैः ।
द्विशाणैः संयुते तोये क्वाथ्यमर्द्धाढकोन्मिते ॥ २५० ॥
पादस्थितं जलं तत्र दाडिम्बात् कुट्टिताद्धरेत् ।
तं रसं मर्दितं हिंगुभृष्टसैन्धवजीरकैः ॥
युक्तं प्रधूपितं पथ्यं शुद्धानां शुद्धिकांक्षिणाम् ॥ २५१ ॥

अथ रसौदनगुणानाह—

रसौदनो गुरुर्वृष्यो बल्यो वातज्वरापहः ॥ २५२ ॥

अथ मण्डादिपदार्थप्रक्रियामाह—

साध्यं चतुष्पलं द्रव्यं चतुःषष्टिपलेऽम्बुनि ।
तत्क्वाथेनार्द्धशिष्टेन मण्डपेयाऽऽदि साधयेत् ॥ २५३ ॥
*केवलजलसाध्यान् मण्डादीनभिधायौषधसाध्यानां तेषां प्रक्रियामाह–साध्यमिति ॥ २५३ ॥
वृद्धवैद्याः पलं द्रव्यं ग्राहयन्त्याढकेऽम्भसि ।
भेषजस्यातिबाहुल्यात् कदा चिदरुचिर्भवेत् ॥ २५४ ॥
यैरन्नैरौषधैर्यैश्च कृता मण्डादयो बुधैः ।
विचार्य तद्गुणानेतांस्तद्गुणानेव निर्दिशेत् ॥ २५५ ॥
*यथास्वं पाचनैः कृता=यथादोषं पाचनैः कृता ॥ २५५ ॥

अथौषधसिद्धपेयागुणानाह—

अन्नकाले हिता पेया यथास्वं पाचनैः कृता ।

दीपनी पाचनी लघ्वी ज्वरार्त्तानां ज्वरापहा ॥ २५६ ॥

अथ वातज्वरादिपेयासाधनौषधविधानमाह—

पञ्चमूल्याः कषायन्तु पाचनं वातिकज्वरे ।
सक्षौद्रं पैत्तिके मुस्तकटुकेन्द्रयवैः कृतम् ॥ २५७ ॥
पिप्पल्यादिकषायं तु पाचनं कफजे ज्वरे ।
लघुना पञ्चमूलेन पिप्पल्या सह धान्यया ॥ २५८ ॥
महत्या पञ्चमूल्याऽथ व्याघ्रीदुःस्पर्शगोक्षुरैः ।
सिद्धानि भिषगन्नानि प्रयुञ्जीत यथाक्रमम् ॥
वातपित्ते श्लेष्मपित्ते कफवाते त्रिदोषजे ॥ २५९ ॥

*अयमर्थः-वातपित्ते-लघुना पञ्चमूलेन सिद्धान्यन्नानि भिषक् प्रयुञ्जीत—

*शालिपर्णी पृश्निपर्णी कण्टकारीद्वयं तथा ।
गोक्षुरः पञ्चमः प्रोक्तः पञ्चमूलमिदं लघु ॥ ७६ ॥

*श्लेष्मपित्ते—पिप्पल्या सह धान्यया । कफवाते—महत्या पञ्चमूल्या—

*श्रीफलः सर्वतोभद्रा पाटला गणिकारिका ।
श्योनाकः पञ्चमः प्रोक्तः पञ्चमूलमिदं महत् ॥ ७७ ॥

*त्रिदोषजे-व्याघ्रीदुःस्पर्शगोक्षुरैः । व्याघ्री=कण्टकारिका । दुःस्पर्शः=यवासः ॥ २५७–२५८ ॥

पेयां वा रक्तशालीनां वस्तिपार्श्वशिरोरुजि ।
श्वदंष्ट्राकण्टकारीभ्यां सिद्धां ज्वरहरीं पिबेत् ॥ २६० ॥
विबद्धवर्चाः सयवां पिप्पल्यामलकैः शृताम् ।
सर्पिष्मतीं पिबेत्पेयां ज्वरी दोषानुलोमिनीम् ॥ २६१ ॥

*यवोऽत्रान्नम् ॥ २६१ ॥

कासी श्वासी च हिक्की च पञ्चमूलीशृतां पिबेत् ॥ २६२ ॥

*अत्र पञ्चमूली बृहती लघ्वी च हिता, तया शृतां पेयां पिबेदित्यर्थः ॥ २६२ ॥

पेया भेषजसंयोगाल्लघुत्वाच्चाग्निदीपनी ।

वातमूत्रपुरीषाणां दोषाणां चानुलोमिका ॥ २६३ ॥
स्वेदनाय च सोष्णत्वाद् द्रवत्वात्तृट्क्षयाय च ।
आहारभावात्प्राणाय सरत्वाल्लाघवाय च ॥
ज्वरघ्नी हेतुसाम्यत्वात्तस्मात्तां पूर्वमाचरेत् ॥ २६४ ॥
*हेतुसाम्यत्वाद् = हेतवो वातपित्तकफास्तेषां साम्यत्वात् ॥ २६३-२६४ ॥

अथ पञ्चमुष्टिकयूषमाह—

यवकोलकुलत्थानां मुद्गमूलकशुण्ठयोः ।
एकैकमुष्टिमादाय पचेदष्टगुणे जले ॥ २६५ ॥
पञ्चमुष्टिक इत्येष वातपित्तकफापहः ।
शूले प्रशस्यते गुल्मे कासे श्वासेऽक्षये ज्वरे ॥ २६६ ॥

अथ वर्त्तिप्रयोगमाह—

रुद्धमूत्रपुरीषस्य गुदे वर्त्तिं निधापयेत् ॥ २६७ ॥
पिप्पलीपिप्पलीमूलयवानीचव्यसाधिताम् ।
पाययेत्तु यवागूं वा मारुताद्यनुलोमिनीम् ॥ २६८ ॥

अथ पेयायवाग्वोश्च क्वचिदपवादमाह—

मदात्यये मद्यनित्ये ग्रीष्मे पित्तकफोत्थिते ।
ऊर्ध्वगे रक्तपित्ते च यवागूर्न हिता ज्वरे ॥ २६९ ॥
दाहच्छर्द्यर्दितं क्षामं निरन्नं तृष्णयाऽन्वितम् ।
घर्मार्त्तं मद्यपं चापि तोयालोडितसक्तुकम् ॥ २७० ॥
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ।
ज्वरापहैः फलरसैर्युक्तमन्नं हितं क्वचित् ॥ २७१ ॥
*लाजतर्पणं = लाजसक्तुरूपं तर्पणम् ॥ २६९-२७१ ॥

अथ सन्तर्पणस्वरूपञ्चाह धन्वन्तरिः—

द्राक्षादाडिमखर्ज्जूरमृदिताम्बु सशर्करम् ।
लाजचूर्णं समध्वाज्यं सन्तर्पणमुदाहृतम् ॥ २७२ ॥
*लाजचूर्णं द्राक्षाऽऽदिजलशर्करामध्वाज्यसहितं तर्पणमुक्तमित्यर्थः ॥ २७२ ॥

अथ गुणाधिकारोक्तलाजसक्तुगुणानाह—

लाजानां सक्तवः क्षौद्रसितायुक्ता विशेषतः ।

छर्द्यतीसारतृड्दाहविषमूर्च्छाज्वरापहाः ॥ २७३ ॥

अथ चरकोक्ततर्पणप्रकारमाह—

तत्र तर्पणमेवादौ प्रदेयं लाजसक्तुभिः ।
ज्वरापहैः फलरसैर्युक्तं समधुशर्करम् ॥ २७४ ॥

अथ ज्वरघ्नानि फलान्याह चरक एव—

द्राक्षादाडिमखर्जूरप्रियालैः सपरूषकैः ।
तर्पणार्हस्य दातव्यं तर्पणं ज्वरनाशनम् ॥ २७५ ॥

*प्रियालमत्र पक्वफलं न तु तन्मज्जा गुरुत्वात् । तर्पणार्हस्य दाहच्छर्दितृषाऽऽर्त्तस्य लङ्घितस्य क्षीणस्येत्यर्थः ॥ २७५ ॥

श्रमोपवासानिलजे हितो नित्यं रसौदनः ॥ २७६ ॥

*रसोऽत्र मांसरसस्तेन सिक्त ओदनो रसौदनः । "अन्नेन व्यञ्जनम्" इत्यनेन समासः ॥ २७६ ॥

मुद्गयूषौदनश्चैव हितः कफसमुत्थिते ।
स एव सितया युक्तः शीतः पित्तज्वरे हितः ॥ २७७ ॥

*स एव=मुद्गयूषौदन एव ॥ २७७ ॥

कृशोऽल्पदोषो यः क्षीणकफो जीर्णज्वरान्वितः ।
विबद्धासृष्टदोषश्च रूक्षपित्तानिलज्वरी ।
पिपासाऽऽर्त्तः सदाहश्च पयसा स सुखी भवेत् ॥ २७८ ॥

अन्यच्च--

अजादुग्धं गुडोपेतं पातव्यं ज्वरशान्तये ।
तदेव तु पयः पीतं तरुणे हन्ति मानवम् ॥ २७९ ॥

*तरुणे ज्वरे इति शेषः ॥ २७९ ॥

अन्यच्च—

जीर्णे ज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम् ।
तदेव तरुणे पीतं विषवद्धन्ति मानवम् ॥ २८० ॥

अथ ज्वररोगिनियमानाह—

न द्विरद्यान्न पूर्वाह्णे नाभिष्यन्दि कदा चन ।
न तीक्ष्णं न गुरुप्रायं भुञ्जीत तरुणज्वरी ॥ २८१ ॥
न जातु तर्पयेत्प्राज्ञः सहसा ज्वरकर्शितम् ।

तेन संशमितोऽप्यस्य पुनरेव भवेज्ज्वरः ॥ २८२ ॥

अथ ज्वरविमुक्तेः पूर्वरूपमाह—

दाहः स्वेदो भ्रमस्तृष्णा कम्पो विड्भिदसंज्ञता ।
कूजनं चातिवैगन्ध्यमाकृतिर्ज्वरमोक्षणे ॥ २८३ ॥

*विड्भिद् = मलप्रवृत्तिः । अत्र सम्पदादित्वाद् भावे क्विप् । कूजनं = कुन्थनम् । अतिवैगन्ध्यं गात्रस्य । ज्वरमुक्तौ भविष्यन्त्यामेतल्लक्षणं भवति ।

*ननु दोषक्षयं विना न व्याधिनिवृत्तिः, क्षीणाश्च दोषाः कथमेवंविधं रूपं करिष्यन्ति ? उच्यते—कश्चित्क्षीणोऽपि विनाशकाले स्वशक्ति दर्शयति । यथा निर्वाणावस्थायां दीपो विशेषात्प्रज्वलति । वाग्भटोऽप्याह—

*धातून्प्रक्षोभयन्दोषो मोक्षकाले विलीयते ।
ततो नरः श्वसन्कूजन्वमन्स्विद्यन्न चेष्टते ॥ ७८ ॥ इति ।

*न चेष्टते = अचेष्टः स्यात् ॥ ७८ ॥ इति ॥ २८३ ॥

त्रिदोषजे ज्वरे ह्येतदन्तर्वेगे च धातुगे ।
लक्षणं मोक्षकाले स्यादन्यस्मिन्स्वेददर्शनम् ॥ २८४ ॥

*एतद्दाहादिकं लक्षणं मोक्षकाले एतेष्वेव ज्वरेषु स्यात् । केषु त्रिदोषजेषु अन्तर्वेगे धातुगे ज्वरे अन्यस्मिन्स्वेदमात्रदर्शनं भवति॥२८४॥

अथ ज्वरमुक्तस्य लक्षणमाह—

देहो लघुर्व्यपगतक्लममोहतापः
पाको मुखे करणसौष्ठवमव्यथत्वम् ।
स्वेदः क्षवः प्रकृतियोगिमनोऽन्नलिप्सा
कण्डूश्च मूर्ध्नि विगतज्वरलक्षणानि ॥ २८५ ॥

सुश्रुतोऽप्याह—

स्वेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च ।
क्षवथुश्चान्नकाङ्क्षा च ज्वरमुक्तस्य लक्षणम् ॥ २८६ ॥

अथ ज्वरमुक्तस्य पालनीयनियमानाह—

व्यायामश्च व्यवायश्च स्नानं चङ्क्रमणानि च ।

ज्वरमुक्तो न सेवेत यावन्नो बलवान्भवेत् ॥ २८७ ॥

अन्यच्च—

व्यायामश्च व्यवायश्च प्रवातं शिशिरं जलम् ।
ज्वरमुक्तो न सेवेत यावन्न बलवान्भवेत् ॥ २८८ ॥
जन्तोर्ज्वरविमुक्तस्य स्नानं कुर्यात्पुनर्ज्वरम् ।
तस्माज्ज्वरविमुक्तोऽपि स्नानं विषमिव त्यजेत् ॥ २८९ ॥
बलवर्णाग्निवपुषां यावन्न प्रकृतिर्भवेत् ।
तावज्ज्वरेण मुक्तोऽपि वर्जनीयानि वर्जयेत् ॥ २९० ॥

अथ वातज्वराधिकारः ।

वातलाहारचेष्टाभ्यां वायुरामाशयाश्रयः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत्स्याद्रसानुगः ॥ २९१ ॥

*वातज्वरस्य विप्रकृष्टसंनिकृष्टकारणकथनपूर्विकां संप्राप्तिमाह—वातेति । तस्य पूर्वरूपमुक्तम् । "जृम्भाऽत्यर्थं समीरणादि"ति । समीरणज्वरे उत्पत्स्यति अत्यर्थं जृम्भा स्यात् । जृम्भा च श्रमादिपूर्विका भवति ॥ २९१ ।

अथ वातज्वरस्य लक्षणमाह—

वेपथुर्विषमो वेगः कण्ठौष्ठमुखशोषणम् ॥
निद्रानाशः क्षवस्तम्भो गात्राणां रौक्ष्यमेव च ॥ २९२ ॥
शिरोहृद्गात्ररुग्वक्त्रवैरस्यं बद्धविट्कता ।
शूलाध्माने जृम्भणश्च भवन्त्यनिलजे ज्वरे ॥ २९३ ॥

*विषमो वेगः, शरीरोष्णताऽऽदिरूपो ज्वरवेगो विषमो भवतीत्यर्थः । क्षवस्तम्भः=छिक्काया अभावः । तथा च वाग्भटः—

*हर्षो रोमाङ्गदन्तेषु वेपथुः क्षवथुग्रहः । इति ।

*चरकोऽपि—"क्षवथूद्गारविनिग्रह" इति। शिरोहृद्गात्ररुक्=अत्र गात्रपदे प्रयुक्ते शिरोहृच्छब्दप्रयोगस्तत्र तत्र विशेषेण वेदनाबोधनार्थः । एतानि लक्षणानि प्रायोभावित्वेन सुश्रुते निर्दिष्टानि । चकारादन्यान्यपि चरकनिदानोक्तानि बोद्धव्यानि । तान्येव श्लोकेन प्रदर्शयत्युत्तरत्र ॥ २९२–२९३ ॥

चरके च—

भवन्ति विविधा वातवेदनाः स्यादसुप्तता ।
पिण्डिकोद्वेष्टनं कर्णस्वनो वक्त्रकषायता ॥ २६४ ॥
गात्रसादो हनुस्तम्भो विश्लेषः सन्धिजानुनोः ।
शुष्ककासो वमिर्लोमदन्तहर्षः श्रमभ्रमौ ।
अरुणं मूत्रनेत्रादि तृट्प्रलापोष्णगात्रताः ॥ २९१ ॥

अथ वातज्वरचिकित्सामाह—

ज्वरितं षडहेऽतीते लघ्वन्नं प्रतिभोजितम् ।
पाचनं शमनीयञ्च कषायं पाययेद्भिषक् ॥ २६८ ॥
*आमाशयस्थो हत्वाग्निं सामो मार्गान्पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥ ७६ ॥

*इति वचनात्सामान्यतो ज्वरितमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने वातज्वरिणो लङ्घनविधाने विशेषमाह चरकः—ज्वरितमिति ॥ २६६ ॥

सुश्रुतोऽप्याह—

वातिके सप्तरात्रेण दशरात्रेण पैत्तिके ।
श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजम् ॥ २९७ ॥
दोषाणामेव सा शक्तिर्लङ्घने या सहिष्णुता ।
न हि दोषक्षये कश्चित्सहते लङ्घनं महत् ॥ २९८॥
कफपित्ते द्रवे धातू सहेते लङ्घनं बहु ।
आमक्षयादूर्ध्वमपि वायुर्न सहते क्षणम् ॥ २६६ ॥

ननु "अन्नं वै प्राणिनां प्राणाः" इति श्रुतिः । तदन्नं विना प्राणिभिः कथं स्थातव्यमित्याह—दोषाणामिति ॥ २६८–२६६ ॥

तत्र भेषजम् ।

अथ दशमूलादिक्वाथमाह ।

श्रीफलः सर्वतोभद्रा कामदूती च शोणकः ।
तर्कारी गोक्षुरः क्षुद्रा बृहती कलशी स्थिरा ॥ ३०० ॥
रास्ना कणा कणामूलं कुष्ठं शुण्ठी किरातकः ।
मुस्ता बलाऽमृता बालद्राक्षायासशताह्विकाः ॥ ३०१ ॥

एषां क्काथो निहन्त्येव प्रभञ्जनकृतं ज्वरम् ।
सोपद्रवञ्च योगोऽयं सर्वयोगवरः स्मृतः ॥ ३०२ ॥

*श्रीफलः=बिल्वः । सर्वतोभद्रा=गाम्भारी । कामदूती=पाटला । शोणकः="शोनापाठा" इति लोके । तर्कारी=गणिकारी । कलशी=पृश्निपर्णी । स्थिरा=शालिपर्णी । बालं=सुगन्धवाला । यासः =यवासः ॥ ३००-३०२ ॥

अथ बृहत्पंचमूलीक्काथमाह—

त्रिशतीतर्कारीश्रीफलटुण्टुकपाटलामूलैः ।
पाचनमुचितं मारुतजनितज्वरहारि वारिणा क्कथितैः ॥३०३॥

*सुश्रुतः-
*"पञ्चमूलीकषायन्तु पाचनं वातिके ज्वरे" ॥ ८० ॥ इति ॥
*अत्र पञ्चमूली बृहत्पञ्चमूली अत एव त्रिशती=श्रीपर्णीति ॥३०३॥

अथ किरातादिक्काथमाह—

किराताब्दामृतोदीच्यबृहतीद्वयगोक्षुरैः ।
त्रिपर्णीकलशीबिल्वैः क्काथो वातज्वरापहः ॥ ३०४ ॥

*उदीच्यं=बालकम् । त्रिपर्णी=शालिपर्णी । कलशी=पृश्निपर्णी ॥ ३०४ ॥

अथ कालिङ्गक्काथमाह—

गुडूचीपिप्पलीमूलनागरैः पाचनं शृतम् ।
वातज्वरे तथा पेयं कालिङ्गं सप्तमेऽहनि ॥ ३०५ ॥

*कालिङ्गम्=इन्द्रयवस्तस्य शृतम् ॥ ३०५ ॥

अथ विश्वाऽऽदिक्काथमाह—

विश्वाऽमृताग्रन्थिकसिद्धतोयं-
मरुज्ज्वरः स्यात्पिबतः कुतोऽयम् ॥
क्काथोऽथ कुस्तुम्बुरुदेवदारु-
क्षुद्रौषधैः पाचनमत्र चारु ॥ ३०६ ॥

*औषधं शुण्ठी क्काथः पाचनमिति 'वेदाः प्रमाणमि'तिवत् ॥३०६॥

अथ बृहत्पञ्चमूलादिक्काथमाह—

पञ्चमूलीबलारास्नाकुलत्थैः सह पौष्करैः ।
क्काथो हन्याच्छिरःकम्पं पर्वभेदं मरुज्ज्वरम् ॥ ३०७ ॥

*पञ्चमूली = विल्वादिः ॥ ३०७ ॥

अथ कणाऽऽदिक्वाथः ।

कणारसोनामृतवह्निविश्वानिदिग्धिकासिन्धुकभूमिनिम्बैः ।
समुस्तकैराचरितः कषायो हिताशिनां हन्ति गदानिमांस्तु ॥ ३०८ ॥
ज्वरं मरुद्दुष्टिसमुद्भवं तथा बलासजं चानलमन्दताञ्च ।
कण्ठावरोधं हृदयावरोधं स्वेदञ्च रोमाञ्चहिमत्वमोहान् ॥ ३०९ ॥

अथ कल्पतरुरसः ।

शुद्धं शंकरशुक्रमक्षतुलितं मारारिनारीरज-
स्तद्वत्तावदुमापतिस्फुटगलालङ्कारवस्तु स्मृतम् ।
तावत्येव मनःशिला च विमला तावत्तथा टङ्कणं-
शुण्ठी द्व्यक्षमिता कणा च मरिचं दिक्पालसंख्याक्षकम् ॥३१०॥
विषादिवस्तूनि शिलोपरिष्टाद्विचूर्णयेद्वासरमि शोधयेच्च ।
ततस्तु खल्वे रसगन्धकौ च चर्णञ्च तद्यामयुगं विमर्द्यम् ॥ ३११ ॥
कल्पतरुनामधेयो यथार्थनामा रसः श्रेष्ठः ।
समीरणश्लेष्मगदान्हरते मात्राऽस्य स्मृता गुञ्जैका । ॥ ३१२ ॥
आर्द्रकेण सममेष भक्षितो हन्ति वातकफसम्भवं ज्वरम् ।
श्वासकासमुखसेकशीततावह्निमान्द्यविसुचीश्च नाशयेत् ॥३१३॥
नस्येनाश्वेव हरति शिरोऽर्त्ति कफवातजाम् ।
मोहं महान्तमपि च प्रलापं क्षवथुग्रहम् ॥ ३१४ ॥
(सामान्यज्वरचिकित्सोक्तो महाज्वरांकुशः प्रदेयोऽत्र ॥)

अथ त्रिपुरभैरवरसः ।

विषमहौषधमागधिकोषणद्युमणिरक्तकमार्द्रकमर्दितम् ।
क्रमविवर्द्धितमुद्दलितज्वरस्त्रिपुरभैरव एष रसो वरः ॥३१५॥

*द्युमणिः = मारितं ताम्रं, तस्य भागाः पञ्च । रक्तकं = हिगुलं, तस्य भागाः षट् ६ । मात्राऽस्य रक्तिकाऽर्द्धम् । त्रिपुरभैरवो रसो ज्वरे प्रयोज्यः ॥ ३१५ ॥

अथ स्वेदस्य विधिगुणावाह—

वातश्लेष्मज्वरे स्वेदं जङ्घापार्श्वास्थिशूलिनि ।

पीनसश्वासबाधिर्यें कारयेत्तद्विधानवित् ॥ ३१६ ॥
स्रोतसां मार्दवं कृत्वा नीत्वा पावकमाशयम् ।
हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति ॥ ३१७ ॥

अथ वालुकास्वेदमाह—

खर्परभृष्टपटस्थितकाञ्जिकसंसिक्तवालुकास्वेदः ।
शमयति वातकफामयशूलाङ्गभङ्गकम्पादीन् ॥ ३१८ ॥
कम्पे शिरोहृदयगात्रव्यथायां जृम्भायां पादसुप्ततायाम् ।
पिण्डिकोद्वेष्टनेऽङ्गसादे हनुस्तम्भे च लोमहर्षे ॥ ३१९ ॥

अथ कवलस्य विधिगुणावाह—

मातुलुङ्गफलकेशरो धृतः सिन्धुजन्ममरिचान्वितो मुखे ।
हन्ति वातकफरोगमास्यगं शोषमाशु जडतामरोचकम् ॥ ३२० ॥
*इति कवलः । कण्ठौष्ठमुखशोषे प्रदेयः ॥ ३२० ॥

अन्यच्च—

शर्करादाडिमाभ्याञ्च द्राक्षादाडिमयोस्तथा ।
कल्कं विधारयेदास्ये शोषवैरस्यनाशनम् ॥ ३२१ ॥
द्राक्षाऽऽमलकयोः कल्कं सघृतं वदने क्षिपेत् ।
तेन घृष्ट्वा मुखस्यान्तः कुर्वीत प्रतिसारणम् ॥ ३२२ ॥
तेन तालुगलान्तःस्थः संशोषश्चैव शाम्यति ।
सुरसं जायते वक्त्रं रुचिर्भवति भोजने ॥ ३२३ ॥

अथ निद्रानाशस्य निदानमाह—

नावनं लङ्घनं चिन्ता व्यायामः शोकभीरुषः ।
एभिरेव भवेन्निद्रानाशः श्लेष्मातिसंक्षयात् ॥ ३२४ ॥

अथ निद्रानाशचिकित्सामाह—

भृष्टन्तु विजयाचूर्णं मधुना निशि भक्षयेत् ।
निद्रानाशेऽतिसारे च ग्रहण्यां पावकक्षये ॥ ३२५ ॥
गुडं पिप्पलिमूलस्य चूर्णेनालोडितं लिहेत् ।
चिरादपि च संनष्टां निद्रामाप्नोति मानवः ॥ ३२६ ॥
वायसजङ्घामूलं बद्धं वा शिरसि काकमाच्याश्च ।
विधृतं निद्राजनकं त्वङ्मूलं वा शृतं सगुडम् ॥ ३२७ ॥

*पीतमिति शेषः ॥ ३२७ ॥

मूलन्तु काकमाच्या बद्धं सूत्रेण मस्तके नियतम् ।
विदधाति नष्टनिद्रो निद्रामाश्वेव सिद्धमिदम् ॥ ३२८ ॥
शीलयेन्मन्दनिद्रस्तु क्षीरमद्यरसान्दधि ।
अभ्यङ्गोद्वर्त्तनस्नानमूर्द्धकर्णाक्षितर्पणम् ॥ ३२९ ॥

*रसो = मांसरसः ॥ ३२९ ॥

कान्ताबाहुलताश्लेषो निर्वृतिः कृतकृत्यता ।
मनोऽनुकूला विषयाः कामं निद्रासुखप्रदाः ॥ ३३० ॥
रसे शाके च सूपे च सर्पिर्यूषपयःसु च ।
निद्रां सञ्जनयत्याशु पलाण्डुरुपयोजितः ॥ ३३१ ॥

*रसे = मांसरसे ॥ ३३१ ॥

पैक्षवं पोतकी माषः सुरा मांसरसः पयः ।
गोधूमतिलमत्स्याश्च निद्रां कुर्वन्ति देहिनाम् ॥ ३३२ ॥

अथ दारुषट्कलेपः (शूलाध्माने) ।

दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः ।
लिम्पेत्कोष्णैरम्लपिष्टैः शूलाध्मानयुतोदरम् ॥ ३३३ ॥

*हैमवती = श्वेतवचा ॥ ३३३ ॥

अथ कर्णनादचिकित्सामाह—

कटुतैलं कणाहिङ्गुवचालशुनसाधितम् ।
उष्णं विनिहितं हन्ति कर्णयोर्निःस्वनं व्यथाम् ॥ ३३४ ॥

*इति तैलं कर्णस्वने ॥ ३३४ ॥

अथ शुष्ककासचिकित्सामाह—

कणा सुगन्धिवचया यवान्या च समन्विता ।
ताम्बूलसहिता हन्ति शुष्ककासं मुखे धृता ॥ ३३५ ॥

अथ वातज्वरहितवस्तून्याह—

श्रमोपवासानिलजे हितो नित्यं रसौदनः ।
मुद्गामलकयूषस्तु बद्धविट्काय दीयते ॥ ३३६ ॥

*रसो = मांसरसः ॥ ३३६ ॥

पेयां वा रक्तशालीनां वस्तिपार्श्वशिरोरुजि ।

श्वदंष्ट्राकण्टकारीभ्यां सिद्धां ज्वरहरीं पिवेत् ॥
कासी श्वासी च हिक्की च पञ्चमूलीशृतां पिबेत् ॥ ३३७ ॥

*पेयामिति शेषः ॥ ३३७ ॥

इति वातज्वराधिकारः।

अथ पित्तज्वराधिकारः।

पित्तलाहारचेष्टाभ्यां पित्तमामाशयाश्रयम्।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत्स्याद्रसानुगम् ॥ ३३८ ॥

*तत्र पित्तज्वरस्य विप्रकृष्टसंनिकृष्टकारणकथनपूर्विकां संप्राप्तिमाह—पित्तलेति। पित्तस्य पङ्गुलत्वात्तेन कोष्ठाग्नेरुष्मा बहिर्नेतुं न शक्यते। यत आह—

*पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः।
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् ॥ ८१ ॥

*इति। ततोऽत्र पित्तं वातसहाये बोद्धव्यम्। यत आह—

*द्रव्यमेकरसं नास्ति न रोगोऽप्येकदोषजः।
एकस्तु कुपितो दोष इतरानपि कोपयेत् ॥ ८२ ॥

*तस्य पूर्वरूपमुक्तं "पित्तान्नयनयोर्दाह" इति। पित्तज्वरे उत्पत्स्यति नेत्रदाहः स्यात्। स च श्रमादिपूर्वको भवति ॥ ३३८ ॥

अथ पित्तज्वरस्य लक्षणमाह—

वेगस्तीक्ष्णोऽतिसारश्च निद्राऽल्पत्वं तथा वमिः।
कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते ॥ ३३९ ॥
प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥ ३४० ॥

*अतीसारः=पित्तस्य, तस्य सरत्वात्सद्रवमलप्रवृत्तिर्न त्वतिसारवत्तस्य ज्वरोपद्रवत्वात्। वमिः=यदा पित्तं कफस्य स्थानं याति तदा बोद्धव्यम्। प्रलापोऽनर्थकं वचः। मूर्च्छा=रूपादेरज्ञानम्। मदः=पूगकोद्रवधत्तूरभक्षणादिव मत्तता। भ्रमः=चक्रारूढस्येव ज्ञानम्। चकाराद् रक्तकोठादयो बोद्धव्याः ॥ ३३९-३४० ॥

अथ पित्तज्वरस्य चिकित्सामाह—

पैत्तिके दशरात्रेण ज्वरे युञ्जीत भेषजम् ॥ ३४१ ॥

*आमाशयस्थो हत्वाऽग्निं सामो मार्गान्पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥ ८३ ॥

*इति वचनात्सामान्यतो ज्वरितमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने पित्तज्वरिणो लङ्घनविधाने विशेषमाह—पैत्तिक इति । दशरात्रेण लङ्घनवता व्यतीतेनेत्यर्थः ॥ ३४१ ॥

अथ तिक्ताऽऽदिक्वाथः ।

तिक्तामुस्तायवैः पाठाकट्फलाभ्यां सहोदकम् ।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥ ३४२ ॥

*किं तावद् भेषजं ? तदाह—तिक्तेति ॥ ३४२ ॥

अथ पर्पटादिक्वाथः ।

पर्पटो वासकस्तिक्ता कैरातो धन्वयासकः ।
प्रियङ्गुश्च कृतः क्वाथ एषां शर्करया युतः ।
पिपासादाहपित्तास्रयुक्तं पित्तज्वरं हरेत् ॥ ३४३ ॥

अथ द्राक्षाऽऽदिक्वाथः ।

द्राक्षा हरीतकी मुस्ता कटुका कृतमालकः ।
पर्पटश्च कृतः क्वाथ एषां पित्तज्वरापहः ॥ ३४४ ॥
मुखशोषप्रलापार्त्तिदाहमूर्च्छाभ्रमप्रणुत् ।
पिपासारक्तपित्तानां शमनो भेदनो मतः ॥ ३४५ ॥

अथ पटोलादिक्वाथः ।

पटोलयवधान्याकमधुकं मधुसंयुतम् ।
हन्ति पित्तज्वरं दाहं तृष्णाञ्चातिप्रमाथिनाम् ॥ ३४६ ॥

अथ गुडूच्यादिक्वाथः ।

गुडूच्यामलकैर्युक्तः केवलो वाऽपि पर्पटः ।
पित्तज्वरं हरेत्तूर्णं दाहशोषभ्रमान्वितम् ॥ ३४७ ॥
एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः ।
किं पुनर्यदि युज्येत चन्दनोशीरबालकैः ॥ ३४८ ॥

अथ ह्रीबेरादिक्काथः।

ह्रीबेरचन्दनोशीरघनपर्पटसाधितम्।
दद्यात्सुशीतलं वारि तृट्छर्दिज्वरदाहनुत्॥ ३४९॥

अथ भूनिम्बादिक्काथः।

भूनिम्बातिविषालोध्रमुस्तकेन्द्रयवामृताः॥ ३५०॥
बालकं धान्यकं बिल्वं कषायो माक्षिकान्वितः।
विड्भेदश्वासकासांश्च रक्तपित्तज्वरं हरेत्॥ ३५१॥

अथ महाद्राक्षाऽऽदिक्काथः।

द्राक्षाचन्दनपद्मानि मुस्ता तिक्ताऽमृताऽपि च।
धात्री बालमुशीरं च लोध्रेन्द्रयवपर्पटाः॥ ३५२॥
परूषकं प्रियङ्गुश्च यवासो वासकस्तथा।
मधुकं कुलकश्चापि किरातो धान्यकं तथा॥ ३५३॥
एषां क्काथो निहन्त्येव ज्वरं पित्तसमुत्थितम्।
तृष्णां दाहं प्रलापञ्च रक्तपित्तं भ्रमं क्लमम्॥ ३५४॥
मूर्च्छां छर्दिं तथा शूलं मुखशोषमरोचकम्।
कासं श्वासञ्च हृल्लासं नाशयेन्नात्र संशयः॥ ३५५॥

अथ धान्याकक्काथः।

ससितो निशि पर्युषितः प्रातर्धान्याकतण्डुलक्काथः।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम्॥ ३५६॥

अथामृताहिमवासाहिमौ।

अमृताया हिमः प्रातः ससितः पैत्तिकं ज्वरम्।
वासायाश्च तथा कासरक्तपित्तज्वराञ्जयेत्॥ ३५७॥

अथ द्वितीयो गुडूच्यादिक्वाथः।

गुडूची भूमिनिम्बश्च बालं वीरणमूलकम्।
लघुमुस्तं त्रिवृद्धात्री द्राक्षा वासा च पर्पटः॥ ३५८॥
एषां क्वाथो हरत्येव ज्वरं पित्तकृतं द्रुतम्।
सोपद्रवमपि प्रातर्निपीतो मधुना सह॥ ३५९॥

अथ प्रलेपमाह—

पलाशस्य बदर्या वा निम्बस्य मृदुपल्लवैः ।
अम्लपिष्टैः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम् ॥ ३६० ॥

अथ शीतजलधारामाह—

उत्तानसुप्तस्य गभीरताम्रकांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ती निहन्ति दाहं त्वरितं ज्वरञ्च ॥३६१॥

अथ पथ्याऽवलेहः ।

पथ्यां तैलघृतक्षौद्रैर्लिहन्दाहज्वरापहाम् ।
कासासृक्पित्तवीसर्पश्वासान्हन्ति वमीमपि ॥ ३६२ ॥

*तैलघृतक्षौद्रैरित्यत्र न समुच्चयस्तेन केवलेन क्षौद्रेणापि लिह्यात् ॥ ३६२ ॥

अथार्द्रवस्त्रधारणमाह—

काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम् ।
अथ गोतक्रसंस्विन्नशीतलीकृतवाससा ॥ ३६३ ॥

अथ कवलमाह—

द्राक्षाऽऽमलककल्केन कवलोऽत्र हितो मतः ।
पक्वदाडिमबीजैर्वा धानाकल्केन च क्वचित् ॥ ३६४ ॥

*धानाऽत्र धान्यकम् ॥ ३६४ ॥

अथ तर्पणमाह—

दाहकम्पार्दितं क्षामं निरन्नं तृष्णयाऽन्वितम् ।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥ ३६५ ॥

*लाजतर्पणम् = लाजसक्तुरूपं तर्पणम् । सन्तर्पणस्वरूपमुक्तं सामान्यज्वरचिकित्सायाम् ॥ ३६५ ॥

अथ पित्तज्वरोपचारमाह—

मुद्गयूषौदनो देयः सितया पैत्तिके ज्वरे ।
हर्म्ये शुभ्राभ्रसङ्काशे शशाङ्ककरशीतले ।
मलयोद्भवसंसिक्ते सुप्यात्पित्तज्वरी नरः ॥ ३६६ ॥
हारावलीचन्दनशीतलानां सुगन्धपुष्पाम्बरभूषितानाम् ।
नितम्बिनीनां सुपयोधराणामालिङ्गनान्याशु हरन्ति दाहम् ॥३६७॥

आह्लादश्चास्य विज्ञाय ताः स्त्रीरपनयेत्पुनः ।
हितञ्च भोजयेदन्नं न प्रीतिसुरतं महत् ॥ ३६८ ॥
वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः ।
नार्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः ॥ ३६९ ॥

इति पित्तज्वराधिकारः ।

अथ कफज्वराधिकारः ।

श्लेष्मलाहारचेष्टाभ्यां कफो ह्यामाशयाश्रयः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत्स्याद्रसानुगः ॥ ३७० ॥

*अथ श्लेष्मज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्विकां सम्प्राप्तिमाह—श्लेष्मलेति । कफस्य कोष्ठाग्नितेजसो वहिर्नयनेन पक्त्वादाशङ्कायां जातायां पित्तस्येव सिद्धान्तो बोद्धव्यः । तस्य पूर्वरूपमुक्तं "कफान्नान्नाभिनन्दनमि"ति । कफज्वरे उत्पत्स्यति अनन्नाभिलाषः स्यात्स च श्रमादिपूर्वको भवति ॥ ३७० ॥

अथ कफज्वरस्य लक्षणमाह—

स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता ।
शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि वा ॥ ३७१ ॥
गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता ।
प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता ॥ ३७२ ॥

*स्तैमित्यम्=अङ्गानामार्द्रपटावगुण्ठितत्वमिव । स्तिमितो वेगः=ज्वरस्य मन्दो वेगः । आलस्यं=समर्थस्यापि कर्मण्यनुत्साहः । स्तम्भः=अङ्गानामनम्रता, तृप्तिः=अन्नानभिलाषः सत्यपि भोजनसामर्थ्ये । गौरवं गात्राणाम् । शीतं=लगतीति शेषः । उत्क्लेदः=वमनोपस्थितिरिव । अतिनिद्रता=निद्राऽऽधिक्यम् , प्रतिश्यायो=नासारोगविशेषः, अरुचिः=भोजनानिच्छा, चकारात्पिडिकाशीता मुखप्रसेकश्छर्दिस्तन्द्रा हृदयोपलेप उष्णाभिलाषो वह्निमान्द्यमिति । यत उक्तम्-

प्रसेकः पिडिकाशीताछर्दिस्तन्द्रोष्णकामिता ।

कफेन लिप्तं हृदयं भवेदग्नेश्च मन्दता ॥८४॥ इति । ३७१–३७२॥

अथ श्लेष्मज्वरस्य चिकित्सामाह—

श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजम् ।
पिप्पल्यादिकषायन्तु कफजे परिपाचनम् ॥ ३७३ ॥
*आमाशयस्थो हत्वाऽग्निं सामो मार्गान्पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥ ८५ ॥

*इति वचनात्सामान्यतो ज्वरितमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने, श्लेष्मज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः–श्लैष्मिक इति । द्वादशाहेन लङ्घनवता व्यतीतेनेत्यर्थः । किं तद्भेषजं ? तदाह ॥ ३७३ ॥

अथ पिप्पल्यादिक्वाथमाह—

पिप्पली पिप्पलीमूलं मरिचं गजपिप्पली ।
नागरं चित्रकं चव्यं रेणुकैलाऽजमोदिकाः ॥ ३७४ ॥
सर्षपो हिङ्गु भार्गी च पाठेन्द्रयवजीरकाः ।
महानिम्बश्च मूर्वा च विषा तिक्ता विडङ्गकम् ॥ ३७५ ॥
पिप्पल्यादिगणो ह्येष कफमारुतनाशनः ।
गुल्मशूलज्वरहरो दीपनस्त्वामपाचनः ॥ ३७६ ॥

अथ पिप्पल्यवलेहमाह—

क्षौद्रोपकुल्यासंयोगः श्वासकासज्वरापहः ।
प्लीहानं हन्ति हिक्काश्च बालानामपि शस्यते ॥ ३७७ ॥

अथ चतुर्भद्रिकाऽवलेहमाह—

पिप्पलीं त्रिफलां चापि समभागां ज्वरी लिहन् ।
मधुना सर्पिषा चापि कासी श्वासी सुखी भवेत् ॥३७८॥

अथान्यप्रकारमाह—

कट्फलं पौष्करं शृङ्गी कृष्णा च मधुना सह ।
श्वासकासज्वरहरो लेहोऽयं कफनाशनः ॥ ३७९ ॥

अथाष्टाङ्गावलेहमाह—

कट्फलं पौष्करं शृङ्गी यवानी कारवी तथा ।
कटुत्रयञ्च सर्वाणि समभागानि चूर्णयेत् ॥ ३८० ॥

आर्द्रकस्वरसैर्लिह्यान्मधुना वा कफज्वरी ।
कासश्वासारुचिच्छर्दिहिक्काश्लेष्मानिलापहः ॥ ३८१ ॥

अथ निर्गुण्डीक्वाथमाह--

सिन्दुवारदलक्वाथं कणाऽऽढ्यं कफजे ज्वरे ।
जङ्घयोश्च बले क्षीणे कर्णे च पिहिते पिबेत् ॥ ३८२ ॥

अथ यवान्यादिक्वाथमाह--

यवानी पिप्पली वासा तथा खाखसवल्कलम् ।
एषां क्वाथं पिबेत्कासे श्वासे च कफजे ज्वरे ॥ ३८३ ॥

अथ वासाऽऽदिक्वाथमाह--

वासाक्षुद्राऽमृताक्वाथः क्षौद्रेण ज्वरकासहृत् ॥ ३८४ ॥

अथ मरिचादिक्वाथमाह--

मरिचं पिप्पलीमूलं नागरं कारवी कणा ।
चित्रकं कट्फलं कुष्ठं ससुगन्धि वचा शिवा ॥ ३८५ ॥
कण्टकारी जटा शृङ्गी यवानी पिचुमन्दकः ।
एषां क्वाथो हरत्येव ज्वरं सोपद्रवं कफात् ॥ ३८६ ॥

अथ कल्पतरुरसमाह--

कफवातव्याधिहरत्वाद्वाताधिकारोक्तकल्पतरुरसो योज्यः ।

अथ कवलमाह--

सिन्धुत्रिकटुराजीभिरार्द्रकेण कफे हितः ॥ ३८७ ॥

*कवल इति शेषः ॥ ३८७ ॥

अथान्नमाह--

मुद्गयूषौदनो देयो ज्वरे कफसमुत्थिते ॥ ३८८ ॥

इति श्लेष्मज्वराधिकारः ।

अथ वातपित्तज्वराधिकारः ।

वातपित्तकरैर्वातपित्ते ह्यामाशयाश्रये ।
बहिर्निरस्य कोष्ठाग्निरसगे ज्वरकारिणी ॥ ३८९ ॥

*वातपित्तज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्विकां सम्प्राप्तिमाह=वातपित्तेति । स्यातामिति शेषः ॥ ३८९ ॥

अथ वातपित्तज्वरपूर्वरूपमाह—

प्राग्रूपे वातपित्तस्य भवतो वातपैत्तिके ॥ ३८० ॥

*ज्वर इति शेषः ॥ ३८० ॥

अथ वातपित्तज्वरस्य लक्षणमाह—

तृष्णा मूर्च्छा भ्रमो दाहो निद्रानाशः शिरोरुजा ।
कण्ठास्यशोषो वमथू रोमहर्षोऽरुचिस्तमः ॥
पर्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः ॥ ३८१ ॥

*पर्वभेदः = पर्वाणि भिद्यन्त इव सन्धिषु व्यथा ॥ ३८१ ॥

अथ वातपित्तज्वरस्य चिकित्सामाह—

वातपित्तज्वरे देयमौषधं पञ्चमेऽहनि ॥ ३८२ ॥

अथ किरातादिक्काथमाह—

किराततिक्तममृतां द्राक्षामामलकं शटीम् ।
निष्क्वाथ्य सगुडं क्वाथं वातपित्तज्वरे पिबेत् ॥ ३८३ ॥

अथ पञ्चभद्रकाथमाह—

गुडूची पर्पटो मुस्तं किरातो विश्वभेषजम् ।
वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम् ॥ ३८४ ॥

अथ त्रिफलाऽऽदिक्काथमाह—

त्रिफलाशाल्मलीरास्नाराजवृक्षाटरूषकैः ।
शृतमम्बु हरत्याशु वातपित्तभवं ज्वरम् ॥ ३८५ ॥

अथ मधुकादिहिममाह—

मधुकं सारिवा द्राक्षा मधूकं चन्दनोत्पलम् ।
काश्मरीफलकं लोध्रं त्रिफला पद्मकेशरम् ॥
परूषकं मृणालञ्च क्षिपेत्संचूर्ण्य वारिणि ।
निशोषितं सिताक्षौद्रलाजयुक्तन्तु तत्पिबेत् ॥
वातपित्तज्वरं दाहं तृष्णां मूर्च्छाऽरुचिभ्रमान् ।
शमयेद्रक्तपित्तञ्च जीमूतमिव मारुतः ॥ ३८६ ॥

*अत्र मधुकादि मृणालान्तं समुदितम , पलद्वयपरिमितं संचूर्ण्य क्षिपेत् । वारिणि षट्पलपरिमिते । मधुकादिहिमो दाहे ॥ ३८६॥

अथान्नमाह—

मुद्गामलकयूषस्तु वातपित्तज्वरे हितः।
महादाहे प्रदातव्यो यूषश्चणकसम्भवः॥ ३९७॥

अन्यच्च—

"दाडिमामलकमुद्गसम्भवो यूष उक्त इति वातपैत्तिके" इति॥

कफपित्तहरा मुद्गाः कारवेल्ल्यादयस्तथा।
प्रायेण न च ते देया वातपित्तोत्तरे ज्वरे॥
दत्तास्तु ज्वरविष्टम्भशूलोदावर्त्तकारिणः॥ ३९८॥

इति वातपित्तज्वराधिकारः समाप्तः।

अथ वातश्लेष्मज्वराधिकारः।

वातश्लेष्मकरैर्वातकफावामाशयाश्रयौ।
वहिर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ॥ ३९९॥

*तस्य विप्रकृष्टसंनिकृष्टकारणकथनपूर्विकां संप्राप्तिमाह—वातेति॥ ३९९॥

अथ वातकफज्वरस्य पूर्वरूपमाह—

प्राग्रूपे वातकफयोः स्यातां वातकफज्वरे॥ ४००॥

अथ वातकफज्वरस्य लक्षणमाह—

स्तैमित्यं पर्वणां भेदो निद्रा गौरवमेव च।
शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्त्तनम्॥
सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः॥ ४०१॥

*स्वेदाप्रवर्त्तनं=स्वेदस्य आसमन्ताद्भावेन प्रवृत्तिः। तथा च हारीतेनोक्तम्—

*शिरोग्रहः स्वेदभवश्च कासो ज्वरस्य लिङ्गं कफवातजस्य॥इति।

*स्वेदभवः=स्वेदोत्पत्तिः। ननु स्वेदः पित्तस्य धर्मः, अत एव पित्तज्वरे—

*"कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते"॥ ८६॥

*इत्युक्तम्। तस्मात्कथं वातश्लेष्मज्वरे स्वेदस्यातिप्रवृत्तिः? उच्यते—"विकृतिविषमसमवायारब्धत्वान्न दोष" इति कार्त्तिकः।

प्रकृतिसमसमवायस्य विकृतिविषमसमवायस्य चायमर्थः—प्रकृत्या हेतुभूतया समः कारणानुरूपः समवायः कार्यकारणभावसम्बन्धः प्रकृतिसमसमवायः। कारणानुरूपं कार्यमिति यावत्। यथा-प्रकृतिस्थितैः शुक्लैस्तन्तुभिः समवायकारणैरारब्धः पटः शुक्ल एव भवति। तथा च प्रकृतेन केवलेन वातेन पित्तेन कफेन वा जनितो ज्वरो वाताद्युचितैर्धर्मैर्वेपथुवेगाधिक्यस्तैमित्यादिभियुक्तो भवति। विकृतिविषमसमवायस्तु-विकृत्या हेतुभूतया विषमः कारणाननुरूपः समवायः कार्यस्य कारणे सम्बन्धः। कारणाननुरूपं कार्यमिति यावत्। यथा-संयोगाद्विकृताभ्यां हरिद्राचूर्णाभ्यां हेतुभूताभ्यां विषमः कारणाननुरूपो लोहितो वर्णो जायते तथा योगेन विकृताभ्यां वातश्लेष्मभ्यां हेतुभूताभ्यां विषमा कारणाननुरूपा स्वेदस्यातिप्रवृत्तिरिति सिद्धान्तः॥ ४०१॥

अथ वातकफज्वरस्य चिकित्सामाह—

वातश्लेष्मज्वरे देयमौषधं नवमेऽहनि॥ ४०२॥

अथ पञ्चकोलम्।

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः।
दीपनीयः स्मृतो वर्गो वातश्लेष्मज्वरापहः॥
कोलमात्रोपयोगित्वात्पञ्चकोलमिदं स्मृतम्॥ ४०३॥
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफदाहनुत्।
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम्॥ ४०४॥

अथ द्वितीयः किरातादिक्वाथः।

किरातविश्वाऽमृतवह्निसिंहिकाव्याघ्रीकणामूलरसोनसिन्दुकैः।
कृतः कषायो विनिहन्ति सत्वरं ज्वरं समीरात्सकफात्समुत्थितम्॥४०५॥

अथ पिप्पल्यादिक्वाथः।

पिप्पल्यादिगणक्वाथं पिबेद्वातकफज्वरी।
नातः परं किञ्चिदस्ति ज्वरे भेषजमुत्तमम्॥ ४०६॥

अथ बृहत्पिप्पल्यादिक्वाथः।

पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम्।
वचा सातिविषाऽजाजी पाठावत्सकरेणुकाः॥ ४०७॥

किराततिक्तको मूर्वा सर्षपा मरिचानि च।
कट्फलं पुष्करं भार्गी विडङ्गं कर्कटाह्वयम् ॥ ४०८ ॥
अर्कमूलं बृहत्सिंही श्रेयसी सदुरालभा।
दीप्यकश्चाजमोदा च शुकनासा सहिंगुका ॥ ४०९ ॥
एतानि समभागानि गण एकोऽष्टविंशतिः।
एषां क्वाथो निपीतः स्याद्वातश्लेष्मज्वरापहः ॥ ४१० ॥
हन्ति वातं तथा शीतं प्रस्वेदमतिवेपथुम्।
प्रलापश्चातिनिद्राश्च रोमहर्षारुची तथा ॥ ४११ ॥
महावातेऽपतन्त्रे च शून्यत्वे सर्वगात्रजे।
पिप्पल्यादिमहाक्वाथो ज्वरे सर्वत्र पूजितः ॥ ४१२ ॥
*अत्र श्रेयसी=रास्ना, वातश्लेष्मज्वरहरत्वात ॥४०७-४१२॥

अथ दशमूलीक्वाथः।

दशमूलीरसः पीतः कणाऽऽढ्यः कफवातजे।
ज्वरे विपाके निद्रायां पार्श्वरुक्छ्वासकासके ॥ ४१३ ॥

अथ पिप्पलीक्वाथः।

पिप्पलीभिः शृतं तोयमनभिष्यन्दि दीपनम्।
वातश्लेष्मज्वरं हन्ति सेवितं प्लीहनाशनम् ॥ ४१४ ॥

अथ सूर्यशेखररसः।

सूतकं टङ्कणं भृष्टं गन्धं शुद्धं समं समम्।
द्विगुणं सूतकाद्देयं जैपालं तुषवर्जितम् ॥ ४१५ ॥
सैन्धवं मरिचं चिञ्चात्वक्क्षारः शर्कराऽपि च।
प्रत्येकं सूततुल्यं स्याज्जम्बीरैर्मर्दयेद्दिनम् ॥ ४१६ ॥
सूर्यशेखरनामाऽयं रसो गुञ्जाद्वयोन्मितः।
भक्षितस्तप्ततोयेन वातश्लेष्मज्वरापहः ॥ ४१७ ॥
*सूर्यशेखरो रसो वातश्लेष्मज्वरे शीतज्वरे च रसप्रदीपे ॥४१५-४१७॥

अथोद्धूलनमाह—

स्वेदोद्गमे भृष्टकुलत्थचूर्णनिपातनं शस्तमिति ब्रुवन्ति।
जीर्णं शकृद्दोर्लवणस्य भाजनं संचूर्णितं स्वेदहरं सुधूलनात् ॥४१८॥

अथ मरिचाद्युद्धूलनम्।

मरिचं पिप्पली शुण्ठी पथ्या लोध्रश्च पौष्करम्।
भूनिम्बः कटुका कुष्ठं कर्चूरो लिङ्गिका शटी॥ ४१६॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत्।
एतदुद्धूलनं श्रेष्ठ स्रोतोवत्स्वेदनिर्गमे॥ ४२०॥

*लिङ्गिका="पञ्चगुरिआ" इति लोके। अत्र शटी=गन्धपलाशी॥ ४१९-४२०॥

अथ वालुकास्वेदः।

पूर्वोक्तो वालुकास्वेदोऽप्यत्र समुचितः॥

अथ भूनिम्बाद्युद्धूलनम्।

भूनिम्बः कारवी तिक्ता वचा कट्फलजं रजः।
एषामुद्धूलनं श्रेष्ठं सततं स्वेदसंस्रवे॥ ४२१॥

यदुक्तम्—

पीनसश्वासबाधिर्यजङ्घापार्श्वास्थिशूलिनि।
वातश्लेष्मज्वरे देऽमौषधं तद्विधानवित्॥ ४२२॥

अथ कवलमाह—

मातुलुङ्गफलकेशरो धृतः सिन्धुजन्ममरिचान्वितो मुखे।
हन्ति वातकफरोगमास्यगं शोषमाशु जडतामरोचकम्॥ ४२३॥

अथान्नमाह—

महत्या पञ्चमूल्याऽन्नं सम्यक्सिद्धं चिकित्सकः।
सप्तमे दिवसे दद्याज्ज्वरे वातबलासजे॥ ४२४॥

इति वातकफज्वराधिकारः समाप्तः।

अथ पित्तकफज्वराधिकारः।

पित्तश्लेष्मकरैः पित्तकफावामाशयाश्रयौ।
बहिर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ॥ ४२५॥

*तस्य विप्रकृष्टसंनिकृष्टकारणकथनपूर्विका संप्राप्तिमाह-पित्तेति॥४२५॥

अथ पित्तकफज्वरपूर्वरूपमाह—

प्राग्रूपे पित्तकफयोः स्यातां पित्तकफज्वरे॥ ४२६॥

अथ पित्तकफज्वरलक्षणमाह--

लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा ।
मुहुर्दाहो मुहुः शीतं पित्तश्लेष्मज्वराकृतिः ॥ ४२७ ॥

*आस्यतिक्तत्वं पित्तेन, लिप्तत्वं कफेन, तन्द्रा=अर्द्धोन्मीलितनेत्रत्वम्, मोहो=मूर्च्छा ॥ ४२७ ॥

अथ पित्तकफज्वरस्य चिकित्सामाह--

पित्तश्लेष्मज्वरे देयमौषधं दशमेऽहनि ॥ ४२८ ॥

अथ गुडूच्यादिक्वाथमाह—

गुडूची निम्बधान्याकं चन्दनं कटुरोहिणी ।
गुडूच्यादिरयं क्वाथः पाचनो दीपनः स्मृतः ॥
तृष्णादाहारुचिच्छर्दिपित्तश्लेष्मज्वरापहः ॥ ४२९ ॥

अथामृताष्टकक्वाथमाह—

अमृताकटुकाऽरिष्टपटोलघनचन्दनम् ।
नागरेन्द्रयवं चैतदमृताष्टकमीरितम् ॥ ४३० ॥
क्वथितं सकणाचूर्णं पित्तश्लेष्मज्वरापहम् ।
हृल्लासारोचकच्छर्दितृष्णादाहनिवारणम् ॥ ४३१ ॥

अथ कण्टकार्यादिक्वाथमाह—

कण्टकार्यमृताभार्गीविश्वेन्द्रयववासकम् ।
भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणीम् ॥ ४३२ ॥
विपाच्य पाययेत्क्वाथं पित्तश्लेष्मज्वरापहम् ।
दाहतृष्णाऽरुचिच्छर्दिकासशूलनिवारणम् ॥ ४३३ ॥

अथ नागरादिक्वाथमाह--

नागरोशीरबिल्वाब्दधान्यमोचरसाम्बुभिः ।
कृतः क्वाथो भवेद् ग्राही पित्तश्लेष्मज्वरापहः ॥ ४३४ ॥

अथ कटुकीकल्कमाह--

शर्करामक्षमात्रां च कटुकीं चोष्णवारिणा ।
पीत्वा ज्वरं जयेज्जन्तुः पित्तश्लेष्मसमुद्भवम् ॥ ४३५ ॥

*अत्र कटुक्या द्वादश माषाः, शर्करायाश्चत्वारो माषा एवं कर्ष-

इति चरकः। वैद्यस्य व्यवहारे कटुकीशर्करयोः समभागयोरेव कर्षः—कटुकीकल्कः॥ ४३५॥

अथ वासारसमाह—

सपत्रपुष्पवासाया रसः क्षौद्रसितायुतः।
पित्तश्लेष्मज्वरं हन्ति साम्लपित्तं सकामलम्॥ ४३६॥

*अत्र वासारसोऽर्द्धपलपरिमितो देयः। मधुसितयोः प्रत्येकं टङ्कः—प्रक्षेप्यः॥ ४३६॥

अथ शृङ्गवेरादिक्वाथमाह—

कषायः परिपीतस्तु शृङ्गवेरपटोलयोः।
पित्तश्लेष्मज्वरवमीदाहकण्डूहरो भवेत्॥ ४३७॥

अथान्नमाह—

पटोलधान्ययोर्यूषः पित्तश्लेष्मज्वरापहः॥ ४३८॥

इति पित्तकफज्वराधिकारः समाप्तः।

अथ सन्निपातज्वराधिकारः।

त्रिदोषजनकैर्वातः पित्तं श्लेष्माऽऽमगेहगाः।
वहिर्निरस्य कोष्ठाग्निं रसगा ज्वरकारिणः॥ ४३९॥

*तत्र सन्निपातज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्विकां सम्प्राप्तिमाह—त्रिदोषेति॥ ४३९॥

अथ सन्निपातज्वरस्य सामान्यानि लक्षणान्याह—

क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा।
सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने॥
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः।
तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः॥ ४४०॥
परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परा।
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च॥ ४४१॥
शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा।
स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः॥ ४४२॥
कृशत्वं नातिगात्राणां प्रततं कण्ठकूजनम्।
कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम्॥ ४४३॥

मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च।
चिरात्पाकश्च दोषाणां सन्निपातज्वराकृतिः ॥ ४४५ ॥

*लोचने सास्रावे=साश्रुणी, कलुषे=अस्वच्छे, निर्भुग्ने=निर्गते कुटिले च। कण्ठः शूकैरिवावृतः=धान्याग्रैरिवावृतः। जिह्वा परिदग्धा=परिदग्धेव ज्ञायते। अथ वा—परिदग्धेव कृष्णा दृश्यते। स्रस्ताङ्गता=शिथिलाङ्गता। ष्ठीवनमित्यादि=कफसंयुक्तस्य रक्तस्य ष्ठीवनम्। शिरसो लोठनमितस्ततः शिरश्चालनम्। कृशत्वं नातिगात्राणामिति=गात्राणामतिशयितं कार्श्यं न व्याधिप्रभावात। प्रततं=निरन्तरम्। कोठः='वरटीदंष्ट्रसंस्थानं कोठ इत्यभिधीयते'। श्यावः=कपिशो वर्णः। मूकत्वमवचनत्वमल्पवचनत्वं वा। स्रोतसां=कर्णनासाऽऽदीनाम् ॥

*ननु वातादयः परस्परविरुद्धगुणास्तेषां सम्भूय; एकत्र कार्यारम्भकत्वं नोपपद्यते परस्परोपघाताद्दहनसलिलयोरिव, तत्कथं वातपित्तकफा मिलित्वा विकारोत्पादकाः? अत्र समाधानमुक्तं दृढबलेन—

*विरुद्धैरपि न त्वेते गुणैर्घ्नन्ति परस्परम्।
दोषाः सहजसात्म्यत्वाद्विषं घोरमहीनिव ॥ ८७ ॥

*गदाधरस्तु हेत्वन्तरमुक्तवान्—

*दैवाद्दोषस्वभावाद्वा दोषाणां सान्निपातिके।
विरुद्धैश्च गुणैस्तैश्च नोपघातः परस्परम् ॥ ८८ ॥ इति।

*ननु भिन्नचयप्रकोपकालानां वातपित्तकफानां युगपदुत्पत्त्यभावात्कथं सम्भूय सन्निपातज्वरारम्भकत्वमुपपद्यते? उच्यते—त्रिदोषजनकनिदानबलेन युगपदेषां प्रकोपादिति सिद्धान्तः ॥ ४३०-४४४ ॥

अथ सामान्यसन्निपातज्वरस्य त्रयोदशभेदानाह—

एकोल्वणास्त्रयस्तेषु द्व्युल्वणाश्च तथेति षट्।
त्र्युल्वणश्च भवेदेको विज्ञेयः स तु सप्तमः ॥ ४३१ ॥
प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च षट्।
सन्निपातज्वरस्यैवं स्युर्विशेषास्त्रयोदश ॥ ४४६ ॥

*अत्र प्रवृद्धवातो मध्यपित्तो हीनकफः १। मध्यवातः प्रवृद्ध

पित्तो हीनकफः २। हीनवातः प्रवृद्धपित्तो मध्यकफः ३। प्रवृद्ध-वातो हीनपित्तो मध्यकफः ४। मध्यवातो हीनपित्तः प्रवृद्धकफः ५। हीनवातो मध्यपित्तः प्रवृद्धकफ इति ६ षट् ॥ ४४५-४४६ ॥

अथानुक्रमेण त्रयोदशसन्निपातनामान्याह—

विस्फारकश्चाशुकारी कम्पनो बभ्रसंज्ञकः ।
शीघ्रकारी तथा भल्लुः सहामः कूटपाकलः ॥ ४४७ ॥
सम्मोहकः पाकलश्च याम्यः क्रकच इत्यपि ।
ततः कर्कटकः प्रोक्तस्ततो वैदारिकाभिधः ॥ ४४८ ॥

*तन्त्रान्तरे 'विस्फारक' इत्यत्र 'विस्फोरक' इति पाठः। 'बभ्र' स्थाने 'बभ्रुरि'ति पाठः। कुत्रापि 'बद्ध' इति पाठः। 'भल्लुरि'त्यत्र 'फल्गुरि'ति पाठः। 'याम्य' इत्यत्र 'संग्राम' इति पाठः। 'कर्कटक' इत्यत्र 'कर्काटक' इति पाठः ॥ ४४७-४४८ ॥

तत्र वातोल्वणविस्फारकलक्षणमाह—

श्वासः कासो भ्रमो मूर्च्छा प्रलापो मोहवेपथू ।
पार्श्वस्य वेदना जृम्भा कषायत्वं मुखस्य च ॥ ४४९ ॥
वातोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत् ।
एष विस्फारको नाम्ना सन्निपातः सुदारुणः ॥ ४५० ॥

अथ पित्तोल्वणाशुकारिलक्षणमाह—

अतिसारो भ्रमो मूर्च्छा मुखपाकस्तथैव च ।
गात्रे च बिन्दवो रक्ता दाहोऽतीव प्रजायते ॥ ४५१ ॥
पित्तोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत् ।
भिषग्भिः सन्निपातोऽयमाशुकारी प्रकीर्त्तितः ॥ ४५२ ॥

अथ कफोल्वणकम्पनलक्षणमाह—

जडता गद्गदा वाणी रात्रौ निद्रा भवत्यपि ।
प्रस्तब्धे नयने चैव मुखमाधुर्यमेव च ॥ ४५३ ॥
कफोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत् ।
मुनिभिः सन्निपातोऽयमुक्तः कम्पनसंज्ञकः ॥ ४५४ ॥

अथ वातपित्तोल्वणबभ्रलक्षणमाह—

वातपित्ताधिको यस्तु सन्निपातः प्रकुप्यति ।

तस्य ज्वरो मदस्तृष्णा मुखशोषः प्रमीलकः ॥ ४५५ ॥
आध्मानारुचितन्द्राश्च कासश्वासभ्रमश्रमाः ।
मुनिभिर्बभ्रुनामाऽयं सन्निपात उदाहृतः ॥ ४५६ ॥

अथ वातकफोल्वणशीघ्रकारिलक्षणमाह—

वातश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति ।
तस्य शीतज्वरो मूर्च्छा क्षुत्तृष्णा पार्श्वनिग्रहः ॥ ४५७ ॥
शूलमस्विद्यमानस्य तन्द्रा श्वासश्च जायते ।
असाध्यः सन्निपातोऽयं शीघ्रकारीति कथ्यते ।
न हि जीवत्यहोरात्रमनेनाविष्टविग्रहः ॥ ४५८ ॥

अथ पित्तकफोल्वणभल्लुलक्षणमाह—

पित्तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति ।
अन्तर्दाहो बहिः शीतं तस्य तृष्णा प्रवर्द्धते ॥ ४५९ ॥
तुद्यते दक्षिणे पार्श्वे उरःशीर्षगलग्रहः ।
ष्ठीवति श्लेष्मपित्तञ्च कृच्छ्रात्कोठश्च जायते ॥ ४६० ॥
विड्भेदश्वासहिक्काश्च वर्द्धन्ते सप्रमीलकाः ।
ऋषिभिर्भल्लुनामाऽयं सन्निपात उदाहृतः ॥ ४६१ ॥

अथ वातपित्तकफोल्वणकूटपाकल-
लक्षणमाह—

सर्वदोषोल्वणो यस्य सन्निपातः प्रकुप्यति ।
त्रयाणामपि दोषाणां तस्य रूपाणि लक्षयेत् ॥ ४६२ ॥
व्याधिभ्यो दारुणश्चैव वज्रशस्त्राग्निसन्निभः ।
केवलोच्छ्वासपरमस्तब्धाङ्गः स्तब्धलोचनः ॥ ४६३ ॥
त्रिरात्रात्परमेतस्य जन्तोर्हरति जीवितम् ।
तदवस्थन्तु तं दृष्ट्वा मूढा व्याहरते जनः ॥ ४६४ ॥
धर्षितो राक्षसैर्नूनमवेलायां चरन्ति ये ।
अम्बया ब्रुवते के चिद्यक्षिण्या ब्रह्मराक्षसैः ॥ ४६५ ॥
पिशाचैर्गुह्यकैश्चैव तथाऽन्यैर्मस्तके हतम् ।
कुलदेवार्चनाहीनं धर्षितं कुलदैवतैः ॥ ४६६ ॥

नक्षत्रपीडामपरे गरकर्मेति चापरे ।
सन्निपातमिमं प्राहुर्भिषजः कूटपाकलम् ॥ ४६७ ॥

अथाधिकवात—मध्यपित्त—हीनकफ-
संमोहकसन्निपातलक्षणान्याह—

प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ ४६८ ॥
प्रलापायाससम्मोहकम्पमूर्च्छाऽरतिभ्रमाः ॥ ४६९ ॥
एकपक्षाभिघातश्च तत्राप्येते विशेषतः ।
एष सम्मोहको नाम्ना सन्निपातः सुदारुणः ॥ ४७० ॥

*रोगास्त एवोक्ताः=उक्ता एव ते रोगा व्यथावेपथुनिद्रानाशविष्टम्भादयो वातजाः, दाहतृष्णोष्णतास्वेदादयः पित्तजाः, गौरवाग्निमान्द्योत्कासनासिकामुखप्रसेकादयः कफजाः । तत्रापि प्रलापादयः पक्षाघातान्ता विशेषाद्भवन्ति । ननु वातः प्रवृद्धः स ज्वरं करिष्यति पित्तन्तु मध्यं=सममिति यावत्, तत्कथं ज्वरं करिष्यति ? यत आह—

*धातवस्तन्मला दोषाः स्युर्नाशायासमास्तनौ ।
समाः सुखाय विज्ञेया बलायोपचयाय च ॥ ८४ ॥ इति ।

*उच्यते–अत्र पित्तं मध्यमप्यप्रकृतमेव, यतोऽप्रकृतयोर्वातश्लेष्मणोरपेक्षया मध्यं तेन मध्यकुपितमित्यर्थः । ननु कफः क्षीणः स कथं ज्वरं करिष्यति ? हीनशक्तित्वाद्, उच्यते–दोषाः क्षीणा अपि व्याधीन् कुर्वन्त्येव । यत आह—

*वातक्षयेऽल्पचेष्टत्वं मन्दवाक्त्वं विसंज्ञता ।
पित्तक्षयेऽधिकः श्लेष्मा वह्निर्मन्दः प्रभात्ययः ॥
शिथिलाः सन्धयो मूर्च्छा रौक्ष्यं दाहः कफक्षये ॥ ८० ॥
*इत्याशङ्का सिद्धान्तश्चात्र परत्रापि ॥ ४६८–४७० ॥

अथ मध्यवाताधिकपित्तहीनकफपाकलसन्निपातलक्षणान्याह—

मध्यप्रवृद्धहीनैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ ४७१ ॥
मोहप्रलापमूर्च्छाः स्युर्मन्यास्तम्भः शिरोग्रहः ।

कासः श्वासो भ्रमस्तन्द्रा संज्ञानाशो हृदि व्यथा ॥ ४७२ ॥
खेभ्यो रक्तं विसृजति सरक्तस्तब्धनेत्रता।
तत्राप्येते विशेषाः स्युर्मृत्युरर्वाक् त्रिवासरात् ॥
भिषग्भिः सन्निपातोऽयं कथितः पाकलाभिधः ॥ ४७३ ॥

अथ हीनवाता-धिकपित्त-मध्यकफ-याम्यसन्निपातलक्षणमाह—

हीनप्रवृद्धमध्यैस्तु वातपित्तकफैश्च यः।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ ४७४ ॥
हृदयं दह्यते चास्य यकृत्प्लीहान्त्रफुस्फुसाः।
पच्यन्तेऽत्यर्थमूर्द्ध्वाधः पूयशोणितनिर्गमः ॥ ४७५ ॥
शीर्णदन्तश्च मृत्युश्च तत्राप्येतद्विशेषतः।
भिषग्भिः सन्निपातोऽयं याम्यो नाम्ना प्रकीर्त्तितः ॥ ४७६ ॥

अथाधिकवात-हीनपित्त-मध्यकफ-क्रकचसन्निपातलक्षणमाह—

प्रवृद्धहीनमध्यैस्तु वातपित्तकफश्च यः।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ ४७७ ॥
प्रलापायाससम्मोहाः कम्पमूर्च्छाऽरतिभ्रमाः।
मन्यास्तम्भेन मृत्युः स्यात्तत्राप्येतद्विशेषतः ॥ ४७८ ॥
भिषग्भिः सन्निपातोऽयं क्रकचः सम्प्रकीर्त्तितः ॥४७९॥

अथ मध्यवात—हीनपित्त—मध्यकफ—कर्कटकसन्निपातलक्षणमाह—

मध्यहीनप्रवृद्धैस्तु वातपित्तकफैश्च यः।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ ४८० ॥
अन्तर्दाहो विशेषोऽत्र न च वक्तुं स शक्यते।
रक्तमालक्तकेनैव लक्ष्यते मुखमण्डलम् ॥ ४८१ ॥
पित्तेनाकर्षितः श्लेष्मा हृदयान्न प्रसिच्यते।
इषुणेवाहतं पार्श्वं तुद्यते खन्यते हृदि ॥ ४८२ ॥
प्रमीलकश्वासहिक्का बर्द्धन्ते तु दिने दिने।
जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवावृतः ॥ ४८३ ॥
विसर्गं नाभिजानाति कूजेच्चापि कपोतवत्।
अतीव श्लेष्मणा पूर्णः शुष्कवक्त्रौष्ठतालुकः ॥ ४८४ ॥

तन्द्रानिद्राऽतियोगार्त्तो हतवाङ् निहतद्युतिः ।
न रतिं लभते नित्यं विपरीतानि चेच्छति ॥ ४८५ ॥
आयम्यते च बहुशो रक्तं ष्ठीवति चाल्पशः ।
एष कर्कटको नाम्ना सन्निपातः सुदारुणः ॥ ४८६ ॥

अथ हीनवात–मध्यपित्ता–धिककफ–वैदारिकसन्निपातलक्षणमाह—

हीनमध्यप्रवृद्धैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ ४८७ ॥
अल्पशूलं कटीतोदो मध्ये दाहो रुजा भ्रमः ॥
भृशं क्लमः शिरोवस्तिमन्याहृदयवाग्रुजः ॥ ४८८ ॥
प्रमीलकः श्वासकासहिक्काजाड्यविसंज्ञताः ।
प्रथमोत्पन्नमेनन्तु साधयन्ति कदा चन ॥ ४८९ ॥
एतस्मिन्सन्निवृत्ते तु कर्णमूले सुदारुणा ।
पिडिका जायते जन्तोर्यया कृच्छ्रेण जीवति ॥ ४९० ॥
स वैदारिकसंज्ञोऽयं सन्निपातः सुदारुणः ।
त्रिरात्रात्परमेतस्य व्यर्थमौषधकल्पनम् ॥ ४९१ ॥

अथ संनिपातज्वरविशेषाणां तन्त्रान्तरस्थनामान्याह—

शीताङ्गस्त्रिमलोद्भवज्वरगणे तन्द्री प्रलापी ततो-
रक्तष्ठीवयिता च तत्र गणितः सम्भुग्ननेत्रस्तथा ।
साभिन्यासकजिह्वकश्च कथितः प्राक्सन्धिगोऽथान्तको-
रुग्दाहः सहचित्तविभ्रम इह द्वौ कर्णकण्ठग्रहौ ॥ ४९२ ॥

*अथ तन्त्रान्तरे वातोल्वणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां शीताङ्गादीनि त्रयोदशनामान्तराणि लक्षणान्तराणि चाह—शीताङ्ग इति । तन्द्री=तन्द्रिकः, प्रलापी=प्रलापकः, रक्तष्ठीवयिता=रक्तष्ठीवी, सम्भुग्ननेत्रः=भुग्ननेत्रः, अभिन्यासकः=अभिन्यासः, कर्णकण्ठग्रहौ=कर्णग्रहः, कर्णिकः । कण्ठग्रहः=कण्ठकुब्जकः ॥ ४९२ ॥

अथ तेषां प्रत्येकं लक्षणानि ।

तत्र शीताङ्गसन्निपातलक्षणमाह—

हिमशिशिरशरीरः सन्निपातज्वरी यः-
श्वसनकसनहिक्कामोहकम्पप्रलापैः ॥

क्लमबहुकफवातादाहवम्यङ्गपीडा-
स्वरविकृतिभिरार्त्तः शीतगात्रः स उक्तः ॥ ४६३ ॥

अथ तन्द्रिकसन्निपातलक्षणमाह—

तन्द्राऽतीव ततस्तृषाऽतिसरणं श्वासोऽधिकः कासरुक्-
सन्तप्तातितनुर्गले श्वयथुना सार्द्धश्च कराडूः कफः ॥
सुश्यामा रसना क्लमः श्रवणयोर्मान्द्यञ्च दाहस्तथा
यत्र स्यात्स हि तन्द्रिको निगदितो दोषत्रयोत्थो ज्वरः ॥ ४६४ ॥

अथ प्रलापकसन्निपातलक्षणमाह—

यत्र ज्वरे निखिलदोषनितान्तरोष-
जाते प्रलापबहुलाः सहसोत्थिताश्च ।
कम्पव्यथापतनदाहविसंज्ञताः स्यु-
र्नाम्ना प्रलापक इति प्रथितः पृथिव्याम् ॥ ४६५ ॥

अथ रक्तष्ठीविसन्निपातलक्षणमाह—

निष्ठीवो रुधिरस्य रक्तसदृशं कृष्णं तनौ मण्डलं-
लौहित्यं नयने तृषाऽरुचिवमिश्वासातिसारभ्रमाः ॥
आध्मानञ्च विसंज्ञता च पतनं हिक्काऽङ्गपीडा भृशं-
रक्तष्ठीविनि सन्निपातजनिते लिङ्गं ज्वरे जायते ॥ ४९६ ॥

अथ भुग्ननेत्रसन्निपातज्वरलक्षणमाह—

भृशं नयनवक्रता श्वसनकासतन्द्रा भृशं-
प्रलापमदवेपथुश्रवणहानिमोहास्तथा ॥
पुरो निखिलदोषजे भवति यत्र लिङ्गं ज्वरे
पुरातनचिकित्सकैः स इह भुग्ननेत्रो मतः ॥ ४६७ ॥

अथाभिन्याससन्निपातलक्षणमाह—

दोषास्तीव्रतरा भवन्ति बलिनः सर्वेऽपि यत्र ज्वरे
मोहोऽतीव विचेष्टता विकलता श्वासो भृशं मूकता ॥
दाहश्चिक्कणमाननञ्च दहनो मन्दो बलस्य क्षयः-
सोऽभिन्यास इति प्रकीर्त्तित इह प्राज्ञैर्भिषग्भिः पुरा ॥४६८॥

अथ जिह्वकसन्निपातज्वरलक्षणमाह—

त्रिदोषजनिते ज्वरे भवति यत्र जिह्वा भृशं-
वृता कठिनकण्टकैस्तदनु निर्भरं मूकता ॥
श्रुतिक्षतिबलक्षतिश्वसनकाससन्तप्तताः-
पुरातनभिषग्वरास्तमिह जिह्वकं चक्षते ॥ ४९९ ॥

अथ सन्धिगसन्निपातलक्षणमाह—

व्यथाऽतिशयिता भवेच्छ्वयथुसंयुता सन्धिषु
प्रभूतकफता मुखे विगतनिद्रता कासरुक् ॥
समस्तमिति कीर्त्तितं भवति लक्ष्म यत्र ज्वरे
त्रिदोषजनिते बुधैः स हि निगद्यते सन्धिगः ॥ ५०० ॥

अथान्तकसन्निपातज्वरलक्षणमाह—

यस्मिँल्लक्षणमेतदस्ति सकफैर्दोषैरुदीते ज्वरे-
ऽजस्रं मूर्द्धविधूननं सकसनं सर्वाङ्गपीडाऽधिका ॥
हिक्काश्वाससदाहमोहसहिता देहेऽतिसन्तप्तता
वैकल्यञ्च वृथा वचांसि मुनिभिः सङ्कीर्त्तितः सोऽन्तकः ॥५०१॥

अथ रुग्दाहसन्निपातलक्षणमाह—

दाहोऽधिको भवति यत्र तृषा च तीव्रा
श्वासप्रलापविरुचिभ्रममोहपीडाः ॥
मन्याहनुव्यथनकण्ठरुजः श्रमश्च
रुग्दाहसंज्ञ उदितस्त्रिभवो ज्वरोऽयम् ॥ ५०२ ॥

अथ चित्तभ्रमसन्निपातलक्षणमाह—

गायति नृत्यति हसति प्रलपति विकृतं निरीक्षते मुह्येत् ।
दाहव्यथाभयार्त्तो नरस्तु चित्तभ्रमे ज्वरे भवति ॥ ५०३ ॥

अथ कर्णिकसन्निपातलक्षणमाह—

दोषत्रयेण जनितः किल कर्णमूले
तीव्रा ज्वरे भवति तु श्वयथुर्व्यथा च ॥
कण्ठग्रहो बधिरता श्वसनं प्रलापः-
प्रस्वेदमोहदहनानि च कर्णिकाख्ये ॥ ५०४ ॥

अथ कण्ठकुब्जसन्निपातलक्षणमाह—

कण्ठः शूकशतावरुद्धवदतिश्वासः प्रलापोऽरुचि-
र्दाहो देहरुजा तृषाऽपि च हनुस्तम्भः शिरोऽर्त्तिस्तथा ॥
मोहो वेपथुना सहेति सकलं लिङ्गं त्रिदोषज्वरे
यत्र स्यात्स हि कण्ठकुब्ज उदितः प्राच्यैश्चिकित्साबुधः ॥५०५॥

अथ सन्निपातज्वरसाध्यासाध्यत्वमाह—

सन्धिगस्तेषु साध्यः स्यात्तन्द्रिकश्चित्तविभ्रमः।
कर्णिको जिह्वकः कण्ठकुब्जः पञ्चापि कष्टकाः ॥ ५०६ ॥
रुग्दाहस्त्वतिकष्टेन संसाध्यस्तेषु भाषितः।
रक्तष्ठीवी भुग्ननेत्रः शीतगात्रः प्रलापकः ॥
अभिन्यासोऽन्तकश्चैते षडसाध्याः प्रकीर्त्तिताः ॥ ५०७ ॥

अथान्यग्रन्थोक्तवातोल्वणादित्रयोदशसन्निपातानां कुम्भीपाकादिनामान्याह—

कुम्भीपाकः प्रोर्णुनावः प्रलापी ह्यन्तर्दाहो दण्डपातोऽन्तकश्च।
एणीदाहश्चाथ हारिद्रसंज्ञो भेदा एते सन्निपातज्वरस्य ॥ ५०८ ॥
अजघोषभूतहासौ यन्त्रापीडश्च संन्यासः।
संशोषी च विशेषास्तस्यैवोक्तास्त्रयोदशान्यत्र ॥ ५०९ ॥

अथैषां लक्षणानि।

तत्र कुम्भीपाकलक्षणमाह—

घ्राणाविवरक्षरद्बहुशोणासितलोहितं सान्द्रम्।
विलुठन्मस्तकमभितः कुम्भीपाकेन पीडितं विद्यात् ॥५१०॥

अथ प्रोर्णुनावसन्निपातलक्षणमाह—

उत्क्षिप्य यः स्वमङ्गं क्षिपत्यधस्तान्नितान्तमुच्छ्वसिति।
तं प्रोर्णुनावजुष्टं विचित्रकष्टं विजानीयात् ॥ ५११ ॥

अथ प्रलापिसन्निपातलक्षणमाह—

स्वेदभ्रमाङ्गभेदाः कम्पो दवथुर्वमिर्व्यथा कण्ठे।
गात्रञ्च गुर्वतीव प्रलापिजुष्टस्य जायते लिङ्गम् ॥ ५१२ ॥

अथान्तर्दाहसन्निपातलक्षणमाह—

अन्तर्दाहः शैत्यं बहिः श्वयथुररतिरति तथा श्वासः।
अङ्गमपि दग्धकल्पं सोऽन्तर्दाहार्दितः कथितः ॥ ५१३ ॥

अथ दण्डपातसन्निपातज्वरलक्षणमाह—

नक्तन्दिवा न निद्रामुपैति गृह्णाति मूढधीर्नभसः।
उत्थाय दण्डपाती भ्रमातुरः सर्वतो भ्रमति ॥ ५१४ ॥

*नभसो गृह्णाति = आकाशात्किञ्चिद् ग्रहीतुं करौ प्रसारयतीत्यर्थः ॥ ५१४ ॥

अथान्तकसन्निपातलक्षणमाह—

सम्पूर्यते शरीरं ग्रन्थिभिरभितस्तथोदरं मरुता।
श्वासातुरस्य सततं विचेतनस्यान्तकार्त्तस्य ॥ ५१५ ॥

अथैणीदाहसन्निपातलक्षणमाह—

परिधावतीव गात्रे रुक्पात्रे भुजङ्गपतङ्गहरिणगणः।
वेपथुमतः सदाहस्यैणीदाहज्वरार्त्तस्य ॥ ५१६ ॥

*रुक्पात्रे = पीडाभाजने, गात्रस्य विशेषणमेतत् ॥ ५१६ ॥

अथ हारिद्रकसन्निपातलक्षणमाह—

यस्यातिपीतमङ्गं नयने सुतरां मलस्ततोऽप्यधिकम्।
दाहोऽतिशीतता बहिरस्य स हारिद्रको ज्ञेयः ॥ ५१७ ॥

अथाजघोषसन्निपातलक्षणमाह—

छगलकसमानगन्धः स्कन्धरुजावान्निरुद्धगलरन्ध्रः।
अजघोषसन्निपातादाताम्राक्षः पुमान्भवति ॥ ५१८ ॥

अथ भूतहाससन्निपातलक्षणमाह—

शब्दादीनधिगच्छति न स्वान्विषयान्यदिन्द्रियग्रामैः।
हसति प्रलपति परुषं स ज्ञेयो भूतहासार्त्तः ॥ ५१९ ॥

अथ यन्त्रापीडसन्निपातलक्षणमाह—

येन मुहुर्ज्वरवेगाद्यन्त्रेणेवावपीड्यते गात्रम्।
रक्तं पित्तञ्च वमेद्यन्त्रापीडः स विज्ञेयः ॥ ५२० ॥

अथ संन्याससन्निपातज्वरलक्षणमाह—

अतिसरति वमति कूजति गात्राण्यभितश्चिरं नरः क्षिपति।
संन्याससन्निपाते प्रलपत्युग्राक्षिमण्डलो भवति ॥ ५२१ ॥

अथ संशोषिसन्निपातलक्षणमाह—

मेचकवपुरतिमेचकलोचनयुगलो मलोत्सर्गात् ॥

संशोषिणि सितपिडिकामण्डलयुक्तो ज्वरे नरो भवति॥५२२॥

अथ सन्निपातज्वरभयङ्करतामाह—

नारायण एव भिषग् भेषजमेतेषु जाह्नवीनीरम्।
नैरुज्यहेतुरेको नित्यं मृत्युञ्जयो ध्येयः ॥ ५२३ ॥

अथासाध्यसन्निपातज्वरलक्षणमाह—

सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः ॥
शोथः सञ्जायते तेन कश्चिदेव प्रमुच्यते ॥ ५२४ ॥

*सुदारुणो मारकत्वात्। यतस्तेन शोथेन कश्चिदेव प्रमुच्यते; कोऽपि जीवितं न त्यजतीत्यर्थः ॥ ५२४ ॥

अथ सन्निपातसाध्यासाध्यतामाह—

सन्निपातज्वरान्कष्टानसाध्यानपरे जगुः ॥ ५२५ ॥
दोषे प्रवृद्धे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः।
सन्निपातज्वरोऽसाध्यः कष्टसाध्यस्ततोऽन्यथा ॥ ५२६ ॥

*सर्वाणि दाहशीतादीनि सम्पूर्णान्यातुरगतानि प्रोक्तानि यावल्लक्षणानि यस्य सः। ततोऽन्यथा दोषे पक्केऽग्नौ दीप्ते स्वल्पलक्षणकः कष्टसाध्य इत्यर्थः ॥ ५२५-५२६ ॥

अथ सामान्यसन्निपातज्वरचिकित्सामाह—

सन्निपातार्णवे मग्नं योऽभ्युद्धरति मानवम्।
कस्तेन न कृतो धर्मः काञ्च पूजां न सोऽर्हति ॥ ५२७ ॥
मृत्युना सह योद्धव्यं सन्निपातं चिकित्सता।
यश्च तत्र भवेज्जेता स जेताऽऽमयसंकुले ॥ ५२८ ॥
श्लेष्मनिग्रहमेवादौ कुर्याद्व्याधौ त्रिदोषजे।
संसर्गे यो गरीयान्स्यादुपक्रम्यः स वै भवेत् ॥ ५२९ ॥

*निरस्ते श्लेष्मणि ह्यस्य स्रोतःसुद्धाटितेषु च लाघवं जायते, सद्यस्तृष्णा चैवोपशाम्यति। अन्यच्च--

*"संनिपातज्वरे पूर्वं कुर्यादामकफापहम्।
पश्चात् श्लेष्मणि संक्षीणे शमयेत् पित्तमारुतौ" ॥ ९१ ॥

*यत्पुनस्तन्त्रान्तरे—

*"शमयेत् पित्तमेवादौ ज्वरेषु समवायिषु।

दुर्निवारतमं तद्धि ज्वरार्त्तेषु विशेषतः" ॥ ६२ ॥

*अन्यत्रापि—

*"समवाये हि दोषाणां पूर्वं पित्तमुपाचरेत् ।
ज्वरे चैवातिसारे च सर्वत्रान्यत्र मारुतम्" ॥ ६३ ॥

*एतेनाप्यामकफनिग्रहानन्तरं पित्तं, पित्तप्रशमात्परं वातप्रत्यनीकं कार्यमेव, सन्निपातज्वरातिसारयोर्बोद्धव्यम् , अन्यस्मिन्नामये वायोरेवादौ प्रतिकुर्याद् । यथा—

*"वातस्यानुजयेत् पित्तं पित्तस्यानुजयेत् कफम् ।
त्रयाणां वा जयेत् पूर्वं यो भवेद् बलवत्तमः" ॥ ९४ ॥

*तथा हि तन्त्रान्तरे—

*"ज्वरे त्रिदोषजे सामे शमयेत् कफमादितः ।
पाकान्तमागते पित्तं चिरजे विषमेऽनिलम्" ॥ ९५ ॥

*संसर्गे=दोषद्वयसंसर्गे, गरीयान्बलवत्तरः ॥ ५२९ ॥

अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात् ।
क्रियां साधारणीं तत्र विदधीत चिकित्सकः ॥ ५३० ॥
लङ्घनं वालुकास्वेदो नस्यं निष्ठीवनं तथा ।
अवलेहोऽञ्जनं चैव प्राक्प्रयोज्यं त्रिदोषजे ॥ ५३१ ॥

*ज्वरयिति शेषः ॥ ५३१ ॥

क्रियाभिस्तुल्यरूपाभिः क्रियासांकर्यमिष्यते ।
भिन्नरूपतया तास्तु न हि कुर्वन्ति दूषणम् ॥ ५३२ ॥

*ननु क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत् ।
पूर्वस्यां शान्तवेगायां न क्रियासङ्करो हितः ॥ ९६ ॥

*इति वचनेन क्रियासंकरस्य निषिद्धत्वात्कथमत्र नस्यनिष्ठीवनावलेहाञ्जनानि युगपद्विधीयन्त इत्याशङ्कयाऽऽह—क्रियेति ॥ ५३२ ॥

अथ सन्निपातज्वरलङ्घनावधिमाह—

त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा ।
लङ्घनं सन्निपातेषु कुर्यादारोग्यदर्शनात ॥ ५३३ ॥

*लङ्घने त्रिरात्रादिविकल्प उल्वणवाताद्यपेक्षया, दोषाणां शीघ्र-

मध्यमन्दशक्तित्वाद्, व्याध्यभावाद्वा। आरोग्यदर्शनादिति। यावदारोग्यदर्शनं स्यात्तावद्वा लङ्घनं कुर्याद्, एतेन त्रिरात्राद्यवधेर्नं नियतत्वं सूचितम् ॥ ५३३ ॥

अत एव सुश्रुतः प्राह—

सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा।
पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा ॥ ५३४ ॥

*घोरतर इति स्वभावादेव ततो घोरतरो भूत्वेति ॥ ५३४ ॥

अथ हननप्रशमयोः कारणमाह—

पित्तकफानिलवृद्ध्या दशदिवसद्वादशाहसप्ताहात्।
हन्ति विमुञ्चत्यथ वा त्रिदोषजो धातुमलपाकात् ॥ ५३५ ॥

*त्रिदोषजो ज्वर इति शेषः। धातुमलपाकाद् = धातुपाकाद्धन्ति, मलपाकाद्विमुञ्चतीत्यर्थः। धातुमलपाके प्राक्तनकर्मैव हेतुः। तत्र यदि जीवनसंवर्द्धकं कर्मास्ति तदा मलपाकः, अन्यथा धातुपाकः। स च रसादिशुक्रान्तधातूनां पाको बोद्धव्यः ॥ ५३५ ॥

अथ धातुपाकलक्षणमाह—

निद्रानाशो हृदि स्तम्भो विष्टम्भो गौरवारुची।
अरतिर्बलहानिश्च धातूनां पाकलक्षणम् ॥ ५३६ ॥

*विष्टम्भ उदरस्य। गौरवं गात्राणाम् ॥ ५३६ ॥

अन्यच्च—

सम्बाध्यमानो हृदि नाभिदेशे गात्रेषु वा पाकरुजाऽन्वितेषु।
पीडाज्वरार्त्तोऽङ्गुलिभिश्च गच्छेत्स धातुपाकी कथितो भिषग्भिः॥५३७॥

अपरं च--

नाभेरूर्ध्वं हृदोऽधस्तात्पीडिते चेद्व्यथा भवेत्।
धातोः पाकं विजानीयादन्यथा तु मलस्य च ॥ ५३८ ॥

अथ मलपाकलक्षणमाह—

दोषप्रकृतिवैकृत्यं लघुता ज्वरदेहयोः।
इन्द्रियाणाञ्च वैमल्यं मलानां पाकलक्षणम् ॥ ५३९ ॥

*दोषाः=वातादयस्तेषां प्रकृतिर्दाहतन्द्रागौरवादिकरणं तस्य वैकृत्यं=वैपरीत्यं, वैमल्यं=मलराहित्यम्। मलानां=दोषाणां पाकलक्षणम् ॥ ५३९ ॥

अन्यच्च—

शश्वत्त्विन्द्रियपञ्चकस्य पटुता वह्नेश्च यत्र क्रमा-
त्तृष्णाऽऽदिप्रशमो ज्वरस्य मृदुता तं दोषपाकं वदेत् ।
हृन्नाभ्योररतिवेदनाऽतिसरणं तीव्रो ज्वरस्तृण्मदः-
श्वासाधिक्यमरोचकोऽरतिरिति स्याद्धातुपाकाकृतिः ॥५४०॥

अथ हननप्रशमयोः परमावधिमाह—

सप्तमी द्विगुणा यावन्नवम्येकादशी तथा ।
एषा त्रिदोषमर्यादा मोक्षाय च वधाय च ॥ ५४१ ॥

*आमस्याधिक्येन सप्तमदिवसाद्यवध्यतिक्रमे परमावधिमाह हारीतः—सप्तमीति । नवम्येकादशी चागमनदिवसं विहाय बोद्धव्या, तेनागमनदिवसं नीत्वा दशमी द्वादशी तथा । अत्र रात्रिरित्यध्या ह्रियते ॥ ५४१ ॥

अथ सन्निपातज्वरप्रथमकर्त्तव्यमाह ।

तत्रादौ लङ्घनमाह—

सन्निपातज्वरी पूर्वं सम्यग् लङ्घनमाचरेत् ।
शृतं शीतं पिबेदम्भः समये भेषजं भजेत् ॥ ५४२ ॥
सन्निपातेन तृष्यन्तं पार्श्वरुक्तालुशोषिणम् ।
यः पाययेज्जलं शीतं स मृत्युर्नरविग्रहः ॥ ५४३ ॥

*शीतमक्वथितं शृतं तु शीतं विहितमेव ॥ ५४३ ॥

अथ वालुकास्वेदमाह—

वातश्लेष्मकृते स्वेदान्कारयेद्रूक्षनिर्मितान् ।
स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजात् ॥ ५४४ ॥
खर्परभृष्टपटस्थितकाञ्जिकसंसिक्तवालुकास्वेदः ।
शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन् ॥ ५४५ ॥
स्रोतसां मार्दवं कृत्वा नीत्वा पावकमाशयम् ।
हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति ॥ ५४६ ॥

अथ सैन्धवादिनस्यमाह—

सैन्धवं श्वेतमरिचं सर्षपाः कुष्ठमेव च ।
वस्तमूत्रेण सम्पिष्टं नस्यं तन्द्रानिवारणम् ॥ ५४७ ॥

*श्वेतमरिचं=शिग्रुबीजम् ॥ ५४७ ।

अथ मधूकसारादिनस्यमाह—

मधूकसारसिन्धूत्थवचोषणकणाः समाः ।
श्लक्ष्णं पिष्ट्वाऽम्भसा नस्यं दद्यात्संज्ञाप्रबोधनम् ॥ ५४८ ॥
मातुलुङ्गार्द्रकरसं कोष्णं त्रिलवणान्वितम् ।
अन्यद्वा सिद्धविहितं नस्यं तीक्ष्णं प्रयोजयेत् ॥ ५४९ ॥
तेन प्रभिद्यते श्लेष्मा प्रभिन्नश्च प्रसिच्यते ।
शिरोहृदयकण्ठास्यपार्श्वरुक्चोपशाम्यति ॥ ५५० ॥
मोहालयेन मुग्धं बोधयितुं यादृशः शक्तः ।
कल्पतरुनामधेयो रसो न तादृक् परं किञ्चित् ॥ ५५१ ॥

अथ निष्ठीवनमाह—

जिह्वातालुगलक्लोम मरुत्पित्तेन दूषितम् ।
तदा सञ्चारयेच्छोषं जिह्वाविरसतां तथा ॥ ५५२ ॥
स्फुटनञ्च तदा जिह्वां लेपयेन्मधुपिष्टया ॥
द्राक्षया साज्यया तेन जिह्वा स्यात्सरसा मृदुः ॥ ५५३ ॥
आर्द्रकस्वरसोपेतं सैन्धवं कटुकत्रयम् ।
आकण्ठाद्धारयेदास्ये निष्ठीवेच्च पुनः पुनः ॥ ५५४ ॥
तेनास्यतालुकोष्ठांसमन्यापार्श्वशिरोगलात् ।
लीनोऽप्याकृष्यते श्लेष्मा लाघवं चास्य जायते ॥ ५५५ ॥
पर्वभेदो ज्वरो मूर्च्छानिद्राश्वासगलामयाः ।
मुखाक्षिगौरवं जाड्यमुत्क्लेशश्चोपशाम्यति ॥ ५५६ ॥
सकृद्द्विस्त्रिश्चतुष्कुर्याद् दृष्ट्वा दोषबलाबलम् ।
एतद्धि परमं प्राहुर्भेषजं सन्निपातिनाम् ॥ ५५७ ॥

इति कवलग्रहः ।

अथावलेहः ।

अथाष्टाङ्गावलेहमाह—

कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी ।
श्लक्ष्णं चूर्णीकृतं चैतन्मधुना सह लेहयेत् ॥ ५५८ ॥
एषाऽवलेहिका हन्ति सन्निपातं सुदारुणम् ।
हिक्कां श्वासं च कासञ्च कण्ठरोगञ्च नाशयेत् ।

एतद्योज्यं कफोद्रेके चूर्णमार्द्रकजै रसैः ॥ ५५८ ॥

*पौष्करं=पुष्करमूलं, तदलाभे कुष्ठं देयम् । शृङ्गी=कर्कटशृङ्गी । व्योषं=शुण्ठीपिप्पलीमरिचानि । यासो=यवासः । केचिद्यासस्थाने यवानीं प्रक्षिपन्ति । कारवी='मङ्गरैला" इति लोके ।५५८-५५९॥

तन्त्रान्तरे चोक्तम्—

अष्टाङ्गं मधुना लिह्यादार्द्रकस्य रसेन वा ।
सम्मोहं दारुणं हन्यात्तन्द्राकाससमन्वितम् ॥ ५६० ॥
सर्वेषु सन्निपातेषु न क्षौद्रमवचारयेत् ।
शीतोपचारि क्षौद्रं स्याच्छीतं चात्र विरुध्यते ॥ ५६१ ॥

*शीतेनोपचारोऽस्यास्तीति शीतोपचारि शीतश्चात्र सन्निपातेन विरुध्यते । सन्निपातज्वरेषु श्लेष्मनिग्रहार्थं सर्वदा स्वेदो हितः । तत्राग्निसम्बन्धेन देहस्योष्णता तिष्ठति । उष्णेन मधुना विरोधः । उक्तं च सुश्रुतेन—

*उष्णैर्विरुध्यते सर्वं विषान्वयतया मधु ।
उष्णार्त्तमुष्णैरुष्णञ्च तन्निहन्ति यथा विषम् ॥ ९७ ॥ इति ।

*अवलेहः प्रायेणोर्द्ध्वजत्रुजरोगहरत्वात्सायमुपयुज्यते । यत उक्तं चरकेण—

*उद्र्ध्वजत्रुगदघ्नी या सा सायमवलेहिका ।
अधोरोगहरी या सा भोजनात्प्राक्प्रयुज्यते ॥९८॥ इति ॥५६१॥

अथ चतुरङ्गावलेहमाह—

स्विन्नमामलकं पिष्ट्वा द्राक्षया सह मेलयेत् ।
विश्वभेषजसंयुक्तं मधुना सह लेहयेत् ।
तेनास्य शाम्यति श्वासः कासो मूर्च्छाऽरुचिस्तथा ॥५६२॥

अथाञ्जनम् ।

तत्र शिरीषबीजाद्यञ्जनमाह—

शिरीषबीजं गोमूत्रकृष्णामरिचसैन्धवैः ।
अञ्जनं स्यात्प्रबोधाय सरसोनशिलावचैः ॥ ५६३ ॥

अथ लोहचूर्णाद्यञ्जनमाह—

अयोरजः श्वेतलोध्रं मरिचं चाञ्जनं तथा ।

गोमूत्रेण समायुक्तं तन्द्रानाशनमुत्तमम् ॥ ५६४ ॥

अथ दण्डपाण्युक्ताञ्जनमाह—

अञ्जनं सम्यगारब्धं मधुसिन्धुशिलोषणैः ।
प्रमोहद्रोहि भवति भाषितं दण्डपाणिना ॥ ५६५ ॥

इत्यञ्जनम् ।

अथ लेपमाह—

सूतं विषञ्च मरिचं तुत्थकं नवसादरम् ।
चूर्णितं स्वरसैर्मर्द्यं धूर्त्तपत्ररसोनयोः ॥ ५६६ ॥
सन्निपातकृते मोहे मूर्ध्नि लिम्पेत्पदोपरि ।
अस्थिव्यथास्वनेनैव लेपं कुर्यात्पदोपरि ॥ ५६७ ॥

*पदं = "पाच्छ" इति लोके ॥ ५६७ ॥

अथ दशमूलक्वाथमाह—

बिल्वः श्योनाकगाम्भारीपाटलागणिकारिकाः ।
पित्तघ्नं वातकफहृत्पञ्चमूलमिदं महत् ॥ ५६८ ॥

*अत्र बिल्वादीनां पञ्चानां मूलस्य वल्कलं ग्राह्यम् ॥५६८॥

शालिपर्णी पृश्निपर्णी बृहती कण्टकारिका ।
गोक्षुरुर्वातपित्तघ्नं कनीयः पञ्चमूलकम् ॥ ५६९ ॥
उभयं दशमूलं तत्पिप्पलीचूर्णसंयुतम् ।
सन्निपातज्वरं हन्ति हृत्कण्ठग्रहनाशनम् ॥ ५७० ॥
तन्द्रावातकफातङ्कश्वासपार्श्वार्त्तिकासनुत् ॥ ५७१ ॥
महान्ति यानि मूलानि काष्ठगर्भाणि यानि च ।
तेषान्तु वल्कलं ग्राह्यं ह्रस्वमूलानि कृत्स्नशः ॥ ५७२ ॥

अथ द्वादशांगक्वाथमाह—

दशमूलीकषायस्तु पिप्पलीपौष्करान्वितः ।
सन्निपातज्वरे देयः श्वासकाससमन्विते ॥ ५७३ ॥

अथ चतुर्दशांगक्वाथमाह—

चिरज्वरे वातकफोल्वणे वा त्रिदोषजे वा दशमूलमिश्रः ।
किराततिक्तादिगणः प्रयोज्यः शुद्ध्यर्थिने वा त्रिवृता विमिश्रः ॥५७४॥

अथ किराततिक्तादिगणमाह—

किराततिक्तको मुस्तं गुडूची विश्वभेषजम् ।
किरातादिर्गणो ह्येष चातुर्भद्रकमित्यपि ॥ ५७५ ॥

अथाष्टादशाङ्गक्वाथमाह—

दशमूली शटी शृङ्गी पौष्करं सदुरालभम् ।
भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी ॥ ५७६ ॥
अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः ।
कासहृद्ग्रहपार्श्वार्त्तिश्वासहिक्कावमीहरः ॥ ५७७ ॥

अथ द्वितीयाष्टादशाङ्गक्वाथमाह—

भूनिम्बदारुदशमूलमहौषधाब्दतिक्तेन्द्रबीजधनिकेभकणाकषायः ।
तन्द्राप्रलापकसनारुचिदाहमोहश्वासत्रिदोषजनितज्वरनाशनःस्यात्॥५७८

*उक्तं च वङ्गसेनेन—

"अष्टादशाङ्ग इत्येष मृत्युकल्पं ज्वरं जयेत्"॥८९॥इति॥५७८॥

अथ सन्निपातज्वरे रसाः ।

तत्र मृतसञ्जीवनीवटिकामाह—

(सन्निपातज्वरे रसप्रदीपे)

विषं त्रिकटुकं गन्धं टङ्कणं मृतशुल्वकम् ।
धत्तूरस्य च बीजानि हिंगुलं नवमं स्मृतम् ॥ ५७९ ॥
एतानि समभागानि दिनैकं विजयाद्रवैः ।
मर्दयेच्चणकाकारा कर्त्तव्या वटिकाऽथ सा ॥ ५८० ॥
भक्षणीयाऽनुपातव्यो रविमूलकषायकः ।
मृतसञ्जीवनी नाम्ना सन्निपातज्वरान्तकृत् ॥ ५८१ ॥

अथ त्रिनेत्ररसमाह—

(सन्निपातज्वरे रसप्रदीपे)

शुद्धसूतं समं गन्धं सूतांशं मृतताम्रकम् ।
त्रिभिस्तुल्यैर्गवां क्षीरैर्मर्दयेदातपे खरे ॥ ५८२ ॥
मर्दयेद्दिनमेकन्तु निर्गुण्डीशिग्रुजद्रवैः ।
विधाय गोलं तं गोलमन्धमूषागतं पचेत् ॥ ५८३ ॥
त्रियामं वालुकायन्त्रे ततः खल्वे विचूर्णयेत् ।

अष्टमांशं विषं तत्र क्षिपेत्तेनापि मर्दयेत् ॥ ५८४ ॥
त्रिनेत्राख्यो रसो ह्येष देयो गुञ्जाद्वयोन्मितः ।
पञ्चकोलकषायेण छागीदुग्धेन वा सह ॥ ५८५ ॥
रसेनानेन भुक्तेन सन्निपातज्वरो महान् ।
संक्षयं व्रजति क्षिप्रं कर्त्तव्यो नात्र संशयः ॥ ५८६ ॥

अथ रसेन्द्रचिन्तामण्युक्तभस्मेश्वररसमाह—

भस्म षोडशनिष्कं स्यादारण्योपलसम्भवम् ।
मरिचं निष्कमात्रञ्च विषं निष्कं विचूर्णयेत् ॥ ५८७ ॥
रसो भस्मेश्वरो नाम सन्निपातज्वरान्तकृत् ।
एकगुञ्जामितो भक्ष्य आर्द्रकस्य द्रवेण हि ॥ ५८८ ॥

अथाग्निकुमाररसमाह—

द्वौ कषा सूतकाद् ग्राह्यौ गन्धकाद् द्वौ तथैव च ।
यत्नतस्तूभयं मर्द्यं दिनं हंसपदीद्रवैः ॥ ५८९ ॥
कल्कस्य वटिकां कृत्वा निक्षिपेत्काचभाजने ।
कर्षैकममृतं तत्र क्षिप्त्वा वक्त्रं निरोधयेत् ॥ ५९० ॥
कूपिकायाः परौ भागौ वालुकाभिश्च पूरयेत् ।
सार्द्धं यावदहोरात्रं तावत्तत्र पचेद्रसम् ॥ ५९१ ॥
याममात्रोऽनलो देयः स्वाङ्गशीतं समुद्धरेत् ।
तोलार्द्धममृतं तत्र क्षिपेत्तावत्तथोषणम् ॥ ५९२ ॥
भक्षितो रक्तिकामात्रो रसस्त्वग्निकुमारकः ।
सन्निपातज्वरं हन्याद्वातं मन्दाग्नितामपि ॥ ५९३ ॥
शूलञ्च ग्रहणीं गुल्मं क्षयं जत्रुगदं तथा ।
श्वासकासादिकान्सर्वान्गदानेष विनाशयेत् ॥ ५९४ ॥

*इत्यग्निकुमारो रसः सन्निपातज्वरादिषु रसेन्द्रचिन्तामणौ ॥ ५८९-५९४ ॥

अथ पञ्चवक्त्ररसमाह—

गन्धेशटङ्कमरिचं विषं धत्तूरजैर्द्रवैः ।
दिनं सम्मर्दितं शुष्कं पञ्चवक्त्रो रसो भवेत् ॥ ५९५ ॥
आर्द्रकस्य द्रवेणैष दातव्यो रक्तिकामितः ।

सन्निपातज्वरे देयो घोरे तद्दोषनाशनः ॥ ५९६ ॥

*इति पञ्चवक्रो रसः सन्निपाते रसेन्द्रचिन्तामणौ ॥ ५९५–५९६ ॥

अथामृतादिवटीमाह—

अमृतवराटकमरिचैर्द्विपञ्चनवभागयोजितै रचिता ।
वटिका मुद्गसमाना कफत्रिदोषाग्निमान्द्यहरी ॥ ५९७ ॥

अथ शीतज्वरे रसाः ।

तत्र शीतज्वरारिरसमाह—

सूतकं गन्धकञ्चैव हरितालं मनःशिला ।
एकनिष्कं द्विनिष्कञ्च चतुर्निष्कं तथैव च ॥ ५९८ ॥
पञ्चनिष्कं रसैः कारवेल्ल्याः सम्यक्प्रकल्पयेत् ।
ताम्रपत्राणि तुल्यानि तेन कल्केन लेपयेत् ॥ ५९९ ॥
शरावसम्पुटे तानि कृत्वा तेषामुपर्यपि ।
दद्यात्तां पिष्टिकां पश्चात्पुटपाकेन पाचयेत् ॥ ६०० ॥
ततः सञ्चूर्णयेदेवं रसः क्षौद्रेण भक्षितः ।
यवैकमात्रया हन्ति घोरं शीतज्वरं ध्रुवम् ॥ ६०१ ॥

*पारा टङ्क १ । गन्धक टङ्क २ । हरिताल टङ्क ४ । मनःशिला टङ्क ५ । ताम्रपत्र टङ्क १२ । इति शीतज्वरारिः । रसप्रदीपे ॥ ५९८–६०१ ॥

अथ शीतकेसरिरसमाह—

(रसप्रदीपे)

पारदं गन्धकञ्चैव तुत्थञ्च दरदं विषम् ।
विषादष्टगुणं योज्यं मरिचं विश्वभेषजम् ॥ ६०२ ॥
अश्वगन्धाऽथ विजया कासमर्दः कठिल्लकः ।
चतुर्णाञ्च रसैरेतैश्चूर्णान्येतानि मर्दयेत् ॥ ६०३ ॥
तुलस्यास्तु दलैः सार्द्धं भक्षितो रक्तिकामितः ।
हन्ति शीतज्वरं घोरं नाम्नाऽयं शीतकेसरी ॥ ६०४ ॥

अथ शीतभञ्जिरसमाह—

तालकं शुक्तिका चूर्णं तुल्यं तत्राभयोरपि ।
नवमांशञ्च तुत्थं स्यान्मर्दयेत्कन्यकाद्रवैः ॥ ६०५ ॥
तत्तु संशुष्कमुपलैर्वन्यैर्गजपुटे पचेत् ।

शीतं तच्चूर्णयेदर्द्धगुञ्जामात्रं सितायुतम् ॥ ६०६ ॥
प्रभाते भक्षयेत्तेन याति शीतज्वरः क्षयम् ।
वान्तिर्भवति कस्यापि कस्य चिन्न भवत्यपि ॥ ६०७ ॥

अथ रसेन्द्रचिन्तामण्युक्तशीतभञ्जिरसमाह—

तालकं तुत्थकं ताम्रं सूतगन्धकटङ्कणम् ।
सर्वमेतत्समं चूर्णं कारवेल्लीरसद्रवैः ॥ ६०८ ॥
दिनैकं मर्दयेत्तेन रसकर्दमकेन तु ।
ताम्रस्य भाजनस्यान्तर्लिम्पेदर्द्धाङ्गुलोन्मितम् ॥ ६०६ ॥
तत्पचेद्वालुकायन्त्रे यवा यावत्स्फुटन्ति हि ।
शीतलं तद्धि गृह्णीयात्ताम्रपात्रोदराद्भिषक् ॥ ६१० ॥
शीतभञ्जी रसो माषमात्रो मरिचसंयुतः ।
भक्षितः पर्णखण्डेन नाशयेद्विषमज्वरान् ॥ ६११ ॥

अथ रसरत्नप्रदीपोक्तशीतभञ्जिरसमाह—

तालको दरदोद्भूतः पारदो गन्धकः शिला ।
क्रमाद्भागार्द्धरहितं कारवेल्ल्यम्बुमर्दितम् ॥ ६१२ ॥
अनेनास्यप्रमाणेन ताम्रपात्रं प्रलेपयेत् ।
अधोमुखं दृढे भाण्डे तन्निरुध्याथ पूरयेत् ॥ ६१३ ॥
चुल्ल्यां वालुकया घस्रमग्निं प्रज्वालयेदधः ।
शीतं सञ्चूर्ण्य माषोऽस्य नागवल्लीदले स्थितः ॥ ६१४ ॥
भक्षितो मरिचैः सार्द्धं समस्तविषमज्वरान् ।
शीतदाहादिकान्हन्ति पथ्यं शाल्योदनं पयः ॥ ६१५ ॥

*इति शीतभञ्जी रसः, शीतज्वरादिविषमज्वरेषु रसरत्नप्रदीपे ॥ ६१२–६१५ ॥

अथ कट्फलादिपानमाह—

कट्फलं त्रिफला दारु चन्दनं सपरूषकम् ।
कटुका पद्मकोशीरं विपचेत्कर्षकं जले ॥ ६१६ ॥
त्रिदोषदाहतृष्णाघ्नं पानमात्रे प्रपूजितम् ।
दीर्घकालज्वरार्त्तानामेतत्स्यादमृतोपमम् ॥ ६१७ ॥

*कर्षं कट्फलाद्युशीरान्तानां समुदितानां जले प्रस्थमिते विपचे-

दर्द्धशेषं पिबेत् । कट्फलादिपानं तृष्णायां दाहे च । ६१६-६१७ ॥

अथ शीतलजलनिषेधमाह--

सन्निपाते तु दाहार्त्तं यः सिञ्चेच्छीतवारिणा ।
आतुरः स कथं जीवेद्भिषग्वा स कथं भवेत् ॥ ६१८ ॥

*एष सन्निपातिनो दाहे शीताम्बुसेकनिषेधो रुग्दाहादन्यत्र, तत्र वाप्यवगाहनस्योक्तत्वात् ॥ ६१८ ॥

अथान्नमाह--

दुःस्पर्शगोक्षुरक्षुद्रासिद्धमाहारमर्पयेत् ।
दोषशान्तिबलाग्न्यर्थं त्रिदोषज्वरिणे भिषक् ॥ ६१९ ॥

*दुःस्पर्शो=यवासः । आहारम्=उचितमन्नम् ॥ ६१९ ॥

लाजसक्तून्समश्नीयात्सैन्धवेन समन्वितान् ।
ते च जीर्यन्त्यविघ्नेन ज्वरी जीवेत्तदा ध्रुवम् ॥ ६२० ॥

इति केचित् ।

रक्तपित्तहितत्वेन तृषादाहज्वरेषु च ।
लाजानां सक्तवः शीता नैव तेऽत्र हिता मताः ॥ ६२१ ॥
पाचनो दीपनः स्वेद्यो लाजमण्डो यतः स्मृतः ।
दशमूलादिसंसिद्धः सन्निपातज्वरे हितः ॥ ६२२ ॥
सन्निपातज्वरी यस्तु कम्पते प्रलपत्यपि ।
किञ्चिदेव न जानाति चिकित्सा तस्य कथ्यते ॥ ६२३ ॥
अभ्यञ्जयेत्पुराणेन सर्पिषा पूर्वमेव तम् ।
बलारास्नागुडूच्याद्यैस्तैलैश्च परिषेचयेत् ॥ ६२४ ॥
वर्त्तको वर्त्तिका लावो वार्त्तिकस्तित्तिरिः शशः ।
कुलिङ्गश्च रसेनैषां तर्पयेत यथाऽनलम् ॥ ६२५ ॥

*वर्त्तकः="वटेर" इति लोके । वर्त्तिका="वटे" इति लोके । "वार्त्तिको वातचटके"ति निघण्टुः । "वगेरा" इति लोके । कुलिङ्गः= "गवरैया" इति लोके ॥ ६२५ ॥

सन्निपाते क्षुधाऽऽर्त्तं यो भोजयेत्पिशितौदनम् ।
स कथं भिषगाख्यान्तु लभते मनुजाधमः ॥ ६२६ ॥

अथ वातोल्बणसन्निपातज्वरस्य चिकित्सा ।

तत्र बृहत्पञ्चमूलीक्वाथमाह–

पञ्चमूलीकषायन्तु दद्याद्वातोल्वणे ज्वरे ।
भृशोष्णं वा सुखोष्णं वा दृष्ट्वा दोषबलाबलम् ॥ ६२७ ॥
*पञ्चमूली महती प्रथमोपस्थितपरित्यागे वचनाभावात् ॥६२७॥

अथ पित्तोल्वणसन्निपातज्वरस्य चिकित्सा ।

तत्र परूषकादिक्वाथमाह—

परूषकञ्च त्रिफला देवदारु च कट्फलम् ।
चन्दनं पद्मकञ्चैव तथा कटुकरोहिणी ॥ ६२८ ॥
पृश्निपर्णी शृतं त्वेभिरुषितं शीतलं जलम् ।
पित्तोत्तरे नृणामेतत्सन्निपातचिकित्सितम् ॥ ६२९ ॥

अथ किरातादिसप्तकमाह—

किराततिक्तकं मुस्तं गुडूची विश्वभेषजम् ।
पाठोदीच्यं मृणालञ्च शृतं पित्ताधिके पिबेत् ॥ ६३० ॥

अथ कफोल्वणसन्निपातज्वरस्य चिकित्सा ।

तत्र बृहत्यादिक्वाथमाह—

बृहत्यौ पौष्करं भार्गी शटी शृङ्गी दुरालभा ।
वत्सकस्य तु बीजानि पटोलं कटुरोहिणी ॥ ६३१ ॥
बृहत्यादिगणः शस्तः सन्निपाते कफोत्तरे ।
श्वासादिषु च सर्वेषु हितः सोपद्रवेष्वपि ॥ ६३२ ॥

अथ वातपित्तोल्वणसन्निपातज्वरस्य चिकित्सा ।

तत्र लघुपञ्चमूलक्वाथमाह—

वातपित्तहरं वृष्यं कनीयः पञ्चमूलकम् ।
तत्क्वाथो मधुना हन्ति वातपित्तोल्वणं ज्वरम् ॥ ६३३ ॥

अथ चातुर्भद्रकक्वाथमाह—

किराततिक्तकं मुस्तं गुडूची विश्वभेषजम् ।
चातुर्भद्रकमित्याहुर्वातपित्तोल्वणे ज्वरे ॥ ६३४ ॥

अथ पित्तकफोल्वणसन्निपातज्वरस्य चिकित्सा ।

तत्र पर्पटादिक्वाथमाह—

पर्पटः कट्फलं कुष्ठमुशीरं चन्दनं जलम् ।

नागरं मुस्तकं शृङ्गी पिप्पल्येषां शृतं हितम् ॥
तृष्णादाहाग्निमान्द्येषु पित्तश्लेष्मोल्वणे ज्वरे ॥ ६३५ ॥

*वातश्लेष्मोल्वणज्वरे चिकित्सा नोक्ता, तस्य शीघ्रकारित्वेनासाध्यत्वात् ॥ ६३५ ॥

अथ वातपित्तकफोल्वणसन्निपातज्वरस्य चिकित्सा ।

तत्र योगराजक्वाथमाह—

नागरं धान्यकं भार्गी पद्मकं रक्तचन्दनम् ।
पटोलः पिचुमन्दश्च त्रिफला मधुकं बला ॥ ६३६ ॥
शर्करा कटुका मुस्तं गजाह्वा व्याधिघातकः ।
किराततिक्तममृता दशमूली निदिग्धिका ॥ ६३७ ॥
योगराजो निहन्त्येष सन्निपातं त्रिकोल्बणम् ।
सन्निपातसमुत्थानं मृत्युमप्यागतं जयेत् ॥ ६३८ ॥

*गजाह्वा=गजपिप्पली । व्याधिघातकः=राजवृक्षः "चिरचाला" । किराततिक्तं द्वैगुण्यार्थं पृथक् पठितम् ॥ ६३६-६३८ ॥

अथ प्रवृद्धमध्यहीनवातादिसन्निपातज्वराणां चिकित्सा ।

प्रवृद्धं कर्शयेद्दोषं क्षीणं संवर्द्धयेद्भिषक् ।
चिकित्सेयं विधातव्या दोषयोर्वृद्धहीनयोः ॥ ६३९ ॥

*अस्यायमर्थः—प्रवृद्धं दोषं कर्शयेत्=तत्क्षैण्यहेतुभिरौषधान्नविहारैः कृशीकृत्य समीकुर्यात् । क्षीणं दोषं संवर्द्धयेत्=तद्वृद्धिहेतुभिरौषधान्नविहारैर्वर्द्धयित्वा समीकुर्यादित्यर्थः ॥ ६३९ ॥

प्रवृद्धे शमिते दोषे मध्यमः स्वयमेव हि ।
शान्तिं याति शमं नीतेऽनुबन्ध्ये त्वनुबन्धवत् ॥ ६४० ॥

*अस्यायमर्थः-वर्षासु वायुरनुबन्ध्यः सेव्यः, प्रधानमिति यावत् । पित्तश्लेष्माणावनुबन्धौ वायोरनुचरौ । शरदि पित्तमनुबन्ध्यं कफोऽनुबन्धः । वसन्ते कफोऽनुबन्ध्यो वातपित्ते अनुबन्धे । तत्र यथा—अनुबन्ध्ये प्रशमं नीतेऽनुबन्धः स्वयमेव शान्तिं याति, तथा प्रवृद्धे दोषे शमिते=ह्रासयित्वा समीकृते, मध्यमो दोषो हि=निश्चयेन स्वयमेव शान्तिं याति=प्रकृतो भवतीत्यर्थः ॥ ६४० ॥

अथ शीताङ्गादित्रयोदशसन्निपातानां क्रमेण चिकित्सा ।

तत्र शीताङ्गस्य चिकित्सामाह—

भास्वन्मूलं जीरकव्योषभार्गीव्याघ्रीशुण्ठीपुष्करं गोजलेन ।
सिद्धं सद्यः शीतगात्रार्त्तिमोहश्वासश्लेष्मोद्रेककासान्निहन्ति ॥६४१॥

*भास्वन्मूलमर्कमूलम् ॥ ६४१ ॥

कर्कोटिकाकन्दरजःकुलत्थकृष्णावचाकट्फलकृष्णजीरैः ।
किराततिक्तानलकट्फलाम्बुपथ्याभिरुद्धर्त्तनमत्र शस्तम् ॥६४२॥

*कर्कोटिकाकन्दरजः = खेखसामूलरजः ॥ ६४२ ॥

रसविषमरिचमहेशप्रियफलभस्मैकभूचतुर्वसुभिः ।
भागैर्मितमुद्धूलनमिदमधिकस्वेदशैत्यहरम् ॥ ६४३ ॥

तत्र तन्द्रिकस्य चिकित्सामाह—

क्षुद्राऽमृतापौष्करनागराणि शृतानि पीतानि शिवायुतानि ।
शुण्ठीकणाऽगस्तिरसोषणानि नस्येन तन्द्राविजयोल्वणानि ॥६४४॥

मरिचकचपचम्पचावचारुक्क्रिमिहरनागरशर्वरीगवाद्यः ।
छगलकजलकल्किता नितान्तं नसि निहिता ननु तन्द्रिकं जयन्ति ॥६४५॥

*कचः = बालकः । पचम्पचा = दारुहरिद्रा । रुक् = कुष्ठम् । क्रिमिहरः = विडङ्गः । शर्वरी = हरिद्रा । गवाक्षी = इन्द्रवारुणी । नसि = नासिकायाम् ॥ ६४५ ॥

तुरङ्गलालालवणोत्तमेन्दुमनःशिलामागधिकामधूनि ।
नियोजितान्यक्षिणि निश्चितं च तन्द्राञ्च निद्राञ्च निवारयन्ति॥६४६॥

*लवणोत्तमं = सैन्धवम् । इन्दुः = कर्पूरः । निद्राम् = अतिनिद्राम् ॥ ६४६ ॥

अथ प्रलापकस्य चिकित्सामाह–

सतगरवरतिक्तारेवताम्भोदतिक्तानलदतुरगगन्धाभारतीहारहूराः ।
मलयजदशमूलीशंखपुष्पीसुपक्वाः प्रलपनमपहन्युः पानतो नातिदूरात्६४७

*वरतिक्तोऽत्र पर्पटो न तु महानिम्बस्तन्त्रान्तरानुरोधात् । नलदं = लामज्जकं, तदलाभादुशीरं ग्राह्यम् । भारती = ब्राह्मी "बरम्भी" इति लोके । हारहूरा = द्राक्षा ॥ ६४७ ॥

सान्त्वनैरञ्जनैस्तीक्ष्णैर्नस्यैस्तिमिरसेवनैः ।

सर्वतो विकृतं चित्तमस्य प्रकृतिमानयेत् ॥ ६४८ ॥

अथ रक्तष्ठीविसन्निपातस्य चिकित्सामाह—

रोहिषधन्वयवासकवासापर्पटगन्धलताकटुकाभिः ।
शर्करया सममेष कषायः क्षतजष्ठीविन उद्यदुपायः ॥ ६४९ ॥

*रोहिषं=सुगन्धतृणविशेषः । "रोहिस" इति लोके । गन्धलता=प्रियङ्गुः ॥ ६४६ ॥

पद्मकचन्दनपर्पटमुस्तं जातिकजीवकचन्दनवारि ।
क्लीतकनिम्बयुतं परिपक्वं वारि भवेदिह शोणितहारि ॥६५०॥

*क्लीतकं=यष्टीमधुकम् । इह=रक्तष्ठीविनि ॥ ६५० ॥

मधुकमधूकपरूषकपाथश्चन्दनपल्लवदारुसनाथः ।
श्रीपर्णीफलशीतकषायः ससित इह स्यादस्रजयाय ॥६५१॥

*पाथः=बालः । पल्लवं=पत्रकम् । सनाथः=सप्रधानः । श्रीपर्णीफलं=गाम्भारीफलम् ॥ ६५१ ॥

अथ भुग्ननेत्रस्य चिकित्सामाह—

तुरङ्गगन्धालवणोग्रगन्धामधूकसारोषणमागधीभिः ।
बस्ताम्बुशुण्ठीलशुनान्विताभिर्नस्यं कृशं भुग्नदृशं करोति ॥६५२॥

अथाभिन्यासस्य चिकित्सा ।

तत्र शृङ्ग्यादिक्वाथमाह—

शृङ्गीभार्ग्यभयाऽजाजीकणाभूनिम्बपर्पटैः ।
देवदारुवचाकुष्ठयासकट्फलनागरैः ॥ ६५३ ॥
मुस्तधान्याकतिक्तेन्द्रयवपाठाहरेणुभिः ।
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकैः ॥ ६५४ ॥
विशालारग्वधारिष्टशटीवाकुचिकाफलैः ।
विडङ्गरजनीदार्वीयवानीद्वयसंयुतैः ॥ ६५५ ॥
समांशैर्विहितः क्वाथो हिङ्ग्वार्द्रकरसान्वितः ।
अभिन्यासज्वरं घोरं हन्ति तन्द्राञ्च तत्क्षणात् ॥ ६५६ ॥
प्रमेहं कर्णशूलञ्च सन्निपातांस्त्रयोदश ।
हिक्कां श्वासञ्च कासञ्च तथा सर्वानुपद्रवान् ॥ ६५७ ॥

अथ जिह्वकस्य चिकित्सा ।

तत्र किरातादिकवलमाह—

किराततिक्ताकुलकृत्कुलिङ्गीकर्पूरकृष्णाकटुतैलयुक्तः ।
अम्लद्रवः संशमयेद्रसज्ञादोषान्स्तुतो दाशरथिर्यथाऽत्र ॥६५८॥

*आकुलकृत् = "अकरकरहा" इति लोके । अम्लद्रवः = बीजपूराद्रसः ॥ ६५८ ॥

अथ शालूरपर्ण्याद्यवलेहमाह—

शालूरपर्णी मालूरमूलामयमधुप्लुता ।
शङ्खपुष्पीसहिता सेव्या वाचां विशुद्धये ॥ ६५९ ॥

*शालुरपर्णी = ब्राह्मी, मालूरमूलं = बिल्वमूलम् , आमयः = कुष्ठम् ६५९

अथ क्षुद्राऽऽदिविश्वाऽऽदिक्राथावाह—

क्षुद्रानागरपुष्करामृतलताब्राह्मीवचासुव्रता-
भार्गीवासकयासतोयसुरसाक्राथो जयेज्जिह्वकम् ।
विश्वावर्मविभावरीयुगवरावत्सादनीवारिद-
व्याघ्रीनिम्बपटोलपुष्करजटारुग्दारुभिर्वा कृतः ॥ ६६० ॥

*पुष्करं = पुष्करमूलम् , तथा चामरसिंहः-

"मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे"।

सुव्रता = गन्धपलाशी, काश्मीरे प्रसिद्धा । सुरसा = तुलसी । विश्वाऽऽदियोगान्तरम् । वर्म = पर्पटः । विभावरीयुगं = हरिद्रा दारुहरिद्रा च । वरा = त्रिफला । वत्सादनी = गुडूची । व्याघ्री = कण्टकारिका ॥ ६६० ॥

अथ सन्धिकसन्निपातस्य चिकित्सामाह—

शटीसुरतरूत्तमास्थविरदारुरास्नाः समाः-
सनागरसुधाऽन्विताः पिब शतावरीसंयुताः ।
मृदुज्वलनपाचिताः सह पुरेण सन्धिग्रह-
व्यथाऽपहृतये वृथा शिशिरसेवनं मा कृथाः ॥ ६६१ ॥

*उत्तमा = त्रिफला । स्थविरदारु = "विधारा" इति लोके । सुधा = गुडूची । पुरो = गुग्गुलुः ॥ ६६१ ॥

वचाकवचकच्छुरासहचरामृताभङ्गुरा-
सुराह्वघननागरातरुणदारुरास्नापुराः ।
वृषातरुणभीरुभिः सह भवन्ति सन्धिग्रह-
व्यथोरुजाडमक्लमभ्रमणपक्षघातद्रुहः ॥ ६६२ ॥

*कवचः=पर्पटकः । कच्छुरा=यवासः । भङ्गुरा=अतिविषा । सुराह्वो=देवदारु । अतरुणदारु=वृद्धदारु । पुरो=गुग्गुलुः । वृषा=बृहद्दन्ती, एरण्डवत्पत्रविटपा, तदलाभे दन्ती च ग्राह्या समानगुणत्वात् । तरुणः=एरण्डः । भीरुः=शतावरी ॥ ६६२ ॥

सुरदारुशटीसुधालतासुवहाशुण्ठ्यमृताः शृता जले ।
सपुराः शमयन्ति सेविताः सततं सन्धिगतं सदागतिम् ६६३
मुस्तैरण्डप्राणदावाणदारुच्छिन्नारास्नाभीरुकर्चूरतिक्ताः ।
वासाविश्वापञ्चमूलाश्वगन्धा हन्युर्मन्यास्तम्भसन्धिग्रहार्त्तीः ।६६४।

*प्राणदा=हरीतकी । वाणः=नीलपुष्पसहचरः । तिक्ता=कटुकी ॥ ६६४ ॥

अथान्तकज्वरस्य चिकित्सामाह—

इहापहाय व्रतमुष्णवारि ज्वरारियूषादि गदापहारि ।
ज्वरच्छिदं जीवितदञ्च नित्यं मृत्युञ्जयं चेतसि चिन्तयस्व ॥६६५॥

*इह=अन्तके । व्रतं=लङ्घनादिनियमम् ॥ ६६५ ॥

कर्पूरप्रकरावदातवपुषं संयोगमुद्राजुषं-
शश्वद्भक्तजनेषु भावुकजुषं भालस्फुरच्चक्षुषम् ।
सम्पूर्णामृतकुम्भसम्भृतकरं शुभ्राक्षमालाधरं-
पिङ्गोत्तुङ्गजटाकलापरुचिरं चन्द्रार्द्धमौलिं स्तुहि ॥६६६॥
भिषग्भिरिति निर्णीतं सन्निपातेऽन्तकाभिधे ।
भेषजं जाह्नवीनीरं वैद्यो गोविन्द एव हि ॥ ६६७ ॥

अथ रुग्दाहस्य चिकित्सा ।

तत्र षडङ्गपानीयमाह—

उशीरचन्दनोदीच्यद्राक्षाऽऽमलकपर्पटैः ।
शृतं शीतं जलं दद्याद्दाहतृड्ज्वरशान्तये ॥ ६६८ ॥

अथ धान्याकक्काथमाह—

ससितो निशि पर्युषितः प्रातर्धान्याकतण्डुलक्काथः ।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम् ॥ ६६६ ॥

*धान्याकतण्डुलाः=कण्डितधान्याकबीजानि ॥ ६६६ ॥

अथ पथ्याऽवलेहमाह—

पथ्यां तैलघृतक्षौद्रैर्लिह्याद्दाहविनाशिनीम् ॥ ६७० ॥

*"पथ्यां तैलघृतक्षौद्रैरि"त्यत्र न समुच्चयः । तेन केवलेन मधुनाऽपि लिह्यात् ॥ ६७० ॥

अथ लेपमाह—

प्रशमयति दाहमचिराद्दधियुक्तकर्कन्धुपल्लवैर्लेपः ।
लेपो हिमकरमलयजनिम्बदलैस्तक्रपिष्टैर्वा ॥ ६७१ ॥

*हिमकरः=कर्पूरः । तथा च "घनसारश्चन्द्रसंज्ञः" इत्यमरः॥६७१॥

अथ जलधारामाह—

उत्तानसुप्तस्य गभीरताम्रकांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ती निहन्ति दाहं त्वरितं ज्वरञ्च ॥६७२॥

अथावगाहनमाह—

शीताम्भसा तु शतशश्च विलोडितेन
गव्येन चन्दनयुतेन घृतेन दिग्ध्वा ।
दाहज्वरी सकमलोत्पलमाल्यधारी
क्षिप्रं विशेत्सलिलकोष्ठमनल्पकालम् ॥ ६७३ ॥

अथावगुण्ठनमाह—

काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम् ।
अथ गोतक्रसंस्विन्नशीतलीकृतवाससा ॥ ६७४ ॥

अथान्नमाह—

दाहवम्यर्दितं क्षामं निरन्नं तृष्णयाऽन्वितम् ।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥ ६७५ ॥

*लाजसक्तुरूपं तर्पणम् ॥ ६७५ ॥

अथ दाहनाशकान्योपायानाह—

वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः ।

नार्यश्चन्दनदिग्धाङ्गयो दाहदैन्यहरा मताः ॥ ६७६ ॥
मुक्तावलीचन्दनशीतलानां सुगन्धपुष्पाम्बरभूषितानाम् ।
नितम्बिनीनां सुपयोधराणामालिङ्गनान्याशु हरन्ति दाहम् ॥६७७॥
प्रह्लादश्चास्य विज्ञाय ताः स्त्रीरपनयेत्पुनः ।
हितश्च भोजयेदन्नं येनाप्नोति सुखं महत् ॥ ६७८ ॥
*प्रह्लादं=कामकृतहर्षम् ॥ ६७८ ॥

अथ चित्तभ्रमस्य चिकित्सामाह—

कणोषणोग्रालवणोत्तमानि करञ्जबीजं प्रमदामलानि ।
पथ्याऽक्षसिद्धार्थकहिङ्गुशुण्ठीयुतानि बस्ताम्बुविमिश्रितानि ॥६७९॥
पिष्ट्वा गुटीयं नयने निधेया प्रचेतनेऽतिप्रथितान्वितार्था ।
चित्तभ्रमाय स्मृतिभूतदोषे शिरोऽक्षिरोगभ्रमनाशहेतुः ॥ ६८० ॥
*बस्ताम्बु=छागमूत्रम् ॥ ६७९–६८० ॥
कुम्भोद्भवतरोरम्भो गुडविश्वकणाऽन्वितम् ।
निहितं नसि नूनं स्याच्चित्तभ्रमविनाशनम् ॥ ६८१ ॥
*कुम्भोद्भवतरोरम्भः=अगस्तिवृक्षत्वक्कल्करसः ॥ ६८१ ॥
मुरामूर्द्धजमेघाह्वमधूकमलयोद्भवैः ।
मरुत्तरुमधून्मिश्रैः पुरपाणिजपांशुभिः ॥ ६८२ ॥
लोहलामज्जकैलाभिर्धूपश्चित्तभ्रमापहः ।
ग्रहदोषहरः श्रीदः सौभाग्यकर उत्तमः ॥ ६८३ ॥
*मुरा=एकाङ्गी । मूर्द्धजा=बालाः । मरुत्तरुः=देवदारु । पुरः=गुग्गुलुः । पाणिजः=नखः । पांशु=पर्पटकम् । लोहम्=अगुरु । लामज्जकम्=उशीरवत्पीततृणविशेषः, तदलाभ युशीरं ग्राह्यम् ॥ ६८२–६८३ ॥

मृद्वीकाऽमरदारुमत्स्यशकलामुस्तामलक्योऽमृता–
पथ्यारेवतरामसेनकरजोराजीफलैः संयुताः ।
हन्युश्चित्तरुजोऽथ दर्दुरदलापाठापटोलीपयः–
पथ्यापर्पटराजवृक्षकटुकाशम्बूकपुष्प्यः शृताः ॥ ६८४ ॥
*मृद्वीका=द्राक्षा । मत्स्यशकला=कटुकी । आरेवतः=आर

ग्वधः। रामसेनकः=किराततिक्तकः। रजः=पर्पटकः। राजीफलः=पटोलः। अथ योगान्तरमाह—दर्दुरदला=मण्डूकपर्णी सा च ब्राह्मी, मञ्जिष्ठा, शोणकश्च। तथाऽप्यत्र ब्राह्मी ग्राह्या। यत उक्तं द्रव्यगुणग्रन्थे—

*"ब्राह्मी मतिप्रदा मेध्या ज्वरहन्त्री रसायनी।"

*ब्राह्मी="वरम्भी"ति लोके। पयः=वालकम्। राजवृक्षः=आरग्वधः। शम्बूकपुष्पी=शङ्खपुष्पी॥ ६८४॥

अथ कर्णिकसन्निपातचिकित्सामाह—

प्रलेपस्तमस्तं नयत्यल्पमेकः समुद्रिक्तशोथश्च रक्तावशेषः।
पक्के च शस्त्रक्रिया पूयजित्सा व्रणत्वं गते चोचिता तच्चिकित्सा॥६८५॥

*अयमर्थः—अल्पं=कर्णिकम्, एकः प्रलेपः, अस्तं=नाशं नयति। तच्चिकित्सा=व्रणचिकित्सा॥ ६८५॥

निशाविशालाऽऽमयमाणिमन्थदार्वीङ्गुदीमूलकृतः प्रलेपः।
प्रभाकरक्षीरयुतः प्रभावाद्द्वयस्तः समस्तोऽप्यथ कर्णिकघ्नः॥६८६॥

कुलत्थः कट्फलं शुण्ठी कारवी च समांशकैः।
सुखोष्णैर्लेपनं कार्यं कर्णमूले मुहुर्मुहुः॥ ६८७॥
गैरिकं कठिनी शुण्ठी कट्फलारग्वधैः समैः।
उष्णैः काञ्जिकसम्पिष्टैर्लेपः कर्णकमूलनुत्॥ ६८८॥
शिग्रुराजिकयोः कल्कं कर्णमूले प्रलेपयेत्।
कर्णमूलभवः शोथस्तेन लेपेन शाम्यति॥ ६८९॥

अशिशिरजलपरिमृदितं मरिचकणाजीरसिन्धुजं त्वरितम्।
नस्यविधिसेवितं ननु कर्णकरुङ्नाशकृद्गदितम्॥ ६९०॥
भार्गीजयापौष्करकण्टकारीकटुत्रिकोग्राघनकुण्डलीभिः।
कुलीरशृङ्गीकटुकारसाभिः कृतः कषायः किल कर्णकघ्नः॥६९१॥

*भार्गी=भारङ्गी "बभनेटी" इति लोके। तदलाभे कण्टकारीमूलं ग्राह्यम्। जया="गनिआरी" इति लोके। पौष्करं=पुष्करमूलम्। उग्रा=वचा। कुण्डली=गुडूची। कुलीरशृङ्गी=कर्कटशृङ्गी। रसा=रास्ना॥ ६९१॥

दशमूलमत्स्यशकलाचपलात्रिफलामहौषधकिराततयुतम् ।
मरिचं परिकथितमाशु बलादपहन्ति कर्णरुजः सकलाः ॥ ६९२ ॥
*चपला = पिप्पली ॥ ६९२ ॥

अथ कण्ठकुब्जचिकित्सामाह—

फलत्रिकत्र्यूषणमुस्तकटूवीकलिङ्गसिंहाननशर्वरीभिः ।
क्वाथः कृतः कृन्तति कण्ठकुब्जं कण्ठीरवः कुञ्जरमाशु तद्वत् ॥६९३॥
*सिंहाननो = वासकः । शर्वरी = हरिद्रा ॥ ६९३ ॥

किराततिक्ताकणाकुटजकण्टकारीशटी-
कलिद्रुकिलिमाभयाकटुककट्फलाम्भोधरैः ।
विषाऽऽमलकपुष्करानलकुलीरश्रृङ्गीवृषै-
र्महौषधसखैरयं जयति कण्ठकुब्जं गणः ॥ ६९४ ॥

*शटी = कच्चूरः । कलिद्रुः = बिभीतकः । किलिमं = देवदारु । कटुकं = मरिचम् । विषा = अतिविषा । किरातादिभिः किंविशिष्टै-र्महौषधसखैः = महौषधस्य सखिभिः । तेन एतैः सहितेन महौषधेने-त्यर्थः। अथ वोल्वणवातादिप्रवृद्धमध्यक्षीणवातादिहेतुकानां कुम्भी-पाकादीनां सन्निपातज्वराणां त्रयोदशानां चिकित्साऽभिधीयते, सा च तुल्यहेतुकानां विस्फारकादीनां त्रयोदशानामिवाभिधातव्या ॥६९४॥

इति सन्निपातज्वराधिकारः समाप्तः ।

अथागन्तुकज्वराधिकारः ।

तत्रागन्तुज्वरनिदानमाह—

अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः ।
आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत् ॥ ६९५ ॥

*अभिघातः = शस्त्रमुष्टिलगुडादिभिर्हननम् । अभिषङ्गः = कामशोकभयक्रोधभूतादीनामावेशः । अभिचारः = कृत्याऽऽद्युत्पादनम् । अभिशापः = ब्राह्मणगुरुवृद्धसिद्धादिकृतः शापः । तम् = आगन्तुज्वरम् । यथास्वं = यथादोषलक्षणम् । दोषैर्विभावयेद् = विजानीयात् ॥६९५॥

अथागन्तुकज्वरान्यनिदानमाह—

ये भूतविषवाय्वग्निक्षतभङ्गादिसम्भवाः ।

रागद्वेषभयाद्यैश्च ते स्युरागन्तवो गदाः ॥ ६९६ ॥

*भयाद्यैरित्याद्यशब्देन भूतविषवाय्वग्निक्षतभङ्गादयः संगृह्यन्ते । तेन रागादयो भङ्गाद्यन्ताः, ते हेतवोऽप्यागन्तुसंज्ञाः स्युः, कार्यकारणयोरभेदोपचाराद्, एतेन "आगन्तुजः स्मृत" इत्यत्राप्यागन्तुशब्दो हेतुवाची "आगन्तुर्जायते दोषैरि"त्यत्र व्याधिवाची। "अभिघाताभिषङ्गाभ्यामि"त्यादिश्लोके "दोषैर्यथास्वं तं विभावयेदि"ति वचनेनैव प्रतीयते, अभिघातादीनां विप्रकृष्टकारणत्वं मिथ्याऽऽहारविहाराणामिव दोषाणां सन्निकृष्टकारणत्वं, तथा सति "दक्षापमान संक्रुद्धरुद्रे"त्यादिश्लोके आगन्तुज्वरस्याष्टमत्वविघातो दोषजेष्वेव प्रवेशाद् । उच्यते–आगन्तुज्वरस्य दोषा आरम्भका न, किन्तु पश्चादनुबन्धिनः । तथा चागन्तुज्वरस्य संप्राप्तिमाह चरकः—"आगन्तुर्हि व्यथापूर्वो जायते पश्चान्निजैर्दोषैरनुबध्यते" इति ॥ ६९६ ॥

अथ कस्यागन्तोः को निजो दोष इत्यपेक्षायामाह—

कामशोकभयाद्वायुः क्रोधात्पित्तं त्रयो मलाः ।
भूताभिषङ्गात्कुप्यन्ति भूतसामान्यलक्षणाः ॥ ६९७ ॥

*कामशोकभयात् = कामशोकभयजादागन्तोर्वायुः कुप्यति । क्रोधात्पित्तं = क्रोधजादागन्तोः पित्तं प्रकुप्यति । भूताभिषङ्गाद् = भूतावेशजादागन्तोस्त्रयो मलाः = दोषाः कुप्यन्तीत्यर्थः । भूतसामान्यलक्षणाः = भूतस्य भूतलक्षणस्य सामान्यं समानता येषां तानि भूतसामान्यानि लक्षणानि येषां ते भूतसामान्यलक्षणा मलाः ॥ ६९७ ॥

अथागन्तुज्वराणां हेतुभेदेन लक्षणभेदानाह—

श्यावास्यता विषकृते तथाऽतीसार एव च ।
भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया ॥ ६९८ ॥

*विषकृते = स्थावरजङ्गमविषभक्षणकृते ज्वरे। मुखे श्यावः शुक्लानुविद्धः कृष्णो वर्णः शाकवर्णो वा । अतीसारः = स्थावरविषेणैव तस्याधोगामित्वात् । तोदः = सूचीव्यधनेनेव व्यथा ॥ ६९८ ॥

ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा ।
कामजे चित्तविभ्रंशस्तन्द्राऽऽलस्यमभोजनम् ॥

हृदये वेदना चास्य गात्रञ्च परिशुष्यति ॥ ६९८ ॥

*कामजे=समीहितकान्ताऽऽद्यप्राप्तिनिमित्तके ज्वरे। चकाराद्वाग्भटोक्तान्यपि लक्षणानि बोद्धव्यानि। तानि यथा—

*"कामाद् भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयाः" ॥ १०० ॥

इति ॥ ६९९ ॥

मूर्च्छाऽङ्गमर्दस्तृण्नेत्रचापल्यं कुचवक्त्रयोः।
स्वेदः स्याद्धृदि दाहश्च स्त्रीणां कामज्वरे भवेत् ॥ ७०० ॥

*इदमपि कुत्रापि कथितमत्र पुनः ॥ ७०० ॥

अथ कामज्वरस्य चिकित्सामाह—

बालकं शतपत्राणि गन्धसारमुशीरकम्।
चोचधान्येयकं मांसी क्राथः कामज्वरापहः ॥ ७०१ ॥
सन्ध्यायां संस्तरः कार्यः सुगन्धैः कुसुमैर्भृशम्।
क्रीडनीयं स्वकान्तेन सह रात्रौ तथा स्त्रिया ॥ ७०२ ॥

अथ भयादिजज्वराणां विशेषलक्षणान्याह—

भयात्प्रलापः शोकाच्च भवेत्कोपाच्च वेपथुः ॥ ७०३ ॥

*भयाद्=भयजे ज्वरे प्रलापः। शोकाच्च=चकारेण प्रलाप एवानुकृष्यते। कोपाच्च=कोपादपि वेपथुर्भवति। ननु वेपथुर्वातस्य धर्मस्तत् कथं क्रोधजे ज्वरे वेपथुः। यत उक्तम्—"क्रोधोत्थितं पित्तमि"ति।

*"एकः प्रकुपितो दोष इतरानपि कोपयेत्"।

*इति वचनात्पित्तकोपितवातजन्य एवात्र वेपथुः। क्रोधाद्वायुरपि भवति। यत उक्तं विदेहेन—

"क्रोधशोकौ स्मृतौ वातपित्तरक्तप्रकोपणौ" ॥१०१॥इति॥७०३॥

भूताभिषङ्गादुद्वेगो हास्यरोदनकम्पनम्।
केचिद्भूताभिषङ्गोत्थं ब्रुवतेऽविषमज्वरम् ॥ ७०४ ॥

*भूताभिषङ्गोत्थो विषमज्वरो भवति, कदा चिद्वेगवान् कदा चिच्छान्तवेग इत्यर्थः ॥ ७०४ ॥

अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते ॥ ७०५ ॥

*तृष्णा चेति चकारेण हारीतानुवादिवाग्भटोक्तश्च बोद्धव्यम्। तद्यथा—

*तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते।
पूर्वं मनस्ततो देहस्ततो विस्फोटतृड्भ्रमैः॥
सदाहमूर्च्छाग्रस्तस्य प्रत्यहं बर्द्धते ज्वरः। १०२॥ इति ॥७०५॥

अथागन्तुज्वराणां चिकित्सामाह—

आगन्तुजे ज्वरे नैव नरः कुर्वीत लङ्घनम् ॥ ७०६ ॥

*तथा च वाग्भटः—

*शुद्धवातक्षयागन्तुजीर्णज्वरिषु लङ्घनम् ॥ १०३ ॥
*नेष्यत इति शेषः ॥ ७०६ ॥

अन्यच्च—

लङ्घनं न हितं कामशोकचिन्ताप्रहारजे।
भयभूतश्रमक्रोधलङ्घनैश्च कृते ज्वरे॥
किन्त्वग्नौ दीपिते तत्र दद्यान्मांसरसौदनम्।
अभिघातज्वरे युञ्ज्यात्क्रियामुष्णविवर्जिताम् ॥ ७०७ ॥
कषायं मधुरं स्निग्धं यथादोषमथापि च।
अभिघातज्वरो नश्येत्पानाभ्यङ्गेन सर्पिषः॥
रक्तावसेकैर्मेध्यैश्च तथा मांसरसौदनैः ॥ ७०८ ॥

*मेध्यैः=मेधायै हितैः ॥ ७०८ ॥

व्यधबन्धश्रमात्यध्वभङ्गभ्रंशसमुद्भवान्।
ज्वरानुपाचरेत्पूर्वं क्षीरमांसरसौदनैः ॥ ७०९ ॥

*व्यधः=ताडनं कर्णादिवेधो वा। भङ्गः=छेदभेदादिकः। भ्रंशो=वृक्षादितः पतनम ॥ ७०९ ॥

अध्वश्रान्तेषु वाऽभ्यङ्गं दिवा निद्राञ्च कारयेत् ॥ ७१० ॥
ओषधीगन्धविषजौ विषपित्तप्रबाधनैः।
जयेत्कषायैर्मतिमान्सर्वगन्धकृतैर्भिषक् ॥ ७११ ॥

अथ सर्वगन्धमाह—

चातुर्जातककर्पूरं कङ्कोलागुरुकुङ्कुमम्।
लवङ्गसहितञ्चैव सर्वगन्धं विनिर्दिशेत् ॥ ७१२ ॥

क्रोधजे पित्तजित्कार्यं धार्यं सद्वाक्यमेव च ।
आश्वासेनेष्टलाभेन वायोः प्रशमनेन च ॥ ७१३ ॥
हर्षणैश्च शमं यान्ति कामक्रोधभयज्वराः ।
कामैरथ मनोज्ञैश्च पित्तघ्नैश्चाप्युपक्रमैः ॥
सद्वाक्यैश्च शमं याति ज्वरः क्रोधसमुत्थितः ॥ ७१४ ॥

*कामैः=कामविषयैः । मनोज्ञैः=धिक्कारादिभिर्भयजनकवचनैर्वा ॥ ७१४ ॥

कामात्क्रोधज्वरो नश्येत्क्रोधात्कामज्वरस्तथा ।
घातिताभ्यामुभाभ्याञ्च कामक्रोधज्वरक्षयः ॥ ७१५ ॥

*घातिताभ्यामुभाभ्यां=मनसि निगृहीताभ्यां कामक्रोधाभ्याम् ॥ ७१५ ॥

भूतविद्यासमुद्दिष्टैर्बन्धावेशनताडनैः ।
जयेद्भूताभिषङ्गोत्थं मनःशान्त्यै च मानसम् ॥ ७१६ ॥

*ताडनैरित्यस्य स्थाने केचित्पूजनैरिति पठन्ति । ७१६ ॥

सहदेवाया मूलं विधिना कण्ठे निबद्धमपहरति ।
एकद्वित्रिचतुर्भिर्दिवसैर्भूतज्वरं पुंसाम् ॥ ७१७ ॥
अभिचाराभिशापोत्थौ ज्वरौ होमादिभिर्जयेत् ।
दानस्वस्त्ययनातिथ्यैरुत्पातग्रहदुष्टिजौ ॥ ७१८ ॥

इत्यागन्तुज्वराधिकारः ।

अथ विषमज्वराधिकारः ।

तत्र विषमज्वरसम्प्राप्तिमाह—

दोषोऽल्पोऽहितसम्भूतो ज्वरोत्सृष्टस्य वा पुनः ।
धातुमन्यतमं प्राप्य करोति विषमज्वरम् ॥ ७१९ ॥

*तत्र विषमज्वरस्य निदानकथनपूर्विकां संप्राप्तिमाह—दोष इति । अयमर्थः—ज्वरोत्सृष्टस्य=ज्वरेण त्यक्तस्य । सन्निकृष्टहेतुमाह—दोषोऽल्पः=ज्वरमुक्तः स्वल्पोऽपि । विप्रकृष्टहेतुमाह—अहितम्=आहारविहारादि तेन सम्भूतः=सम्पूर्णो जातः । अन्यतमं धातुं=रसरक्तादिकम्, प्राप्य=दूषयित्वा, पुनर्विषमज्वरं करोति । ज्वरोत्सृष्ट-

स्य वेति । वाशब्देनेति बोध्यते, प्रथमतो विषमज्वरो भवति । यत उक्तम्—"आरम्भाद्विषमो यस्त्वि"त्यादि ॥ ७१६ ॥

अथ रसादिधातुविशेषेण विषमज्वरविशेषानाह—

सन्ततं रसरक्तस्थः सततं रक्तधातुगः ।
दोषः क्रुद्धो ज्वरं पुंसां सोऽन्येद्युः पिशिताश्रितः ॥ ७२० ॥
मेदोगतस्तृतीयेऽह्नि अस्थिमज्जगतः पुनः ।
कुर्य्याच्चातुर्थिकं घोरमन्तकं रोगसङ्करम् ॥ ७२१ ॥

*अन्तकमिव मारकत्वात् ॥ ७२०–७२१ ॥

अथ विषमज्वरस्य सामान्यलक्षणमाह—

यः स्यादनियतात्कालाच्छीतोष्णाभ्यां तथैव च ।
वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः ॥ ७२२ ॥

*यस्त्वनियतात्कालात्स्यादित्यस्यायमर्थः—यथा वातिको ज्वरः-सप्तदिनानि, पैत्तिको दशदिनानि, श्लैष्मिको द्वादशदिनानि । दोषाणां प्राबल्यैर्वातिकश्चतुर्दशदिनानि पैत्तिको विंशतिदिनानि श्लैष्मिकश्चतुर्विंशतिदिनानि स्यात् । तथा विषमज्वरो नियतं कालं व्याप्य न स्यादित्यर्थः । शीतोष्णाभ्यां गुणाभ्यामपि तथा स्यात् । वेगतश्चापि विषमः=कदा चिदतिवेगवान् । कदाचिच्छान्तवेगः ॥ ७२२ ॥

अथ विषमज्वरस्य भेदानाह—

सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ॥ ७२३ ॥

अथ सन्ततज्वरस्य लक्षणमाह—

सप्ताहं वा दशाहं वा द्वादशाहमथापि वा ।
सन्तत्या योऽविसर्गी स्यात्सन्ततः स निगद्यते ॥ ७२४ ॥

*विकल्पो वातिकादिभेदात् । सन्तत्या=नैरन्तर्येण । अविसर्गी=अपरित्यागी । ननु "मुक्तानुबन्धित्वं विषमत्वमि"ति विषमलक्षणम्, तदत्र न घटत इति कथमयं विषमेषु पठ्यते । घटत एवेति न दोषः । यत उक्तं चरकेण—

*विसर्गं द्वादशे कृत्वा दिवसे व्यक्तलक्षणः ।
दुर्लभोपशमः कालं दीर्घमेवानुवर्त्तते ॥ १०४ ॥ इति ।

*यत्तु खरनादेनोक्तम्—

*ज्वराः पञ्च तु ये प्रोक्ताः पूर्वे सन्ततकादयः ।
चत्वारः सन्ततं हित्वा ज्ञेयास्ते विषमज्वराः ॥१०५॥ इति ।

*तच्चिरेण त्यागाभिप्रायेण ॥ ७२४ ॥

अथ सततज्वरस्य लक्षणमाह—

अहोरात्रे सततको द्वौ कालावनुवर्त्तते ॥ ७२५ ॥

*द्वौ कालौ=अहन्येककालं रात्रावेककालम् । यतो दोषाणामहोरात्रे प्रत्येकं द्वौ द्वौ प्रकोपकालौ । यत उक्तं वाग्भटेन—

*वयोऽहोरात्रिभुक्तानामन्तमध्यादिगाः क्रमाद् ॥ इति ।

अथान्येद्युष्कज्वरस्य लक्षणमाह—

अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तते ॥ ७२६ ॥

*एककालं=दोषापेक्षया एककालमपि द्वितीयं, प्रथमकाले हृद्येव दोषस्थितेः ॥ ७२६ ॥

अथ तृतीयज्वरचातुर्थिकज्वरयोर्लक्षणमाह—

तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ॥ ७२७ ॥

*"तृतीयेऽह्नि" इत्यागमनदिनं गृहीत्वा । यत उक्तम्—

*दिनमेकमतिक्रम्य यो भवेत्स तृतीयकः ।
दिनद्वयं त्वतिक्रम्य यः स्यात्स हि चतुर्थकः ॥१०६॥ इति ॥७२७॥

अत्र सुश्रुतप्रमाणमाह—

कफस्थानविभागेन यथासंख्यं करोति हि ।
सततान्येद्युस्तृतीयचतुर्थकप्रलेपकान् ॥
अहोरात्रादहोरात्रात्स्थानात्स्थानं प्रपद्यते ।
दोष आमाशयं प्राप्य करोति विषमज्वरम् ॥ ७२८ ॥

*अयमर्थः—आमाशयोरःकण्ठशिरःसन्धयः पञ्च कफस्थानानि, एषु तिष्ठन्दोषो यथासंख्यं सततादीन्करोति । तत्रामाशये स्थितो दोषः—सततं करोति द्वौ कालौ, अहोरात्रे कालद्वये दोषप्रकोपात् । हृदये स्थितो दोष आमाशयमागत्य अन्येद्युष्कं करोति । एक कालं नैकदैकस्मिन्नेवाहोरात्रे दोष आमाशयमागत्य अन्येद्युष्कं करोति । तत्र द्वौ दोषप्रकोपकालौ, एकस्मिन्काले हृदये तिष्ठति अपरस्मिन्नामाशय इति । कण्ठे

स्थितो दोषोऽहोरात्राद्धृदयमायाति । तृतीये दिने आमाशयमागत्य स्वप्रकोपकाले तृतीयं ज्वरं करोति, एक कालं न तु द्वौ कालौ स्वभावाद् । एवमेव शिरःस्थितो दोषोऽहोरात्रात्कण्ठमायाति । ततः पुनरहोरात्राद्धृदयमायाति चतुर्थे दिने आमाशयमागत्य स्वप्रकोपकाले चतुर्थकं ज्वरं करोति एककालं न तु द्वौ कालौ स्वभावादेव । ननु दोषस्यागमनं क्रमेण निजस्थानगमनक्रमात्कथं तृतीयचतुर्थदिवसयोर्ज्वरागमनम् ? उच्यते,—दोषो हि प्रकोपसमये वेगं परित्यज्य लाघवात्स्वस्थानन्तु वेगदिन एव याति । यत आह—

*दोषः प्रकोपकाले हि वेगवत्त्वेन लाघवात् ।
वेगवासर एवायं स्वस्थानमधिगच्छति ॥१०७॥

*सन्धिषु स्थितो दोषः प्रलेपकं करोति । सन्धयश्चामाशयेऽपि सन्ति तेषु स्थितः प्रलेपकं सर्वदा करोति ॥ ७२८ ॥

निवृत्तः पुनरायाति विषमो नियते दिने ।
स्वभावं कारणं तत्र मन्यन्ते मुनिपुङ्गवाः ॥ ७२६ ॥

*स्वभावस्य कारणत्वे कफस्थानविभागनिरपेक्षाश्चतुर्थकादिविपर्यया अपि ज्वराः स्वस्वकाले प्रभवन्ति ॥ ७२९ ॥

अधिशेते यथा भूमिं बीजं काले प्ररोहति ।
अधिशेते तथा धातून्दोषः काले प्रकुप्यति ॥ ७३० ॥

सुश्रुतोऽप्याह—

स चापि विषमो देहं न कदा चित्प्रमुञ्चति ।
ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते ॥ ७३१ ॥
वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते ।
धात्वन्तरेषु लीनत्वात्सौक्ष्म्यान्नैवोपलभ्यते ॥ ७३२ ॥

अथ द्विदोषोल्वणतृतीयकज्वरस्य लक्षणमाह—

कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः ।
वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ॥ ७३३ ॥

*त्रिकग्राही=वेदनया त्रिकं गृह्णातीत्यर्थः । वातकफात्मकः पृष्ठाद्=व्यथया पृष्ठं व्याप्य भवतीत्यर्थः । "ल्यब्लोपे कर्मण्यधिकरणे

च्चे"ति सूत्रेण पञ्चमी ॥ ७३३ ॥

अथ कफोल्वणस्य वातोल्वणस्य च चतुर्थकज्वरस्य लक्षणमाह—

चतुर्थको दर्शयति स्वभावं द्विविधं ज्वरः ।
जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरसोऽनिलसम्भवः ॥ ७३४ ॥
मध्यकायन्तु गृह्णाति पूर्वं यस्तु स पित्तजः ।
विषमज्वर एवान्यश्चतुर्थकविपर्ययः ॥ ७३५ ॥

*श्लैष्मिकः=श्लेष्मोल्वणः । तथाऽनिलसम्भवो वातोल्वणः । सन्ततादीनां त्रिदोषजत्वम् । यत उक्तं चरके—

*'प्रायशः सन्निपातेन पंच स्युर्विषमज्वराः' ॥१०८॥ इति ।

*"प्रायशोग्रहणादेकदोषजा द्विदोषजा अपि भवन्ती"ति जैयटः । पूर्वं=प्रथमं । जङ्घाभ्याम्=व्यथया जङ्घे व्याप्य पश्चात् सकलं-शरीरं व्याप्नोति । एवमुल्वणवातजातः शिरसः=पूर्वं व्यथया शिरो-व्याप्य सकलं शरीरं व्याप्नोतीत्यर्थः । अन्यः=सन्ततादिपञ्चकाद्-परः ॥ ७३४-७३५ ॥

अथ चतुर्थकविपर्ययाद्यन्यविषमज्वराणां लक्षणमाह—

अस्थिमज्जगतो दोषश्चतुर्थकविपर्ययः ।
जायते भिषजा ज्ञेयो विषमज्वर एव सः ॥ ७३६ ॥
स मध्ये ज्वरयत्यह्नि आद्यन्ते च विमुञ्चति ॥ ७३७ ॥

*चतुर्थकविपर्ययाख्यो ज्वरः सोऽपि विषमज्वर एव वैद्येन ज्ञातव्यः । स किंधातुस्थ इत्यपेक्षायामाह—अस्थीत्यादि । चतुर्थकविपर्ययइत्युपलक्षणम् । सततादिविपर्ययोऽपि बोद्धव्यः । यथा—अहोरात्रे द्वौ कालौ मुञ्चति शेषं सर्वमहोरात्रं तिष्ठतीति सततविपर्ययः । अहोरात्रे एककालं मुञ्चति शेषं सर्वमहोरात्रं तिष्ठतीत्यन्येद्युष्कविपर्ययः । मध्ये एकं दिनं ज्वरं जनयति, आदावन्ते च दिने मुञ्चतीति तृतीयकविपर्ययः । एते विषमज्वरोपलक्षकाः, अन्ये रात्रिज्वरादयोऽपि विषमज्वरा बोद्धव्याः । यथा—

*समौ वातकफौ यस्य क्षीणपित्तस्य देहिनः ।
रात्रौ प्रायो ज्वरस्तस्य दिवा हीनकफस्य तु ॥ १०९ ॥

*प्रायो = बाहुल्येन ॥ ७३६-७३७ ॥

अथ सन्ततादिज्वरे प्रथमं कस्य चिच्छीतं कस्य चिद्दाह उत्पद्यत इत्यत्र हेतुमाह—

त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरम् ।
तयोः प्रशान्तयोः पित्तमन्तर्दाहं करोति च ॥ ७३८ ॥

*शीतं = शीतसहितम् । प्रशान्तयोः = प्रशान्तवेगयोः । अन्तः = अभ्यन्तरे ॥ ७३८ ॥

करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च ।
तस्मिन्प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ॥ ७३९ ॥

*अन्ततः = हस्तपादादितः ॥ ७३९ ॥

अथ शीतदाहादिज्वरयोस्त्रिदोषजतामाह—

द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्वस्तयोः कष्टः सुखसाध्यतमोऽपरः ॥ ७४० ॥

*संसर्गजौ = सान्निपातिकौ । कष्टः = कष्टसाध्यः ॥ ७४० ॥

अथ विषमज्वरविशेषमाह—

विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनार्द्धं शीतलं देहमर्द्धमुष्णं प्रजायते ॥ ७४१ ॥

*अन्नरसे विदग्धे = आहारजे रसे दुष्टे । देहे श्लेष्मपित्ते व्यवस्थिते = दुष्टे स्थिते । तेन हेतुना शीतलं कफेन, उष्णं पित्तेन, अर्द्धत्वं चार्द्धनारीश्वराकारेण नरसिंहाकारेण वा ॥ ७४१ ॥

काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः ।
तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः ॥ ७४२ ॥

*अन्ते = हस्तपादादौ ॥ ७४२ ॥

काये श्लेष्मा यदा दुष्टः पित्तं चान्ते व्यवस्थितम् ।
शीतत्वं तेन गात्रे स्यादुष्णत्वं हस्तपादयोः ॥ ७४३ ॥

अथ विषमज्वरविशेषस्य प्रलेपकस्य लक्षणमाह—

प्रलिम्पन्निव गात्राणि घर्मेण गौरवेण च ।
मन्दज्वरविलेपी च स शीतः स्यात्प्रलेपकः ॥ ७४४ ॥

*गौरवेणोपलक्षितः । मन्दज्वरविलेपी = मन्दवेगस्य सदा सम्बन्धोऽस्यास्तीति मन्दज्वरविलेपी । अयं विषमज्वरः । तथा च सुश्रुतः—

*प्रलेपकाख्यो विषमः प्रायशः क्लेशशोषिणाम् ।
ज्वराश्च विषमाः सर्वे प्रायः क्लेशाय शोषिणाम् ॥११०॥ इति ॥७४४॥

अथ विषमज्वराणां सामान्यचिकित्सामाह—

ज्वराश्च विषमाः सर्वे सन्निपातसमुद्भवाः ।
यथोल्वणस्य दोषस्य तेषु कार्यं चिकित्सितम् ॥ ७४५ ॥
विषमेष्वपि कर्त्तव्यमूर्द्ध्वञ्चाधश्च शोधनम् ।
स्निग्धोष्णैरन्नपानैश्च शमयेद्विषमज्वरम् ॥ ७४६ ॥
कालिङ्गकः पटोलस्य पत्रं कटुकरोहिणी ।
पटोलं सारिवा मुस्तं पाठा कटुकरोहिणी ॥ ७४७ ॥
निम्बः पटोलं त्रिफला मृद्वीका मुस्तवत्सकौ ।
किराततिक्तममृता चन्दनं विश्वभेषजम् ॥ ७४८ ॥
गुडूच्यामलकं मुस्तमर्द्धश्लोकसमापनाः ।
कषायाः शमयन्त्याशु पञ्च पञ्चविधं ज्वरम् ॥ ७४९ ॥

*कालिङ्गकः = इन्द्रयवः । वत्सकः = कुटजः । चन्दनमत्र रक्तचन्दनम् । कषायाः पञ्च पञ्चविधं = सन्ततसततान्येद्युष्कतृतीयकचतुर्थकरूपम् ॥ ७४७-७४९ ॥

महाबलामूलमहौषधाभ्यां क्वाथो निहन्याद्विषमज्वरं हि ।
शीतं सकम्पं परिदाहयुक्तं विनाशयेद् द्वित्रिदिनप्रयोगात् ॥७५०॥
मुस्ताऽऽमलकगुडूचीविश्वौषधकण्टकारिकाक्वाथः ।
पीतः सकणाचूर्णः समधुर्विषमं ज्वरं हन्ति ॥ ७५१ ॥
तिलतैललवणयुक्तः कल्को लशुनस्य सेवितः प्रातः ।
विषमज्वरमपहरते वातव्याधीनशेषांश्च ॥ ७५२ ॥
कालाजाजी तु सगुडा विषमज्वरनाशिनी ।
मधुना चाभया लीढा हन्त्याशु विषमज्वरान् ॥ ७५३ ॥

*कालाजाजी तु 'मँगरैला' इति लोके । सा च किंचिद्भृष्टा गुडतुल्या कर्षमिता भक्षणीया ॥ ७५३ ॥

पीतो मरिचचूर्णेन तुलसीपत्रजो रसः ।
द्रोणपुष्पीरसो वाऽपि निहन्ति विषमज्वरान् ॥ ७५४ ॥

समगुडमसितं जीरकमीषन्मरिचेन भक्षितं सद्यः ।
ऐकाहिकं प्रशमयेत्समरेष्विव दानवानिन्द्रः ॥ ७५५ ॥
शुण्ठयजाजी गुडं पिष्टं पीतमुष्णेन वारिणा ।
जीर्णमद्येन तक्रेण तीव्रं शीतज्वरं जयेत् ॥ ७५६ ॥

अथ सन्ततादिज्वराणां सामान्यचिकित्सा ।

तत्र गुडूचीमोदकमाह—

अमृतायाः शतं चूर्णं वाससा परिशोधितम् ।
पृथक् षोडश भागाः स्युर्गुडमाक्षिकसर्पिषाम् ॥ ७५७ ॥
यथाऽग्नि भक्षयेदेतन्नरो हितमिताशनः ।
नास्य कश्चिद्भवेद्व्याधिर्न जरा पलितं न च ॥ ७५८ ॥
न ज्वरा विषमा नैव मोहो नानिलरक्तकम् ।
न च नेत्रगता रोगाः परमेतद्रसायनम् ॥ ७५९ ॥
मेधाकरं त्रिदोषघ्नं प्रयोगादस्य बुद्धिमान् ।
जीवेद्वर्षशतं साग्रं यथैवादितिजस्तथा ॥ ७६० ॥

अथ विषमज्वरिभोजनमाह—

तक्रमांसं पयोमांसं दधिमांसमथापि वा ।
माषमांसञ्च भुञ्जानो मुच्यते विषमज्वरात् ॥ ७६१ ॥

अग्निवेशेनोक्तम्—

सुरा समण्डा पानार्थे भोजने चरणायुधाः ।
तित्तिरा विष्किराः पथ्याः कुक्कुटा विषमज्वरे ॥ ७६२ ॥

*चरणायुधाः=गृहकुक्कुटाः । कुक्कुटाः=वनकुक्कुटाः । विष्किराः=वर्त्तिकालावाविगिरचकोराद्याः ॥ ७६२ ॥

अथ सन्ततादिज्वराणां विशिष्टां चिकित्सामाह—

त्रायन्तीकटुकाऽनन्तासारिवाभिः श्रृतं जलम् ।
पटोलाब्दवृषातिक्तासारिवाभिः श्रृतं जलम् ॥
सन्तताख्ये ज्वरे देयं वातादीनां निवृत्तये ॥ ७६३ ॥

*वृषा=बृहद्दन्ती एरण्डवत्पत्राविटपा, तदलाभे दन्ती च ग्राह्या, समानगुणत्वात् ॥ ७६३ ॥

पटोलेन्द्रयवानन्तापथ्याऽरिष्टामृताजलम् ।
क्वथितं तज्जलं पीतं ज्वरं सततकं जयेत् ॥ ७६४ ॥

*अनन्ता = सारिवा । अरिष्टः = निम्बः । जलं = बालकम् ॥ ७६४ ॥

द्राक्षापटोलनिम्बाब्दशक्राह्वत्रिफलाशृतम् ।
जलं जन्तुः पिबेच्छीघ्रमन्येद्युर्ज्वरशान्तये ॥ ७६५ ॥

*शक्राह्वः = इन्द्रयवः ॥ ७६५ ॥

कर्मसाधारणं जह्यात् तृतीयकचतुर्थकौ ।
भिषजा प्रतिकर्त्तव्यौ विशेषोक्तचिकित्सितैः ॥ ७६६ ॥

*दैवव्यपाश्रयं = बलिमङ्गलहोमादि, युक्तिव्यपाश्रयं = कषायादि, एतदुभयमपि चिकित्सितं साधारणशब्देनोच्यते, तेन साधारणं कर्म चिकित्सितं कर्त्तुं, तृतीयकचतुर्थकौ कर्मरूपौ जह्यात = क्षपयेद् , निराकुर्यादित्यर्थः ॥ ७६६ ॥

उशीरं चन्दनं मुस्तं गुडूची धान्यनागरम् ।
अम्भसा क्वथितं पेयं शर्करामधुयोजितम् ॥ ७६७ ॥
ज्वरे तृतीयके पुंसां तृष्णादाहसमन्विते ।
अपामार्गजटा कट्यां लोहितैः सप्ततन्तुभिः ॥ ७६८ ॥
बद्धा वारे रवेस्तूर्णं ज्वरं हन्ति तृतीयकम् ॥ ७६९ ॥
स्थिरातामलकीदारुशिवावृषमहौषधैः ।
सितामधुयुतः क्वाथश्चतुर्थकहरः परः ॥ ७७० ॥

*स्थिरा = शालिपर्णी । तामलकी = भूधात्री । शिवा = हरीतकी । वृषो = वासा ॥ ७७० ॥

अगस्तिपत्रस्य रसेन नस्यं निहन्ति चातुर्थकमुग्रवीर्यम् ।
शिरीषपुष्पस्य निशाद्वयस्य कल्केन वा तद्घृतसंयुतेन ॥ ७७१ ॥

*तद् = नस्यम् ॥ ७७१ ॥

ज्वरस्य वेगकालञ्च चिन्तयञ्ज्वयते तु यः ।
तस्येष्टैरद्भुतैर्वाऽपि विषमैर्नाशयेत्स्मृतम् ॥ ७७२ ॥
सन्ततं विषमं चापि सततं सुचिरोत्थितम् ।
ज्वरं सुभोजनैः पथ्यैरिष्टैश्च समुपाचरेत् ॥ ७७३ ॥

*सन्ततादिविपर्ययाणां विषमज्वराणां चिकित्सा सन्ततादीनामिव कर्त्तव्या ॥ ७७२-७७३ ॥

शीताभिभूते पुरुषे कुर्य्याच्छीतहरीं क्रियाम् ।
दाहाभिभूते तु विधिं विदध्याद्दाहनाशनम् ॥ ७७४ ॥
आच्छादनैर्बहुतरैर्गुरुभिः कम्बलादिभिः ।
तूलवत्या महाशीतं शीतादिज्वरिणो हरेत् ॥ ७७५ ॥

*तूलवती तु "रजाई" इति लोके ॥ ७७५ ॥

तं स्तनाभ्यां सुपीनाभ्यां पीवरोरुर्नितम्बिनी ।
युवती गाढमालिङ्गेत्तेन शीतं प्रशाम्यति ॥ ७७६ ॥
कान्ताऽङ्गसङ्गसञ्जाते तद्वच्छीते निवारिते ।
प्रह्लादं चास्य विज्ञाय पृथक्तां कारयेत्स्त्रियम् ॥ ७७७ ॥
ततो दाहे तु सञ्जाते पत्रैरेरण्डसम्भवैः ।
शीतलैर्धारितैरङ्गे दाहं तस्यापनोदयेत् ॥ ७७८ ॥

अथ शीतज्वरे भूतभैरवचूर्णमाह—

तालकं शुक्तिकाचूर्णं दत्तं तत्रोभयोरपि ।
नवमांसञ्च तुत्थं स्यान्मर्दयेत्कन्यकाद्रवैः ॥ ७७९ ॥
तत्तु संशुष्कमुपलैर्वन्यैर्गजपुटे पचेत् ।
शीतं तच्चूर्णयेच्चूर्णं गुञ्जामात्रं सितायुतम् ॥ ७८० ॥
प्रभाते भक्षयेत्तेन याति शीतज्वरः क्षयम् ।
वान्तिर्भवति कस्यापि कस्य चिन्न भवत्यपि ॥ ७८१ ॥
एकेन दिवसेनैव शीतज्वरहरं परम् ।
मध्याह्नसमये पथ्यं शिखरिण्योदनं तथा ॥ ७८२ ॥

अथ कायस्थाऽऽदिधूपलेपतैलान्याह—

कायस्थानाकुलीतिक्तावयःस्थापुरचोरकैः ।
सहदेवावचाकुष्ठैः शीतघ्नैर्धूपलेपनैः ॥ ७८३ ॥
साम्लैर्विपाचितं तैलमभ्यङ्गाच्छीतनाशनम् ॥ ७८४ ॥

*कायस्था=हरीतकी । नाकुली=रास्नाभेदः "नाइ" इति लोके । वयःस्था=गुडूची । पुरो=गुग्गुलुः । चोरकः="भण्डीउर" त

दलाभे "गठिवन" । सहदेवा=बृहद्बला । क्षारो=यवक्षारः । इति कायस्थादिधूपलेपनतैलानि ॥ ७८३-७८४ ॥

अथ दाहस्य चिकित्सामाह—

एरण्डस्य तु पत्राणि लिप्तभूमौ निधापयेत् ।
दाहादिज्वरिणो देहे तानि पत्राणि धारयेत् ॥ ७८५ ॥
तेन नश्यति दाहोऽस्य ज्वरश्चैवोपशाम्यति ।
दाहे शान्ते यदा शैत्यं तच्च युक्त्या निवारयेत् ॥ ७८६ ॥
जघनचक्रचलन्मणिमेखला सरसचन्दनचन्द्रविलेपना ।
वनलतेव तनुं परिवेष्टयेत्प्रबलदाहनिपीडितमङ्गना ॥ ७८७ ॥

*चन्द्रः=कर्पूरः ॥ ७८७ ॥

तदङ्गसङ्गसञ्जाते शैत्ये दाहे निवारिते ।
प्रह्लादश्चास्य विज्ञाय तां स्त्रीमपनयेत्पुनः ॥ ७८८ ॥

अथ षड्गुणतक्रतैलमाह—

सुवर्चिकानागरकुष्ठमूर्वालाक्षानिशालोहितयष्टिकाभिः ।
सिद्धं हरेत्षड्गुणतक्रपक्वं तैलं ज्वरं दाहसमन्वितं च ॥७८९॥

अथ महाषड्गुणतक्रतैलमाह —

रास्नानागरकुष्ठचन्दननिशायष्टयाह्वकृष्णाबला-
लाक्षासैन्धवसारिवामधुरसादेवाह्वरोहीतकैः ॥
सोशीराम्बुधिफेनरोहिषजलैस्तैलं पचेत्षड्गुणे
तक्रे तच्च जयेज्ज्वरं दृढतरं दाहादिशीतादिकम् ॥ ७९० ॥

*चन्दनमत्र श्वेतम् । मधुरसा=मूर्वा । रोहीतकः="रोहिणी"ति लोके । "रोहिषे"ति रोहिततृणविशेषः । जलं=वालम् ॥ ७९० ॥

अथ पद्मकादितैलमाह—

पद्मकोत्पलकह्लारमृणालबिसपौष्करैः ।
कुमुदोशीरमञ्जिष्ठापद्मगैरिककट्फलैः ॥ ७९१ ॥
सारिवाद्वयलोध्राह्वक्षीरीखर्जूरमस्तकैः ।
धात्रीशतावरीयुक्तैः क्वाथे कल्के प्रयोजितैः ॥ ७९२ ॥
लाक्षारसपयःशुक्तमस्तुभिः सह काञ्जिकैः ॥
पक्वं तैलमिदं स्वच्यं दाहज्वरहरं परम् ॥ ७९३ ॥

*लाक्षारसादि पृथक् तैलतुल्यम् ॥ ७२१-७९३ ॥

अथ प्रलेपकस्य चिकित्सामाह—

प्रलेपके प्रयुञ्जीत श्लेष्मज्वरहरीं क्रियाम् ॥ ७९४ ॥

अथ माहेश्वरधूपमाह—

रुद्रजटा गोशृङ्गं बिडालविष्ठोरगस्य निर्मोकः ।
मदनफलभूतकेश्यौ वंशत्वग्रुद्रनिर्माल्यम् ॥ ७९५ ॥
घृतयवमयूरपुच्छच्छगलकलोमानि सर्षपाः सवचाः ।
हिङ्गुगवास्थिमरीचाः समभागाश्छागमूत्रसंपिष्टाः ॥ ७९६ ॥
धूपनविधिना शमयन्त्येते सर्वाञ्ज्वरान्नियतम् ।
ग्रहडाकिनीपिशाचप्रेतविकारानयं धूपः ॥ ७९७ ॥

*रुद्रजटा = जटाधारी । भूतकेशी = जटामांसी । रुद्रनिर्माल्यम् = पुष्पादि । मयूरपुच्छं = चन्द्रकम् ॥७९५-७९७ ॥

अथ देवस्तुतिपूजने आह—

सोमं सानुचरं देवं समातृगणमीश्वरम् ।
पूजयन्प्रयतः शीघ्रं मुच्यते विषमज्वरात् ॥ ७९८ ॥

*सोमम् = उमया सहितम् । सानुचरं = नन्द्यादिगणसहितम् । प्रयतः = पवित्रः ॥ ७९८ ॥

विष्णुं सहस्रमूर्द्धानं चराचरपतिं विभुम् ।
स्तुवन्नामसहस्रेण ज्वरान्सर्वान्व्यपोहति ॥ ७९९ ॥

*सहस्रमूर्द्धानमिति = सहस्रशीर्षेत्यादिवेदाभिहितम् । नामसहस्रेण = भारतोक्तेनेत्यर्थः ॥ ७९९ ॥

तीर्थायतनदेवाग्निगुरुवृद्धोपसर्पणैः ।
श्रद्धया पूजनैश्चापि सहसा शाम्यति ज्वरः ॥ ८०० ॥

*ज्वरस्यापि देवत्वात्पूजा कार्या । यत आह विदेहः—तीर्थेति । तीर्थम = ऋषिजुष्टं जलम् । आयतनं = देवाधिष्ठितं पुरुषोत्तमक्षेत्रं—श्रीशैलादि ॥ ८०० ॥

इति विषमज्वराधिकारः समाप्तः ।

अथ रसादिधातुगतज्वरलक्षणचिकित्से ।

तत्र रसगतज्वरस्य लक्षणमाह—

गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ ।
रसस्थे तु ज्वरे लिङ्गं दैन्यं चास्योपजायते ॥ ८०१ ॥

*गुरुता गात्राणाम् । हृदयोत्क्लेशः=हृदयस्थस्य दोषस्योपचितत्वाद्वमनमिव । दैन्यं=क्लीबचित्तता । रसस्थे=रसधातुगते ज्वरे । यद्यपि रसैकधातुं प्राप्य सन्ततश्चायं तथाऽप्यनुक्रमधातुगतकथनार्थ-एवात्र निर्देशः ॥ ८०१ ॥

अथ रसगतज्वरस्य चिकित्सामाह—

रसस्थे तु ज्वरे तस्मिन्कुर्याद्वमनलङ्घने ॥ ८०२ ॥

अथ रक्तगतज्वरस्य लक्षणमाह—

रक्तनिष्ठीवनं दाहो मोहश्छर्दनविभ्रमौ ।
प्रलापः पिडिका तृष्णा रक्तप्राप्ते ज्वरे नृणाम् ॥ ८०३ ॥

*मोहो=व्यग्रचित्तता ॥ ८०३ ॥

अथ रुधिरगतज्वरस्य चिकित्सामाह—

सेकः संशमनो लेपो रक्तमोक्षमसृग्गते ॥ ८०४ ॥

अथ मांसगतज्वरस्य लक्षणमाह—

पिण्डकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता ॥
उष्माऽन्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ॥ ८०५ ॥

*"उष्माऽन्तर्मोहविक्षेपावि"ति केचित्पठन्ति । तत्रोष्मा=अन्तः । विक्षेपः=हस्तपादादिचालनम् ॥ ८०५ ॥

अथ मांसगतज्वरस्य चिकित्सामाह—

तीक्ष्णं विरेकश्च तथा कुर्यान्मांसगते ज्वरे ॥ ८०६ ॥

अथ मेदोगतज्वरस्य लक्षणमाह—

भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्दिरेव च ॥
दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता ॥ ८०७ ॥

*भृशं स्वेदो मेदोमलत्वात् ॥ ८०७ ॥

अथ मेदोगतज्वरस्य चिकित्सामाह—

मेदःस्थे मेदसो नाशं विदधीत चिकित्सकः ॥ ८०८ ॥

अथास्थिगतज्वरस्य लक्षणमाह—

भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्दिरेव च।

विक्षेपणञ्च गात्राणां विद्यादस्थिगते ज्वरे॥ ८०६॥

अथास्थिगतज्वरस्य चिकित्सामाह—

अस्थिस्थे तु ज्वरे कुर्याद्वातनाशनकं विधिम्।

वस्तिकर्म प्रयोक्तव्यमभ्यङ्गोन्मर्दनं तथा॥ ८१०॥

अथ मज्जगतज्वरस्य लक्षणमाह—

तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा॥

अन्तर्दाहो महाश्वासो मर्मच्छेदश्च मज्जगे॥ ८११॥

*असाध्यत्वान्नात्र चिकित्सा॥ ८११॥

अथ शुक्रगतज्वरस्य लक्षणमाह—

मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे।

शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः॥ ८१२॥

*ननु "शुक्रस्थानगते मरणमि"त्युक्तं तच्च शुक्रं सर्वदेहगं, नैवं स्वाश्रयस्थशुक्रगे मरणम्॥ ८१२॥

इति सप्तधातुगतज्वराधिकारः समाप्तः।

अथ जीर्णज्वराधिकारः।

तत्र जीर्णज्वरस्य सामान्यलक्षणमाह—

यो द्वादशेभ्यो दिवसेभ्य ऊर्ध्वं दोषत्रयेभ्यो द्विगुणेभ्य ऊर्ध्वम्।

नृणां तनौ तिष्ठति मन्दवेगो भिषग्भिरुक्तो ज्वर एष जीर्णः॥ ८१३॥

अथ जीर्णज्वरविशेषस्य वातबलासकस्य लक्षणमाह—

नित्यं मन्दज्वरो रूक्षः शूनः कृच्छ्रेण सिध्यति।

स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी॥ ८१४॥

*वातबलासकी नर ईदृग् भवेत्। शूनः=शोथी। श्लेष्मभूयिष्ठो=बहुश्लेष्मकः॥ ८१४॥

अथ जीर्णज्वरस्य सामान्यचिकित्सामाह—

जीर्णज्वरी नरः कुर्यान्नोपवासं कदा चन।

लङ्घनात्स भवेत्क्षीणो ज्वरस्तु स्याद्बली यतः॥

पुराणेऽपि ज्वरे दोषा यद्यपथ्यैः पुनस्तथा ।
लङ्घयेत्तत्र तत्पश्चात्पूर्वामेवाचरेत्क्रियाम् ॥ ८१५ ॥

*तथा = पूर्ववत् ॥ ८१५ ॥

अथ त्रिकण्टककाथमाह—

निदिग्धिकानागरकामृतानां क्वाथं पिबेन्मिश्रितपिप्पलीकम् ।
जीर्णज्वरारोचककासशूलश्वासाग्निमान्द्यार्दितपीनसेषु ॥ ८१६ ॥
हन्त्यूर्द्ध्वजामयं प्रायः सायन्तेनोपयुज्यते ॥ ८१७ ॥

अथ पिप्पल्यादिक्वाथादिकानाह—

पिप्पलीमधुसंयुक्तः क्वाथश्छिन्नोद्भवोद्भवः ।
जीर्णज्वरकफध्वंसी पञ्चमूलकृतोऽथ वा ॥
अमृतायाः कषायन्तु शीतलीकृतमीरितम् ।
मधुपादयुतं पीतं जीर्णज्वरहरं परम् ॥
पिप्पलीमधुसम्मिश्रङ्गुडूचीस्वरसं पिबेत् ।
जीर्णज्वरकफप्लीहकासारोचकनाशनम् ॥ ८१८ ॥
जीर्णज्वरेऽग्निमान्द्ये च शस्यते गुडपिप्पली ।
कासाजीर्णारुचिश्वासहृत्पाण्डुकृमिरोगनुत् ॥ ८१९ ॥
द्विगुणः पिप्पलीचूर्णाद् गुडोऽत्र भिषजां मतः ।
पिप्पली मधुसंयुक्ता मेदःकफविनाशिनी ।
श्वासकासज्वरहरी पाण्डुप्लीहोदरापहा ॥ ८२० ॥

अथामलकादिचूर्णमाह—

आमलं चित्रकं पथ्या पिप्पली सैन्धवं तथा ॥ ८२१ ॥
चूर्णितोऽयं गणो ज्ञेयः सर्वज्वरहरः परः ।
भेदी रुचिकरः श्लेष्महन्ता दीपनपाचनः ॥ ८२२ ॥

अथ द्राक्षाऽऽद्यष्टादशाङ्गक्वाथमाह—

द्राक्षाऽमृता शटी श्रृङ्गी मुस्तकं रक्तचन्दनम् ।
नागरं कटुका पाठा भूनिम्बः सदुरालभः ॥ ८२३ ॥
उशीरं धान्यकं पद्मं वालकं कण्टकारिका ।
पुष्करं पिचुमन्दश्च दशाष्टाङ्गमिदं स्मृतम् ।
जीर्णज्वरारुचिश्वासकासश्वयथुनाशनम् ॥ ८२४ ॥

अथ बर्द्धमानपिप्पलीमाह—

त्रिवृद्ध्या पञ्चवृद्ध्या वा सप्तवृद्ध्याऽथ वाऽपि वा।
गव्यक्षीरेण सम्पिष्टाः पिबेद्दशदिनानि हि ॥ ८२५ ॥
तथैवापनयेदेता एवं विंशतिवासरान्।
पिबतां ज्वरशान्तिः स्यात्पाण्डुरोगश्च शाम्यति ॥ ८२६ ॥
कासः श्वासोऽग्निमान्द्यञ्च कफाधिक्यञ्च नश्यति ॥८२७॥
अयादिवृद्धिर्यथा–कफवृद्धिर्दुग्धवृद्धिर्यथाऽग्निवृद्धिः ॥८२५–८२७॥
वातश्लेष्मज्वरोक्ता स्यात्क्रिया वातबलासके।
जीर्णज्वरे कफे क्षीणे दाहे तृष्णासमन्विते ॥ ८२८ ॥
पयः पीयूषसदृशं तन्नवे तु विषोपमम्।
चन्दनाद्यं हितं तैलं शोषाधिकारकीर्त्तितम्।
तथा नारायणं तैलं जीर्णज्वरहरं परम् ॥ ८२९ ॥

इति जीर्णज्वराधिकारः सम्पूर्णः।

अथ दुर्जलजनितज्वरचिकित्सा।

तत्र हरीतक्यादिचूर्णमाह—

हरीतकी निम्बपत्रं नागरं सैन्धवोऽनलः।
एषां चूर्णं सदा खादेद् दुर्जलज्वरशान्तये ॥ ८३० ॥

अथ शुण्ठीक्वाथमाह—

अरुचिमनलमान्द्यं पीनसश्वासकासा-
नुदरमुदकदोषानाशु हन्यादशेषान्।
जनयति तनुकान्तिं चित्तनेत्रप्रसादं
पलपरिमितशुण्ठीक्षौद्रसिद्धः कषायः ॥ ८३१ ॥

अथ दुर्जलजेतृरसमाह—

विषं भागद्वयं दग्धं कपर्दं पञ्चभागकम्।
मरिचं नागरञ्चैव चूर्णं वस्त्रेण शोधयेत् ॥ ८३२ ॥
आर्द्रकस्य रसेनास्य कुर्यान्मुद्गनिभां वटीम्।
वारिणा वटिकायुग्मं प्रातः सायञ्च भक्षयेत् ॥ ८३३ ॥

अयं रसो ज्वरे योज्यः सामे दुर्जलजेऽपि च ।
अजीर्णाध्मानविष्टम्भशूलेषु श्वासकासयोः ॥ ८३४ ॥

अथ पटोलादिक्काथमाह—

पटोलमुस्ताऽमृतवह्निवासकं सनागरं धान्यकिराततिक्तकम् ।
कषायमेषां मधुना पिबेन्नरो निवारयेद् दुर्जलदोषमुल्बणम् ॥ ८३५ ॥

अथ किरातादिचूर्णमाह—

किराततिक्तात्रिवृदम्बुपिप्पलीविडङ्गविश्वाकटुरोहिणीरजः ।
निहन्ति लीढं मधुनाऽतिसत्वरं सुदुस्तरं दुर्जलदोषजं ज्वरम् ॥८३६॥

अथ शुण्ठ्यादिकल्कमाह—

भोजनाग्रे नरैर्भुक्तं शुण्ठ्यजाज्यभयोत्थितम् ।
कल्कन्तु सेवितं नित्यं नानादेशोद्भवं जलम् ॥ ८३७ ॥

अथार्द्रकादिकल्कमाह—

सहार्द्रकयवक्षारौ पीत्वा कोष्णेन वारिणा ।
नानादेशसमुद्भूतं वारिदोषमपोहति ॥ ८३८ ॥

अथ साध्यज्वरलक्षणमाह—

बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ॥ ८३९ ॥

अथ ज्वरोपद्रवानाह—

श्वासो मूर्च्छाऽरुचिश्छर्दिस्तृष्णाऽतीसारविड्ग्रहाः ।
हिक्काकासाङ्गदाहाश्च ज्वरस्योपद्रवा दश ॥ ८४० ॥

अथ प्रसङ्गाज्ज्वरोपद्रवाणां चिकित्सामाह—

सञ्जातोपद्रवो व्याधिस्त्याज्यो न स्याच्चिकित्सकैः ।
व्याधौ शान्ते प्रणश्यन्ति सद्यः सर्वेऽप्युपद्रवाः ॥ ८४१ ॥
अतो व्याधिं जयेद्यत्नात्पूर्वं पश्चादुपद्रवान् ।
भिषग् यः कुशलः सोऽत्र जयेत्पूर्वमुपद्रवम् ॥ ८४२ ॥
तेष्वपि प्रचुरेषु प्राङ् नाशयेदाशुकारिणम् ।
मूलव्याधिं जयेत्पूर्वं यत्र यो वा भवेद्बली ।
अविरोधेन कार्या तदुभयोरपि च क्रिया ॥ ८४३ ॥

तत्र ज्वरे श्वासस्य चिकित्सामाह—

अथ दशाङ्गक्काथमाह—

सिंही व्याघ्री ताम्रमूली पटोली शृङ्गी पद्मा पुष्करं रोहिणी च ।

शाकं शट्याः शैलमल्ल्याश्च बीजं श्वासं हन्यात्सन्निपातं दशाङ्गः॥८४४॥

*सिंही=[बडी कटैया]। व्याघ्री=लघुकण्टकारी। ताम्रमूली=दुरालभा। रोहिणी=[कटुकी]। शैलमल्ली=[कोरैआ]॥८४४॥

अथ द्वात्रिंशत्काथमाह—

भार्गीनिम्बघनाभयाऽमृतलताभूनिम्बवासाविषा-
त्रायन्तीकटुकावचात्रिकटुकश्योनाकशक्रद्रुमैः।
रास्नायासपटोलपाटलशटीदार्वीविशालात्रिवृद्-
ब्राह्मीपुष्करसिंहिकाद्वयनिशाधात्र्यब्ददेवद्रुमैः॥८४५॥
काथोऽयं खलु सन्निपातनिवहान्द्वात्रिंशतां पानतो-
दुर्द्धर्षान्निजतेजसा विजयते सर्पान्गरुत्मानिव।
किञ्च श्वासबलासकासगुदरुग्घृद्रोगहिक्कामरुन्-
मन्यास्तम्भगलामयार्दितमलाविष्टम्भब्रध्नानपि॥८४६॥

*विषा=अतिविषा। शक्रद्रुमः="बकुल" इति लोके। देवद्रुमः=देवदारु॥८४५-८४६॥

अथ पिप्पल्यादिचूर्णमाह—

मधुना कृष्णाकट्फलकर्कटशृङ्गोभवं चूर्णम्।
श्वासामये महोग्रे लीढ्वा लोकः सुखी भवति॥८४७॥

अथ श्वासे दाहप्रयोगमाह—

वन्योपलाग्नितापितदात्रस्याग्रेण पञ्जरे दाहः।
अपहरति श्वासामयमसंशयं भाषितं मुनिभिः॥८४८॥

अथ ज्वरे मूर्च्छायाश्चिकित्सामाह—

आर्द्रकस्य रसैर्नस्यं मूर्च्छायामाचरेन्नरः।
अञ्जनञ्च प्रयुञ्जीत मधुसिन्धुशिलोषणैः॥८४९॥
शीताम्भसाऽक्षिसेकः सुरभिर्धूपः सुगन्धिपुष्पञ्च।
मृदुतालवृन्तवातः कोमलकदलीदलस्पर्शः॥८५०॥

अथ ज्वरेऽरुचेश्चिकित्सामाह—

अरुचौ तु शृङ्गबेरजरसकैः सोष्णैः ससिन्धुजैः कवलः।
सिन्धूत्थमातुलुङ्गीफलकेशरधारणं वक्त्रे॥८५१॥

अथ ज्वरे वमनस्य चिकित्सामाह—

क्वाथो गुडूच्याः समधुः सुशीतः पीतः प्रशान्तिं वमनस्य कुर्यात् ।
विण्मक्षिकाणां मधुनाऽवलीढा सचन्दना शर्करयाऽन्विता वा ॥८५२॥

अथ ज्वरे तृषायाश्चिकित्सामाह—

दन्तशठबीजपूरकदाडिमबदरैः सचुक्रकैर्वदने ।
लेपो जयति पिपासामथ रजतगुटी मुखान्तःस्था ॥८५३॥
शीतं पयः क्षौद्रयुतं निपीतमाकण्ठमाश्वेव तदुद्वमेच्च ।
तर्षं महान्तं शमयेद्धि वक्त्रे धृत्वाऽथ वा क्षौद्रवटाग्रलाजान् ॥८५४॥

अथ ज्वरेऽतीसारस्य चिकित्सामाह—

लङ्घनमेकं मुक्त्वा न चान्यदस्तीह भेषजं बलिनः ।
समुदीर्णदोषनिचयं शमयति तत्पाचयेदपि च ॥ ८५५ ॥
वत्सादनीवत्सकवारिवाहविश्वम्भरानिम्बविषाः सविश्वाः ।
ज्वरेऽतिसारं त्वरितं जयन्ति विश्वाऽमृतावत्सकवारिवाहाः॥८५६॥
*विश्वम्भरा=भूनिम्बः ॥ ८५६ ॥
पाठाऽमृतापर्पटमुस्तविश्वाकिराततिक्तेन्द्रयवान्विपाच्य ।
पिबन्हरत्येव हठेन सर्वाञ्ज्वरातिसारानपि दुर्निवारान् ॥ ८५७ ॥

अथ ज्वरे विड्ग्रहस्य चिकित्सामाह—

विड्ग्रहे वातजित्कर्म कुर्यादत्रानुलोमनम् ।
मलं प्रवर्त्तयेदाशु तीक्ष्णाभिः फलवर्त्तिभिः ॥ ८५८ ॥
पथ्याऽऽरग्वधतिक्तात्रिवृदामलकैः श्रृतं तोयम् ।
जीर्णज्वरे विबन्धे दद्यादाश्वेव विड्ग्रहः शाम्येत् ॥८५९॥

अथ ज्वरे हिक्कायाश्चिकित्सामाह—

नीरेण सिन्धूत्थरजोऽतिसूक्ष्मं नस्येन नूनं विनिहन्ति हिक्काम् ।
शुण्ठी हठाद्वा सितया समेता धूपोऽथ वा हिङ्गुसमुद्भवश्च ॥ ८६० ॥

अथ ज्वरे कासस्य चिकित्सामाह—

कासे कणा कणामूलं कलिङ्गद्रुफलं रजः ।
सविश्वभेषजं लिह्यान्मधुना वा वृषाद्रसम् ॥ ८६१ ॥
*रजः=पर्पटकम् ॥ ८६१ ॥
पुष्करमूलकटुत्रिकश्रृङ्गीकट्फलयासककारविकाभिः ।

मधुलुलिताभिरयं खलु लेहः कासरिपुः कफरोगहरश्च॥८६२॥

अथ ज्वरे दाहस्य चिकित्सामाह—

दाहाधिकारे लिखितं दाहे कुर्याच्चिकित्सितम् ।
परं ज्वरे विरुद्धं यन्नोचितं तच्चिकित्सितम् ॥ ८६३ ॥

अथ सुखसाध्यज्वरलक्षणमाह—

सन्तापोऽभ्यधिको बाह्ये तृष्णाऽऽदीनाञ्च मार्दवम् ॥
बहिर्वेगस्य लिङ्गानि सुखसाध्यत्वमेव च ॥ ८६४ ॥

*तृष्णाऽऽदीत्यादिशब्देनान्तर्दाहसन्ध्यस्थिव्यथाश्वासा गृह्यन्ते, तेषां मार्दवमल्पता । बहिर्वेगस्य ज्वरस्येति शेषः ॥ ८६४ ॥

वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ।
प्राकृतः सुखसाध्यस्तु ज्वरः सुरभिसम्भवः ॥ ८६५ ॥

*सुरभिर्वसन्तः ॥ ८६५ ॥

अथ कष्टसाध्यज्वरलक्षणमाह—

वैकृतोऽन्यः स दुःसाध्यः प्राकृतश्चानिलोद्भवः ॥ ८६६ ॥

*अन्यः=प्राकृतादन्यो वैकृतः ॥ ८६६ ॥

अथ वर्षाऽऽदौ दोषप्रधानतामाह—

वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् ।
कुर्यात्पित्तञ्च शरदि तस्य चानुबलः कफः ॥ ८६७ ॥
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ।
कफो वसन्ते तमपि वातपित्तं भवेदनु ॥ ८६८ ॥

*वर्षाऽऽदिषु जातानां चिकित्साविशेषार्थं प्राधान्यमाह—वर्षास्विति । तत्प्रकृत्या=तस्य पित्तस्य प्रकृत्या=स्वभावेन । यत उक्तम्—

*"कफपित्ते द्रवे धातू सहेते लङ्घनं बहु" । इति ।

*विसर्गाच्च=शरदो विसर्गकालत्वाच्च । यत उक्तम्—

"वर्षाशरद्धेमन्ता विसर्गकालास्तत्रोपचितबलाः प्राणिनो भवन्ति सोमस्य बलवत्त्वादि"ति । तत्र शरदि पित्तज्वरेऽनशनाद्भयं न, वसन्ते कफज्वरेऽपि कफप्रकृत्या लङ्घनाद्भयं न भवति । किन्तु वसन्तस्यादानकालत्वान्निःशङ्कं न कर्त्तव्यम् । यत उक्तम्—

*"शिशिरवसन्तग्रीष्मास्त्वादानकालास्तत्रापचितबलाः प्राणिनो भवन्ति सूर्यस्य बलवत्त्वादिति ।

*एतेनेदमुक्तं वर्षासु वायुः प्रधानः,—पित्तश्लेष्माणावप्रधानौ । शरदि पित्तं प्रधानं कफोऽप्रधानः । वसन्ते श्लेष्मा प्रधानो वातपित्ते अप्रधाने । तत्र प्रधानस्य प्राधान्येन चिकित्सा कर्त्तव्या, सा चाप्रधाने निषिद्धा न विधेया । एवं वैकृतेष्वपि प्रधानस्य प्राधान्येन चिकित्सा कर्त्तव्या । तथा चोक्तम्—

*संसर्गे यो गरीयान्स्यादुपक्रम्यः स वै भवेत् ।
शेषो दोषाविरोधेन सन्निपाते तथैव च ॥१११॥ इति ॥

*संसर्गे=दोषद्वयसंसर्गे । गरीयान्=प्रधानः ॥ ८६७-८६८ ॥

अथान्तर्वेगस्य लिङ्गानि कष्टसाध्यत्वं चाह—

अन्तर्दाहोऽधिका तृष्णा प्रलापः श्वसनं भ्रमः ।
सन्ध्यस्थिशूलमस्वेदो दोषवर्चोविनिग्रहः ॥
अन्तर्वेगस्य लिङ्गानि कष्टसाध्यत्वमेव च ॥ ८६९ ॥

*वर्चोविनिग्रहः=पुरीषाप्रवृत्तिः ॥ ८६९ ॥

अथासाध्यज्वरलक्षणमाह—

ज्वरः क्षीणस्य शूनस्य गम्भीरो दीर्घरात्रिकः ।
असाध्यो बलवान्यश्च केशसीमन्तकृज्ज्वरः ॥ ८७० ॥

*दीर्घरात्रिकः=बहुरात्रानुबन्धी, केशसीमन्तकृत=प्रभावात्केशेषु सीमन्तं यः करोति ॥ ८७० ॥

अथ गम्भीरज्वरलक्षणमाह—

गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया ।
आनद्धत्वेन चात्यर्थं कासश्वासोद्गमेन च ॥ ८७१ ॥

*आनद्धत्वेन=विबद्धमलत्वेन ॥८७१॥

अथ सामान्यज्वरे कर्णमूलशोथस्य सुखसाध्यत्वादिकमाह—

ज्वरस्य पूर्वं ज्वरमध्यतो वा ज्वरान्ततो वा श्रुतिमूलशोथः ।
क्रमादसाध्यः खलु कृच्छ्रसाध्यः सुखेन साध्यो मुनिभिः प्रदिष्टः॥८७२॥

अथारिष्टमाह—

रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।

तल्लक्षणमरिष्टं स्याद्रिष्टमप्यभिधीयते ॥ ८७३ ॥
हेतुभिर्बहुभिर्जातो बलिभिर्बहुलक्षणः ।
ज्वरः प्राणान्तकृद्यश्च शीघ्रमिन्द्रियनाशनः ॥ ८७४ ॥

*शीघ्रमिन्द्रियनाशनः=उत्पन्नमात्र एव चिकित्स्यमानोऽपीन्द्रियाणां चक्षुरादीनां शक्तिं यो नाशयति ॥ ८७४ ॥

अन्यच्चारिष्टमाह—

विसंज्ञस्ताम्यते यस्तु शेते निपतितोऽपि वा ।
शीतार्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः ॥ ८७५ ॥

*विसंज्ञः=विगतज्ञानः । ताम्यते=नष्टहर्षः । शेते निपतितो वा—अत्रापि वाशब्द एवार्थः । निपतित एव तिष्ठति न चोत्थातुं समर्थः । तथा सन् शेते वा । शीतार्दितः=बहिः । अन्तरुष्णः=अन्तर्दाहवान् ॥ ८७५ ॥

अन्यच्च—

यो हृष्टरोमा रक्ताक्षो हृदि संघातशूलवान् ।
वक्त्रेण चैवोच्छ्वसिति तं ज्वरो हन्ति मानवम् ॥ ८७६ ॥

*हृष्टरोमा=रोमाञ्चवान् । हृदि संघातशूलवान्=सान्निपातिकशूलवान् । वक्त्रेण चैवोच्छ्वसिति=न तु नासिकया ॥ ८७६ ॥

अन्यच्च—

हिक्काश्वासतृषायुक्तं मूढं विभ्रान्तलोचनम ।
सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः ॥ ८७७ ॥

*क्षपयति=समापयतीत्यर्थः ॥ ८७७ ॥

अन्यच्च—

हतप्रभेन्द्रियं क्षाममरोचकनिपीडितम् ।
गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्जयेत् ॥ ८७८ ॥

*हतप्रभेन्द्रियम्=हता प्रभा दीप्तिर्येषाम्, अथ वा—हता प्रभा प्रतिभा विषयग्रहणशक्तिर्येषां, तथाविधानीन्द्रियाणि यस्य तं हतप्रभेन्द्रियम् । क्षामं=क्षीणम् । गम्भीरतीक्ष्णवेगार्त्तं=गम्भीर उक्तलक्षणकस्तीक्ष्णवेगोऽतिदुःसहवेगस्ताभ्यामार्त्तं=दुःखितम् ॥ ८७८ ॥

अन्यच्च—

मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः ॥ ८७९ ॥

*व्याख्यातोऽयं श्लोकः ॥ ८७९ ॥

अथ विषमज्वरारिष्टमाह—

आरम्भाद्विषमो यस्तु यस्य वा दीर्घरात्रिकः ।
क्षीणस्य चातिरूक्षस्य गम्भीरो यस्य हन्ति तम् ॥ ८८० ॥

*यस्यारम्भाद्विषमः=प्रथममेव विषमो, न तु ज्वरोत्सृष्टस्य । यस्य दीर्घरात्रिकः, यस्य क्षीणस्यातिरूक्षस्य च गम्भीरो भवति, तं विषमो दीर्घरात्रिको गम्भीरश्च हन्तीत्यर्थः ॥ ८८० ॥

इति प्रथमो ज्वराधिकारः समाप्तः ॥ १ ॥

अथ द्वितीयोऽतिसाराधिकारः २ ।

तत्रातीसारस्य विप्रकृष्टानि निदानान्याह—

गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः ।
विरुद्धाध्यशनाजीर्णैर्विषमैश्चापि भोजनैः ॥ १ ॥
स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषैर्भयैः ।
शोकदुष्टाम्बुमद्यातिपानैः सात्म्यर्त्तुपर्ययैः ॥ २ ॥
जलाभिरमणैर्वेगविघातैः कृमिदोषतः ।
नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते ॥ ३ ॥

*गुरु=मात्रया स्वभावेन संस्कारेण च । अतिशब्दः स्थूलान्तैः-सह सम्बद्ध्यते । स्थूलम्=असम्यक् पिष्टं गोधूमादि । विरुद्धं=संयुक्तं क्षीरमत्स्यादि । अध्यशनम्=

*"अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते" ।

*अजीर्णम्=आमं विदग्धं च ।

*बहु स्तोकमकाले च भुक्तं यद्विषमं हि तत्' ॥ १ ॥ इति ।

*"भोजनैरि"ति गुर्वादिभिर्विषान्तैः सर्वैः सह सम्बध्यते । स्नेहाद्यैः=स्नेहपानस्वेदनवमनविरेचनानुवासननिरूहान्तैः।अतियुक्तैः=वारंवारं·

प्रयुक्तैः। मिथ्यायुक्तैः=अविधिप्रयुक्तैश्च तैः। विषैः=विषाण्यत्र स्थावराणि तेषामधोगत्वात्। शोकः=बन्ध्वादिवियोगजनितमनःपीडा। सात्म्यर्त्तुपर्ययैः=सात्म्यविपरीतैरसात्म्यैः, तथा यस्मिन् ऋतौ यदुचितं तद्विपरीतैः। जलाभिरमणैः=जलक्रीडाऽऽदिभिः। वेगविघातैः=मूत्रपुरीषादिहठधारणैः। कृमिदोषतः=कृमिभिः पक्वाशयस्य दुष्टेः। एतानि यथासम्भवं वातादीनां दुष्टेः कारणानि बोद्धव्यानि।

*ननु एवं सति स्वहेतुदुष्टेन वातादिनाऽतिसारो भवत्येव, तावन्मात्रं वाच्यं किमर्थं गुर्वाद्यभिधानम्? उच्यते—गुर्वादिहेतुदूषिता एव वातादयो बाहुल्येनातिसारं जनयन्ति,न तु लङ्घनभुक्तजीर्णताऽऽदिलघ्वन्नक्रोधतृषाक्षुधाऽभिहननदध्वारनालव्यायामवर्षाशरद्वसन्तादिभिः कुपिताः। अतो गुर्वादीन्युच्यन्ते। एवमन्यत्रापि बोद्धव्यम् ॥१-३॥

अथातीसारस्य पूर्वरूपमाह—

हृन्नाभिपार्श्वोदरकुक्षितोदगात्रावसादानिलसन्निरोधाः।
विट्सङ्ग आध्मानमथाविपाको भविष्यतस्तस्य पुरःसराणि ॥४॥

*विट्सङ्गः=पुरीषाप्रवृत्तिः। अविपाको भुक्तस्य। पुरःसराणि=एतानि लक्षणानि पूर्वभावीनि ॥ ४ ॥

अथातीसारस्य सम्प्राप्तिमाह—

संशम्यापां धातुरग्निं प्रवृद्धो वर्चोमिश्रो वायुनाऽधः प्रणुन्नः।
सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं षड्विधं तं वदन्ति ॥ ५ ॥

*अपां धातुः=अत्र समासाकरणाद् बहुत्वेन च रसजलमूत्रस्वेदमेदःकफपित्तरक्तादयो द्रवधातवो गृह्यन्ते। प्रवृद्धः, अग्निं संशम्य=शमयित्वा, वर्चोमिश्रः=पुरीषयुक्तः, वायुना, अधः प्रणुन्नः=अधःप्रेरितः। अथ सामान्यं रूपमाह-अतिसरति नदीवत्। अतीसारं तमाहुर्व्याधिं घोरमिति=यो रसादिद्रवधातुः, अतीव सरतीति=प्रकृतिमतिक्रम्य गुदाध्वना सरति, तं व्याधिमतीसारमाहुः। किंविधम्? घोरम्="घोरं भीमं भयानकम्" इत्यमरः। अस्य संख्यामाह-षड्विधं तं वदन्तीति ॥ ५ ॥

षड्विधत्वं विवृणोति—

एकैकशः सर्वशश्चापि दोषैः शोकेनान्यः षष्ठ आमेन चोक्तः ॥६॥

अथातीसारस्य सामान्यस्य चिकित्सामाह--

आमपक्वं क्रमं हित्वा नातिसारे क्रिया यतः ।
अतोऽतिसारे सर्वस्मिन्नामं पक्वञ्च लक्षयेत् ॥ ७ ॥

अथामातिसारस्य क्रमचिकित्सा ।

तत्रामपक्वयोर्लक्षणमाह--

संसृष्टमामैर्दोषैस्तु न्यस्तमप्सु निमज्जति ।
पुरीषं भृशदुर्गन्धि पिच्छिलं चामसंज्ञितम् ॥ ८ ॥
एतान्येव तु लिङ्गानि विपरीतानि यस्य वै ।
लाघवञ्च विशेषेण तन्तु पक्वं विनिर्दिशेत् ॥ ९ ॥
न च संग्राहकं दद्यात्पूर्वमामातिसारिणे ।
अकाले संगृहीतस्तु विकारान्कुरुते बहून् ॥ १० ॥
दण्डकालसकाध्मानग्रहण्यर्शोभगन्दरान् ।
शोथपाण्डूवामयप्लीहगुल्ममेहोदरज्वरान् ॥ ११ ॥
डिम्भस्थः स्थविरस्थश्च वातपित्तात्मकश्च यः ।
क्षीणधातुबलश्चापि बहुदोषोऽतिनिस्रुतः ॥
आमोऽपि स्तम्भनीयः स्यात्पाचनान्मरणं भवेत् ॥ १२ ॥
लङ्घनमेकं मुक्त्वा न चान्यदस्तीह भेषजं बलिनः ।
समुदीर्णदोषनिचयं तत्पाचयेत्तथा शमयेत् ॥ १३ ॥
धान्याम्बुभ्यां शृतं तोयं तृष्णादाहातिसारिणे ।
ह्रीबेरशृङ्गबेराभ्यां मुस्तपर्पटकेन वा ।
मुस्तोदीच्यशृतं शीतं प्रदातव्यं पिपासवे ॥ १४ ॥

*लङ्घन एव दोषदुःसहपिपासायां, दोषपाकार्थं षडङ्गविधिनाऽर्द्धं शृतं योगचतुष्टयमाह—धान्येति ॥ १४ ॥

अथ लङ्घनान्ते भोजनमाह—

हितं लङ्घनमेवादौ पूर्वरूपेऽतिसारिणे ।
कार्यं वाऽनशनस्यान्ते प्रद्रवं लघु भोजनम् ॥ १५ ॥

अथ पथ्याऽऽदिक्वाथमाह—

पथ्यादारुवचामुस्तैर्नागरातिविषाऽन्वितैः ।

आमातीसारनाशाय क्वाथमेभिः पिबेन्नरः ॥ १६ ॥

अथ पाठाऽऽदिचूर्णमाह—

पाठाहिङ्ग्वजमोदोग्रापञ्चकोलाह्वजं रजः ।
उष्णाम्बुपीतं सरुजं जयत्यामंससैन्धवम् ॥ १७ ॥

अथ हरीतक्यादिकल्कमाह—

हरीतकी सातिविषा हिङ्गु सौवर्चलं वचा ।
सैन्धवञ्चापि संपिष्य पाययेदुष्णवारिणा ॥ १८ ॥
आमातीसारयोगोऽयं पाचयित्वा चिकित्सति ।
आमातीसारो योगेन यस्त्वेतेन न शाम्यति ॥ १९ ॥
न तं योगशतेनापि चिकित्सति चिकित्सकः ॥ २० ॥

अथ वत्सकादिक्वाथमाह—

वत्सकातिविषाबिल्वं मुस्तकं बालकं शटी ।
अतीसारं जयेत्साम चिरजं रक्तशूलजित् ॥ २१ ॥

अथ शुण्ठीपुटपाककल्कावाह—

एरण्डरससम्पिष्टं पक्वमामञ्च नागरम् ।
आमातीसारशूलघ्नं पाचनं दीपनं परम् ॥ २२ ॥
*नागरस्य पुटपाकः कल्कश्च ॥ २२ ॥

अथ धान्यादिपञ्चकक्वाथमाह—

धान्यबालकबिल्वाब्दनागरैः पाचितं जलम् ।
आमशूलविबन्धघ्नं पाचनं दीपनं परम् ॥ २३ ॥

अथ धान्यादिचतुष्कक्वाथमाह—

पित्ते धान्यचतुष्कन्तु शुण्ठीत्यागाद्वदन्ति हि ।
रक्तेऽपि पित्तसाधर्म्याद्देयं धान्यचतुष्टयम् ॥ २४ ॥

इत्यामातीसारचिकित्सा ।

अथ पक्वातीसारचिकित्सा ।

तत्र लोध्रादिचूर्णमाह—

सलोध्रं धातकीबिल्वमुस्ताऽऽम्रास्थिकलिङ्गकम् ।
पिबेन्माहिषतक्रेण पक्वातीसारनाशनम् ॥ २५ ॥

अथ समङ्गाऽऽदियोगचतुष्टयमाह—

समङ्गा धातकीपुष्पं मञ्जिष्ठा लोध्र एव च ।
शाल्मलीवेष्टको लोध्रो दाडिमद्रुफलत्वचौ ॥ २६ ॥
आम्रास्थिमध्यं लोध्रश्च बिल्वमध्यं प्रियङ्गु च ।
मधुकं शृङ्गवेरश्च दीर्घवृन्तत्वगेव च ॥ २७ ॥
चत्वार एते योगाः स्युः पक्वातीसारनाशनाः ।
ते योगा उपयोज्याः स्युः सक्षौद्रास्तण्डुलाम्बुना ॥ २८ ॥

*समङ्गा=लज्जालुः । शाल्मलीवेष्टको=मोचरसः । दाडिमस्य द्रुमफलयोस्त्वचौ । प्रियङ्गोर्नपुंसकत्वमत्र फले वर्त्तमानत्वात् । शृङ्ग-वेरमत्र शुण्ठी । दीर्घवृन्तः=श्योनाकस्तस्य त्वचः । समङ्गाऽऽदीनि चत्वारि चूर्णानि ॥ २६-२८ ॥

अथ गङ्गाधरक्वाथमाह—

कञ्चटदाडिमजम्बूशृङ्गाटकपत्रबिल्वबर्हिष्ठम् ।
जलधरनागरसहितं गङ्गामपि वेगवाहिनीं रुन्ध्यात् ॥ २९ ॥

*कञ्चटः=[चौराई] शाकस्य भेदः । कञ्चटादिभिश्चतुर्भिः पत्रश-ब्दः सम्बद्ध्यते । बर्हिष्ठं=बालकम् ॥ २९ ॥

अथ गङ्गाधरचूर्णमाह—

मोचरसमुस्तनागरपाठाऽरलुधातकीकुसुमैः ।
चूर्णं मथितसमेतं रुणद्धि गङ्गाप्रवाहमपि सद्यः ॥ ३० ॥

*अरलुः=शोनापाठा । मथितं=निर्जलं दधि वस्त्रपूतम् ॥ ३० ॥

अथ द्वितीयगङ्गाधरचूर्णमाह--

मुस्ता वत्सकबीजं मोचरसो बिल्वधातकीलोध्रम् ।
गुडमथितसंप्रयुक्तं गङ्गामपि वेगवाहिनीं रुन्ध्यात् ॥ ३१ ॥

अथ वृद्धगङ्गाधरचूर्णमाह—

मुस्ताऽरलुकशुण्ठीभिर्धातकीलोध्रबालकैः ।
बिल्वमोचरसाभ्यां च पाठेन्द्रयववत्सकैः ॥ ३२ ॥
आम्रबीजसमङ्गाऽतिविषायुक्तैश्च चूर्णितैः ।
मधु तण्डुलपानीयं पीतं हन्ति प्रवाहिकाम् ॥ ३३ ॥

हन्ति सर्वानतीसारान्ग्रहणीं हन्ति वेगतः ।
वृद्धगङ्गाधरं चूर्णं रुन्ध्याद्गोर्वाणवाहिनीम् ॥ ३४ ॥

अथाङ्कोलकल्कमाह—

अङ्कोलमूलकल्कस्तण्डुलपयसा समाक्षिकः पीतः ।
सेतुरिव वारिवेगं झटिति निरुन्ध्यादतीसारम् ॥ ३५ ॥

*अङ्कोलः="ढेला" इति प्रसिद्धः ॥ ३५ ॥

अथ कुटजाष्टकावलेहमाह—

कुटजत्वक्तुलामार्द्रां द्रोणनीरे पचेद्भिषक् ।
पादशेषं शृतं नीत्वा वस्त्रपूतं पुनः पचेत् ॥ ३६ ॥
लज्जालुर्धातकी बिल्वं पाठा मोचरसस्तथा ।
मुस्ता चातिविषा चैव चूर्णमेषां पलं पलम् ॥ ३७ ॥
निक्षिप्य विपचेत्तावद्यावद्दर्वी प्रलिप्यते ।
जलेन च्छागदुग्धेन पीतो मण्डेन वा जयेत् ॥ ३८ ॥
घोरान्सर्वानतीसारान्नानावर्णान्सवेदनान् ।
असृग्दरं समस्तञ्च तथाऽर्शांसि प्रवाहिकाम् ॥ ३९ ॥

अथामलकालवालमाह—

कृत्वाऽऽलवालं सुदृढं पिष्टैरामलकैर्भिषक् ।
आर्द्रकस्य रसेनाशु पूरयेन्नाभिमण्डलम् ॥ ४० ॥
नदीवेगोपमं घोरं प्रवृद्धं दुर्द्धरं नृणाम् ।
सद्योऽतीसारमजयं नाशयत्येष योगराट् ॥ ४१ ॥

अथ पाठाऽऽद्यालवालमाह—

पाठा पिष्टा च गोदध्ना तथा मध्यत्वगाम्रजा ।
अतीसारं व्यथादाहं हन्त्येवाशु न संशयः ॥ ४२ ॥

अथ वातातिसारस्य लक्षणमाह—

अरुणं फेनिलं रूक्षमल्पमल्पं मुहुर्मुहुः ।
शकृदामं सरुक्छब्दं मारुतेनातिसार्यते ॥ ४३ ॥

*अरुणम्=ईषद्रक्तम् । शकृत्=पुरीषम् । सरुक्छब्दम्=शब्दो· गुदे, तत्साहचर्याद्रुगपि गुद एव बोद्धव्या ॥ ४३ ॥

अथ वातातिसारस्य चिकित्सामाह—

वचा चातिविषा मुस्तं बीजानि कुटजस्य च ।
श्रेष्ठः कषाय एतेषां वातातीसारशान्तये ॥ ४४ ॥

अथ पित्तातिसारस्य लक्षणमाह—

पित्तात्पीतं शकृद्रक्तं दुर्गन्धि हरितं द्रुतम् ।
गुदपाकतृषामूर्च्छादाहयुक्तं प्रवर्त्तते ॥ ४५ ॥

अथ पित्तातिसारस्य चिकित्सा ।

तत्र बिल्वादिक्वाथमाह—

बिल्वशक्रयवाम्भोदबालकातिविषाकृतः ।
कषायो हन्त्यतीसारं सामं पित्तसमुद्भवम् ॥ ४६ ॥

अथ रसाञ्जनादिचूर्णमाह—

रसाञ्जनं सातिविषं कुटजस्य फलत्वचम् ।
धातकीं शृङ्गवेरञ्च पाययेत्तण्डुलाम्बुना ॥ ४७ ॥
निहन्ति मधुना पीतं पित्तातीसारमुल्वणम् ।
अग्निं सन्दीपयेदेतच्छूलमाशु निवारयेत् ॥ ४८ ॥

अथ पित्तातीसारभेदस्य रक्तातीसारस्य लक्षणसम्प्राप्तिमाह—

पित्तकृन्ति यदाऽत्यर्थं द्रव्याण्यश्नाति पैत्तिके ।
तदाऽस्य जायतेऽभीक्ष्णं रक्तातीसार उल्वणः ॥ ४९ ॥

अथ रक्तातिसारचिकित्सा ।

तत्र कुटजदाडिमक्वाथमाह—

वत्सत्वग्दाडिमतरुशलाटुफलसम्भवा त्वक् च ।
त्वग्युगलं पलमानं विपचेदष्टांशसम्मिते तोये ॥ ५० ॥
अष्टमभागं शेषं क्वाथं मधुना पिबेत्पुरुषः ।
रक्तातिसारमुल्वणमतिशयितं नाशयेन्नियतम् ॥ ५१ ॥

अथ कुटजादिक्वाथमाह—

कुटजातिविषामुस्ताबालकं लोध्रचन्दनम् ।
धातकी दाडिमं पाठा क्वाथमेषां समाक्षिकम् ॥ ५२ ॥
पिबेद्रक्तातिसारे तु दाहशूलप्रशान्तये ।
कुटजादिकषायोऽयं सर्व्वातीसारनाशनः ॥ ५३ ॥

अथ तिलकल्कमाह—

कल्कस्तिलानां कृष्णानां शर्करापञ्चभागिकः ।
आजेन पयसा पीतः सद्योऽतीसारनाशनः ॥ ५४ ॥

अथ वत्सकादिक्वाथमाह—

सवत्सकः सातिविषः सबिल्वः सोदीच्यमुस्तश्च कृतः कषायः ।
सामे सशूले सहशोणिते च चिरप्रवृत्तेऽपि हितोऽतिसारे ॥ ५५ ॥

अथ कृष्णमृदादिकल्कमाह—

कृष्णमृन्मधुकं लोध्रं कौटजं तण्डुलाम्बुना ।
पीतमेकत्र सक्षौद्रं रक्तसंग्राहणं परम् ॥ ५६ ॥

अथ गुडबिल्वमाह—

गुडेन भक्षयेद्बिल्वं रक्तातीसारनाशनम् ।
आमशूलविबन्धघ्नं कुक्षिरोगहरं परम् ॥ ५७ ॥

अथ जम्ब्वादिस्वरसमाह—

जम्ब्वाम्रामलकीनान्तु कुट्टयेत्पल्लवान्नवान् ।
तत्पीतं मधुना युक्तं रक्तातीसारनाशनम् ॥ ५८ ॥

अथ कुटजक्षीरमाह—

निक्वाथ्य मूलममलं गिरिमल्लिकायाः-
सम्यक् पलद्वितयमम्बुचतुःशरावे ।
तत्पादशेषसलिलं खलु शोषणीयं-
क्षीरे पलद्वयमिते कुशलैरजायाः ॥ ५९ ॥
प्रक्षिप्य माषकानष्टौ मधुनस्तत्र शीतले ।
रक्तातिसारी तत्पीत्वा नैरुज्यं क्षिप्रमाप्नुयात् ॥ ६० ॥

अथ शतावरीकल्कमाह—

पीत्वा शतावरीकल्कं पयसा क्षीरभुग् जयेत् ।
रक्तातिसारं पीत्वा वा तया सिद्धं घृतं नरः ॥ ६१ ॥

अथ नवनीतावलेहमाह—

गोदुग्धनवनीतं च मधुना सितया सह ।
लीढं रक्तातिसारे तु ग्राहकं परमं मतम् ॥ ६२ ॥

अथ चन्दनकल्कमाह—

पीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना ।
रक्तातीसारजिद्रक्तपित्ततृड्दाहमेहनुत ॥ ६३ ॥

*चन्दनमत्र श्वेतचन्दनम् ॥ ६३ ॥

अथ गुददाहपाकव्यथाबहिर्निःसरणभ्रंशोपायानाह—

विरेकैर्बहुभिर्यस्य गुदं पित्तेन दह्यते ।
पच्यते वा तयोः कार्यं सेकप्रक्षालनादिकम् ॥ ६४ ॥

*आदिशब्देन लेपादिसंग्रहः ॥ ६४ ॥

पटोलयष्टिमधुकक्काथेन शिशिरेण हि ।
गुदप्रक्षालनं कार्यं तेनैव गुदसेचनम् ॥ ६५ ॥
दाहे पाके हितं छागीदुग्धं सक्षौद्रशर्करम् ।
गुदस्य क्षालने सेके युक्तं पाने च भोजने ॥ ६६ ॥

*गुदस्य दाहपाकयोः ॥ ६६ ॥

अतिप्रवृत्त्या महती भवेद्यदि गुदव्यथा ।
स्विन्नमूषकमांसेन तदा संस्वेदयेद् गुदम् ॥ ६७ ॥
अथ गोधूमचूर्णस्य संभृतस्य तु वारिणा ।
साज्यस्य गोलकं कृत्वा मृदु संस्वेदयेद् गुदम् ॥ ६८ ॥
गुदनिःसरणे प्रोक्तं चाङ्गेरीघृतमुत्तमम् ।
गुदभ्रंशे गुदं स्नेहैरभ्यज्यान्तः प्रवेशयेत् ॥ ६९ ॥
प्रविष्टं स्वेदयेन्मन्दं मूषकस्यामिषेण हि ॥ ७० ॥

*मूषकस्यामिषेण काञ्जिकस्विन्नेन एरण्डपत्रादिस्थापितेन स्वेदयेत् ॥ ७० ॥

शम्बूकमांसं सुस्विन्नं सतैललवणान्वितम् ।
ईषद् घृतेन चाभ्यज्य स्वेदयेत्तेन यत्नतः ॥ ७१ ॥
गुदभ्रंशमशेषेण नाशयेत्क्षिप्रमेव च ।
मूषकस्याथ वसया पायुं सम्यक्प्रलेपयेत् ॥
गुदभ्रंशाभिधो व्याधिः प्रणश्यति न संशयः ॥ ७२ ॥
चाङ्गेरीकोलदध्यम्लक्षारनागरसंयुतम् ।

घृतं विपक्कं पातव्यं गुदभ्रंशगदापहम् ॥ ७३ ॥

*चाङ्गेरी=चतुःपत्री अम्ललोणिका, तस्याः स्वरसः। कोलस्य काथः। दध्यम्लं=दधिरूपमम्लम्। एतत् त्रयं मिलितं घृताच्चतुर्गुणम्। क्षारनागरयोः कल्कम् ॥ ७३ ॥

अथ पद्मिनीपत्रचूर्णमाह—

कोमलं पद्मिनीपत्रं यः खादेच्छर्कराऽन्वितम्।
एतन्निश्चित्य निर्दिष्टं न तस्य गुदनिर्गमः ॥ ७४ ॥

*पद्मिनीपत्रं संशोष्य संचूर्ण्य शर्करायुक्तं खादेत्। अयं तु गुदभ्रंशोऽतीसारं विनाऽपि भवति, ततः क्षुद्ररोगेषु लिखितः। अत्र गुदस्य दाहपाकव्यथाप्रसंगाद् भ्रंशोऽपि लिखितः। चिकित्सा तूभयत्र तुल्यैव ॥ ७४ ॥

अथ कफातीसारस्य लक्षणमाह—

श्वेतं स्निग्धं घनं बद्धं शीतलं मन्दवेदनम्।
गौरवारुचिसंयुक्तं श्लेष्मणा सार्यते शकृत् ॥ ७५ ॥

अथ कफातिसारस्य लक्षणमाह—

श्लेष्मातिसारे प्रथमं हितं लङ्घनपाचनम्।
योज्यश्चामातिसारघ्नो यथोक्तो दीपनो गणः ॥ ७६ ॥

अथ चव्यादिक्वाथमाह—

चव्यं सातिविषामुस्तं बालबिल्वं सनागरम्।
वत्सकत्वक्फलं पथ्या छर्दिश्लेष्मातिसारनुत् ॥ ७७ ॥

अथ हिङ्ग्वादिचूर्णमाह—

हिङ्गु सौवर्चलं व्योषमभयाऽतिविषा वचा।
पीतमुष्णाम्बुना चूर्णमेषां श्लेष्मातिसारनुत् ॥ ७८ ॥

अथ द्विदोषजातीसारस्य सामान्यचिकित्सामाह—

क्रिमिशत्रुवचाबिल्वपाठाधान्याककट्फलम्।
एषां क्वाथं भिषग्दद्यादतीसारे द्विदोषजे ॥ ७९ ॥
तेषां चिकित्सा प्रोक्तैव विशिष्टा च निगद्यते ॥ ८० ॥

अथ वातश्लेष्मातिसारस्य चिकित्सामाह—

कट्फलं मधुकं लोध्रं त्वग्दाडिमफलस्य च।

सतण्डुलजलं चूर्णं वातश्लेष्मातिसारनुत् ॥ ८१ ॥

अथ वातपित्तातिसारस्य चिकित्सामाह—

चित्रकातिविषामुस्तं बालबिल्वं सनागरम् ।
वत्सकत्वक्फलं पथ्या वातपित्तातिसारनुत् ॥ ८२ ॥

अथ पित्तकफातीसारस्य चिकित्सामाह—

मुस्ता सातिविषा मूर्वा वचा च कुटजः समाः ।
एषां कषायः सक्षौद्रः पित्तश्लेष्मातिसारनुत् ॥ ८३ ॥

अथ सन्निपातातीसारस्य लक्षणमाह—

तन्द्रायुक्तो मोहसादास्यशोषी वर्चः कुर्यान्नैकरूपं तृषाऽऽर्त्तः ।
सर्वोद्भूते सर्वलिङ्गोपपत्तिः कृच्छ्रैः साध्यो बालवृद्धाबलानाम् ॥ ८४ ॥

अथ सन्निपातातीसारस्य चिकित्सा ।

तत्र पञ्चमूल्यादिक्वाथमाह—

पञ्चमूलीबलाबिल्वगुडूचीमुस्तनागरैः ।
पाठाभूनिम्बवर्हिष्ठकुटजत्वक्फलैः श्रृतम् ॥ ८५ ॥
सर्वजं हन्त्यतीसारं ज्वरञ्चापि तथा वमिम् ।
सशूलोपद्रवं श्वासं कासं चापि सुदुस्तरम् ॥ ८६ ॥
पञ्चमूली च सामान्या पित्ते योज्या कनीयसी ।
वाते पुनर्बलासे च सा योज्या महती मता ॥ ८७ ॥

अथ चतुःसममोदकमाह—

अभया नागरं मुस्तं गुडेन सह योजितम् ॥
चतुःसमेयं गुटिका सर्वातीसारनाशिनी ॥ ८८ ॥
आमातीसारमानाहं सविबन्धं विसूचिकाम् ।
कृमीनरोचकं हन्याद्दीपयत्याशु चानलम् ॥ ८९ ॥

अथ कुटजपुटपाकमाह—

तत्कालाकृष्टकुटजत्वचं तण्डुलवारिणा ।
पिष्ट्वा चतुःपलमितां जम्बूपत्रेण वेष्टिताम् ॥ ९० ॥
सूत्रेण बद्ध्वा गोधूमपिष्टेन परिवेष्टिताम् ।
लिप्ताञ्च घनपङ्केन निर्दहेद्गोमयाग्निना ॥ ९१ ॥
अङ्गारवर्णाञ्च मृदं दृष्ट्वा वह्नेः समुद्धरेत् ।

ततो रसं समादाय शीतं क्षौद्रयुतं पिबेत् ॥ ९२ ॥
उक्तः श्लक्ष्णात्रिपुत्रेण पुटपाकस्तु कौटजः ।
जयेत्सर्वानतीसारान् रक्तजान्सुचिरोत्थितान् ॥ ९३ ॥

अथ कुटजावलेहमाह—

कुटजत्वक्कृतः क्वाथो वस्त्रपूतो हिमीकृतः ।
स लीढोऽतिविषायुक्तः स्यात् त्रिदोषातिसारनुत् ॥ ९४ ॥
इच्छन्त्यत्राष्टमांशेन क्वाथादतिविषारजः ।
प्रक्षेपयेच्चतुर्थांशमिति के चिद्वदन्ति हि ॥ ९५ ॥

अथाङ्कोटवटकमाह—

पलमङ्कोटमूलस्य पाठां दार्वीञ्च तत्समाम् ।
पिष्ट्वा तण्डुलतोयेन वटकानक्षसम्मितान् ॥ ९६ ॥
छायाशुष्कांश्च तान्कुर्यात्तेष्वेकं तण्डुलाम्बुना ।
पेषयित्वा प्रदद्यात्तं पानाय गदिने भिषक् ॥ ९७ ॥
वातपित्तकफोद्भूतान्द्वन्द्वजान्सान्निपातिकान् ।
हन्यात्सर्वानतीसारान्वटकोऽयं प्रयोजितः ॥ ९८ ॥

अथागन्तुजस्य शोकातिसारस्य सम्प्राप्तिपूर्वकं लक्षणमाह—

तैस्तैर्भावैः शोचतोऽल्पाशनस्य वाष्पोष्मा वै वह्निमाविश्य जन्तोः ।
कोष्ठं गत्वा क्षोभयेत्तस्य रक्तं तच्चाधस्तात्काकणन्तीप्रकाशम् ॥ ९९ ॥
निर्गच्छेद्वै विड्विमिश्रं ह्यविड् वा निर्गन्धं वा गन्धवद्वाऽतिसारः ।
शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं रोगो वैद्यैः कष्ट एष प्रदिष्टः ॥१००॥

*अयमर्थः—तैस्तैर्भावैः=बन्धुवित्तक्षयादिभिः । शोचतः=शोकं-कुर्वतः । जन्तोः=प्राणिनः । वाष्पोष्मा=बाष्पः=शोकजदेहोष्मणा जनितं नेत्रनासागलादिषु जलं, तेन सहित उष्मा=शोकजं देहतेजः । स कोष्ठं गत्वा वह्निमाविश्य=जठराग्निं मन्दीकृत्य, वाष्पसाहित्यादुष्मणाऽपि वह्नेर्मन्दीभाव इति न दोषः । वह्नेर्मन्दीभावादल्पाशनस्येति, जन्तोर्विशेषणम् । ततस्तस्य जन्तो रक्तं क्षोभयेत्=स्वस्थानाच्चालयेदिति संप्राप्तिः । अथ लक्षणम् । तच्च=रक्तम्, अधस्ताद्=गुदात् । काकणन्तीप्रकाशम्=गुञ्जाफलसदृशम् । विड्विमिश्रं गन्धवच्च । अविड् निर्गन्धं वा निर्गच्छेत् । शोकोत्पन्नोऽतिसारोऽतिमात्रं दुश्चि-

कित्स्यः, शोकापनोदनं विना केवलेन भेषजेन प्रतीकर्त्तुमशक्यत्वात् ।
एषोऽतीसारः कष्टसाध्यः कथितः ॥ ९९–१०० ॥

अथागन्तुजस्य भयातीसारस्य संप्राप्तिपूर्वकं लक्षणमाह—

भयेन क्षोभिता दोषा दूषयन्ति मलं यदा ।
तदाऽतिसार्यते जन्तुः क्षिप्रमुष्णं जलप्लवम् ॥ १०१ ॥
वातपित्तातिसारस्य प्रायो लिङ्गैः समन्वितम् ।
अभयोपशमाच्छर्म यस्मिन्स्यात्स भयात्स्मृतः ॥ १०२ ॥

*प्लवतीति प्लवम् = जले प्लवमानमित्यर्थः । ननु भयातिसारस्य कथमागन्तुजत्वमयमपि दोषज एव । यत आह—भयेन क्षोभिताः=दूषिताः, दोषा मलं दूषयन्ति तन्मलमतिसरति, अत्र पूर्वमेव दोषसम्बन्धः । उच्यते—

*रागद्वेषभयाद्यैश्च ते स्युरागन्तवो गदाः ।

*इति वचनाद् भयातिसार आगन्तुज एव । भयेनैव हेतुभूतेन दोषा वातपित्तकफाः क्षोभिताः=सञ्चालिताः । अतिसारं जनयन्ति । क्षोभिताः=सञ्चालिताः, न तु दूषिताः । भयेन त्रयाणामपि दोषाणां-दूषणासम्भवात् । अतिसत्तं चलिता वातपित्तकफा मलं दूषयन्ति तत्सर्वं वातपित्तकफमलं भयेनैवातिसार्यते । पश्चाद् वातसम्बन्धेन । "भयाद्वायुरिति" वचनात् । अत एव भयातिसारे वातहर्यैव क्रिया कथितेति साधुः ॥ १०१—१०२ ॥

अथ शोकातीसारभयातीसारयोश्चिकित्सामाह—

भयशोकसमुद्भूतौ ज्ञेयौ वातातिसारवत् ।
तयोर्वातहरी कार्या हर्षणाश्वासनैः क्रिया ॥ १०३ ॥

*वातातिसारवद्वातातिसारलक्षणयोस्तयोश्चिकित्सा च हर्षणाश्वासनपूर्विका वातहरी कर्त्तव्या ॥ १०३ ॥

अथामातीसारस्य सम्प्राप्तिपूर्वकं लक्षणमाह—

अन्नाजीर्णात्प्रद्रुताः क्षोभयन्तो दोषाः कोष्ठे धातुसङ्घान्मलांश्च ।
नानावर्णान्नैकशः सारयन्ति शूलोपेतं षष्ठमेनं वदन्ति ॥ १०४ ॥

*अन्नं भुक्तं तदजीर्णञ्चेति कर्मधारये अन्नाजीर्णं तस्मात्प्रद्रुताः = विमार्गगाः, क्षोभयन्तः=चालयन्तः । "नैकश" इत्यत्र नाकादित्वा-

न्तरविपर्ययः। नन्वामेन दोषा दूष्यन्ते गुर्वादिभक्षणादिभिरिव ते चातिसारमुत्पादयन्ति, न त्वामेनातिसारमुत्पादयन्ति। तेनामातिसारोऽपि दोषज एव किमर्थं पृथगुक्तम्? उच्यते—आमातिसारस्य चिकित्सार्थम्। अतिसारेषु सर्वेष्वेव संग्राहकमौषधमुक्तमामातिसारे तु ग्राहकं निषिद्धम्। यत उक्तम्—

*नामे संग्राहकं दद्यादतिसारे कदा चन।
संगृहीतो बलादामो विकारान्कुरुते बहून्॥ १॥

*बलाद्=भेषजबलाद्, विकारान्=ग्रहण्याध्मानशूलगुल्मशोथोदरज्वरादीन्॥ १०४॥

अथामातीसारस्य चिकित्सामाह—

वत्सकातिविषाशुण्ठीबिल्वहिङ्गुयवाम्बुदाः।
चित्रकेण युतः क्वाथ आमातीसारनाशनः॥ १०५॥

अथ शोथातीसारस्य चिकित्सामाह—

शोथघ्नीन्द्रयवौ पाठा श्रीफलातिविषाघनाः।
क्वथिताः सोषणाः पीताः शोथातीसारनाशनाः॥ १०६॥

*शोथघ्नी=पुनर्नवा। ऊषणं=मरिचम्॥ १०६॥

अथ छर्द्यतिसारस्य चिकित्सामाह—

आम्रास्थिमध्यमालूरफलक्वाथः समाक्षिकः।
शर्करासहितो हन्याच्छर्द्यतीसारमुल्वणम्॥ १०७॥

*मालूरफलं=बिल्वफलम्॥ १०७॥

कषायो भृष्टमुद्गस्य सलाजमधुशर्करः।
निहन्याच्छर्द्यतीसारं तृष्णां दाहं ज्वरं भ्रमम्॥ १०८॥

अथ निःसारकस्य चिकित्सामाह—

दध्ना ससारेण समाक्षिकेण भुञ्जीत निःसारकपीडितस्तु।
सुतप्तकुप्यक्वथितेन वाऽपि क्षीरेण शीतेन मधुप्लुतेन॥१०९॥

*निःसारकः=प्रवाहिका "निठाही"ति लोके। सुतप्तकुप्यक्वथितेन=सुतप्तसुवर्णरजतनिर्वाणक्वथितेन, भुञ्जीत पथ्यमिति शेषः॥१०९॥

अथ विष्ठाक्षयस्य चिकित्सामाह—

दीप्ताग्निर्निःपुरीषो यः सार्यते फेनिलं शकृत्।

स पिबेत्फाणितं शुण्ठीं दधि तैलं पयो घृतम् ॥ ११० ॥
बलाविश्वाशृतं क्षीरं गुडतैलानुयोजितम् ।
दीप्ताग्निं पाययेत्प्रातः सुखदं वर्चसः क्षये ॥ १११ ॥

अथ बिल्वतैलमाह—

तुलां संकुट्य बिल्वस्य पचेत्पादावशेषितम् ।
सक्षीरं साधयेत्तैलं श्लक्ष्णपिष्टैरिमैः समैः ॥ ११२ ॥
बिल्वं सधातकीकुष्ठं शुण्ठीरास्नापुनर्नवाः ।
देवदारुवचामुस्तं लोध्रमोचरसान्वितम् ॥ ११३ ॥
एभिर्मृद्वग्निना पक्वं ग्रहण्यर्शोऽतिसारनुत् ।
बिल्वतैलमितिख्यातमत्रिपुत्रेण भाषितम् ॥ ११४ ॥
ग्रहण्यर्शोऽधिकारे ये स्नेहाः समुपदर्शिताः ।
प्रयोज्यास्तेऽतिसारेऽपि त्रयाणां तुल्यहेतुना ॥ ११५ ॥

अथातिसारभेदप्रवाहिकायाः सम्प्राप्तिपूर्वकं लक्षणमाह—

वायुः प्रवृद्धो निचितं बलासं नुदत्यधस्तादहिताशनस्य ।
प्रवाहतोऽल्पं बहुशो मलाक्तं प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः ॥११६॥

*अस्यायमर्थः—अहिताशनस्य = अतिशयेन वातलभक्ष्यभोजिनः, प्रवृद्धो वायुः, प्रवाहतः = कण्ठे हृद्बलेन सशब्दं वायुमपानमार्गेण त्यजतः, निचितं = सञ्चितं, बलासं = कफं, मलाक्तं = पुरीषयुक्तम् । अल्पं बहुशः = वारंवारम्, अधस्ताद् = गुदान्नुदति । वैद्यास्तां प्रवाहिकां प्रवदन्ति ॥ ११६ ॥

अथ वातादिदोषभेदेन प्रवाहिकालक्षणमाह—

प्रवाहिका वातकृता सशूला पित्तात्सदाहा सकफा कफाच्च ।
सशोणिता शोणितसम्भवा च ताः स्नेहरूक्षप्रभवा मतास्तु ॥११७॥

*अत्र रूक्षप्रभवा वातजा, स्नेहप्रभवा कफजा—तुशब्दात्तीक्ष्णोष्णप्रभवा पित्तजा रक्तजा च ॥ ११७ ॥

तासामतीसारवदादिशेच्च लिङ्गं क्रमं चामविपक्वतां च ॥ ११८ ॥

अथ प्रवाहिका चिकित्सा ।

तत्र बिल्वाद्यवलेहमाह—

बिल्वपेषी गुडं लोध्रं तैलं मरिचसंयुतम् ।

लीढ्वा प्रवाहिकाऽऽक्रान्तः सत्वरं सुखमाप्नुयात् ॥११९॥

अथ धातक्यादिमाह—

धातकी बदरीपत्रं कपित्थं रसमाक्षिकम् ।
सलोध्रमेकतो दध्ना पिबेन्निर्वाहिकाऽर्दितः ॥ १२० ॥

*एकतः=प्रत्येकं, दध्ना पिबेदित्यर्थः ॥ १२० ॥

अथासाध्यातीसारिणां लक्षणमाह—

पक्कजाम्बवसंकाशं यकृत्खण्डनिभं तनु ।
घृततैलवसामज्जवेसवारपयोदधि ॥ १२१ ॥
मांसधावनतोयाभं कृष्णं नीलारुणप्रभम् ।
कर्बुरं मेचकं स्निग्धं चन्द्रकोपगतं घनम् ॥ १२२ ॥
कुणपं मस्तुलुङ्गाभं सगन्धं कुथितं बहु ।
तृष्णादाहारुचिश्वासहिक्कापार्श्वास्थिशूलिनम् ॥ १२३ ॥
संमूर्च्छाऽरतिसंमोहयुक्तं पक्कवलीगुदम् ।
प्रलापयुक्तञ्च भिषग्वर्जयेदतिसारिणम् ॥ १२४ ॥
असंवृतगुदं क्षीणं शूलाध्मानैरुपद्रुतम् ।
गुदे पक्के गतोष्माणमतिसारिणमुत्सृजेत् ॥ १२५ ॥

*असंवृतगुदं=गुदसंवरणाक्षमम् । गुदे पक्के=गुदपाकारम्भके पित्ते विद्यमानेऽपि, शीतगात्रं=नष्टाग्निं वा ॥ १२५ ॥

श्वासशूलपिपासाऽऽर्त्तं क्षीणं ज्वरनिपीडितम् ।
विशेषेण नरं वृद्धमतिसारो विनाशयेत् ॥ १२६ ॥
शोथं शूलं ज्वरं तृष्णां श्वासं कासमरोचकम् ।
छर्दिं मूर्च्छां च हिक्काञ्च दृष्ट्वाऽतीसारिणं त्यजेत् ॥१२७॥
हस्तपादाङ्गुलीसन्धिप्रपाको मूत्रनिग्रहः ।
पुरीषस्योष्णताऽतीव मरणायातिसारिणः ॥ १२८ ॥
अतिसारी राजरोगी ग्रहणीरोगवानपि ।
मांसाग्निबलहीनो यो दुर्लभं तस्य जीवनम् ॥ १२९ ॥
बाले वृद्धे त्वसाध्योऽयं लिङ्गैरेतैरुपद्रुतः ।
अपि यूनामसाध्यं स्यादतिदुष्टेषु धातुषु ॥ १३० ॥

अथातिसारमुक्तस्य लक्षणमाह—

यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति ।
दीप्ताग्नेर्लघुकोष्ठस्य स्थितस्तस्योदरामयः ॥ १३१ ॥

अथातीसारिणो वर्जनीयान्याह—

स्नानावगाहावभ्यङ्गं गुरुस्निग्धादिभोजनम् ।
व्यायाममग्निसन्तापमतिसारी विवर्जयेत् ॥ १३२ ॥

*स्नानमुद्धृतजलेन । अवगाहो नद्यादौ ॥ १३२ ॥

अथ शङ्खपोटलीरसमाह—

प्रत्येकं दशगद्याणाः शुद्धसूतकगन्धयोः ।
विंशतिस्त्रिदिनं खल्वे पिष्ट्वा कुर्याच्च कज्जलीम् ॥
पश्चादर्कस्य दुग्धेन पिष्ट्वा तां कज्जलीं त्र्यहम् ॥ १३३ ॥
ततो वज्रस्य दुग्धेन पिष्ट्वा तां कज्जलीं त्र्यहम् ।
आर्द्रकं चित्रकं श्वेतं निःसहायञ्च मर्दयेत् ॥ १३४ ॥
पेषयेत्तद्रसैरेवं कज्जलीं तां दिनत्रयम् ।
पीतानाञ्च कपर्दीनां चूर्णं गद्याणविंशतिः ॥ १३५ ॥
विंशतिः शङ्खचूर्णस्य चत्वारिंशच्च मिश्रितम् ।
त्रिदिनं मर्दयेत्खल्वे पूर्वोक्तेन क्रमेण च ॥ १३६ ॥
त्र्यहमर्कस्य दुग्धेन वज्रीदुग्धेन च त्र्यहम् ।
तन्मध्ये कज्जलीं क्षिप्त्वा चित्रकार्द्ररसेन तु ॥ १३७ ॥
खल्वे पिष्ट्वा द्वयोः कार्या गुट्यो बदरसम्मिताः ।
लिप्त्वा दग्ध्वाऽऽशु चूर्णेन पक्वकुल्हारिकाऽन्तरम् ॥ १३८ ॥
प्रक्षिप्य गुटिकास्तत्र चूर्णलिप्तपिधानकम् ।
दत्त्वा वस्त्रं मृदा लिप्त्वा गर्त्तं हस्तप्रमाणकम् ॥ १३९ ॥
तद्गर्भे कुल्हरीं मुक्त्वा पुटो देयश्च शाणकैः ।
पश्चाच्चित्रकनीरेण स्वाङ्गशीतश्च पेषयेत् ॥ १४० ॥
गुटिकां पूर्वरीत्यैव कृत्वा देयः पुनः पुटः ।
दग्धानां गुटिकानाञ्च चूर्णं कृत्वाऽथ कूपके ॥ १४१ ॥
क्षेप्यं चैवं हि निष्पन्नो रसोऽयं शङ्खपोटली ।
आमज्वरातिसारे च श्वासे कासे तथैव च ॥ १४२ ॥

श्लेष्मपित्तामवातेषु मन्दाग्नौ ग्रहणीषु च ।
अष्टादशप्रमेहेषु जीर्णे जीर्णबलेषु च ॥ १४३ ॥
द्वात्रिंशन्मरिचैः साकं सघृतं वल्लपञ्चकम् ।
सर्वरोगेषु दातव्यं मरिचाज्यं विना ज्वरे ॥ १४४ ॥
शालयो दधिदुग्धादि भोजनं मधुरं हितम् ।
कट्वम्लक्षारतैलाद्यान्दूरतः परिवर्जयेत् ॥ १४५ ॥
विधिनाऽनेन कर्त्तव्यो रसोऽसौ शङ्खपोटली ।
क्रमेण विनिवर्त्तन्ते प्रोक्तरोगा न संशयः ॥ १४६ ॥

अथ विजयाऽवलेहमाह--

त्रैलोक्यविजयाजातीफले तुल्ये कलिङ्गकम् ।
गृहीत्वा द्विगुणं श्रेष्ठो लेहः सर्वातिसारनुत् ॥ १४७ ॥

अथातिविषाऽवलेहमाह-

बिल्वमोचरसलोध्रधातकीपुष्पचूतफलबीजसंयुता ।
नाशयेदतिविषाऽवलेहिका सिन्धुवेगमपि दुर्धरं ध्रुवम् ॥१४८॥

इति द्वितीयोऽतिसाराधिकारः समाप्तः ॥ २ ॥

अथ तृतीयो ज्वरातिसाराधिकारः ३ ।

तत्र ज्वरातिसारस्य निदानाकथने हेतुमाह—

ज्वरातिसारयोरुक्तं निदानं यत्पृथक्पृथक् ।
तस्माज्ज्वरातिसारस्य निदानं नोदितं पुनः ॥ १ ॥

अथ ज्वरातिसारस्य चिकित्सामाह—

ज्वरातिसारयोरुक्तं भेषजं यत्पृथक्पृथक् ।
न तन्मिलितयोः कार्यमन्योऽन्यं वर्धयेद्यतः ॥ २ ॥

*अयमभिप्रायः—ज्वरहरमनुलोमनं भवति, अतिसारहरं स्तम्भनं-भवति, अतः परस्परविरुद्धत्वात्पृथगुक्तं भेषजं मिलितयोर्न कार्यम् । यत आह—

*अनुलोमनं ज्वरघ्नं ग्राहकमतिसारहृद्भवति ।
पृथगुक्तमौषधं तज्ज्वरातिसारे विरुद्धमन्योऽन्यम् ॥ १ ॥ इति ॥२॥

अतस्तौ प्रतिकुर्वीत विशेषोक्तचिकित्सितैः ॥ ३ ॥
लङ्घनमेकं मुक्त्वा नचान्यदस्तीह भेषजं बलिनः ।
समुदीर्णदोषनिचयं तत्पाचयेत्तथा शमयेत् ॥ ४ ॥
लङ्घनमुभयोरुक्तं मिलिते कार्यं विशेषतस्तदनु ।
उत्पलषष्ठकसिद्धं लाजामण्डादिकं सकलम् ॥ ५ ॥

अथोत्पलषष्ठकक्काथमाह—

पृश्निपर्णीबलाबिल्वधनिकानागरोत्पलैः ।
ज्वरातिसारयोर्वाऽपि पिबेत्साम्लं शृतं नरः ॥ ६ ॥

*अत्र लाजमण्डाद्यपेक्षया वाशब्दः । अतीसारे पुरीषातिप्रवृत्त्याऽम्लत्वञ्च दाडिमरसादिना कर्त्तव्यम् ॥ ६ ॥

अथ कणाऽऽदिक्वाथमाह—

कणाकरिकणालाजक्वाथो मधुसितायुतः ।
पीतो ज्वरातिसारस्य तृष्णामाशु विनाशयेत् ॥ ७ ॥

अथ नागरादिक्वाथमाह—

नागरातिविषामुस्ताऽमृताभूनिम्बवत्सकैः ।
क्वाथः सर्वज्वरान्हन्ति चातिसारं सुदारुणम् ॥ ८ ॥

अथ बृहद्गुडूच्यादिक्वाथमाह—

गुडूच्यतिविषाधान्यशुण्ठीबिल्वाब्दबालकैः ।
पाठाभूनिम्बकुटजचन्दनोशीरपर्पटैः ॥ ९ ॥
पिबेत्कषायं सक्षौद्रं ज्वरातीसारनाशनम् ।
हृल्लासारुचितृड्दाहवमीनाञ्च निवृत्तये ॥ १० ॥

अथोत्पलादिचूर्णमाह—

उत्पलं दाडिमत्वक्च पद्मकेशरमेव च ।
पीतं तण्डुलतोयेन ज्वरातीसारनाशनम् ॥ ११ ॥

अथ बिल्वादिक्वाथमाह—

बिल्वबालकभूनिम्बगुडूचीमुस्तवत्सकैः ।
कषायः पाचनः शोथज्वरातीसारनाशनः ॥ १२ ॥

अथ द्वितीयं नागरादिक्वाथमाह—

नागरातिविषाबिल्वगुडूचीमुस्तवत्सकैः ।

कषायः पाचनः शोथज्वरातीसारनाशनः ॥ १३ ॥

अथ दशमूलीक्वाथमाह—

दशमूलीकषायेण विश्वामक्षसमां पिबेत् ।
ज्वरे चैवातिसारे च सशोथे ग्रहणीगदे ॥ १४ ॥

इति तृतीयो ज्वरातिसाराधिकारः समाप्तः ॥ ३ ॥

अथ चतुर्थो ग्रहणीरोगाधिकारः ४ ।

तत्र ग्रहणीरोगस्य सम्प्राप्तिमाह—

अतिसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ।
भूयः सन्दूषितो वह्निर्ग्रहणीमपि दूषयेत् ॥ १ ॥

*अपिशब्दादजातातिसारस्यापि ग्रहणीरोगः स्यात् ॥ १ ॥

अथ ग्रहणीस्वरूपमाह—

अग्न्यधिष्ठानमन्नस्य ग्रहणाद् ग्रहणी मता ।
अपक्वं धारयत्यन्नं पक्वं त्यजति चाप्यधः ॥ २ ॥

*ग्रहणी अग्निधरा कला । यत आह—चरकोऽग्न्येति ॥ २ ॥

अथ सुश्रुतेऽपि—

षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता ।
आमपक्वाशयान्तःस्था ग्रहणी साऽभिधीयते ।
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीबलः ॥ ३ ॥
तस्मादग्नौ प्रदुष्टे तु ग्रहण्यपि विदुष्यति ।
तस्मात्कार्यः परीहारो ह्यतिसारे विरिक्तवत् ॥ ४ ॥

*विरिक्तवत्=विरिक्तेनेव ॥ ४ ॥

अथ ग्रहणीरोगस्य संख्यापूर्वकं सामान्यलक्षणमाह—

एकैकशः सर्वशश्च दोषैरत्यन्तमूर्च्छितैः ।
सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ॥ ५ ॥
पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम् ।
ग्रहणीरोगमाहुस्तमायुर्वेदविदो जनाः ॥ ६ ॥

*अतीसारे द्रवधातुप्रवृत्तिः, ग्रहण्यान्तु बद्धस्यापि मलस्य प्रवृत्तिरिति तयोर्भेदः ॥ ६ ॥

अथ वातोत्पन्नग्रहण्या निदानसम्प्राप्तिपूर्वकं लक्षणमाह—

कटुतिक्तकषायातिरूक्षशीतलभोजनैः ।
प्रमितानशनात्यध्ववेगनिग्रहमैथुनैः ॥ ७ ॥
मारुतः कुपितो वह्निं संछाद्य कुरुते गदम् ।
तस्यान्नं पच्यते दुःखं शुक्तपाकं खराङ्गता ॥ ८ ॥
कण्ठास्यशोषः क्षुत्तृष्णा तिमिरं कर्णयोः स्वनः ।
पार्श्वोरुवङ्क्षणग्रीवारुगभीक्ष्णं विसूचिका ॥ ९ ॥
हृत्पीडाकार्श्यदौर्बल्यं वैरस्यं परिकर्त्तिका ।
गृद्धिः सर्वरसानाञ्च मनसः सदनं तथा ॥ १० ॥
जीर्णे जीर्यति चाध्मानं भुक्ते स्वास्थ्यमुपैति च ।
स वातगुल्महृद्रोगप्लीहाशङ्की च मानवः ॥ ११ ॥
चिराद् दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत् ।
पुनः पुनः सृजेद्वर्चः कासश्वासार्दितोऽनिलात् ॥ १२ ॥

*प्रमितम्=अल्पपरिमितम्, गदं=ग्रहणीगदम् । शुक्तपाकम्=अम्लपाकम् ॥ ७—१२ ॥

अथ पित्तजग्रहण्या निदानसम्प्राप्तिपूर्वकं लक्षणमाह—

कट्वजीर्णविदाह्यम्लक्षाराद्यैः पित्तमुल्बणम् ।
आप्लावयद्धन्त्यनलं जलं तप्तमिवानलम् ॥ १३ ॥
सोऽजीर्णं पीतनीलाभं पीताभः सार्यते द्रवम् ।
अत्यम्लोद्गारहृत्कण्ठदाहारुचितृषार्दितः ॥ १४ ॥

*आप्लावयद्=मज्जयत् । ननु पित्तमग्निगुणयुक्तं तत्कथमग्निं हन्तीत्याह—जलं तप्तमिवानलमिति । यथा—अग्निगुणयुक्तमपि तप्तं जलमनलं हन्ति तथा पित्तमपि हन्ति । सार्यते=अत्र पित्तेनेति कर्तृपदमध्याहरणीयम् ॥ १३-१४ ॥

अथ कफोत्पन्नग्रहण्या निदानसम्प्राप्तिपूर्वकं लक्षणमाह—

गुर्वतिस्निग्धशीतादिभोजनादतिभोजनात् ।
भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निं कुपितः कफः ॥ १५ ॥

तस्यान्नं पच्यते दुःखं हृल्लासच्छर्द्यरोचकाः ।
आस्योपदेहमाधुर्यकासष्ठीवनपीनसाः ॥ १६ ॥
हृदयं मन्यते स्तब्धमुदरं स्तिमितं गुरु ।
दुष्टो मधुर उद्गारः सदनं स्त्रीष्वहर्षणम् ॥ १७ ॥
भिन्नामश्लेष्मसंश्लिष्टगुरुवर्चःप्रवर्त्तनम् ।
अकृशस्यापि दौर्बल्यमालस्यञ्च कफात्मके ॥ १८ ॥

*भुक्तमात्रस्य च स्वप्नाद्=भुक्तेत्यत्राध्यवसितादित्वात्कर्त्रर्थे क्तः । तेन भुक्तवतः सद्यः शयनादित्यर्थः । आस्योपदेहः=मुखस्य कफेन लिप्तत्वम् । स्तिमितं=विबद्धं, निश्चलमिति यावत् । स्त्रीषु, अहर्षणं=रिरंसाया अभावः । भिन्नं=स्फुटितम् , आमम्=अपक्वं-श्लेष्मसंश्लिष्टं तत एव गुरु वर्चः=पुरीषं तस्य प्रवृत्तिः ॥ १५-१८ ॥

अथ त्रिदोषोत्पन्नग्रहण्या निदानसम्प्राप्तिपूर्वकं लक्षणमाह—

पृथग्वातादिनिर्दिष्टहेतुलिङ्गसमागमे ।
त्रिदोषं निर्दिशेदेवं तेषां वक्ष्यामि भेषजम् ॥ १९ ॥

अथ ग्रहणीरोगभेदं संग्रहणीरोगमाह—

द्रवं घनं सितं स्निग्धं सकटीवेदनं शकृत् ।
आमं बहु सुपैच्छिल्यं सशब्दं मन्दवेदनम् ॥ २० ॥
पक्षान्मासाद्दशाहाद्वा नित्यञ्चापि विमुञ्चति ।
अन्त्रकूजनमालस्यं दौर्बल्यं सदनं भवेत् ॥ २१ ॥
दिवा प्रकोपो भवति रात्रौ शान्तिं च गच्छति ।
दुर्विज्ञेया दुर्निवारा चिरकालानुबन्धिनी ॥ २२ ॥
सा भवेदामवातेन संग्रहाद् ग्रहणी मता ॥ २३ ॥

*स्निग्धं=स्नेहसदृशम् । दिवा प्रकोपो भवति रात्रौ शान्तिं च गच्छतीति व्याधेरेव प्रभावः ॥ २०-२३ ॥

अथ ग्रहणीरोगभेदाख्यं घटीयन्त्रमाह—

प्रसुप्तिः पार्श्वयोः शूलं तथा जलघटीध्वनिः ।
तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणीगदम् ॥ २४ ॥

*प्रसुप्तिः=प्रकर्षेण शयनम् । तथा जलघटीध्वनिः=अधोमुखीकृताया जलघट्या जलनिःसरणे यथा ध्वनिस्तथा मलनिर्गमसमये भ-

वति । यदा गदोऽयं देहं व्याप्नोति तदा तस्य जीवितं गच्छति ॥२४॥

अथ सामान्यतो ग्रहणीरोगस्य चिकित्सामाह—

ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत् ।
लङ्घनैर्दीपनीयैश्च सदाऽतीसारभेषजैः ॥ २५ ॥
दोषं सामं निरामञ्च विद्यादत्रातिसारवत् ।
अतिसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥ २६ ॥
पेयाऽऽदि पटु लघ्वन्नं पञ्चकोलादिभिर्युतम् ।
दीपनानि च तक्रं च ग्रहण्यां योजयेद्भिषक् ॥ २७ ॥
कपित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता ।
यवागूः पाचयत्यामं शकृत्संवर्त्तयत्यपि ॥ २८ ॥

*संवर्त्तयति=घनीकरोति ॥ २८ ॥

अथ तक्रप्रसङ्गाद् दधिगुणानाह ।

तत्र गोदधिगुणानाह—

गव्यं दध्युत्तमं बल्यं पाके स्वादु रुचिप्रदम् ।
पवित्रं दीपनं स्निग्धं पुष्टिकृत्पवनापहम् ।
उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम् ॥ २९ ॥

अथ माहिषदधिगुणानाह—

माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत् ।
स्वादुपाकमभिष्यन्दि वृष्यं गुर्वस्रदूषणम् ॥ ३० ॥

अथाजादधिगुणानाह—

आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम् ।
शस्यते श्वासकासार्शःक्षयकार्श्येषु दीपनम् ॥ ३१ ॥

*उत्तमं ग्राहि=ग्रहण्यामतिश्रेष्ठमित्यर्थः ॥ ३१ ॥

अथ तक्रभेदानाह—

तक्रन्तु घोलं मथितोदश्विक्तक्रप्रभेदतः ।
सुश्रुताद्यैर्मुनिश्रेष्ठैश्चतुर्द्धा परिकीर्त्तितम् ॥ ३२ ॥
ससरं निर्जलं घोलं मथितं त्वसरोदकम् ।
तक्रं पादजलं प्रोक्तमुदश्विच्चार्द्धवारिकम् ॥ ३३ ॥
वातपित्तहरं घोलं मथितं कफपित्तनुत् ।

उदश्वित्कफदं बल्यं श्रमघ्नं परमं मतम् ॥ ३४ ॥

अथ तक्रगुणानाह—

तक्रं ग्राहि कषायाम्लं मधुरं दीपनं लघु।
वीर्योष्णं बलदं वृष्यं प्रीणनं वातनाशनम् ॥ ३५ ॥
यान्युक्तानि दधीन्यष्टौ तद्गुणं तक्रमादिशेत्।
ग्रहण्यादिमतां तक्रं पथ्यं संग्राहि लाघवात् ॥ ३६ ॥
वातघ्नमम्लसान्द्रत्वात्सद्यस्कं त्वविदाहि च।
किञ्च स्वादुविपाकं च अन्ते पित्तप्रकोपणम् ॥ ३७ ॥
कषायोष्णविकासित्वाद्रौक्ष्याच्चैव कफे हितम् ॥ ३८ ॥

अथ निःसारितघृतादितक्रगुणानाह—

समुद्धृतघृतं तक्रं पथ्यं लघु विशेषतः।
स्तोकोद्धृतघृतं तस्माद् गुरु वृष्यं कफावहम्।
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिबलप्रदम् ॥ ३९ ॥

*उद्धृतस्नेहस्य स्तोकोद्धृतस्नेहस्यानुद्धृतस्नेहस्य तक्रस्य गुणाः—समुद्धृतेति ॥ ३९ ॥

अथ रोगविशेषे तक्रविशेषानाह—

वातेऽम्लं सैन्धवोपेतं पित्ते स्वादु सशर्करम्।
पिबेत्तक्रं कफे चापि क्षारत्रिकटुसंयुतम ॥ ४० ॥
हिङ्गुजीरयुतं घोलं सैन्धवेनावधूलितम्।
ग्रहण्यर्शोऽतिसारघ्नं भवेद्वातहरं परम् ॥ ४१ ॥
रोचनं पुष्टिदं बल्यं वस्तिशूलविनाशनम् ॥ ४२ ॥

अथ पक्वापक्वतक्रगुणानाह—

तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च।
पीनसश्वासकासादौ पक्वमेव विशिष्यते ॥ ४३ ॥

अथ तक्रस्य निषेधविषयानाह—

नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके ॥ ४४ ॥

अथ तक्रस्य गुणोत्कर्षमाह—

न तक्रसेवी व्यथते कदा चिन्न तक्रदग्धाः प्रभवन्ति रोगाः।

यथा सुराणाममृतं सुखाय तथा नराणां भुवि तक्रमाहुः ॥ ४५ ॥

अथ षड्यूषणमाह—

मृद्गयूषं रसं तक्रं धान्यजीरकसंयुतम् ।
सैन्धवेनान्वितं दद्यात्षड्यूषणमितीरितम् ॥ ४६ ॥

*रसं = लघु ग्राहि मांसरसम् ॥ इति षड्यूषणः ॥ ४६ ॥

अथ लाईचूर्णमाह—

कर्षं गन्धकमर्द्धपारदमुभे कुर्याच्छुभां कज्जलीं-
द्व्यक्षं त्र्यूषणतश्च पञ्चलवणं सार्द्धञ्च कर्षं पृथक् ।
भृष्टं हिङ्गु च जीरकद्वययुतं सर्वार्द्धभङ्गाऽन्वितं-
खादेट्टङ्कमितं प्रवृत्तिगदवांस्तक्रेण विल्वेन वा ॥ ४७ ॥

अथ जातीफलादिचूर्णमाह—

जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः ।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः ॥ ४८ ॥
तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः ।
शुण्ठीविडङ्गमरिचैः समभागं विचूर्णितैः ॥ ४९ ॥
यावन्त्येतानि सर्वाणि दद्याद्भङ्गाञ्च तावतीम् ।
सर्वचूर्णसमं कृत्वा प्रदेया शुभ्रशर्करा ॥ ५० ॥
कर्षमात्रमिदं खादेन्मधुना प्लावितं जनः ।
नाशयेद् ग्रहणीं कासं क्षयकासमरोचकम् ॥ ५१ ॥

अथ चित्रकादिवटिकामाह—

चित्रकं पिप्पलीमूलं क्षारो लवणपञ्चकम् ।
व्योषं हिङ्ग्वजमोदा च चव्यं चैकत्र चूर्णयेत् ॥ ५२ ॥
वटिका मातुलुङ्गस्य रसैर्वा दाडिमस्य च ।
कृता विपाचयत्यामं दीपयत्याशु चानलम् ॥ ५३ ॥

*अजमोदा = यवानिका ॥ ५२-५३ ॥

अथ बिल्वकल्कमाह—

श्रीफलशलाटुमज्जा नागरचूर्णेन मिश्रितः सगुडः ।
ग्रहणीगदमत्युग्रं तक्रभुजा शीलितो जयति ॥ ५४ ॥

*श्रीफलशलाटु = बिल्वस्यामं फलम् । गुडभागद्वयम् ॥ ५४ ॥

अथ वार्त्ताकुगुटिकामाह—

चतुष्पलं सुधाकाण्डं त्रिपलं लवणत्रयम्।
वार्त्ताकोः कुडवं चार्कमूलाद्बिल्वं तथाऽनलात्॥ ५५॥
दग्ध्वा द्रवेण वार्त्ताकोर्गुटिका भोजनान्तरे।
भुक्ता भुक्तं पचत्याशु नाशयेद्ग्रहणीगदम्।
कासं श्वासं तथाऽर्शांसि विसूचीञ्च हृदामयम्॥ ५६॥

अथ मुस्तकादिचूर्णमाह—

मुस्तकातिविषाबिल्वकौटजं सूक्ष्मचूर्णितम्।
मधुना च समालीढं ग्रहणीं सर्वजां जयेत्॥ ५७॥

*कौटजः=इन्द्रयवः॥ ५७॥

अथ सर्जरसचूर्णमाह—

श्वेतो वा यदि वा रक्तः सुपक्वो ग्रहणीगदः।
गुडेनाधिकसर्जेन भक्षितेनाशु नश्यति॥ ५८॥

अथ बिल्वादिसिद्धाजादुग्धगुणानाह—

बिल्वाब्दशक्रयवबालकमोचसिद्ध-
माजं पयः पिबति यो दिवसत्रयं ना।
सोऽतिप्रवृद्धचिरजं ग्रहणीविकारं-
सामं सशोणितमसाध्यमपि क्षिणोति॥ ५९॥

अथ कल्याणगुडमाह—

प्रस्थत्रयं त्वामलकीरसस्य शुद्धस्य दत्त्वाऽर्द्धतुलां गुडस्य।
चूर्णीकृतैर्ग्रन्थिकजीरचव्यव्योषैः सकृष्णाहपुषाऽजमोदैः॥ ६०॥
विडङ्गसिन्धुत्रिफलायवानीपाठाऽग्निधान्यैश्च पलप्रमाणैः।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टावष्टौ च तैलस्य पचेद्यथावत्॥ ६१॥
तं भक्षयेदक्षपलप्रमाणं यथेष्टचेष्टस्त्रिसुगन्धियुक्तम्।
अनेन सर्वे ग्रहणीविकाराः सश्वासकासस्वरभेदशोथाः॥ ६२॥
शाम्यन्ति चायं चिरमन्तरग्नेर्हतस्य पुंस्त्वस्य च वृद्धिहेतुः।
स्त्रीणान्तु वन्ध्याऽऽमयनाशनः स्यात्कल्याणको नाम गुडः प्रसिद्धः॥ ६३॥
तैले मनाक् त्रिवृद् भृष्ट्वा त्रिफलायाः पलत्रयम्।
सिद्धे निधेयमत्रैव गुडे कल्याणपूर्वके॥ ६४॥

अथ महाकल्याणकगुडमाह—

पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकञ्च विडङ्गानि यवानी मरिचानि च ॥ ६५ ॥
त्रिफला चाजमोदा च नीलिनी जीरकस्तथा ।
सैन्धवं रोमकञ्चापि सामुद्रं रुचकं विडम् ॥ ६६ ॥
आरग्वधश्च त्वक्पत्रं सूक्ष्मैला चोपकुञ्चिका ।
शुण्ठी शक्रयवाश्चैव प्रत्येकं कर्षसम्मिताः ॥ ६७ ॥
मृद्वीकायाः पलान्यत्र चत्वारि कथितानि हि ।
त्रिवृतायाः पलान्यष्टौ गुडस्यार्द्धतुलां तथा ॥ ६८ ॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु ।
प्रस्थत्रयमिदं सर्वं शनैर्मृद्वग्निना पचेत् ॥ ६९ ॥
औदुम्बरं चामलकं बादरञ्च यथाबलम् ।
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथाऽनलम् ॥ ७० ॥
निखिलान्ग्रहणीरोगान्प्रमेहांश्चैव विंशतिम् ।
उरोघातं प्रतिश्यायं दौर्बल्यं वह्निसङ्क्षयम् ॥ ७१ ॥
ज्वरानपि हरेत्सर्वान्कुर्यात्कान्तिं मतिं बलम् ।
पाण्डुरोगाञ्ज्वराद्धन्ति रक्तपित्तञ्च विड्ग्रहम् ॥ ७२ ॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः ।
तेभ्यो हितश्च वन्ध्यायै महाकल्याणको गुडः ॥ ७३ ॥

अथ कूष्माण्डकल्याणकगुडमाह—

कूष्माण्डानां सुपक्वानां स्विन्नानां निष्कुलत्वचाम् ।
सर्पिःप्रस्थं पलशतं ताम्रपात्रे शनैः पचेत् ॥ ७४ ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकानि विडङ्गानि नागरं मरिचानि च ॥ ७५ ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम् ।
एकैकस्य पलञ्चैकं त्रिवृतोऽष्टौ पलानि च ॥ ७६ ॥
तैलस्य च पलान्यष्टौ गुडात्पञ्चाशदेव तु ।
आमलक्या रसस्यात्र प्रस्थत्रयमुदीरितम् ॥ ७७ ॥

तावत्पाकं प्रकुर्वीत मृदुना वह्निना भिषक् ।
यावद्दर्व्याः प्रलेपः स्यात्तदैनमवतारयेत् ॥ ७८ ॥
औदुम्बरं चामलकं बादरं वा यथाबलम् ।
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथाऽनलम् ॥ ७९ ॥
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ।
निहन्ति ग्रहणीरोगान्कुष्ठानर्शोभगन्दरान् ॥ ८० ॥
ज्वरमानाहहृद्रोगं गुल्मोदरविसूचिकाः ।
कामलां पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम् ॥ ८१ ॥
वातशोणितवीसर्पदद्रुयक्ष्महलीमकान् ।
वातपित्तकफान्सर्वान्दुष्टाञ्छुद्धान्समाचरेत् ॥ ८२ ॥
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये नराः ।
तेभ्यो हितो गुडोऽयं स्याद्वन्ध्यानामपि पुत्रदः ।
वृष्यो बल्यो बृंहणश्च वयसः स्थापनं तथा ॥ ८३ ॥
अतिसाराधिकारलिखितं
बिल्वतैलञ्चात्र हितम् ।

इति चतुर्थो ग्रहणीरोगाधिकारः समाप्तः ॥ ४ ॥

समाप्तोऽयं मध्यखण्डे प्रथमो भागः ॥ १ ॥

प्राप्तिस्थानम्—

चौखम्बा-संस्कृत-पुस्तकालय

बनारस सिटी।

॥ श्रीः ॥

भावप्रकाशः

अथ मध्यखण्डम् ।

तत्र

द्वितीयो भागः २ ।

अथ पञ्चमोऽर्शोऽधिकारः ॥ ५ ॥

तत्रार्शसां सन्निकृष्टानि निदानान्याह—

पृथग्दोषैः समस्तैश्च शोणितात्सहजानि च ।
अर्शांसि षट्प्रकाराणि विद्याद् गुदवलित्रये ॥ १ ॥

*के चिद्रुधिरस्यापि दोषत्वं मन्यन्ते, तन्मतमाश्रित्याह—शोणितादिति । सहजानि=शरीरे सहजातानि । संख्यां चाह—षट्प्रकाराणीति । गुदवलित्रये=सार्द्धं चतुरङ्गुलं गुदस्य मानम् । तस्यावयवभूतास्तिस्रो वलयः शङ्खावर्त्तनिभा उपर्युपरि सन्ति । तासां नामानि—प्रवाहणी विसर्जनी संवरणी चेति । तत्र गुदौष्ठोऽर्द्धाङ्गुलमानः स्तदूर्ध्वमङ्गुलमाना प्रथमा वलिः । सार्द्धैकाङ्गुलमाना द्वितीया, तृतीया च तावती ॥ उक्तञ्च—

*अर्द्धाङ्गुलप्रमाणेन गुदौष्ठं परिचक्षते ॥
गुदौष्ठादङ्गुलश्चैकं प्रथमान्तु वलिं विदुः ।
सार्द्धैकाङ्गुलमानेन पृथगन्ये प्रकीर्त्तिते ॥ १ ॥ इति ॥१॥

अथ वातार्शसां विप्रकृष्टनिदानमाह—

कषायकटुतिक्तानि रूक्षशीतलघूनि च ।
प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसेवनम् ॥ २ ॥
लङ्घनं देशकालौ च शीतौ व्यायामकर्म च ।
शोको वातातपस्पर्शो हेतुर्वातार्शसां मतः॥ ३ ॥

*प्रमितं=परिमितं, तीक्ष्णमिति मद्यविशेषणम्। पैष्टिकादिमृदुमद्यस्य वातशमकत्वाद्। आतपस्तूष्णवीर्योद्भूतरौक्ष्याद्वातप्रकोपे हेतुर्वातार्शसाम्। ननु अर्शांसि सर्वाणि त्रिदोषजानि यत आह—

*पञ्चात्मा मारुतः पित्तं कफो गुदवलित्रयम्।
सर्व एव प्रकुप्यन्ति गुदजानां समुद्भवे ॥ २ ॥

*तथा कथं वातार्शसामिति? उच्यते—तत्तदाधिक्याद्व्यपदेशभेद इति न दोषः। अत एवाग्रे वक्ष्यते वातोल्वणानामिति। तथा च चरकः—

*अर्शांसि नाम जायन्ते नासन्निपतितैस्त्रिभिः ॥
दोषैर्दोषविशेषात्तु विशेषः कथ्यतेऽर्शसाम् ॥ ३ ॥ इति ॥ २–३ ॥

अथ पित्तार्शसां विप्रकृष्टं निदानमाह—

कट्वम्ललवणोष्णानि व्यायामाग्न्यातपप्रभाः।
देशकालावशिशिरौ क्रोधो मद्यमसूयनम् ॥ ४ ॥
विदाहि तीक्ष्णमुष्णञ्च सर्वं पानान्नभोजनम्।
पित्तोल्वणानां विज्ञेयः प्रकोपे हेतुरर्शसाम् ॥ ५ ॥

*उष्णद्रव्यस्य स्पर्शनादि बोद्धव्यम्, उष्णपानभोजनस्याग्रे वक्ष्यमाणत्वाद्। अग्न्यातपप्रभाः=अग्न्यातपयोः प्रभा तेजः, अथ वा-अग्न्यातपेतरतेजस्विद्रव्यस्य तेजो दीप्तिः=प्रभा। अशिशिरो देशो मरुरिति, शरद् ग्रीष्मश्च कालः। क्रोधः=कोपः। असूयनं=परसम्पत्तौ द्वेषः। प्रकोपे=उत्पत्तौ ॥ ४—५ ॥

अथ कफार्शसां विप्रकृष्टनिदानमाह—

मधुरस्निग्धशीतानि लवणाम्लगुरूणि च।
अव्यायामदिवास्वप्नशय्याऽऽसनसुखे रतिः ॥ ६ ॥
प्राग्वातसेवाशीतौ च देशकालावचिन्तनम्।
श्लैष्मिकाणां समुद्दिष्टमेतत्कारणमर्शसाम् ॥ ७ ॥

अथ द्विदोषत्रिदोषार्शसां विप्रकृष्टनिदानमाह—

हेतुलक्षणसंसर्गाद्विद्याद् द्वन्द्वोल्वणानि च।
सर्वो हेतुस्त्रिदोषाणां सहजैर्लक्षणं समम् ॥ ८ ॥

*जनकत्वेन त्रयो दोषा येषां तानि त्रिदोषानि । तेषामर्शसां सर्वो- हेतुः=पृथग्वातपित्तकफार्शोहेतुः । त्रिदोषार्शोलक्षणं श्वासरुजाविबन्धैः सहजार्शोभिः समम् । ननु त्रिदोषाणामिति विशेषणं व्यर्थम् । यतः सर्व एव व्याधयस्त्रिदोषजाः । उक्तं च—

द्रव्यमेकरसं नास्ति न रोगोऽप्येकदोषजः ।
एकस्तु कुपितो दोष इतरानपि कोपयेत् ॥ ४ ॥ इति ॥

*युक्तिमप्याह—"स्वकारणाद् बद्धो वायुः शैत्यात्कफं लाघवात् तेजोरूपं पित्तं वर्द्धयते, तथा पित्तं कटुत्वाद् वातं द्रवत्वात् कफं वर्द्धयते, कफश्च शैत्याद् वायुं द्रवत्वात्पित्तं वर्धयते" इति । उच्यते—यत्र स्वस्वकारणात्त्रयो दोषाः कुप्यन्ति तत्र त्रिदोषजव्यपदेश इति न दोषः ॥ ८ ॥

अथार्शसां पूर्वरूपमाह—

विष्टम्भोऽन्नस्य दौर्बल्यं कुक्षेराटोप एव च ।
कार्श्यमुद्गारबाहुल्यं सक्थिसादोऽल्पविट्कता ॥ ९ ॥
ग्रहणीदोषपार्श्वार्त्तिप्रशङ्का चोदरस्य च ।
पूर्वरूपं विनिर्दिष्टमर्शसामभिवृद्धये ॥ १० ॥

अथार्शसां सम्प्राप्तिपूर्वकं लक्षणमाह—

दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन् ।
मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि ताञ्जगुः ॥ ११ ॥

*त्वङ्मांसपदेन त्वङ्मांसमाश्रितं रक्तमपि गृह्यते, किञ्चित्साधारणरक्तस्रावणोपदेशात् । अपानं=गुह्यदेशः । आदिशब्देन नासानेत्रनाभिमेढ्रादिष्वपि कुर्वन्ति ॥ ११ ॥

अथ वातार्शोलक्षणमाह—

गुदाङ्कुरा बह्वनिलाः शुष्काश्चिमिचिमाऽन्विताः ।
म्लानाः श्यावारुणाः स्तब्धा विशदाः परुषाः खराः ॥ १२ ॥
मिथो विसदृशा वक्रास्तीक्ष्णा विस्फुटिताननाः ।
बिम्बीकर्कन्धुखर्जूरकर्कोटीफलसन्निभाः ॥ १३ ॥
केचित्कदम्बपुष्पाभाः केचित्सिद्धार्थकोपमाः ।

शिरःपार्श्वांसकट्यूरुवङ्क्षणाभ्यधिकव्यथाः ॥ १४ ॥
क्षवथूद्गारविष्टम्भहृद्रोगारोचकप्रदाः ।
कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः ॥ १५ ॥
तैरार्त्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकम् ।
रुक्फेनपिच्छाऽनुगतं विबद्धमुपवेश्यते ॥ १६ ॥
कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते ।
गुल्मप्लीहोदराष्ठीलासम्भवस्तत एव च ॥ १७ ॥

*वह्वनिलाः=वातोल्वणाः । गुदाङ्कुराः=अर्शांसि । चिमिचिमाऽन्विताः=चिमिचिमा व्यथाविशेषः "चरचरा" इति लोके, तदन्विताः। श्यावारुणाः=श्यावा धूम्रवर्णाः, अरुणवर्णा वा । स्तब्धाः=कठिनाः। विशदाः=अपिच्छिलाः । परुषाः=गोजिह्वावत्खरस्पर्शाः । खराः=कर्कशाः । कर्कोटीफलवत्सूक्ष्मानेककण्टकचिताः । बिम्ब्यादिफलसन्निभा आकृत्या । अत्र विकल्पबोधकं वक्ष्यमाणं केचित् केचिदिति पदं प्रति सम्बन्धनीयम् । कदम्बपुष्पाभाः=स्थिरानेकसूक्ष्मशिखराः । सिद्धार्थकोपमाः=पीतसूक्ष्मपिडकाचिताः । "तैरार्त्त" इत्यर्शोभिः पीडितः । "तैरार्त्तो विबद्धमुपवेश्यत" इत्यार्त्तस्य प्रयोज्यकर्त्तुः कर्मता, आर्षत्वाद् । ग्रथितं=मलगुटिकाग्रन्थितविड्वर्त्तिरूपम् । पिच्छा=पिच्छिलो द्रवभागः । विबद्धं=संहतम् । विट्शब्दो नपुंसकोऽप्यस्ति । उपवेश्यते=त्याज्यते । तत एव=वातार्शस एव । गुल्मादीनां सम्भवः । अष्ठीला=नाभेरधोभागे पाषाणपिण्डिकावद्वातव्याधिविशेषः ॥ १२—१७ ॥

अथ पित्तार्शोलक्षणमाह—

पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः ।
तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः ॥ १८ ॥
शुकजिह्वायकृत्खण्डजलौकोवक्त्रसन्निभाः ।
दाहपाकज्वरस्वेदतृण्मूर्च्छाऽरतिमोहदाः ॥ १९ ॥
सोष्माणो द्रवनीलोष्णपीतरक्तामवर्चसः ।
यवमध्या हरित्पीतहारिद्रत्वङ्नखादयः ॥ २० ॥

*तनु=अघनम्। श्लथाः=लम्बिनः। सन्निभा आकृत्या। पाको-गुदस्य। सोष्माणः=उष्णस्पर्शाः। हरिच्छाकवर्णम्। पीतं=हरि-तालवर्णम्। हारिद्रं=हरिद्रावर्णम्। आदिशब्दान्मलमूत्रपुरीषाणां-ग्रहणम्॥ १८—२०॥

अथ पित्तोत्तरभेदरक्तार्शोलक्षणमाह—

रक्तोल्वणा गुदे कीलाः पित्ताकृतिसमन्विताः।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः॥ २१॥
तेऽत्यथ दुष्टमुष्णं च गाढविट्कप्रपीडिताः।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः॥ २२॥
भेकाभः पीडयते दुःखैः शोणितक्षयसम्भवैः।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः॥ २३॥
विट्श्यावं कठिनं रूक्षमधोवायुर्न वर्त्तते।
तनु चारुणवर्णं च फेनिलं चासृगर्शसाम्॥ २४॥
कट्यूरुगुदशूलश्च दौर्बल्यं यदि चाधिकम्।
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम्॥ २५॥
शिथिलं श्वेतपीतं च विट् स्निग्धं गुरु शीतलम्।
यद्यर्शसां घनं चासृक् तन्तुमत्पाण्डु पिच्छिलम्॥ २६॥
गुदं सपिच्छं स्तिमितं गुरु स्निग्धं च कारणम्।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः॥ २७॥

*गुदे कीलाः=अर्शांसि। पित्ताकृतिसमन्विताः=पित्तार्शोलक्षण-युक्ताः। आकारेण च वटप्ररोहसदृशाः। दुःखैः=रोगैस्त्वक्पारुष्या-म्बुशीतप्रार्थनाऽऽदिभिः। कलुषेन्द्रियः=व्याकुलसर्वेन्द्रियः। रक्तस्या-पि वातोल्वणस्य लक्षणमाह—असृगर्शसां=रक्तार्शसाम्। तत्र=रक्तार्शसि। अनुबन्धः=उल्वणत्वम्। रूक्षं रूक्षयतीति रूक्षणम्=रूक्षद्रव्यम्। पित्तोल्वणस्य तु लक्षणम्—

"रक्तोल्वणा गुदे कीलाः पित्ताकृतिसमन्विताः"।
इत्यादिनैवोक्तं रक्तपित्तयोः समानलिङ्गत्वात्॥ २१—२७॥

अथ कफोल्वणार्शोलक्षणमाह—

श्लेष्मोल्वणा महामूला घना मन्दरुजः सिताः।
उत्सन्नोपचिताः स्निग्धाः स्तब्धवृत्तगुरुस्थिराः॥ २८॥
पिच्छिलाः स्तिमिताः श्लक्ष्णाः कण्डूवाढ्याः स्पर्शनप्रियाः।
करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः॥ २९॥
वङ्क्षणानाहिनः पायुवस्तिनाभिविकर्षिणः।
सकासश्वासहृल्लासप्रसेकारुचिपीनसाः॥ ३०॥
मेहकृच्छ्रशिरोजाड्यशिशिरज्वरकारिणः।
क्लैब्याग्निमार्दवच्छर्दिरामप्रायविकारदाः॥ ३१॥
वसाभसकफप्राज्यपुरीषाः सप्रवाहिकाः।
न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः॥ ३२॥

*उत्सन्नाः=उन्नताः। उपचिताः=स्थूलाः। स्निग्धाः=स्नेहाभ्यक्ताः। स्थिराः=निश्चलाः। पिच्छिलाः कफोल्वणत्वात्। स्तिमिताः=आर्द्रचर्मावगुण्ठिता इव। श्लक्ष्णाः=मणिवन्मसृणाः। करीरो=वंशाङ्कुरः। पनसास्थिगोस्तनास्तदाकृतयः। वङ्क्षणानाहिनः=वङ्क्षणयोरानाहकारिणः। पाय्वादिष्वाकर्षणवत्पीडाकारिणः। कृच्छ्रं=मूत्रकृच्छ्रम्। शिरोजाड्यं=शिरोभागे शीताक्रान्तत्वमिव। क्लैब्यं=स्त्रीष्वनिच्छा। अत्र छर्दिःशब्दः सान्त आर्षत्वात्। आमप्रायविकारदाः=आमबहुला व्याधयोऽतीसारग्रहण्यादयस्तान् ददति॥२८-३२॥

अथ द्वन्द्वजार्शोलक्षणमाह—

हेतुलक्षणसंसर्गाद्विद्याद् द्वन्द्वोल्वणानि च॥ ३३॥

अथ त्रिदोषोल्वणस्वाभाविकार्शोलक्षणमाह—

सर्वैः सर्वात्मकान्याहुर्लक्षणैः सहजानि च॥ ३४॥

*सर्वलक्षणैः=वातपित्तकफार्शोलक्षणैः प्रागुक्तैः। सर्वात्मकान्यर्शांस्याहुः। तथा तैरेव लक्षणैः सहजान्यर्शांस्याहुः॥ ३४॥

अथान्यग्रन्थोक्तस्वाभाविकार्शोऽन्यलक्षणमाह—

अर्शांसि सहजातानि दारुणानि भवन्ति हि।
दुर्दर्शनानि पाण्डूनि परुषाण्यरुणानि च॥
अन्तर्मुखाणि तैरार्त्तः क्षीणः क्षीणस्वरो भवेत्।

क्षीणानलः क्षीणरेताः शिरासन्ततविग्रहः ॥ ३५ ॥
अल्पप्रजः क्रोधशीलो भग्नकांस्यस्वनान्वितः ।
शिरोदृक्कर्णनासासु रोगी हृल्लेपसेकवान् ॥ ३६ ॥

अथ सुखसाध्यार्शोलक्षणमाह—

बाह्यायां तु वलौ जातान्येकदोषोल्वणानि च ।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च ॥ ३७ ॥

*बाह्यायां वलौ=संवरण्याम् । न चिरोत्पतितानि=अतिक्रान्तसंवत्सराणि । एतानि लक्षणानि मिलितानि सुखसाध्यत्वबोधकानि॥३७॥

अथ कष्टसाध्यार्शोलक्षणमाह—

द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च ।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च ॥ ३८ ॥

*द्वितीयायां वलौ=विसर्जन्याम् । परिसंवत्सराणि=परिगतःसंवत्सरो येषां तान्यतीतसंवत्सराणीति यावत् । एतानि प्रत्येकं कष्टसाध्यलक्षणानि ॥ ३८ ॥

अथासाध्यार्शोलक्षणमाह—

सहजानि त्रिदोषाणि यानि चाभ्यन्तरां वलिम् ।
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्दिशेत् ॥ ३९ ॥

*अभ्यन्तरां वलिं=प्रवाहणीम् । एतान्यपि प्रत्येकमसाध्यानि लक्षणानि ॥ ३९ ॥

अथ याप्यार्शोलक्षणमाह—

शेषत्वादायुषस्तानि चतुष्पादसमन्वये ।
याप्यन्ते दीप्तकायाग्नेः प्रत्याख्येयान्यतोऽन्यथा ॥ ४० ॥

*यद्यायुःशेषो वर्त्तते, चिकित्सायाश्चत्वारः पादास्ते यथा—वैद्यवचनकारी धनवानुदारो जितेन्द्रियो रोगी । शस्त्रकर्मणि कुशलो वैद्यः । अनलस आप्तः प्रियः परिचारकः । नवरसवीर्यादिकमौषधम् । एषां समन्वये=समागमे । अतिदीप्तकायाग्नेः=पुरुषस्य, तानि=अर्शांसि, याप्यन्ते चिकित्सायाम् । अतोऽन्यथा प्रत्याख्येयानि=चिकित्साहीनानीत्यर्थः ॥ ४० ॥

अथार्शोऽरिष्टमाह—

हस्ते पादे मुखे नाभ्यां गुदे वृषणयोस्तथा ।

शोथो हृत्पार्श्वशूलं च यस्यासाध्योऽर्शसो हि सः ॥ ४१ ॥

*असाध्यः=सन्निहितमरणो बोध्यः। अर्शसः=अर्शोरोगयुक्तः॥४१॥

हृत्पार्श्वशूलं संमोहश्छर्दिरङ्गस्य रुग्ज्वरः।
तृष्णा गुदास्यपाकश्च निहन्युर्गुदजातुरम् ॥ ४२ ॥

*गुदस्य चास्यमोष्ठदेशस्तस्य पाकः। हृत्पार्श्वशूलादि समस्तं चारिष्टलक्षणम् ॥ ४२ ॥

तृष्णाऽरोचकशूलार्त्तमतिप्रस्रुतशोणितम्।
शोथातीसारसंयुक्तमर्शांसि क्षपयन्ति हि ॥ ४३ ॥

अथ लिङ्गाद्यर्शोलक्षणमाह—

मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नाभिजानि च।
गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च ॥ ४४ ॥

*यथास्वं=यथाऽऽत्मीयलक्षणम्। न चात्रोक्तनिदानपूर्वकं सम्प्राप्तिलक्षणं युक्तम्। तत्रार्शसपदन्तु मांसाङ्कुरसाम्यात्। गण्डूपदः=किञ्चुलकः ॥ ४४ ॥

अथ चर्मकीलस्य संप्राप्तिपूर्वकं लक्षणमाह—

व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः।
कीलोपमं स्थिरखरं चर्मकीलं तु तद्विदुः ॥ ४५ ॥

*अथ मांसाङ्कुरसाम्यादत्राधिकारे चर्मकीलस्य सम्प्राप्तिपूर्वकं लक्षणमाह—व्यान इति। खरं=कर्कशम् ॥ ४५ ॥

अथ चर्मकीलस्य वातादिभेदेन लक्षणमाह—

वातेन तोदपारुष्यं पित्तादसितरक्तता।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता ॥ ४६ ॥

*सवर्णता=शरीरसमानवर्णता ॥ ४६ ॥

अथार्शःसामान्यचिकित्सामाह—

यद्वातस्यानुलोम्याय यदग्निबलवृद्धये।
अन्नपानौषधं सर्वं तत्सेव्यं नित्यमर्शसैः ॥ ४७ ॥

*अर्शसैः=अर्शोरोगयुक्तैः ॥ ४७ ॥

शालिषष्टिकगोधूमयवान्नानि घृतैः सह।

अजाक्षीरेण वा निम्बपटोलानां रसेन वा ॥ ४८ ॥
कान्दैर्वार्त्ताकुमूलजै रसैर्मांसरसेन वा ।
जीवन्त्युपोदिकाशाकैस्तण्डुलीयकवास्तुकैः ॥ ४६ ॥
अन्यैश्च सृष्टविण्मूत्रमरुद्भिर्वह्निदीपनैः ।
अर्शांसि भिन्नवर्चांसि हन्याद्वातातिसारवत् ॥ ५० ॥
सतक्रं लवणं दद्याद्वातवर्चोऽनुलोमनम् ।
न प्ररोहन्ति गुदजाः पुनस्तक्रसमाहताः ॥ ५१ ॥
तक्राभ्यासोऽर्शसैः कार्यो बलवर्णाग्निवृद्धये ।
स्रोतःसु तक्रशुद्धेषु सम्यक् सरति तद्रसः ॥ ५२ ॥
तेन पुष्टिस्तथा तुष्टिर्बलं वर्णश्च जायते ।
वातश्लेष्मविकाराणां शतञ्च विनिवर्त्तते ॥ ५३ ॥

अथ करञ्जादिचूर्णमाह—

चिरबिल्वाग्निसिन्धूत्थनागरेन्द्रयवारलु ।
तक्रेण पिबतोऽर्शांसि निपतन्त्यसृजा सह ॥ ५४ ॥

*चिरबिल्वः=करञ्जः, तस्य फलस्यात्र मज्जा ग्राह्या । अरलुः= शोणाकः ॥ ५४ ॥

अथ रजनीलेपमाह—

लेपं रजनिचूर्णेन सुधादुग्धयुतेन च ।
अर्शोरोगनिवृत्त्यर्थं कारयेत्तु चिकित्सकः ॥ ५५ ॥

अथ पिप्पल्यादिलेपमाह—

पिप्पली सैन्धवं कुष्ठं शिरीषस्य फलं तथा ।
सुधादुग्धार्कदुग्धं वा लेपोऽयं गुदजान्हरेत् ॥ ५६ ॥

अथ हरिद्राऽऽदिलेपमाह—

हरिद्रा जालिनीचूर्णं कटुतैलसमन्वितम् ।
एष लेपो वरः प्रोक्तो ह्यर्शसामन्तकारकः ॥ ५७ ॥

*जालिनी="कटुतोरई" इति लोके ॥ ५७ ॥

अथ तिलभक्षणमाह—

असितानां तिलानान्तु पलं शीतजलेन च ।
खादतोऽर्शांसि शाम्यन्ति दृढा दन्ता भवन्ति च ॥ ५८ ॥

अथ रुधिरस्रावणमाह—

शस्त्रैर्वाऽथ जलौकोभिः प्रोच्छूनकठिनार्शसः ।
शोणितं सञ्चितं दृष्ट्वा हरेत्प्राज्ञः पुनः पुनः ॥ ५९ ॥

अथ बृहत्काशीसादितैलमाह—

काशीसं सैन्धवं कृष्णा शुण्ठी कुष्ठश्च लाङ्गली ।
शिलाभिदश्वमारश्च दन्तीजन्तुघ्नचित्रकम् ॥ ६० ॥
तालकं कुनटी स्वर्णक्षीरी चैतैः पचेद्भिषक् ।
तैलं स्नुह्यर्कपयसा गवां मूत्रं चतुर्गुणम् ॥ ६१ ॥
एतदभ्यङ्गतोऽर्शांसि क्षारेणैव पतन्ति हि ॥
क्षारकर्मकरं ह्येतन्न च सन्दूषयेद्वलिम् ॥ ६२ ॥

*काशीसं = "कसीस" इति लोके । लाङ्गली "करिहारी"ति लोके। शिलाभित = पाषाणभेदः । अश्वमारः="कनेर" इति लोके । स्वर्णक्षीरी="चोक" इति लोके ॥ ६०-६२ ॥

अथ समशर्करचूर्णमाह—

शुण्ठीकणामरिचनागदलत्वगेलं चूर्णीकृतं क्रमविवर्द्धितमूर्ध्वमन्त्यात् ।
खादेदिदं समसितं गुदजाग्निमान्द्यगुल्मारुचिश्वसनकण्ठहृदामयेषु॥६३॥

*तद्यथा—एलाबीजमत्र सूक्ष्मं ग्राह्यम् । यत आह मदनपालः—

"एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रनुद्"

इत्यादि । तस्या बीजं भाग १, त्वग्भाग २, दलं = पत्रकम् ३, नागं = नागकेशरं । यत आह निघण्टौ धन्वन्तरिः—

"नागपुष्पं मतं नागं केशरं नागकेशरम्" ।। ५ ।।

इत्यादि । तस्य भागाः ४, मरिचम् ५, पिप्पली ६, शुण्ठी ७, शर्कराभागाः २८, इति समशर्करचूर्णम् ॥ ६३ ॥

अथ विजयचूर्णमाह—

त्रिकत्रयं वचा हिङ्गु पाठाक्षारौ निशाद्वयम् ।
चव्यतिक्ताकलिङ्गानि शक्राह्वा लवणानि च ॥ ६४ ॥
ग्रन्थिबिल्वाजमोदाश्च गणोऽष्टाविंशतिर्मतः ।
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ॥ ६५ ॥

चूर्णं विडालपदकं पिबेदुष्णेन वारिणा ।
एरण्डतैलयुक्तं वा लिह्याच्चूर्णमिदं नरः ॥ ६६ ॥

*त्रिकत्रयं=त्रिफलात्रिकटुत्रिसुगन्धीनि । क्षारौ=स्वर्जिका यवक्षारश्च । लवणानि पञ्च । ग्रन्थिः=पिप्पलीमूलम् । विडालपदकं=कर्षम् ॥ ६४-६६ ॥

हन्यादर्शांसि सर्वाणि श्वासशोषभगन्दरान् ।
हृच्छूलं पार्श्वशूलञ्च वातगुल्मं तथोदरम् ॥ ६७ ॥
हिक्कां कासं प्रमेहांश्च पाण्डुरोगं सकामलम् ।
आमवातमुदावर्त्तमन्त्रवृद्धिं गुदक्रिमीन् ॥ ६८ ॥
अन्ये च ग्रहणीदोषा भिषग्भिर्ये प्रकीर्त्तिताः ।
विजयो नाम चूर्णोऽयं तान्सर्वानाशु नाशयेत् ॥ ६९ ॥
महाज्वरोपसृष्टानां भूतोपहतचेतसाम् ।
अप्रजानाञ्च नारीणां हितमेतद्धि भेषजम् ॥ ७० ॥

अथ लघुशूरणमोदकमाह—

मरिचमहौषधचित्रकशूरणभागा यथोत्तरं द्विगुणाः ।
सर्वसमो गुडभागः सेव्योऽयं मोदकः प्रसिद्धफलः ॥ ७१ ॥
ज्वलनं ज्वलयति जाठरमुन्मूलयतीह शूलगुल्मगदान् ।
निःशेषयति श्लीपदमर्शांसि विनाशयत्याशु ॥ ७२ ॥

*तद्यथा—मरिचभागः १ । शुण्ठीभागौ २ । चित्रकमूलभागाः ४ । शूरणभागाः ८ । गुडभागाः १५ । ७१-७२ ॥

अथ बृहच्छूरणमोदकमाह—

षोडश शूरणभागा वह्नेरष्टौ महौषधस्यातः ।
अर्द्धेन भागयुक्तिर्मरिचस्य ततोऽपि चार्द्धेन ॥ ७३ ॥
त्रिफला कणा समूला तालीसारुष्करक्रिमिघ्नानाम् ।
भागा महौषधसमा दहनांशा तालमूली च ॥ ७४ ॥
भागाः शूरणतुल्या दातव्या वृद्धदारकस्यापि ।
भृङ्गैले मरिचांशे सर्वाण्येकत्र कारयेच्चूर्णम् ॥ ७५ ॥
द्विगुणेन गुडेन युतः सेव्योऽयं मोदकः प्रकामघनैः ।

गुरुवृष्यभोजनरतैरितरेषूपद्रवं कुर्यात् ॥ ७६ ॥
भस्मकमनेन जनितं पूर्वमगस्त्यस्य योगराजेन ।
भीमस्य मारुतेरपि महाशनौ तेन तौ यातौ ॥ ७७ ॥
अग्निबलवर्णहेतुर्न केवलं शूरणो महावीर्यः ।
हन्ता शस्त्रक्षारानलैर्विनाऽप्यर्शसामेषः ॥ ७८ ॥
श्वयथुश्लीपदगदहृद् ग्रहणीं च कफानिलोद्भूताम् ।
नाशयति वलीपलितं मेधां कुरुते जराश्च हरेत् ॥ ७९ ॥
हिक्कां कासं श्वासं च राजरोगं प्रमेहांश्च ।
प्लीहानं च तथोग्रं हन्त्याशु रसायनं पुंसाम् ॥ ८० ॥

*एषां भागा यथा—शूरण भाग १६ । चीता भाग ८ । शुण्ठी-भाग ४ । मरिचभाग २ । हररै, वहेरा, आमला । पीपरि । पीपरा-मूल । तालीश । भिलाघा-तदसह्यत्वे रक्तचन्दनम् । विडङ्ग प्रत्येक भाग ४ । तालमूली भाग ८ । विधारा भाग १६ । तज भाग १ । इलायची छोटी बीज भाग १ । गुड भाग १७६ ॥ ७३-८० ॥

अथ बाहुशालगुडमाह—

त्रिवृत्तेजोवती दन्ती श्वदंष्ट्रा चित्रकं शटी ।
गवाक्षी मुस्तविश्वाऽब्दविडङ्गानि हरीतकी ॥ ८१ ॥
पलोन्मितानि चैतानि पलान्यष्टावरुष्करात् ।
वृद्धदारात् पलान्यष्टौ शूरणस्य तु षोडश ॥ ८२ ॥
जलद्रोणद्वये क्वाथ्यं चतुर्भागावशेषितम् ।
पूतन्तु तं रसं भूयः क्वाथ्येभ्यस्त्रिगुणं गुडम् ॥ ८३ ॥
मेलयित्वा पचेत्तावद्यावद्दर्वीप्रलेपनम् ।
अवतार्य ततः पश्चाच्चूर्णानीमानि दापयेत् ॥ ८४ ॥
त्रिवृत्तेजोवतीकन्दचित्रकान्द्विपलांशिकान् ।
पलात्वङ्मरिचं चापि नागाह्वश्चापि षट्पलम् ॥ ८५ ॥

*तेजोवती = "तेजवल्कल" इति । कन्दः = शूरणः ॥ ८५ ॥

द्वात्रिंशच्च पलान्यत्र चूर्णयित्वा निधापयेत् ।
ततो मात्रां प्रयुञ्जीत जीर्णे क्षीररसाशिनः ॥ ८६ ॥

हन्यादर्शांसि सर्वाणि तथा सर्वोदराण्यपि ।
गुल्मानपि प्रमेहांश्च पाण्डुरोगं हलीमकम् ॥ ८७ ॥
दीपयेदनलं मन्दं यक्ष्माणं चापकर्षति ।
आढ्यवाते प्रतिश्याये पीनसे च हितो मतः ॥ ८८ ॥
भवन्त्यनेन पुरुषाः शतं वर्षाण्यनामयाः ।
दीर्घायुषः प्रजनना वलीपलितवर्जिताः ॥ ८६ ॥
गुडः श्रीबाहुशालोऽयं रसायनवरो मतः ।
दुर्नामान्तकरो ह्येष दृष्टो वारसहस्रशः ॥ ९० ॥
यावद्दर्वीप्रलेपः स्याद् गुडो वा तन्तुमान् भवेत् ।
तोयपूर्णे यदा पात्रे क्षिप्तो न प्लवते गुडः ॥ ९१ ॥
क्षिप्तस्तु निश्चलस्तिष्ठेत्पतितस्तु न शीर्यति ।
एष पाकः समस्तानां गुडानां परिकीर्त्तितः ॥ ९२ ॥
सार्द्धं पलं पलं चार्द्धं भक्षयेद् गुडखण्डयोः ।
श्रेष्ठा तु मध्यमा हीना मात्रोक्ता मुनिभिस्त्रिधा ॥ ९३ ॥

अथ तिलादिमोदकमाह—

तिलभल्लातकैः पथ्या गुडश्चेति समांशकैः ।
दुर्नामश्वासकासघ्नं प्लीहपाण्डुज्वरापहम् ॥ ९४ ॥

अथ सगुडाभयामाह—

पित्तश्लेष्मप्रशमनी कण्डूकुक्षिरुजापहा ।
गुदजान्नाशयत्याशु भक्षिता सगुडाऽभया ॥ ९५ ॥

अथ शङ्करलौहमाह—

प्रणम्य शङ्करं रुद्रं दण्डपाणिं महेश्वरम् ।
जीवितारोग्यमन्विच्छन्नारदोऽपृच्छदीश्वरम् ॥ ९६ ॥
सुखोपायेन हे नाथ शस्त्रक्षाराग्निभिर्विना ।
चिकित्सामर्शसां नृणां कारुण्याद्वक्तुमर्हसि ॥ ९७ ॥
नारदस्य वचः श्रुत्वा नराणां हितकाम्यया ।
अर्शसां नाशनं श्रेष्ठं भैषज्यं शङ्करोऽवदत ॥ ९८ ॥
पाण्डयवज्रादिलोहानामादायान्यतमं शुभम् ।

कृत्वा निर्मलमादौ तु कुनट्या माक्षिकेण च ॥ ९९ ॥
पत्तूरमूलकल्केन लिम्पेद्रसयुतेन च ।
वह्नौ निक्षिप्य विधिवत्साराङ्गारेण निर्द्धमेत् ॥ १०० ॥

*कुनटी=मनःशिला । माक्षिकं=सुवर्णमाक्षिकम् । पत्तूरः=
"पटकार" इति लोके । रसः=पारदः । सारः=काष्ठसारः ॥९९-१००॥

ज्वाला च तस्य रोद्धव्या त्रिफलाया रसेन च ।
ततो विज्ञाय गलितं शङ्कुनोर्ध्वं समुच्छ्रयेत् ॥ १०१ ॥
त्रिफलाया रसे पूते तदाकृष्य तु निर्द्धमेत ।
न सम्यग्गालितं यत्तु तेनैव विधिना पुनः ॥ १०२ ॥
ध्मातं निर्वापयेत्तस्मिंल्लोहं तत्त्रिफलारसे ।
यल्लोहं न मृतं तत्तु पाच्यं भूयोऽपि पूर्ववत् ॥ १०३ ॥
मारणान्न मृतं यच्च तत्त्यक्तव्यमलोहवत् ।
ततः संशोष्य विधिवच्चूर्णयेल्लोहभाजने ॥ १०४ ॥
लोहेन च तथा पिष्याद्दृषदा सूक्ष्मचूर्णितम् ।
कृत्वा लोहमये पात्रे मार्दे वा लिप्तरन्ध्रके ॥ १०५ ॥
रसैः पङ्कोपमं कृत्वा तं पचेद्गोमयाग्निना ।
पुटानि क्रमतो दद्यात्पृथगेभिर्विधानतः ॥ १०६ ॥
त्रिफलाऽऽर्द्रकभृङ्गाणां केशराजस्य बुद्धिमान् ।
मानकन्दकभल्लातवह्नीनां शूरणस्य च ॥ १०७ ॥

*भृङ्गः=भङ्गरिया । केशराजः="केशराग"इति ॥ १०७ ॥

हस्तिकर्णपलाशस्य कुलिशस्य तथैव च ।
पुटे पुटे चूर्णयित्वा लोहात्षोडशिकं पलम् ॥ १०८ ॥
तन्मात्रं त्रिफलायाश्च पलेनाधिकमाहरेत् ।
अष्टभागावशेषे तु रसे तस्याः पचेद् बुधः ॥ १०९ ॥
अष्टौ पलानि दत्त्वा च सर्पिषो लौहभाजने ।
ताम्रे वा लोहदर्व्या तु चालयेद्विधिपूर्वकम् ॥ ११० ॥
ततः पाकविधानज्ञः स्वच्छे चोद्र्ध्वं च सर्पिषि ।
मृदुमध्यादिभेदेन गृह्णीयात्पाकमन्यतः ॥ १११ ॥

आरम्भे तद्विधानज्ञः कृतकौतुकमङ्गलः ।
घृतभ्रामरसंयुक्तं विलिह्याद्रक्तिकाक्रमात् ॥ ११२ ॥
*द्वादशरक्तिकापर्यन्तं यथाऽग्निबलं खादेत् ॥ ११२ ॥
बर्द्धमानानुपानञ्च गव्यक्षीरोत्तमं मतम् ।
गव्याभावे त्वजायाश्च स्निग्धवृष्यादिभोजनम् ॥ ११३ ॥
सद्यो वह्निकरञ्चैव भस्मकञ्च नियच्छति ।
हन्ति वातं तथा पित्तं कुष्ठानि विषमज्वरम् ॥ ११४ ॥
गुल्माक्षिपाण्डुरोगांश्च निद्राऽऽलस्यमरोचकम् ।
शूलञ्च परिणामञ्च प्रमेहमपबाहुकम् ॥ ११५ ॥
श्वयथुं रुधिरस्रावं दुर्नामानं विशेषतः ।
बलकृद् बृंहणञ्चैव कान्तिदं स्वरबोधनम् ॥ ११६ ॥
शरीरलाघवकरमारोग्यपुष्टिबर्द्धनम् ।
आयुष्यं श्रीकरञ्चैव बलतेजस्करं शुभम् ॥ ११७ ॥
सश्रीकं पुत्रजननं वलीपलितनाशनम् ।
दुर्नामारिरयं नाम्ना दृष्टो वारसहस्रशः ॥ ११८ ॥
अनेनार्शांसि दह्यन्ते तथा तूलञ्च वह्निना ।
सौकुमार्याल्पकायत्वान्मद्यसेवी यदा नरः ॥ ११९ ॥
जीर्णमद्यादियुक्तादिभोजनैः सह दापयेत् ।
लावतित्तिरिवर्त्तीरमयूरशशकादयः ॥ १२० ॥
चटकः कलविङ्कश्च वर्त्तका हरितालकः ।
श्येनकश्च बृहल्लावो वनविष्किरकादयः ॥
पारावतमृगादीनां मांसं जाङ्गलकं शुभम् ॥ १२१ ॥

*वर्त्तीरः="वगेर"इति लोके । चटको=वनचटकः । कलविङ्को-गृहचटकः । वर्त्तका="वटेर" इति लोके । हरितालकः="हारिल" इति लोके । विष्किराः=वर्त्तकादयः ॥ १२०-१२१ ॥

मद्गुरो रोहितः श्रेष्ठः शकुलश्च विशेषतः ।
मत्स्यराजा इति प्रोक्ता हितमत्स्याय देहिने ॥ १२२ ॥
वृन्ताकस्य फलं शस्तं पटोलं बृहतीफलम् ।

प्रलम्बा भीरुवेत्राग्रताडकं तण्डुलीयकम् ॥ १२३ ॥

*प्रलम्बा = लम्बालाबुः । भीरुः = शतावरी । पत्रम्=पत्रशाकम् । ताडकं = देवदाली, "अकरकरे"ति लोके । तथा च निघण्टौ धन्वन्तरिः—

*"जीमूतको देवताडो वृत्तकोशो गरागरी ।
प्रोक्ताऽऽखुविषहा वेणी देवदाली च ताडकः ॥
देवदाली रसे तिक्ता कफार्शःशोथपाण्डुताः ।
नाशयेत्" ॥ ७ ॥ इत्यादि ॥ १२३ ॥

वास्तूकं धान्यशाकञ्च चित्रकं करमर्दकम् ।
नालिकेरञ्च खर्जूरं दाडिमं लवलीफलम् ॥ १२४ ॥

*चक्रमर्दकं = चकवडशाकम् ॥ १२४ ॥

शृङ्गाटकञ्च पक्वाम्रं द्राक्षातालफलानि च ।
जातिकोशं लवङ्गं च पूगं ताम्बूलपत्रकम् ॥ १२५ ॥
हितान्येतानि वस्तूनि लोहमेतत्समश्नताम् ।
नाश्नीयाल्लकुचं कोलकर्कन्धुबदराणि च ॥ १२६ ॥

*कोलं = क्षुद्रबदरम् । कर्कन्धु = बृहद्बदरम् ॥ १२६ ॥

जम्बीरं बीजपूरञ्च तिन्तिडी करमर्दकम् ।
आनूपानि च मांसानि क्रकरं पुण्ड्रकाणि च ॥ १२७ ॥
हंससारसदात्यूहचाषक्रौञ्चबलाकिकाः ।
मानकन्दं कसेरूणि कतजञ्च कलिङ्गकम् ॥ १२८ ॥

*दात्यूहः = नीलकण्ठः, चाषः = [डाकु], कलिङ्गकम् [तरबूज] ॥ १२८ ॥

कुष्माण्डकञ्च कर्कोटं क्रमुकञ्च विशेषतः ।
कटुकं कालशाकञ्च कुण्टुरुः क टी तथा ॥ १२९ ॥
ककारादीनि सर्वाणि द्विदलानि च वर्जयेत् ॥ १३० ॥
शङ्करेण समाख्यातो यक्षराजानुकम्पया ।
जगतामुपकाराय दुर्नामारिरयं ध्रुवम् ॥ १३१ ॥
स्थानाच्चलति मेरुश्च पृथ्वी पर्येति वायुना ।

पतन्ति चन्द्रताराश्च मिथ्या चेदहमब्रुवम् ॥ १३२ ॥
ब्रह्मघ्नाश्च कृतघ्नाश्च क्रूरा येऽसत्यवादिनः ।
वर्जनीयाः सधर्मेण भिषजा गुरुनिन्दकाः ॥ १३३ ॥
मुनिरसपिष्टविडङ्गं मुनिरसलीढं चिरस्थितं घर्मे ।
द्रावयति लोहदोषान्वह्निर्नवनीतपिण्डमिव ॥ १३४ ॥

*मुनिरत्रागस्त्यः ॥ १३४ ॥

काले मलप्रवृत्तिर्लाघवमुदरे विशुद्धिरुद्गारे ।
अङ्गेषु नावसादो मनःप्रसादोऽस्य परिपाके ॥ १३५ ॥
क्रिमिरिपुचूर्णं लीढं सहितं स्वरसेन वङ्गसेनस्य ।
क्षपयत्यचिरान्नियतं लोहाजीर्णोद्भवं शूलम् ॥ १३६ ॥

*वङ्गसेनस्य=अगस्तेः ॥ १३६ ॥

भवेद्यद्यतिसारस्तु दुग्धं पीत्वा तु तं जयेत् ।
गुञ्जाद्वादशकादूर्ध्वं वृद्धिरस्य भयप्रदा ॥ १३७ ॥

*शङ्करप्रणीतं लोहम् । इति सामान्याः क्रिया ॥ १३७ ॥

अथ रक्तार्शश्चिकित्सामाह ।

रक्तार्शसामुपेक्षेत रक्तमादौ स्रवद्भिषक् ।
दुष्टास्रे निःसृते न स्युः शूलानाहासृगामयाः ॥ १३८ ॥

अथ चन्दनादिक्वाथमाह—

चन्दनकिराततिक्तकधन्वयवासाः सनागराः कथिताः ।
रक्तार्शसां प्रशमना दार्वीत्वगुशीरनिम्बाश्च ॥ १३९ ॥

*चन्दनमत्र रक्तम् । नागरमत्र मुस्तकम् ॥ १३९ ॥

नवनीततिलाभ्यासात्केशरनवनीतशर्कराऽभ्यासात् ॥
दधिसरमथिताभ्यासाद् गुदजाः शाम्यन्ति रक्तवहाः ॥ १४० ॥

* दधिसरः=यो दध्नस्तूपरिभागो घनस्नेहयुतः सरः ।
मथितं=सररहितं निर्जलं वस्त्रपूतं दधि ॥ १४० ॥

सपद्मकेशरं क्षौद्रं नवनीतं नवं लिहन् ।
सिताकेशरसंयुक्तं रक्तार्शसि सुखी भवेत् ॥ १४१ ॥
पयसा शृतेन यूषैः सतीनमुद्गाढकीमसूराणाम् ।

ओदनमद्यादम्लैः शालिश्यामाककोद्रवजम् ॥
शशहरिणलावमांसैः कपिञ्जलैरेणमांसैश्च ॥ १४२ ॥
*ओदनमद्यादम्लैरीषत्सुगन्धैश्च ॥ १४२ ॥

अथ समङ्गाऽऽदिदुग्धमाह—

समङ्गोत्पलमोचाकतिरीटोत्पलचन्दनैः ।
सिद्धं छागीपयो दद्याद् गुदजे शोणितात्मके ॥ १४४ ॥

*समङ्गा = लज्जालुः । मोचाको = मोचरसः । तिरीटो = लोध्रः । चन्दनं = रक्तम् ॥ १४४ ॥

अथ क्षारसूत्रमाह—

भावितं रजनीचूर्णं स्नुहीक्षीरैः पुनःपुनः ।
बन्धनात्सुदृढं सूत्रं छिनत्त्यर्शो भगन्दरम् ॥ १४५ ॥

अथ नासिकाऽऽद्यर्शश्चिकित्सामाह—

नासानाभिसमुत्थेषु तथा मेढ्रादिजेष्वपि ।
त्रिष्वप्यर्शःसु कुर्वीत तत्र तत्र यथोचितम् ॥ १४६ ॥

अथ चर्मकीलचिकित्सामाह—

चर्मकीलन्तु संछिद्य दहेत्क्षारेण चाग्निना ॥ १४७ ॥

अथार्शोऽपथ्यान्याह—

वेगावरोधं स्त्रीपृष्ठयानान्युत्कटकासनम् ।
यथास्वं दोषलं चान्नमर्शसः परिवर्जयेत् ॥ १४८ ॥

इति पञ्चमोऽर्शोऽधिकारः समाप्तः ॥ ५ ॥

अथ षष्ठो जठराग्निविकाराधिकारः ॥ ६ ॥

तत्र सन्निकृष्टनिदानपूर्वकजठराग्निविकारानाह—

कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः ।
मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः ॥ १ ॥

अथ मन्दाग्निलक्षणमाह—

स्वल्पाऽपि नैव मन्दाग्नेर्मात्रा भुक्ता विपच्यते ।
छर्दिः सादः प्रसेकः स्याच्छिरोजठरगौरवम् ॥ २ ॥

अथ तीक्ष्णाग्निलक्षणमाह—

मात्राऽतिमात्राऽप्यशिता तीक्ष्णाग्नेः पच्यते सुखम् ।
अत एव हि केनापि मतस्तीक्ष्णाग्निरुत्तमः ॥ ३ ॥

अथ विषमाग्निलक्षणमाह—

अशिता खलु मात्राऽपि विषमाग्नेस्तु देहिनः ।
कदा चित्पच्यते सम्यक्कदा चिन्न विपच्यते ॥ ४ ॥
तस्याध्मानमुदावर्त्तं शूलं जठरगौरवम् ।
प्रवाहणमतीसारस्तथा स्यादन्त्रकूजनम् ॥ ५ ॥

अथ समाग्निलक्षणमाह—

समा समाग्नेरशिता मात्रा सम्यग्विपच्यते ।
एषां मध्ये तु सर्वेषां समाग्निः श्रेष्ठ उच्यते ॥ ६ ॥

तन्त्रान्तरे तु—

अतिमात्रमजीर्णेऽपि गुरु चान्नं समश्नतः ।
दिवाऽपि स्वपतो येन पच्यते सोऽग्निरुत्तमः ॥ ७ ॥

*एतेन तीक्ष्ण उत्तम उक्तः । स च मधुरस्निग्धादिभोज्यसम्पत्तावुत्तमः । तर्हि कथं तीक्ष्णस्य विकारमध्ये गणना ? उच्यते—समोऽग्निः क्षुधाविघातादाश्वेव तथा विकारं न करोति । तीक्ष्णस्तु स्वल्पकालमपि क्षुधाविघातादाश्वेव पैत्तिकान् विकारान् कुरुते । इत्याहोत्तरत्र—तीक्ष्ण इति ॥ ७ ॥

तीक्ष्णः पित्तसमुत्थानान्विषमो वातहेतुकान् ।
तथा करोति मन्दाग्निर्विकारान् कफसम्भवान् ॥ ८ ॥

अथ भस्मकस्य निदानसंप्राप्तिपूर्वकं लक्षणमाह—

वह्निर्त्तिरूक्षान्नभुजां नराणां क्षीणे कफे मारुतपित्तवृद्धौ ।
अतिप्रवृद्धः पवनान्वितोऽग्निर्भुक्तं क्षणाद्भस्म करोति यस्मात् ।
तस्मादसौ भस्मकसंज्ञकोऽभूदुपेक्षितोऽयं पचते च धातून् ॥ ९ ॥

अथ भस्मकस्य सोपद्रवमरिष्टमाह—

तृट्स्वेददाहमूर्च्छाऽऽदीन्कुरुते सोऽत्यग्निसम्भवान् ।
पक्त्वाऽन्नमाशु धात्वादीन् स क्षिप्रं नाशयेद् ध्रुवम् ॥ १० ॥

अथाजीर्णस्य विप्रकृष्टनिदानमाह—

अत्यम्बुपानाद्विषमाशनाच्च सन्धारणात् स्वप्नविपर्ययाच्च।
कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य ॥११॥

*सन्धारणात् क्षुधामूत्रपुरीषादीनाम्। स्वप्नविपर्ययाद्=दिवाशयनाद्रात्रौ जागरणात्। "लघु चापी" त्यपिशब्दात् स्निग्धोष्णादिगुणयुक्तमपि ॥ ११ ॥

अन्यच्च—

तृष्णाभयक्रोधपरिप्लुतेन लुब्धेन रुग्दैन्यनिपीडितेन।
प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक् परिपाकमेति ॥ १२ ॥

*परिप्लुतेन=व्याप्तेन ॥ १२ ॥

अजाजीर्णप्राप्तिकारणमाह—

अनात्मवन्तः पशुवद् भुञ्जते येऽप्रमाणतः।
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ॥ १३ ॥

*उक्तकारणेभ्योऽतिमात्रान्नभोजनं विशेषादजीर्णस्य कारणम्, अजीर्णञ्च बहुव्याधीनां कारणमित्याह—अनात्मेति। अनात्मवन्तः=अबुद्धिमन्तः। रोगानीकस्य=विसूच्यादेर्मूलं=कारणम् ॥ १३ ॥

अन्यच्च—

प्रायेणाहारवैषम्यादजीर्णं जायते नृणाम्।
तन्मूलो रोगसंघातस्तद्विनाशाद्विनश्यति ॥ १४ ॥

*रोगसंघातः=रोगसमूहः। अजीर्णविनाशाद्धि विनश्यति ॥१४॥

अथाजीर्णसामान्यलक्षणमाह—

ग्लानिगौरवविष्टम्भभ्रममारुतमूढताः।
विबन्धो वा प्रवृत्तिर्वा सामान्याजीर्णलक्षणम् ॥ १५ ॥

*मारुतमूढता=वायोरवरोधः। विबन्धः=मलाप्रवृत्तिः ॥ १५ ॥

अथ सन्निकृष्टकारणसहिताजीर्णभेदानाह—

आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः।
अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥ १६ ॥

*"त्रिभिर"त्येकशो न तु मिलितैः। केचित्तु सुश्रुतादयः। रसशेषतः भुक्तस्य पक्वस्य सारभूतो यो द्रवः स रसः, सोऽपि पच्यते, भुक्-

स्य सारभूतो यो द्रवः स चापक्वः सारो, रसशेषः, तस्माच्चतुर्थमजीर्णम् । ननु आमाजीर्णाद्रसशेषस्य को भेदः ? उच्यते—आमं मधुरतां गतमपक्वमन्नमेव । रसशेषस्तु भुक्तस्य पक्वस्य सारभूतो यो द्रवः स चापक्व इति भेदः ॥ १६ ॥

अजीर्णं पञ्चमं केचिन्निर्दोषं दिनपाकि च ।
वदन्ति षष्ठञ्चाजीर्णं प्राकृतं प्रतिवासरम् ॥ १७ ॥

*निर्दोषं=गौरवभ्रमशूलादिदोषजनकम् । दिनपाकि च=अहोरात्रेण पाकं यातीति स्वभावः, यत्तु मात्राकालसात्म्यादिदोषाद्दिनान्तरे पाकं याति तद्दिनपाकि । अत एव "याममध्ये न भोक्तव्यमि"ति वचनम् ॥ तदेवाह—वदन्तीति । प्राकृतम्=अविकारकम् । प्रतिवासरं=प्रतिदिनभावि । "भुक्तं यावन्न जीर्णं तावदजीर्णमि"त्युच्यते । एतदभिधानस्य प्रयोजनं पाकार्थं वामपार्श्वे शयनं प्रियशब्दादिसेवनादिकम् । न चात्राहारस्य निषेधः ।

*"प्रातराशे त्वजीर्णे तु सायमाशो न दुष्यति" ।
*इति वचनेन सायमाशस्यावश्यं कर्त्तव्यत्वात् ॥ १७ ॥

अथामाजीर्णलक्षणमाह—

तत्रामे गुरुतोत्क्लेशः शोथो गण्डाक्षिकूटगः ।
उद्गारश्च यथाभुक्तमविदग्धं प्रवर्त्तते ॥ १८ ॥

*गुरुता उदराङ्गयोः । उत्क्लेशः=उपस्थितवमनमिव । अक्षिकूटः=अक्षिपुटकः ॥ १८ ॥

अथ विदग्धाजीर्णलक्षणमाह—

विदग्धे भ्रमतृण्मूर्च्छाः पित्ताच्च विविधा रुजः ।
उद्गारश्च सधूमाम्लः स्वेदो दाहश्च जायते ॥ १९ ॥

*विविधा रुजः=ओषचोषादयो दाहादयश्च ॥ १९ ॥

अथ विष्टब्धाजीर्णलक्षणमाह—

विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः ।
मलवाताप्रवृत्तिश्च स्तम्भो मोहोऽङ्गपीडनम् ॥ २० ॥

*वातवेदनाः=तोदभेदादयः । स्तम्भोऽङ्गानाम् । मोहो=मूर्च्छा ॥ २० ॥

अथ रसशेषाजीर्णलक्षणमाह—

रसशेषेऽन्नविद्वेषो हृदयाशुद्धिगौरवे ॥ २१ ॥

अथाजीर्णोपद्रवानाह—

मूर्च्छा प्रलापो वमथुः प्रसेकः सदनं भ्रमः।
उपद्रवा भवन्त्येते मरणञ्चाप्यजीर्णतः ॥ २२ ॥

अथातिशयितेभ्योऽजीर्णेभ्यो विसूच्यादिरोगानाह—

आमं विदग्धं विष्टब्धमित्यजीर्णं यदीरितम्।
विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका ॥ २३ ॥

*नात्र यथासंख्यम्। तदा विष्टब्धादविलम्बिका भवितुमर्हति। सा च कफवाताभ्यां भवतीत्येकैकतोऽजीर्णाद्विसूच्यादित्रयोत्पत्तिः ॥२३॥

अथ विसूचिकानिरुक्तिमाह—

सूचीभिरिव गात्राणि तुदन्सन्तिष्ठतेऽनिलः।
यत्राजीर्णेन सा वैद्यैर्विसूचीति निगद्यते ॥ २४ ॥

अथ विसूचिकानिदानमाह—

न तां परिमिताहारा लभन्ते विदितागमाः।
मूढास्तामजितात्मनो लभन्तेऽशनलोलुपाः ॥ २५ ॥

*विदितागमाः=ज्ञातायुर्वेदाः ॥ २५ ॥

अथ विसूचिकालक्षणमाह—

मूर्च्छाऽतिसारौ वमथुः पिपासा शूलं भ्रमोद्वेष्टनजृम्भदाहाः।
वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः ॥२६॥

*उद्वेष्टनं हस्तपादयोः। शिरसो भेदः=शिरःशूलम् ॥ २६ ॥

अथ विसूचिकोपद्रवानाह—

निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता।
अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः ॥ २७ ॥

*अमी=निद्रानाशादय उपद्रवाः। सर्वेषामेव रोगाणां घोराः=भयङ्कराः। विसूच्याः पञ्च दारुणाः=विसूच्यास्तु पञ्चापि यदि स्युस्तदा दारुणाः=प्राणभयङ्कराः ॥ २७ ॥

अथालसकलक्षणमाह—

कुक्षिरानह्यतेऽत्यर्थं प्रताम्यत्यथ कूजति।

निरुद्धो मारुतश्चैव कुक्षावुपरि धावति ॥ २८ ॥
वातवर्चोनिरोधश्च यस्यात्यर्थं भवेदपि ।
तस्यालसकमाचष्टे तृष्णोद्गारौ च यस्य तु ॥ २९ ॥

*आनह्यते=आध्मायते । प्रताम्यति=ताडयति । कूजति=आर्त्तनादं करोति । कुक्षावजीर्णेन निरुद्धो मारुत उपरि धावति=हृदयकण्ठादिकं गच्छतीत्यर्थः ॥ २९ ॥

काश्यपस्त्वाह—

नाधो याति न चाप्यूर्द्ध्वमाहारो यो न पच्यते ।
कोष्ठे स्थितोऽलसीभूतस्ततोऽसावलसः स्मृतः ॥ ३० ॥

अथ विसूचिकाऽलसकयोररिष्टमाह—

यः श्यावदन्तौष्ठनखोऽल्पसंज्ञो वम्यर्दितोऽभ्यन्तरयातनेत्रः ।
क्षामस्वरः सर्वविमुक्तसन्धिर्यायान्नरोऽसौ पुनरागमाय ॥३१ ॥

*सर्वे विमुक्ताः=शिथिलीभूताः सन्धयो यस्य सः ॥ ३१ ॥

अथ विलम्बिकालक्षणमाह—

दुष्टन्तु भुक्तं कफमारुताभ्यां प्रवर्त्तते नोर्द्ध्वमधश्च यत्र ।
विलम्बिकां तां भृशदुश्चिकित्स्यामाचक्षते शास्त्रविदः पुराणाः॥३२॥

*भृशदुश्चिकित्स्यां=प्रत्याख्येयामनुपचरणीयाम् । इदमसाध्यञ्चेति जेज्जटः ॥ ३२ ॥

अथ जीर्णाहारलक्षणमाह—

उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः ।
लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम् ॥ ३३ ॥

अथाजीर्णचिकित्सामाह—

हरीतकी तथा शुण्ठी भक्ष्यमाणा गुडेन च ।
सैन्धवेन युता वा स्यात्सातत्येनाग्निदीपनी ॥ ३४ ॥
गुडेन शुण्ठीमथ चोपकुल्यां पथ्यां तृतीयामथ दाडिमं वा ।
आमेष्वजीर्णेषु गुदामयेषु वर्चोविबन्धेषु च नित्यमद्यात् ॥ ३५ ॥

अथ गुडाष्टकमाह—

व्योषं दन्ती त्रिवृच्चित्रं कृष्णामूलं विचूर्णितम् ।
तच्चूर्णं गुडसम्मिश्रं भक्षयेत्प्रातरुत्थितः ॥ ३६ ॥

एतद् गुडाष्टकं नाम बलवर्णाग्निवर्द्धनम् ।
शोथोदावर्त्तशूलघ्नं प्लीहपाण्डवामयापहम् ॥ ३७ ॥

*सर्वचूर्णसमो गुडो देयः ॥ ३६–३७ ॥

दहनाजमोदसैन्धवघनागरमरिचानि चाम्लतक्रेण ।
सप्ताहादग्निकरं पाण्डूवर्शोनाशनं परमम् ॥ ३८ ॥
तत्रामे वमनं कार्यं विदग्धे लङ्घनं हितम् ।
विष्टब्धे स्वेदनं शस्तं रसशेषे शयीत च ॥ ३९ ॥
वचालवणतोयेन वान्तिरामे प्रशस्यते ।
कणासिन्धुवचाकल्कं पीत्वा वा शिशिराम्भसा ॥४०॥

*जलमत्र शरावमात्रम् । वचा कर्षार्द्धमिता । द्वयोश्चूर्णमुष्णेन जलेन पिबेत् । "कणाऽऽदिकल्कं वा पीत्वा वान्तिरामे प्रशस्यते" । इत्यनेनान्वयः ॥ ४० ॥

धान्यनागरसिद्धं वा तोयं दद्याद्विचक्षणः ।
आमाजीर्णप्रशमनं शूलघ्नं वस्तिशोधनम् ॥ ४१ ॥
भवेद्यदा प्रातरजीर्णशङ्का तदाऽभयां नागरसैन्धवाभ्याम् ।
विचूर्णितां शीतजलेन भुक्त्वा भुञ्ज्यादशङ्कं मितमन्नकाले ॥४२॥
विदह्यते यस्य तु भुक्तमात्रं दन्दह्यते हृच्च गलश्च यस्य ।
द्राक्षां सितामाक्षिकसम्प्रयुक्तां लीढ्वाऽभयां चापि सुखं लभेत॥४३॥

अथ हिङ्ग्वष्टकमाह—

त्रिकटुकमजमोदा सैन्धवं जीरके द्वे
समधरणधृतानामष्टमो हिङ्गुभागः ।
प्रथमकवलभुक्तं सर्पिषा चूर्णमेत-
ज्जनयति जठराग्निं वातरोगांश्च हन्ति ॥ ४४ ॥

*अजमोदाऽत्र "यमानी" अग्नेरत्यन्तदीपनत्वाद् । जीरके द्वे = शुक्लं कृष्णं, धरणमत्र मानं तेन समधरणधृतानां = तुल्यमानगृहीतानाम्, शुण्ठ्यादीनां भागाः सप्त, तत्राष्टमो भागो हिङ्गुतः ॥ ४४ ॥

अथ बृहदग्निमुखचूर्णमाह—

द्वौ क्षारौ चित्रकं पाठा करञ्जं लवणानि च ।

सूक्ष्मैलापत्रकं भार्गी क्रिमिघ्नं हिङ्गु पौष्करम् ॥ ४५ ॥
शटी दार्वी त्रिवृन्मुस्तं वचा चेन्द्रयवास्तथा ।
वृक्षाम्लं जीरकं धात्री श्रेयसी चोपकुञ्चिका ॥ ४६ ॥
अम्लवेतसमम्लीका यवानी देवदारु च ।
अभयाऽतिविषा श्यामा हपुषाऽऽरग्वधं समम् ॥ ४७ ॥
तिलमुष्ककशिग्रूणां कोकिलाक्षपलाशयोः ।
क्षाराणि लौहकिट्टञ्च तप्तं गोमूत्रसेचितम् ॥ ४८ ॥
सूक्ष्मचूर्णानि कृत्वा तु समभागानि कारयेत् ।
मातुलुङ्गरसेनैव भावयेद्दिवसत्रयम् ॥ ४९ ॥
दिनत्रयन्तु शुक्तेन तथाऽऽर्द्रकरसेन च ।
अत्यग्निकारकं चूर्णं प्रदीप्ताग्निसमप्रभम् ॥ ५० ॥
उपयुक्तं विधानेन नाशयत्यचिराद्गदान् ।
अजीर्णमथ गुल्मञ्च प्लीहानं गुदजानि च ॥ ५१ ॥
उदराण्यन्त्रवृद्धिञ्च अष्ठीलां वातशोणितम् ।
प्रणुदत्युल्वणान्दोषान्नष्टाग्निं च प्रदीपयेत् ॥ ५२ ॥

*द्वौ क्षारौ=स्वर्जिका यवक्षारश्च । लवणानि पञ्च । वृक्षाम्लं="विषाम्बिल" इति लोके । श्रेयसी=हरीतकी । उपकुञ्चिका="मगरैला" इति लोके । अम्लवेतसकाभावे चुक्रं दातव्यम् । श्यामा=प्रियङ्गुः । मुष्ककः="घण्टापारुल्" इति लोके । कोकिलाक्षः="कोइलषा" इति लोके ॥ ४५–५२ ॥

अथ वैश्वानरक्षारमाह—

स्नुह्यर्कचित्रकैरण्डवरुणं सपुनर्नवम् ।
तिलापामार्गकदलीपलाशं तिन्तिडी तथा ॥ ५३ ॥
गृहीत्वा ज्वालयेदेतत्प्रस्थं भस्माखिलं यथा ।
जलाढके विपक्तव्यं यावत्पादावशेषितम् ॥ ५४ ॥
सुप्रसन्नं विनिस्राव्य लवणप्रस्थसंयुतम् ।
पक्कं निर्धूमकठिनं सूक्ष्मचूर्णीकृतं पुनः ॥ ५५ ॥
यवानीजीरकव्योषस्थूलजीरकहिङ्गुभिः ।

पृथगर्धपलैरेभिश्चूर्णितैस्तद्विमिश्रयेत् ॥ ५६ ॥
आर्द्रकस्वरसेनापि भावयेच्छोषयेत् पुनः ।
शीतोदकेन तच्चूर्णं पिबेत्प्रातर्हि मात्रया ॥ ५७ ॥
तस्मिञ्जीर्णेऽन्नमश्नीयाद्यूषैर्जाङ्गलजै रसैः ।
ईषदम्लैः सलवणैः सुखोष्णैर्वह्निदीपनैः ॥ ५८ ॥
एतेनाग्निर्विवर्द्धेत बलमारोग्यमेव च ।
तत्रानुपानं शस्तं हि तक्रं वा भोजने हितम् ॥ ५९ ॥
मन्दाग्न्यर्शोविकारेषु वातश्लेष्मामयेषु च ।
अश्मर्यां शर्करायाश्च विण्मूत्रानिलरोगिषु ॥ ६० ॥

अथ लवणभास्करमाह—

सामुद्रलवणं कार्यमष्टकर्षमितं बुधैः ।
सौवर्चलं पञ्चकर्षं विडसैन्धवधान्यकम् ॥ ६१ ॥
पिप्पली पिप्पलीमूलं पत्रकं कृष्णजीरकम् ।
तालीशं केशरं चव्यमम्लवेतसकं तथा ॥ ६२ ॥
द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद् बुधः ।
मरिचं जीरकं विश्वमेकैकं कर्षमात्रकम् ॥ ६३ ॥
दाडिमं स्याच्चतुष्कर्षं त्वगेला चार्द्धकर्षिका ।
एतच्चूर्णीकृतं सर्वं लवणं भास्कराभिधम् ॥ ६४ ॥
भक्षयेच्छाणमानन्तु तक्रमस्तुककाञ्जिकैः ।
वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षयम् ॥ ६५ ॥
अर्शांसि ग्रहणीं कुष्ठं विबन्धश्च भगन्दरम् ।
शूलं शोथं श्वासकासाऽऽमदोषांश्चापि हृद्रुजम् ॥ ६६ ॥
अश्मरीं शर्कराश्चापि पाण्डुरोगं क्रिमीनपि ।
मन्दाग्निं नाशयेदेतद्दीपनं पाचनं परम् ॥ ६७ ॥
हिताय सर्वलोकानां भास्करेण विनिर्मितम् ।
हन्यात्सर्वाण्यजीर्णानि भुक्तमात्रमसंशयम् ॥ ६८ ॥

*अत्र दाडिमस्य बीजानां कर्षचतुष्टयमितं देयम् ॥ ६१-६८ ॥

अथ वडवाऽनलचूर्णमाह—

सैन्धवसमूलमगधाचव्यानलनागरं पथ्या ।

क्रमवृद्धमग्निवृद्धौ वडवाऽनलनाम चूर्णं स्यात् ॥ ६९ ॥

अथ द्वितीयं वडवाऽनलचूर्णमाह—

पथ्यानागरकृष्णाकरञ्जबिल्वाग्निभिः सितातुल्यैः ।
वडवाऽनल इव जरयति बहु गुर्वतिभोजनं चूर्णम् ॥ ७० ॥

अथ समशर्करचूर्णमाह—

एलात्वङ्नागपुष्पाणां मात्रोत्तरविवर्द्धिता ।
मरिचं पिप्पली शुण्ठी चतुष्पञ्चषडुत्तरा ॥ ७१ ॥
द्रव्याण्येतानि यावन्ति तावती सितशर्करा ।
चूर्णमेतत्प्रयोक्तव्यमग्निसन्दीपनं परम् ॥ ७२ ॥

अथाजीर्णरसाः ।

तत्र क्रव्यादरसमाह—

द्विपलं गन्धकं शुद्धं पलमेकन्तु पारदम् ।
मृतलोहं तथा ताम्रं कर्षद्वयमितं पृथक् ॥ ७३ ॥
संचूर्ण्य सर्वं सम्मिश्रं द्रावयित्वाऽग्नियोगतः ।
सम्यग् द्रुतं समस्तं तत्पञ्चाङ्गुलदले क्षिपेत् ॥ ७४ ॥
पुनः सञ्चूर्ण्य तत्सर्वं लोहपात्रे निधापयेत् ।
जम्बीरस्य रसं तत्र पूतं पलशतं क्षिपेत् ॥ ७५ ॥
चुल्यां निवेश्य तद्यत्नान्मृदुना वह्निना पचेत् ।
रसे तस्मिन्घनीभूते तत्संशोष्य विचूर्णयेत् ॥ ७६ ॥
पञ्चकोलकषायस्य चुक्रेण सहितस्य च ।
भावना तत्र दातव्या पश्चात्संशोषयेच्छनैः ॥ ७७ ॥
भृष्टटङ्कणचूर्णेन तुल्येन सह मेलयेत् ।
मरिचेनापि तुल्येन तदर्द्धेन विडेन च ॥ ७८ ॥
भावयेत्सप्तकृत्वस्तु चणकाम्लजलेन च ।
ततः संशोष्य संपिष्य कूपीमध्ये निधापयेत् ॥ ७९ ॥
रसः क्रव्यादनामाऽयं भैरवानन्दयोगिना ।
उक्तः सिहलराजाय बहुमांसाशिने पुरा ॥ ८० ॥
भक्षयेद्भोजनस्यान्ते माषद्वयमितं रसम् ।
भक्षयित्वा रसं पश्चात्पिबेत्तक्रं ससैन्धवम् ॥ ८१ ॥

अत्यर्थं गुरु यद् भुक्तमतिमात्रमथापि च।
तत्सर्वं जीर्यति क्षिप्रं रसस्यैतस्य भक्षणात् ॥ ८२ ॥
शूलं गुल्मञ्च विष्टम्भं प्लीहानमुदरं तथा।
रसः क्रव्यादनामाऽयं विनिहन्ति न संशयः ॥ ८३ ॥

*इति क्रव्यादरसोऽजीर्णे रसेन्द्रचिन्तामणौ रसरत्नप्रदीपे च ॥ ७३–८३ ॥

अथ ज्वालाऽनलरसमाह—

क्षारत्रयं सूतगन्धौ पञ्चकोलमिदं समम्।
सर्वैस्तुल्या जया भृष्टा तदर्द्धा शिग्रुजा जटा ॥ ८४ ॥
एतत्सर्वं जयाशिग्रुवह्नीनां केवलैर्द्रवैः।
भावयेत्रिदिनं घर्मे ततो लघु पुटे पचेत् ॥ ८५ ॥
मार्कवस्य द्रवैर्घृष्टो रसो ज्वालाऽनलो भवेत।
निष्कोऽस्य मधुना लीढोऽनुपानं गुडनागरम् ॥ ८६ ॥
हन्त्यजीर्णमतीसारं ग्रहणीमग्निमार्दवम्।
श्लेष्महृल्लासवमनमालस्यमरुचिं जयेत् ॥ ८७ ॥

*अथ पञ्चकोलम्—

*पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः।

*जयाऽत्र विजया। मार्कवः=भृङ्गराजः। इति ज्वालाऽनलो-रसोऽजीर्णे रसरत्नप्रदीपे ॥ ८४–८७ ॥

अथाग्निकुमाररसमाह—

टङ्कणं रसगन्धौ च समं भागत्रयं विषात्।
कपर्दः स्वर्जिका क्षारो मागधी विश्वभेषजम् ॥ ८८ ॥
पृथक् पृथक्कर्षमात्रं वसुभागमिहोषणम्।
जम्बीराम्लैर्दिनं घृष्टं भवेदग्निकुमारकः।
विषूचीशूलवातादिवह्निमान्द्यप्रशान्तये ॥ ८९ ॥

*क्षारो=यवक्षारः। इत्यग्निकुमारो विसूच्यामजीर्णे रसरत्नप्रदी-पे रसेन्द्रचिन्तामणौ च ॥ ८८–८९ ॥

अथ रामबाणरसमाह—

(रसेन्द्रचिन्तामणौ)

पारदामृतलवङ्गगन्धकं भागयुग्ममरिचेन मिश्रितम् ।
तत्र जातिफलमर्द्धभागिकं तिन्तिडीफलरसेन मर्दितम् ॥९०॥
माषमात्रमनुपानसेवितं रामबाणगुडिका रसायनम् ।
बिल्वपत्रमरिचेन भक्षितं सद्य एव जठराग्निवर्द्धितम् ॥९१॥
वातो नाशमुपैति चार्द्रकरसैर्निर्गुण्डिकाया द्रवैः—
पित्तं नाशमुपैति धान्यकजलैर्वासा त्रिदोषं हरेत् ।
श्लेष्मा सिन्धुहरीतकीभिरुदरं क्वाथैश्च पौनर्नवैः—
शोथं पाण्डुगदं निहन्ति गुडिका रोगार्त्तिविध्वंसिनी ॥९२॥
वह्निमान्द्यदशवक्त्रनाशनो रामबाण इति विश्रुतो रसः ।
संग्रहग्रहणिकुम्भकर्णकमामवातखरदूषणं जयेत् ॥ ९३ ॥
दीयते तु मरिचानुपानतः सद्य एव जठराग्निदीपनः ।
रोचनः कफकुलान्तकारकः श्वासकासवमिजन्तुनाशनः ॥९४॥

*पारा भाग १ । विष भाग १ । लवङ्ग भाग १ । गन्धक भाग १ । मरिच भाग २ । जायफल भाग आधा ॥ ९०-९४ ॥

अथ शङ्खवटीमाह—

(रसरत्नप्रदीपे)

पलं चिञ्चाक्षारं पलमितमिदं पञ्चलवणं
द्रवं सम्यक्पिष्टं भवति लघुनिम्बूफलरसैः ।
ततः पिष्टे तस्मिन्पलपरिमितं शङ्खशकलं
क्षिपेद् वारान्सप्त द्रवमिह च तेनैव विधिना ॥ ९५ ॥
पलप्रमाणं कटुकत्रयञ्च पलार्द्धमानं वचहिङ्गुभागः ।
विषं पलद्वादशभागयुक्तं तावद्रसो गन्धक एष चोक्तः ॥ ९६ ॥
बदरास्थिप्रमाणेन वटीमेतस्य कारयेत् ।
भक्षयेत्सेवया साम्यात्सर्वाजीर्णप्रशान्तये ॥ ९७ ॥
सर्वोदरेषु शूलेषु विसूच्यां विविधेषु च ।
अग्निमान्द्येषु गुल्मेषु सदा शङ्खवटी हिता ॥ ९८ ॥

अथ बृहच्छङ्खवटीमाह—

स्नुह्यर्कचिञ्चाऽपामार्गरम्भातिलपलाशजान् ।
लवणानाददीतैषां प्रत्येकं पलमात्रया ॥ ९९ ॥
लवणानि पृथक्पञ्च ग्राह्याणि पलमात्रया ।
स्वर्जिका च यवक्षारष्टङ्कणं त्रितयं पलम् ॥ १०० ॥
सर्वं त्रयोदशपलं सूक्ष्मं चूर्णं विधाय च ।
निम्बूफलरसे प्रस्थसम्मिते तत्परिक्षिपेत् ॥ १०१ ॥
तत्र शङ्खस्य शकलं पलं वह्नौ प्रताप्य तु ।
वारान्निर्वापयेत्सप्त सर्वं द्रवति तद्यथा ॥ १०२ ॥
नागरं त्रिपलं ग्राह्यं मरिचन्तु पलद्वयम् ।
पिप्पली पलमाना स्यात्पलार्द्धं भृष्टहिङ्गुतः ॥ १०३ ॥
ग्रन्थिकं चित्रकञ्चापि यवानी जीरकं तथा ।
जातीफलं लवङ्गञ्च पृथक्कर्षद्वयोन्मितम् ॥ १०४ ॥
रसो गन्धो विषं चापि टङ्कणञ्च मनःशिला ।
एतानि कर्षमात्राणि सर्वं संचूर्ण्य मिश्रयेत् ॥ १०५ ॥
शरावार्द्धेन चुक्रेण वटिकां तस्य कारयेत् ।
माषप्रमाणां सद्वैद्यैर्बृहच्छङ्खवटी स्मृता ॥ १०६ ॥
सर्वाजीर्णप्रशमनी सर्वशूलनिवारिणी ।
विसूच्यलसकादीनां सद्यो भवति नाशनी ॥ १०७ ॥

अथाजीर्णकण्टकरसमाह—

टङ्कणकणाऽमृतानां सहिङ्गुलानां समं भागम् ।
मरिचस्य भागयुगलं निम्बूनीरैर्वटी कार्या ॥ १०८ ॥
वटिकां कलायसदृशीमेकां द्वे वा समश्नीयात् ।
सत्यमजीर्णे शान्त्यै वह्नेर्वृद्ध्यै कफध्वस्त्यै(क) ॥ १०९ ॥

(क) अथाजीर्णारिरसमाह—

शुद्धसूतं गन्धकञ्च पलमात्रं पृथक् पृथक् ।
हरीतकी च द्विपला नागरस्त्रिपलः स्मृतः ॥ १ ॥
कृष्णा च मरिचं तद्वत् सिन्धूत्थं त्रिपलं मतम् ।
चतुःपलानि विजया मर्दयेन्निम्बुकद्रवैः ॥ २ ॥

अथ विसूचिकाचिकित्सामाह—

जलपीतमपामार्गमूलं हन्याद्विसूचिकाम् ।
सतैलं कारवेल्लयम्बु नाशयेद्धि विसूचिकाम् ॥ ११० ॥
वालमूलस्य तु क्वाथः पिप्पलीचूर्णसंयुतः ।
विसूचीनाशनः श्रेष्ठो जठराग्निविवर्द्धनः ॥ १११ ॥
बिल्वनागरनिक्काथो हन्याच्छर्दिविसूचिकाम् ।
बिल्वनागरकैटर्यक्काथस्तदधिको गुणैः ॥ ११२ ॥

*कैटर्यः=कट्फलः ॥११२॥

व्योषं करञ्जस्य फलं हरिद्रे मूलं समावाप्य च मातुलुङ्ग्याः ।
छायाविशुष्का वटिका कृता सा हन्याद्विसूचीं नयनाञ्जनेन ॥ ११३ ॥

*अनुभूतमिदम् ॥ ११३ ॥

अपामार्गस्य पत्राणि मरिचानि समानि च ।
अश्वस्य लालया पिष्ट्वाऽञ्जनाद्धन्ति विसूचिकाम् ॥ ११४ ॥
विसूच्यामतिवृद्धायां तक्रं दधि समं जलम् ।
नारिकेलाम्बु पेयं वा प्राणत्राणाय योजयेत् ॥ ११५ ॥

स्वक्पत्रकैरण्डकशिग्रुकुष्ठैरम्लप्रपिष्टैः सवचाशताह्वैः ।
उद्वर्त्तनं खल्लिविसूचिकाघ्नं तैलं विपक्वञ्च तदर्थकारि ॥११६॥

कुष्ठसैन्धवयोः कल्कं चुक्रं तैले तु साधितम् ।
विसूच्यां मर्दनं तेन खल्लीशूलनिवारणम् ॥११७॥
पिपासायां तथोत्क्लेशे लवङ्गस्याम्बु शस्यते ।
जातीफलस्य वा पीतं शृतं भद्रघनस्य वा ॥ ११८ ॥

अथोत्क्लेशस्य लक्षणमाह—

उत्क्लिश्यान्नञ्च निर्गच्छेत्प्रसेकष्ठीवनेरितम् ।
हृदयं पीडयते चास्य तमुत्क्लेशं विनिर्दिशेत् ॥ ११९ ॥

पुटानि सप्त देयानि घर्ममध्ये पुनः पुनः ।
अजीर्णारिरयं प्रोक्तः सद्यो दीपनपाचनः ॥
भक्षयेद् द्विगुणं भद्यं पाचयेद् रोचयेदपि ॥ ३ ॥
इत्यधिकः पाठः क चिद् दृश्यते ।

अथ दारुषट्कमाह—

सरुग् वाऽऽनद्धमुदरमम्लपिष्टैः प्रलेपयेत्।
दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः ॥ १२० ॥

*हैमवती = श्वेतवचा ॥ १२० ॥

तक्रेण युक्तं यवचूर्णमुष्णं सक्षारमर्त्तिं जठरे निहन्यात्।
स्वेदो घटैर्वाऽप्यथ वाष्पपूर्णैरुष्णैस्तथाऽन्यैरपि पिण्डतापैः ॥१२१॥

अथालसकविलम्बिकयोश्चिकित्सामाह—

विलम्बिकाऽलसकयोरयमेव क्रियाक्रमः।
अत एव तयोरुक्तं पृथङ् नहि चिकित्सितम् ॥ १२२ ॥

अथ भस्मकरोगचिकित्सामाह—

तं भस्मकं गुरुस्निग्धसान्द्रमन्दहिमस्थिरैः।
अन्नपानैर्नयेच्छान्तिं पित्तघ्नैश्च विरेचनैः ॥ १२३ ॥
अत्युद्भूताग्निशान्त्यै माहिषदधिदुग्धसर्पींषि।
संसेवेत यवागूं समपिष्टे पयसि सर्पिषा सिद्धाम् ॥ १२४ ॥
असकृत्पित्तहरणं पायसं प्रतिभोजनम्।
श्यामात्रिवृद्धिपक्वञ्च पयो दद्याद्विरेचनम् ॥ १२५ ॥
यत्किञ्चिन्मधुरं मेध्यं श्लेष्मलं गुरु भोजनम्।
सर्वं तदत्यग्निहितं भुक्त्वा प्रस्वपनं दिवा ॥ १२६ ॥

सिततण्डुलसितकमलं छागक्षीरेण पायसं सिद्धम्।
भुक्त्वा च तेन पुरुषो दशदिवसात्तुच्छभोजनो भवति ॥१२७॥

अथ विशिष्टद्रव्याजीर्णे विशिष्टं पाचनद्रव्यमाह—

अलं पनसपाकाय फलं कदलसम्भवम्।
कदलस्य तु पाकाय बुधैरपि घृतं हितम् ॥ १२८ ॥
घृतस्य परिपाकाय जम्बीरस्य रसो हितः ॥ १२९ ॥

नारिकेलफलतालबीजयोः पाचकं सपदि तण्डुलं विदुः।
क्षीरमेव सहकारपाचनं चारमज्जनि हरीतकी हिता ॥१३० ॥
मधूकमालूरनृपादनानां परूषखर्जूरकपित्थकानाम्।
पाकाय पेयं पिचुमन्दबीजं घृतेऽपि तक्रेऽपि तदेव पथ्यम् ॥ १३१ ॥
खर्जूरशृङ्गाटकयोः प्रशस्तं विश्वौषधं कुत्र च भद्रमुस्तम्।

यष्ट्याह्वबोधिद्रुफलेषु शस्तं प्लक्षे तथा पर्युषितं प्रणीतम् ॥ १३२ ॥
तण्डुलेषु च पयः पयस्वथो दीप्यकस्तु चिपिटे कणायुतम् ।
षष्टिका दधिजलेन जीर्यते कर्कटी च सुमनेषु जीर्यति ॥ १३३ ॥
*सुमनेषु=गोधूमेषु जीर्यति ॥ १३३ ॥
गोधूममाषहरिमन्थसतीनमुद्गपाको भवेज्झटिति मातुलपुत्रकेण ।
खर्जूरिकाबिसकशेरुसितासु शस्तं शृङ्गाटके मधुफलेष्वपि भद्रमुस्तम् १३४॥
*मातुलपुत्रकं=धत्तूरफलम् ॥ १३४ ॥
कङ्गुश्यामाकनीवाराः कुलत्थाश्चाविलम्बितम् ।
दध्ना जलेन जीर्यन्ति वैदलः काञ्जिकेन तु ॥ १३५ ॥
पिष्टान्नं शीतलं वारि कृशरां सैन्धवं पचेत् ।
माषेण्डरीं निम्बुफलं पायसं मुद्गयूषकः ॥ १३६ ॥
वटो वेसवाराल्लवङ्गेन फेनः समं पर्पटः शिग्रुबीजेन याति ।
कणामूलतो लड्डुकापूपसट्टाऽऽदिपाको भवेच्छष्कुलीमण्डयोश्च ॥ १३७ ॥
*वेसवारः=“वगस” इति लोके । तद्यथा—
*स्नेहो निशाहिङ्गुलवङ्गकैलाधान्याकजीरार्द्रकनागराणि ।
अम्लोषणं सैन्धवचूर्णमन्ने यथोचितं संस्कृतये प्रणीतम् ॥२॥ इति ।
*सट्टा=सटकपानविशेषः=“मण्ड”माण्डेति लोके ॥ १३७ ॥
किमत्र चित्रं बहुमत्स्यमांसभोजी सुखी काञ्जिकपानतः स्यात् ।
इत्यद्भुतं केवलवह्निपक्वमांसेन मत्स्यः परिपाकमेति ॥ १३८ ॥
आममाम्रफलं मत्स्यं तद्बीजं पिशिते हितम् ।
कूर्ममांसं यवक्षारः शीघ्रं पाकमुपैति हि ॥ १३९ ॥
कपोतपारावतनीलकण्ठकपिञ्जलानां पिशितानि भुक्त्वा ।
काशस्य मूलं परिपिष्य पीतं सुखी भवेन्ना बहुशो हि दृष्टम् ॥१४०॥
*कपोतो धवलः पाण्डुः ॥ १४० ॥
मांसानि सर्वाण्यपि यान्ति पाकं क्षीरेण सद्यस्तिलनालजेन ।
चञ्चूकसिद्धार्थकवास्तुकानां गायत्रिसारक्वथितेन पाकः ॥ १४१ ॥
*चञ्चुकः=“चेचू” इति लोके । गायत्री=खदिरः ॥ १४१ ॥
पालङ्किकाकेबुककारवेल्लीवार्ताकवंशाङ्कुरमूलकानाम् ।

उपोदिकाऽलाबुपटोलकानां सिद्धार्थको मेघरवश्च पक्का ॥१४२॥(क)

*मेघरवः="चौरा" इति लोके ॥ १४२ ॥

विपच्यते शूरणको गुडेन तथाऽऽलुकं तण्डुलधावनेन

पिण्डालुकं जीर्यति कोरदूषात्कशेरुपाकः किल नागरेण ॥ १४३ ॥

लवणस्तण्डुलतोयात्सर्पिर्जम्बीरकाद्यम्लात् ।

मरिचादपि तच्छीघ्रं पाकं यात्येव काञ्जिकात्तैलम् ॥ १४४ ॥

क्षीरं जीर्यति तक्रेण तद्रव्यं कोष्णमण्डकात् ।

माहिषं माणिमन्थेन शङ्खचूर्णेन तद्दधि ॥ १४५ ॥

*मण्डकः="मांड" इति लोके ॥ १४५ ॥

रसालं जीर्यति व्योषात्खण्डं नागरभक्षणात् ।

सिता नागरमुस्तेन तथेक्षुश्चार्द्रिकारसात् ॥ १४६ ॥

जरामिरा गैरिकचन्दनाभ्यामभ्येति शीघ्रं मुनिभिः प्रदिष्टम् ।

उष्णेन शीतं शिशिरेण चोष्णं जीर्णो भवेत्क्षारगणस्तथाऽम्लैः ॥१४७॥

*इरा=मदिरा ॥ १४७ ॥

तप्तं तप्तं हेम वा तारमग्नौ तोये क्षिप्तं सप्तकृत्वस्तदम्भः ।

पीत्वा जीर्णं तोयजातं निहन्यात्तत्र क्षौद्रं भद्रमुस्तं विशेषात् ॥१४८॥

*तत्र=तोयाजीर्णे ॥ १४८ ॥

इति षष्ठो जठराग्निविकाराधिकारः समाप्तः ॥ ६ ॥

अथ सप्तमः कृमिरोगाधिकारः ॥ ७ ॥

तत्र कृमिभेदानाह—

क्रिमयस्तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः ॥ १ ॥

अथ कृमिनिदानमाह—

बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः ।

नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः ॥ २ ॥

*तत्र तेषु बाह्याः क्रिमयो मलोद्भवाः=त्वग्लग्नबहिर्मलस्वेदसंभवाः॥२॥

(क) पटोलवंशाङ्कुरकारवेल्लीकालान्यलाबूनि बहूनि जग्ध्वा ।
क्षारोदकं मद्यवरोनिंपीय भोक्तुं पुनर्वाञ्छति तावदेव ॥ ग्रन्थान्तरे इत्यधिकः पाठः ।

अथ बाह्यकृमिरूपमाह—

तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ।
बहुपादाश्च सूक्ष्माश्च यूका लिक्ष्याश्च नामतः ॥ ३ ॥

*तिलानामिव प्रमाणानि परिणाहानि संस्थानान्यवयवसन्निवेशा· वर्णा येषां ते, द्विधा-तत्र यूकाः=बहुपादाः कृष्णाः केशाश्रयाः । लिक्ष्याः=सूक्ष्माः श्वेता वस्त्राश्रयाः ॥ ३ ॥

अथ बाह्यकृमिविकारमाह—

द्विधा ते कोठपिडिकाः कण्डूगण्डान्प्रकुर्वते ॥ ४ ॥

अथाभ्यन्तरकृमिविप्रकृष्टनिदानमाह—

अजीर्णभोजी मधुराम्लसेवी द्रवप्रियः पिष्टगुडोपभोक्ता ।
व्यायामवर्जी च दिवाशयी च विरुद्धभोजी लभते क्रिमींश्च ॥ ५ ॥

अथ जातकृमिलक्षणमाह—

ज्वरो विवर्णता शूलं हृद्रोगः सदनं भ्रमः ।
भक्तद्वेषोऽतिसारश्च सञ्जातक्रिमिलक्षणम् ॥ ६ ॥

अथ कफोत्पन्नक्रिमीणां विप्रकृष्टनिदानसंप्राप्तिलक्षणान्याह—

मांसमाषगुडक्षीरदधिशुक्तैः कफोद्भवाः ॥ ७ ॥

*शुक्तं=कालान्तरेणाम्लीभूत इक्षुरसविकारः ॥ ७ ॥

कफादामाशये जाता वृद्धाः सर्पन्ति सर्वतः ।
पृथुब्रध्ननिभाः केचित्केचिद्गण्डूपदोपमाः ॥ ८ ॥
रूढधान्याङ्कुराकारास्तनुदीर्घास्तथाऽणवः ।
श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते ॥ ९ ॥
अन्त्रादा उदरावेष्टा हृदयादा महागुदाः ।
च्युरवो दर्भकुसुमाः सुगन्धास्ते च कुर्वते ॥ १० ॥
हृल्लासमास्यस्रवणमविपाकमरोचकम् ।
मूर्च्छाच्छर्दिज्वरानाहकासक्षवथुपीनसान् ॥ ११ ॥

*ब्रध्नः=चर्मलता । रूढः=अङ्कुरितः । तनवः परिणाहेन तथा दीर्घाः-तनुदीर्घाः । च्युरवश्च्युरवनामानः । तत्कर्त्तव्यविकारा हृल्लासादयः ॥ ८-११ ॥

अथ रक्तोत्पन्नक्रमीणां विप्रकृष्टं निदानमाह—

विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि ॥ १२ ॥

अथ रक्तजानाह—

रक्तवाहिशिरास्थानरक्तजा जन्तवोऽणवः ।
अपादा वृत्तताम्राश्च सौक्ष्म्यात्केचिददर्शनाः ॥ १३ ॥
केशादा लोमविध्वंसा रोमद्वीपा उदुम्बराः ।
षट् ते कुष्ठैककर्माणः सहसौरसमातरः ॥ १४ ॥

*सौरसमातृभ्यां सह वर्त्तन्त इति सहसौरसमातरः ॥ १४ ॥

अथ पुरीषजक्रमीणां विप्रकृष्टनिदानमाह—

माषपिष्टाम्ललवणगुडशाकैः पुरीषजाः ॥ १५ ॥

अथ पुरीषजक्रिमिलक्षणमाह—

पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः ।
वृद्धास्ते स्युर्भवेयुश्च ते यदाऽऽमाशयोन्मुखाः ॥
तदाऽऽस्योद्गारनिःश्वासा विड्गन्धानुविधायिनः ।
पृथुवृत्ततनुस्थूलाः श्यावपीतसितासिताः ॥
ते पञ्च नाम्ना क्रिमयः ककेरुकमकेरुकाः ।
सौसुरादाः सशूलाख्या लेलिहा जनयन्ति च ॥ १६ ॥
विड्भेदशूलविष्टम्भकार्श्यपारुष्यपाण्डुताः ।
रोमहर्षाग्निसदनगुदकण्डूर्विमार्गगाः ॥ १७ ॥

*वृद्धास्तेऽधोविसर्पिणः स्युः, यदा ते आमाशयोन्मुखा भवेयुरित्यन्वयः । ते विमार्गगाः सन्तो विड्भेदादीन् जनयन्तीत्यर्थः ॥१६-१७॥

अथ क्रिमिचिकित्सामाह—

विडङ्गव्योषसंयुक्तमन्नमण्डं पिबेन्नरः ।
दीपनं क्रिमिनाशाय जठराग्निविवृद्धये ॥ १८ ॥
प्रत्यहं कटुकं तिक्तं भोजनं कफनाशनम् ।
क्रिमीणां नाशनं रुच्यमग्निसन्दीपनं परम् ॥ १९ ॥
विडङ्गशृतपानीयं विडङ्गेनावधूलितम् ।
पीतं क्रिमिहरं दृष्टं क्रिमिजांश्च गदाञ्जयेत् ॥ २० ॥
लिह्याद्विडङ्गचूर्णं वा मधुना क्रिमिनाशनम् ।

पलाशबीजस्य रसं पिबेन्माक्षिकसंयुतम् ॥ २१ ॥
पिबेत्तद्बीजकल्कं वा मधुना क्रिमिनाशनम् ॥ २२ ॥
कम्पिल्लचूर्णकर्षार्द्धं गुडेन सह भक्षितम् ।
पातयेत्तु क्रिमीन्सर्वानुदरस्थान्न संशयः ॥ २३ ॥
विडङ्गं कौटज बीजं तथा बीजं पलाशजम् ॥
सञ्चूर्ण्य खादेत्खण्डेन क्रिमीन्नाशयितुं नरः ॥ २४ ॥
निम्बपत्रसमुद्भूतं रसं क्षौद्रयुतं पिबेत् ।
धत्तूरपत्रजं वाऽपि क्रिमिनाशनमुत्तमम् ॥ २५ ॥
रसेन्द्रेण समायुक्तो रसो धत्तूरपत्रजः ।
ताम्बूलपत्रजो वाऽपि लेपो यूकाविनाशनः ॥ २६ ॥
धत्तूरपत्रकल्केन तद्रसेनैव पाचितम् ।
तैलमभ्यङ्गमात्रेण यूका नाशयति क्षणात् ॥
क्रिमीणां विट्कफोत्थानामेतदुक्तं चिकित्सितम् ।
रक्तजानान्तु संहारं कुर्यात्कुष्ठचिकित्सया ॥ २७ ॥

अथ क्रिमिरोगिणोऽपथ्यान्याह—

क्षीराणि मांसानि घृतानि चापि दधीनि शाकानि च पर्णवन्ति ।
अम्लञ्च मिष्टञ्च रसं विशेषात्क्रिमीञ्जिघांसुः परिवर्जयेद्धि ॥ २८ ॥

इति सप्तमः क्रिमिरोगाधिकारः सम्पूर्णः ॥ ७ ॥

अथाष्टमः पाण्डुरोगकामलाहलीमकाधिकारः ॥ ८ ॥

तत्र पाण्डुरोगस्य संख्यापूर्वकं सन्निकृष्टनिदानमाह—

पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैस्त्रयः ।
चतुर्थः सन्निपातेन पञ्चमो भक्षणान्मृदः ॥ १ ॥

*पञ्चमो भक्षणान्मृद इति । ननु मृत्तिकाऽपि दूषितदोषद्वारेणैव पाण्डुरोगं जनयतीति मृद्भक्षणजः पाण्डुरोगो दोषजादभिन्न एव कथं-पञ्चम इति ? उच्यते–अपरकारणकुपिता वातादयोऽन्यानपि रोगा-न्कुर्वन्ति, मृत्तिकाभक्षणात्कुपितास्तु वातादयो विशेषतः पाण्डुरोगमे-व जनयन्त्येवेति विशेषाच्चिकित्साविशेषाच्च पञ्चमश्चरकेणोक्तः ।

तच्चिकित्साऽपरकारणकुपितदोषजनितपाण्डुरोगचिकित्सा भवतीति सुश्रुतेन मृत्तिकाजः पृथङ् न पठितः ॥ १ ॥

अथ पाण्डुरोगस्य विप्रकृष्टनिदानपूर्विकां संप्राप्तिमाह—

व्यवायमम्लं लवणानि मद्यं मृदं दिवास्वप्नमतीव तीक्ष्णम्।
निषेवमाणस्य विदूष्य रक्तं दोषास्त्वचं पाण्डुरतां नयन्ति ॥ २ ॥

*तीक्ष्णं=राजिकाऽऽदि ॥ २ ॥

अथ पाण्डुरोगस्य पूर्वरूपमाह—

त्वक्स्फोटनिष्ठीवनगात्रसादमृद्भक्षणप्रेक्षणकूटशोथाः।
विण्मूत्रपीतत्वमथाविपाको भविष्यतस्तस्य पुरःसराणि ॥ ३ ॥

*प्रेक्षणकूटशोथ इति=अक्षिगोलकशोथः ॥ ३ ॥

अथ वातोत्पन्नपाण्डुरोगस्य लक्षणमाह—

त्वङ्मूत्रनयनादीनां रूक्षकृष्णारुणाभता।
वातपाण्ड्वामये कम्पस्तोदानाहभ्रमादयः ॥ ४ ॥

*कृष्णारुणाभता पाण्डुत्वं नातिक्रामति। अत एव सुश्रुते—
"सर्वेषु चैतेष्वपि पाण्डुभावो यतोऽधिकोऽतः खलु पाण्डुरोगः"। इति। भ्रमादय इति। आदिशब्दाद्भेदशूलादयः ॥ ४ ॥

अथ पित्तोत्पन्नपाण्डुरोगस्य लक्षणमाह—

पीतत्वङ्नखविण्मूत्रो दाहतृष्णाज्वरान्वितः।
भिन्नविट्कोऽतिपीताभः पित्तपाण्ड्वामयी नरः ॥ ५ ॥

*भिन्नविट्कः=सद्रवमलः ॥ ५ ॥

अथ सन्निपातोत्पन्नपाण्डुरोगस्य लक्षणमाह—

कफप्रसेकः श्वयथुस्तन्द्राऽऽलस्यातिगौरवैः।
पाण्डुरोगी कफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः ॥ ६ ॥

*अत्रोपलक्षणे तृतीया ॥ ६ ॥

अथ कफोत्पन्नपाण्डुरोगस्य लक्षणमाह—

सर्वान्नसेविनः सर्वे दुष्टा दोषास्त्रिदोषजम्।
त्रिदोषलिङ्गं कुर्वन्ति पाण्डुरोगं सुदुःसहम् ॥ ७ ॥

अथ मृद्भक्षणजनितपाण्डुरोगस्य सम्प्राप्तिमाह—

मृत्तिकाऽदनशीलस्य कुप्यत्यन्यतमो मलः।

कषाया मारुतं पित्तमूषरा मधुरा कफम् ॥ ८ ॥
कोपयेन्मृद्रसादींश्च रौक्ष्याद्भुक्तञ्च रूक्षयेत् ।
पूरयत्यविपक्वैव स्रोतांसि निरुणद्ध्यपि ॥ ९ ॥
इन्द्रियाणां बलं हत्वा तेजो वीर्य्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥ १० ॥

*स्रोतांसि=शिरामुखानि । तेजो=दीप्तिः । ओजः=सर्वधातुसारः ॥ ९-१० ॥

अथ मृद्भक्षणोत्पन्नपाण्डुरोगस्य लक्षणमाह—

मृद्भक्षणाद्भवेत्पाण्डुस्तन्द्राऽऽलस्यनिपीडितः ।
सकासश्वासशूलार्त्तः सदाऽरुचिसमन्वितः ॥ ११ ॥
शूनाक्षिकूटगण्डभ्रूः शूनपान्नाभिमेहनः ।
कृमिकोष्ठोऽतिसार्येत मलं सासृक्कफान्वितम् ॥ १२ ॥

*क्रिमिकोष्ठः=उदराभ्यन्तरस्थकृमिर्भवेदित्यनेन सम्बध्यते । अतिसार्येत मलमिति कर्मकर्त्तृ तत्कर्मवन्मन्तव्यम् । तस्मिन्कर्मण्यर्थेऽत्र यत् । लिङ्प्रत्ययः ॥ १२ ॥

अथ पाण्डुरोगिणोऽसाध्यलक्षणान्याह—

ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः ॥ १३ ॥
पाण्डुरोगश्चिरोत्पन्नः खरीभूतो न सिध्यति ।
कालप्रकर्षाच्छूनाङ्गो यो वा पीतानि पश्यति ॥ १४ ॥

*खरीभूतः=अतिरूक्षितसर्वधातुः ॥ १४ ॥

बद्धाल्पविट् सहरितं सकफं योऽतिसार्यते ।
दीनः स्वेदातिदिग्धाङ्गश्छर्दिमूर्च्छातृषाऽन्वितः ॥ १५ ॥
पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत् ।
पाण्डुसङ्घातदर्शी च पाण्डुरोगी विनश्यति ॥ १६ ॥

*पाण्डुसङ्घातदर्शी=यः पीतवर्णस्य राशिं पश्यति ॥ १६ ॥

अन्तेषु शूनं परिहीणमध्यं म्लानं तथाऽन्तेषु च मध्यशूनम् ।
गुदे मुखे शेफसि मुष्कयोश्च शूनं प्रताम्यन्तमसंज्ञकल्पम् ॥
विवर्जयेत्पाण्डुकिनं यशोऽर्थी तथाऽतिसारज्वरपीडितञ्च ॥१७॥

*अन्तेषु=हस्तपादादिषु। म्लानं=क्षीणम्। प्रताम्यन्तं=ग्लानि गच्छन्तम्। असंज्ञकल्पं=मृतसदृशम्॥ १७॥

अथ पाण्डुरोगभेदकामलाया निदानपूर्विकां सम्प्राप्तिमाह—

पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते॥ १८॥

*पित्तं कर्तृ, दग्ध्वा=संदुष्य, रोगाय=कामलारूपाय। पाण्डुरोगिण एवातिशयितपित्तलसेवया कामला भवति, नायं नियमः, किन्तु कामला स्वतन्त्राऽपि भवति। यथा राजयक्ष्मा कासादुपेक्षिताद्भवति नायं नियमः, किन्तु राजयक्ष्मा स्वतन्त्रोऽपि भवति तद्वदेषाऽपि॥१८॥

अथ कामलाया लक्षणमाह—

हारिद्रनेत्रः स भृशं हारिद्रत्वङ्नखाननः।
पीतरक्तशकृन्मूत्रो भेकवर्णो हतेन्द्रियः॥ १९॥
दाहाविपाकदौर्बल्यसदनारुचिकर्षितः॥ २०॥

*हारिद्रं=हरिद्रावर्णम्। पीतरक्तशकृन्मूत्रः=पीते रक्ते वा शकृन्मूत्रे यस्य सः। भेकवर्णः= बृहद्भेकवर्णः॥ १९-२०॥

अथ कामलभेदमाह—

कामला बहुपित्तैषा कोष्ठशाखाऽऽश्रया मता।
कालान्तरात्खरीभूता कृच्छ्रा स्यात्कुम्भकामला॥ २१॥

*तस्या भेदमाह—कामलेति। एका कोष्ठाश्रया। अपरा शाखाऽऽश्रया। तत्र कोष्ठाश्रयां कामलामाह— कालान्तरादिति॥ २१॥

अथ कुम्भकामलिनामरिष्टलक्षणमाह—

छर्द्यरोचकहृल्लासज्वरक्लमनिपीडितः।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली॥ २२॥

अथ कामलाद्यरिष्टमाह—

कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः।
सरक्ताक्षिमुखच्छर्दिविण्मूत्रो यश्च ताम्यति॥ २३॥
दाहारुचितृषाऽऽनाहतन्द्रामोहसमन्वितः।
नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान्विपद्यते॥ २४॥

अथ पाण्डुरोगभेदहलीमकमाह—

यदा तु पाण्डोर्वर्णः स्याद्धरितश्यावपीतकः ।
बलोत्साहक्षयस्तन्द्रा मन्दाग्नित्वं मृदुज्वरः ॥ २५ ॥
स्त्रीष्वहर्षोऽङ्गमर्दश्च श्वासतृष्णाऽरुचिभ्रमाः ।
हलीमकं तदा तस्य विद्यादनिलपित्ततः ॥ २६ ॥

*पाण्डोः=पाण्डुरोगिणः ॥ २५–२६ ॥

अथ पाण्डुरोगचिकित्सामाह—

सप्तरात्रं गवां मूत्रैर्भावितञ्वायसो रजः ।
पाण्डुरोगप्रशान्त्यर्थं पयसा प्रपिबेन्नरः ॥ २७ ॥
गोमूत्रसिद्धं मण्डूरचूर्णं सगुडमश्नतः ।
पाण्डुरोगः क्षयं याति पक्तिशूलञ्च दारुणम् ॥ २८ ॥
अयोमलं सुसन्तप्तं भूयो गोमूत्रसाधितम् ।
मधुसर्पिर्युतं लीढ्वा पाण्डुरोगी सुखी भवेत् ॥ २९ ॥

अथ पुनर्नवाऽऽदिमण्डूरमाह—

पुनर्नवा त्रिवृद्व्योषं विडङ्गं दारु चित्रकम् ।
कुष्ठं हरिद्रे त्रिफला दन्ती चव्यं कलिङ्गकम् ॥ ३० ॥
कटुका पिप्पलीमूलं मुस्तं शृङ्गी च कारवी ।
यवानी कट्फलञ्चेति पृथक्पलमितं समम् ॥ ३१ ॥
मण्डूरं द्विगुणं चूर्णाद्गोमूत्रेऽष्टगुणे पचेत् ।
गुडेन वटकान्कृत्वा तक्रेणालोड्य तान्पिबेत् ॥ ३२ ॥
पुनर्नवाऽऽदिमण्डूरवटकोऽश्विविनिर्मितः ।
पाण्डुरोगं निहन्त्याशु कामलाञ्च हलीमकम् ।
श्वासं कासञ्च यक्ष्माणं ज्वरं शोथं तथोदरम् ॥ ३३ ॥
शूलं प्लीहानमाध्मानमर्शांसि ग्रहणीक्रिमीन् ।
वातरक्तञ्च कुष्ठञ्च सेवनान्नाशयेद् ध्रुवम् ॥ ३४ ॥

*अत्र पुनर्नवाऽऽदि २४ । प्रत्येक पल १ । लौहकिट्टचूर्णं पल ४८ । गोमूत्र पल १९२ ॥ पुनर्नवाऽऽदिमण्डूरः ॥ ३०–३४ ॥

अथ नवायसचूर्णमाह—

त्र्यूषणं त्रिफला मुस्तं विडङ्गं चित्रकं तथा ।

एतानि नवभागानि नवभागा हतायसः ॥ ३५ ॥
एतदेकीकृतं चूर्णं नरोऽष्टादशरक्तिकम् ।
प्रलिह्यान्मधुसर्पिर्भ्यां पिबेत्तक्रेण वा सह ॥ ३६ ॥
गोमूत्रेण पिबेद्वाऽपि पाण्डुरोगं विनाशयेत् ।
शोथं हृद्रोगमुदरक्रिमिकुष्ठं भगन्दरम् ॥ ३७ ॥
नाशयेदग्निमान्द्यञ्च दुर्नामकमरोचकम् ।
आर्द्रकस्य रसेनापि लिह्यात्कफसमृद्धिमान् ॥ ३८ ॥

*अत्र नवायसलौहं नवरक्तिकापरिमितं भक्षणीयम् । यत उक्तं रसप्रदीपे—

*गुञ्जामेकां समारभ्य यावत्स्युर्नवरक्तिकाः ।
तावल्लौहं समश्नीयाद्यथादोषानलं नरः ॥ १ ॥

*एवं सति प्रथमदिने त्र्यूषणादिसहितं रक्तिकाद्वयमितं प्रतिदिनं रक्तिकाया द्वयं द्वयं बर्द्धयेत् । यावत् त्र्यूषणादिसहिताष्टादशरक्तिकाः स्युः । ततस्ताः प्रतिदिनं खादेत् ॥ ३५–३८ ॥

अथ कामलाचिकित्सामाह—

त्रिफलाया गुडूच्या वा दार्व्या मरिचकस्य वा ।
क्वाथो माक्षिकसंयुक्तः शीतलः कामलाऽपहः ॥ ३९ ॥
अञ्जने कामलाऽऽर्त्तानां द्रोणपुष्पीरसो हितः ।
गुडूचीपत्रकल्कं वा पिबेत्तक्रेण कामली ॥ ४० ॥
धात्रीलौहरजोव्योषनिशाक्षौद्राज्यशर्कराः ।
लीढा निवारयन्त्याशु कामलामुद्धतामपि ॥ ४१ ॥
कुम्भाख्यकामलायां तु हितः कामलिको विधिः ।
गोमूत्रेण पिबेत्कुम्भकामलावाञ्छिलाजतुम् ॥ ४२ ॥
दग्ध्वाऽक्षकाष्ठैर्मलमायसन्तु गोमूत्रनिर्वापितमष्टवारान् ।
विचूर्ण्य लीढं मधुनाऽचिरेण कुम्भाह्वयं पाण्डुगदं निहन्ति ॥ ४३ ॥
अपहरति कामलाऽऽर्त्तिं नस्येन कुमारिकाजलं सद्यः ॥ ४४ ॥

अथ हलीमकचिकित्सामाह—

मारितं चायसं चूर्णं मुस्ताचूर्णेन संयुतम् ।
खदिरस्य कषायेण पिबेज्जन्तुं हलीमकम् ॥ ४५ ॥

सितातिलबलायष्टित्रिफलारजनीयुगैः ।
लौहं लिह्यात्समध्वाज्यं हलीमकनिवृत्तये ॥ ४६ ॥

अथामृतलताऽऽदिघृतमाह—

अमृतलतारसकल्कं प्रसाधितं तुरगविद्विषः सर्पिः ।
क्षीरं चतुर्गुणमेतद्वितरेच्च हलीमकार्त्तेभ्यः ॥ ४७ ॥
मधुरैरन्नपानैस्तं वातपित्तहरैर्हरेत् ।
कामलापाण्डुरोगोक्तां क्रियां चात्रोपयोजयेत् ॥ ४८ ॥

अथ पाण्डुरोगकामलाहलीमकानां सामान्यचिकित्सामाह—

फलत्रिकामृतावासातिक्ताभूनिम्बनिम्बजः क्वाथः ।
क्षौद्रयुतोऽयं हन्याद्धलीमकपाण्डुकामलारुजम् ॥ ४९ ॥

अथ त्र्यूषणादिमण्डूरवटिकामाह—

त्र्यूषणं त्रिफला मुस्तं विडङ्गं चव्यचित्रकम् ।
दार्वीत्वङ्माक्षिको धातुर्ग्रन्थिको देवदारु च ॥ ५० ॥
एषां द्विपलिकान्भागान्कृत्वा चूर्णं पृथक्पृथक् ।
मण्डूरचूर्णं द्विगुणं शुद्धमञ्जनसन्निभम् ॥ ५१ ॥
मूत्रे चाष्टगुणे पक्त्वा तस्मिंस्तत्प्रक्षिपेन्नरः ।
उदुम्बरसमाकारान्वटकांस्तान्यथाऽग्नि च ॥ ५२ ॥
उपयुञ्जीत तक्रेण जीर्णे सात्म्यञ्च भोजनम् ।
मण्डूरवटिका ह्येताः प्राणदाः पाण्डुरोगिणाम् ॥ ५३ ॥
कुष्ठानि जठरं शोथमूरुस्तम्भं कफामयान् ।
अर्शांसि कामलां मेहं प्लीहानं शमयन्ति च ॥ ५४ ॥

अथाष्टादशाङ्गलौहमाह—

किराततिक्ता सुरदारु दार्वी मुस्ता गुडूची कटुका पटोलम् ।
दुरालभा पर्पटकं सनिम्बं कटुत्रिकं वह्निफलत्रिकञ्च ॥ ५५ ॥
फलं विडङ्गस्य समांशकानि सर्वैः समं चूर्णकमायसञ्च ।
सर्पिर्मधुभ्यां वटिका विधेया तक्रानुपानाद्भिषजा प्रयोज्या ॥ ५६ ॥
निहन्ति पाण्डुञ्च हलीमकं च शोथं प्रमेहं ग्रहणीरुजञ्च ।
श्वासञ्च कासञ्च सरक्तपित्तमर्शांस्यथो वाग्ग्रहमामवातम् ॥
व्रणांश्च गुल्मान्कफविद्रधिंश्च चित्रञ्च कुष्ठञ्च ततः प्रयोगात् ॥ ५७ ॥

यवगोधूमशाल्यन्नै रसैर्जाङ्गलजैर्हितैः।
मुद्गाढकीमसूराद्यैरेषु भोजनमिष्यते ॥ ५८ ॥
*एषु = पाण्डुरोगकामलाहलीमकेषु ॥ ५८ ॥

इत्यष्टमः पाण्डुरोगकामलाहलीमकाधिकारः समाप्तः ॥ ८ ॥

अथ नवमो रक्तपित्ताधिकारः ॥ ९ ॥

तत्र रक्तपित्तस्य निदानपूर्विकां सम्प्राप्तिमाह—

घर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः।
तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च ॥
पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम् ॥ १ ॥

*तीक्ष्णं = मरिचादि। उष्णम् = अग्नितापादि। क्षारो = यवक्षारादिः। विदग्धं = दूषितम्। स्वगुणैः = स्वकारणैर्गुणैस्तीक्ष्णादिभिः। गुणैरिति बहुत्वेन तीक्ष्णाम्ललवणकटूष्णघर्मादयो गृह्यन्ते। विदहति = दूषयति ॥ १ ॥

अथ रक्तपित्तस्य सामान्यलक्षणमाह—

ततः प्रवर्त्तते रक्तमूर्ध्वं चाधो द्विधाऽपि वा ॥ २ ॥

*अत्र रक्तमित्युपलक्षणम्। तेन संसृष्टं पित्तञ्च। अत एव "रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व" इति सुश्रुतः। "रक्तञ्च तत्पित्तं चेति रक्तपित्तं रागप्राप्तं पित्तं रक्तपित्तमित्युच्यते, रक्तपित्तं कर्मधारयश्चे"ति चरकः। उभयत्रापि न दोषः। कारणत्रयाद्रक्तस्यापि समाख्यानम् ॥

*कारणत्रयमाह—

*संयोगाद् दूषणात्तत्तु सामान्याद्गन्धवर्णयोः ॥
रक्तस्य पित्तमाख्यातं रक्तपित्तं मनीषिभिः ॥ १ ॥ इति॥२॥

अथ रक्तपित्तप्रवृत्तिमार्गानाह—

ऊर्ध्वं नासाऽक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः।
कुपितं रोमकूपैश्च समस्तैस्तत्प्रवर्त्तते ॥ ३ ॥

*मार्गानाह—ऊर्ध्वमिति। कुपितं = पित्तम् ॥ ३ ॥

अथ रक्तपित्तस्य पूर्वरूपमाह—

सदनं शीतकामित्वं कण्ठधूमायनं वमिः ।
लौहगन्धश्च निश्वासो भवत्यस्मिन्भविष्यति ॥ ४ ॥

अथ कफजवातजरक्तपित्तयोर्विशिष्टरूपमाह—

सान्द्रं सपाण्डु सस्नेहं पिच्छिलं च कफान्वितम् ।
श्यावारुणं सफेनं च तनु रूक्षञ्च वातिकम् ॥ ५ ॥

अथ पित्तजरक्तपित्तस्य विशिष्टरूपमाह—

रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभम् ।
मेचकाङ्गारधूमाभमञ्जनाभञ्च पैत्तिकम् ॥ ६ ॥

*मेचकम्=चिक्कणं कृष्णवर्णम् । अञ्जनं=स्रोतोऽञ्जनं तदाभम् ॥ ६ ॥

अथ संसर्गविशेषेण मार्गभेदमाह—

संसृष्टलिङ्गसंसर्गात्त्रिलिङ्गं सान्निपातिकम् ।
ऊर्ध्वगं कफसंसृष्टमधोगं मारुतानुगम् ॥
द्विमार्गं कफवाताभ्यामुभाभ्यां तत्प्रवर्त्तते ॥ ७ ॥

अथ रक्तपित्तोपद्रवानाह—

दौर्बल्यश्वासकासज्वरवमथुमदाः पाण्डुतादाहमूर्च्छा-
भुक्ते घोरो विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीडा ॥
तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूयनिष्ठीवनञ्च
द्वेषो भक्तेऽविपाको विकृतिरपि भवेद्रक्तपित्तोपसर्गाः ॥ ८ ॥

*विकृतिः=मांसप्रक्षालनाभताऽऽदि ॥ ८ ॥

अथ रक्तपित्तस्य साध्यत्वादिकमाह—

एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते ।
यत्त्रिदोषमसाध्यं स्यान्मन्दाग्नेरतिवेगवत् ॥ ९ ॥
ऊर्ध्वं साध्यमधो याप्यमसाध्यं युगपद्गतम् ।
व्याधिभिः क्षीणदेहस्य वृद्धस्यानश्नतस्तु यत् ॥ १० ॥

अथ साध्यरक्तपित्तमाह—

एकमार्गं बलवतो नातिवेगं नवोत्थितम् ।
रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम् ॥ ११ ॥

*सुखे काले=हिमशिशिरयोः ॥ ११ ॥

अथासाध्यरक्तपित्तमाह—

मांसप्रक्षालनाभं क्वथितमिव च यत्कर्दमाम्भोनिभं वा
मेदःपूयास्रकल्पं यकृदिव यदि वा पक्वजम्बूफलाभम् ।
यत्कृष्णं यच्च नीलं भृशमपि कुणपं यत्र चोक्ता विकारा-
स्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥१२॥

*उक्ता विकाराः=दौर्बल्यादयः । सुरपतिधनुषा तुल्यं=नानावर्णम् ॥ १२ ॥

येन चोपहतो रक्तं रक्तपित्तेन मानवः ।
पश्येद् दृश्यं वियच्चापि तदसाध्यमसंशयम् ॥ १३ ॥

*येन रक्तपित्तेनोपहतो मनुष्यो दृश्यं=घटपटादिकं रक्तं पश्यति स नश्यति । वियच्चापि=अदृश्यमपीत्यर्थः ॥ १३ ॥

अथ रक्तपित्तारिष्टमाह—

लोहितं छर्दयेद्यस्तु बहुशो लोहितेक्षणः ।
लोहितोद्गारदर्शी च म्रियते रक्तपैत्तिकः ॥ १४ ॥

*लोहितोद्गारदर्शी=व्याधिमहिम्नोद्गारमपि लोहितं पश्यतीत्यर्थः ॥ १४ ॥

अथ रक्तपित्तस्य चिकित्सामाह—

पित्तास्रं स्तम्भयेन्नादौ प्रवृत्तं बलिनो यतः ।
हृत्पाण्डुग्रहणीरोगप्लीहगुल्मज्वरादिकृत् ॥ १५ ॥
शालिषाष्टिकनीवारकोरदूषप्रसाधिकाः ।
श्यामाकाश्च प्रियङ्गुश्च भोजनं रक्तपित्तिनाम् ॥ १६ ॥
मसूरमुद्गचणकाः समकुष्ठाढकीफलाः ।
प्रशस्ताः सूपयूषार्थे कल्पिता रक्तपित्तिनाम् ॥ १७ ॥
दाडिमामलकं विद्वानम्लार्थे चापि दापयेत् ।
पटोलनिम्बन्यग्रोधप्लक्षवेतसपल्लवाः ॥ १८ ॥
शाकार्थे शाकसात्म्यानां तण्डुलीयादयो हिताः ।
पारावतान्कपोतांश्च लावान् रक्ताक्षवर्त्तकान् ॥ १९ ॥
शशान्कपिञ्जलानेणान्हरिणान्कालपुच्छकान् ।

रक्तपित्तहरान्विद्याद्रसांस्तेषां प्रयोजयेत् ॥ २० ॥
ईषदम्लाननम्लांश्च घृतभृष्टान्ससैन्धवान् ॥ २१ ॥
कफानुगे यूषशाकान्दद्याद्वातानुगे रसम् ।
पथ्यं सतीनयूषेण ससितैर्लाजसक्तुभिः ॥ २२ ॥

अथ धान्यकादिहिमादिकमाह—

धान्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः ।
रक्तपित्तं ज्वरं दाहं तृष्णां शोषञ्च नाशयेत् ॥ २३ ॥
ह्रीबेरमुत्पलं धान्यं चन्दनं यष्टिकाऽमृता ।
उशीरञ्च त्रिवृच्चैषां क्वाथं समधुशर्करम् ॥ २४ ॥
पाययेत्तेन सद्यो हि रक्तपित्तं प्रणश्यति ।
रक्तपित्तं जयत्युग्रं तृष्णां दाहं ज्वरं तथा ॥ २५ ॥
पद्मोत्पलानां किञ्जल्कः पृश्निपर्णी प्रियङ्गुका ।
जले साध्या रसे तस्मिन्पेया स्याद्रक्तपित्तिनाम् ॥ २६ ॥
वासापत्रसमुद्भूतो रसः समधुशर्करः ।
क्वाथो वा हरते पीतो रक्तपित्तं सुदारुणम् ॥ २७ ॥
पिष्टानां वृषपत्राणां पुटपाकरसो हिमः ।
समधुर्हरते रक्तपित्तं कासज्वरक्षयान् ॥ २८ ॥
उत्पलं कुमुदं पद्मं कह्लारं लोहितोत्पलम् ।
मधुकञ्चेति पित्तासृक्तृष्णाच्छर्दिहरो गणः ॥ २९ ॥
वासायां विद्यमानायामाशायां जीवितस्य च ।
रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥ ३० ॥
आटरूषकमृद्वीकापथ्याक्वाथः सशर्करः ।
क्षौद्राढ्यः सकलश्वासरक्तपित्तनिबर्हणः ॥ ३१ ॥

अथ दूर्वाऽऽद्यघृतमाह—

दूर्वा सोत्पलकिञ्जल्कमञ्जिष्ठा सैलवालुका ।
शीता शीतमुशीरञ्च मुस्तं चन्दनपद्मकम् ॥ ३२ ॥
विपचेत्कार्षिकैरेतैराजं प्रस्थमितं घृतम् ।
तण्डुलानां जलं छागीक्षीरं दद्याच्चतुर्गुणम् ॥ ३३ ॥

तत्पानं वमतो रक्तं नावनं नासिकागते ।
कर्णाभ्यां यस्य गच्छेत्तु तस्य कर्णौ प्रपूरयेत् ॥ ३४ ॥
चक्षुः स्रवति रक्तञ्चेत्पूरयेत्तेन चक्षुषी ।
मेढ्रपायुप्रवृत्ते तु वस्तिकर्मसु योजयेत् ॥ ३५ ॥
रोमकूपप्रवृत्ते तु तदभ्यङ्गं प्रयोजयेत् ।
सर्वेषु रक्तपित्तेषु तस्माच्छ्रेष्ठमिदं घृतम् ॥ ३६ ॥
इति दूर्वाऽऽद्यं घृतम् ।

मृद्वीकां चन्दनं लोध्रं प्रियङ्गुञ्च विचूर्णयेत् ।
चूर्णमेतत्पिबेत्क्षौद्रवासारससमन्वितम् ॥ ३७ ॥
नासिकामुखपायुभ्यो योनिमेढ्रादिवेगितम् ।
रक्तपित्तं स्रवद्धन्ति सिद्ध एष प्रयोगराट् ॥ ३८ ॥
यच्च शस्त्रक्षतेनैव रक्तं तिष्ठति वेगतः ।
तदप्येतेन चूर्णेन तिष्ठत्येवावचूर्णितम् ॥ ३९ ॥
इक्षूणां मध्यकाण्डानि सकन्दं नीलमुत्पलम् ।
केशरं पुण्डरीकस्य मोचामधुकपद्मकैः ॥ ४० ॥
वटप्ररोहशुङ्गाश्च द्राक्षा खर्जूरमेव च ।
एतानि समभागानि कषायं सम्प्रकल्पयेत् ॥ ४१ ॥
उषितं मधुसंयुक्तं पाययेच्छर्कराऽन्वितम् ।
सप्रमेहं रक्तपित्तं क्षिप्रमेतन्नियच्छति ॥ ४२ ॥
द्राक्षया फलिनीभिर्वा प्रियालमधुकेन वा ।
श्वदंष्ट्रया शतावर्या रक्तजित्साधितं पयः ॥ ४३ ॥
पक्वोदुम्बरकाश्मर्यः पथ्याखर्जूरगोस्तनाः ।
मधुना घ्नन्ति संलीढा रक्तपित्तं पृथक्पृथक् ॥ ४४ ॥
*अत्र काश्मर्याः फलमेव ग्राह्यं फलसाहचर्यात् ॥ ४४ ॥
अतिनिःसृतरक्तो वा क्षौद्रयुक्तं पिबेदसृक् ।
यकृद्वा भक्षयेदाजं मांसं वा पित्तसंयुतम् ॥ ४५ ॥
नासाप्रवृत्तरुधिरं घृतभृष्टं श्लक्ष्णपिष्टमामलकम् ।
सेतुरिव तोयवेगं रुणद्धि मूर्ध्नि प्रलेपेन ॥ ४६ ॥

घ्राणप्रवृत्ते जलमाशु पेयं सशर्करं नासिकया च यो वा ।
द्राक्षारसं क्षीरघृतं पिबेद्वा सशर्करञ्चेक्षुरसं हिमं वा ॥४७॥
नस्ये दाडिमपुष्पस्य रसो दूर्वाभवोऽपि वा ।
आम्रास्थिजः पलाण्डोर्वा नासिकास्रावरक्तजित् ॥ ४८ ॥

अथ खण्डकूष्माण्डावलेहमाह—

पुराणं पीनमानीय कूष्माण्डस्य फलं बृहत् ।
तद्बीजाधारबीजत्वक्छिराशून्यं समाचरेत् ॥ ४९ ॥
ततस्तस्य तुलां नीत्वा पचेज्जलतुलाद्वये ।
तस्मिन्नीरेऽर्द्धशिष्टे तु यत्नतः शीतलीकृते ॥ ५० ॥
तानि कूष्माण्डखण्डानि पीडयेद् दृढवाससा ।
यत्नतस्तज्जलं नीत्वा पुनः पाकाय धारयेत् ॥ ५१ ॥
कूष्माण्डं शोषयेद्धर्मे ताम्रपात्रे ततः क्षिपेत् ।
क्षिप्त्वा तत्र घृतं प्रस्थं कूष्माण्डं तेन भर्जयेत् ॥ ५२ ॥
मधुवर्णं तदालोक्य तज्जलं तत्र निक्षिपेत् ।
सितायाश्च तुलां तत्र क्षिप्त्वा तल्लेहवत्पचेत् ॥ ५३ ॥
सुपक्वे पिप्पलीशुण्ठीजीरणां द्विपले पृथक् ।
पृथक्पलार्द्धं धान्याकं पत्रैलामरिचत्वचम् ॥ ५४ ॥
चूर्णमेषां क्षिपेत्तत्र घृतार्द्धं क्षौद्रमावपेत् ।
एतत्पलमितं खादेदथ वाऽग्निबलं यथा ॥ ५५ ॥
खण्डकूष्माण्डलेहोऽयं रक्तपित्तञ्च नाशयेत् ।
पित्तज्वरं तृषां दाहं प्रदरं कृशतां वमिम् ॥ ५६ ।
कासं श्वासञ्च हृद्रोगं स्वरभेदं क्षतं क्षयम् ।
नाशयत्येव वृद्धिश्च बृंहणो बलवर्द्धनः ॥ ५७ ॥

अथ बृहत्कूष्माण्डावलेहमाह—

पुराणं पीनमानीय कूष्माण्डस्य फलं दृढम् ।
तद्बीजाधारबीजत्वक्छिराशून्यं समाचरेत् ॥ ५८ ॥
ततोऽतिसूक्ष्मखण्डानि कृत्वा तस्य तुलां पचेत् ।
गोदुग्धस्य तुलामध्ये मन्देऽग्नौ वा पचेच्छनैः ॥ ५९ ॥

शर्करायास्तुलां सार्द्धां गोघृतं प्रस्थमात्रकम्।
प्रस्थार्द्धं माक्षिकञ्चापि कुडवं नारिकेलतः॥ ६०॥
प्रियालफलमज्जानं द्विपलं तिखुरीपलम्।
क्षिपेदेकं च विपचेल्लेहवत्साधु साधयेत्॥ ६१॥
भिषक्सुपक्वमालोक्य ज्वलनादवतारयेद्।
कोष्णे तत्र क्षिपेदेषां चूर्णं तानि वदाम्यहम्॥ ६२॥
एकोऽक्तः शतपुष्पाया अथ क्षीरी यवानिका।
गोक्षुरः क्षुरकः पथ्या कपिकच्छुफलानि च॥ ६३॥
सप्तमी त्वक्च सर्वेषामक्षयुग्मं पृथक्पृथक्।
धान्याकं पिप्पली मुस्तमश्वगन्धा शतावरी॥ ६४॥
तालमूली नागबला बालकं पत्रकं शटी।
जातीफलं लवङ्गञ्च सूक्ष्मैला बृहदेलिका॥ ६५॥
शृङ्गाटकं पर्पटकं सर्वं पलमितं पृथक्।
चन्दनं नागरं धात्रीफलञ्चापि कशेरुकम्॥ ६६॥
प्रत्येकं पञ्च कर्षाणि चत्वार्येतानि निक्षिपेत्।
पलद्वयमुशीरस्य मसनस्योषणस्य च॥ ६७॥
कूष्माण्डस्यावलेहोऽयं भक्षितः पलमात्रया।
किं वा यथावह्निबलं भुक्त्वा रोगान्विनाशयेत्॥ ६८॥
रक्तपित्तं शीतपित्तमम्लपित्तमरोचकम्।
वह्निमान्द्यं सदाहञ्च तृष्णां प्रदरमेव च॥ ६९॥
रक्तार्शोऽपि तथा छर्दिं पाण्डुरोगञ्च कामलाम्।
उपदंशं विसर्पञ्च जीर्णञ्च विषमं ज्वरम्॥ ७०॥
लेहोऽयं परमो वृष्यो बृंहणो बलबर्द्धनः।
स्थापनीयः प्रयत्नेन भाजने मृन्मये नवे॥ ७१॥

अथ खण्डकूष्माण्डकमाह—

कूष्माण्डकस्य स्वरसं पलानां शतमात्रया।
रसतुल्यं गवां क्षीरं धात्रीचूर्णं पलाष्टकम्॥ ७२॥
मृद्वग्निना पचेत्तावद्यावद्द्रवति पिण्डवत्।

धात्रीतुल्या सिता योज्या पलार्द्धं लेहयेदनु ॥ ७३ ॥
खण्डकूष्माण्डकं ह्येतद् भुक्तमभ्यासतो हरेत् ।
रक्तपित्तमम्लपित्तं दाहं तृष्णाञ्च कामलाम् ॥ ७४ ॥

अथ खण्डकाद्यलौहमाह—

शतावरी छिन्नरुहा वृषो मुण्डतिका बला ।
तालमूली च गायत्री त्रिफलायास्त्वचस्तथा ॥ ७५ ॥
भार्गी पुष्करमूलञ्च पृथक्पञ्च पलानि च ।
जलद्रोणे विपक्तव्यमष्टभागावशेषितम् ॥ ७६ ॥
दिव्यौषधिहतस्यापि माक्षिकेण हतस्य वा ।
पलद्वादशकं देयं रुक्मलौहस्य चूर्णितम् ॥ ७७ ॥
खण्डतुल्यं घृतं देयं पलषोडशकं बुधैः ।
पचेत्ताम्रमये पात्रे गुडपाको मतो यथा ॥ ७८ ॥
प्रस्थार्धं मधुनो देयं शुभाश्मजतुकस्य च ।
शृङ्गी कृष्णा विडङ्गञ्च शुण्ठ्यजाजी पलं पलम् ॥ ७९ ॥
त्रिफला धान्यकं पत्रं कणा मरिचकेशरम् ।
चूर्णं दत्त्वा सुमथितं स्निग्धे भाण्डे निधापयेत् ॥ ८० ॥
यथाकालं प्रयुञ्जीत बिडालपदमात्रकम् ।
गव्यक्षीरानुपानञ्च सेव्यो मांसरसः पयः ॥ ८१ ॥
गुरुवृष्यान्नपानानि स्निग्धमांसादि बृंहणम् ।
रक्तपित्तं क्षयं कासं पार्श्वशूलं विशेषतः ॥ ८२ ॥
वातरक्तं प्रमेहञ्च शीतपित्तं वमिं क्लमम् ।
श्वयथुं पाण्डुरोगञ्च कुष्ठं प्लीहोदरं तथा ॥ ८३ ॥
आनाहं मूत्रसंस्रावमम्लपित्तं निहन्ति च ।
चक्षुष्यं बृंहणं वृष्यं मङ्गल्यं प्रीतिवर्द्धनम् ॥ ८४ ॥
आरोग्यं पुत्रदं श्रेष्ठं कामाग्निबलवर्द्धनम् ।
श्रीकरं लाघवञ्चैव खण्डकाद्यं प्रकीर्त्तितम् ॥ ८५ ॥
छागं पारावतं मांसं तित्तिरिः क्रकरः शशः ।
कुरङ्गः कृष्णसारश्च मांसमेषां प्रयोजयेत ॥ ८६ ॥

नारिकेलपयःपानं सुनिषण्णकवास्तुकम् ।
शुष्कमूलकजीवाख्यं पटोलं बृहतीफलम् ॥ ८७ ॥
वार्ताकं पक्वमाम्रञ्च खर्जूरं स्वादु दाडिमम् ।
ककारपूर्वकं यच्च मांसञ्चानूपसम्भवम् ॥
वर्जनीयं विशेषेण खण्डकाद्यं समश्नता ॥ ८८ ॥
लोहान्तरवदत्रापि पुटनादिक्रियेष्यते ।
न पुनर्माक्षिकेणैव शिलयैव हि मारणम् ॥ ८९ ॥

*भार्गी = बभनेटी । दिव्यौषधिः = मनःशिला । रुक्मलौहं = "गज-बेली" इति लोके । सुनिषण्णं = चतुष्पत्री शाकविशेषः । जीवन्ती = "जीव" इति शाकविशेषः। ककारपूर्वकं = कटुकः-कालशाकं-कूष्माण्डं-कर्कटी-कर्कोटक-कलिङ्ग-कर्कन्धु-करमर्दक-करीर-कतक-कशेरु-का-ञ्जिकमित्यादि वर्जनीयम् । इति खण्डकाद्यं लौहम् ॥ ७५-८९ ॥

अथ शतावरीपाकमाह—

शतावरीमूलकल्कं कल्कात्क्षीरं चतुर्गुणम् ।
क्षीरतुल्यं घृतं गव्यं सितया कल्कतुल्यया ॥ ९० ॥
घृतशेषं पचेत्तत्तु पलार्द्धं लेहयेत्सदा ।
रक्तपित्तं ह्यम्लपित्तं क्षयं श्वासञ्च नाशयेत् ॥ ९१ ॥

इति नवमो रक्तपित्ताधिकारः समाप्तः ॥ ९ ॥

अथ दशमोऽम्लपित्तश्लेष्मपित्ताधिकारः ॥ १० ॥

तत्राम्लपित्तस्य विप्रकृष्टं निदानमाह—

विरुद्धदुष्टाम्लविदाहिपित्तप्रकोपिपानान्नभुजो विदग्धम् ।
पित्तं स्वहेतूपचितं पुरा यत्तदम्लपित्तं प्रवदन्ति सन्तः ॥ १ ॥

*दुष्टं = व्यापन्नमन्नम् । "पित्तप्रकोपि" इत्युक्तेऽपि "अम्लविदाहि" इति विशेषार्थम् । पित्तप्रकोपि पानं = तक्रसुराऽऽदि । अन्नं = माषा-दि, स्वेहतूपचितं तु पुरा यद् = वर्षास्वम्लविपाकैर्जलैरोषधिभिश्च तादृशीभिरुपचितं = सञ्चितम् , अम्लपित्तम् । तदम्लपित्तं वदन्ति = अम्लपित्ताख्यं रोगं वदन्ति ॥ १ ॥

अथाम्लपित्तरोगस्य लक्षणमाह—

अविपाकः क्लमोत्क्लेशस्तिक्ताम्लोद्गारगौरवैः ।
हृत्कण्ठदाहारुचिभिरम्लपित्तं वदेद्भिषक् ।
अम्लपित्तं द्विधा प्रोक्तमधोगं च तथोर्ध्वगम् ॥ २ ॥

अथोर्ध्वगाम्लपित्तस्य लक्षणमाह—

वान्तं हरित्पीतकनीलकृष्णमारक्तरक्ताभमतीव चाच्छम् ।
मत्स्योदकाभं त्वतिपिच्छिलाभं श्लेष्मानुजातं सहितं रसेन ॥ ३ ॥

*आरक्तम्=ईषल्लोहितम् रक्ताभं वा । अतीव चाच्छं=निर्मलम् । रसेन=लवणकटुतिक्तरूपेण ॥ ३ ॥

अथाधोगाम्लपित्तस्य लक्षणमाह—

तृड्दाहमूर्च्छाभ्रममोहकारि प्रयात्यधो वा विविधप्रकारम् ।
हृल्लासकोठानलसादहर्षस्वेदाङ्गपीतत्वकरं कदा चित् ॥ ४ ॥

*मूर्च्छा=सर्वदा ज्ञानशून्यता । मोहो=विपरीतं ज्ञानम् । अधो वेति वा शब्द ऊर्ध्वगापेक्षया । विविधप्रकारं हरिद्रावर्णादियोगात् । कदा चिद्धृल्लासादिकरं च भवति ॥ ४ ॥

अथाम्लपित्तस्यावस्थाविशेषमाह—

भुक्ते विदग्धेऽप्यथ वाऽप्यभुक्ते करोति तिक्ताम्लवमिं कदा चित् ।
उद्गारमेवं विधमेव कण्ठहृत्कुक्षिदाहं शिरसो रुजश्च ॥ ५ ॥
करचरणदाहमौष्ण्यं महतीमरुचिं ज्वरं च कफपित्तम् ।
जनयति कण्डूमण्डलपिडकाशतनिचितरोगचयम् ॥ ६ ॥

*भुक्ते विदग्धे तिक्ताम्लवमिं करोति । तथा-उद्गारम्, एवंविधमेव=तिक्ताम्लमेव करोति । अथ वा कदा चिदभुक्तेऽपि तिक्ताम्लां वान्तिं करोति । तथा करचरणदाहादिकं जनयति । तथा कण्डूमण्डलपिडकाव्याप्तगात्रे रोगचयं करोति । अन्नाविपाकक्लमादिकं जनयति ॥ ५-६ ॥

अथाम्लपित्ते दोषसंसर्गमाह—

सानिलं सानिलकफं सकफं तच्च लक्षयेत् ।
दोषलिङ्गेन मतिमान् भिषङ्मोहकरं हि तत् ॥ ७ ॥

*ऊर्ध्वाधः प्रवृत्त्या छर्द्यतीसाराभ्यां तुल्यतया वैद्यभ्रान्तिकृत् ॥७॥

अथ दोषभेदेन लक्षणभेदमाह—

कम्पप्रलापमूर्च्छाचिमिचिमिगात्रावसादशूलानि ।
तमसो दर्शनविभ्रमप्रमोहहर्षास्तथाऽनिलयुतेन ॥ ८ ॥
कफनिष्ठीवनगौरवजडताऽरुचिशीतसादवमिलेपाः ।
दहनबलह्यानिकण्डूनिद्राश्चिह्नं कफानुगे भवति ।
उभयमिदमेव चिह्नं मारुतकफसंभवेऽम्लपित्ते स्यात् ॥ ९ ॥

*चिमिचिमि="झिनिझिनी"ति लोके । हर्षो=रोमाञ्चः॥८-९॥

अथाम्लपित्तस्य साध्यत्वादिकमाह—

रोगोऽयमम्लपित्ताख्यो यत्नात्संसाध्यते नवः ।
चिरोत्थितो भवेद्याप्यः कृच्छ्रसाध्यः स कस्य चित् ॥ १० ॥

*कस्य चिद्=हिताहाराचारशीलस्य ॥ १० ॥

अथ कफपित्तस्य लक्षणमाह—

तिक्ताम्लकटुकोद्गारहृत्कुक्षिकण्ठदाहकृत् ।
तमो मूर्च्छाऽरुचिश्छर्दिरालस्यं च शिरोरुजा ।
प्रसेको मुखमाधुर्यं श्लेष्मपित्तस्य लक्षणम् ॥ ११ ॥

अथाम्लपित्तस्य चिकित्सामाह—

अम्लपित्ते तु वमनं पटोलारिष्टवासकैः ।
कारयेन्मदनैः क्षौद्रैः सैन्धवैश्च तथा भिषक् ॥ १२ ॥
विरेचनं त्रिवृच्चूर्णं मधुधात्रीफलद्रवैः ।
ऊर्ध्वगं वमनैर्विद्वानधोगं रेचनैर्हरेत् ॥ १३ ॥

*अम्लपित्तमिति शेषः ॥ १२-१३ ॥

यवगोधूमविकृतीस्तीक्ष्णसंस्कारवर्जिताः ।
यथास्वं लाजसक्तून्वा सितामधुयुतान्पिबेत् ॥ १४ ॥
निस्तुषयववृषधात्रीक्वथितं सलिलं त्रिगन्धमधुयुक्तम् ।
द्रुततरमपहरति वमिं सञ्जनितामम्लपित्तेन ॥ १५ ॥
छिन्नोद्भवानिम्बपटोलपत्रं क्षौद्रान्वितं पीतमनेकरूपम् ।
सुदारुणं हन्ति तदम्लपित्तं यथाऽशनिस्तालतरुं प्रवृद्धम्॥१६॥

वासाऽमृतापर्पटकनिम्बभूनिम्बमार्कवैः ।
त्रिफलाकुलकैः क्वाथः सक्षौद्रश्चाम्लपित्तहा ॥ १७ ॥
पाठापटोलयवचन्दनधान्यधात्री-
वासावराङ्गदलनागकणाऽभयाभिः ।
लेहः सिताज्यमधुभिः शिलपालपिण्डी
हन्त्यम्लपित्तमरुचिज्वरदाहशोषान् ॥ १८ ॥
हन्त्यम्लपित्तवमनारुचिदाहमोहखालित्यमेहशिशिरव्रणशुक्रदोषान् ।
भुक्त्वा नरः सततमामलकीरसेन वृद्धोऽप्यनेन हि भवेत्तरुणो रिरंसुः१९

अथ खण्डकूष्माण्डकावलेहमाह—

कूष्माण्डकरसो ग्राह्यः पलानां शतमात्रकम् ।
रसतुल्यं गवां क्षीरं धात्रीचूर्णं पलाष्टकम् ॥ २० ॥
धात्रीतुल्या सिता योज्या गव्यमाज्यं पलद्वयम् ।
मन्दाग्निना पचेत्सर्वं यावद्भवति पिण्डितम् ॥ २१ ॥
पलार्द्धं पलमेकं वा प्रत्यहं भक्षयेदिदम् ।
खण्डकूष्माण्डकं ख्यातमम्लपित्तापहं परम् ॥ २२

अथ नारिकेलखण्डमाह—

कुडवं नारिकेलस्य जले मृद्वग्निना पचेत् ।
नारिकेलजलालाभे गव्ये पयसि तत्पचेत् ॥ २३ ॥
धान्यकं पिप्पली मुस्तं चातुर्जातं विचूर्णितम् ।
प्रत्येकं टङ्कमात्रं तु शीते तस्मिन्विनिक्षिपेत् ॥ २४ ॥
पलमात्रस्तदर्द्धोऽपि भक्षितः प्रत्यहं नरैः ।
नारिकेलकखण्डोऽयं पुंस्त्वनिद्राबलप्रदः ॥ २५ ॥
अम्लपित्तं रक्तपित्तं शूलञ्च परिणामजम् ।
क्षयं क्षपयति क्षिप्रं शुष्कं दार्वनलो यथा ॥ २६ ॥

*पलमात्रगव्यघृतेन नारिकेलस्य भर्जनं कर्त्तव्यमिति सम्प्रदायः ॥ २३-२६ ॥

अथ बृहन्नारिकेलखण्डमाह—

प्रस्थन्तु नारिकेलस्य सूक्ष्मं दृषदि पेषितम् ।
निष्कुलीकृतकूष्माण्डखण्डानामर्द्धमाढकम् ॥ २७ ॥

तद्द्वयं भर्जयेद्गव्ये घृते तु कुडवोन्मिते ।
ततस्तत्र क्षिपेच्छुद्धं गोदुग्धञ्चाढकोन्मितम् ॥ २८ ॥
तत्रैव निक्षिपेद्गव्यां सितां प्रस्थद्वयोन्मिताम् ।
पचेत्सर्वाणि चैकत्र मृदुना वह्निना भिषक् ॥ २९ ॥
सुपक्वे शीतले तत्र चूर्णीकृत्य विनिक्षिपेत् ।
सूक्ष्मैलां धान्यकं धात्रीं पर्पटं जलदं जलम् ॥ ३० ॥
उशीरं चन्दनं द्राक्षां शृङ्गाटञ्च कशेरुकम् ।
त्वक्पत्रकं सकर्पूरं कर्षयुग्मं पृथक्पृथक् ॥ ३१ ॥
सर्वं संमिश्रयेद्दत्तेद्भाजने मृन्मये नवे ।
पलमात्रमिदं प्रातर्भक्षयेद्वा यथाऽनलम् ॥ ३२ ॥
एतन्निषेवितं हन्ति रोगानेतान्न संशयः ।
अम्लपित्तं ज्वरं पित्तं रक्तपित्तमरोचकम् ॥ ३३ ॥
वातरक्तं तृषां दाहं पाण्डुरोगञ्च कामलाम् ।
क्षयं क्षपयति क्षिप्रं शूलञ्च परिणामजम् ॥ ३४ ॥
नारिकेलस्य खण्डोऽयमश्विभ्यां भाषितः पुरा ।
वर्णदो बृंहणो वृष्यः पुंस्त्वनिद्राबलप्रदः ॥ ३५ ॥

अथ श्लेष्मपित्तस्य चिकित्सामाह—

अभया पिप्पली द्राक्षा सिताधान्ययवासकम् ।
मधुना कण्ठदाहघ्नं पित्तश्लेष्महरं परम् ॥ ३६ ॥
पटोलयवधान्याकपिप्पल्यामलकानि च ।
एषां क्षौद्रयुतः क्वाथः पित्तश्लेष्महरः परः ॥ ३७ ॥
पित्तश्लेष्मवमीकण्डूकोठविस्फोटदाहनुत् ।
दीपनः पाचनः क्वाथः शृङ्गबेरपटोलयोः ॥ ३८ ॥
पिप्पलीखण्डपथ्याभिस्तुल्याभिर्मोदकः कृतः ।
पित्तश्लेष्महरो भुक्तो वह्निमान्द्यं च नाशयेत् ॥ ३९ ॥

इति दशमोऽम्लपित्तश्लेष्मपित्ताधिकारः सम्पूर्णः ॥ १० ॥

अथैकादशो राजयक्ष्माधिकारः ॥ ११ ॥

तत्र राजयक्ष्मणो विप्रकृष्टं सन्निकृष्टं च निदानमाह—

वेगरोधात्क्षयाच्चैव साहसाद्विषमाशनात् ।
त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ॥ १ ॥

*वेगधारणात् =

*"वातमूत्रपुरीषाणि निगृह्णाति यदा नरः" ।

*इति चरकवचनात् । क्षयात् =क्षीयतेऽनेनेति क्षयः। तेनातिव्यवायानशनेर्ष्याऽऽदयो धातुक्षयहेतवः क्षयशब्देनोच्यन्ते । साहसाद् =बलवता समं मल्लयुद्धादितः । विषमाशनाद् =

*"बहुस्तोकमकाले वा भुक्तं तद्विषमाशनम्" ।

*तस्मात् । त्रिदोषः =सान्निपातिकः । हेतुचतुष्टयाद् =अन्येऽपि हेतवो हेतुचतुष्टय एवान्तर्भवन्ति ॥ १ ॥

अथ यक्ष्मादीनां निरुक्तिमाह—

वैद्यो व्याधिमता यस्माद्व्याधेर्यत्नेन यक्ष्यते ।
स यक्ष्मा प्रोच्यते लोके शब्दशास्त्रविशारदैः ॥ २ ॥

*यक्ष्यते = पूज्यते ॥ २ ॥

राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः ।
तस्मात्तं राजयक्ष्मेति प्रवदन्ति मनीषिणः ॥ ३ ॥
क्रियाक्षयकरत्वाच्च क्षय इत्युच्यते बुधैः ।
संशोषणाद्रसादीनां शोष इत्यभिधीयते ॥ ४ ॥

*यक्ष्मणः पर्याया राजयक्ष्मक्षयशोषाः ॥ ३–४ ॥

अथ राजयक्ष्मणः सम्प्राप्तिमाह—

कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु ।
अतिव्यवायिनो वाऽपि क्षीणे रेतस्यनन्तराः ॥
क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः ॥ ५ ॥

*कफप्रधानैर्दोषै रसवर्त्मसु रुद्धेष्वनन्तराः सर्वे धातवः क्षीयन्ते । ततो मानवः शुष्यति । कारणभूतस्य रसस्य क्षये कार्याणां रक्तादीनामनुक्रमेण क्षीयमाणत्वात् । मार्गावरोधे रसक्षयहेतुमाह चरकः—

*रसः स्रोतःसु रुद्धेषु स्वस्थानस्थो विदह्यते ।
स ऊर्द्ध्वं कासवेगेन बहुरूपः प्रवर्त्तते ॥ २ ॥

*स्वस्थानस्थः=हृदयस्थः । कासं विनाऽपि रसक्षयो भवति । मार्गावरोधकुपितवातेन रसस्य शोषणात् ॥ २ ॥

*उक्तं च—

*वायोर्धातुक्षयात्कोपान्मार्गस्यावरणेन च ॥ ३॥ इति ।

*अनुलोमक्षयमुक्त्वा प्रतिलोमक्षयमाह—अतिव्यवायिनो वा रेतसि क्षीणे प्रतिलोमक्रमेणानन्तराः सर्वे धातवो रसपर्यन्ताः क्षीयन्ते । तद्यथा-शुक्रे क्षीणे मज्जा क्षीयते, मज्जनि क्षीणेऽस्थि क्षीयते, एवं पूर्वं पूर्वं क्षीयते । ननु कार्यस्य शुक्रस्य क्षये कथं कारणभूतानां मज्जादीनां-क्षयः ? उच्यते-शुक्रक्षयाद् वायुः कुप्यति, स वायुः सान्निध्यात् क्रमेण मज्जादीन् सर्वान् धातून् शोषयति, ततस्तदनन्तरं मानवः-शुष्यति ॥ ५ ॥

अथ राजयक्ष्मणः पूर्वरूपमाह—

श्वासाङ्गसादकफसंस्रवतालुशोष-
वम्यग्निसादमदपीनसकासनिद्राः ।
शोषे भविष्यति भवन्ति स चापि जन्तुः-
शुक्लेक्षणो भवति मांसपरो रिरंसुः ॥ ६ ॥
स्वप्नेषु काकशुकशल्लकिनीलकण्ठ-
गृध्रास्तथैव कपयः कृकलासकाश्च ।
तं वाहयन्ति स नदीर्विजलाश्च पश्ये-
च्छुष्कांस्तरून्पवनधूमदवार्दितांश्च ॥ ७ ॥

अथ राजयक्ष्मणो लक्षणमाह—

अंसपार्श्वाभितापश्च सन्तापः करपादयोः ।
ज्वरः सर्वाङ्गिकश्चेति लक्षणं राजयक्ष्मणः ॥ ८ ॥

*अंसयोः पार्श्वयोश्चाभितापः पीडा । अत्र सकलधातुक्षय वंकः-सकलशरीरशोषो बोद्धव्यः । एतानि त्रीणि लक्षणानि प्रायोभावित्वेन चरकेणोक्तानि ॥ ८ ॥

अथ सुश्रुतोक्तानि षड्लक्षणान्याह—

भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनम् ।
स्वरभेदश्च जायन्ते षड्रूपे राजयक्ष्मणि ॥ ९ ॥

अथ तस्यैकादशलक्षणान्याह—

स्वरभेदोऽनिलाच्छूलं संकोचश्चांसपार्श्वयोः ।
ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः ॥ १० ॥
शिरसः परिपूर्णत्वमभक्तच्छन्द एव च ।
कासः कण्ठस्य च ध्वंसो विज्ञेयः कफकोपतः ॥ ११ ॥

*उल्वणतया दोषाणां भेदाद् यक्ष्मणामेकादशलक्षणान्याह—स्वर-भेद इति । अनिलादुल्वणात् । एवं पित्तात्कफाच्च । यत आह सुश्रुतः—

*एक एव मतः शोषः सन्निपातात्मको गदः ।
उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति हि ॥ ४ ॥ इति ॥ १०-११ ॥

अथासाध्यं यक्ष्माणमाह—

एकादशभिरेभिर्वा षड्भिर्वाऽपि समन्वितम् ॥ १२ ॥
त्रिभिर्वा पीडितं लिङ्गैर्ज्वरकासासृगामयैः ।
जह्याच्छोषार्दितं जन्तुमिच्छन्सुविमलं यशः ॥ १३ ॥

तत्र विशेषमाह—

सर्वैरर्द्धैस्त्रिभिर्वाऽपि लिङ्गैर्मांसबलक्षये ।
युक्तो वर्ज्यश्चिकित्स्यस्तु सर्वरूपोऽप्यतोऽन्यथा ॥ १४ ॥

*सर्वैर्लिङ्गैः=एकादशभिः । अर्द्धैः=षड्भिः । त्रिभिः=ज्वरका-सरुधिरवमनैः । अतोऽन्यथा=मांसबले सति सर्वरूपोऽपि न प्रत्या-ख्येयः किंतु चिकित्स्यः ॥ १४ ॥

महाशनं क्षीयमाणमरोचकनिपीडितम् ।
शूनमुष्कोदरञ्चैव यक्ष्मिणं परिवर्जयेत् ॥ १५ ॥

*"महाशनं क्षीयमाणमि" त्येकमसाध्यं लक्षणम् । "अतीसारनि-पीडितमिति" द्वितीयम् । यत उक्तम्—

*मलायत्तं बलं पुंसां शुक्रायत्तञ्च जीवितम् ।
तस्माद्यत्नेन संरक्षेद्यक्ष्मिणो मलरेतसी ॥ ५ ॥

*"शूनमुष्कोदरमि"ति तृतीयम् ॥ १५ ॥

अथारिष्टमाह—

शुक्लाक्षमन्नद्वेष्टारमूर्ध्वश्वासनिपीडितम् ।
कृच्छ्रेण बहु मेहन्तं यक्ष्मा हन्तीह मानवम् ॥ १६ ॥

*मेहन्तं=शुक्रं क्षरन्तम् । शुक्लाक्षत्वाद्येकैकशोऽरिष्टलक्षणमाह॥१६॥

अथ राजयक्ष्मिणा जीवनावधिमाह—

परं दिनसहस्रन्तु यदि जीवति मानवः ।
सुभिषग्भिरुपक्रान्तस्तरुणः शोषपीडितः ॥ १७ ॥

*शोषपीडितो मानवश्चेत्तरुणो भवति सुभिषग्भिरुपक्रान्तो भवति, तदा परं दिनसहस्रं द्वितीयं दिनसहस्रं यदि जीवति तत्र जीवनविकल्प इत्यर्थः। एतेन शोषपीडितो मानवश्चेत्तरुणो भवति सद्वैद्यैश्चिकित्सितो भवति तदा प्रथमदिनसहस्रं जीवेदेवेत्युक्तम् ॥ १७ ॥

अथ राजयक्ष्मिणश्चिकित्सामाह—

ज्वरानुबन्धरहितं बलवन्तं क्रियासहम् ।
उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरम् ॥ १८ ॥

*आत्मवन्तं=यत्नवन्तं धृतिमन्तं वा ॥ १८ ॥

अथ निदानविशेषैर्विशेषशोषानाह—

व्यवायशोकवार्द्धक्यव्यायामाध्वप्रशोषितान् ।
व्रणोरःक्षतसंज्ञौ च शोषिणौ लक्षणैः शृणु ॥ १९ ॥

*व्रणशोषी उरःक्षतशोषी च ॥ १९ ॥

अथ व्यवायशोषिणो लक्षणमाह—

व्यवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः ।
पाण्डुदेहो यथापूर्वं क्षीयन्ते चास्य धातवः ॥ २० ॥

*शुक्रस्य क्षयलिङ्गैः सुश्रुतोक्तैः । तानि यथा-"शुक्रक्षये मेढ्रवृषणवेदना, व्यवाये चाशक्तिः, चिराद्वा प्रसेकः, प्रसेकेऽल्पशुक्रदर्शनमि"ति । यथापूर्वं क्षीयन्ते चास्य धातवः=प्रथमं शुक्रं क्षीयते पश्चाच्छुक्रक्षयजनितवायुना मज्जादयोऽपि धातवो यथापूर्वं क्षीयन्ते ॥ २० ॥

अथ शोकशोषिणो लक्षणमाह—

प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः ।

विना शुक्रक्षयकृतैर्विकारैरुपलक्षितः ॥ २१ ॥

*प्रध्यानशीलः=यस्याभावेन शोको जनितस्तद्ध्यानपरः। स्रस्ताङ्गः=शिथिलाङ्गः। तादृशः=व्यवायशोषिसदृशः। तेन शुक्रादिसर्वधातुक्षययुक्तो भवति। परं शुक्रक्षयकृतैर्विकारैर्मेढ्रवृषणवेदनाऽऽदिभिर्वर्जितो भवति व्याधिस्वभावात् ॥ २१ ॥

अथ वार्द्धक्यशोषिणो लक्षणमाह—

जराशोषी कृशो मन्दवीर्यबुद्धिबलेन्द्रियः।
कम्पनोऽरुचिमान्भिन्नकांस्यपात्रहतस्वरः ॥ २२ ॥
ष्ठीवति श्लेष्मणा हीनं गौरवारुचिपीडितः।
सम्प्रस्रुतास्यनासाक्षः शुष्करूक्षमलच्छविः ॥ २३ ॥

*मन्दशब्दः स्वल्पार्थः। शुष्करूक्षमलच्छविः=शुष्के रूक्षे मलच्छवी यस्य सः॥ २२-२३ ॥

अथाध्वशोषिणो लक्षणमाह—

अध्वप्रशोषी स्रस्ताङ्गः सम्भृष्टपरुषच्छविः।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः ॥ २४ ॥

*सम्भृष्टपरुषच्छविः=सम्भृष्टस्येव परुषा छविर्यस्य सः। प्रसुप्तगात्रावयवः=प्रसुप्तः=स्पर्शाज्ञः, क्लोम=पिपासास्थानम् ॥ २४ ॥

अथ व्यायामशोषिणो लक्षणमाह—

व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः।
लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विना ॥ २५ ॥

*एभिरेव=स्रस्ताङ्गत्वादिभिरध्वशोषिलक्षणैरेव। भूयिष्ठम्=अत्यर्थम् ॥ २५ ॥

अथ व्रणशोषस्य निदानमसाध्यत्वं चाह—

रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात्।
व्रणितस्य भवेच्छोषः स चासाध्यतमः स्मृतः ॥ २६ ॥

अथोरःक्षतशोषस्य निदानमाह—

धनुषाऽऽयास्यतोऽत्यर्थं भारमुद्वहतो गुरुम्।
युद्ध्यमानस्य बलिभिः पततो विषमोच्चतः ॥ २७ ॥
वृषं हयं वा धावन्तं दम्यं चान्यं निगृह्णतः।

शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः परान् ॥ २८ ॥
अधीयानस्य चात्युच्चैर्दूरं वा व्रजतो द्रुतम् ।
महानदीं वा तरतो हयैर्वा सह धावतः ॥ २९ ॥
सहसोत्पततो दूरं तूर्णञ्चापि प्रनृत्यतः ।
तथाऽन्यैः कर्मभिः क्रूरैर्भृशमभ्याहतस्य वा ॥ ३० ॥
स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः ।
विक्षते वक्षसि व्याधिर्बलवान् समुदीर्यते ॥ ३१ ॥

*आयास्यतः=आयासं कुर्वतः । हृयं=वृषादिकम् । अन्यं=गजोष्ट्रादिकम् । शिला=दीर्घपाषाणः । अश्मा=प्रस्तरखण्डः । निर्घातः=अस्त्रविशेषः । व्याधिः=उरःक्षताख्यः ॥ २७-३१ ॥

अथोरःक्षतशोषिणो लक्षणमाह—

उरो विरुज्यतेऽत्यर्थं भिद्यतेऽथ विभज्यते ।
प्रपीड्येते तथा पार्श्वे शुष्यत्यङ्गं प्रवेपते ॥ ३२ ॥
क्रमाद्वीर्यं बलं वर्णो रुचिरग्निश्च हीयते ।
ज्वरो व्यथा मनोदैन्यं विड्भेदोऽग्निवधस्तथा ॥ ३३ ॥
दुष्टश्यावः सुदुर्गन्धः पीतो विग्रथितो बहुः ।
कासमानस्य चाभीक्ष्णं कफः सासृक् प्रवर्त्तते ।
स क्षती क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात् ॥ ३४ ॥

*विरुज्यते=पीड्यते । भिद्यते=विदार्यत इव । विभज्यते=द्विधा क्रियत इव । स क्षती=स=पुरुषः, क्षती=उरःक्षतवान् । अत्यर्थं क्षीयते=क्षीणो भवति ॥ ३२-३४ ॥

अथोरःक्षतस्य विशिष्टं लक्षणमाह—

उरोरुक्छोणितच्छर्दिः कासो वैशेषिकः क्षते ।
क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटीग्रहः ॥ ३५ ॥

*क्षते=उरःक्षतवति । उरोरुक् शोणितच्छर्दिः कासो वैशेषिकः=विशेषतो भवत्येव, अस्मिन् उरःक्षतवति सास्रकफशुक्रौजसां क्षयात् क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटीग्रहश्च भवति ॥ ३५ ॥

अथ निदानविशेषेणोरःक्षतलक्षणमाह—

व्रणरोधात्क्षयाच्चैव कोष्ठात्प्रतिमलात्तथा ।
क्षतोरस्कस्यान्नपाके निःश्वासो वाति पूतिकः ॥ ३६ ॥

*क्षयाद् = धातुक्षयहेतोरतिव्यवायोादतात् । कोष्ठात्प्रतिमलात् = कोष्ठात्प्रतिलोममलात् । पूतिकः = पूतिगन्धः ॥ ३६ ॥

अथोरःक्षतस्य साध्ययाप्यासाध्यलक्षणमाह—

अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नवः ।
परिसंवत्सरो याप्यः सर्वलिङ्गं तु वर्जयेत् ॥ ३७ ॥

अथ राजयक्ष्मचिकित्सामाह—

बलिनो बहुदोषस्य पञ्च कर्माणि कारयेत् ।
यक्ष्मिणः क्षीणदेहस्य तत्कृतं स्याद्विषोपमम् ॥ ३८ ॥
मलायत्तं बलं पुंसां शुक्रायत्तञ्च जीवितम् ।
तस्माद्यत्नेन संरक्षेद्यक्ष्मिणो मलरेतसी ॥ ३९ ॥
शालिषष्टिकगोधूमयवमुद्गादयो हिताः ।
मद्यानि जाङ्गलाः पक्षिमृगाः पथ्या विशुष्यताम् ॥ ४० ॥

अथ षडङ्गयूषमाह—

सपिप्पलीकं सयवं सकुलत्थं सनागरम् ॥ ४१ ॥
दाडिमामलकोपेतं स्निग्धमाजं रसं पिबेत् ।
तेन षड् विनिवर्त्तन्ते विकाराः पीनसादयः ॥ ४२ ॥
द्रव्यतो द्विगुणं मांसं सर्वतोऽष्टगुणं जलम् ।
पादस्थं संस्कृतञ्चाज्ये षडङ्गो यूष उच्यते ॥ ४३ ॥

*तथा—यव पल १ । कुलत्थ पल १ । छागमांस पल ४ । जल पल ४८ । शेष पल १२ । ततः पलमिते घृते संस्करणीयम् । तत्र कर्षमितं सैन्धवं देयम् । सौरभार्थं हिङ्गु देयम् । पिप्पली नागरञ्च पृथङ् माषमितं कल्कीकृत्य देयम् । इति षडङ्गयूषः ॥ ४१-४३ ॥

ककुभत्वङ्नागबला वानरीबीजं विचूर्णितम्पयसा ।
पीतं मधुघृतयुक्तं ससितं यक्ष्मादिकासहरम् ॥ ४४ ॥
छागमांसं पयश्छागं छागं सर्पिः सनागरम् ।
छागोपसेवी शयनं छागमध्ये तु यक्ष्मनुत् ॥ ४५ ॥

मधुताप्यविडङ्गाश्मजतुलोहघृताभयाः ।
घ्नन्ति यक्ष्माणमत्युग्रं सेव्यमाना हिताशिनः ॥ ४६ ॥
*ताप्यं=सुवर्णमाक्षिकम् ॥ ४६ ॥
शर्करामधुसंयुक्तं नवनीतं लिहन्क्षयी ।
क्षीराशी लभते पुष्टिमतुल्ये चाज्यमाक्षिके ॥ ४७ ॥

अथ सितोपलाऽऽदिचूर्णमाह—

सितोपला तुगाक्षीरी पिप्पली बहुला त्वचः ।
अन्त्यादूर्ध्वं द्विगुणिताश्चूर्णिता मधुसर्पिषा ॥ ४८ ॥
लेहयेद्राजरोगार्त्तं कासश्वासज्वरातुरम् ।
पार्श्वशूलिनमल्पाग्निं सुप्तजिह्वं रुचिच्युतम् ।
हस्तपादाङ्गदाहे च ज्वरे रक्ते तथोर्ध्वगे ॥ ४९ ॥
*सितोपला=(मिश्री)। बहुला=सूक्ष्मैला ॥ ४८-४९ ॥

अथ जातीफलाद्यचूर्णमाह—

जातीफलं विडङ्गानि चित्रकं तगरं तिलाः ।
तालीसं चन्दनं शुण्ठी लवङ्गमुपकुञ्चिका ॥ ५० ॥
कर्पूरश्चाभया धात्री मरिचं पिप्पली तुगा ।
एषां त्वक्षसमा भागाश्चातुर्जातकसंयुताः ॥ ५१ ॥
पलानि सप्त भङ्गायाः सिता सर्वसमा मता ।
चूर्णमेतत्क्षयं कासं श्वासञ्च ग्रहणीगदम् ॥ ५२ ॥
अरोचकं प्रतिश्यायं तथा चानलमन्दताम् ।
एतान् रोगान्निहन्त्येव वृक्षमिन्द्राशनिर्यथा ॥ ५३ ॥

अथ लाक्षाऽऽदितैलप्रयोगमाह—

बालरोगाधिकारोक्तं तैलं लाक्षाऽऽदि योजयेत् ।
अभ्यङ्गे यक्ष्मिणो नित्यं वृद्धवैद्योपदेशतः ॥ ५४ ॥

अथ वासाऽवलेहमाह—

वासकस्य रसप्रस्थं मानिका सितशर्करा ।
पिप्पल्या द्विपलं तावत्सर्पिषश्च शनैः पचेत् ॥ ५५ ॥
तस्मिँल्लेहत्वमायाते शीते क्षौद्रपलाष्टकम् ॥

दत्त्वाऽवतारयेद् वैद्यो लीढो लेहोऽयमुत्तमः ॥ ५६ ॥
हन्त्येव राजयक्ष्माणं कासं श्वासञ्च दारुणम् ।
पार्श्वशूलञ्च हृच्छूलं रक्तपित्तं ज्वरं तथा ॥ ५७ ॥

अथ व्यवायादिहेतुकशोषचिकित्सामाह—

व्यवायशोषिणं क्षीणं रसमांसाज्यभोजनैः ।
सुकूलैर्मधुरैर्हृद्यैर्जीवनीयैरुपाचरेत् ॥ ५८ ॥

*रसः=मांसरसः । सुकूलैः=हितैः ॥ ५८ ॥

अथ शोकशोषचिकित्सामाह—

हर्षणाश्वासनैः क्षीरैः स्निग्धैर्मधुरशीतलैः ।
दीपनैर्लघुभिश्चान्नैः शोकरोगमुपाचरेत् ॥ ५९ ॥

अथ व्यायामशोषचिकित्सामाह—

व्यायामशोषिणं स्निग्धैः क्षतक्षयहितैर्हिमैः ।
उपाचरेज्जीवनीयैर्विधिना श्लैष्मिकेण तु ॥ ६० ॥

अथाध्वशोषचिकित्सामाह—

आस्यासुखैर्दिवास्वप्नैः शीतैर्मधुरबृंहणैः ।
अन्नमांसरसाहारैरध्वशोषमुपाचरेत् ॥ ६१ ॥

अथ व्रणशोषचिकित्सामाह—

व्रणशोषं जयेत्स्निग्धैर्दीपनैः स्वादुशीतलैः ।
ईषदम्लैरनम्लैर्वा यूषमांसरसादिभिः ॥ ६२ ॥

अथोरःक्षतचिकित्सा ।

तत्र बलाऽऽदिचूर्णमाह—

बलाऽश्वगन्धा श्रीपर्णी बहुपुत्री पुनर्नवा ।
पयसा नित्यमभ्यस्ताः शमयन्ति क्षतक्षयम् ॥ ६३ ॥

*श्रीपर्णी=गाम्भारी । बहुपुत्री=शतावरी ॥ ६३ ॥

अथैलाऽऽदिगुटिकामाह—

एलापत्रत्वचोऽर्द्धाक्षाः पिप्पल्यर्द्धपलं पृथक् ।
सितामधुकखर्जूरमृद्वीकाश्च पलोन्मिताः ॥ ६४ ॥
संचूर्ण्य मधुना युक्ता वटिकाः सम्प्रकल्पयेत् ।
अक्षमात्रां ततश्चैकां भक्षयेत्तु दिने दिने ॥ ६५ ॥

क्षतं क्षयं ज्वरं कासं श्वासं हिक्कां वमिं भ्रमम्।
मूर्च्छां मदं तृषां शोषं पार्श्वशूलमरोचकम्॥ ६६॥
प्लीहानमाढ्यवातञ्च रक्तपित्तं स्वरक्षयम्।
पलाऽऽदिगुटिका हन्ति वृष्या सन्तर्पणी परा॥ ६७॥

अथ द्राक्षाऽऽदिघृतमाह—

द्राक्षायाः प्रस्थमेकन्तु मधुकस्य पलाष्टकम्।
पचेत्तोयाढके शुद्धे पादशेषेण तेन तु॥ ६८॥
पलिके।मधुकद्राक्षे पिष्टे कृष्णापलद्वयम्।
प्रदाय सर्पिषः प्रस्थं पचेत्क्षीरे चतुर्गुणे॥ ६९॥
सिद्धे शीते पलान्यष्टौ शर्करायाः प्रदापयेत्।
एतद् द्राक्षाघृतं सिद्धं क्षतक्षीणसुखावहम्॥ ७०॥
वातं पित्तं ज्वरं श्वासं विस्फोटकहलीमकान्।
प्रदरं रक्तपित्तञ्च हन्यान्मांसबलप्रदम्॥ ७१॥

अथामृतप्राशावलेहमाह—

क्षीरे धात्री च मञ्जिष्ठा क्षीरिणाञ्च तथा रसैः।
पचेत्समैर्घृतप्रस्थं मधुरैः कर्षसम्मितैः॥ ७२॥
द्राक्षाद्विचन्दनोशीरैः शर्करोत्पलपद्मकैः।
मधूककुसुमानन्ताकाश्मरीतृणसंज्ञकैः॥ ७३॥
प्रस्थार्द्धं मधुनः शीते शर्कराऽर्द्धतुलां तथा।
पलार्द्धिकांश्च सञ्चूर्ण्य त्वगेलापद्मकेशरान्॥ ७४॥
विनीय तत्र संलिह्यान्मात्रां नित्यं सुयन्त्रितः।
अमृतप्राशमित्येतदश्विभ्यां परिकीर्त्तितम्॥ ७५॥
क्षीरमांसाशिनां हन्ति रक्तपित्तं क्षतक्षयम्॥ ७६॥
तृष्णाऽरुचिश्वासकासच्छर्दिमूर्च्छाप्रमर्दनम्।
मूत्रकृच्छ्रज्वरघ्नञ्च बल्यं स्त्रीरतिबर्द्धनम्॥ ७७॥

अथोरःक्षतरोगिपथ्यान्याह—

यद्यच्च तर्पणं शीतमविदाहि हितं लघु।
अन्नपानं निषेव्यं स्यात्क्षतक्षीणैः सुखार्थिभिः॥ ७८॥

शोकं स्त्रियः क्रोधमसूयतां च त्यजेदुदारान्विषयान्भजेच्च ।
तथा द्विजातींस्त्रिदशान्गुरूंश्च वाचश्च पुण्याः शृणुयाद्द्विजेभ्यः॥७९॥

अथ राजयक्ष्मणि रसाः ।

तत्रामृतेश्वररसमाह—

रसभस्मामृतासत्त्वं लोहं मधुघृतान्वितम् ।
अमृतेश्वरनामाऽयं षड्गुञ्जो राजयक्ष्मणि ॥ ८० ॥

*रसभस्म=मारितो रसः । अमृतासत्त्वं=गुडूचीसत्त्वम् । लोहं-मारितम् । इत्यमृतेश्वररसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ ॥८०॥

अथ राजमृगाङ्करसमाह—

त्रयोंऽशा मारितात्सूतादेकोंऽशो हेमभस्मतः ।
एकोंऽशो मृतताम्रस्य शिला गन्धश्च तालकम् ॥ ८१ ॥
प्रत्येकं भागयुग्मं स्यादेतत्सर्वं विचूर्णयेत् ।
वराटीः पूरयेत्तेन छागीक्षीरेण टङ्कणम् ॥ ८२ ॥
पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे तांश्च धारयेत् ।
शुष्कां पचेद्गजपुटे स्वाङ्गशीतं समुद्धरेत् ॥ ८३ ॥
रसो राजमृगाङ्कोऽयं चतुर्गुञ्जः क्षयापहः ।
मरिचैरूनविंशत्या कणाभिर्दशभिस्तथा ॥ ८४ ॥
मधुना सर्पिषा चापि दद्यादेतं रसं भिषक् ।
अनेन नश्यति क्षिप्रं वातश्लेष्मभवः क्षयः ॥ ८५ ॥

*इति राजमृगाङ्को रसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ ॥८१-८५॥

अथाग्निरसमाह—

शुद्धं सूतं द्विधा गन्धं कुर्यात्खल्वेन कज्जलीम् ।
तयोः समं तीक्ष्णचूर्णं मर्दयेत्कन्यकाद्रवैः ॥ ८६ ॥
द्वियाममातपे गोलं ताम्रपात्रे निधापयेत् ।
आच्छाद्यैरण्डपत्रेण स्यादुष्णं यामयुग्मतः ॥ ८७ ॥
धान्यराशौ न्यसेत्पश्चादष्टरात्रात्तमुद्धरेत् ।
सञ्चूर्ण्य गालयेद्वस्त्रैः सत्यं वारितरं भवेत् ॥ ८८ ॥

त्रिकटुत्रिफलैलाभिर्जातीफललवङ्गकैः।
नवभागोन्मितैरेभिः समैरेष रसो भवेत् ॥ ८९ ॥
निष्कद्वयमितं नित्यं मधुना सह लेहयेत्।
अयमग्निरसो नाम्ना कासक्षयहरः परः ॥ ९० ॥
*इत्यग्निरसः शार्ङ्गधरे ॥ ८६-९० ॥

इति दशमो राजयक्ष्माधिकारः सम्पूर्णः ॥ १० ॥

अथैकादशः कासरोगाधिकारः ॥ ११ ॥

तत्र कासस्य निदानसम्प्राप्तिपूर्वकं सामान्यलक्षणमाह—

धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च।
विमार्गगत्वादपि भोजनस्य वेगावरोधात्क्षवथोस्तथैव ॥१॥

*धूमोपघाताद् = धूमेन कण्ठप्रविष्टेन कण्ठस्योपघाताद्। रजसः कण्ठप्रविष्टादेव। वेगावरोधाद् = मलादिवेगावरोधात्। क्षवथोरपि धारणात् ॥ १ ॥

प्राणो ह्युदानानुगतः प्रदुष्टः सम्भिन्नकांस्यस्वनतुल्यघोषः।
निरेति वक्त्रात्सहसा सदोषो मनीषिभिः कास इति प्रदिष्टः ॥ २ ॥

*सदोषः = तादृक् प्राणानिलरूपः ॥ २ ॥

अथ काससंख्यामाह—

पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः।
क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरम् ॥ ३ ॥

*क्षयाय = राजयक्ष्मणे ॥ ३ ॥

अथ कासपूर्वरूपमाह—

पूर्वरूपं भवेत्तेषां शूकपूर्णगलास्यता।
कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते ॥ ४ ॥

*भोज्यानामवरोधः = कवलगिलने कण्ठव्यथा ॥ ४ ॥

अथ वातिककासलक्षणमाह—

हृच्छङ्खपार्श्वोदरमूर्ध्दशूली क्षामाननः क्षीणबलस्वरौजाः।
प्रसक्तवेगस्तु समीरणेन भिन्नस्वरः कासति शुष्कमेव ॥ ५ ॥

*शङ्खो=ललाटैकदेशः। शुष्कं=श्लेष्मादिरहितम् ॥ ५ ॥

अथ पैत्तिककासलक्षणमाह—

उरोविदाहज्वरवक्त्रशोषैरभ्यर्दितस्तिक्तमुखस्तृषाऽऽर्त्तः।
पित्तेन पीतानि वमेत्कटूनि कासेत्सपाण्डुः परिदह्यमानः ॥६॥

*सपाण्डुः=पाण्डुरोगयुक्तः ॥ ६ ॥

अथ श्लैष्मिककासलक्षणमाह—

प्रलिप्यमानेन मुखेन सीदञ्छिरोरुजाऽऽर्त्तः कफपूर्णदेहः।
अभक्तरुग्गौरवकण्डुयुक्तः कासेद्भृशं सान्द्रकफः कफेन ॥७॥

*प्रलिप्यमानेन मुखेन=श्लेष्मलिप्तेन मुखेन, उपलक्षितः। अभक्त-रुग्=न भक्ते रुग्=रुचिर्यस्य सः। कण्डूः कण्ठ एव च ॥ ७ ॥

अथ क्षतजकासस्य निदानसम्प्राप्तिपूर्वकं लक्षणमाह—

अतिव्यवायभाराध्वयुद्धाश्वगजनिग्रहैः।
रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत् ॥ ८ ॥
स पूर्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम्।
कण्ठेन कूजताऽत्यर्थं विभग्नेनेव चोरसा ॥ ९ ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना।
दुःखस्पर्शेन शूलेन भेदपीडाऽभितापिना ॥ १० ॥
पर्वभेदज्वरश्वासतृष्णावैस्वर्यपीडितः।
पारावत इवाकूजन् कासवेगात् क्षतोद्भवात् ॥ ११ ॥

*अश्वगजयोर्निग्रहो=दमनम्। कण्ठेनेत्युपलक्षणे तृतीया, एवम्-उरसेति ॥ ८–११ ॥

अथ क्षयजकासस्य निदानपूर्विकां सम्प्राप्तिमाह—

विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात्।
घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः।
कुपिताः क्षयजं कासं कुर्युर्देहक्षयप्रदम् ॥ १२ ॥

*घृणिनां=विचिकित्सायुक्तानाम् ॥ १२ ॥

अथ क्षयजकासस्य लक्षणमाह—

सगात्रशूलज्वरमोहदाहप्राणक्षयं चोपलभेत कासी ॥ १३ ॥
शुष्यन् विनिष्ठीवति निर्बलस्तु प्रक्षीणमांसो रुधिरं सपूयम्।

तं सर्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति ॥१४॥

अथ कासस्यासाध्यसाध्ययाप्यत्वमाह—

इत्येष क्षयजः कासः क्षीणानां देहनाशनः ।
साध्यो बलवतां वा स्याद्याप्यस्त्वेवं क्षतोत्थितः ॥ १५ ॥

*एवं क्षतोत्थितः क्षीणानामसाध्यः । बलवतां साध्यो याप्यो वा स्यात् ॥ १५ ॥

नवौ कदा चित्सिध्येतामपि पादगुणान्वितौ ।
स्थविराणां जराकासः सर्वो याप्यः प्रकीर्त्तितः ॥ १६ ॥

*सिध्येतां क्षतजक्षयजौ सद्वैद्यसद्भेषजसत्परिचारकयुक्तस्य सदातुरस्य जातौ । स्थविराणां जराकासः=वृद्धानां यः कासो भवति स जराकाससंज्ञः, स सर्व एव वातजादिरपि याप्यः ॥ १६ ॥

त्रीन्पूर्वान्साधयेत्साध्यान्पथ्यैर्याप्यांस्तु यापयेत् ॥ १७ ॥

अथ कासोपेक्षायां दोषमाह—

ज्वरारोचकहृल्लासस्वरभेदक्षयादयः ।
भवन्त्युपेक्षया यस्मात्तस्मात्तं त्वरया जयेत् ॥ १८ ॥

*स्वल्पोऽपि कास उपेक्षणीयो न भवति, किन्तु शीघ्रं प्रतिकरणीय इत्याह—ज्वरेति ॥ १८ ॥

अथ कासस्य चिकित्सा ।

तत्र प्रथमं वातजकासस्य चिकित्सामाह—

वास्तूको वायसीशाकं मूलकं सुनिषण्णकम् ।
स्नेहास्तैलादयो भक्ष्यास्तथेक्षुरसगौडिकाः ॥ १९ ॥
दध्यारनालाम्लफलं प्रसन्नापानमेव च ।
शस्यते वातकासेषु स्वाद्वम्ललवणानि च ॥ २० ॥

*वायसीशाकं="काकोदुम्बरिका"—"माचीकवैया" वेति लोके । सुनिषण्णकं="सुषुणि"—"सिरुआ" वेति लोके शाकविशेषः ।

*चाङ्गेरीसदृशः पत्रैः सुनिषण्णं चतुर्दलम् ।
शाको जलान्विते देशे चतुष्पत्रीति चोच्यते ॥ १ ॥

*"चौपतिया" इति लोके ॥ १९-२० ॥

ग्राम्यानूपौदकैः शालियवगोधूमषष्टिकान् ।
रसैर्माषात्मगुप्तानां यूषैर्वा भोजयेद्भिषक् ॥ २१ ॥

*ग्राम्यानूपौदकै रसैरित्यन्वयः । आत्मगुप्ता = "कौंच" इति लोके ॥ २१ ॥

दशमूलीकृता श्वासकासहिक्कारुजाऽपहा ।
यवागूर्दीपना वृष्या वातरोगविनाशिनी ॥ २२ ॥
रसः कर्कोटकानां वा घृतभृष्टः सनागरः ।
वातकासप्रशमनः शृङ्गीमत्स्यस्य वा पुनः ॥ २३ ॥

अथ पित्तजकासस्य चिकित्सामाह—

कण्टकारीयुगं द्राक्षा वासाकर्चूरबालकैः ।
नागरेण च पिप्पल्या क्वथितं सलिलं पिबेत् ।
शर्करामधुसंयुक्तं पित्तकासहरं परम् ॥ २४ ॥

अथ कफजकासस्य चिकित्सा ।

तत्र पिप्पल्यादिक्वाथमाह—

पिप्पली कट्फलं शुण्ठी शृङ्गी भार्गी तथोषणम् ।
कारवी कण्टकारी च सिन्दुवारो यवानिका ॥ २५ ॥
चित्रको वासकश्चैषां कषायं विधिवत्कृतम् ।
कफकासविनाशाय पिबेत्कृष्णारजोयुतम् ॥ २६ ॥

अथ क्षतजकासचिकित्सामाह—

इक्षिवक्षुबालिकापद्ममृणालोत्पलचन्दनम् ।
मधुकं पिप्पली द्राक्षा लाक्षा शृङ्गी शतावरी ॥ २७ ॥
द्विगुणा च तुगाक्षीरी सिता सर्वचतुर्गुणा ।
लिह्यात्तन्मधुसर्पिर्भ्यां क्षतकासनिवृत्तये ॥ २८ ॥

*इक्षुबालिका = इक्षुभेदः "चन्द्र" इति लोके । पद्मं = पद्मकाष्ठम् । मृणालं = बिसम् । उत्पलं = कमलम् । चन्दनमत्र धवलं चर्णत्वात् । शृङ्गी = कर्कटशृङ्गी । तुगाक्षीरी = वंशरोचना, सा चेक्षोर्द्विगुणा ॥ २७–२८ ॥

अथ क्षयजकासचिकित्सामाह—

चूर्णं काकुभमिष्टं वासकरसभावितं बहून्वारान् ।

मधुघृतसितोपलाभिर्लेह्यं क्षयकासरक्तहरम् ॥ २८ ॥

*काकुभं चूर्णम् ॥ २९ ॥

अथ कासरोगस्य सामान्यचिकित्सामाह—

ताप्यमानस्य कासेन नासास्रावे स्वरे जडे ।
क्षवथौ गन्धनाशे च धूमपानं प्रयोजयेत् ॥ ३० ॥
मनःशिलाऽऽलमरिचमांसीमुस्तेङ्गुदैः पिबेत् ।
धूमं त्र्यहञ्च तस्यानु पयश्च सगुडं पिबेत् ॥ ३१ ॥

*आलं=हरितालम् ॥ ३१ ॥

एष कासान्पृथग्द्वन्द्वसर्वदोषसमुद्भवान् ।
शतैरपि प्रयोगाणामसाध्यान्साधयेद् ध्रुवम् ॥ ३२ ॥
बदरीदलमालिप्तं शिलयाऽऽतपशोषितम् ।
तद्धूमपानं सक्षीरं महाकासनिवारणम् ॥ ३३ ॥
कण्टकारीकृतः क्वाथः सकृष्णः सर्वकासहा ।
कण्टकार्याः कणायाश्च चूर्णं समधु कासहृत् ॥ ३४ ॥

अथ समशर्करचूर्णं वटिकां वाऽऽह—

लवङ्गजातीफलपिप्पलीनां भागान्प्रकल्प्याक्षसमानमीषाम् ।
पलार्द्धमानं मरिचं प्रदेयं पलानि चत्वारि महौषधस्य ॥ ३५ ॥
सिता समस्तेन समाऽथ चूर्णं रोगानिमानाशु बलान्निहन्ति ।
कासज्वरारोचकमेहगुल्मश्वासाग्निमान्द्यग्रहणीविकारान् ॥ ३६ ॥

कुनटी सैन्धवं व्योषं विडङ्गामयहिङ्गुभिः ।
लेहः साज्यमधुः कासश्वासहिक्कानिवारणः ॥ ३७ ॥
हरीतकी कणा शुण्ठी मरिचं गुडसंयुतम् ।
कासश्लेष्मापहं प्रोक्तं परं वह्नेः प्रदीपनम् ॥ ३८ ॥

अथ मरिचाद्यं चूर्णमाह—

कर्षः कर्षांशपलं पलद्वयं स्यात्ततोऽर्द्धकर्षश्च ।
मरिचस्य पिप्पलीनां दाडिमगुडयावशूकानाम् ॥ ३९ ॥
सर्वौषधिभिरसाध्याः कासा ये वैद्यनिर्मुक्ताः ।
अपि पूयं छर्दयतां तेषामिदमौषधं परमम् ॥ ४० ॥

*कर्षांशोऽत्र कर्षद्वयम् ॥ ३६-४० ॥

अथ मरिचादिगुटिकामाह—

मरिचं कर्षमात्रं स्यात्पिप्पली कर्षसम्मिता ।
अर्द्धकर्षो यवक्षारः कर्षयुग्मन्तु दाडिमम् ॥ ४१ ॥
एतच्चूर्णीकृतं युञ्ज्यादष्टकर्षगुडेन हि ।
शाणप्रमाणां गुटिकां कृत्वा वक्त्रे विधारयेत् ।
अस्याः प्रभावात्सर्वेऽपि कासा यान्त्येव संक्षयम् ॥ ४२ ॥

*दाडिमफलत्वग् ग्राह्या ॥ ४१-४२ ॥

अथ भृगुहरीतकीमाह—

समूलवल्कच्छदकण्टकार्यास्तुलां ततो द्रोणमितं जलञ्च ।
हरीतकीनां शतमेकपात्रे विपाच्य कुर्याच्चरणाम्बुशेषम् ॥ ४३ ॥
तस्मिन्कषाये तनुवस्त्रपूते हरीतकीभिः सहितं गुडस्य ।
तुलां विनिक्षिप्य पचेत्सुपक्वमेतत्समुत्तार्य सुशीतलञ्च ॥ ४४ ॥
पलं पलञ्चापि कटुत्रयञ्च तथा चतुर्जातपलं विचूर्ण्य ।
पलानि षट् पुष्परसस्य चापि विनिक्षिपेत्तत्र विमिश्रयेच्च ॥४५॥
प्रयुज्यमानो विधिनैष लेहो यथाबलञ्चापि यथाऽनलञ्च ।
वातात्मकं पित्तकृतं कफोत्थं त्रिदोषजातानपि च त्रिदोषम् ॥४६॥
क्षतोद्भवञ्च क्षयजञ्च कासं श्वासञ्च हन्यात्सह पीनसेन ।
यक्ष्माणमेकादशरूपमुग्रं हरीतकी या भृगुणोपदिष्टा ॥ ४७ ॥

*पुष्परसो = मधु ॥ ४३-४७ ॥

अथ कण्टकार्यवलेहमाह—

कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकम् ।
पादशेषं गृहीत्वा च तत्र चूर्णानि दापयेत् ॥ ४८ ॥
पृथक्पलांशान्येतानि गुडूची चव्यचित्रकौ ।
मुस्तं कर्कटशृङ्गी च त्र्यूषणं धन्वयासकः ॥ ४९ ॥
भार्गी रास्ना शटी चैव शर्करापलविंशतिः ।
प्रत्येकञ्च पलान्यष्टौ प्रदद्याद् घृततैलयोः ॥ ५० ॥
पक्त्वा लेहत्वमानीय शीते मधु पलाष्टकम् ।

चतुर्भागं तुगाक्षीर्याः पिप्पल्याश्च चतुःपलम् ॥ ५१ ॥
क्षिप्त्वा निदध्यात्सुदृढे मृन्मये भाजने शुभे ।
लेहोऽयं हन्ति हिक्काऽऽर्त्तिकासश्वासाननशेषतः ॥ ५२ ॥

इत्येकादशः कासाधिकारः समाप्तः ॥ ११ ॥

अथ द्वादशो हिक्काऽधिकारः ॥ १२ ॥

तत्र हिक्काया विप्रकृष्टनिदानमाह—

विदाहिगुरुविष्टम्भिरूक्षाभिष्यन्दिभोजनैः ।
शीतपानाशनस्नानरजोधूमात्तथाऽनिलैः ॥ १ ॥
व्यायामकर्मभाराध्ववेगाघातापतर्पणैः ।
हिक्का श्वासश्च कासश्च नृणां समुपजायते ॥ २ ॥

*अपतर्पणम्=अनशनादि ॥ १-२ ॥

अथ हिक्कायाः संख्यारूपसम्प्राप्तिमाह—

वायुः कफेनानुगतः पञ्च हिक्काः करोति हि ।
अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा ॥ ३ ॥

अथ हिक्कायाः सामान्यलक्षणमाह—

मुहुर्मुहुर्वायुरुदेति सस्वनो यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन् ।
स दोषवानाशु हिनस्त्यसून्यतस्ततस्तु हिक्केत्यभिधीयते बुधैः ॥४॥

*वायुरत्र सोदानप्राणो बोद्धव्यः । उदेति=ऊर्ध्वं याति । सस्वनः="हिगि"ति शब्दवान् । ऊर्ध्वगमनं विशिनष्टि-"यकृदि"त्यादि । "प्लिह" इति शब्दोऽप्यस्ति दीर्घत्वविकल्पात । "मुखादि"ति ल्यब्लोपे पञ्चमी, तेन यकृत्प्लिहान्त्राणि मुखमानीय, आक्षिपन्=निःसारयन्, इवेत्यर्थः । स=वायुः, दोषवान्=दोषोऽत्र कफस्तद्वान् । "वायुः कफेनानुगत" इति सम्प्राप्तिः । हिनस्तीति हिक्का पृषोदरादित्वाद् रूपसिद्धिः । हिगिति शब्दं करोतीति ॥ ४ ॥

अथ हिक्कायाः पूर्वरूपमाह—

कण्ठोरसोर्गुरुत्वञ्च वदनस्य कषायता ।
हिक्कानां पूर्वरूपाणि कुक्षेराटोप एव च ॥ ५ ॥

*वदनस्य कषायता वातात् ॥ ५ ॥

अथान्नजाया हिक्काया लक्षणमाह—

पानान्नैरतिसंयुक्तैः सहसा पीडितोऽनिलः ।
हिक्कयेदूर्ध्वगो भूत्वा तां विद्यादन्नजां भिषक् ॥ ६ ॥

*अनिलः=प्राणो वायुः ॥ ६ ॥

अथ यमलाया हिक्काया लक्षणमाह—

चिरेण यमलैर्वेगैर्या हिक्का सम्प्रवर्त्तते ।
कम्पयन्ती शिरो ग्रीवां यमलां तां विनिर्दिशेत् ॥ ७ ॥

अथ क्षुद्राया हिक्काया लक्षणमाह—

विकृष्टकालैर्या वेगैर्मन्दैः समभिवर्त्तते ।
क्षुद्रिका नाम सा हिक्का जत्रुमूलं प्रधाविता ॥ ८ ॥

*विकृष्टकालैश्चिरेण । जत्रुः=कण्ठोरसोः सन्धिः ॥ ८ ॥

अथ गम्भीराया हिक्काया लक्षणमाह—

नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी ।
अनेकोपद्रववती गम्भीरा नाम सा स्मृता ॥ ९ ॥

*अनेकोपद्रववती=तृष्णाज्वरादियुक्ता ॥ ९ ॥

अथ महतीहिक्कालक्षणमाह—

मर्माणि पीडयन्तीव सततं या प्रवर्त्तते ।
महाहिक्केति सा ज्ञेया सर्वगात्रप्रकम्पिनी ॥ १० ॥

*मर्माणि=वस्तिहृदयशिरःप्रभृतीनि ॥ १० ॥

अथ हिक्काऽसाध्यतामाह—

आकम्पते हिक्कतो यस्य देहो दृष्टिश्चोर्ध्वं ताम्यते नित्यमेव ।
क्षीणोऽन्नद्विट् क्षौति यश्चातिमात्रं तौ द्वौ चान्त्यौ वर्जयेद्धिक्कमानौ॥११॥

*आकम्पते=विस्फूर्यत इव । तौ द्वाविति="आकम्पत" इत्यादिना "नित्यमेवे"त्यन्तेनैको हिक्कमानः । "क्षीण" इत्यादिना "अतिमात्रमि"त्यन्तेनापरः । तौ, द्वौ अन्त्यौ च गम्भीरया महत्या हिक्कया हिक्कमानौ वर्जयेत् ॥ ११ ॥

अपरञ्च—

अथ यमलाहिक्काऽसाध्यतामाह—

अतिसञ्चितदोषस्य भक्तद्वेषकृशस्य च ।
व्याधिभिः क्षीणदेहस्य वृद्धस्यातिव्यवायिनः ॥ १२ ॥
आयासाच्च समुत्पन्ना हिक्का हन्त्याशु जीवितम् ।
यमिका च प्रलापार्त्तिमोहतृष्णासमन्विता ॥ १३ ॥

अथ यमिकायाः साध्यत्वमाह—

अक्षीणस्याप्यदीनस्य स्थिरधात्विन्द्रियस्य च ।
तस्य साधयितुं शक्या यमिका हन्त्यतोऽन्यथा ॥ १४ ॥

अथ हिक्काचिकित्सामाह—

यत्किञ्चित्कफवातघ्नमुष्णं वातानुलोमनम् ।
भेषजं पानमन्नं वा हिक्काश्वासेषु तद्धितम् ॥ १५ ॥
हिक्काश्वासातुरे पूर्वं तैलाक्ते स्वेद इष्यते ।
ऊर्द्ध्वाधःशोधनं शस्तं दुर्बले शमनं मतम् ॥ १६ ॥
प्राणावरोधतर्जनविस्मापनशीतवारिपरिषेकैः ।
चित्रैः कथाप्रयोगैः शमयेद्धिक्कां मनोऽभिघातैश्च ॥ १७ ॥
हिक्काऽऽर्त्तस्य पयश्छागं हितं नागरसाधितम् ।
मधुसौवर्चलोपेतं मातुलुङ्गरसं पिबेत् ॥ १८ ॥
मधुकं मधुसंयुक्तं पिप्पली शर्कराऽन्विता ।
नागरं गुडसंयुक्तं हिक्काघ्नं नावनं त्रयम् ॥ १९ ॥
प्रवालशङ्खत्रिफलाचूर्णं मधुघृतप्लुतम् ।
पिप्पली गैरिकञ्चेति लेहो हिक्कानिवारणः ॥ २० ॥
नैपाल्या गोविषाणाद्वा कुष्ठात्सर्जरसस्य वा ।
धूपं कुशस्य वा कार्यं पिबेद्धिक्कोपशान्तये ॥ २१ ॥

*नैपाली=मनःशिला ॥ २१ ॥

निर्धूमाङ्गारनिक्षिप्तहिङ्गुमाषरजोभवः ।
हिक्काः पञ्चापि हन्त्याशु धूमः पीतो न संशयः ॥ २२ ॥
हरेणुककणानाञ्च क्वाथो हिङ्गुसमन्वितः ।
हिक्काप्रशमनश्रेष्ठो धन्वन्तरिवचो यथा ॥ २३ ॥

अथ चन्द्रशूररसमाह—

चन्द्रशूरस्य बीजानि क्षिपेदष्टगुणे जले ।
यदा मृदूनि मृदूनीयात्ततो वाससि गालयेत् ॥ २४ ॥
हिक्काऽतिवेगविकलस्तज्जलं पलमात्रया ।
पिबेत्पिबेत्पुनश्चापि हिक्काऽवश्यं प्रशाम्यति ॥ २५ ॥

इति द्वादशो हिक्काऽधिकारः समाप्तः ॥ १२ ॥

अथ त्रयोदशः श्वासरोगाधिकारः ॥ १३ ॥

तत्र श्वासस्य निदानमाह—

यैरेव कारणैर्हिक्का देहिनां सम्प्रवर्त्तते ।
तैरेव बहुभिः श्वासो व्याधिर्घोरः प्रजायते ॥ १ ॥

अथ श्वासस्य भेदानाह—

महोर्द्ध्वच्छिन्नतमकक्षुद्रभेदैस्तु पञ्चधा ।
भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥ २ ॥

अथ तस्य पूर्वरूपमाह—

प्राग्रूपं तस्य हृत्पीडा शूलमाध्मानमेव च ।
आनाहो वक्त्रवैरस्यं शङ्खनिस्तोद एव च ॥ ३ ॥

अथ श्वाससम्प्राप्तिमाह—

यदा स्रोतांसि संरुध्य मारुतः कफपूर्वकः ।
विष्वग्व्रजति संरुद्धस्तदा श्वासान् करोति सः ॥ ४ ॥

*विष्वग् व्रजति=सर्वतो विमार्गान् याति । संरुद्धः=कफेन रुद्धमार्गः ॥ ४ ॥

अथ महाश्वासस्य लक्षणमाह—

उद्धूयमानवातो यः शब्दवद् दुःखितो नरः ।
उच्चैः श्वसिति सन्नद्धो मत्तर्षभ इवानिशम् ॥ ५ ॥
प्रनष्टज्ञानविज्ञानस्तथा विभ्रान्तलोचनः ।
विवृताक्ष्याननो बद्धमूत्रवर्चा विशीर्णवाक् ॥ ६ ॥
दीनस्य श्वसितञ्चास्य दूराद्विज्ञायते भृशम् ।
महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते ॥ ७ ॥

*उद्धूयमानवातः=उद्=ऊर्ध्वं, धूयमानो=नीयमानो वातो यस्य सः। शब्दवत्=सशब्दं यथा स्यात्। कीदृक् स शब्दस्तद्बोधायतुमाह—मत्तर्षभ इव, उच्चैः श्वसितीत्यन्वयः। सन्नद्धः=आनद्धः, आनाहयुक्त इति यावत्। ज्ञानं=शास्त्रम्। विज्ञानं=तदर्थविनिश्चयः। विशीर्णवाक्=स्खलितवचनः। दीनः=म्लानः। मारकश्चायं-महाश्वासः॥ ५-७॥

अथोर्ध्वश्वासलक्षणमाह—

ऊद्र्ध्वं श्वसिति योऽत्यर्थं न च प्रत्याहरत्यधः।
श्लेष्मावृतमुखस्रोतः क्रुद्धगन्धवहार्दितः॥ ८॥
ऊद्र्ध्वदृष्टिर्विपश्यंस्तु विभ्रान्ताक्ष इतस्ततः।
प्रमुह्यन्वेदनाऽऽर्त्तश्च शुष्कास्योऽरतिपीडितः॥ ९॥
ऊद्र्ध्वश्वासे प्रकुपिते ह्यधः श्वासो निरुद्ध्यते।
मुह्यतस्ताम्यतश्चोद्र्ध्वं श्वासस्तस्य निहन्त्यसून्॥ १०॥

*सर्वेषु श्वासेषु ऊर्ध्वश्वासोऽत्र अत्यर्थमितिविशेषः। न च प्रत्याहरत्यधः=न श्वासमधः करोति। श्लेष्मावृतेत्यादि=श्लेष्मणाऽऽवृतं यन्मुखं स्रोतांसि च तैः क्रुद्धो यो गन्धवहस्तेनार्दितः। विपश्यन् इतस्ततो=विकृतं यथा स्यादेवं पश्यन्। अधःश्वासो निरुद्ध्यते=श्वासो नाधः प्रवर्त्तत इत्यर्थः। मुह्यतो=मोहं प्राप्नुवतः। ताम्यतो=ग्लानिं प्राप्नुवतश्च। ऊद्र्ध्वश्वासः, असून्=प्राणान्हन्ति॥८-१०॥

अथ छिन्नश्वासलक्षणमाह—

यस्तु श्वसिति विच्छिन्नं सर्वप्राणेन पीडितः।
न वा श्वसिति दुःखार्त्तो मर्मच्छेदरुजाऽर्दितः॥ ११॥
आनाहस्वेदमूर्च्छाऽऽर्त्तो दह्यमानेन वस्तिना।
विप्लुताक्षः परिक्षीणः श्वसन् रक्तैकलोचनः॥ १२॥
विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः।
छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून्॥ १३॥

*विच्छिन्नं=सविच्छेदम्, सर्वप्राणेन=सर्वबलेन। मर्मच्छेदरुजाऽर्दितः=हृदयशिरश्छेदवेदनयैव पीडितः। दह्यमानेन वस्तिनोपलक्षितः। विप्लुताक्षः=अश्रुपूर्णनेत्रः। विचेताः=उद्विग्नचित्तः।

छिन्नश्वासेन विच्छिन्नः, यस्तु श्वसिति="विच्छिन्नमि"त्यादिलक्षणयुक्तो यः स नरश्छिन्नश्वासेन विच्छिन्नः=पीडितो बोद्धव्यः। मारकश्चायं छिन्नश्वासः ॥ ११-१३ ॥

अथ तमकश्वासलक्षणमाह—

प्रतिलोमो यदा वायुः स्रोतांसि प्रतिपद्यते।
ग्रीवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य च ॥ १४ ॥
करोति पीनसं तेन कण्ठे घुर्घुरकं तथा।
अतीव तीव्रवेगश्च श्वासं प्राणप्रपीडकम् ॥ १५ ॥
प्रताम्यति स वेगेन तृष्यते सन्निरुध्यते।
प्रमोहं कासमानश्च स गच्छति मुहुर्मुहुः ॥ १६ ॥
श्लेष्मण्यमुच्यमाने तु भृशं भवति दुःखितः।
तस्यैव च विमोक्षान्ते मुहूर्त्तं लभते सुखम् ॥ १७ ॥
तथाऽस्योद्ध्वंसते कण्ठः कृच्छ्राच्छक्नोति भाषितुम्।
न चापि लभते निद्रां शयानः श्वासपीडितः ॥ १८ ॥
पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः।
आसीनो लभते सौख्यमुष्णञ्चैवाभिनन्दति ॥ १९ ॥
उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमर्त्तिमान्।
विशुष्कास्यो मुहुः श्वासी मुहुश्चैवावधम्यते ॥ २० ॥
मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते।
स याप्यस्तमकः श्वासः साध्यो वा स्यान्नवोत्थितः ॥२१॥

*संगृह्य व्यथया। समुदीर्य=वर्द्धयित्वा। पीनसं=नासास्रावम्। तेन=श्लेष्मणा। घुर्घुरं=घुर्घुरशब्दम्। प्राणप्रपीडकं=प्राणाधिष्ठानहृदयप्रपीडकम्। प्रताम्यति=तमसि प्रविशतीव। वेगेन=श्वासवेगेन, सन्निरुध्यते="निश्चेष्टो भवती"ति चरकः। "सन्निरुध्यते श्वास" इति जेज्झटः। श्लेष्मणा मुच्यमानेन सुखं=सुखमिव। उद्ध्वंसते=व्यथितो भवति। शयानः=शयननिहिताङ्गः। अवगृह्णाति=पीडयति। "उष्णञ्चैवाभिनन्दती" त्यनेन "तमको वातकफारब्ध—" इति बोद्धव्यः। उच्छ्रिताक्षोऽशूनाक्षः। ललाटेन स्विद्यतोपलक्षितः।

अवधम्यते=गजारूढस्येव सर्वगात्रं चाल्यते ॥ १४-२१ ॥

अथ प्रतमकश्वासलक्षणमाह—

ज्वरमूर्च्छापरीतश्च विद्यात्प्रतमकं तु तम् ॥ २२ ॥

*तमकस्यैव पित्तानुबन्धजनितज्वरादियोगेन प्रतमकसंज्ञामाह-ज्वरेति ॥ २२ ॥

अथ तस्यैवापरलक्षणमाह—

उदारवर्त्तरजोऽजीर्णक्लिन्नकायनिरोधजः ।
तमसा वर्द्धतेऽत्यर्थं शीतलैश्च प्रशाम्यति ॥
मज्जतस्तमसोवास्य विद्यात्प्रतमकन्तु तम् ॥ २३ ॥

*उदावर्त्तो=रोगविशेषः । रजो=धूलिः । अत्राजीर्णमामादि । क्लिन्नं=विदग्धम् । कायनिरोधः=अङ्गे वेगानां निरोधः, तस्मादुत्पन्नः, अथवा क्लिन्नकायो=वृद्धनरः, निरोधः=वेगानान्तु स त्रयोदशविधः ॥ २३ ॥

अथ क्षुद्रश्वासलक्षणमाह—

रूक्षायासोद्भवः कोष्ठे क्षुद्रो वात उदीरयन् ।
क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः ॥ २४ ॥
हिनस्ति न च गात्राणि न च दुःखो यथेतरे ।
न च भोजनपानानां निरुणद्धयुचितां गतिम् ॥ २५ ॥
नेन्द्रियाणां व्यथाञ्चापि काञ्चिदुत्पादयेद्रुजम् ।
स साध्य उक्तो।बलिनः सर्वे चाव्यक्तलक्षणाः ॥ २६ ॥

*क्षुद्रः=अल्पनिदानलिङ्गः । उदीरयन्=ऊर्ध्वं गच्छन् । दुःखः=दुःखप्रदः । इतरे=चत्वारः श्वासाः, तथा नायम् । सर्वे=महाश्वासादयोऽपि, अव्यक्तलक्षणाः सन्तः साध्याः ॥ २४-२६ ॥

अथ श्वासानां साध्यत्वादिकमाह—

क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते ।
त्रयः श्वासा न सिध्यन्ति तमको दुर्बलस्य च ॥ २७ ॥
कामं प्राणहरा रोगा बहवो न तु ते तथा ।
यथा श्वासश्च हिक्का च हरतः प्राणमाशु वै ॥ २८ ॥

*बहवो=ज्वरादयः । न तथा यथा श्वासहिक्के हरतो जीवमाशु ते ॥ २७-२८ ॥

अथ श्वासस्य चिकित्सामाह—

श्वासहिक्काऽऽतुरं प्रायः स्निग्धैः स्वेदैरुपाचरेत् ।
युक्तैर्लवणतैलाभ्यां तैरस्य ग्रथितः कफः ॥ २९ ॥
श्वासो विलयमायाति मारुतश्चोपशाम्यति ।
स्विन्नं ज्ञात्वा ततश्चैनं भोजयेच्च रसौदनम् ॥ ३० ॥
स्वरसं शृङ्गबेरस्य माक्षिकेण समन्वितम् ।
पाययेच्छ्वासकासघ्नं प्रतिश्यायकफापहम् ॥ ३१ ॥

*शृङ्गबेरम्=आर्द्रकम् ॥ ३१ ॥

प्रस्थं विभीतकानामस्थि विना साधयेदजामूत्रे ।
अयमवलेहो लीढो मधुसहितः श्वासकासघ्नः ॥ ३२ ॥
देवदारुबलामांसीः पिष्ट्वा वर्त्तिं प्रकल्पयेत् ।
तां घृताक्तां पिबेद्धूमं श्वासं हन्ति सुदारुणम् ॥ ३३ ॥
दशमूलीशटीरास्नापिप्पलीविश्वपौष्करैः ।
शृङ्गीतामलकीभार्गीगुडूचीनागराग्निभिः ॥ ३४ ॥
यवागूं विधिना सिद्धां कषायं वा पिबेन्नरः ।
श्वासहृद्ग्रहपार्श्वार्त्तिहिक्काकासप्रशान्तये ॥ ३५ ॥
दशमूलस्य वा क्वाथः पौष्करेणावचूर्णितः ।
श्वासकासप्रशमनः पार्श्वशूलनिवारणः ॥ ३६ ॥
रम्भाकुन्दशिरीषाणां कुसुमं पिप्पलीयुतम् ।
पिष्ट्वा तण्डुलतोयेन पीत्वा श्वासमपोहति ॥ ३७ ॥

शृङ्गीमहौषधकणाघनपौष्कराणां-
चूर्णं शटीमरिचयोश्च सिताविमिश्रम् ।
क्वाथेन पीतममृतावृषपञ्चमूल्याः
श्वासं त्र्यहेण विनिहन्ति हि घोररूपम् ॥ ३८ ॥

पञ्चमूली तु सामान्या पित्ते योज्या कनीयसी ।
महती मारुते देया सैव देया कफाधिके ॥ ३९ ॥
कुष्माण्डकशिफाचूर्णं पीतं कोष्णेन वारिणा ।
शीघ्रं शमयति श्वासं कासञ्चापि सुदारुणम् ॥ ४० ॥

हरिद्रां मरिचं द्राक्षां कणां रास्नां शटीं गुडम् ।
कटुतैलं लिहन्हन्याच्छ्वासान्प्राणहरानपि ॥ ४१ ॥

अथ भार्गीगुडमाह—

शतं संगृह्य भार्ग्यास्तु दशमूल्यास्तथा शतम् ।
शतं हरीतकीनाञ्च पचेत्तोये चतुर्गुणे ॥ ४२ ॥
पादावशेषे तस्मिंस्तु रसे वस्त्रनिपीडिते ।
आलोड्य च तुलां पूतां गुडस्य त्वभयास्ततः ॥ ४३ ॥
पुनः पचेत्तु मृद्वग्नौ यावल्लेहत्वमेति तत् ।
शीते च मधुनस्तत्र षट्पलानि विनिक्षिपेत ॥ ४४ ॥
त्रिकटु त्रिसुगन्धञ्च पलमात्रं पृथक् पृथक् ।
यवक्षारं कर्षयुग्मं संचूर्ण्य प्रक्षिपेत्ततः ॥ ४५ ॥
भक्षयेदभयामेकां लेहस्यार्द्धपलं तथा ।
श्वासं सुदारुणं हन्ति कासं पञ्चविधं तथा ॥ ४६
अर्शांस्यरोचकं गुल्मं शकृद्भेदं क्षयं तथा ।
स्वरवर्णप्रदो ह्येषजठराग्नेश्च दीपनः ॥
नाम्ना भार्गीगुडः ख्यातो भिषग्भिः सकलैर्मतः ॥ ४७ ॥

अथ महाकट्फलादियोगमाह—

अष्टाङ्गचूर्णसंयुक्तं छागक्षीरं प्रयोजयेत् ।
श्वासं कासान्वितं घोरं हन्यादेतन्न संशयः ॥ ४८ ॥

अथ दशमूलरसमाह—

दशमूलरसो देयः श्वासनिर्मूलशान्तये ।
अवश्यं मरणीयो यो जीवेद्वर्षशतं नरः ॥ ४९ ॥

अथ श्वासकुठाररसमाह—

रसो गन्धो विषञ्चापि टङ्कणञ्च मनःशिला ।
एतानि कर्षमात्राणि मरिचं चाष्टकर्षकम् ॥ ५० ॥
कटुत्रयं कर्षयुग्मं पृथगत्र विनिक्षिपेत् ।
रसः श्वासकुठारोऽयं सर्वश्वासनिवारणः ॥ ५१ ॥

इति त्रयोदशः श्वासाधिकारः समाप्तः ॥ १३ ॥

अथ चतुर्दशः स्वरभेदाधिकारः ॥ १४ ॥

तत्र स्वरभेदस्य निदानसम्प्राप्तिपूर्वकं लक्षणमाह—

अत्युच्चभाषणविषाध्ययनाभिघात-
सन्दूषणैः प्रकुपिताः पवनादयस्तु ।
स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां-
हन्युः स्वरं भवति चापि हि षड्विधः सः ॥ १ ॥

*अध्ययनम् = उच्चैर्वेदादिपाठः । अभिघातः = कण्ठादिदेशे लगुडादिभिः । "एतैरत्युच्चभाषणादिभिश्चतुर्भिः संदूषणैरन्यैरपि निजैर्दुष्टिहेतुभिः स्रोतःसु स्वरवहेषु चतुर्षु प्रतिष्ठां = स्थितिं गताः, स्वरं हन्युरि"ति लक्षणम् । स = स्वरभेदः, षड्विधः, वातपित्तकफसन्निपातक्षयमेदोभवभेदैः ॥ १ ॥

तत्र वातिकादिस्वरभेदिनो लक्षणमाह—

वातेन कृष्णनयनाननमूत्रवर्चा भिन्नं शनैर्वदति गर्दभवत्स्वरश्च ॥२॥

अथ पित्तजस्वरभेदिलक्षणमाह—

पित्तेन पीतनयनाननमूत्रवर्चा ब्रूयाद्गलेन स च दाहसमन्वितेन ॥३॥

*गलदाहो वचनसमय एव बोद्धव्यः ॥ ३ ॥

अथ कफजस्वरभेदिलक्षणमाह—

ब्रूयात्कफेन सततं कफरुद्धकण्ठः स्वल्पं शनैर्वदति चापि दिवा विशेषात् ४

*दिवा सूर्यरश्मिभिः कफस्याल्पीभावात् ॥ ४ ॥

अथ सन्निपातजस्वरभेदिलक्षणमाह—

सर्वात्मके भवति सर्वविकारसम्पत्तं चाप्यसाध्यमृषयः स्वरभेदमाहुः॥५॥

अथ क्षयजस्वरभेदिलक्षणमाह—

धूम्येत वाक्क्षयकृते क्षयमाप्नुयाच्च स्यादेव चापि हतवाक्परिवर्जनीयः ६

*वाग् धूम्येत = सधूमेव निःसरति । क्षयं वाऽऽप्नुयाद् वागेव॥६॥

अथ मेदोभवस्वरभेदिलक्षणमाह—

अन्तर्गलं स्वरमलक्ष्यपदं चिरेण मेदोऽन्वयाद्वदति दिग्धगलस्तृषाऽऽर्त्तः॥७॥

*अन्तर्गलं = गलस्य मध्य एव, स्वरं वदति । दिग्धगलः = मेदसा श्लेष्मणा च लिप्तगलः । ऽऽतृषार्त्तः = मेदोरुद्धस्रोतस्त्वात् ॥ ७ ॥

अथ स्वरभेदासाध्यलक्षणमाह—

क्षीणस्य वृद्धस्य कृशस्य चापि चिरोत्थितो यश्च सहोपजातः।
मेदस्विनः सर्वसमुद्भवश्च स्वरामयो नैव स सिद्धिमेति ॥ ८ ॥

*क्षीणस्य = क्षयरोगिणः। कृशस्य = अपुष्टस्य ॥ ८ ॥

अथ स्वरभेदचिकित्सामाह—

वातादिजनितश्वासकासघ्ना ये प्रकीर्त्तिताः।
योगास्तानत्र युञ्जीत यथादोषं चिकित्सकः॥
वाते सलवणं तैलं पित्ते सर्पिः समाक्षिकम्।
कफे सक्षारकटुकं क्षौद्रं कवल इष्यते॥
गले तालुनि जिह्वायां दन्तमूलेषु चाश्रितः।
तेन निष्कृष्यते श्लेष्मा स्वरश्चाशु प्रसीदति॥
आद्ये कोष्णं जलं पेयं भुक्त्वा घृतरसौदनम्।
क्षीराम्बुपानं पित्तोत्थे पिबेत्सर्पिरतन्द्रितः ॥ ९ ॥
पिप्पली पिप्पलीमूलं मरिचं विश्वभेषजम्।
पिबेन्मूत्रेण मतिमान्कफजे स्वरसंक्षये ॥ १० ॥

अथ निदिग्धिकाऽवलेहमाह—

निदग्धिकातुला ग्राह्या तदर्द्धं ग्रन्थिकस्य तु।
तदर्द्धं चित्रकस्यापि दशमूलञ्च तत्समम् ॥ ११ ॥
जलद्रोणद्वये क्वाथ्यं गृह्णीयादाढकं ततः।
पूते क्षिपेत्तदर्द्धन्तु पुराणस्य गुडस्य च ॥ १२ ॥
सर्वमेकत्र कृत्वा तु लेहवत्साधु साधयेत्।
अष्टौ पलानि पिप्पल्यास्त्रिजातकपलं तथा ॥ १३ ॥
मरिचस्य पलं चैकं सर्वमेकत्र चूर्णितम्।
मधुनः कुडवं दत्वा तदश्नीयाद्यथाऽनलम् ॥ १४ ॥
निदिग्धिकाऽवलेहोऽयं भिषग्भिर्मुनिभिर्मतः।
स्वरभेदहरो मुख्यः प्रतिश्यायहरस्तथा ॥ १५ ॥
कासश्वासाग्निमान्द्यादीन्गुल्ममेहगलामयान्।
आनाहमूत्रकृच्छ्राणि हन्याद् ग्रन्थ्यर्बुदानि च ॥ १६ ॥

अथ मृगनाभ्याद्यवलेहमाह—

मृगनाभिः ससूक्ष्मैला लवङ्गकुसुमानि च ।
त्वक्क्षीरी चेति लेहोऽयं मधुसर्पिःसमायुतः ।
वाक्स्तम्भमुग्रं जयति स्वरभ्रंशसमन्वितम् ॥ १७ ॥

अथ ब्राह्म्याद्यवलेहमाह—

ब्राह्मी वचाऽभयावासा पिप्पली मधुसंयुता ।
अस्य प्रयोगात्सप्ताहात्किन्नरैः सह गीयते ॥ १८ ॥

इति चतुर्दशः स्वरभेदाधिकारः समाप्तः ॥ १४ ॥

अथ पञ्चदशोऽरोचकाधिकारः ॥ १५ ॥

तत्र सनिदानवातारोचकलक्षणमाह—

वातादिभिः शोकभयातिलोभक्रोधैर्मनोघ्नाशनरूपगन्धैः ।
अरोचकाः स्युः परिहृष्टदन्तः कषायवक्त्रश्च मतोऽनिलेन ॥ १ ॥

*अरोचकाः=न भोजने रुचिमुत्पादयन्तीत्यरोचका व्याधयः पञ्च वातादिभेदैः । तत्र वातिकस्य लक्षणमाह—परिहृष्टदन्तः=अम्लभक्षणेनेव परिहृष्टो दन्तो यस्य सः । तथा कषायवक्त्रः=कषायरसं वक्त्रं यस्य सः ॥ १ ॥

अथ पित्तजकफजारुचिलक्षणमाह—

कट्वम्लमुष्णं विरसञ्च पूति पित्तेन विद्याल्लवणञ्च वक्त्रम् ।
माधुर्यपैच्छिल्यगुरुत्वशैत्यस्निग्धत्वदौर्गन्ध्ययुतं कफेन ॥ २ ॥

*"कट्वम्लमि"त्यादिना "विद्यादि"त्यन्तेन पैत्तिकस्य लक्षणमाहुः । श्लैष्मिकमाह—यतो विदग्धश्लेष्मास्यं लवणभावमुपैति लवणं च वक्त्रम् । तथा पैच्छिल्यं मुखस्याभ्यन्तरे । स्निग्धत्वं बहिः ॥ २ ॥

अथागन्तुजत्रिदोषजारुचिलक्षणमाह—

अरोचके शोकभयातिलोभक्रोधाद्यहृद्याशुचिगन्धजे स्यात् ।
स्वाभाविकञ्चास्यमथारुचिश्च त्रिदोषजे नैकरसं भवेच्च ॥ ३ ॥

*आगन्तुजमाह—अरोचक इति "क्रोधादी"त्यादिशब्देनाहृद्ययोरनशनरूपयोर्ग्रहणम् । स्वाभाविकञ्च=अविकृतरसम् । त्रिदोषज-

माह—नैकरसम्=अनेकरसमास्यं स्यात् ॥ ३ ॥

अथ वातजाद्यरोचकविशेषलक्षणमाह—

हृच्छूलपीडनयुतं पवनेन पित्ता-
त्तृड्दाहचोषबहुलं सकफप्रसेकम् ।
श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्याद्-
वैगुण्यमोहजडताभिरथापरञ्च ॥ ४ ॥

*वातजादिभेदेन मुखे विकृतिमभिधायान्यथा विकृतिमाह— हृच्छूलेति । हृच्छूलपीडनयुतं=हृदि शूलेन पीडनं तेन युतम् । चोषः=पार्श्वस्थिताग्निनेव सन्तापः । बहुभिः=त्रिभिर्दोषैः । बहुरुजम्=उक्तवातादिरोगयुक्तम् । वैगुण्यं=मनसो व्याकुलत्वम् । जडता=शून्यता । अपरम्=आगन्तुजम् ॥ ४ ॥

अथारोचकसामान्यलक्षणमाह—

प्रक्षिप्तन्तु मुखे चान्नं यत्र नास्वाद्यते नरः ।
अरोचकः स विज्ञेयो भक्तद्वेषमतः शृणु ॥ ५ ॥

*भक्तद्वेषाभक्तच्छन्दौ चरकसुश्रुताभ्यामरोचकत्वेनैव संगृहीतौ। वृद्धभोजस्तेषां लक्षणानि पृथगाह—प्रक्षिप्तमिति । नास्वाद्यते=अन्नस्य मिष्टतां न प्राप्नोति । तदन्नं मिष्टं न लगतीति यावत् ॥ ५ ॥

अथ भक्तद्वेषाभक्तच्छन्दयोर्लक्षणमाह—

चिन्तयित्वा तु मनसा दृष्ट्वा स्पृष्ट्वा तु भोजनम् ।
द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते ॥ ६ ॥
कुपितस्य भयार्त्तस्य तथा भक्तविरोधिनः ।
यत्र नान्ने भवेच्छ्रद्धा सोऽभक्तच्छन्द उच्यते ॥ ७ ॥

अथारोचकचिकित्सामाह—

भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम् ।
रोचनं दीपनं वह्नेर्जिह्वाकण्ठविशोधनम् ॥ ८ ॥
शृङ्गबेररसं वाऽपि मधुना सह योजयेत् ।
अरुचिश्वासकासघ्नं प्रतिश्यायकफापहम् ॥ ९ ॥

अथाम्लीकापानकमाह—

पक्वाम्लीका सिता शीतवारिणा वस्त्रगालिता ।
एलालवङ्गकर्पूरमरिचैरवधूलिता ॥ १० ॥
पानकस्यास्य गण्डूषं धारयित्वा मुखे मुहुः ।
अरुचिं नाशयत्येव पित्तं प्रशमयेत्तथा ॥ ११ ॥

अथ तक्रमाह—

राजिकाजीरकौ भृष्टौ भृष्टं हिङ्गु सनागरम् ।
सैन्धवं दधि गोः सर्वं वस्त्रपूतं प्रकल्पयेत् ॥ १२ ॥
तावन्मात्रं क्षिपेत्तत्र यथा स्याद्रुचिरुत्तमा ।
तक्रमेतद्भवेत्सद्यो रोचनं वह्निवर्द्धनम् ॥ १३ ॥

*तक्रं=गव्यम् ॥ १३ ॥

अथ शिखरिणीमाह—

सम्यगावर्त्तितं दुग्धं निबद्धं दधि माहिषम् ।
एकीकृत्य पटे घृष्टं शुभ्रशर्करया समम् ॥ १४ ॥
एलालवङ्गकर्पूरमरिचैश्च समन्वितम् ।
नाम्ना शिखरिणी कुर्याद्रुचिं सकलवल्लभाम् ॥ १५ ॥

अथ दाडिमादिचूर्णमाह—

द्वे पले दाडिमाम्लस्य खण्डं दद्यात्पलत्रयम् ।
त्रिसुगन्धि पलं चैकं चूर्णमेकत्र कारयेत् ॥ १६ ॥
तच्चूर्णं मात्रया भुक्तमरोचकहरं परम् ।
दीपनं पाचनं च स्यात्पीनसज्वरकासजित् ॥ १७ ॥

अथ लवङ्गादिचूर्णमाह—

लवङ्गकङ्कोलमुशीरचन्दनं नतं सनीलोत्पलकृष्णजीरकम् ।
जलं सकृष्णागुरुभृङ्गकेसरं कणा च विश्वा नलदं सहैलया ॥१८॥
तुषारजातीफलवंशरोचनाः सिताऽर्द्धभागाः सकलं विचूर्णितम् ।
सुरोचनं तर्पणमग्निदीपनं बलप्रदं वश्यतमं त्रिदोषजित् ॥ १९ ॥
उरोविबन्धं तमकं गलग्रहं सकासहिक्काऽरुचियक्ष्मपीनसम् ।
ग्रहण्यतीसारमुरःक्षतं नृणां तथा प्रमेहान्निखिलान्निहन्ति च ॥२०॥

*कङ्कोलं=सुगन्धविशेषः । नतं=तगरम् । जलं=वालकम् ।

भृङ्गं=त्वक् । नलदम्=उशीरम् । तुषारः=कर्पूरः ॥ १८-२० ॥

अथ यवानीखाण्डवचूर्णमाह—

यवानी दाडिमं शुण्ठी तिन्तिडीकाम्लवेतसैः ।
बदराम्लश्च कुर्वीत चतुःशाणमितानि च ।
सार्द्धं द्विशाणं मरिचं पिप्पली दशशाणिका ॥ २१ ॥
त्वक्सौवर्चलधान्याकजीरकं द्विद्विशाणिकम् ।
चतुःषष्टिमितैः शाणैः शर्करामत्र योजयेत् ॥ २२ ॥
चूर्णितं सर्वमेकत्र यवानीखाण्डवाभिधम् ।
चूर्णं जयेत्पाण्डुरोगं हृद्रोगं ग्रहणीज्वरम् ॥ २३ ॥
छर्दिशोषातिसारांश्च प्लीहानाहविबद्धताम् ।
अरुचिं शूलमन्दाग्निमर्शोजिह्वागलामयान् ॥ २४ ॥

इति पञ्चदशोऽरोचकाधिकारः समाप्तः ॥ १५ ॥

अथ षोडशश्छर्द्यधिकारः ॥ १६ ॥

तत्र छर्देर्विप्रकृष्टसन्निकृष्टनिदानपूर्विका सम्प्राप्तिमाह—

अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि ।
अकाले चातिमात्रैश्च तथाऽसात्म्यैश्च भोजनैः ॥ १ ॥
आमाद्भयात्तथोद्वेगादजीर्णात्क्रिमिदोषतः ।
नार्याश्चापन्नसत्त्वायास्तथाऽतिद्रुतमश्नतः ।
बीभत्सैर्हेतुभिश्चान्यैर्भुक्तमुत्क्लिश्यते बलात् ॥ २ ॥

*आमाद्=असम्यक् पक्काद् रसात् । अजीर्णाद्=यथास्थिताद् भुक्तात् । आपन्नसत्त्वायाः=प्राप्तगर्भायाः । अन्यैर्बीभत्सैर्विकृतैर्हेतुभिर्घृणाकारिभिः=अनिष्टश्रवणस्पर्शनदर्शनभक्षणपानैः, उत्क्लिश्यते ॥२॥

दुष्टैर्दोषैः पृथक्सर्वैर्बीभत्सालोकनादिभिः ।
छर्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते ॥ ३ ॥

अथ छर्देः पूर्वरूपमाह—

हृल्लासोद्गारसंरोधौ प्रसेको लवणास्यता ।
द्वेषोऽन्नपाने च भृशं वमीनां पूर्वलक्षणम् ॥ ४ ॥

अथ छर्दः सामान्यलक्षणमाह—

छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः ।
निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावितः ॥ ५ ॥

*छादयन्=पूरयन् । अङ्गभञ्जनैः=अङ्गभेदैः । अर्दयन्=अङ्गानि पीडयन् । वक्त्रं प्रधावितो दोषश्छर्दिरित्युच्यते ॥ ५ ॥

अथ वातजच्छर्दिलक्षणमाह—

हृत्पार्श्वपीडामुखशोषशीर्षनाभ्यर्त्तिकासस्वरभेदतोदैः ।
उद्गारशब्दप्रबलं सफेनं विच्छिन्नकृष्णं तनुकं कषायम् ॥६॥
कृच्छ्रेण चाल्पं महता च वेगेनार्त्तोऽनिलाच्छर्दयतीव दुःखम् ॥७॥

*कषायं कषायरसम् । दुःखमिव छर्दयति ॥ ६-७ ॥

अथ पित्तजच्छर्दिलक्षणमाह—

मूर्च्छापिपासामुखशोषमूर्द्धताल्वक्षिसन्तापतमोभ्रमार्त्तः ।
पीतं भृशोष्णं हरितञ्च तिक्तं धूम्रञ्च पित्तेन वमेत्सदाहम् ॥ ८ ॥

अथ कफजच्छर्दिलक्षणमाह—

तन्द्राऽऽस्यमाधुर्यकफप्रसेकसन्तोषनिद्राऽरुचिगौरवार्त्तः ।
स्निग्धं घनं स्वादु कफाद्धि शुक्लं सलोमहर्षोऽल्परुजं वमेत्तु ॥९॥

*सन्तोषः=तृप्तिः ॥ ९ ॥

अथ त्रिदोषजच्छर्दिलक्षणमाह—

शूलाविपाकारुचिदाहतृष्णाश्वासप्रमोहप्रबला प्रसक्ता ।
छर्दिस्त्रिदोषाल्लवणाम्लनीलसान्द्रोष्णरक्तं वमतां नृणां स्यात्॥१०॥

अथागन्तुजच्छर्दिलक्षणमाह—

असात्म्यजा च क्रिमिजाऽऽमजा च बीभत्सजा दौर्हृदजा च या हि ।
सा पञ्चमी ताञ्च विभावयेच्च दोषोच्छ्रयेणैव यथोक्तमादौ ॥ ११ ॥

*एताः पञ्चाप्यागन्तुजत्वेन साम्यादेकैव । अत एव सा=आगन्तुजा पञ्चमी । विभावयेद्=अनुबन्धयेत् ॥ ११ ॥

अथ कृमिजच्छर्दलक्षणमाह—

शूलहृल्लासबहुला कृमिजा च विशेषतः ।
क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षिता ॥ १२ ॥

अथ छर्देरुपद्रवानाह—

कासः श्वासो ज्वरस्तृष्णाहिक्कावैचित्त्यमेव च ।
हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्देरुपद्रवाः ॥ १३ ॥

*वैचित्त्यं=विकृतचित्तत्वम् । तमकोऽत्र तमः, श्वासपदेनैव तमकाख्यस्यापि श्वासस्योक्तेः ॥ १३ ॥

अथ छर्देरसाध्यतां साध्यतां चाह—

क्षीणस्य या छर्दिरतिप्रसक्ता सोपद्रवा शोणितपूययुक्ता ।
सचन्द्रिकां तां प्रवदन्त्यसाध्यां साध्यां चिकित्सेन्निरुपद्रवां च ॥१४॥

*सचन्द्रिकां=मयूरपिच्छचन्द्रिकाप्रभायुक्ताम् ॥ १४ ॥

अथ छर्देश्चिकित्सामाह—

आमाशयोत्क्लेशभवा हि सर्वाश्छर्द्यो मता लङ्घनमेव तस्मात् ।
विधीयते मारुतजां विना तु संशोधनं वा कफपित्तहारि ॥ १५ ॥

हन्यात्क्षीरोदकं पीतं छर्दिं पवनसम्भवाम् ।
मुद्गामलकयूषो वा ससर्पिष्कः ससैन्धवः ॥ १६ ॥

*क्षीरोदकं=नाशितस्य क्षीरस्योदकम् ॥ १६ ॥

गुडूचीत्रिफलानिम्बपटोलैः क्वथितं जलम् ।
पिबेन्मधुयुतं तेन छर्दिर्नश्यति पित्तजा ॥ १७ ॥
हरीतकीनां चूर्णन्तु लिह्यान्माक्षिकसंयुतम् ।
अधोमार्गीकृते दोषे छर्दिः शीघ्रं निवर्त्तते ॥ १८ ॥
विडङ्गत्रिफलाविश्वाचूर्णं मधुयुतं जयेत् ।
विडङ्गप्लवशुण्ठीनां चूर्णं वा कफजां वमिम् ॥ १९ ॥

*प्लवः=कैवर्त्तमुस्तकं "गुडतजी" इति लोके ॥ १९ ॥

पिष्ट्वा धात्रीफलं लाजाञ्छर्कराञ्च पलोन्मिताम् ।
दत्वा मधुपलञ्चापि कुडवं सलिलस्य च ।
वाससा गालितं पीतं हन्ति च्छर्दिं त्रिदोषजाम् ॥ २० ॥
गुडूच्या रचितं हन्ति हिमं मधुसमन्वितम् ।
दुर्निवारामपि च्छर्दिं त्रिदोषजनितां बलात् ॥ २१ ॥

अथैलाऽऽदिचूर्णमाह—

एलालवङ्गगजकेशरकोलमज्जा-
लाजाप्रियङ्गुघनचन्दनपिप्पलीनाम् ।
चूर्णानि माक्षिकसितासहितानि लीढ्वा
छर्दिं निहन्ति कफमारुतपित्तजाताम् ॥ २२ ॥
अश्वत्थवल्कलं शुष्कं दग्धं निर्वापितं जले ।
तज्जलं पानमात्रेण छर्दिं जयति दुर्जयाम् ॥ २३ ॥
पथ्यात्रिकटुधान्याकजीरकाणां रजो लिहन् ।
मधुना नाशयेच्छर्दिमरुचिञ्च त्रिदोषजाम् ॥ २४ ॥
बिल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण संयुतः ।
छर्दिं त्रिदोषजां हन्ति पर्पटः पित्तजां तथा ॥ २५ ॥
आम्रास्थिबिल्वनिर्यूहः पीतः समधुशर्करः ।
निहन्याच्छर्द्यतीसारं वैश्वानर इवाहुतिम् ॥ २६ ॥

*निर्यूहः=क्वाथः ॥ २६ ॥

जम्ब्वाम्रपल्लवशृतं लाजरजःसंयुतं शीतम् ।
शमयति मधुना युक्तं वमिमतिसारं तृषामुग्राम् ॥ २७ ॥
बीभत्सजां हृद्यतमैरिष्टैर्दौर्हृदजां फलैः ।
लङ्घनैरामजां छर्दिं जयेत्सात्म्यैरसात्म्यजाम् ॥ २८ ॥
कृमिहृद्रोगवद्धन्याच्छर्दिं कृमिसमुद्भवाम् ।
तत्र तत्र यथादोषं क्रियां कुर्याच्चिकित्सकः ॥ २९ ॥
सोद्गारायां भृशं छर्द्यां मूर्वाया धान्यमुस्तयोः
समधु काञ्चनं चूर्णं लेहयेन्मधुसंयुतम् ॥ ३० ॥
सौवर्चलमजाजी च शर्करा मरिचानि च ।
क्षौद्रेण सहितं लीढं सद्यश्छर्दिनिवारणम् ॥ ३१ ॥

इति षोडशश्छर्द्यधिकारः संपूर्णः ॥ १६ ॥

अथ सप्तदशस्तृष्णाऽधिकारः ॥ १७ ॥

तत्र तृष्णाया निदानपूर्विकां सम्प्राप्तिमाह—

भयश्रमाभ्यां बलसंक्षयाद्वाऽप्यूर्ध्वं चितं पित्तविवर्द्धनैश्च ।
पित्तं सवातं कुपितं नराणां तालुप्रपन्नं जनयेत्पिपासाम् ॥ १ ॥
स्रोतःस्वपां वाहिषु दूषितेषु दोषैश्च तृट् सम्भवतीह जन्तोः ।
तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथाऽन्याऽऽमसमुद्भवा च ।
भक्तोद्भवा सप्तमिकेति तासां निबोध लिङ्गान्यनुपूर्वशस्तु ॥ २ ॥

*नराणां पित्तं स्वस्थान एव संचितं पित्तं, सवातम् पित्तविवर्द्धनैः कट्वम्लोष्णादिभिः कुपितस्पित्तं, भयश्रमाभ्यां बलसंक्षयादुपवासादेश्च वातः कुपितस्तद्द्वयमूर्ध्वं प्राप्तम्, ऊर्ध्वं प्रसरत्पिपासां जनयेत् । न केवलं तालुन्येव दूषिते तृषा भवति किन्तु जलवाहिस्रोतःस्वपि ।अत आह—"स्रोतःस्वि"त्यादि । ननु-अत्र बहुवचनं न युक्तं, यतो-जलवहे द्वे स्रोतसी सुश्रुतेनोक्ते । उच्यते—तयोरेवानेकप्रतानयोगान्न दोषः । अपां वाहिषु स्रोतःस्विति । जिह्वाऽऽदेरप्युपलक्षणम् । यत आह चरकः—

*रसवाहिनीश्च धमनीर्जिह्वाहृदयगलतालुक्लोम्नः ।
संशोष्य नृणां देहे कुरुतस्तृष्णामतिबलां तौ ॥ १ ॥

*ताविति । पित्तानिलाविति ॥ १ ॥
*संख्यामाह—तिस्र इत्यादि ॥ १-२ ॥

अथ तृष्णायाः सामान्यलक्षणमाह--

ताल्वोष्ठकण्ठास्यविशोषदाहाः सन्तापमोहभ्रमविप्रलापाः ।
सर्वाणि रूपाणि भवन्ति तस्यामुत्पत्तिकाले तु विशेषतो हि ॥ ३ ॥

अथ वातजतृषालक्षणमाह—

क्षामास्यता मारुतसम्भवायां तोदस्तथा शङ्खशिरःसु चापि ।
स्रोतोनिरोधो विरसश्च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति ॥ ४ ॥
*शङ्खशिरःसु=शङ्खयोः शिरसि च, तोदः । स्रोतोनिरोधः=रसाम्बुवाहिनीधमनीनिरोधः ॥ ४ ॥

अथ पित्तजतृषालक्षणमाह--

मूर्च्छाऽन्नविद्वेषविलापदाहा रक्तेक्षणत्वं प्रततश्च शोषः ।
शीताभिनन्दा मुखतिक्तता च पित्तात्मिकायां परिधूपनञ्च ॥ ५ ॥

*विलापः=प्रलापः । प्रततश्च शोषः=अविरतः शोषः । शीता-भिनन्दा=शीतेच्छा । परिधूपनं=कण्ठाद्धूमनिर्गम इव ॥ ५ ॥

अथ कफजतृषालक्षणमाह--

वाष्पावरोधात् कफसंवृतेऽग्नौ तृष्णा बलासेन भवेन्नरस्य ।
निद्रा गुरुत्वं मधुरास्यता च तयाऽर्दितः शुष्यति चातिमात्रम् ॥ ६ ॥

*अग्नौ=जठराग्नौ । कफसंवृते=स्वकारणकुपितेन कफेनोपरि-ष्टाच्छादिते । वाष्पावरोधाद् =अग्नेरूष्मावरोधाद्, अवरुद्धानलोष्म-णाऽम्बुवहस्रोतःशोषणाद् । बलासेन=कफेन । नरस्य तृड्भवेत् । तया=तृष्णया । अर्दितः=पीडितः । शुष्यति=कृशो भवति ॥ ६ ॥

अथ क्षतजतृषालक्षणमाह--

क्षतस्य रुक्छोणितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु ॥७॥

*क्षतस्य=शस्त्रादिक्षतयुक्तस्य । रुक्=पीडा ॥ ७ ॥

अथ क्षयजतृषालक्षणमाह—

रसक्षयाद्या क्षयसम्भवा सा तयाऽभिभूतस्तु निशादिनेषु ।
पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः ॥
रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग्व्यवस्येत् ॥ ८ ॥

*रसक्षयलक्षणानि सुश्रुतेनोक्तानि "रसक्षये हृत्पीडा कम्पः-शोषः शून्यता तृष्णा चे"ति । व्यवस्येद्=जानीयात् ॥ ८ ॥

अथामोत्पन्नतृषालक्षणमाह—

त्रिदोषलिङ्गाऽऽमसमुद्भवा च हृच्छूलनिष्ठीवनसादकर्त्री ॥ ९ ॥

अथभुक्तोद्भवतृषालक्षणमाह—

स्निग्धं तथाऽम्लं लवणञ्च भुक्तं गुर्वन्नमेवाशु तृषां करोति ॥ १० ॥

*लवणञ्चेति । चकारात्कटु च ॥ १० ॥

अथोपसर्गजतृषालक्षणमाह—

दीनस्वरः प्रताम्यन्दीनाननहृदयशुष्कगलतालुः ।
भवति खलु सोपसर्गा तृष्णा सा शोषिणी कष्टा ॥ ११ ॥

*शोषिणी = धातुशोषिणी ॥ ११ ॥

अथोपद्रवयुक्ततृषाऽरिष्टमाह—

ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहानाम् ।
सर्वास्त्वतिप्रसक्ता रोगकृशानां वमिप्रसक्तानाम् ।
घोरोपद्रवयुक्तास्तृष्णा मरणाय विज्ञेयाः ॥ १२ ॥

*आदिशब्दादतीसारादीनां ग्रहणम् । अतिप्रसक्ताः = नितरां-घोरोपद्रवयुक्ताः, अतीव मुखशोषादि युक्ताः ॥ ॥ १२ ॥

अथ तृषाचिकित्सामाह—

वातघ्नमन्नपानं मृदु लघु शीतञ्च वाततृष्णायाम् ॥ १३ ॥
तृष्णायां पवनोत्थायां सगुडं दधि शस्यते ।
स्वादु तिक्तं द्रवं शीतं पित्ततृष्णाऽपहं परम् ॥ १४ ॥

अथ षडङ्गपानमाह—

मुस्तपर्पटकोदीच्यच्छत्राऽऽख्योशीरचन्दनैः ।
शृतं शीतं जलं दद्यात्तृड्दाहज्वरशान्तये ॥ १५ ॥

*छत्रा = धान्यकं, कश्चिद्धात्रीञ्च दद्यात । चन्दनमत्र धवलं तस्या-ततृष्णाहरत्वात् । शृतमर्द्धपक्वमत्र कर्त्तव्यम् । इति षडङ्गपानम् ॥१५॥

लाजोदकं मधुयुतं शीतं गुडविमर्दितम् ।
काश्मरीशर्करायुक्तं पिबेत्तृष्णाऽर्दितो नरः ॥ १६ ॥
आस्तरणमार्द्रवासः प्रावरणं चार्द्रवासः स्यात् ।
तेन पिपासा शाम्यति दाहश्चोग्रोऽपि देहिनां नियतम् ॥ १७ ॥
गोस्तनीक्षुरसक्षीरयष्टीमधुमधूत्पलैः ।
नियतं नासिकापीते तृष्णा शाम्यति दारुणा ॥ १८ ॥
वैशद्यं जनयत्यास्ये सन्दधाति मुखे जलम् ।
तृष्णादाहप्रशमनं मधुगण्डूषधारणम् ॥ १९ ॥
जिह्वातालुगलक्लोमशोषे मूर्ध्नि निधापयेत् ।
केशरं मातुलुङ्गस्य घृतसैन्धवसंयुतम् ॥ २० ॥
दाडिमं बदरं लोध्रं कपित्थं बीजपूरकम् ।
पिष्ट्वा मूर्द्धनि लेपस्तु पिपासादाहनाशनः ॥ २१ ॥

वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम् ।
पाययेद्वामयेच्चाथ तेन तृष्णा प्रशाम्यति ॥ २२ ॥
प्रातः शर्करयोपेतः क्वाथो धान्याकसम्भवः ।
जयेत्तृष्णां तथा दाहं भवेत्स्रोतोविशोधनम् ॥ २३ ॥
आमलं कमलं कुष्ठं लाजाश्च वटरोहकम् ।
एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे ॥
तृष्णां प्रवृद्धां हन्त्येषा मुखशोषञ्च दारुणम् ॥ २४ ॥
क्षतोद्भवां रुग्विनिवारणेन जयेद्रसानामसृजश्च पानैः ।
क्षयोत्थितां क्षीरजलं निहन्यान्मांसोदकं वा मधुरोदकं वा ॥२५॥
आमोद्भवां बिल्ववचायुतानां जयेत्कषायैरथ दीपनानाम् ।
गुर्वन्नजामुल्लिखनैर्जयेच्च क्षयं विना सर्वकृताञ्च तृष्णाम् ॥ २६ ॥
*उल्लिखनैः = लेखनद्रव्यैः ॥ २६ ॥
स्निग्धेऽन्ने भुक्ते या तृष्णा स्यात्तां गुडाम्बुना शमयेत् ।
अतिरोगदुर्बलानां तृष्णां शमयेन्नृणामिहाशु पयः ॥ २७ ॥
*पयोऽत्र दुग्धम् ॥ २७ ॥

मूर्च्छाछर्दितृषाऽऽनाहस्त्रीमद्यभृशकर्षिताः ।
पिबेयुः शीतलं तोयं रक्तपित्ते मदात्यये ॥ २८ ॥
सात्म्यान्नपानभैषज्यैस्तृष्णां तस्य जयेत्पुनः ।
तस्यां जितायामन्योऽपि व्याधिः शक्यश्चिकित्सितुम् ॥ २९ ॥
तृष्यन् पूर्वामयक्षीणो न लभेत जलं यदि ।
मरणं दीर्घरोगं वा प्राप्नुयात्त्वरितं नरः ॥ ३० ॥
तृषितो मोहमायाति मोहात्प्राणान्विमुञ्चति ।
तस्मात्सर्वास्ववस्थासु न क्वचिद्वारि वारयेत् ॥ ३१ ॥
अन्नेनापि विना जन्तुः प्राणान्धारयते चिरम् ।
तोयाभावात्पिपासाऽऽर्त्तः क्षणात्प्राणैर्विमुच्यते ॥ ३२ ॥

इति सप्तदशस्तृष्णाऽधिकारः समाप्तः ॥ १७ ॥

अथाष्टादशो मूर्च्छाभ्रमनिद्रातन्द्रासंन्यासाधिकारः॥१८॥

तत्र मूर्च्छायां निदानपूर्विकां सम्प्राप्तिमाह—

क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः ।
वेगाघातादभीघाताद्धीनसत्त्वस्य वा पुनः ॥ १ ॥
करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च ।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः ॥ २ ॥

*बहुदोषस्य=अधिकदोषस्य, न त्वनेकदोषस्य। तदा मूर्च्छा त्रिदोषजैव स्यात, तथैवास्तु को दोषः? तत्र पृथग् दोषजानां मूर्च्छानां वक्ष्यमाणत्वात्। वेगाघाताद् मलादेः। अभीघाताद् लगुडादिना। हीनसत्त्वस्य=स्वल्पसत्त्वगुणस्य, अर्थादधिकतमोगुणस्य। यत उक्तम्—"मूर्च्छा पित्ततमःप्राये"ति। करणायतनेषु=करणं मनस्तस्यायतनेषु=स्वस्थानेषु, बाह्येषु=कर्मेन्द्रियेषु, आभ्यन्तरेषु=बुद्धीन्द्रियेषु ॥ १-२ ॥

अथ मूर्च्छासामान्यलक्षणमाह—

संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः ।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥ ३ ॥
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत् ।
मोहो मूर्च्छेति तामाहुः षड्विधा सा प्रकीर्त्तिता ॥ ४ ॥

*तमो=गुणोऽज्ञानहेतुः। अभ्युपैति=आगच्छति। सुखदुःखव्यपोहकृत्=सुखदुःखज्ञाननाशकरम्। नष्टे सुखदुःखज्ञाने नरः काष्ठवत्पतति तां मोहो मूर्च्छेति प्राहुरित्यन्वयः। मूर्च्छाया मूर्च्छायोऽपि पर्यायः। यत उक्तम्—

*संज्ञोपघातो मूर्च्छायो मूर्च्छा स्यान्मूर्च्छनं तथा।
कश्मलं प्रलयो मोहः संन्यासस्तु मृतोपमः ॥ १ ॥ इति ॥ ३-४ ॥

अथ मूर्च्छायाः षड्विधत्वमाह—

वातादिभिः शोणितेन मद्येन च विषेण च ।
षट्स्वप्येतासु पित्तन्तु प्रभुत्वेनावतिष्ठते ॥ ५ ॥

*यत उक्तम्-"मूर्च्छा पित्ततमःप्राये"ति ॥ ५ ॥

अथ मूर्च्छापूर्वरूपमाह—

हृत्पीडा जृम्भणं ग्लानिः संज्ञानाशो बलक्षयः ।
सर्वासां पूर्वरूपाणि यथास्वं तां विभावयेत् ॥ ७ ॥

अथ वातजमूर्च्छालक्षणमाह—

नीलं वा यदिवा कृष्णमाकाशमथ वाऽरुणम् ।
पश्यंस्तमः प्रविशति शीघ्रञ्च प्रतिबुध्यते ॥ ७ ॥
वेपथुश्चाङ्गमर्दश्च प्रपीडा हृदयस्य च ।
कार्श्यं श्यावारुणा च्छाया मूर्च्छाये वातसम्भवे ॥ ८ ॥

*नीलं=नीलवर्णम् । कृष्णं=कज्जलाभम् । अरुणम्=अलक्तरागम् । तमः प्रविशति=मूर्च्छति । श्यावारुणा च्छाया गात्रस्य ॥७-८॥

अथ पित्तजमूर्च्छालक्षणमाह—

रक्तं हरितवर्णं वा वियत्पीतमथापि वा ।
पश्यंस्तमः प्रविशति सस्वेदः प्रतिबुध्यते ॥ १९ ॥
सपिपासः ससन्तापो रक्तपीताकुलेक्षणः ।
सम्भिन्नवर्चाः पीताभो मूर्च्छाये पित्तसम्भवे ॥ १० ॥

अथ कफजमूर्च्छालक्षणमाह—

मेघसङ्काशमाकाशं तमोभिर्वा घनैर्वृतम् ।
पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते ॥ ११ ॥
गुरुभिः प्रावृतैरङ्गैर्यथैवार्द्रेण चर्मणा ॥
सप्रसेकः सहृल्लासो मूर्च्छाये कफसम्भवे ॥ १२ ॥

*मेघसंकाशं=शुभ्रमेघसंकाशमित्यर्थः ॥ यत आह सुश्रुतः-
*"कफेन पश्येद्रूपाणि श्वेताभ्रप्रतिमानि तु" । इति ।
*घनैर्निबिडैस्तमोभिः । गुरुभिरङ्गैरुपलक्षितः ॥ ११-१२ ॥

अथ चरकमतेन त्रिदोषजमूर्च्छालक्षणमाह—

सर्वाकृतिः सन्निपातादपस्मार इवागतः ।
स जन्तुं पातयत्याशु विना बीभत्सचेष्टितैः ॥ १३ ॥

*मूर्च्छायः षड्विध उक्तः सुश्रुतेन, चरकस्तु सांनिपातिकमपि मूर्च्छायमाह—सर्वाकृतिरिति । अपस्मार इवागतस्तेन महताऽभिघातेन पतति चिरेण प्रतिबुध्यते, तर्हि तयोः को भेद ? इत्यत आह—

सान्निपातिको मूर्च्छायो विना बीभत्सचेष्टितैः फेनवमनदन्तघट्ट-
नाक्षिविकृत्यादिभिर्विना पातयति ॥ इति ॥ १३ ॥

अथ रक्तजमूर्च्छानिदानमाह—

पृथिव्यम्भस्तमोरूपं रक्तगन्धस्तदन्वयः ।
तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः ।
द्रव्यस्वभावमित्येके दृष्ट्वा यदभिमुह्यति ॥ १४ ॥

*तमोरूपं=तमोबहुलम् । मानवाश्च=ये तामसाः, न तु सात्त्विका राजसाश्च । अत्रैके वदन्ति–नैव युक्तिः समीचीना, तर्हि चम्पकादिगन्धेनापि मूर्च्छा प्रसज्येत, तत्रापि गन्धस्य पार्थिवत्वादत आह—"द्रव्यस्वभावमि"ति । अत्राह भोजः—

*दर्शनादसृजस्तज्ज्ञाद्गन्धाच्चैव प्रमुह्यति ॥ २ ॥ इति ॥ १४ ॥

अथ रक्तजमूर्च्छालक्षणमाह—

स्तब्धाङ्गदृष्टिस्त्वसृजा गूढोच्छ्वासश्च मूर्च्छितः ॥ १५ ॥

अथ मद्यजविषजयोर्मूर्च्छयोर्निदानमाह—

गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः ।
त एव तस्मात्ताभ्यान्तु मोहौ स्यातां यथेरितौ ॥ १६ ॥

*ये गुणाः=लघुरूक्षाशुविशदव्यवायितीक्ष्णविकाशिसूक्ष्मोष्णानिर्देश्यरसत्वादयः । तैलादौ द्रव्ये व्यस्तास्तीव्राश्च सन्ति, त एव गुणा विषमद्ययोस्तु तीव्रतरत्वेन स्थिताः । तत्रापि भेदस्तन्त्रान्तरे—

*ये विषस्य गुणाः प्रोक्ताः सन्निपातप्रकोपणाः ।
त एव मद्ये दृश्यन्ते विषे तु बलवत्तराः" ॥३॥ इति ॥१६॥

अथ मद्यजमूर्च्छालक्षणमाह—

मद्येन प्रलपञ्छेते नष्टविभ्रान्तमानसः ।
गात्राणि विक्षिपन्भूमौ जरां यावन्न याति तत् ॥ १७ ॥

*नष्टविभ्रान्तमानसः=नष्टं=सर्वथा स्मृतिहीनं, विभ्रान्तं=रज्जौ सर्पज्ञानयुक्तं, मानसं यस्य सः । जरां=जीर्णताम् । तद्=मद्यम् ॥१७॥

अथ विषजमूर्च्छालक्षणमाह—

वेपथुस्वप्नतृष्णाः स्युस्तमश्च विषमूर्च्छिते ।
वेदितव्यं तीव्रतरं यथास्वं विषलक्षणैः ॥ १८ ॥

*विषस्य = मूलकन्दफलपत्रक्षीरादिभेदभिन्नस्य, यथास्वं लक्षण- मुक्तं सुश्रुते कल्पस्थाने, तल्लक्षणं मद्यापेक्षया तीव्रतरं वेदितव्यं न तु संज्ञानाशेन साम्यधर्मात् ॥ १८ ॥

अथ मूर्च्छाभ्रमतन्द्राऽऽदीनां भेदमाह--

मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद् भ्रमः ।
तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा ॥ १९ ॥

*"रजःपित्तानिलाद् भ्रम" इति । नात्र समुच्चयः, केवलपित्तज्वरे भ्रमस्योक्तत्वाद्, भ्रमश्च=चक्रारूढस्येव भ्रमवस्तुज्ञानं, स्वदेहस्य भ्रमत- इव ज्ञानञ्च ॥ १९ ॥

अथ तन्द्राया लक्षणमाह–

इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः ।
निद्राऽऽर्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत् ॥ २० ॥

*इन्द्रियाणामर्थः=प्रयोजनं, येषु=अर्थाद्विषयेषु, असंवित्तिः=अ- सम्यग् ज्ञानम्, इति । इन्द्रियार्थासम्यग्ज्ञानादि । निद्रायां प्रबुद्धस्य क्लमाभावस्तन्द्रायान्तु प्रबोधितस्यापि क्लम इत्यनयोर्भेदः ॥ २० ॥

अथ क्लमस्य लक्षणमाह–

योऽनायासः श्रमो देहे प्रवृद्धः श्वाससङ्गतः ।
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः ॥ २१ ॥

*इन्द्रियाणां = बुद्धीन्द्रियाणां कर्मेन्द्रियाणाञ्च, अर्थः = प्रयोजनं विषयग्रहणं, तस्य प्रबाधकः = प्राबल्येन बाधकः ॥ २१ ॥

अथ निद्राया लक्षणमाह--

यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः ।
विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः ॥ २२ ॥

*क्लान्ते = ग्लाने, श्रान्त इति यावत् । कर्मात्मानः क्लमान्विताः = कर्मेन्द्रियाणिज्ञानेन्द्रियाणि च क्लमान्विताः = इन्द्रियाणि श्रान्तानि ॥ २२ ॥

अथ संन्यासस्य सम्प्राप्तिपूर्वकं लक्षणमाह—

वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः ।
सन्न्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः ॥ २३ ॥

स ना संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः ।
प्राणैर्विमुच्यते शीघ्रं मुक्त्वा सद्यःफलां क्रियाम् ॥ २४ ॥

*आक्षिप्य = विनाश्य। सन्न्यस्यन्ति = मूर्च्छयन्ति । प्राणायतनं = हृदयम् । सन्न्यस्तः = मूर्च्छितः । काष्ठीभूतः = क्रियारहितः । अत-एव-मृतोपम इति । सद्यःफलां क्रियां = सूचीव्यधनाञ्जनावपीडकपि-कच्छुघर्षणवृश्चिकादिदंशनादिरूपाम् ॥ २३–२४ ॥

अथ सन्न्यासस्य मूर्च्छाऽऽदिभ्यो भेदमाह—

दोषेषु मदमूर्च्छाया गतवेगेषु देहिनः ।
स्वयमप्युपशाम्यन्ति सन्न्यासो नौषधैर्विना ॥ २५ ॥

*मदमूर्च्छायाः = मदः = अप्रवृद्ध उन्मादः। मूर्च्छायाः = मूर्च्छाः॥ २५॥

अथ मूर्च्छाचिकित्सामाह—

सेकावगाहा मणयः सहाराः शीताः प्रदेहा व्यजनानिलाश्च ।
शीतानि पानानि च गन्धवन्ति सर्वासु मूर्च्छास्वनिवारितानि॥२६॥

*मणयः = चन्द्रकान्तादयः । हाराः = मुक्ताऽऽदिहाराः । शीताः-प्रदेहाः = सकर्पूरचन्दनानुलेपनानि । शीतानि पानानि = सिताऽऽम-लकादिपानकानि । गन्धवन्ति = कर्पूरादिसुगन्धवन्ति । सर्वासु मू-र्च्छास्वनिवारितानि । अस्यायमभिप्रायः—सेकादीन्यन्यासु मूर्च्छासु हितान्येव, किन्तु वातश्लेष्मजास्वपि न निवारितानि तत्रापि पित्त-स्य प्रधानत्वात् ॥ २६ ॥

सिद्धानि वर्गे मधुरे पयांसि सदाडिमा जाङ्गलजा रसाश्च ।
तथा यवो लोहितशालयश्च मूर्च्छासु पथ्याः ससतीनमुद्गाः ॥२७॥

*सतीनः = कलायः ॥ २७ ॥

कोलमज्जोषणोशीरकेसरं शीतवारिणा ।
पीतं मूर्च्छां जयेल्लीढ्वा कृष्णां वा मधुसंयुताम् ॥ २८ ॥

शीतेन तोयेन बिसं मृणालं कृष्णां च पथ्यां मधुनाऽवलिह्यात् ।
कुर्याच्च नासावदनावरोधं क्षीरं पिबेद्वाऽप्यथ मानुषीणाम् ॥२९॥

द्राक्षासितादाडिमलाजवन्ति कह्लारनीलोत्पलपद्मवन्ति ।
पिबेत्कषायाणि च शीतलानि पित्तज्वरं यानि शमं नयन्ति ॥३०॥

शिरीषबीजगोमूत्रकृष्णामरिचसैन्धवैः ।
अञ्जनं स्यात्प्रबोधाय सरसोनशिलावचैः ॥ ३१ ॥

अन्यच्च—

अञ्जनं सम्यगारब्धं मधुसिन्धुशिलोषणैः ।
प्रमोहद्रोहि भवति भाषितं भिषजां वरैः ॥ ३२ ॥

*शिला=मनःशिला । ऊषणं=मरिचम् ॥ ३२ ॥

मधूकसारसिन्धूत्थवचोषणकणाः समाः ।
श्लक्ष्णं पिष्ट्वाऽम्भसा नस्यं कुर्यात्संज्ञाप्रबोधनम् ॥ ३३ ॥

अथ रक्तजादीनां मूर्च्छानां चिकित्सामाह—

रक्तजायान्तु मूर्च्छायां हितः शीतक्रियाविधिः ।
मद्यजानां पिबेन्मद्यं निद्रां सेवेत वा सुखम् ।
विषजायां विषघ्नानि भेषजानि प्रयोजयेत् ॥ ३४ ॥

अथ सन्न्यासचिकित्सामाह—

प्रभूतदोषस्तमसोऽतिरेकात्सम्मूर्च्छितो नैव विबुध्यते यः ।
संन्यस्तसंज्ञः स हि दुश्चिकित्स्यो नरो भिषग्भिः परिकीर्त्तितोऽसौ॥३५॥

अञ्जनान्यवपीडाश्च धूमाः प्रधमनानि च ।
सूचीभिस्तोदनं शस्तं दाहः पीडा नखान्तरे ॥ ३६ ॥
लुञ्चनं केशलोम्नाञ्च दन्तैर्दशनमेव च ।
आत्मगुप्ताऽवघर्षश्च हितस्तस्य प्रबोधने ॥ ३७ ॥

*अवपीडः—कल्कीकृतौषधरसस्य नासापुटे दानम् । प्रधमनम्=औषधचूर्णस्य द्विमुख्या नाडिकया मुखवातेन नासापुटे दानम् । तस्य—सन्न्यस्तस्य ॥ ३६–३७ ॥

अथ मूर्च्छोपयोगिरसावाह—

कणामधुयुतं सूतं मूर्च्छायां प्राशयेद्भिषक् ।
शीतसेकावगाहादीन्सर्वाङ्गे पीडनं हठात् ॥ ३८ ॥
ताम्रचूर्णसमोशीरं केशरं शीतवारिणा ।
पीतं मूर्च्छां द्रुतं हन्याद् वृक्षमिन्द्राशनिर्यथा ॥ ३९ ॥

*सूतं=मारितम् । ताम्रचूर्णं=मारितताम्रचूर्णम् ॥ ३८–३९ ॥

अथ भ्रमचिकित्सामाह—

पिबेद् दुरालभाक्काथं सघृतं भ्रमशान्तये ।
पथ्याक्काथेन संसिद्धं घृतं धात्रीरसेन वा ॥ ४० ॥
शुण्ठीकृष्णाशताह्वानां साभयानां पलं पलम् ।
गुडस्य षट्पलान्येषा गुटिका भ्रमनाशिनी ॥ ४१ ॥
ताम्रं दुरालभाक्काथैः पीतन्तु घृतसंयुतम् ।
निवारयेद् भ्रमं शीघ्रं तं यथा शम्भुभाषितम् ॥ ४२ ॥

अथ तन्द्राया अतिनिद्रायाश्च चिकित्सामाह—

तुरङ्गलालालवणोत्तमेन्दुमनःशिलामागधिकामधूनि ।
नियोज्य तान्यक्षिणि विमिश्रितानि तन्द्रां सनिद्रां विनिवारयन्ति॥४३॥

*इन्दुः=कर्पूरः ॥ ४३ ॥

सैन्धवं श्वेतमरिचं सर्षपाः कुष्ठमेव च ।
वस्तमूत्रेण सम्पिष्टं नस्यं तन्द्रानिवारणम् ॥ ४४ ॥

*श्वेतमरिचं=शिग्रुबीजम् ॥ ४४ ॥

शुण्ठीकणोग्रालवणोत्तमानि नस्येन तन्द्राविजयोल्वणानि ।
क्षुद्राऽमृतापौष्करनागराणि भार्गीशिवाभ्यां क्वथितानि पानात् ॥४५॥

*शिवा=हरीतकी ॥४५॥

इत्यष्टादशो मूर्च्छाभ्रमनिद्रातन्द्रासन्न्यासाधिकारः समाप्तः ॥ १८ ॥

अथैकोनविंशो मदात्ययाधिकारः ॥ १९ ॥

तत्र मद्यस्य स्वभावमाह--

मद्यं स्वभावतः प्राज्ञैर्यथैवान्नं तथा स्मृतम् ।
अयुक्तियुक्तं रोगाय युक्तियुक्तं रसायनम् ॥ १ ॥

अथ युक्तियुक्तेर्महिमानमाह—

प्राणाः प्राणभृतामन्नं तदयुक्त्या निहन्त्यसून् ।
विषं प्राणहरं तच्च युक्तियुक्तं रसायनम् ॥ २ ॥
विधिना मात्रया काले हितैरन्नैर्यथाबलम् ।
प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतं यथा ॥ ३ ॥

*तत्र विधिर्यथा—

*कृतशारीरसंस्कारः शुचिरुत्तमगन्धवान् ।
उद्दामगन्धिभिः स्फीतैर्मृदुभिर्वसनैर्वृतः ॥ १ ॥
विचित्रविविधस्रग्वी रत्नाभरणभूषितः ।
सानन्दः सावधानश्च पिबेन्मद्यं शनैः शनैः ॥ २ ॥

*देशो यथा—

*उपवनेषु–सुरभिसुरङ्गसुमनःसमूहमनोहरेषु मञ्जुगुञ्जन्मधुकरनिकरेषु कूजत्कलकण्ठेषु सुरभिशिशिरमधुरसमीरेषु ।

*मन्दिरेषु—सुधाशुभ्रेषु सुधूपधूपितेषु सूपधानेषु संस्तीर्णविहितशयनासनेषु ।

*उपविष्टोऽथवा तिर्यग भृशं हृष्टः सुरां पिबेत् ।
सौवर्णै राजतैः पात्रैः पिबेन्मणिमयरपि ॥ ३ ॥
वस्त्राभरणमाल्यैश्च भूषिताभिर्यथर्त्तुकैः ।
दीयमानं मृगाक्षीभिः पिबेन्मद्यं मुदाऽन्वितः ॥ ४ ॥

*मात्रयेति । मात्रा तन्त्रान्तरे कथिता—

*शुद्धकायः पिबेन्मद्यं सोपदंशं पलद्वयम् ।
मध्याह्ने द्विगुणं तच्च सुस्निग्धं भक्षयेदनु ॥ ५ ॥
प्रदोषेऽष्टपलं तद्वन्मात्रा मद्यरसायने ।
अनेन विधिना सेव्यं मद्यं नित्यमतन्द्रितैः ॥ ६ ॥

*शुद्धकायः=उत्सृष्टमलमूत्रः । पलद्वयं पारिशेष्यात्पूर्वाह्णे बोद्धव्यम् । अतन्द्रितैः= मात्रया सावधानैः ॥ ५–६ ॥

*अन्ये त्वाहुः—

*बुद्ध्यादयो गुणा यावदुल्लसन्ति निरत्ययाः ।
मात्रेयं विहिता मद्यपानेऽन्या रोगजन्मने ॥ ७ ॥

*काल इति । यस्मिन्काले यादृशं मद्यमुचितं तस्मिस्तादृशं पेयम् ।

अथ कस्मिन्नृतौ कीदृङ् मद्यं पेयमित्याह—

*ऋतुसम्बन्धो यथा—

*ग्रीष्मे मद्यं हिमं स्वादु माध्वीकादि सुखप्रदम् ।

शीते प्रशस्यते चाष्णं तीक्ष्णं गौडिकपैष्टिकम् ॥८॥ इत्यादि।
*हितैरन्नैरिति।

*मद्यानुकूलैर्विविधैः फलैर्वर्णमनोहरैः।
सुगन्धैर्लवणैर्हृद्यैर्भृष्टैर्मांसैः पृथग्विधैः ॥ ९ ॥
स्निग्धैरन्नैश्च भक्ष्यैश्च सह मद्यं पिबेन्नरः ॥ १० ॥

*अन्नैः=सिद्धैरोदनपर्पटकादिभिः। भक्ष्यैः=लड्डुकफेणिकाऽऽदिभिः ॥ १० ॥ इति ॥ ३ ॥

अभ्यङ्गोत्सादनस्नानवासोधूपानुलेपनैः।
स्निग्धोष्णैस्तादृशैरन्नैर्वातप्रकृतिकः पिबेत् ॥ ४ ॥
शीतोपचारैर्विविधैर्मधुरस्निग्धशीतलैः।
फलैरन्नैः सह नरः पित्तप्रकृतिकः पिबेत् ॥ ५ ॥
श्लैष्मिको जाङ्गलैर्मांसैर्मरिचैर्मदिरां पिबेत्।
प्राक् पिबेच्छ्लैष्मिको मद्यं भुक्तस्योपरि पैत्तिकः ॥ ६ ॥
वातिकस्तु पिबेन्मध्ये समदोषो यथेक्षते।
वातिकस्तु पिबेन्मद्यं प्रायो गौडिकपैष्टिकम् ॥ ७ ॥
कफपित्तात्मको यस्तु माध्वीकं माधवं पिबेत्।
विधिर्वसुमतामेष कथितश्चरकादिभिः।
यथोपपत्तिकं वाऽपि पिबेन्मद्यं हि मात्रया ॥ ८ ॥

अथ मद्यगुणानाह—

रसवातादिमार्गाणां सत्त्वबुद्धीन्द्रियात्मनाम्।
प्रधानस्यौजसश्चैव हृदयं स्थानमुच्यते ॥ ९ ॥
मद्यं हृदयमाविश्य स्वगुणैरोजसो गुणान्।
दशभिर्दश संक्षोभ्य चेतो नयति विक्रियाम् ॥ १० ॥
लघूष्णतीक्ष्णसूक्ष्माम्लव्यवायाशुकरं तथा।
रूक्षं विकाशि विशदं मद्यं दशगुणं स्मृतम् ॥ ११ ॥
गुरु शीतं मृदु स्निग्धं सान्द्रं स्वादु स्थिरं तथा।
प्रसन्नं पिच्छिलं सूक्ष्ममोजो दशगुणं स्मृतम् ॥ १२ ॥
गौरवं लाघवाच्छैत्यमौष्ण्यादम्लस्वभावतः।

माधुर्यं मार्दवं तैक्ष्ण्यात्प्रसादश्चाशुभावनात् ॥ १३ ॥
रौक्ष्यात्स्नेहं व्यवायित्वात् स्थिरत्वं सूक्ष्मतामपि ।
विकाशिभावात्पैच्छिल्यं वैशद्यात्सान्द्रतां तथा ॥ १४ ॥
सौक्ष्म्यान्मद्यं निहन्त्येवमोजसः स्वगुणैर्गुणान् ।
सत्त्वं तदाश्रयं चाशु सङ्क्षोभ्य कुरुते मदम् ॥ १५ ॥
हृदि मद्यगुणाविष्टे हर्षस्तर्षो रतिः सुखम् ॥ १६ ॥
विकाराश्च यथासत्त्वं चित्रा राजसतामसाः ।
जायन्ते मोहनिद्रान्ता इत्येतन्मदलक्षणम् ॥ १७ ॥
हर्षमोजो बलं पुष्टिमारोग्यं पौरुषं तथा ।
युक्त्या पीतं करोत्याशु मद्यं मदसुखप्रदम् ॥ १८ ॥
रोचनं दीपनं हृद्यं स्वरवर्णप्रसादनम् ।
प्रीणनं बृंहणं बल्यं भयशोकश्रमापहम् ॥ १९ ॥
स्वापनं नष्टनिद्राणां मूकानां वाग्विशोधनम् ।
नाशनं चातिनिद्राणां विबन्धानां विबन्धनुत् ॥ २० ॥
वधबन्धपरिक्लेशदुःखानां चाप्यबोधनम् ।
अपि प्रवयसां मद्यमुत्सर्गान्मोदकारकम् ॥ २१ ॥
बहुदुःखक्षतस्यास्य शोकैरुपहतस्य च ।
विश्रामो जीवलोकस्य मद्यं युक्त्या निषेवितम् ॥ २२ ॥

तत्र सात्त्विकस्य मदस्य लक्षणमाह—

बुद्धिस्मृतिप्रीतिकरः सुखश्च पानान्ननिद्रारतिवर्द्धनश्च ।
सम्पाठगीतस्वरवर्द्धनश्च प्रोक्तोऽतिरम्यः प्रथमो मदो हि ॥२३॥

*मदस्त्रिलक्षणो भवति । एको मदोऽधिकसत्त्वगुणस्य पुंसो भवति । द्वितीयोऽधिकरजोगुणस्य । तृतीयोऽधिकतमोगुणस्य । अत एवोक्तं चरके—

*प्रधानाधममध्यानां रुक्माणां व्यक्तिदायकः ।
यथाऽग्निरेवं सत्त्वानां मद्यं प्रकृतिदर्शकम् ॥ ११ ॥ इति ।

*तत्र सात्त्विकस्य मदस्य लक्षणमाह—बुद्धीति । प्रीतिः=परेण मैत्री । सुखः=सुखयतीति सुखः, सुखकर इत्यर्थः । "पाने"त्या-

दि=पानादिष्वनुषङ्गवर्द्धनः। अतिरम्यः=मनोविकारित्वेऽपि न दुःखकरः। प्रथमगुणविकारित्वात् प्रथमः। एवं द्वितीयस्तृतीयश्च ॥२३॥

अथ राजसस्य मदस्य लक्षणमाह—

अव्यक्तबुद्धिस्मृतिवाग्विचेष्टः सोन्मत्तलीलाऽऽकृतिरप्रशान्तः।
आलस्यनिद्राऽभिहतो मुहुश्च मध्येन मत्तः पुरुषो मदेन ॥ २४ ॥

*अव्यक्तेत्यत्र ईषदर्थे नञ्। विचेष्टः=विरुद्धचेष्टः। उन्मत्तस्य लीलाऽऽकृतिभ्यां सहितः ॥ २४ ॥

अथ तामसस्य मदस्य लक्षणमाह—

गच्छेदगम्यां न गुरूंश्च मन्येत्खादेदभक्ष्याणि च नष्टसंज्ञः।
ब्रूयाच्च गुह्यानि हृदि स्थितानि मदे तृतीये पुरुषोऽस्वतन्त्रः ॥२५॥

*मन्येदिति परस्मैपदमार्षत्वात्। अस्वतन्त्रः=मदपरवशः ॥२५॥

अथातितामसस्य मदस्य लक्षणमाह—

चतुर्थे तु मदे मूढो भग्नदार्विव निष्क्रियः।
कार्याकार्यविभागज्ञो मृतादपि परो मृतः ॥ २६ ॥

*यद्यपि मदास्त्रय एव तथाऽपि सुश्रुतानुरोधादतितामसमदलक्षणमाह—मूढो=मोहयुक्तः ॥ २६ ॥

को मदं तादृशं गच्छेदुन्मादमिव चापरम्।
बहुदोषमिवामूढः कान्तारं स्ववशः कृती ॥ २७ ॥

*अमूढः=विचारबहुलः ॥ २७ ॥

अथ केषां मदाधिक्यं केषां च मदाल्पत्वं भवतीत्याह—

नातिमाद्यन्ति बलिनः कृताहारा महाशनाः।
स्निग्धाः सत्त्ववयोयुक्ता मद्यनित्यास्तदन्वयाः ॥ २८ ॥
मेदःकफाधिका मन्दवातपित्ता दृढाग्नयः।
विपर्ययेऽतिमाद्यन्ति विश्रब्धाः कुपिताश्च ये।
मद्येन चाम्लरूक्षेण साजीर्णे बहुनाऽपि च ॥ २९ ॥

अथ मदात्ययनिदानमाह—

विषस्य ये गुणा दृष्टाः सन्निपातप्रकोपणाः।
त एव मद्ये दृश्यन्ते विषे तु बलवत्तराः ॥ ३० ॥
तस्मादविधिपीतेन तथा मात्राऽधिकेन च।

युक्तेन चाहितैरन्नैरकाले सेवितेन च ॥ ३१ ॥
मद्येन खलु जायन्ते मदात्ययमुखा गदाः ॥ ३२ ॥

अथ विधिमन्तरा सेवितमद्यमन्यविकारोत्पादकमित्याह—

निर्भुक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यम् ।
उत्पादयेत्कष्टतमान्विकारानुत्पादयेच्चापि शरीरभेदम् ॥ ३३ ॥

*अविधिप्रयुक्तं मद्यं विकारान्तरानुत्पादयन्तीत्यत आह—निर्भुक्तेति । एकान्ततो=नैरन्तर्येण । विकारान्=मदात्ययादीन् । शरीरस्य भेदं=नाशम् ॥ ३३ ॥

अथ मदात्ययादीनां हेत्वन्तरमाह—

क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन ।
व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन चापि ॥ ३४ ॥
अत्यम्लरूक्षावततोदरेण साजीर्णभुक्तेन तथाऽबलेन ।
उष्णाभितप्तेन च सेव्यमानं करोति मद्यं विविधान्विकारान् ॥ ३५ ॥

अथ मद्योत्पन्नविकारान् विवृणोति—

पानात्ययं परमदं पानाजीर्णमथापि च ।
पानविभ्रममत्युग्रं तेषां वक्ष्यामि लक्षणम् ॥ ३६ ॥

तत्र मदात्ययस्य सामान्यलक्षणमाह—

शरीरदुःखं बलवत्प्रमोहो हृदयव्यथा ।
अरुचिः प्रततं तृष्णा ज्वरः शीतोष्णलक्षणः ॥ ३७ ॥
शिरःपार्श्वास्थिसन्धीनां वेदना विद्यते यथा ।
जायतेऽतिबला जृम्भा स्फुरणं वेपनं श्रमः ॥ ३८ ॥
उरोविबन्धः कासश्च हिक्का श्वासः प्रजागरः ।
शरीरकम्पः कर्णाक्षिमुखरोगास्त्रिकग्रहः ॥ ३९ ॥
छर्दिर्विड्भेद उत्क्लेशो वातपित्तकफात्मकः ।
भ्रमः प्रलापो रूपाणामसतांश्चैव दर्शनम् ॥ ४० ॥
तृणभस्मलतापर्णपांशुभिश्चावपूरणम् ।
प्रधर्षणं विहङ्गैश्च भ्रान्तचेताः स मन्यते ॥ ४१ ॥
व्याकुलानामशस्तानां स्वप्नानां दर्शनानि च ।
मदात्ययस्य रूपाणि सर्वाण्येतानि लक्षयेत् ॥ ४२ ॥

अथ वातजमदात्ययस्य निदानमाह—

स्त्रीशोकभयभाराध्वकर्मभिर्योऽतिकर्षितः।
रूक्षाल्पप्रमिताशी च यः पिबत्यतिमात्रया ॥ ४३ ॥
रूक्षं परिणतं मद्यं निशि निद्रां निहत्य च।
करोति तस्य तच्छीघ्रं वातप्रायं मदात्ययम् ॥ ४४ ॥

*तन्मद्यम् ॥ ४४ ॥

अथ वातजमदात्ययस्य लक्षणमाह—

हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः।
विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययम् ॥ ४५ ॥

अथ पित्तजमदात्ययस्य निदानमाह—

तीक्ष्णोष्णमद्यमम्लं च योऽतिमात्रं निषेवते।
अम्लोष्णतीक्ष्णभोजी च क्रोधनो ज्ञानवान्नरः।
तस्योपजायते तीव्रः पित्तप्रायो मदात्ययः ॥ ४६ ॥

अथ पित्तजमदात्ययस्य लक्षणमाह—

तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः।
विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम् ॥ ४७ ॥

अथ कफजमदात्ययस्य निदानमाह—

मधुरस्निग्धगुर्वाशी यः पिबत्यतिमात्रया ॥ ४८ ॥
अव्यायामदिवास्वप्नशय्याऽऽसनसुखे रतः।
मदात्ययं कफप्रायं स नरो लभते ध्रुवम् ॥ ४९ ॥

अथ कफजमदात्ययस्य लक्षणमाह—

छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः।
विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम् ॥ ५० ॥

अथ सान्निपातिकमदात्ययस्य निदानं लक्षणं चाह—

त्रिदोषो हेतुभिः सर्वैः सर्वैर्लिङ्गैर्मदात्ययः ॥ ५१ ॥

अथ परमदलक्षणमाह—

श्लेष्मक्षयोऽङ्गगुरुता विरसास्यता च
विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च।
लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा-
स्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥ ५२ ॥

*तन्द्रिः=तन्द्रा ॥ ५२ ॥

अथ पानाजीर्णलक्षणमाह—

आध्मानमुग्रमथवोद्गिरणं विदाहः-
पाने त्वजीर्णमुपगच्छति लक्षणानि ।
ज्ञेयानि तत्र भिषजा सुविनिश्चितानि
पित्तप्रकोपजनितानि च कारणानि ॥ ५३ ॥

*उद्गिरणं=वान्तिरुद्गारो वा । पीयत इति पानं=मद्यम् ॥ ५३ ॥

अथ पानविभ्रमलक्षणमाह—

हृद्गात्रतोदकफसंस्रवकण्ठधूममूर्च्छावमीमदशिरोरुजनप्रदेहाः ।
द्वेषः सुराऽन्नविकृतेषु च तेषु तेषु तं पानविभ्रममुशन्त्यखिलेषु धीराः॥५४॥

*कण्ठधमः=कण्ठाद्धूमनिर्गम इव । प्रदेहः=कफेन लिप्तास्यता । द्वेषः सुराऽन्नविकृतेषु च तेषु तेषु=सुराविकारेष्वन्नविकारेषु च द्वेषः । अखिलेषु=मद्यविकारेषु ॥ ५४ ॥

अथ मदात्ययाद्यसाध्यलक्षणमाह—

हीनोत्तरौष्ठमतिशीतममन्ददाहं-
तैलप्रभाऽऽस्यमपि पानहतं त्यजेच्च ।
जिह्वौष्ठदन्तमसितन्त्वथ वाऽपि नीलं-
पीते च यस्य नयने रुधिरप्रभे च ।
हिक्का ज्वरो वमथुवेपथुपार्श्वशूलाः-
कासभ्रमावपि च पानहतं त्यजेत्तम् ॥ ५५ ॥

अथ मदात्ययादिविकारचिकित्सामाह—

मद्योत्थानाञ्च रोगाणां मद्यमेव हि भेषजम् ।
यथा दहनदग्धानां दहनं स्वेदनं हितम् ॥ ५६ ॥
मिथ्याऽतिहीनमद्येन यो व्याधिरुपजायते ।
समेनैव निपीतेन मद्येन स हि शाम्यति ॥ ५७ ॥
बीजपूरकवृक्षाम्लकोलदाडिमसंयुतम् ।
यवानीहवुषाऽजाजीश्रृङ्गवेरावचूर्णितम् ॥ ५८ ॥
सस्नेहैः शक्तुभिर्युक्तमुपदंशैश्चिरोत्थितम् ।
दद्यात्सलवणं मद्यं वातपैत्तिकशान्तये ॥ ५९ ॥

मद्यं सौवर्चलव्योषयुक्तं किञ्चिज्जलान्वितम् ।
जीर्णमद्याय दातव्यं वातपानात्ययापहम् ॥ ६० ॥
चव्यं सौवर्चलं हिङ्गु पूरकं विश्वदीपकम् ।
चूर्णं मद्येन पातव्यं पानात्ययरुजाऽपहम् ॥ ६१ ॥
लावतित्तिरदक्षाणां रसैश्च शिखिनामपि ।
पक्षिणां मृगमत्स्यानामानूपानां तथौदनैः ॥ ६२ ॥
स्निग्धोष्णलवणाम्लैश्च वेशवारैर्मुखप्रियैः ।
स्निग्धैर्गोधूमकैरन्नैर्वातप्रायं मदात्ययम् ॥ ६३ ॥
नारीणां यौवनोष्माणां निर्दयैरुपगूहनैः ।
श्रोण्यूरुकुचभारैश्च संरोधोष्णसुखप्रदैः ॥ ६४ ॥
शयनाच्छादनैरुष्णैश्चान्तर्गेहैः सुखप्रदैः ।
मारुतैः प्रबलैः शीघ्रं प्रशाम्यति मदात्ययः ॥ ६५ ॥
पित्तपानात्यये योज्याः सर्वतश्च क्रिया हिमाः ।
सितामाक्षिकसंयुक्तं मद्यमर्द्धोदकं पिबेत् ॥ ६६ ॥
मद्यं खर्जूरमृद्वीकापरूषकरसैर्युतम् ।
सदाडिमरसं शीतं शक्तुभिश्चावचूर्णितम् ॥ ६७ ॥
सशर्करं वा माध्वीकं संयुक्तमथ वा परम् ।
दद्याद्बहूदकं काले पातुं पित्तमदात्यये ॥ ६८ ॥
शशान्कपिञ्जलानेणाँल्लावानसितपुच्छकान् ।
मधुराम्लान्प्रयुञ्जीत भोजने शालिषष्टिकान् ॥ ६९ ॥
पटोलयवमिश्रं वा छागलं कल्पयेद्रसम् ।
सतीनमुद्गमिश्रं वा दाडिमामलकान्वितम् ॥ ७० ॥
द्राक्षाऽऽमलकखर्जूरपरूषकरसेन च ।
कल्पयेत्तर्पणान्यूषान् रसांश्च विविधात्मिकान् ॥ ७१ ॥
शीतानि चान्नपानानि शीतशय्याऽऽसनानि च ।
शीतवातजलस्पर्शाः शीतान्युपवनानि च ॥ ७२ ॥
क्षौमपद्मोत्पलानाञ्च मणीनां मौक्तिकस्य च ।
चन्दनोदकशीतानां स्पर्शाश्चन्द्रांशुशीतलाः ॥ ७३ ॥

रूक्षतर्पणसंयुक्तं यवानीव्योषसंयुतम् ।
यवगोधूमकश्चान्नं रूक्षयूषेण भोजयेत् ॥ ७४ ॥
कुलत्थकानां शुष्काणां मूलकानां रसेन वा ।
प्रभूतकटुसंयुक्तं यवान्नं वा प्रदापयेत् ॥ ७५ ॥
छागमांसरसं रूक्षमम्लं वा जाङ्गलं रसम् ।
व्योषयूषं मनागम्लं पिबेत् कफमदात्यये ॥ ७६ ॥
स्थाल्यामथ कपाले वा भृष्टं कृत्वा तु नीरसम् ।
कट्वम्ललवणं मांसं खादेत्कफमदात्यये ॥ ७७ ॥
वामकद्रव्ययुक्तेन मद्येनोल्लेखनं मतम् ।
मदात्यये कफोद्भूते लङ्घनञ्च यथाबलम् ॥ ७८ ॥
यदिदं कर्म्मनिर्दिष्टं वातपित्तकफान्प्रति ।
सर्वजे सर्वमेवेदं प्रयोक्तव्यं चिकित्सकैः ॥ ७९ ॥

अथ प्रसङ्गप्राप्तकोद्रवादिमदचिकित्सामाह—

सगुडः कूष्माण्डरसः शमयति मदमाशु कोद्रवजम् ।
धत्तूरजञ्च दुग्धं सशर्करं चाशु पानेन ॥ ८० ॥
सच्छर्दिमूर्च्छाऽतीसारं मदं पूगफलोद्भवम् ।
सद्यः प्रशमयेत्पीतमातृप्तेर्वारि शीतलम् ॥ ८१ ॥
वन्यकरीषघ्राणाज्जलपानाल्लवणभक्षणादपि च ।
शाम्यति पूगफलोद्भवमदः सशूलः स शर्कराकवलात् ॥ ८२ ॥
तत्क्षणान्मृदितं चूर्णं समाघ्रातं प्रणाशयेत् ।
ताम्बूलोत्थं मदं पुंसामेकमेव स्वभावतः ॥ ८३ ॥
जातीफलमदं शीघ्रं हन्ति पथ्या निषेविता ।
शीततोयावगाहश्च शर्करा दधियोजिता ।
विभीतमदशान्त्यर्थमियमेव मता पुनः ॥ ८४ ॥
मद्यं पीत्वा यदि ना तत्क्षणमवलेढि शर्करां सघृताम् ।
जातु न मदयति मद्यं मनागपि प्रथितवीर्यमपि ॥ ८५ ॥

इत्येकोनविंशो मदात्ययाधिकारः समाप्तः ॥ १९ ॥

अथ विंशो दाहाधिकारः ॥ २० ॥

तत्र प्रथमं पित्तजदाहमाह—

पित्तज्वरसमः पित्ताद् दाहः स्यात्तस्य संक्रमः ॥ १ ॥

*तत्र दाहः सप्तविधस्तेष्वादौ पित्तजं दाहमाह—पित्तज्वरेति। दाहः=ऊष्मात्मको व्याधिः। पित्तज्वरसमानः=पित्तज्वरलक्षणयुक्तः, पित्तज्वरे त्वामाशयदुष्टाद् दाहो ज्वराधिक इति भेदः। तस्य=दाहस्य। पित्तज्वरोक्तः क्रमः=चिकित्सा ॥ १ ॥

अथ रक्तजदाहमाह—

कृत्स्नदेहानुगं रक्तमुद्रिक्तं दहति ध्रुवम्।
सन्धूप्यते चोष्यते च ताम्राभस्ताम्रलोचनः।
लोहगन्धाङ्गवदनो वह्निनेवावकीर्यते ॥ २ ॥

*उद्रिक्तम्=अतिरिक्तम्। सद्। दहति=दाहाख्यं व्याधिं करोति। सन्धूप्यते=अग्निना दह्यत इव। उष्यते=समीपस्थेनेव वह्निना ताप्यते "चूष्यत" इति पाठान्तरे—आचूषणेनेव पीडामनुभवतीत्यर्थः। वह्निनेवावकीर्यते=शरीरोपरि वह्निः प्रक्षिप्यत इव ॥ २ ॥

अथ रक्तपूर्णकोष्ठजदाहमाह—

असृजा पूर्णकोष्ठस्य दाहोऽन्यः स्यात्सुदुस्तरः ॥ ३ ॥

* असृजा=शस्त्रादिक्षतान्निस्सृतरक्तेन ॥ ३ ॥

अथ मद्यजदाहमाह—

त्वचं प्राप्तः स पानोष्मा पित्तरक्ताभिमूर्च्छितः।
दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजम् ॥ ४ ॥

* स पानोष्मा=मद्यपानजनित ऊष्मा। पित्तरक्ताभिमूर्च्छितः=पित्तरक्ताभ्यां वर्द्धितः ॥ ४ ॥

अथ तृष्णानिरोधजदाहमाह—

तृष्णानिरोधादब्धातौ क्षीणे तेजः समुद्धतम्।
स बाह्याभ्यन्तरं देहं प्रदहेन्मन्दचेतसः।
संशुष्कगलताल्वोष्ठो जिह्वां निष्काश्य वेपते ॥ ५ ॥

* अब्धातौ=रसे। क्षीणे=क्षयं प्राप्ते। तेजः समुद्धतं=वृद्धम्।

मन्दचेतसः=अल्पबुद्धेः, यतस्तेन तृषानिरोधः कृतः ॥ ५ ॥

अथ धातुक्षयजदाहमाह—

धातुक्षयोत्थो यो दाहस्तेन मूर्च्छातृषाऽन्वितः ।
क्षामस्वरः क्रियाहीनः स सीदेद् भृशपीडितः ॥ ६ ॥

* सीदेत्=म्रियेत ॥ ६ ॥

अथ मर्माभिघातजदाहमाह—

मर्माभिघातजोऽप्यस्ति सोऽसाध्यः सप्तमो मतः ॥ ७ ॥

* मर्माणि=शिरोहृदयवस्त्यादीनि ॥ ७ ॥

अथ दाहासाध्यतामाह—

सर्व एव च वर्ज्याः स्युः शीतगात्रस्य देहिनः ॥ ८ ॥

अथ दाहचिकित्सामाह—

शतधौतघृताभ्यक्तं लेपं वा यवशक्तुभिः ।
कोलामलकयुक्तैर्वा धान्याम्लैरपि बुद्धिमान् ॥ ९ ॥

* धान्याम्लं=काञ्जिकभेदः ॥ ९ ॥

छादयेत्तस्य सर्वाङ्गमारनालार्द्रवाससा ।
लामज्जकेन युक्तेन चन्दनेनानुलेपयेत् ।
चन्दनाम्बुकणास्यन्दितालवृन्तोपवीजनैः ॥ १० ॥
सुप्याद्दाहार्दितोऽम्भोजकदलीदलसंस्तरे ।
परिषेकावगाहेषु व्यजनानाञ्च सेवने ॥ ११ ॥
शस्यते शिशिरं तोयं दाहतृष्णोपशान्तये ।
फलिनी लोध्रसेव्याम्बुहेमपत्रं कुटन्नटम् ।
कालीयकरसोपेतं दाहे शस्तं प्रलेपनम् ॥ १२ ॥

*फलिनी=प्रियङ्गुः । सेव्यम्=उशीरम् । अम्बु=बालकम् । हेमपत्रं=नागकेशरपत्रम् । कुटन्नटं=वितुन्नकं "गुडतजी" इति लोके, क्वचि"च्चम्बावती" इति नाम । कालीयकं="कलम्बक" इति लोके ॥ १२ ॥

ह्रीबेरपद्मकोशीरचन्दनाम्बुजवारिणा ।
सम्पूर्णामवगाहेत द्रोणीं दाहार्दितो नरः ॥ १३ ॥

वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः ।
नार्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः ॥ १४ ॥
पाययेत्कमलस्याम्भः शर्कराऽम्भः पयोऽपि च ।
क्षीरमिक्षुरसञ्चापि कारयेत्पित्तजिद्विधिम् ॥ १५ ॥

अथ चन्दनादिक्वाथमाह—

पटीरपर्पटोशीरनीरनीरदनीरजैः ।
मृणालमिसिधान्याकपद्मकामलकैः कृतः ॥ १६ ॥
अर्द्धशिष्टः सिताशीतः पीतः क्षौद्रसमन्वितः ।
क्वाथो व्यपोहयेद्दाहं नृणाञ्च परमोल्वणम् ॥ १७ ॥

पटीरं=चन्दनम् ॥ १६-१७ ॥

अथ काञ्जिकतैलमाह—

तिलतैलं भवेत्प्रस्थं तत्षोडशगुणे शनैः ।
काञ्जिके विपचेत्तत्स्याद्दाहज्वरहरं परम् ॥ १८ ॥

इति विंशो दाहाधिकारः समाप्तः ॥ २० ॥

अथैकविंश उन्मादाधिकारः ॥ २१ ॥

तत्रोन्मादस्य निरुक्तिमाह—

मदयन्त्युद्धता दोषा यस्मादुन्मार्गमाश्रिताः ।
मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः ॥ १ ॥

*अयमर्थः—यस्माद्=हेतोः, उद्धताः=प्रबृद्धाः । दोषा उन्मार्गमाश्रिताः । मदयन्ति=चित्तं विदिपन्ति । अस्मिन्सोऽयमुन्माद इति कीर्त्तितः । स=उन्मादः । मानसो व्याधिर्मनोवैकृत्यकारणात् ॥ १ ॥

अथावस्थाभेदेनोन्मादस्य नामान्तरमाह—

स चाप्रबृद्धस्तरुणो मदसंज्ञां बिभर्त्ति च ॥ २ ॥

स=उन्मादः । तरुणो=नवीनः ॥ २ ॥

अथोन्मादस्य विप्रकृष्टं निदानमाह—

विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानाम् ।
उन्मादहेतुर्भयहर्षपूर्वो मनोऽभिघातो विषमा च चेष्टा ॥३॥

*दुष्टं=धत्तूरबीजादिसहितम् । अशुचि=रजस्वलास्पर्शादि । प्रधर्षणम्=अभिभवः । विषमा चेष्टा=बलवद्विग्रहादिः ॥ ३ ॥

अथोन्मादस्य सन्निकृष्टं निदानमाह—

एकैकशः सर्वशश्च दोषैरत्यर्थमूर्च्छितैः ।
मानसेन च दुःखेन स पञ्चविध उच्यते ।
विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजम् ॥ ४ ॥

अथोन्मादस्य सम्प्राप्तिमाह—

तैरल्पसत्त्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य ।
स्रोतांस्यधिष्ठाय मनोवहानि प्रमोहयन्त्याशु नरस्य चेतः ॥५॥

*अल्पसत्त्वस्य=अल्पसत्त्वगुणस्य । मलाः=वातादयः । बुद्धेर्निवासं हृदयं प्रदूष्येति । एतेनाश्रयस्य दुष्ट्या तदाश्रिताया बुद्धेरपि दुष्टिरुक्ता । मनोवहानि स्रोतांसि=हृदयाश्रितानि दश, एतानि विशेषता बोद्धव्यानि । चरकेण सकलशरीरस्रोतांस्येव मनोऽधिष्ठानत्वेनोक्तानि । प्रमोहयन्ति=विक्रांत कुर्वन्ति ॥ ५ ॥

अथोन्मादस्य सामान्यलक्षणमाह—

धीविभ्रमः सत्त्वपरिप्लवश्च पर्याकुला दृष्टिरधीरता च ।
अबद्धवाक्यं हृदयञ्च शून्यं सामान्यमुन्मादगदस्य लिङ्गम् ॥६॥

*धीविभ्रमः=शुक्तिकायां रजतज्ञानम् । सत्त्वपरिप्लवः=सत्त्वं मनस्तस्य चाञ्चल्यम् । अबद्धवाक्यम्=असंबद्धभाषितम् । शून्यं=स्मृतिशून्यम् ॥ ६ ॥

अथ वातजोन्मादस्य निदानपूर्विकां सम्प्राप्तिमाह—

रूक्षाल्पशीतान्नविरेकधातुक्षयोपवासैरनिलोऽतिवृद्धः ।
चिन्ताऽऽदिदुष्टं हृदयं प्रदूष्य बुद्धिं स्मृतिं चाप्युपहन्ति शीघ्रम्॥७॥

*प्रदूष्य=प्रकर्षेण दूषयित्वा ॥ ७ ॥

अथ वातजोन्मादस्य लक्षणमाह—

अस्थानहास्यस्मितनृत्यगीतवागङ्गविक्षेपणरोदनानि ।
पारुष्यकार्श्यारुणवर्णताश्च जीर्णे बलञ्चानिलजस्य रूपम् ॥ ८ ॥

*अस्थाने=अनवसरे । हास्यादीनि रोदनान्तानि । जीर्णे आहारे । बलं व्याधेः ॥ ८ ॥

अथ पित्तजोन्मादस्य सम्प्राप्तिमाह—

अजीर्णकटूवम्लविदाह्यशीतैर्भोज्यैश्चितं पित्तमुदीर्णवेगम् ।
उन्मादमत्युग्रमनात्मकस्य हृदि स्थितं पूर्ववदाशु कुर्यात् ॥ ९ ॥

*हृदि स्थितं पित्तम् । चितं=सञ्चितम् । पुनः। अजीर्णकटूवम्ल-विदाह्यशीतैर्भोज्यैरुदीर्णवेगं सदुन्मादं कुर्यात् । पूर्ववद् हृदयं प्रदूष्येत्यर्थः ॥ ९ ॥

अथ पित्तजोन्मादस्य लक्षणमाह—

अमर्षसंरम्भविनग्नभावाः सन्तर्जनाभिद्रवणौष्ण्यरोषाः ।
प्रच्छायशीतान्नजलाभिलाषाः पीता च भा पित्तकृतस्य लिङ्गम्॥१०॥

*अमर्षः=असहिष्णुता । संरम्भः=आरभटी, "आडम्बर" इति यावत् । सन्तर्जनं=परित्रासनम् । अभिद्रवणं=पलायनम् । औष्ण्यं-गात्रे । च । उष्णो=दाहविशेषः । "प्रच्छाये"त्यादि=छायायां शीत-योश्चान्नजलयोरभिलाषा ॥ १० ॥

अथ कफजोन्मादस्य निदानपूर्विकां सम्प्राप्तिमाह—

सम्पूरणैर्मन्दविचेष्टितस्य सोष्मा कफो मर्मणि सम्प्रवृद्धः ।
बुद्धिं स्मृतिञ्चाप्युपहन्ति चित्तं प्रमोहयन्सञ्जनयेद्विकारम् ॥११॥

*सम्पूरणैः=भोजनादिभिः । मन्दविचेष्टितस्य=व्यायामरहित-स्य । सोष्मा कफ इति=कफोऽप्युन्मादं करिष्यन्पित्तसहायमपेक्षते व्याधिस्वभावात् । मर्मणि=अत्र मर्मशब्देन हृदयमुच्यते । विकारम्=उन्मादरूपम् ॥ ११ ॥

अथ कफजोन्मादस्य लक्षणमाह—

वाक्चेष्टितं मन्दमरोचकश्च नारीविविक्तप्रियता च निद्रा ।
छर्दिश्च लाला च बलञ्च भुक्ते नखादिशौक्ल्यञ्च कफात्मके स्यात्॥१२॥

*वाक्चेष्टितं मन्दं=वचनमल्पम् । नारीविविक्तप्रियता=नारी-प्रियता, विजनप्रियता च । भुक्ते सति बलं व्याधेः ॥ १२ ॥

अथ सान्निपातिकोन्मादस्य निदानपूर्वकं लक्षणमाह—

यः सन्निपातप्रभवोऽतिघोरः सर्वैः समस्तैः स तु हेतुभिः स्यात् ।
सर्वाणि रूपाणि बिभर्त्ति तादृग्विरुद्धभेषज्यविधिर्विवर्ज्यः ॥ १३ ॥

*स=सान्निपातिक उन्मादः । सन्निपातग्रहणेनैव सर्वात्मकत्वं-

लब्धं, पुनः सर्वैरिति यत्प्रोक्तं तद्रजस्तमःप्रापणार्थं तेन रजस्तमोमिलित-इत्यर्थः। तेन वातादयो रजस्तमोभिर्मनोदोषैर्मिलिताः समस्तैश्च निदानैः कुपिता उन्मादं जनयन्ति। सर्वैर्हेतुभिः समस्तैर्मिलितैः स्यात्। यतोऽन्यो व्याधिः सर्वैर्हेतुभिर्मिलितैरेव भवतीति नियमो नास्ति। अयं तु व्याधिप्रभावात्सर्वैर्हेतुभिर्मिलितैः स्यात्। तादृग्=उन्मादः। विरुद्धभैषज्यविधिरिति कोऽर्थः? त्रिदोषजे प्रत्येकं वातादेः प्रत्यनीका चिकित्सा कार्या, सा च परस्परविरोधिनी, त्रिदोषं हन्ति किञ्चिदेव द्रव्यमामलकादि, न चात्र तद् यौगिकं व्याधिप्रभावादत एव विवर्ज्यः=न चिकित्स्य इत्यर्थः॥ १३॥

अथ मनोदुःखजोन्मादस्य विप्रकृष्टं निदानमाह—

चौरैर्नरेन्द्रपुरुषैररिभिस्तथाऽन्यै-
र्वित्रासितस्य धनबान्धवसंक्षयाद्वा।
गाढं क्षते मनसि च प्रियया रिरंसो-
र्जायेत चोत्कटतरो मनसो विकारः॥ १४॥

अथ मनोदुःखजोन्मादस्य लक्षणमाह—

चित्रं ब्रवीति च मनोऽनुगतं विसंज्ञो
गायत्यथो हसति रोदिति चातिमूढः॥ १५॥

*चित्रम्=आश्चर्यम्। मनोऽनुगतं=गोप्यमपि। विसंज्ञो=विरुद्धज्ञानः। अतिमूढः=अतीव ज्ञानशून्यः। अत्र विकल्पो बोद्धव्यः॥१५॥

अथ विषजन्योन्मादस्य लक्षणमाह—

रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः
श्यावाननो विषकृते तु भवेत्परासुः॥ १६॥

*परासुः=मृतः॥ १६॥

अथोन्मादारिष्टमाह—

अवाङ्मुखस्तून्मुखो वा क्षीणमांसबलो नरः।
जागरूको ह्यसन्देहमुन्मादेन विनश्यति॥ १७॥

अथ देवादिकृतोन्मादस्य सामान्यलक्षणमाह—

अमर्त्यवाग्विक्रमवीर्यचेष्टो ज्ञानादिविज्ञानबलादियुक्तः।
प्रकोपकालो नियतश्च यस्य देवादिजन्मा मनसो विकारः॥१८॥

* अमर्त्त्यवाग्विक्रमवीर्यचेष्टः=न मर्त्त्यस्येव वागादयो यत्र सः । विक्रमः=पराक्रमः । वीर्यं=शौर्यम् । ज्ञानादिविज्ञानबलादियुक्तः= ज्ञानं=बुद्धिः, आदिपदेन तद्भेदा मेधाविचारणास्मृत्यादयो गृह्यन्ते, विज्ञानं=शिल्पादिविषयकं ज्ञानम् , बलम=चेष्टापाटवम् , आदिपदेनाभिमानादि गृह्यते । नियतो वक्ष्यमाणतिथ्यादिभिः । मनोविकारः=उन्मादः ॥ १८ ॥

अथ देवग्रहजुष्टस्य लक्षणमाह—

सन्तुष्टः शुचिरतिदिव्यमाल्यगन्धो-
निस्तन्द्रोऽप्यवितथसंस्कृतप्रभाषी ।
तेजस्वी स्थिरनयनो वरप्रदाता
ब्रह्मण्यो भवति नरः स देवजुष्टः ॥ १९ ॥

* अतिदिव्यमाल्यगन्धः=अतिशयेन दिव्यस्य माल्यस्येव गन्धो-यस्य सः । निस्तन्द्रो=निद्रारहितः । अवितथं=सत्यम् । ब्रह्मण्यः= ब्राह्मणभक्तः ॥ १९ ॥

अथ दैत्याविष्टस्य लक्षणमाह—

संस्वेदी द्विजगुरुदेवदोषवक्ता जिह्माक्षो विगतभयो विमार्गदृष्टिः ।
सन्तुष्टो भवति न चान्नपानजातैर्दुष्टात्मा भवति स देवशत्रुजुष्टः॥२०॥

* विमार्गदृष्टिः=कुमार्गरतः । दुष्टात्मा=दुष्टस्वभावः ॥ २० ॥

अथ गन्धर्वाविष्टस्य लक्षणमाह—

हृष्टात्मा पुलिनवनान्तरोपसेवी स्वाचारः प्रियपरिगीतगन्धमाल्यः ।
नृत्यन्वै प्रहसति चारु चाल्पशब्दं गन्धर्वग्रहपरिपीडितो मनुष्यः ॥२१॥

* हृष्टात्मा=हृष्टजीवात्मा । पुलिनं=तोयोत्थितम् , तटं=वनान्तरं=वनमध्यं, तयोः सेवी । चारु चाल्पशब्दमिति हसनक्रिया-विशेषणम् ॥ २१ ॥

अथ यक्षाविष्टस्य लक्षणमाह—

ताम्राक्षः प्रियतनुरक्तवस्त्रधारी-
गम्भीरो द्रुतगतिरल्पवाक्सहिष्णुः ।
तेजस्वी वदति च किं ददामि कस्मै
यो यक्षग्रहपरिपीडितो मनुष्यः ॥ २२ ॥

अथ पित्राविष्टस्य लक्षणमाह—

प्रेतानां स दिशति संस्तरेषु पिण्डाञ्
शान्तात्मा जलमपि चापसव्यवस्त्रः ।
मांसेप्सुस्तिलगुडपायसाभिलाषी
तद्भक्तो भवति पितृग्रहाभिजुष्टः ॥ २३ ॥

* प्रेतानां=मृतानां, पितॄणाम् । दिशति=ददाति । अपसव्यवस्त्रः=दक्षिणस्कन्धकृतोत्तरीयः ॥ २३ ॥

अथ नागाविष्टस्य लक्षणमाह—

यस्तूर्व्यां प्रसरति सर्पवत्कदा चित् सृक्किण्यौ मुहुरपि जिह्वयाऽवलेढि ।
क्रोधालुर्घृतमधुदुग्धपायसेप्सुर्विज्ञेयः स खलु भुजङ्गमेन जुष्टः ॥ २४ ॥

*प्रसरति=स सर्पवदुरसा चलति । सृक्किण्यौ=ओष्ठप्रान्तौ॥२४॥

अथ राक्षसाविष्टस्य लक्षणमाह—

मांसासृग्विविधसुराविकारलिप्सु-
र्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः ।
क्रोधालुर्विविधबलो निशाविहारी-
शौचद्विड् भवति स राक्षसैर्गृहीतः ॥ २५ ॥

* अतिनिष्ठुरः=निर्दयः ॥ २५ ॥

अथ ब्रह्मराक्षसाविष्टस्य लक्षणमाह—

देवविप्रगुरुद्वेषी वेदवेदाङ्गनिन्दकः ।
आत्मपीडाकरोऽहिंस्रो ब्रह्मराक्षससेवितः ॥ २६ ॥

* अहिंस्रः=अहिंसाशीलः ॥ २६ ॥

अथ पिशाचाविष्टस्य लक्षणमाह—

उद्ध्वस्त्रः कृशपरुषो विरुद्धभाषी दुर्गन्धो भृशमशुचिस्तथाऽतिलोलः ।
बह्वाशी विजनवनान्तरोपसेवी व्याचेष्टंस्त्रसति रुदन्पिशाचजुष्टः॥२७॥

* उद्ध्वस्त्रः=नग्नः, "दिगम्बर" इति विदेहवचनात् । कृशो=निर्मांसः । परुषो=रूक्षः । अतिलोलः=सर्वस्मिन्नन्नपानादौ लोलुपः । व्याचेष्टन्=विरुद्धमाचेष्टन् ॥ २७ ॥

अथ हिंसाऽर्थगृहीतस्य लक्षणमाह—

स्थूलाक्षो द्रुतमटनः सफेनवामी
निद्रालुः पतति च कम्पते च योऽति।
यश्चाद्रिद्विरदनगादिविच्युतः स्या-
त्सोऽसाध्यो भवति तथा त्रयोदशेऽब्दे ॥ २८ ॥

* ग्रहा हिंसाक्रीडापूजाऽर्थं गृह्णन्ति। अत एवोक्तम्—

*अशुचि भिन्नमर्यादं क्षतं वा यदि वाऽक्षतम्।
हिंस्युर्हिंसाविहारार्थं सत्काराथंमथापि वा ॥ १ ॥

* तत्र हिंसाऽर्थगृहीतस्य लक्षणमाह—स्थूलाक्ष इति। "यश्चाद्रि" इत्यादि=यः पर्वतादिपतितः सन् ग्रहैर्गृह्यत इत्यर्थः। आदिशब्देन भित्तिप्रासादादयो गृह्यन्ते। तथा त्रयोदशेऽब्दे सर्व एव=देवादि-गृहीता असाध्याः ॥ २८ ॥

अथ देवादीनामावेशसमयमाह—

देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि।
गन्धर्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ ॥ २९ ॥
पितरः कृष्णपक्षे च पञ्चम्यामपि चोरगाः।
रक्षःपिशाचा रात्रौ च चतुर्दश्यां विशन्ति हि ॥ ३० ॥

*कृष्णपक्षे=अमावास्यायाम्। प्रायशः पदादन्यत्रापि। तिथ्य-भिधानप्रयोजनं लक्षणार्थं, तत्र तिथौ च बलिदानार्थम् ॥

*ननु यदि देवादयो विशन्ति तदा विशन्तस्ते दृश्यन्ते कथं ने-त्यत आह—

*दर्पणादीन्यथा छाया शीतोष्णं प्राणिनो यथा।
स्वमणिं भास्करार्चिश्च यथा देहे च देहधृक्।
विशन्ति च न दृश्यन्ते ग्रहास्तद्वच्छरीरिणाम् ॥ २ ॥

*दर्पणादीनित्यादिशब्देनान्यदपि निर्मलद्रव्यं जलतैलादिद्रवद्र-व्यञ्च गृह्यते। छाया=प्रतिबिम्बम्। स्वमणिः=सूर्यमणिः। देहधृग्॥ जीवात्मा ॥ २ ॥ इति ॥ २९-३० ॥

अथोन्मादस्य चिकित्सामाह—

वातिके स्नेहपानं प्राग्विरेकः पित्तसम्भवे ।
कफजे वमनं कार्यं परो वस्त्यादिकः क्रमः ॥
यच्चोपदेक्ष्यते किञ्चिदपस्मारे चिकित्सितम् ।
उन्मादे तच्च कर्त्तव्यं सामान्याद्दोषदूष्ययोः ॥ ३१ ॥
जलाग्निद्रुमशैलेभ्यो विषमेभ्यश्च तं सदा ।
रक्षेदुन्मादिनं यत्नात्सद्यः प्राणहरं हि तत् ॥ ३२ ॥
ब्राह्मीकूष्माण्डीफलषड्ग्रन्थाशङ्खपुष्पिकास्वरसाः ।
दृष्टा उन्मादहृतः पृथगेते कुष्ठमधुमिश्राः ॥ ३३ ॥

*अयमर्थः । ब्राह्मीरसः (तोला) चत्वारः ४, कुष्ठचूर्णं माषौ द्वौ २, मधुनोऽष्टौ माषाः ८ पेयाः । इत्येको योगः । कूष्माण्डबीजचूर्णमाषा अष्टौ ८ । कुष्ठचूर्णमाषौ द्वौ २ । मधुनोऽष्टौ ८ माषाः । अयं द्वितीयो योगः । वचस्य माषा अष्टौ ८ । कुष्ठचूर्णस्य माषौ द्वौ २ । मधुनोऽष्टौ माषाः ८ । अयं तृतीयो योगः । शङ्खपुष्पीस्वरसः पलैकम् १, कुष्ठचूर्ण-माषद्वयम् २, मधुनोऽष्टौ ८ माषाः पेयाः । अयं चतुर्थो योगः ॥ ३३ ॥

अथ सिद्धार्थकादिघृतमाह—

सिद्धार्थको हिङ्गु वचा करञ्जो देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता कटभी त्वक् कटुत्रयम् ॥ ३४ ॥
समांशानि प्रियङ्गुश्च शिरीषो रजनीद्वयम् ।
वस्तमूत्रेण पिष्टोऽयमगदः पानमञ्जनम् ॥ ३५ ॥
नस्यमालेपनश्चैव स्नानमुद्वर्त्तनं तथा ।
अपस्मारविषोन्मादकृत्याऽलक्ष्मीज्वरापहम् ॥ ३६ ॥
भूतेभ्यश्च भयं हन्ति राजद्वारे च शस्यते ।
सर्पिरेतेन संसिद्धं सगोमूत्रं तदर्थकृत् ॥ ३७ ॥

अथोन्मादिनस्त्रासभयादिकरणमित्याह —

ब्रूयादिष्टविनाशञ्च दर्शयेदद्भुतानि च ।
बद्धं सर्षपतैलाक्तं रक्षेदुत्तानमातपे ॥ ३८ ॥
कपिकच्छ्वाऽथ वा तप्तलौहतैलजलैः स्पृशेत् ।

कशाभिस्ताडयेत्तं वा सुबद्धं विजने गृहे ॥ ३९ ॥
सर्पेणोद्धृतदन्तेन दंशैर्त्सिहैर्गजैश्च तम् ।
त्रासयेच्छस्त्रहस्तैश्च शत्रुभिस्तस्करैस्तथा ॥ ४० ॥
अथवा राजपुरुषा बहिर्नीत्वा सुसंयतम् ।
त्रासयेयुर्वधैरेनं तर्जयन्तो नृपाज्ञया ॥ ४१ ॥
देहदुःखभयेभ्यो हि यतः प्राणभयं भवेत् ।
ततस्तस्य शमं याति सर्वतो विप्लुतं मनः ॥ ४२ ॥
इष्टद्रव्यविनाशेन मनो यस्याभिहन्यते ।
तस्य तत्सदृशप्राप्त्या ज्ञात्वाऽऽश्वासैः शमं नयेत् ॥ ४३ ॥

अथ त्र्यूषणाद्यञ्जनमाह—

त्र्यूषणं हिङ्गु लवणं वचा कटुकरोहिणी ।
शिरीषस्य करञ्जस्य बीजं गौराश्च सर्षपाः ॥ ४४ ॥
गोमूत्रपिष्टैरेभिस्तु वर्त्तिर्नेत्राञ्जने हिता ।
हन्त्युन्मादमपस्मारं तथा चातुर्थकं ज्वरम् ॥ ४५ ॥

अथ सारस्वतचूर्णमाह—

कुष्ठाश्वगन्धे लवणाजमोदे द्वे जीरके त्रीणि कटूनि पाठा ।
माङ्गल्यपुष्पी च समान्यमूनि सर्वैः समानाञ्च वचां विचूर्ण्य ॥४६॥
ब्राह्मीरसेनाखिलमेव भाव्यं वारत्रयं शुष्कमिदं हि चूर्णम् ॥
अक्षप्रमाणं मधुना घृतेन लिह्यान्नरः सप्त दिनानि चूर्णम् ॥ ४७ ॥
सारस्वतमिदं चूर्णं ब्रह्मणा निर्मितं पुरा ।
हिताय सर्वलोकानां दुर्मेधानां विचेतसाम् ॥ ४८ ॥
एतस्याभ्यासतः पुंसां बुद्धिर्मेधा धृतिः स्मृतिः ।
सम्पत्तिः कविताशक्तिः प्रवर्द्धतोत्तरोत्तरम् ॥ ४९ ॥
*माङ्गल्यपुष्पी = शङ्खपुष्पी "शङ्खाहुली"ति लोके ॥ ४६-४९ ॥

अथ विश्वाऽऽद्यचूर्णमाह—

विश्वाऽजमोदरजनीद्वयसैन्धवोग्रायष्ट्याह्वकुष्ठमगधोद्भवजीरकाणाम् ।
चूर्णं प्रभातसमये लिहतः ससर्पिर्वाग्देवता निवसति स्वयमेव वक्त्रे॥५०॥

अथ महाचैतसघृतमाह—

क्वाथे विचूर्णिते क्षिप्त्वा तत्षोडशगुणं जलम् ।

पादशेषं प्रकर्त्तव्यमेष क्राथविधिः स्मृतः ॥ ५१ ॥
दशमूली तथा रास्ना वातारिस्त्रिवृता बला ।
मूर्वा शतावरी चेति क्राथ्यैस्तु कुडवैः पृथक् ॥५२ ॥
कृतैः क्राथैर्घृतप्रस्थद्वयं मृद्वग्निना पचेत् ।
कल्कीकृतैर्वक्ष्यमाणद्रव्यैः सम्यक् पुनः पचेत् ॥ ५३ ॥
विशाला त्रिफला कौन्ती देवदार्वैलवालुकम् ।
स्थिराऽनन्ता रजन्यौ द्वे प्रियङ्गुः सारिवाद्वयम् ॥ ५४ ॥
नीलोत्पलैला मञ्जिष्ठा दन्ती दाडिमकेसरम् ।
विडङ्गं ह्यग्निपत्री च कुष्ठं चन्दनपद्मके ॥ ५५ ॥
तालीशपत्रं बृहती मालतीकुसुमं नवम् ।
अष्टाविंशतिभिः कल्कैरेतैः कर्षमितैः पृथक् ॥ ५६ ॥
चतुर्गुणं जलं दत्त्वा पिष्टैस्तद्विपचेद् घृतम् ।
महाचैतसनामेदं सर्वचेतोविकारनुत् ॥ ५७ ॥
अपस्मारे महोन्मादे मन्देऽग्नौ ज्वरकासयोः ।
वातरक्ते प्रतिश्याये शोषे कार्श्ये तृतीयके ॥ ५८ ॥
मूत्रकृच्छ्रे कटीशूले विसर्पाभिहतेषु च ।
पाण्ड्वामये तथा कण्ड्वां विषे मेहे गरेऽपि च ॥ ५९ ॥
देवादिहतचित्तानां गद्गदानामचेतसाम् ।
शस्तं स्त्रीणाञ्च वन्ध्यानां धन्यमायुर्बलप्रदम् ॥ ६० ॥
अलक्ष्मीपापरक्षोघ्नं सर्वग्रहनिवारणम् ।
हन्ति भ्रमं मदं मूर्च्छां मेधास्मृतिमतिप्रदम् ॥ ६१ ॥

*अग्निपत्री = "अग्निनौती"ति लोके, "अगिया" इति च ॥५१-६१॥

अथ देवाद्याविष्टानां चिकित्सामाह—

पूजाबल्युपहारेष्टिहोममन्त्राञ्जनादिभिः ।
जयेदागन्तुमुन्मादं यथाविधि शुचिर्भिषक् ॥ ६२ ॥

अथ कृष्णाऽऽद्यञ्जनमाह—

कृष्णामरिचसिन्धूत्थमधुगोरोचनाकृतम् ।
अञ्जनं सर्वदेवादिकृतोन्मादहरं परम् ॥ ६३ ॥

अथर्क्षलोमकधूपमाह—

ऋक्षजम्बूकलोमानि शल्लकी लशुनं तथा।
हिङ्गु मूत्रञ्च बस्तस्य धूममस्य प्रयोजयेत्।
एतेन शाम्यति क्षिप्रं बलवानपि यो ग्रहः॥ ६४॥

अथ कल्याणघृतादिप्रयोगमाह—

कल्याणकञ्च युञ्जीत महद् वा चैतसं घृतम्।
तैलं नारायणं वाऽथ महानारायणं तथा॥ ६५॥
ऋते पिशाचादन्येषु प्रतिकूलं न वाऽऽचरेत्।
रोगिणं भिषजं यत् ते क्रुद्धा हन्युर्महौजसः॥ ६६॥

इत्येकविंश उन्मादाधिकारः समाप्तः॥ २१॥

अथ द्वाविंशोऽपस्माराधिकारः॥ २२॥

तत्रापस्मारस्य निदानपूर्विकां सम्प्राप्तिमाह—

चिन्ताशोकादिभिर्दोषाः क्रुद्धा हृत्स्रोतसि स्थिताः।
कृत्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्वते॥ १॥

अथापस्मारसंख्यामाह—

वातात्पित्तात्कफात्सर्वैर्दोषैः स स्याच्चतुर्विधः॥ २॥

अथापस्मारस्य सामान्यलक्षणमाह—

तमःप्रवेशः संरम्भो दोषोद्रेकहतस्मृतेः।
अपस्मार इति ज्ञेयो गदो घोरतरो हि सः॥ ३॥

*संरम्भः=नेत्रविकृतिहस्तपदादिविक्षेपणादिकम्॥ ३॥

अथापस्मारस्य पूर्वरूपमाह—

हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढता।
निद्रानाशश्च तस्मिंश्च भविष्यति भवत्यथ॥ ४॥

*शून्यता हृदयस्यैव। ध्यानम्=विस्मापनम्। मूर्च्छा=मनोमोहः। प्रमूढता=इन्द्रियमोहः। भविष्यति=भाविनि। तस्मिन्=अपस्मारे॥ ४॥

अथ वातजापस्मारस्य लक्षणमाह—

कम्पते प्रदशेद्दन्तान्फेनोद्वामी श्वसित्यपि।

अभितोऽरुणवर्णानि पश्येद्रूपाणि चानिलात् ॥ ५ ॥

अथ पित्तजापस्मारस्य लक्षणमाह—

पीतफेनाङ्गवक्त्राक्षः पीतासृग्रूपदर्शनः ।
सतृष्णोष्णानलव्याप्तलोकदर्शी च पैत्तिके ॥ ६ ॥

*पीतस्यासृग्रूपस्य वा वस्तुनो दर्शनं यस्य स पीतासृग्रूपदर्शनः ॥ ६ ॥

अथ कफजापस्मारस्य लक्षणमाह—

शुक्लफेनाङ्गवक्त्राक्षः शीतो हृष्टाङ्गजो गुरुः ।
पश्येच्छुक्लानि रूपाणि श्लैष्मिको मुच्यते चिरात् ॥ ७ ॥

*शीतः=शीताङ्गः । हृष्टाङ्गजो=हृष्टरोमा । गुरुः=गुरुगात्रता॥७॥

अथ सन्निपातापस्मारस्य लक्षणमाह—

समस्तैर्लक्षणैरेतैर्विज्ञातव्यस्त्रिदोषजः ।
अपस्मारः स चासाध्यो यः क्षीणस्यानवश्च यः ॥ ८ ॥

*स च=त्रिदोषजः, असाध्यः । अथ क्षीणस्य, अनवश्च, एकदोषजोऽप्यसाध्य इत्यर्थः ॥ ८ ॥

अथापस्मारस्यारिष्टलक्षणमाह—

प्रस्फुरन्तश्च बहुशः क्षीणं प्रचलितभ्रुवम् ।
नेत्राभ्याञ्च विकुर्वाणमपस्मारो विनाशयेत् ॥ ९ ॥

*प्रस्फुरन्तं=गात्रस्फुरणयुक्तम् । नेत्राभ्याञ्च विकुर्वाणं=नेत्रे विकृते कुर्वन्तम् ॥ ९ ॥

अथापस्मारस्य प्रकोपसमयमाह—

पक्षाद्वा द्वादशाहाद्वा मासाद्वा कुपिता मलाः ।
अपस्मारं प्रकुर्वन्ति वेगं किञ्चिदथान्तरम् ॥ १० ॥

*पक्षात्पित्तं, द्वादशाहाद्वायुर्मासात्कफः, अपस्मारं करोतीत्यर्थः । वेगं किञ्चिदथान्तरं=किञ्चित्स्वल्पं वेगम् , आन्तरम् , उक्तकालानामन्तरालेऽपि कुर्वन्ति ॥

*ननु हेतुभूतेषु दोषेषु विद्यमानेषु सदैव तद्व्याधिप्रकोपः कथं न स्यादत आह—

*देवे वर्षत्यपि यथा भूमौ बीजानि कानि चित् ।

शरदि प्रतिरोहन्ति तथा व्याधिसमुच्छ्रयाः ॥ ९ ॥

*अयमर्थः-यथा—उत्पत्तिकारणसामग्र्यां सत्यामपि वास्तुकादिबीजानि स्वभावाच्छरद्येव प्ररोहन्ति, तथा हेतुभूतेषु दोषेषु विद्यमानेष्वपि स्वभावादपस्मारो द्वादशाहादिष्वेव वेगं करोतीत्यर्थः ॥ ९ ॥ इति ॥ १० ॥

अथापस्मारस्य चिकित्सामाह—

तैलेन लशुनः सेव्यः पयसा च शतावरी ।
ब्राह्मीरसश्च मधुना सर्वापस्मारभेषजम् ॥ ११ ॥
चूर्णैः सिद्धार्थकादीनां भक्षितैरथवाऽपि तैः ।
गोमूत्रपिष्टैः सर्वाङ्गलेपैः शाम्यत्यपस्मृतिः ॥ १२ ॥
सिद्धार्थशिग्रुकट्वङ्गकिणिहीभिः प्रलेपनम् ।
चतुर्गुणे गवां मूत्रे तैलमभ्यञ्जने हितम् ॥ १३ ॥
*कट्वङ्गः [सोनापाठा] । किणिही] चिरचिरी] ॥ १३ ॥
निर्गुण्डीभववन्दाकनात्रनस्य प्रयोगतः ।
उपैति सहसा नाशमपस्मारो महागदः ॥ १४ ॥
मनोह्वा तार्क्ष्यविष्ठा च शकृत्पारावतस्य च ।
अञ्जनाद्धन्त्यपस्मारमुन्मादञ्च विशेषतः ॥ १५ ॥

*मनोह्वा=मनःशिला । शकृद्=विष्ठा ॥ १५ ॥

यः खादेत् क्षीरभक्ताशी माक्षिकेण वचारजः ।
अपस्मारं महाघोरं चिरोत्थं स जयेद् ध्रुवम् ॥ १६ ॥

*वचा=घोड़वच ॥ १६॥

कूष्माण्डकफलोत्थेन रसेन परिपेषितम् ।
अपस्मारविनाशाय यष्ट्याह्वं स पिबेत्त्र्यहम् ॥ १७ ॥

*त्र्यहमिति । एकस्य पानाद् दिवसत्रयेणैवापस्मारोपशमो भवतीत्यभिप्रायः ॥ १७ ॥

अथ ब्राह्मीघृतमाह—

ब्राह्मीरसवचाकुष्ठशङ्खपुष्पीशृतं घृतम् ।
पुराणं स्यादपस्मारोन्मादग्रहहरं परम् ॥ १८ ॥

*एतस्य प्रक्रिया—पुराणं गोघृतं प्रस्थमितम् । वचाकुष्ठशङ्ख-पुष्पीणां समुदितानां कुडवमितानां कल्केन प्रस्थमितब्राह्मीरसपिष्टेन पचेत् ॥ १८ ॥

अथ कूष्माण्डकघृतमाह—

कूष्माण्डकरसे सर्पिरष्टादशगुणे पचेत् ।
यष्ट्याह्वकल्कं तत्पानमपस्मारविनाशनम् ॥ १९ ॥
हृत्कम्पोऽक्षिरुजा यस्य स्वेदो हस्तादिशीतता ।
दशमूलीजलं तस्य कल्याणाख्यं प्रयोजयेत् ॥ २० ॥

अथ कल्याणचूर्णमाह—

पञ्चकोलं समरिचं त्रिफला विडसैन्धवम् ।
कृष्णाविडङ्गपूतीकयवानीधान्यजीरकम् ।
पीतमुष्णाम्बुना चूर्णं वातश्लेष्मामयापहम् ॥ २१ ॥
अपस्मारे तथोन्मादेऽप्यर्शसां ग्रहणीगदे ।
एतत्कल्याणकं चूर्णं नष्टस्याग्नेश्च दीपनम् ॥ २२ ॥

(ग्रन्थबाह्यम्)

द्वौ कीटमेढ्रौ विधिवदानीय रविवासरे ।
कण्ठे भुजे वा सन्धार्य जयेदुग्रामपस्मृतिम् ॥ २३ ॥

*अयन्तु कीटो नदीतीरे सिकतामध्ये तिष्ठति ॥ २३ ॥

शिग्रुकुष्ठजलाजाजीलशुनव्योषहिङ्गुभिः ।
बस्तमूत्रे शृतं तैलं नावनं स्यादपस्मृतौ ॥ २४ ॥

* जलं=बालकम् । अजाजी=जीरकः । बस्तः=छागः । नाव-नं=नस्यम् ॥ २४ ॥

उन्मादेषु यदुद्दिष्टं पथ्यं नस्याञ्जनौषधम् ।
अपस्मारेऽपि तत्सर्वं प्रयोक्तव्यं भिषग्वरैः ॥ २५ ॥

अथ भूतभैरवरसमाह—

मृतसूताभ्रलोहश्च शिलागन्धश्च तालकम् ।
रसाञ्जनञ्च तुल्यांशं नरमूत्रेण मर्दयेत् ॥ २६ ॥
तद्गोलद्विगुणं गन्धं लौहपात्रे क्षणं पचेत् ।

पञ्चगुञ्जोन्मितं भद्दयमपस्मारहरं परम् ॥ २७ ॥
व्योषं सौवर्चलं हिङ्गु नरमूत्रेण सर्पिषा ।
पिबेत्कर्षमितं पश्चाद्रसोऽयं भूतभैरवः ॥ २८ ॥

इति द्वाविंशोऽपस्माराधिकारः समाप्तः ॥ २२ ॥

अथ त्रयोविंशो वातव्याध्यधिकारः ॥ २३ ॥

तत्र वातव्याधीनां सामान्यतो विप्रकृष्टनिदानान्याह—

कषायकटुतिक्तकप्रमितरूक्षलघ्वन्नतः-
पुरःपवनजागरप्रतरणाभिघातश्रमैः ॥
हिमादनशनात्तथा निधुवनाच्च धातुक्षया-
न्मलादिरयधारणान्मदनशोकचिन्ताभयैः ॥ १ ॥
अतिक्षतजमोक्षणाद्दृढकृतातिमांसक्षया-
दतीव वमनान्नृणामतिविरेचनादामतः ।
पयोदसमये दिनक्षणदयोस्तृतीयांशयो-
र्जरामतिगतेऽशिते शिशिरसंज्ञकालेऽपि च ॥ २ ॥
देहे स्रोतांसि रिक्तानि पूरयित्वाऽनिलो बली ।
करोति विविधान् रोगान्सर्वाङ्गैकाङ्गसंश्रयान् ॥ ३ ॥

*प्रमितमत्र वैपरीत्येनोपसर्गस्तेनापरिमितमित्यर्थः । प्रकर्षेण मितमत्यल्पं वा । लघ्वन्नम्=अतिपुराणं शाल्यादि । कति चिदन्नानि नवान्यपि वातलानि । यत आह गुणरत्नमालायाम्—

*नीवारस्त्रिपुटः सतीनचणकश्यामाकमुद्गाढकी-
निष्पावाश्च मकुष्ठकश्च वरटा मङ्गल्यकः कोद्रवः ॥

*एते वातकरा इति शेषः । नीवारः=प्रसाधिका "तीनी"ति लोके । त्रिपुटः="खेसारी"-ति लोके । सतीनः=कलायः । निष्पावो=राजमाषः "बोडा" इति लोके । मकुष्ठकः="मोठ" इति लोके । वरटा=वरटिका "वरै" इति लोके । मङ्गल्यः=मसूरी । पुरःपवनः=प्राग्वातः । आमतः=आमेन मार्गावरणाद् । यत उक्तम्—

*"वायोर्धातुक्षयात्कोपो मार्गस्यावरणेन च" ॥ १ ॥ इति ।

*पयोदसमये=वर्षासु । जरामतिगतेऽशिते=भुक्तेऽतीव जीर्णतां-गते । "देहे स्रोतांसि" इत्यादिना संप्राप्तिरुक्ता । कषायादिभिर्हेतुभिः, वर्षाऽऽदौ समये हेतुभूते बली, अनिलः=प्रवृद्धो वायुः, विविधान् रोगान् करोति । ते रोगाः कथ्यन्ते, उत्तरत्र-शिरोग्रहे त्यादिना ॥ १-३ ॥

अथ वर्षर्त्वादिकारणप्रबलवातोत्पन्नव्याधिनामान्याह—

शिरोग्रहोऽल्पकृशता जृम्भाऽत्यर्थं हनुग्रहः ।
जिह्वास्तम्भो गद्गदत्वं मिन्मिनत्वञ्च मूकता ॥ ४ ॥
वाचालता प्रलापश्च रसानामनभिज्ञता ।
बाधिर्यं कर्णनादश्च स्पर्शाज्ञत्वं तथाऽर्दितम् ॥ ५ ॥
मन्यास्तम्भोऽत्र गणितो बाहुशोषोऽपबाहुकः ।
वर्णिता चैव विश्वाची ऊर्द्ध्ववात उदीरितः ॥ ६ ॥
आध्मानञ्च प्रत्याध्मानं वाताष्ठीला प्रतिष्ठीला ।
तूनी च प्रतितूनी च वह्निवैषम्यमेव च ॥ ७ ॥
आटोपः पार्श्वशूलञ्च त्रिकशूलं तथैव च ।
मुहुश्च मूत्रणं मूत्रनिग्रहो मलगाढता ॥ ८ ॥
पुरीषस्याप्रवृत्तिश्च गृध्रसी च ततः परा ।
कलायखञ्जता चापि खञ्जता पङ्गुता तथा ॥ ९ ॥
क्रोष्टुशीर्षकखल्ल्यौ च वातकण्टक एव च ।
पादहर्षः पाददाह आक्षेपो दण्डकाभिधः ॥ १० ॥
वातपित्तकृताक्षेपस्तथा दण्डापतानकः ।
अभिघातकृताक्षेप आयामो द्विविधः स्मृतः ॥ ११ ॥
आन्तरश्च तथा बाह्यो धनुर्वातश्च कुब्जकः ।
अपतन्त्रोऽपतानश्च पक्षाघातः खिलाङ्कः ॥ १२ ॥
कम्पः स्तम्भो व्यथा तोदो भेदश्च स्फुरणं तथा ।
रौक्ष्यं कार्श्यञ्च काष्ण्यञ्च शैत्यं लोम्नाञ्च हर्षणम् ॥ १३ ॥
अङ्गमर्दोऽङ्गविभ्रंशः शिरासंकोच एव च ।
अङ्गशोषश्च भीरुत्वं मोहश्च चलचित्तता ॥ १४ ॥
निद्रानाशः स्वेदनाशो बलहानिस्तथैव च ।

शुक्रक्षयो रजोनाशो गर्भनाशः परिभ्रमः ॥ १५ ॥
एत एवाशीतिसंख्या रोगा योगेन रूढितः ।
वातव्याधीतिनामानो मुनिभिः परिकीर्त्तिताः ॥ १६ ॥

*एत एव=शिरोग्रहादय एव । योगेन=वातेन वाताद् व्याधिर्वातव्याधिरिति निरुक्त्या । तदा वातज्वरादिष्वपि प्रसङ्गः स्यादत आह—रूढितः=प्रसिद्धितः । शिरोग्रहादयोऽशीतिरेव वातव्याधिसंख्या प्रसिद्धा न तु वातज्वरादयः ॥ १६ ॥

अथ वातव्याधीनां सामान्यचिकित्सामाह—

मधुरलवणाम्लस्निग्धनस्योष्णनिद्रा-
गुरुरविकरवस्तिस्वेदसन्तर्पणानि ।
दहनजलदशोषाभ्यङ्गसम्मर्दनानि
प्रकुपितपवनानां शान्तिमेतानि कुर्युः ॥ १७ ॥

अथ विशिष्टानां वातव्याधीनां लक्षणानि चिकित्सा च ।

तत्रादौ शिरोग्रहस्य लक्षणमाह—

रक्तमाश्रित्य पवनः कुर्यान्मूर्द्धधराः शिराः ।
रूक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्याच्छिरोग्रहः ॥ १८ ॥

*मूर्द्धधराः=ग्रीवागताः । स पवनः शिरोग्रहः स्यादित्यन्वयः । स चासाध्यः ॥ १८ ॥

अथ शिरोग्रहचिकित्सामाह—

शिरोग्रहे तु कर्त्तव्या शिरोगतमरुत्क्रिया ।
दशमूलीकषायेण मातुलुङ्गरसेन च ॥
शृतेन तैलेनाभ्यङ्गः शिरोवस्तिश्च युज्यते ॥ १९ ॥

अथ जृम्भालक्षणमाह—

पीत्वैकं श्वासमनिलः पुनस्त्यजति वेगवान् ।
आलस्यनिद्रायुक्तश्च स जृम्भ इति कथ्यते ॥ २० ॥

*जृम्भाशब्दस्त्रिलिङ्गः । तथा च "जृम्भस्तु त्रिषु जृम्भणम्" इत्यमरः ॥ २० ॥

अथ जृम्भाचिकित्सामाह—

शुण्ठी पिप्पल्यूषणं दीप्यकञ्च सिन्धूद्भूतं चेति सर्वं पृथग्वा ।

तद्रूपं वा सूक्ष्मचूर्णीकृतं वा जृम्भाऽऽरम्भस्तम्भकृत्स्याच्चदेव॥२१॥

जृम्भावेगे समुत्पन्ने शोभने शयने नरम् ।
स्वापयेत्तेन नियमाज्जृम्भावेगः प्रशाम्यति ॥ २२ ॥
जृम्भावेगः क्षयं याति कटुतैलेन मर्दनात् ॥
भोजनात्स्वादुभोज्यानां तथा ताम्बूलभक्षणात् ॥ २३ ॥

अथ हनुग्रहस्य सनिदानं लक्षणमाह—

जिह्वानिर्लेखनाच्छुष्कभक्षणादभिघाततः ।
कुपितो हनुमूलस्थः स्रंसयित्वाऽनिलो हनुम् ॥ २४ ॥
करोति विवृतास्यत्वमथ वा संवृतास्यताम् ।
हनुग्रहः स तेन स्यात्कृच्छ्राच्चर्वणभाषणम् ॥ २५ ॥

*निर्लेखनं = कर्षणम् । शुष्कं चणकादि । स्रंसयित्वा = अधः कृत्वा । विवृतास्यत्वं = व्यात्तमुखत्वम् । संवृतास्यतां = दन्तलग्नताम् ॥ २४-२५ ॥

अथ हनुग्रहचिकित्सामाह—

संवृतं चिबुकं स्निग्धं स्विन्नमुन्नमयेद्भिषक् ।
विवृतं नमयित्वा तु कुर्यात्प्राप्तामिह क्रियाम् ॥ २६ ॥
पिप्पलीमार्द्रकञ्चापि सञ्चर्व्य च मुहुर्मुहुः ।
निष्ठीवेत्तप्ततोयेन शोधयेद्वदनान्तरम् ॥ २७ ॥
निष्कुल्य लशुनं सम्यक्संक्षुद्य तिलतैलवत् ।
सैन्धवेनान्वितं खादेद्धनुस्तम्भार्दितो नरः ॥ २८ ॥
रसोनगुटिकामाषविदलं परिपेष्य च ।
योजयेत्पिष्टिकां ताञ्च सैन्धवार्द्रकहिङ्गुभिः ॥ २९ ॥
ततस्तु वटकान्कृत्वा तिलतैले पचेच्छनैः ।
भक्षयेत्तान्यथावह्नि हनुस्तम्भात्सुखी भवेत् ॥ ३० ॥
अभ्यज्य पक्वतैलेन स्वेदयेन्मृदुनाऽग्निना ।
वस्तिं विधारयेन्मूर्ध्नि तैलेन परिपूरितम् ॥ ३१ ॥

अथ प्रसारणीतैलमाह—

समूलपत्रशाखायाः प्रसारण्याः शतं पलैः ।
सम्यक्संक्षुद्य सलिले द्रोणमात्रे पचेद्भिषक् ॥ ३२ ॥

सलिलस्य चतुर्थांशं क्वाथं समवशेषयेत्।
ततः पलशते तैले तं कषायं पुनः पचेत् ॥ ३३ ॥
पचेत्पलशतं मस्तु काञ्जिकं मस्तुनः समम्।
ततः शुद्धं पचेद् दुग्धं गव्यं तैलाच्चतुर्गुणम् ॥ ३४ ॥
चित्रकं पिप्पलीमूलं मधुकं सैन्धवं वचा।
शतपुष्पा देवदारु रास्ना च गजपिप्पली ॥ ३५ ॥
प्रसारणीभवं मूलं मांसी रक्तञ्च चन्दनम्।
तथा वातारिमूलञ्च बलामूलञ्च नागरम् ॥ ३६ ॥
तैलस्य चाष्टमांशेन सर्वकल्कानि साधयेत् ॥
नाम्ना प्रसारणीतैलं विख्यातं तत्प्रयुज्यते ॥ ३७ ॥
पाने नस्ये शिरोवस्तौ मर्दने स्वेदने तथा।
प्रयुक्तं वातजान् रोगान्सर्वानपि विनाशयेत् ॥ ३८ ॥
विशेषतो हनुस्तम्भं जिह्वास्तम्भं तथाऽर्दितम् ॥
गद्गदत्वञ्च विश्वाचीं मन्यास्तम्भापबाहुकौ ॥ ३९ ॥
त्रिकशूलं गृध्रसीञ्च खञ्जतां पङ्गुतां तथा।
कलायखञ्जतां खल्लीं स्तम्भं संकोचमेव च ॥ ४० ॥
आन्तरं बाह्यमायामं तथा दण्डापतानकम्।
धनुर्वातञ्च कुब्जत्वं व्यपोहति न संशयः ॥ ४१ ॥
क्षीणानां स्थविराणाञ्च वातसङ्कोचितात्मनाम् ॥
प्रसारयेद्यतोऽङ्गानि तदुक्तैषा प्रसारणी ॥ ४२ ॥

अथ जिह्वास्तम्भलक्षणमाह—

वाग्वाहिनीशिरासंस्थो जिह्वां स्तम्भयतेऽनिलः।
जिह्वास्तम्भः स तेनान्नपानवाक्येष्वनीशता ॥ ४३ ॥

*अनीशता=असामर्थ्यम् ॥ ४३ ॥

अथ जिह्वास्तम्भचिकित्सामाह—

जिह्वास्तम्भे यथाऽवस्थं वातव्याधिचिकित्सितम्।
सामान्योक्ता क्रिया चात्रार्दितस्यापि हिता मता ॥ ४४ ॥

अथ गद्गदमिन्मिनमूकानां लक्षणमाह—

आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः ॥

नरान्करोत्यवचनान्मूकमिन्मिनगद्गदान् ॥ ४५ ॥

*अवचनान्=अत्राभावे ईषदर्थे नञ्, तेन ईषद्वचनान् । स एव वायुः प्रबलश्चेत्तदा मूकान्=अवचनान् । मिन्मिनान्=सानुनासिकवचनान् । गद्गदान्=लुप्तपदव्यञ्जनाभिधायिनः । करोतीत्यन्वयः । एषां समानाधिकरणत्वेऽपि दुष्टेरनुत्कर्षादिना अदृष्टवशाद्वा भेदो बोद्धव्यः ॥ ४५ ॥

अथ गद्गदमिन्मिनमूकानां चिकित्सा ।

तत्र सारस्वतघृतमाह—

प्रस्थं घृतस्य पलिकैः शिग्रुवचालवणधातकीलोध्रैः ।
आजे पयसि सपाठैः सिद्धं सारस्वतं नाम्ना ॥ ४६ ॥
विधिवदुपयुज्यमानं जडगद्गदमूकतां क्षणाज्जित्वा ।
स्मृतिमतिमेधाप्रतिभाः कुर्यात्सुस्पष्टवाग्भवति ॥ ४७ ॥

अथ कल्याणावलेहमाह—

सहरिद्रा वचा कुष्ठं पिप्पली विश्वभेषजम् ।
अजाजी चाजमोदा च यष्टीमधुकसैन्धवम् ॥ ४८ ॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ।
तच्चूर्णं सर्पिषा लेह्यं प्रत्यहं भक्षयेन्नरः ॥ ४९ ॥
एकविंशतिरात्रेण भवेच्छ्रुतिधरो नरः ।
मेघदुन्दुभिनिर्घोषो मत्तकोकिलनिस्वनः ॥ ५० ॥

अथ प्रलापस्य लक्षणमाह—

स्वहेतुकुपिताद्वातादसंबद्धं निरर्थकम् ।
वचनं यन्नरो ब्रूते स प्रलापः प्रकीर्त्तितः ॥ ५१ ॥

अथ प्रलापचिकित्सामाह—

सतगरवरतिक्तारेवताम्भोदतिक्ता-
नलदतुरगगन्धाभारतीहारहूराः ।
मलयजदशमूलीशङ्खपुष्प्यः सुपक्वाः-
प्रलपनमपहन्युः पानतो नातिदूरात् ॥ ५२ ॥

*वरतिक्तोऽत्र पर्पटः । नलदम्=उशीरम् । भारती=ब्राह्मी । हारहूरा=द्राक्षा ॥ ५२ ॥

अथ रसाज्ञानस्य लक्षणमाह—

भुञ्जानस्य नरस्यान्नं मधुरप्रभृतीन् रसान् ।
रसज्ञा यन्न जानाति रसाज्ञानं तदुच्यते ॥ ५३ ॥

अथ रसाज्ञानचिकित्सामाह—

घर्षेज्जिह्वां जडां सिन्धुत्र्यूषणैः साम्लवेतसैः ।
अम्लवेतसकाभावे चुक्रं दातव्यमीरितम् ॥ ५४ ॥

अथ किराततिक्ताऽऽदिकल्कमाह—

किराततिक्तका कटूवी कुटजस्य फलं वचा ।
ब्राह्मी फलश्च पालाशं सर्जिका कृष्णजीरकम् ॥ ५५ ॥
पिप्पली पिप्पलीमूलं चित्रं नागरमूषणम् ।
एषां कल्कैर्मुहुर्घर्षेज्जिह्विकामार्द्रिकारसैः ॥ ५६ ॥
तेन सम्यग्विजानाति रसना सकलान् रसान् ।
कल्कः किराततिक्ताऽऽदिर्जिह्वायाः शून्यतां हरेत् ॥ ५७ ॥

(बाधिर्यकर्णनादयोर्लक्षणं चिकित्सा च तदधिकारे वक्ष्यामः ॥)

अथ त्वक्शून्यताया लक्षणमाह—

स्पृश्यमाना त्वचा या तु शोतोष्णं मृदु कर्कशम् ।
न जानाति बुधैस्त्वक् साशून्येति परिकोर्त्तिता ॥ ५८ ॥

अथ त्वक्शून्यताचिकित्सामाह—

सुप्तवाते त्वसृङ्मोक्षं कारयेद् बहुशो भिषक् ।
दद्याच्चालवणाङ्गारधूमैस्तैलसमन्वितैः ॥ ५९ ॥

अथार्दितस्य सम्प्राप्तिपूर्वकं लक्षणमाह—

उच्चैर्व्याहरतोऽत्यर्थं खादतः कठिनानि च ।
हसतो जृम्भतो भाराद्विषमाच्छयनासनात् ॥ ६० ॥
शिरोनासौष्ठचिबुकललाटेक्षणसन्धिगः ।
अर्दयत्यनिलो वक्त्रमर्दितं जनयेत्ततः ॥ ६१ ॥
वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते ।
शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम् ॥ ६२ ॥
ग्रीवाचिबुकदन्तानां तस्मिन्पार्श्वे च वेदना ॥
तमर्दितमिति प्राहुर्व्याधिं व्याधिविशारदाः ॥ ६३ ॥

*व्याहरतः=वदतः। कठिनानि=पूगफलादीनि। विषमाच्छयनासनात्=ग्रीवाऽऽदिवैपरीत्येन शयनादासनाच्च। अर्दयति=पीडयति। ततः=तदनन्तरम्। अर्दितं जनयेत्। अर्दिते जाते किं स्यात्? तदाह—वक्रीभवतीत्यादि। अपवर्त्तते=वक्रा भवति। चलति=कम्पते। वाक्सङ्गः=वाङ्निरोधः। "नेत्रादीनामि"त्यादिशब्देन भ्रूगण्डनासिकाऽऽदीनां ग्रहणम्। वैकृतं=वेदनास्फुरणवक्रत्वादि। "ग्रीवे"त्यादि=यस्मिन् पार्श्वेऽर्दितं तस्मिन् पार्श्वे ग्रीवाऽऽदीनां वेदना॥ ६०-६३॥

अथ सलक्षणमर्दितस्य भेदमाह—

वातात्पित्तात्कफाच्च स्यात्त्रिविधं तत्समासतः।
लालास्रावो व्यथा कम्पः स्फुरणं हनुवाग्ग्रहः॥ ६४॥
ओष्ठयोः श्वयथुः शूलं चार्दिते वातजे भवेत्॥ ६५॥
पीतमास्यं ज्वरस्तृष्णा पित्तजे मोहधूपने।
गण्डे शिरसि मन्यायां शोथस्तम्भः कफात्मके॥ ६६॥

अथार्दितासाध्यलक्षणमाह—

क्षीणस्यानिमिषाक्षस्य प्रसक्ताव्यक्तभाषिणः।
न सिध्यत्यर्दितं गाढं त्रिवर्षं वेपनस्य च॥ ६७॥

*अनिमिषाक्षस्य=निमेषासमर्थचक्षुषः। प्रसक्तं=प्रकर्षेण लग्नम्, अव्यक्तञ्च भाषितुं शीलं यस्य, तस्यार्दितं न सिध्यति। त्रिवर्षम्=अतीतवर्षत्रयम्, अथ वा—त्रयाणां चक्षुर्नासामुखानां वर्षः=स्रावो यत्र तत्। वेपनस्य=कम्पनशीलस्य, तस्य गाढमतिशयेन न सिध्यतीत्यन्वयः॥ ६७॥

अथार्दितरोगचिकित्सामाह—

स्नेहपानानि नस्यञ्च भोज्यान्यनिलहन्ति च।
उपनाहाश्च शस्यन्ते नावनं वस्तयोऽर्दिते॥ ६८॥

*वस्तिरत्र शिरोवस्तिरेव॥ ६८॥

दशमूलकषायेण मातुलुङ्गरसेन वा।
वलया पञ्चमूल्या वा क्षीरं वातात्मके हितम्॥ ६९॥
पिष्टं मांसघृतं जग्ध्वा नवनीतेन सोऽर्दिती।

क्षीरमांसरसैर्भुक्त्वा दशमूलीरसं पिबेत् ॥ ७० ॥
अर्दिते पित्तजे शीतान्स्नेहांश्चैव विनिर्दिशेत् ।
घृतवस्तिप्रसेकश्च क्षीरमेकं तथैव च ॥ ७१ ॥
जिह्मीभूताननो मूको दाहवान्योऽर्दिती भवेत् ।
कुर्यात्प्रतिक्रियां तस्य वातपित्तविनाशिनीम् ॥ ७२ ॥
श्लेष्मभागे क्षयं नीते बृंहणैः समुपाचरेत् ।
अर्दिते शोथसंयुक्ते वमनं च प्रशस्यते ॥ ७३ ॥
रसोनकल्कं तिलतैलमिश्रं खादेन्नरो योऽर्दितरोगयुक्तः ।
तस्यार्दितं नाशमुपैति शीघ्रं वृन्दं घनानामिव वायुवेगात् ॥७४॥

अथ मन्यास्तम्भस्य निदानपूर्वकं लक्षणमाह—

दिवास्वप्नासनस्थानविकृतोद्र्ध्वनिरीक्षणैः ।
मन्यास्तम्भं प्रकुरुते स एव श्लेष्मणाऽऽवृतः ॥ ७५ ॥

*आसनस्थानविकृतोद्र्ध्वनिरीक्षणैः=आसनेन स्थानेन वाऽतिशयेन विकृतं ग्रीवाऽऽदिविकृतं यथा स्यादेवमुपरि भागे यन्निरीक्षणं-तेन स एव कुपितो वातः श्लेष्मणाऽऽवृतो मन्यास्तम्भं करोति। ग्रीवायाः पश्चाद्भागे चतुर्दशशिरा मन्यासंज्ञाः। तथा चामरसिंहः "पश्चाद्ग्रीवाशिरा मन्याः" इति। तासां स्तम्भं करोति च ॥ ७५ ॥

अथ मन्यास्तम्भचिकित्सामाह—

दशमूलीकृतं क्वाथं पञ्चमूल्याऽपि कल्पितम् ।
रूक्षं स्वेदं तथा नस्यं मन्यास्तम्भे प्रयोजयेत् ॥ ७६ ॥
तैलेनाज्येन वा ग्रीवामभ्यज्यार्कदलैरथ ।
एरण्डपत्रैराच्छाद्य स्वेदयेद् बहुशो भिषक् ॥ ७७ ॥
कुक्कुटाण्डद्रवैरुष्णैः सैन्धवाज्यसमन्वितैः ।
ग्रीवां सम्मर्दयेत्तेन मन्यास्तम्भः प्रशाम्यति ॥ ७८ ॥

अथ बाहुशोषलक्षणमाह—

अंसदेशे स्थितो वायुः शोषयेदंसबन्धनम् ।
अंसबन्धनशोषात्स्याद् बाहुशोषः सवेदनः ॥ ७९ ॥

अथ बाहुशोषचिकित्सामाह—

बाहुशोषे पिबेद् भुक्त्वा सर्पिः कल्याणकं महत् ।

बलामूलशृतं तोयं सैन्धवेन समन्वितम् ।
बाहुशोषकरे वाते मन्यास्तम्भे च शस्यते ॥ ८० ॥

अथापबाहुकलक्षणमाह—

शिराः सङ्कोच्य बाहुस्थः स कुर्यादपबाहुकम् ॥ ८१ ॥

*स = वायुः, बाहुस्थः । शिराः = बाहुस्थशिराः ॥ ८१ ॥

अथापबाहुकचिकित्सामाह—

परमौषधमपबाहुकमन्यास्तम्भोद्‌र्ध्वजत्रुगतरोगे ।
शीतलजलेन नस्यं तदुपशमे जिङ्गिनी च पुरः ॥ ८२ ॥
मूलं बलायास्त्वथ पारिभद्रजं तथाऽऽत्मगुप्तास्वरसं पिबेद्वा ।
युञ्जीत यो माषरसेन नस्यं भवेदसौ वज्रसमानबाहुः ॥ ८३ ॥

*बलाया मूलं कल्कीकृतं पिबेत्, तथा पारिभद्रमूलञ्च । पारिभद्रोऽत्र "फरहद" इति लोके वातहरत्वात् ॥ ८३ ॥

अथ माषतलमाह—

माषातसीयवकुरण्टककण्टकारी-
गोकण्टटुण्टुकजटाकपिकच्छुतोयैः ।
कार्पासकास्थिशणबीजकुलत्थकोल-
क्वाथेन वस्तपिशितस्य रसेन चापि ॥ ८४ ॥
शुण्ठया समागधिकया शतपुष्पया च
सैरण्डमूलकपुनर्नवया सरण्या ।
रास्नाबलाऽमृतलताकटुकैर्विपक्वं-
माषाख्यमेतदपबाहुहरं हि तैलम् ॥ ८५ ॥

अथ विश्वाचीलक्षणमाह—

तलं प्रत्यङ्गुलीनां याः कण्डरा बाहुपृष्ठतः ।
बाह्वोः कर्मक्षयकरी विश्वाची सा निगद्यते ॥ ८६ ॥

*कण्डरा = महास्नायुः। तलं = हस्तस्योपरिभागः, तलशब्दोऽत्रोपरिवाचकः, यथाभूमितलमिति । तेनायमर्थः—बाहुपृष्ठतः = बाह्वोः पृष्ठं-बाहुपृष्ठमारभ्या । तलं = प्रतिहस्ततलं, यावल्लक्ष्यीकृत्य; अङ्गुलीनां याः कण्डरास्ताः सन्दूष्य; बाह्वोः प्रसारणाकुञ्चनादिकर्मक्षयकरी भवति।सा इह वातव्याधिषु "विश्वाची"त्युच्यते । बाह्वोरिति द्वित्वं सम्भवपरम्,

एकस्मिन्नपि बाहौ विश्वाची भवति ॥ ८६ ॥

अथ विश्वाचीचिकित्सामाह—

दशमूलीबलामाषक्वाथं तैलाज्यमिश्रितम् ।
सायं भुक्त्वा पिबेन्नस्यं विश्वाच्यामपबाहुके ॥ ८७ ॥

अथ माषादितैलमाह—

माषसिन्धुबलारास्नादशमूलकहिङ्गुभिः ।
वचाशिवजटाऽऽह्याभिः सिद्धं तैलं सनागरम् ॥ ८८ ॥
ऊर्ध्वं भक्ताशनाद्धन्याद् बाहुशोषापबाहुकौ ।
विश्वाचीमुद्धतां चापि पक्षाघातं तथाऽर्दितम् ॥ ८९ ॥

अथोर्ध्ववातलक्षणमाह—

अधःप्रतिहतो वायुः श्लेष्मणा मारुतेन च ।
करोत्युद्गारबाहुल्यमूर्ध्ववातः स उच्यते ॥ ९० ॥

*वायुः=समानवायुः । मारुतेन=अपानवायुना स्वहेतुदुष्टेन । अधःप्रतिहतः=अधोनिरुद्धः ॥ ९० ॥

अथोर्ध्ववातचिकित्सामाह—

भागा दश विश्वायास्तत्तुल्या बृद्धदारकस्यापि ।
त्रय एव च पथ्यायाश्चतुरंशं हिङ्गु संभृष्टम् ॥ ९१ ॥
एकः सैन्धवभागस्तत्तुल्यं चित्रकं चात्र ।
संबृद्धमूर्ध्ववातं हन्त्येतच्चूर्णितं भुक्तम् ॥ ९२ ॥

*अत्र बृद्धदारकालाभे त्रिवृन्मूलं ग्राह्यम् ॥ ९१-९२ ॥

अथाध्मानलक्षणमाह—

साटोपमत्युग्ररुजमाध्मातमुदरं भृशम् ।
आध्मानमिति जानीयाद्घोरं वातनिरोधजम् ॥ ९३ ॥

*आटोपो=गुडगुडाशब्दः । भृशमाध्मातं वातपूर्णभस्त्रावत् । वातनिरोधजम्=अधोवातनिरोधजम् ॥ ९३ ॥

अथाध्मानचिकित्सामाह—

आध्माने लङ्घनं पूर्वं दीपनं पाचनं ततः ।
फलवर्त्तिक्रियां कुर्याद्बस्तिकर्म च शोधनम् ॥ ९४ ॥

अथ नारायणचूर्णमाह—

कर्षमात्रा भवेत्कृष्णा त्रिवृता स्यात्पलोन्मिता ।
खण्डादपि पलं ग्राह्यं चूर्णमेकत्र कारयेत् ।
मधुनाऽक्षमितं लिह्याच्चूर्णमाध्माननाशनम् ॥ ९५ ॥

अथ दारुषट्कलेपमाह—

दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः ।
लिम्पेदुष्णैरम्लपिष्टैः शूलाध्मानयुतोदरम् ॥ ९६ ॥

*हैमवती=वचा ॥ ९६ ॥

अथ महानाराचरसमाह—

अभयाऽऽरग्वधो धात्री दन्ती तिक्ता स्नुही त्रिवृत् ।
मुस्ता प्रत्येकमेतानि ग्राह्याणि पलमात्रया ॥ ९७ ॥
तानि संकुट्य सर्वाणि जलाढकयुगे पचेत् ।
तत्र तोयेऽष्टमं भागं कषायमवशेषयेत् ॥ ९८ ॥
निस्त्वग्जैपालबीजानि नवानि पलमात्रया ।
तनुवस्त्रधृतान्येव तस्मिन्क्वाथे शनैः पचेत् ॥ ९९ ॥
ज्वालयेदनलं मन्दं यावत्क्वाथो घनो भवेत् ।
ततः खल्वे क्षिपेद्भागानष्टौ जैपालबीजतः ॥ १०० ॥
भागांस्त्रीन्नागराद् द्वौ च मरिचाद् द्वौ च पारदात् ।
गन्धकाद् द्वौ च तानीह यावद्यामं विमर्दयेत् ॥ १०१ ॥
रसो नाराचनामाऽयं भक्षितो रक्तिकामितः ।
जलेन शीतलेनैव रोगानेतान्विनाशयेत ॥ १०२ ॥
आध्मानं शूलमानाहं प्रत्याध्मानं तथैव च ।
उदावर्त्तं तथा गुल्ममुदराणि हरत्यसौ ॥ १०३ ॥
वेगे शान्ते तु भुञ्जीत शर्करासहितं दधि ।
ततस्तत्सैन्धवेनापि ततो दध्योदनं मनाक् ॥ १०४ ॥

अथ प्रत्याध्मानलक्षणमाह—

विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितम् ।
प्रत्याध्मानं विजानीयात्कफव्याकुलितानिलम् ॥ १०५ ॥

*विमुक्तपार्श्वहृदयं=पार्श्वहृदये विहाय जातम्, तदेव=आध्मानम् ।

कफव्याकुलितानिलं=कफेनावरुद्धवातम् ॥ १०५ ॥

अथ प्रत्याध्मानचिकित्सामाह—

प्रत्याध्माने समुत्पन्ने कुर्याद्वमनलङ्घने ।
दीपनादीनि युञ्जीत पूर्ववद्वस्तिकर्म च ॥ १०६ ॥

अथ वाताष्ठीलालक्षणमाह—

नाभेरधस्तात्सञ्जातः सञ्चारी यदि वाऽचलः ॥ १०७ ॥
अष्ठीलावद्घनो ग्रन्थिरूर्ध्वमायत उन्नतः ।
वाताष्ठीलां विजानीयाद् बहिर्मार्गनिरोधिनीम् ॥ १०८ ॥

*अष्ठीला=वर्तुलः पाषाणखण्डः । आयतः=दीर्घः । वाताष्ठीला=वाताष्ठीलेति स्वरूपपरं, न तु विशेषपरं व्यावर्त्तकाभावात् । बहिर्मार्गनिरोधिनीं=शिश्नभगगुदनिरोधिनीम् । तेन मूत्रमरुन्मलावरोधः सूचितः ॥ १०७-१०८ ॥

अथ प्रत्यष्ठीलालक्षणमाह—

एतामेव रुजायुक्तां वातविण्मूत्ररोधिनीम् ।
प्रत्यष्ठीलामिति वदेज्जठरे तिर्यगुत्थिताम् ॥ १०९ ॥

*एतामेव=अष्ठीलामेव । जठरे तिर्यगुत्थितामिति भेदः ॥ १०९ ॥

अथ वाताष्ठीलाप्रत्यष्ठीलयोश्चिकित्सामाह—

अष्ठीलायाः क्रिया कार्या गुल्मस्यान्तरविद्रधेः ।
चूर्णं हिङ्ग्वादिकं चात्र पिबेदुष्णेन वारिणा ॥ ११० ॥

अथ हिङ्ग्वादिचूर्णमाह—

हिङ्गुग्रन्थिकधान्यजीरकवचाचव्याग्निपाठाशटी-
वृक्षाम्लं लवणत्रयं त्रिकटुकं क्षारद्वयं दाडिमम् ।
पथ्यापौष्करवेतसाम्लहपुषा योज्यं तदेभिः कृतं-
चूर्णं भावितमेतदार्द्रकरसैः स्याद् बीजपूरद्रवैः ॥ १११ ॥

अथ तूनीलक्षणमाह—

अधो या वेदना याति वर्चोमूत्राशयोत्थिता ।
भिन्दन्तीव गुदोपस्थं सा तूनी नामतो मता ॥ ११२ ॥

*उपस्थं=शिश्नं भगश्च ॥ ११२ ॥

अथ प्रतितूनीलक्षणमाह—

गुदोपस्थोत्थिता सैव प्रतिलोमं विधाविता ।
वेगैः पक्वाशयं याति प्रतितूनीति सोच्यते ॥ ११३ ॥

*अधस्तादुत्थितोर्ध्वगामिनी । वेगैः=वेदनावेगैः, मुहुर्मुहुः स्वभावोपशमोपलक्षितैः । "से"त्यनेन "भिन्दन्तीवे"त्यतिदिश्यते । सा नामतः प्रतितूनी । सैव वेदनावेगैरुत्पत्तिप्रशमलक्षितैः ॥ ११३ ॥

अथ तूनीप्रतितूनीचिकित्सामाह—

तून्याश्च प्रतितून्याश्च प्रशस्ताः स्नेहबस्तयः ।
पिबेद्वा स्नेहलवणं पिप्पल्यादिमथाम्बुना ।
उष्णेन रामठं क्षारं प्रगाढमथ वा घृतम् ॥ ११४ ॥

अथ त्रिकशूललक्षणमाह—

स्फिगस्थ्नोः पृष्ठवंशास्थ्नोर्यः सन्धिस्तत्त्रिकं मतम् ।
तत्र वातेन या पीडा त्रिकशूलं तदुच्यते ॥ ११५ ॥

अथ त्रिकशूलचिकित्सामाह—

कारयेद्वालुकास्वेदं त्रिकशूले प्रयत्नतः ।
यद्वाऽधस्तात्करीषाग्निं धारयेत्सततं नरः ॥ ११६ ॥

अथ त्रयोदशाङ्गगुग्गुलुमाह—

आभाऽश्वगन्धा हपुषा गुडूची शतावरी गोक्षुरकश्च रास्ना ।
श्यामा शताह्वा च शटी यवानी सनागरा चेति समं विचूर्ण्य ॥११७॥
सर्वैः समं गुग्गुलुमत्र दद्यात्क्षिपेदिहाज्यञ्च तदर्द्धभागम् ।
तद्भक्षयेदर्द्धपिचुप्रमाणं प्रभातकाले पयसाऽथ यूषैः ॥ ११८ ॥
मद्येन वा कोष्णजलेन चाथ क्षीरेण वा मांसरसेन वाऽपि ।
त्रिकग्रहे जानुहनुग्रहे च वाते भुजस्थे चरणस्थिते च ॥ ११९ ॥
सन्धिस्थिते चास्थिगते च तस्मिन्मज्जस्थिते स्नायुगते च कोष्ठे ।
रोगान्हरेद्वातकफानुविद्धान्वातेरितान्हृद्ग्रहयोनिदोषान् ॥ १२० ॥
भग्नास्थिविद्धेषु च खञ्जतायां सगृध्रसीके खलु पक्षघाते ।
महौषधं गुग्गुलुमेतमाहुस्त्रयोदशाङ्गं भिषजः पुराणाः ॥ १२१ ॥

*आभा=बब्बूलः । तथा च—

"आभा बब्बूलपर्यायः कथितः कोविदैरिह" ॥ इति ॥११७-१२१॥

अथ मुहुर्मूत्रमूत्रनिग्रहयोर्निदानपूर्वकं लक्षणमाह—

मारुतेऽविगुणे वस्तौ मूत्रं सम्यक्प्रवर्त्तते ।
विकारा विविधाश्चापि तस्मिन्दुष्टे भवन्ति हि ॥ १२२ ॥

*अविगुणे=अनुलोमे । प्रतिलोमे तु विकारा विविधाः=मुहुर्मूत्रमूत्रनिग्रहादयः ॥ १२२ ॥

अथ मुहुर्मूत्रणमूत्रनिग्रहयोश्चिकित्सामाह—

बलामूर्वात्वचश्चूर्णं ससितं कर्षसम्मितम् ।
पिबेत्कुडवदुग्धेन मुहुर्मूत्रणशान्तये ॥ १२३ ॥
पथ्याविभीतधात्रीणां चूर्णं चूर्णं मृतायसः ।
मधुना सह संलीढं मुहुर्मूत्रणशान्तिकृत् ॥ १२४ ॥
यवक्षारस्य चूर्णन्तु संयोज्य सितया सह ।
भक्षयेन्नियतं तस्य प्रशाम्येन्मूत्रनिग्रहः ॥ १२५ ॥
कूष्माण्डस्य तु बीजानि बीजानि त्रपुषस्य च ।
वस्तौ सन्धारयेत्तेन प्रशाम्येन्मूत्रनिग्रहः ॥ १२६ ॥
आमलक्याश्च कल्केन वस्तिभागं प्रलेपयेत् ।
तेन प्रशाम्यति क्षिप्रं नियमान्मूत्रनिग्रहः ॥ १२७ ॥
मेहनस्याथ योनेर्वा मुखस्याभ्यन्तरे शनैः ।
घनसारयुतां वर्त्तिं धारयेन्मूत्रनिग्रहे ॥ १२८ ॥

अथ गृध्रसीलक्षणमाह—

स्फिक्पूर्वोरुकटीपृष्ठजानुजङ्घापदं क्रमात् ।
गृध्रसी स्तम्भरुक्तोदैर्गृह्णाति स्पन्दते मुहुः ॥ १२९ ॥
वाताद्वातकफाभ्यां सा विज्ञेया द्विविधा पुनः ।
वातजायां भवेत्तोदो देहस्यातीव वक्रता ॥ १३० ॥
जानुजङ्घोरुसन्धीनां स्फुरणं स्तम्भता भृशम् ॥ १३१ ॥
वातश्लेष्मोद्भवायान्तु गौरवं वह्निमार्दवम् ।
तन्द्रा मुखप्रसेकश्च भक्तद्वेषस्तथैव च ॥ १३२ ॥

*गृध्रसी वातजा केवला स्फिगादिपदपर्यन्तं स्तम्भरुक्तोदैर्गृह्णाति । क्रमाद्=वृद्धिक्रमात् । तेन यथा यथा बर्द्धते तथा तथा स्फिगादीन्याक्रामति, नात्र ग्रहणे निर्देशक्रमनियमः । तथा-मुहुः स्पन्दते=

स्फिगादिषु शिराकम्पं करोतीत्यर्थः ॥ १२९-१३२ ॥

अथ गृध्रसीचिकित्सामाह—

गृध्रस्याऽऽर्त्तं नरं सम्यग् रेकेण वमनेन वा ।
ज्ञात्वा निरामं दीप्ताग्निं वस्तिभिः समुपाचरेत् ॥ १३३ ॥
नादौ वस्तिविधिं कुर्याद्यावदूर्ध्वं न शुध्यति ।
स्नेहो निरर्थकः स स्याद्भस्मन्येव हुतं यथा ॥ १३४ ॥
तैलमेरण्डजं प्रातर्गोमूत्रेण पिबेन्नरः ।
मासमेकं प्रयोगोऽयं गृध्रस्यूरुग्रहापहः ॥ १३५ ॥

तैलं घृतं चार्द्रकमातुलुङ्गरसं सचुक्रं सगुडं पिबेद्वा ।
कट्यूरुपृष्ठत्रिकशूलगुल्मगृध्रस्युदावर्त्तहरः प्रयोगः ॥ १३६ ॥

निष्कुष्यैरण्डबीजानि पिष्ट्वा क्षीरे विपाचयेत् ।
तत्पानन्तु कटीशूले गृध्रस्यां परमौषधम् ॥ १३७ ॥
एरण्डमूलं विल्वञ्च बृहती कण्टकारिका ।
कषायो रुचकोपेतः पीतो वङ्क्षणवस्तिजम् ।
गृध्रसीजं हरेच्छूलं चिरकालानुबन्धि च ॥ १३८ ॥

*रुचकं=सौवर्चलम् ॥ १३८ ॥

गोमूत्रैरण्डतैलाभ्यां कृष्णाचूर्णं पिबेन्नरः ।
दीर्घकालोत्थितां हन्ति गृध्रसीं कफवातजाम् ॥ १३९ ॥

सिंहास्यदन्तीकृतमालकानां पिबेत्कषायं रुबुतैलमिश्रम् ।
यो गृध्रसीनष्टगतिः प्रसुप्तः स शीघ्रगः स्याद्धि किमत्र चित्रम् ॥१४०॥

बृहन्निम्बतरोः सारो वारिणा परिपेषितः ।
स पीतो नाशयेत्त्विप्रमसाध्यामपि गृध्रसीम् ॥ १४१ ॥
शेफालिकादलैः क्वाथो मृद्वग्निपरिपाचितः ।
दुर्वारं गृध्रसीरोगं पीतमात्रः प्रणाशयेत् ॥ १४२ ॥

*अत्र शेफालिका=निर्गुण्डी ॥ १४२ ॥

अथ रास्नागुग्गुलुमाह—

रास्नायास्तु पलं चैकं पञ्च कर्षाणि गुग्गुलोः ।
सर्पिषा वटिकां कृत्वा भक्षयेद् गृध्रसीहरीम् ॥ १४३ ॥

अथ रास्नासप्तककाथमाह—

रास्नाऽमृताऽऽरग्वधदेवदारुत्रिकण्टकैरण्डपुनर्नवानाम् ।
क्वाथं पिबेन्नागरचूर्णमिश्रं जङ्घोरुपृष्ठत्रिकपार्श्वशूली ॥१४४॥

अथ पथ्याऽऽदिगुग्गुलुमाह—

पथ्याबिभीतामलकीफलानां शतं क्रमेण द्विगुणाभिवृद्धम् ।
प्रस्थेन युक्तञ्च पलङ्कषाणां द्रोणे जले संस्थितमेकरात्रम् ॥ १४५ ॥
अर्द्धावशिष्टं क्वथितं कषायं भाण्डे पचेत्तत्पुनरेव लौहे ।
अमूनि वह्नेरवतार्य दद्याद् द्रव्याणि सञ्चूर्ण्य पलार्द्धकानि ॥१४६॥
विडङ्गदन्तीत्रिफलागुडूचीकृष्णात्रिवृन्नागरकोषणानि ।
यथेष्टचेष्टस्य नरस्य शीघ्रं हिमाम्बुपानानि च भोजनानि ॥१४७॥
निषेव्यमाणो विनिहन्ति रोगान्सगृध्रसीं नूतनखञ्जताञ्च ।
प्लीहानमुग्रं जठराग्निगुल्मं पाण्डुत्वकण्डूवमिवातरक्तम् ॥१४८॥
पथ्याऽऽदिको गुग्गुलुरेष नाम्ना ख्यातः क्षिताविप्रमितप्रभावः ।
बलेन नागेन समं मनुष्यं जवेन कुर्यात्तुरगेण तुल्यम् ॥ १४९ ॥
आयुःप्रकर्षं विदधाति चक्षुर्बलं तथा पुष्टिकरो विषघ्नः ।
क्षतस्य सन्धानकरो विशेषाद्रोगेषु शस्तः सकलेषु तज्ज्ञैः ॥१५०॥

अथ खञ्जस्य पङ्गोश्च लक्षणमाह—

वायुः कट्याश्रितः सक्थ्नः कण्डरामाक्षिपेद्यदा ।
खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्वधात् ॥ १५१ ॥

*सक्थ्नः=कट्यादिगुल्फस्य । कण्डरां=महास्नायुम् । आक्षिपेद्=गमनादौ कम्पयेत् । वधाद्=गमनादिक्रियाघातात् ॥१५१॥

अथ खञ्जपङ्गुचिकित्सामाह—

उपाचरेदभिनवं खञ्जं पङ्गुमथापि च ॥
विरेकास्थापनस्वेदगुग्गुलुस्नेहवस्तिभिः ॥ १५२ ॥

अथ कलायखञ्जस्य लक्षणमाह—

कम्पते गमनारम्भे खञ्जन्निव च लक्ष्यते ।
कलायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम् ॥ १५३ ॥

*गमनारम्भे कम्पते । एतस्य खञ्जादयमेव भेदः । "कलायखञ्ज" इति शास्त्रे रूढा संज्ञा न तु यौगिकी ॥ १५३ ॥

अथ कलायखञ्जचिकित्सामाह—

क्रमः कलायखञ्जस्य खञ्जपङ्ग्वोरिव स्मृतः ।
विशेषात्स्नेहनं कर्म कार्यमत्र विचक्षणैः ॥ १५४ ॥

अथ क्रोष्टुकशीर्षलक्षणमाह—

वातशोणितजः शोथो जानुमध्ये महारुजः ।
ज्ञेयः क्रोष्टुकशीर्षस्तु स्थूलः क्रोष्टुकशीर्षवत् ॥ १५५ ॥

*क्रोष्टुः=शृगालः ॥ १५५ ॥

अथ क्रोष्टुकशीर्षचिकित्सामाह—

गुग्गुलुं क्रोष्टुशीर्षे तु गुडूचीत्रिफलाऽम्भसा ।
क्षीरेणैरण्डतैलं वा पिबेद्वा वृद्धदारकम् ॥ १५६ ॥

*गुग्गुलुं शुद्धं कर्षमितम् । गुडूचीत्रिफलाऽम्भसा=गुडूचीपथ्याविभीतामलकैः समुदितैश्चतुष्कर्षमितैः, प्रस्थमितेन जलेन पक्त्वा क्वाथेनोष्णेन पलद्वयमितेन गुग्गुलुं पिबेत् । एरण्डतैलं कर्षमितं क्षीरेण गव्येन पलपरिमितेन पिबेत् । वृद्धदारकचूर्णं वा दुग्धेन गव्येन पलचतुष्टयमितेन पिबेत् ॥ १५६ ॥

रसैस्तित्तिरमांसस्य पीतैर्गुग्गुलुसंयुतैः ।
वातरक्तक्रियाभिश्च जयेज्जम्बूकमस्तकम् ॥ १५७ ॥

अथ खल्लीलक्षणमाह—

खल्ली तु पादजङ्घोरुकरमूलावमोटिनी ॥ १५८ ॥

*अवमोटिनी=परिवर्त्तनशीला ॥ १५८ ॥

अथ खल्लीचिकित्सामाह—

कुष्ठसैन्धवयोः कल्कश्चुक्रतैलसमन्वितः ।
सुखोष्णो मर्दने योज्यः खल्लीशूलनिवारणः ॥ १५९ ॥

अथ वातकण्टकलक्षणमाह—

रुक् पादे विषमे न्यस्ते श्रमाद्वा जायते यदा ।
वातेन गुल्फमाश्रित्य तमाहुर्वातकण्टकम् ॥ १६० ॥

अथ वातकण्टकचिकित्सामाह—

रक्तावसेचनं कुर्यादभीक्ष्णं वातकण्टके ।
पिबेदैरण्डतैलं वा दहेत्सूचीभिरेव च ॥ १६१ ॥

*अभीक्ष्णं=पुनःपुनः ॥ १६१ ॥

अथ पाददाहलक्षणमाह—

पादयोः कुरुते दाहं पित्तासृक्सहितोऽनिलः ।
विशेषतश्चङ्क्रमणे पाददाहं तमादिशेत् ॥ १६२ ॥

अथ पाददाहचिकित्सामाह—

वातरक्तक्रमं कुर्यात्पाददाहे विशेषतः ।
मसूरविदलैः पिष्टैः शृतशीतेन वारिणा ॥
चरणौ लेपयेत्सम्यक्पाददाहप्रशान्तये ॥ १६३ ॥
नवनीतेन संलिप्तौ वह्निना परितापितौ ।
मुच्येते चरणौ क्षिप्रं परितापात्सुदारुणात् ॥ १६४ ॥

अथ पादहर्षलक्षणमाह—

हृष्येते चरणौ यस्य भवतश्च प्रसुप्तकौ ।
पादहर्षः स विज्ञेयः कफवातप्रकोपजः ॥ १६५ ॥

*हृष्येते=रोमाञ्चितौ भवतः । प्रसुप्तकौ=झिनिझिनीयुक्तौ ॥१६५॥

अथ पादहर्षचिकित्सामाह—

पादहर्षे तु कर्त्तव्यः कफवातहरो विधिः ॥ १६६ ॥

अथाक्षेपकस्य सम्प्राप्तिपूर्वकं सामान्यलक्षणमाह—

यदा तु धमनीः सर्वाः कुपितोऽभ्येति मारुतः ।
तदा क्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चलः ॥
मुहुराक्षेपणाद्वायुराक्षेपक इति स्मृतः ॥ १६७ ॥

*मुहुर्मुहुर्देहमाक्षिपति=गजारूढस्येव पुरुषस्य गात्रं दोलयति । किंविशिष्टो मारुतः ? मुहुश्चलः=वारंवारं सञ्चरणशीलः । अयं वायुराक्षेपक इति स्मृतः । देहस्य यद् मुहुराक्षेपणं=चालनं, ततः ॥१६७॥

अथाक्षेपकस्य चतुरो भेदानाह—

पित्तश्लेष्मान्वितो वायुर्वायुरेव च केवलः ।
कुर्यादाक्षेपकं चान्यं चतुर्थमभिघातजम् ॥ १६८ ॥

*पित्तान्वितः श्लेष्मान्वितश्च केवलश्च वायुः, आक्षेपकत्रितयं कुर्यात् । अन्यं चतुर्थमभिघातजम् । अन्यो दण्डाद्यभिघातजो वायुश्चतुर्थमाक्षेपकं कुर्यादित्यर्थः ॥ १६८ ॥

अथ केवलवातोत्पन्नाक्षेपकस्य लक्षणमाह—

पाणिपादशिरःपृष्ठश्रोणीः स्तभ्नाति मारुतः ।
दण्डवत्स्तब्धगात्रस्य दण्डकः सोऽनुपक्रमः ॥ १६९ ॥

*अयं वातजाक्षेपको दण्डाख्यः सोऽनुपक्रमः । स्वस्वभावादेव साध्यः । अत्र च मुहुर्मुहुराक्षेपणं बोद्धव्यम् ॥ १६९ ॥

अथ कफयुक्तवातोत्पन्नदण्डापतानकस्य लक्षणमाह—

कफावृतो यदा वायुर्धमनीष्वेव तिष्ठति ।
स दण्डवत्स्तम्भयति कृच्छ्रो दण्डापतानकः ॥ १७० ॥

*दण्डापतानकः=स आक्षेपको दण्डापतानकाख्यः । कृच्छ्रः=कष्टसाध्यः । अत्र च मुहुर्मुहुराक्षेपणं बोद्धव्यम् । आगन्तुजाक्षेपकस्य लक्षणं सामान्यमेव बोद्धव्यम् ॥ १७० ॥

अथ चतुष्प्रकाराक्षेपकस्य चिकित्सा ।

तत्र महाबलातैलमाह—

बलामूलकषायस्य दशमूलीशृतस्य च ।
यवकोलकुलत्थानां क्वाथस्य पयसस्तथा ॥ १७१ ॥
अष्टावष्टौ स्मृता भागास्तैलादेकस्तदेकतः ।
पचेदवाप्य मधुरं गणं सैन्धवसंयुतम् ॥ १७२ ॥
तथाऽगुरुं सर्जरसं सरलं देवदारु च ।
मञ्जिष्ठां पद्मकं कुष्ठमेलां कालानुसारिवाम् ॥ १७३ ॥
मांसीं शैलेयकं पत्रं तगरं सारिवां वचाम् ।
शतावरीमश्वगन्धां शतपुष्पां पुनर्नवाम् ॥ १७४ ॥
तत्साधुसिद्धं सौवर्णे राजते मृन्मयेऽपि वा ।
प्रक्षिप्य कलशे सम्यक्स्वनुगुप्तं निधापयेत् ॥ १७५ ॥
एतन्महाबलातैलं प्रयुक्तमविलम्बितम् ।
सर्वानाक्षेपकादींस्तु वातव्याधीन्व्यपोहति ॥ १७६ ॥
हिक्कां श्वासमधीमन्थं गुल्मं कासं सुदुस्तरम् ।
षण्मासादुपयुक्तं तदन्त्रवृद्धिश्च नाशयेत् ॥ १७७ ॥
यथाबलमतो मात्रां सूतिकायै च दापयेत् ।
या च गर्भार्थिनी नारी क्षीणशुक्रश्च यः पुमान् ॥ १७८ ॥

क्षीणवाते मर्महते ह्यभिघातहते तथा ।
भग्ने श्रमाभिपन्ने च सर्वथैतत्प्रयुज्यते ॥ १७९ ॥
एतद्धि राज्ञा कर्त्तव्यं कर्त्तव्यं राजपूजितैः ॥
सुखिभिः सुकुमारैश्च धनिभिर्मानवैः सदा ॥ १८० ॥

*एकतः=एकत्र । अवाप्य=प्रक्षिप्य ॥ १७१-१८० ॥

अथान्तरायामलक्षणमाह—

अङ्गुलीगुल्फजठरहृद्वक्षोगलसंश्रितः ।
स्नायुप्रतानमनिलस्तदाऽऽक्षिपति वेगवान् ॥ १८१ ॥
विष्टब्धाक्षः स्तब्धहनुर्भग्नपार्श्वः कफं वमन् ॥ १८२ ॥
अभ्यन्तरे धनुरिव यदा नमति मानवः ।
तदा सोऽभ्यन्तरायामं कुरुते मारुतो बली ॥ १८३ ॥

*यदा स बली मारुतोऽभ्यन्तरायामं कुरुते । तदङ्गुल्यादिसंश्रितोऽनिलः । स्नायुरत्रोपलक्षणम् । तेन शिराकण्डरयोरपि ग्रहणम् । आक्षिपति=कम्पयति । तदा स मानवः । विष्टब्धाक्षः=स्तब्धनेत्रः । भग्नपार्श्वः=भग्ने इव पार्श्वे यस्य सः ॥ १८१-१८३ ॥

अथ बाह्यायामलक्षणमाह—

महाहेतुर्बली वायुः सशिराः स्नायुकण्डराः ।
मन्यापृष्ठाश्रिता बाह्याः संशोष्यानामयेद् बहिः ॥१८४॥
यत्र तं बहिरायामं प्रवदन्ति भिषग्वराः ।
तमसाध्यं बुधाः प्राहुर्वक्षःकट्यूरुभञ्जनम् ॥१८५॥

*वक्षःकट्यूरुभञ्जनम् । तत्रापि यो वक्षःकट्यूरून् , भनक्ति=संमर्दयति, तमसाध्यं प्राहुः ॥ १८४-१८५ ॥

अथ तयोश्चिकित्सामाह—

बाह्यायामेऽन्तरायामे विधेयाऽर्दितवत्क्रिया ॥१८६॥

अथ धनुःस्तम्भलक्षणमाह—

धनुस्तुल्यो नमेद्यस्तु स धनुःस्तम्भसंज्ञितः ।
विवर्णो बद्धवदनः स्रस्ताङ्गो नष्टचेतनः ॥
प्रस्विद्यँश्च धनुःस्तम्भी दशरात्रं न जीवति ॥१८७॥

*अन्तरायामेऽङ्गुल्यादिष्वाक्षेपः स्तब्धाक्षत्वादिकश्च भवति ।

धनुःस्तम्भे तु धनुर्वन्नमनमात्रमित्येतयोर्भेदः । विवर्णो बद्धवदनः = बन्धोऽत्र चिबुकस्य ज्ञेयः ॥१८७॥

अथ कुब्जकलक्षणमाह—

हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक् ॥
क्रुद्धो वायुर्यदा कुर्यात्तदा तं कुब्जमादिशेत् ॥१८८॥

*यदेत्युक्त्वा यदि वेति विकल्पार्थस्तेन न पुनरुक्तिदोषः । ननु अन्तरायामः क्रोडनतो भवति, बहिरायामः पृष्ठनतो भवति, ताभ्यामस्य को भेदः ? उच्यते—अन्तरायामबहिरायामयोः प्रकृतस्यैवान्तःशरीरस्य बहिः शरीरस्य च नमनम्, अत्र तु हृदयं पृष्ठं वा शरीराद् बहिर्भवतीति भेदः ॥१८८॥

अथ धनुर्वातकुब्जकयोश्चिकित्सामाह—

बाह्यायामेऽन्तरायामे धनुःस्तम्भे च कुब्जके ॥
योज्यं प्रसारणीतैलं तेन तेषां शमो भवेत् ॥१८९॥
वातव्याधिषु सामान्या याः क्रियाः कथिताः पुरा ।
कर्त्तव्या एव ताः सर्वास्तैलमेतद्विशेषतः ॥ १९० ॥

अथापतन्त्रकलक्षणमाह—

क्रुद्धः स्वैः कोपनैर्वायुः स्थानादूर्ध्वं प्रपद्यते ।
पीडयन्हृदयं गत्वा शिरः शङ्खौ च पीडयन् ॥ १९१ ॥
धनुर्वन्नमयेद् गात्राण्याक्षिपेन्मोहयेत्तथा ।
स कृच्छ्रादुच्छ्वसेदुच्चैः स्तब्धाक्षोऽथ निमीलकः ।
कपोत इव कूजेच्च निःसंज्ञः सोऽपतन्त्रकः ॥१९२॥

*स्थानात् = पक्वाशयात् । ऊर्ध्वं शिर उद्दिश्य । आक्षिपेद् = चालयेत् । अथ, निमीलकः = निमीलिताक्षः स्तब्धाक्षो वा । यत्रैतानि भवन्ति सोऽपतन्त्रकः ॥१९१-१९२ ॥

अथापतन्त्रकचिकित्सामाह—

अथापतन्त्रकेणार्त्तमातुरं नापतर्पयेत् ।
निरूहवस्तिं वमनं सेवयेन्न कदा चन ॥ १९३ ॥
श्वसनाः कफवाताभ्यां रुद्धास्तस्य विमोक्षयेत् ॥
तीक्ष्णैः प्रधमनैः संज्ञां तासु मुक्तासु विन्दति ॥ १९४ ॥

*श्वसना: = प्रश्वासोच्छ्वासवहा धमनीः ॥ १९३-१९४ ॥

अथ मरिचादिनस्यमाह—

मरिचं शिग्रुबीजानि विडङ्गञ्च फणिज्जकम् ।
एतानि सूक्ष्मचूर्णानि दद्याच्छीर्षविरेचने ॥ १९५ ॥

*फणिज्जको = मरुबकः ॥ १९५ ॥

अथ हरीतक्यादियोगमाह—

हरीतकी वचा रास्ना सैन्धवं साम्लवेतसम् ॥ १९६ ॥
घृतमार्द्रकसंयुक्तमपतन्त्रकनाशनम्
अम्लवेतसकाभावे चुक्रं दातव्यमीरितम् ॥ १९७ ॥

अथापतानकलक्षणमाह—

दृष्टिं संस्तभ्य संज्ञाञ्च हत्वा कण्ठेन कूजति ।
हृदि मुक्ते नरः स्वास्थ्यं याति मोहं वृते पुनः ।
वायुना दारुणं प्राहुरेके तमपतानकम् ॥ १९८ ॥
गर्भजातनिमित्तश्च शोणितातिस्रवाच्च यः ॥
अभिघातनिमितश्च न सिध्यत्यपतानकः ॥ १९९ ॥

*दृष्टिं = रूपग्रहणशक्तिम् । संस्तभ्य = नाशयित्वा ॥१९८-१९९॥

अथापतानकचिकित्सामाह—

अथापतानकेनार्त्तमस्रुताक्षमवेपनम् ।
अखट्वापातिनं चैव त्वरया समुपाचरेत् ॥ २०० ॥
अपतानकिने शस्तं दशमूलीश्रृतं जलम् ।
पिप्पलीचूर्णसंयुक्तं जीर्णे मांसरसौदनम् ॥ २०१ ॥
तैलेन मर्दनं चैव तथा तीक्ष्णं विरेचनम् ।
स्रोतोविशोधनं पश्चात् सर्पिष्पानं हितं स्मृतम् ॥ २०२ ॥
हन्त्यभुक्तवता पीतमम्लं दध्यपतानकम् ।
मरिचेन समायुक्तं स्नेहवस्तिरथापि वा ॥ २०३ ॥

अथ पक्षाघातलक्षणमाह—

गृहीत्वाऽर्द्धं तनोर्वायुः शिराः स्नायूर्विशोष्य च ।
पक्षमन्यतरं हन्ति सन्धिबन्धान्विमोक्षयन् ॥ २०४ ॥
कृत्स्नोऽर्द्धकायस्तस्य स्यादकर्मण्यो विचेतनः ।

एकाङ्गवातं तं केचिदन्ये पक्षवधं विदुः ॥ २०५ ॥

*अर्द्धम्=अर्द्धनारीश्वरवत् । पक्षं=बाहुपार्श्वोरुजङ्घाऽऽदिभागम् । अन्यतरं=वामं दक्षिणं वा । विमोक्षयन्=शिथिलीकुर्वन् । अकर्मण्यः=कर्मासमर्थः । विचेतनः=ईषत्स्पर्शादिज्ञानयुक्तः॥२०४-२०५॥

अथ पक्षाघातस्य साध्यासाध्यज्ञानार्थमाह—

दाहसन्तापमूर्च्छाः स्युर्वायौ पित्तसमन्विते ॥
शैत्यशोथगुरुत्वानि तस्मिन्नेव कफावृते ॥ २०६ ॥

*दाहो बाह्यः, सन्ताप आभ्यन्तरः । एतल्लक्षणमन्यत्रापि वातव्याधौ बोद्धव्यं, सामान्यतो वायोरिति निर्दिष्टत्वात् ॥ २०६ ॥

अथ पक्षाघातस्य साध्यत्वादिकमाह—

शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ।
साध्यमन्येन संयुक्तमसाध्यं क्षयहेतुकम् ॥ २०७ ॥

*शुद्धः=केवलः । अन्येन=पित्तेन कफेन वा । क्षयहेतुकं=क्षयो धातुक्षयस्तत्कुपितवातनिमित्तकम् ॥ २०७ ॥

अथ तस्यैवापरमसाध्यलक्षणमाह—

गर्भिणीसूतिकाबालवृद्धक्षीणेष्वसृक्क्षये ॥
पक्षाघातं परिहरेद्वेदनारहितो यदि ॥ २०८ ॥

*"वेदनारहितो यदी"ति भिन्नमसाध्यलक्षणम् ॥ २०८ ॥

अथ पक्षाघातचिकित्सा ।

तत्र माषादिक्काथमाह—

माषात्मगुप्तावातारिवाट्यालकजटाशृतम् ॥ २०९ ॥
हिङ्गुसैन्धवसंयुक्तं पक्षाघातं विनाशयेत् ॥
माषिके हिङ्गुसिन्धूत्थे जरणाद्यास्तु शाणिकाः ॥ २१० ॥

अथ ग्रन्थिकादितलमाह—

ग्रन्थिकाग्निकणाशुण्ठीरास्नासैन्धवकल्कितम् ॥
माषक्वाथशृतं तैलं पक्षाघातं व्यपोहति ॥ २११ ॥

अथ माषादितैलमाह—

माषात्मगुप्ताऽतिविषोरुबूकरास्नाशताह्वालवणैः सुपिष्टैः ॥
चतुर्गुणे माषबलाकषाये तैलं शृतं हन्ति हि पक्षघातम् ॥ २१२ ॥

अथ सर्वाङ्गवातलक्षणमाह—

सर्वाङ्गपवने क्रुद्धे गात्रस्फुरणभञ्जने ॥
वेदनाभिः परीताश्च स्फुटन्तीवास्य सन्धयः ॥ २१३ ॥

*सन्धयो वेदनाभिः परीता युताः स्फुटन्तीव ॥ २१३ ॥

अथ सर्वाङ्गवातचिकित्सामाह—

सर्वाङ्गगतमेकाङ्गगतश्चापि समीरणम् ।
तैलावगाहनं हन्ति तोयवेगमिवाचलः ॥ २१४ ॥

अथ स्थाननामलक्ष्यलक्षणान् वातव्याधीनाह—

स्थाननामानुरूपैश्च लिङ्गैः शेषान्विनिर्दिशेत् ।
सर्वेष्वेतेषु संसर्गं पित्ताद्यैरुपलक्षयेत् ॥ २१५ ॥
प्रथमं ह्रस्वकेशत्वं ततो वाचालताऽपि च ।
आटोपः पार्श्वशूलश्च पुरीषस्यातिगाढता ॥ २१६ ॥
तथा मलाप्रवृत्तिश्च कम्पः स्तम्भश्च रूक्षता ।
कार्श्यं कार्ष्ण्यश्च शैत्यञ्च लोमहर्षो व्यथा तथा ॥ २१७ ॥
तोदो भेदः शिरास्फूर्त्तिरङ्गमर्दोऽङ्गशुष्कता ।
संकोचश्चाङ्गविभ्रंशो मोहश्चञ्चलचित्तता ॥ २१८ ॥
निद्रानाशः स्वेदनाशो बलहानिश्च भीरुता ।
शुक्रक्षयो रजोनाशो गर्भनाशः परिश्रमः ॥ २१९ ॥

*आटोपो=गुडगुडाशब्दः । तोदः=सूचीव्यधनेनेव पीडा । भेदो=विदारणेनेव व्यथा । अङ्गविभ्रंशः=अङ्गस्य स्थानत्यागेन स्खलनम् । निद्रानाशो, निद्राऽल्पत्वमपि । गर्भनाशः=आमगर्भपातः, "गर्भशय्यायां वाताधिष्ठानाद् गर्भाग्रहणमि"ति जेज्जटः । परिश्रमः=आयासं विना श्रमः ॥ २१५-२१९ ॥

अथोक्तवातव्याधिचिकित्सामाह—

सामान्यवातरोगाणां या चिकित्सा प्रवक्ष्यते ।
एषां सा तु विधातव्या तयैते यान्ति संक्षयम् ॥ २२० ॥

अथान्यप्रकारेण वातव्याधिं निरूपयन्नाह—

एवंविधानि रूपाणि करोति कुपितोऽनिलः ।
हेतुस्थानविशेषेण भवेद्रोगविशेषकृत् ॥ २२१ ॥

*एवंविधानि रूपाणि शिरोग्रहादीनि, अशीतिः। हेत्वित्यादिहेतुविशेषः पित्तश्लेष्माद्यावृतत्वादिः। यथा श्लेष्मावृतो वायुर्मन्यास्तम्भं करोति। स्थानविशेषः कोष्ठादिः। यथा—

"तत्र कोष्ठाश्रिते दुष्टे निग्रहो मूत्रवर्चसोः" ॥२॥ इत्यादि ॥२२१॥

अथ हेतुविशेषेण वातव्याधिविशेषानाह—

उदाने पित्तसंयुक्ते दाहो मूर्च्छा भ्रमः क्लमः।
अस्वेदहर्षौ मन्दाग्निः शीतता च कफावृते ॥ २२२ ॥
प्राणे पित्तावृते छर्दिर्दाहश्चैवोपजायते।
दौर्बल्यं सदनं तन्द्रा वैरस्यञ्च कफावृते ॥ २२३ ॥

*प्राणो=हृदयाश्रयो वायुः ॥ २२३ ॥

स्वेदो दाहस्तृषा मूर्च्छा समाने पित्तसंयुते।
कफेन सक्ते विण्मूत्रे गात्रहर्षश्च जायते ॥ २२४ ॥

*कफेन संयुक्ते। समाने विण्मूत्रे, सक्ते=अवरुद्धे भवतः। गात्रहर्षो=रोमाञ्चः ॥ २२४ ॥

अपाने पित्तसंयुक्ते दाहौष्ण्यं रक्तमूत्रता।
अधःकाये गुरुत्वञ्च शीतता च कफावृते ॥ २२५ ॥

*अत्र गुदाश्रयोऽपानः ॥ २२५ ॥

व्याने पित्तावृते दाहो गात्रविक्षेपणं क्लमः।
स्तम्भोऽथ दण्डकश्चापि शूलशोथौ कफावृते ॥ २२६ ॥

*दण्डकः=आक्षेपकभेदः ॥ २२६ ॥

अथ तेषां चिकित्सामाह—

वाते सपित्ते कुर्वीत वातपित्तहरीः क्रियाः।
सकफे तत्र कुर्वीत वातश्लेष्महरीं क्रियाम् ॥ २२७ ॥

अथ रसादिधातुगतवायूनां लक्षणान्याह—

त्वग्रूक्षा स्फुटिता सुप्ता कृशा कृष्णा च तुद्यते।
आतन्यते सरागा च सर्वरुक्त्वग्गतेऽनिले ॥ २२८ ॥

*सर्वरुक्=समस्तत्वग्व्यथा। त्वग्गते=त्वक्छब्देनात्र रस उच्यते त्वगाधार्यत्वात्तेन रसगत इत्यर्थः ॥ २२८ ॥

रुजस्तीव्राःससन्तापा वैवर्ण्यं कृशताऽरुचिः ।
गात्रे चारूंषि भुक्तस्य स्तम्भश्चासृग्गतेऽनिले ॥ २२९ ॥

*अरूंषि=व्रणानि । भुक्तस्य=भुक्तेत्यत्राध्यवसितादित्वात् कर्त्तरि क्तः, तेन भुक्तवतः । स्तम्भः सन्तर्पणेन रक्तवृद्धेः ॥ २२९ ॥

गुर्वङ्गं तुद्यते स्तब्धं दण्डमुष्टिहतं यथा ।
सरुक्स्तिमितमत्यर्थं वाते मांससमाश्रिते ॥ २३० ॥

*दण्डमुष्टिताडितमिव तुद्यते । स्तिमितं=निश्चलमित्यर्थः । मांसमेदसोर्गतवातयोरेकलिङ्गत्वम्, अदूरान्तरेण प्रत्यासत्तेराश्रयप्रभावात् ॥ २३० ॥

तथा मेदःश्रितः कुर्याद्ग्रन्थीन्मन्दरुजो व्रणान् ॥ २३१ ॥

*तथा मेदः श्रितो मांसगवत् । दूरेण प्रत्यासत्तेरस्थिरूपाया भेदाच्च कुर्याद्, ग्रन्थीनित्यादिर्विशेषः ॥ २३१ ॥

भेदोऽस्थिपर्वणां सन्धिशूलं मांसबलक्षयः ।
अस्वप्नः सतता रुक् च वाते दुष्टेऽस्थिसंस्थिते ।
वाते मज्जगते पीडा न कदा चित्प्रशाम्यति ॥ २३२ ॥

*मज्जगतेऽस्थिगतवद् । यथा मेदोगतो मांसगतवत्स्यात् । पीडाऽत्र कदा चिन्न शाम्यत्ययं विशेषः ॥ २३२ ॥

क्षिप्रं मुञ्चति बध्नाति शुक्रं गर्भमथापि वा ।
विकृतिं जनयेच्चापि शुक्रस्थः कुपितोऽनिलः ॥ २३३ ॥

*शुक्रं बध्नाति=स्खलयत्येव न । गर्भं क्षिप्रं मुञ्चति=आममेव पातयति । बध्नाति=मूढं करोति, वातदुष्टशुक्रारब्धत्वात् । विकृतिं=शुक्रस्य वर्णान्तरत्वादिरूपां, गर्भस्य विकृताङ्गत्वादिरूपां जनयति॥२३३॥

अथ रसादिधातुगतवायुचिकित्सामाह—

वायौ त्वगाश्रिते स्नेहाभ्यङ्गं स्वेदश्च कारयेत् ।
रक्तस्थे शीतलाँल्लेपान्विरेकं रक्तमोक्षणम् ॥ २३४ ॥
मांसमेदोगते वाते सविरेकं निरूहणम् ।
अस्थिमज्जगते स्नेहं बहिरन्तश्च योजयेत् ॥ २३५ ॥

अथ केतकादितैलमाह—

केतकनागबलाऽतिबलानां यद्बहुलेन रसेन विपक्वम् ।

तैलमनल्पतुषोदकसिद्धं मारुतमस्थिगतं विनिहन्ति ॥ २३६ ॥
हर्षोऽन्नपानं शुक्रस्थे बलशुक्रकरं हितम् ॥ २३७ ॥

अथ स्थानविशेषेण वातव्याधिविशेषः ।

तत्र कोष्ठगतवायुलक्षणमाह—

वाते कोष्ठाश्रिते दुष्टे निग्रहो मूत्रवर्चसोः ।
ब्रध्नहृद्रोगगुल्मार्शःपार्श्वशूलश्च जायते ॥ २३८ ॥

*अथ कोष्ठलक्षणमाह—

*स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृदुण्डुकः फुस्फुसश्च कोष्ठ इत्यभिधीयते ॥ ३ ॥

*उण्डुकः "पेठ" इति लोके । एतेन कोष्ठशब्देन सर्व एवाशयाः कथ्यन्ते । तथाऽपि विशेषार्थमामाशयादिगतवातलक्षणान्यपि पृथग्वक्ष्यन्ते ॥ २३८ ॥

अथ कोष्ठगतवातचिकित्सामाह—

पाचनीयै रसैर्युक्तैरन्यैर्वा पाचयेन्मलान् ।
विशेषतः पिबेत्क्षीरं नरः कोष्ठगतेऽनिले ॥ २३९ ॥

अथामाशयगतवायुलक्षणमाह—

हृत्पार्श्वोदरनाभीरुक्तृष्णोद्गारविसूचिकाः ।
कासः कण्ठास्यशोषश्च श्वासश्चामाशयेऽनिले ॥ २४० ॥

*अथामाशयस्य लक्षणमाह चरकः—

*नाभिस्तनान्तरं जन्तोराहुरामाशयं बुधाः ॥ इति ॥ २४० ॥

अथामाशयगतवायुचिकित्सामाह—

आमाशयस्थे त्वनिले प्रशस्तं प्राग् लङ्घनं दीपनपाचनञ्च ।
प्रच्छर्दनं तीक्ष्णविरेचनं वा मुद्गा यवाः शालियुताः पुराणाः ॥ २४१ ॥
भूतीकपथ्याशटिपुष्कराणि बिल्वामृतादारुकनागराणि ।
उग्राविषामागधिकाविडानि क्वाथास्त्रयः सामसमीरणघ्नाः ॥ २४२॥

*भूतीकः=रोहिषः, सुगन्धतृणविशेषस्तदलाभे उशीरं ग्राह्यम् । पुष्करं=पुष्करमूलम् । दारुकं=देवदारु । उग्रा=वचा । विषा=अतिविषा ॥ २४२ ॥

अथ षड्धरणयोगमाह--

चित्रकेन्द्रयवौ पाठा कटुकाऽतिविषाऽभया।
आमाशयोत्थवातघ्नं चूर्णं पेयं सुखाम्बुना ॥२४३॥
योगेऽस्मिन्भिषजा ग्राह्याः षण्णां षड् धरणाः पृथक्।
दिनेषु षट्सु दातव्यास्तेन षड्धरणः स्मृतः ॥ २४४ ॥

*अत्र षण्णां समुदितानां षड्धरणमितानां चूर्णीकृतानामेकस्मिन्नहन्येकटङ्को देयः ॥ २४३-२४४ ॥

अथान्यषड्धरणयोगमाह--

आमाशयगते वाते छर्दिताय यथाक्रमम्।
देयः षड्धरणो योगः सप्तरात्रं सुखाम्बुना ॥ २४५ ॥

*अयमर्थः--प्रथमदिवसे वमनं कारयितव्यं, ततो द्वितीयं दिनमारभ्य षड्दिनपर्यन्तं पाठक्रमेणैकैकस्य चूर्णं टङ्कमितं देयमित्यर्थः ॥२४५॥

अथ पक्वाशयगतवायुलक्षणमाह--

पक्वाशयस्थोऽन्त्रकूजं शूलाटोपौ करोति च।
कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम् ॥ २४६ ॥

*आटोपो--वातस्य क्षुब्धत्वं, न तु गुडगुडाशब्दस्तस्यान्त्रकूजनोक्तत्वात् ॥ २४६ ॥

अथ पक्वाशयगतवायुचिकित्सामाह--

वह्नेः संवर्द्धनं कार्यं कर्मौदावर्त्तकं तथा।
देयः स्नेहविरेकश्च पक्वाशयगतेऽनिले ॥ २४७ ॥

अथोदरगतवायुचिकित्सामाह--

वाते जठरगे दद्यात्क्षारचूर्णादिदीपनम् ॥ २४८ ॥

अथ कुक्षिगतवायुचिकित्सामाह--

शुण्ठीकुटजबीजाग्निचूर्णं कोष्णाम्बु कुक्षिगे ॥२४९ ॥

अथ गुदगतवायुलक्षणमाह--

ग्रहो विण्मूत्रवातानां शूलाध्मानाश्मशर्कराः।
जङ्घोरुत्रिकपार्श्वांसपृष्ठरोगो गुदेऽनिले ॥२५०॥

*रोगोऽत्र रुजा, पीडेति यावत् ॥ २५० ॥

अथ गुदगतवायुचिकित्सामाह—

वाते गुदगते दुष्टे कर्मौदावर्त्तकं हितम् ॥ २५१ ॥

अथ हृदयगतवायुचिकित्सामाह—

हृदयानिलनाशाय गुडूचीं मरिचान्विताम् ।
पिबेत्प्रातः प्रयत्नेन सुखं तप्ताम्भसा सह ॥
पिबेदुष्णाम्भसा पिष्टमाश्वगन्धं विभीतकम् ।
गुडयुक्तं प्रयत्नेन हृदयानिलनाशनम् ॥
देवदारुसमायुक्तं नागरं परिपेषितम् ।
हृद्वातवेदनायुक्तः पीत्वा सुखमवाप्नुयात् ॥ २५२ ॥

अथ कर्णेन्द्रियादिगतवायुलक्षणमाह—

श्रोतादिष्विन्द्रियवधं कुर्यात्क्रुद्धः समीरणः ॥ २५३ ॥

अथ कर्णेन्द्रियादिगतवायुचिकित्सामाह—

श्रोत्रादिष्वनिले दुष्टे कार्यो वातहरः क्रमः ।
स्नेहाभ्यङ्गावगाहाश्च मर्दनालेपनानि च ॥ २५४ ॥

अथ शिरागतवायुलक्षणमाह—

कुर्याच्छिरागतः शूलं शिराकुञ्चनपूरणम् ।
स वाह्याभ्यन्तरायामं खल्लीं कुब्जत्वमेव च ॥ २५५ ॥

*शूलं शिरायामेव । पूरणं=स्थूलत्वम् । कुञ्चनं=संकोचः । वाह्यायामं=पृष्ठेन नतम् । अभ्यन्तरायामं=क्रोडेन नतम् ॥ २५५ ॥

अथ शिरागतवायुचिकित्सामाह—

स्नेहाभ्यङ्गोपनाहाश्च मर्दनालेपनानि च ।
वाते शिरागते कुर्यात्तथा चासृग्विमोक्षणम् ॥ २५६ ॥

अथ स्नायुगतवायोर्लक्षणं चिकित्सां चाह—

शूलमाक्षेपकः कम्पः स्तम्भः स्नाय्वनिलाद्भवेत् ।
स्वेदोपनाहाग्निकर्मबन्धनोन्मर्दनानि च ।
क्रुद्धे स्नायुगते वाते कारयेत्कुशलो भिषक् ॥ २५७ ॥

अथ सन्धिगतवायुलक्षणमाह—

हन्ति सन्धिगतः सन्धीञ्छूलशोथौ करोति च ॥ २५८ ॥

*हन्ति=विश्लेषयति ॥ २५८ ॥

अथ सन्धिगतवायुचिकित्सामाह—

कुर्यात्सन्धिगते वाते दाहस्नेहोपनाहनम् ।
इन्द्रवारुणिकामूलं मागधीगुडसंयुतम् ।
भक्षयेत्कर्षमात्रं तत्सन्धिवातं व्यपोहति ॥२५९॥

अथोक्तरोगाणां कृच्छ्रसाध्यत्वमाह—

हनुस्तम्भार्दिताक्षेपपक्षाघातापतानकाः ।
कालेन महता यत्नात्सिध्यन्ति न च वा न वा ॥ २६० ॥
नवान् बलवतां त्वेतान् साधयेन्निरुपद्रवान् ॥ २६१ ॥

*शतेष्वेकः कश्चिन्मुच्यत इत्यर्थः । परं कः सिध्यति ? यस्तरुणो भवति तथा बलवानुपद्रवरहितश्च ॥ २६०-२६१ ॥

अथ तेषामेवोपद्रवानाह—

विसर्पदाहरुग्भङ्गमूर्च्छाऽरुच्यग्निमार्दवैः ।
क्षीणमांसबलं वाता घ्नन्ति पक्षवधादयः ॥ २६२ ॥

*वाताः=वातविकाराः, कार्यकारणयोरभेदोपचारात् । "वातादिति" पाठे वातात्पक्षवधादय इति योज्यम् ॥ २६२ ॥

अथ वातव्याध्यसाध्यलक्षणमाह—

शूनं सुप्तत्वचं म्लानं कम्पाध्मानविपीडितम् ।
रुजाऽऽर्त्तिमन्तञ्च नरं वातव्याधिर्विनाशयेत् ॥ २६३ ॥

अथेदानीं पञ्चविधस्य प्रकृतस्य वायोः कार्यं लिङ्गं चाह—

अव्याहतगतिर्यस्य स्थानस्थः प्रकृतौ स्थितः ।
वायुः स्यात्सोऽधिकं जीवेद्वीतरोगः समाः शतम् ॥ २६४ ॥

अथ वातव्याधीनां सामान्यानि भेषजानि ।

तत्र चक्रदत्तप्रोक्तमहामाषादितैलमाह—

माषस्यार्द्धाढकं देयं तुलाऽर्द्धं दशमूलतः ।
पलानि च्छागमांसस्य त्रिंशद्द्रोणेऽम्भसः पचेत् ॥ २६५ ॥
चतुर्भागावशेषं तं कषायमवतारयेत् ।
प्रस्थञ्च तिलतैलस्य पयो दद्याच्चतुर्गुणम् ॥ २६६ ॥
जीवनीयानि मञ्जिष्ठा चव्यं चित्रककट्फलम् ।
सव्योषं पिप्पलीमूलं रास्नाऽऽमलकगोक्षुरम् ॥ २६७ ॥

आत्मगुप्ता तथैरण्डः शताह्वा लवणत्रयम् ।
देवदार्वमृताकुष्ठमश्वगन्धा वचा शटी ॥ २६८ ॥
एतैरक्षमितैः कल्कैः पाचयेन्मृदुनाऽग्निना ।
पक्षाघातार्दिते पुंसि हनुस्तम्भार्दिते तथा ॥ २६६ ॥
कर्णशूले शिरःशूले तिमिरे च त्रिदोषजे ।
पाणिपादशिरोग्रीवाभ्रमणे मन्दचङ्क्रमे ॥ २७० ॥
कालयखञ्जे पङ्गौ च गृध्रस्यामपबाहुके ।
पाने वस्तौ तथाऽभ्यङ्गे नस्ये कर्णादिपूरणे ॥ २७१ ॥
तैलमेतत्प्रशंसन्ति सर्ववातविकारनुत् ।
महामाषादिनामेदं भाषितं मुनिभिः पुरा ॥ २७२ ॥

अथ द्वितीयमहामाषादितैलमाह—

माषा यवातसीक्षुद्रा मर्कटी च कुरण्टकः ॥ २७३ ॥
गोकण्टष्टुण्टुकश्चैषां प्रत्येकं पलसप्तकम् ।
चतुर्गुणाम्बुना पक्त्वा पादशेषं शृतं नयेत् ॥ २७४ ॥
कार्पासकास्थि बदरं शणबीजं कुलत्थकम् ।
पृथक्चतुर्दशपलं चतुर्गुणजले पचेत् ॥ २७५ ॥
कषायं तत्र गृह्णीयाच्चतुर्थांशावशेषितम् ।
प्रस्थश्च छागमांसस्य चतुःषष्टिपले जले ॥ २७६ ॥
प्रक्षिप्य पाचयेद्धीमान्पादशेषं रसं नयेत् ।
तैलप्रस्थे ततः क्वाथान्सर्वांस्तान्क्रमशः पचेत् ॥ २७७ ॥
कल्कद्रव्यैः पचेदेभिरमृताकुष्ठसैन्धवैः ।
रास्नापुनर्नवैरण्डैः पिप्पल्या शतपुष्पया ॥ २७८ ॥
बलाप्रसारणीभ्याश्च मांस्या कटुकया तथा ।
पृथक्कर्षमितैरेतैः साधयेन्मृदुनाऽग्निना ॥ २७६ ॥
हन्यात्तैलमिदं शीघ्रं वातव्याधीनशेषतः ।
आक्षेपकं पक्षघातमूरुस्तम्भापबाहुकौ ।
हस्तकम्पं शिरःकम्पं विश्वाचीमर्दितं तथा ॥ २८० ॥

*इति माषादितैलं शार्ङ्गधरात् ॥ २७३–२८० ॥

अथ मध्यमनारायणतैलमाह—

अश्वगन्धाबलाबिल्वं पाटलाबृहतीद्वयम्।
श्वदंष्ट्राऽतिबलानिम्बश्योनाकञ्च पुनर्नवाम् ॥ २८१ ॥
प्रसारणीमग्निमन्थं कुर्याद्दशपलं पृथक्।
चतुर्द्रोणे जले पक्त्वा पादशेषं शृतं नयेत् ॥ २८२ ॥
तैलाढकेन संयोज्य शतावर्या रसाढकम्।
प्रक्षिपेत्तत्र गोक्षीरं ततस्तैलाच्चतुर्गुणम् ॥ २८३ ॥
पृथक्पलमितैः कल्कैर्द्रव्यैरेभिः पचेद्भिषक्।
वचाचन्दनकुष्ठैलामांसीशैलेयसैन्धवैः ॥ २८४ ॥
अश्वगन्धाबलारास्नाशतपुष्पेन्द्रदारुभिः।
पर्णीचतुष्टयेनैव तगरेण प्रसाधयेत् ॥ २८५ ॥
तत्तैलं भोजनेऽभ्यङ्गे पाने वस्तौ च योजयेत्।
पक्षाघातं हनुस्तम्भं मन्यास्तम्भं गलग्रहम् ॥ २८६ ॥
कुब्जत्वं बधिरत्वञ्च गतिभङ्गं कटीग्रहम्।
गात्रशोषेन्द्रियध्वंसं शुक्रनाशं ज्वरक्षयान् ॥ २८७ ॥
अन्त्रवृद्धिं कुरण्डञ्च दन्तरोगं शिरोग्रहम्।
पार्श्वशूलञ्च पङ्गुत्वं बुद्धिनाशञ्च गृध्रसीम् ॥ २८८ ॥
अन्यांश्च विविधान्वातान्हरेत्सर्वाङ्गसंश्रयान्।
अस्याः प्रभावाद्वन्ध्याऽपि नारी पुत्रं प्रसूयते ॥ २८९ ॥
यथा नारायणो देवो दुष्टदैत्यविनाशनः।
तथेदं वातरोगाणां नाशनं तैलमुत्तमम् ॥ २९० ॥

अथ महानारायणतैलमाह—

तिलतैलं समादाय चतुराढकसम्मितम्।
पञ्चपल्लवकल्केन शोधयेद्दोषशान्तये ॥ २९१ ॥
तत्राजं दुग्धमथ वा गव्यं तैलसमं पचेत्
शतावरीरसञ्चापि तैलतुल्यं पचेद्भिषक् ॥ २९२ ॥
दशमूली बला रास्ना शिग्रूत्पलपुनर्नवाः।
शेफालिका नागबला बला चैव प्रसारणी ॥ २९३ ॥
अश्वगन्धा सहचरो दशमूलं करञ्जकः।

खदिरं चन्दनं लोध्रं वचाऽसनपलाशकम् ॥ २९४ ॥
बकुलैरण्डवरुणशालयुग्मकटम्भराः ।
शिरीषः शिखरी वासाहिंस्राजम्बूविभीतकम् ॥ २९५ ॥
काञ्चनारः कपित्थश्च पारिभद्रः प्रियालकम् ।
पाषाणभेदः शम्पाको दुग्धिका दाडिमीफलम् ॥ २९६ ॥
उदुम्बरः सप्तला च कन्यकामालतीत्वचम् ।
मागधी नलमूलश्च यवकोलकुलत्थकम् ॥ २९७ ॥
आत्मगुप्ताऽर्ककार्पासबीजं वत्सादनी स्नुही ।
केतकीमूलधत्तूरलाङ्गलीगर्दभाण्डकम् ॥ २९८ ॥
चित्रकश्च महानिम्बं पञ्चवल्कलमेव च ।
मुण्डी टङ्कारी मुशली हंसपादी विशल्यकम् ॥ २९९ ॥
एषां दशपलान्भागान्वारिण्यष्टगुणे पचेत् ।
पादशेषं परिस्राव्य तत्र तैलं पुनः पचेत् ॥ ३०० ॥
छागो मेषश्च हरिण एणश्च बहुशृङ्गकः ।
शशः शल्यः शिवा गोधा सिंहो व्याघ्रश्च भल्लुकः ॥३०१॥
वन्यो वराहः खड्गी च महिषो घोटकस्तथा ।
कपिर्बभ्रुर्विडालश्च मूषकश्चोरुदर्दुरः ॥ ३०२ ॥
वर्त्तिकस्तित्तिरिर्लावः खञ्जरीटश्चकोरकः ।
उलूको नीलकण्ठश्च वन्यकुक्कुट एव च ॥ ३०३ ॥
गृध्रश्च गरुडो हंसश्चक्रः कारण्डवोऽपि च ।
कपोतः सारसः क्रौञ्चो वन्यः पारावतस्तथा ॥ ३०४ ॥
रोहितो मद्गुरश्चापि शिलीन्ध्रः शृङ्गकस्तथा ।
इल्लिसो गर्गरो वर्मिरश्च काकः पिकोऽपि च ॥ ३०५ ॥
महामत्स्यः कच्छपश्च शिशुमारश्च सांकुचिः ।
मकरो घण्टिकाऽऽकारस्तदलाभे तु गोधिका ॥ ३०६ ॥
यथालाभममीषाञ्च क्वाथं तैलसमं पचेत् ॥ ३०७ ॥
रास्नाऽश्वगन्धामिसिदारुकुष्ठपर्णीचतुष्कागुरुकेशराणि ।
सिन्धूत्थमांसीरजनीद्वयश्च शैलेयकं चन्दनपुष्करश्च ॥ ३०८ ॥

एला सयष्टी तगराब्दपत्रं भृङ्गोऽष्टवर्गस्तु वचा पलाशी।
स्थौणेयवृश्चीरकचोरकाख्यं मूर्वात्वचं कट्फलपद्मकञ्च ॥३०९॥
मृणालजातीफलकेतकाख्यं सनागपुष्पं सरलं मुरा च।
जीवन्तिकोशीरवरास्तथैव दुरालभा वानरिका नखश्च ॥ ३१० ॥
कैवर्त्तमुस्ताऽर्जुनतिक्तकञ्च वातामखर्जूरकतुम्बुराश्च।
सधातकीग्रन्थिकपर्पटाश्च पटोलहेमाह्वजयन्तिकाश्च ॥३११॥
त्रायन्तिकाऽलम्बुषशक्रबीजं रसाञ्जनाभात्रिवृताऽरुणाश्च।
द्राक्षाकणाद्रोणपुनर्नवाश्च कौन्ती क्रिमिघ्नो हयमारकश्च ॥३१२॥
नीलोत्पलं पद्मककारवीभ्यां रम्भाऽनलो गोक्षुरकः क्षुरश्च।
कङ्कोलकालेयकुसुम्भपुष्पं तुरुष्ककाश्मीरकसिक्थकञ्च।
लवङ्गकर्पूररसालकाण्डकस्तूरिकावालकमम्बरञ्च ॥ ३१३ ॥

*दारु=देवदारु। पर्णीचतुष्कं=शालिपर्णी पृश्निपर्णी मुद्गपर्णी माषपर्णी चेति। केशरः=पुन्नागस्तस्य पुष्पं ग्राह्यम्, तदलाभे नागकेशरं ग्राह्यम्। शैलेयकम्="छरीला" इति लोके। चन्दनमत्र श्वेतम्। पुष्करं=पुष्करमूलम्।

*"तगरस्याप्यलाभे तु कुष्ठं दद्याद्भिषग्वरः" ॥ ४ ॥

*भृङ्गः=त्वक्। अष्टवर्गालाभे शतावरीविदार्यश्वगन्धावाराही द्विगुणा दद्यात्। वाराही="गेंठि" इति लोके। पलाशी=कर्चूरभेदः, "गन्धपलाशी"ति काश्मीरे प्रसिद्धा, तदलाभे कर्चूर एव देयः। स्थौणेयः=गठिवनभेद ईषत्सुगन्धि "थुनेर" इति लोके। वृश्चीरः=श्वेतमूला पुनर्नवा। चोरकः=ग्रन्थिपर्णस्यैव भेदः "भटिउर" इति नैपालदेशे प्रसिद्धः। केतकस्य मूलं पुष्पञ्च दद्यात्। कैवर्त्तमुस्ता="केवटीमोथा—गुडतजी" इति च लोके। तिक्तकः=किराततिक्तकः। वातामं="वादाम" इति लोके। हेमाह्वं=धत्तूरस्य फलं मूलं पत्रञ्च। जयन्तिका=जैन्तित्वक्। त्रायन्तिका=अत्र लभ्यत एव न, तदलाभे बला। अलम्बुषा=लज्जालुभेदः। आभा=बब्बूलस्तस्य त्वक्। अरुणा=मञ्जिष्ठा। द्रोणः=द्रोणपुष्पः, "गूमा" पञ्चाङ्गः। पुनर्नवा रक्तपुष्पा। हयमार-

कः=करवीरस्तस्य मूलम् । पद्मकं=नीलोत्पलादन्योत्पलम् । पद्म-काष्ठमुक्तमेव । कारवी="मगरैला" इति लोके । रम्भायाः कन्दम् । क्षुरस्य फलानि । रसालकाण्डम्="आण्डी" सुगन्धद्रव्यम् ॥ २९१—३१३ ॥

कल्कानमीषां विपचेत्सुवैद्यः पृथक् पृथक् कर्षयुगोन्मितानाम् ।
शुभे च नक्षत्रमुहूर्त्तलग्ने सन्तोष्य विप्रांश्च भिषग्वरांश्च ॥ ३१४ ॥
सम्पूज्य नारायणनामधेयं देवं त्रिनेत्रं जगतामधीशम् ।
पात्रे तु हेम्नः खलु राजते वा ताम्रेऽथ वा लोहमयेऽपि रक्षेत् ॥३१५॥

अभ्यञ्जनेऽञ्जने नस्ये निरूहे चावगाहने ।
पाने चैतद्यथाव्याधि प्रयुञ्जीत चिकित्सकः ॥ ३१६ ॥
बहुनाऽत्र किमुक्तेन तैलमेतत्प्रयोजितम् ।
अवश्यं वातजान्व्याधीनशीतिमपि नाशयेत् ॥ ३१७ ॥
एतस्याभ्यासतः जन्तोर्जरा जातु न जायते ।
पतन्ति वलयो नाङ्गे पलितश्च न जायते ॥ ३१८ ॥
नेत्रं तेजस्वि नितरां गरुडस्येव जायते ।
नोच्चैःश्रुतिर्न बाधिर्यं कर्णनादो न जायते ॥ ३१९ ॥
पाणिकम्पः शिरःकम्पः प्रलापश्च न जायते ।
बुद्धिभ्रंशो न जायेत तस्मात्कर्मसु पाटवम् ॥ ३२० ॥
यथा जलेन सिक्तस्य शाखिनः पल्लवादयः ।
वर्द्धन्ते धातवस्तद्वद्देहिनोऽनेन नित्यशः ॥ ३२१ ॥
आमं गर्भं त्यजेज्जातु सूतिका रुग्युता च या ।
या च दुःप्रसवक्षीणा ताभ्य एतद्धितं परम् ॥ ३२२ ॥
वन्ध्या च लभते पुत्रं गर्भपातो न जायते ।
योनिरोगाः प्रणश्यन्ति प्रदरश्च प्रशाम्यति ॥ ३२३ ॥
अस्मात्तैलवरादन्यत्कुत्र चिन्नास्ति भेषजम् ।
बल्यं वृष्यं बृंहणञ्च रसायनमिदं महत् ॥ ३२४ ॥
पुरा देवासुरे युद्धे दैत्यैरभिहतान्सुरान् ।
भिन्नान्भग्नास्थिकान्विद्धान्पिच्चितान्व्यथयाऽर्दितान् ॥ ३२५ ॥

दृष्ट्वा हिताय देवानां नराणां चाब्रवीदिदम् ।
तैलं नारायणो देवो महानारायणाभिधम् ॥ ३२६ ॥

अथ महायोगराजगुग्गुलुमाह—

नागरं पिप्पलीमूलं चव्यमूषणचित्रकम् ।
भृष्टं हिङ्ग्वजमोदा च सर्षपो जीरकद्वयम् ॥ ३२७ ॥
रेणुकेन्द्रयवौ पाठा विडङ्गं गजपिप्पली ।
कटुकाऽतिविषा भार्गी वचा मूर्वा च पत्रकम् ॥ ३२८ ॥
देवदारु कणा कुष्ठं रास्ना मुस्ता च सैन्धवम् ।
एला त्रिकण्टकं पथ्या धान्यकञ्च विभीतकम् ॥ ३२९ ॥
धात्री च त्वगुशीरञ्च यवक्षारोऽखिलान्यपि ।
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ॥ ३३० ॥
यावन्त्येतानि चूर्णानि तावानेवात्र गुग्गुलुः ।
संमर्द्य सर्पिषा पश्चात्सर्वं संमिश्रयेच्च तत् ॥ ३३१ ॥
एवं पिण्डञ्च तत्कृत्वा धारयेद्घृतभाजने ।
गुटिकाष्टङ्कमात्रास्तु खादेत्तास्तु यथोचिताः ॥ ३३२ ॥

*यथोचिताः=दोषकालाद्यपेक्षया ॥ ३३२ ॥

आदौ शाणोन्मितं खादेत्सार्द्धशाणं ततः परम् ।
तदग्रे कर्षमर्द्धन्तु पूर्णं कर्षं ततः परम् ॥ ३३३ ॥
गुग्गुलुर्योगराजोऽयं महामुख्यो रसायनः ।
मैथुनाहारपानानां नियमो नात्र विद्यते ॥ ३३४ ॥
अर्शांसि ग्रहणीरोगं प्लीहगुल्मोदरानपि ।
आनाहं मन्दमग्निञ्च श्वासं कासमरोचकम् ॥ ३३५ ॥
प्रमेहं नाभिशूलञ्च क्रिमिक्षयमुरोग्रहम् ।
सर्वान्वातामयान्हन्यादामवातमपस्मृतिम् ॥ ३३६ ॥
वातरक्तं तथा कुष्ठं तथा दुष्टव्रणानपि ।
शुक्रदोषं रजोदोषमुदावर्त्तं भगन्दरम् ॥३३७ ॥
रास्नाऽऽदिक्काथसंयुक्तः सर्ववातामयान्हरेत् ।
काकोल्यादिशृतात्पित्तं कफमारग्वधादिना ॥ ३३८ ॥

दार्वीशृतेन मेहांश्च गोमूत्रेण च पाण्डुताम् ।
मधुना मेदसो वृद्धिं कुष्ठं निम्बशृतेन च ॥ ३३९ ॥
छिन्नाक्काथेन वातास्रं शोथं मूलकजाच्छृतात् ।
पाटलाक्काथसहितो विषं मूषकसम्भवम् ॥ ३४० ॥
त्रिफलाक्काथसंयुक्तो दारुणां नेत्रवेदनाम् ।
पुनर्नवाऽऽदिक्काथेन हन्ति सर्वोदराण्यपि ॥ ३४१ ॥

अथ रास्नाऽऽदिक्काथमाह—

रास्ना पुनर्नवा शुण्ठी गुडूच्येरण्डजं शृतम् ।
सप्तधातुगते वाते सामे सर्वाङ्गगेऽपि चेत् ॥ ३४२ ॥

अथ रसोनकल्कमाह—

युक्तः कल्को रसोनस्य तिलतैलेन सिन्धुना ।
वातरोगान्हरेत्सर्वाञ्ज्वरांश्च विषमानपि ॥ ३४३ ॥

क्षीरेण तैलेन घृतेन वाऽपि मांसेन सार्द्धं लशुनानि खादेत् ।
शाल्योदनेनापि च षष्टिकेन पलार्द्धवृद्ध्या दिवसानि सप्त ॥ ३४४ ॥
वातोत्थरोगान्विषमज्वरांश्च शूलान्सगुल्मान्दहनस्य मान्द्यम् ।
प्लीहानमुग्रं भुजपार्श्वशूलं शिरोव्यथां कृन्तति शुक्रदोषान् ॥ ३४५ ॥
अन्नप्रकारैः पललप्रकारगोंधूमकैर्वा यवशक्तुभिर्वा ।
दुग्धेन तैलेन घृतेन वाऽपि युक्तानि शीते लशुनानि खादेत् ॥ ३४६ ॥
संवर्त्तकैर्लावकपिञ्जलैर्वा मृग्याः पलैर्वाऽप्यथ कौक्कुटैर्वा ।
वाराहवर्त्तीरकहारिणैर्वा सुसंस्कृतैरग्निबलं समीक्ष्य ॥ ३४७ ॥

अथ रसोनाष्टकमाह—

रसोनपक्वकन्दस्य गुलिका निस्तुषीकृताः ।
पाटयित्वा च मध्यस्थं दूरीकुर्यात्तदङ्कुरम् ॥ ३४८ ॥
निश्युग्रगन्धनाशाय दध्ना सन्नीय रक्षयेत् ।
ततः प्रक्षाल्य संशोष्य शिलायां परिपेषयेत् ॥ ३४९ ॥
कल्कस्य पञ्चमं भागं चूर्णमेषां विनिक्षिपेत् ।
सौवर्चलं यवानीश्च भर्जितं हिङ्गु सैन्धवम् ॥ ३५० ॥
कटुत्रिकं जीरकञ्च समभागानि चूर्णयेत् ।

तिलतैलञ्च कल्कस्य तुर्यांशं तत्र मिश्रयेत् ॥ ३५१ ॥
खादेत्कर्षमितं प्रातः किं वा दोषाद्यपेक्षया ।
अनुपानं प्रकुर्वीत वातारिशृतमन्वहम् ॥ ३५२ ॥
सर्वाङ्गैकाङ्गजं वातमर्दितञ्चापतन्त्रकम् ।
अपस्मारं तथोन्मादमूरुस्तम्भञ्च गृध्रसीम् ॥ ३५३ ॥
उरःपृष्ठकटीपार्श्वकुक्षिपीडां कृमीन्हरेत् ।
मद्य मांसं तथाऽम्लञ्च रसं सेवेत नित्यशः ॥ ३५४ ॥
आयासमातपं रोषमतिनीरं गुडं स्त्रियम् ।
रसोनमश्नन्पुरुषस्त्यजेदेतन्निरन्तरम् ॥ ३५५ ॥
वर्जयेत्तदतीसारी प्रमेही पाण्डुरोगवान् ।
अरोचकी गर्भिणी च मूर्च्छाऽर्शोरोगसंयुतः ॥ ३५६ ॥
रक्तपित्ती च शोषी च यक्ष्मी छर्द्यर्दितो नरः ।
पित्ते तु पथ्यभुक्कुर्यात्प्रयोगान्ते विरेचनम् ॥ ३५७ ॥
अन्यथा तस्य जायन्ते कुष्ठपाण्ड्वामयादयः ।
स्त्रीस्तन्यं त्वरितं दद्याद्बालानामप्यनिच्छताम् ॥ ३५८ ॥
तथा च लभते सिद्धिं महावीर्याद्रसोनतः ॥ ३५९ ॥

अथ वातारिरसमाह—

रसो गन्धो वरा वह्निर्गुग्गुलुः क्रमवर्द्धितः ।
तत्रैकभागः सूतः स्याद्गन्धको द्विगुणः स्मृतः ॥ ३६० ॥
त्रिभागा त्रिफला योज्या चतुर्भागस्तु चित्रकः ।
गुग्गुलुः पञ्चभागः स्याद्रुबुतैलेन मर्दयेत् ॥ ३६१ ॥
क्षिप्त्वा तत्रोदितं चूर्णं तेन तैलेन मर्दयेत् ।
गुटिकां कर्षमात्रान्तु भक्षयेत्प्रातरेव हि ॥ ३६२ ॥
नागरैरेरण्डमूलानां कषायं प्रपिबेदनु ।
अभ्यज्यैरण्डतैलेन स्वेदयेत्पृष्ठदेशकम् ॥ ३६३ ॥
विरेकपरिणामे तु स्निग्धमुष्णञ्च भोजयेत् ।
वातारिसंज्ञको ह्येष रसो नियतसेवितः ।
मासेन मरुतो रोगान्हरेत्सुरतवर्जिनः ॥ ३६४ ॥

इति त्रयोविंशो वातव्याध्यधिकारः समाप्तः ॥ २३ ॥

अथ चतुर्विंश ऊरुस्तम्भाऽधिकारः ॥ २४ ॥

तत्रोरुस्तम्भस्य विप्रकृष्टसन्निकृष्टनिदानसम्प्राप्तिपूर्वकं लक्षणमाह—

शीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्निषेवितैः ।
जीर्णाजीर्णे तथाऽऽयाससंक्षोभस्वप्नजागरैः ॥ १ ॥
सश्लेष्ममेदःपवनः साममत्यर्थसञ्चितम् ।
अभिभूयेतरं दोषमूरू चेत् प्रतिपद्यते ॥ २ ॥
सक्थ्यस्थिनी प्रपूर्यान्तः श्लेष्मणा स्तिमितेन सः ।
तदा स्तभ्नाति तेनारू स्तब्धौ शीतावचेतनौ ॥ ३ ॥
परकीयाविव गुरू स्यातामतिभृशव्यथौ ।
ध्यानाङ्गमर्दस्तैमित्यतन्द्राच्छर्द्यरुचिज्वरैः ॥ ४ ॥
संयुतौ पादसदनकृच्छ्रोद्धरणसुप्तिभिः ।
तमूरुस्तम्भमित्याहुराढ्यवातमथापरे ॥ ५ ॥

*जीर्णाजीर्णे = किञ्चिज् जीर्णे किंचिदजीर्णे । शीतादिभिर्निषेवितैर्भुक्तैः । संक्षोभेण = संचलनेन । दिवा स्वप्नेन, रात्रौ जागरणेन । अभिभूय = दूषयित्वा । इतरं दोषं = पित्तम् । स्तिमितेन = आर्द्रेणावृतेनेति यावन्न तु घनेन । सः = पवनस्तदा ऊरू स्तभ्नाति । तेन = स्तम्भेन । अचेतनौ = शून्यौ । परकीयाविव = अक्रियावित्यर्थः । ध्यानम् = मूढता । पादसम्बन्धिनीभिः सदनकृच्छ्रोद्धरणसुप्तिभिश्च संयुक्तौ । अयं सुश्रुतेन महावातव्याधिषु पठितः ॥ १–५ ॥

अथोरुस्तम्भपूर्वरूपमाह—

प्राग्रूपं तस्य निद्राऽतिध्यानं स्तिमितता ज्वरः ।
रोमहर्षोऽरुचिश्छर्दिर्जङ्घोर्वोः सदनं तथा ॥ ६ ॥

अथोरुस्तम्भरूपमाह—

वातशङ्किभिरज्ञानात्तत्र स्यात्स्नेहनात्पुनः ।
पादयोः सदनं सुप्तिः कृच्छ्रादुद्धरणं तथा ॥ ७ ॥
जङ्घोरुग्लानिरत्यर्थं शश्वद्वाऽदाहवेदना ।
पादश्च व्यथते न्यस्तं शीतस्पर्शं न वेत्ति च ॥ ८ ॥
संस्थाने पीडने गत्यां चालने चाप्यनीश्वरः ।

अन्यनेयौ हि सम्भग्नावूरू पादौ च मन्यते ॥ ९ ॥

*अज्ञानात् = अनिश्चयात्। स्तम्भसुप्तिकर्मरहितपाददर्शनेन, वातशङ्किभिः = वातव्याधिशङ्किभिः। तत्र = ऊरुस्तम्भे। स्नेहनात् = स्नेहदानात्। स्नेहादिना स्नेहन्या चिकित्सया पादसदनादय ऊरुभग्नोपमत्वात् ते विकाराः स्युः। जङ्घोर्वोर्गमनादावशक्तिः। अदाहवेदना = ईषद्दाहेन सह वेदना। अन्यनेयौ = अन्यचाल्यौ भवतः ॥७-९॥

अथोरुस्तम्भारिष्टमाह—

यदा दाहार्त्तितोदार्त्तो वेपनः पुरुषो भवेत्।
ऊरुस्तम्भस्तदा हन्यात्साधयेदन्यथा नवम् ॥ १० ॥

*अन्यथा = दाहाद्युपद्रवरहितं तमपि, नवम् = उत्पन्नमात्रं, साधयेत् ॥ १० ॥

अथोरुस्तम्भचिकित्सामाह—

स्नेहासृक्स्रावणवमनं वस्तिकर्म विरेचनम्।
वर्जयेदाढ्यवाते तु यतस्तैस्तस्य कोपनम् ॥ ११ ॥
तस्मादत्र सदा कार्यं स्वेदलङ्घनरूक्षणम्।
आममेदःकफाधिक्यान्मारुतं परिरक्षता ॥ १२ ॥
यत्स्यात्कफप्रशमनं न तु मारुतकोपनम्।
तत्सर्वं सर्वदा कार्यमूरुस्तम्भस्य भेषजम् ॥ १३ ॥
सर्वो रूक्षः क्रमः कार्यस्तत्रादौ कफनाशनः।
पश्चाद्वातविनाशाय विधातव्याऽखिला क्रिया ॥ १४ ॥
भोज्याः पुराणाः श्यामाककोद्रवोद्दालशालयः।
जाङ्गलैरघृतैर्मांसैः शाकैश्चालवणैर्हितैः ॥ १५ ॥
शाकैरलवणैर्दद्याज्जलतैलाज्यसाधितैः।
सुनिषण्णकनिम्बार्कवृन्ताकग्वधपल्लवैः ॥ १६ ॥
वायसीवास्तुकाद्यैश्च साधितैः शाकमूलकैः।
शाकैरलवणैर्युक्तं जीर्णं शाल्योदनं भिषक् ॥ १७ ॥
रूक्षणाद्वातकोपश्चेन्निद्रानाशार्त्तिपूर्वकः।
स्नेहस्वेदक्रमस्तत्र कार्यो वातामयापहः ॥ १८ ॥
प्रतारयेत्प्रतिस्रोतो नदीं शीतजलां शिवाम्।

सरश्च विमलं शीतं स्थिरतोयं पुनःपुनः ॥ १९ ॥
यथा विशुष्केऽस्य कफे शान्तिमूरुग्रहो व्रजेत् ।
शरीरबलमग्निश्च कार्यैषा रक्षता क्रिया ॥ २० ॥
सञ्चारमूत्रस्वेदांश्च रूक्षाण्युत्सादनानि च ।
कुर्याद्दाहे च मूत्राद्यैः करञ्जफलसर्षपैः ॥ २१ ॥
मूलैर्वाऽप्यश्वगन्धाया मूलैरर्कस्य वा भिषक् ।
पिचुमर्दस्य वा मूलैरथ वा देवदारुणः ॥ २२ ॥
क्षौद्रसर्षपवल्मीकमृत्तिकासंयुतैर्भिषक् ।
गाढमुत्सादनं कुर्यादूरुस्तम्भे सवेदने ॥ २३ ॥
दन्तीद्रवन्तीसुरसासर्षपैश्चापि बुद्धिमान् ।
तर्कारीसुरसाशिग्रुवचावत्सकनिम्बकैः ।
पत्रमूलफलैस्तोयं शृतमुष्णञ्च सेवनम् ॥ २४ ॥
भल्लातकामृताशुण्ठीदारुपथ्यापुनर्नवाः ।
पञ्चमूलीद्वयोन्मिश्रा ऊरुस्तम्भनिबर्हणाः ॥ २५ ॥
पिप्पली पिप्पलीमूलं भल्लातकफलानि च ।
कल्कं मधुयुतं पीत्वा ऊरुस्तम्भाद्विमुच्यते ॥ २६ ॥

अथ रास्नाऽऽदिक्वाथमाह—

रास्नाश्यामाकपथ्यामरिचमिसिशिवावेल्लशट्यश्वगन्धा-
यासच्छिन्नाऽजमोदासुमुखमतिविषावृद्धदारौ बृहत्यौ ।
शुण्ठी तिक्ता यवानी सहचरचविकैरण्डदार्व्याजकर्णा-
ऊरुस्तम्भामवातं कफपवनरुजं दण्डकांश्चाशु हन्यात् ॥२७॥

ग्रन्थिकारुष्करकृष्णानां क्वाथं क्षौद्रान्वितं पिबेत् ।
लिह्याद्वा त्रिफलाचूर्णं क्षौद्रेण कटुकायुतम् ॥ २८ ॥
सुखाम्बुना पिबेद्वाऽपि चूर्णं षड्धरणं नरः ।
पिप्पलीवर्द्धमानं वा माक्षिकेण गुडेन वा ॥ २९ ॥
ऊरुस्तम्भे प्रशंसन्ति गण्डीरारिष्टमेव च ॥ ३० ॥
शिलाजतु गुग्गुलुं वा पिप्पलीमथ नागरम् ।
ऊरुस्तम्भे पिबेन्मूत्रैर्दशमूलीरसेन वा ॥ ३१ ॥

त्रिफला पिप्पली मुस्तं चव्यं कटुकरोहिणी ।
लिह्याद्वा मधुना चूर्णमूरुस्तम्भार्दितो नरः ॥ ३२ ॥
घृतं सौरेश्वरं दद्यादूरुस्तम्भे कफोत्तरे ।
दद्याच्छुण्ठीघृतं वाऽपि वैश्वानरमथापि वा ।
सैन्धवाद्यं हितं तैलममृताऽऽख्योऽपि गुग्गुलुः ॥ ३३ ॥

अथ कुष्ठाद्यतैलमाह—

कुष्ठश्रीवेष्टकोदीच्यसरलं दारु केशरम् ।
अजगन्धाऽश्वगन्धे च तैलं तैः सार्षपं पचेत् ॥ ३४ ॥
सक्षौद्रं मात्रया तस्मादूरुस्तम्भार्दितः पिबेत् ॥ ३५ ॥

अथाष्टकट्वरतैलमाह—

पलाभ्यां पिप्पलीमूलान्नागरादष्टकट्वरम् ।
तैलप्रस्थं समं दध्ना गृध्रस्यूरुग्रहापहम् ॥ ३६ ॥
सस्नेहदधिसम्भूतं तक्रं कट्वरमुच्यते ।
अष्टकट्वरतैले च तैलं सार्षपमिष्यते ।
पिप्पलीमूलशुण्ठ्योश्च प्रत्येकं द्विपलं कृतम् ॥ ३७ ॥

अथ द्विपञ्चमूलाद्यतैलमाह—

द्विपञ्चमूली त्रिफला चित्रकं देवदारु च ।
एकाष्ठीला त्वपामार्गं श्रेयसी वायसी शुभा ॥ ३८ ॥
बला भार्गी पृथक्पर्णी सुवहा मदयन्तिका ।
विशालोशीरकाश्मर्यस्तिस्रो देयास्तथाऽग्निकः ॥ ३९ ॥
चिरबिल्वो ह्यशोकश्च कलश्यंशुमती तथा ।
पयस्या पीलुपर्ण्यश्च गुडूची च शतावरी ॥ ४० ॥
एषां पञ्च पलान्भागाञ्जलद्रोणेषु सप्तसु ।
अष्टभागावशेषेण पचेत्तैलाढकं भिषक् ॥ ४१ ॥
कुष्ठञ्च शतपुष्पा च त्र्यूषणं चित्रकं वरा ।
देवदार्वगुरु श्रेष्ठं विडङ्गं मुस्तमेव च ॥ ४२ ॥
अश्वगन्धा स्थिरा पाठा मूली श्यामाकमेव च ।
पिप्पल्यः शृङ्गबेरञ्च दन्ती हिङ्ग्वम्लवेतसम् ॥ ४३ ॥

अनेन गर्भेण भिषक्कषायेण च साधयेत् ।
सिद्धशीतञ्च पूतञ्च क्षौद्रेण सह संसृजेत् ॥ ४४ ॥
तदस्य नस्यपानार्थं तदेवाभ्यञ्जने भवेत् ॥ ४५ ॥
ऊरुस्तम्भश्चिरोद्भूतस्तैलेनानेन शाम्यति ।
आमवातं शीतवातं क्षुद्रवातञ्च नाशयेत् ॥ ४६ ॥

अथ महासैन्धवाद्यतैलमाह—

सिन्धुरुग्विश्वजासोग्राभार्गीयष्टीस्थिराफलैः ।
दारुविश्वशटीधान्यकृष्णाकट्फलपौष्करैः ॥ ४७ ॥
दीप्यकातिविषैरण्डनीलीनीलाम्बुजैः पचेत् ।
तैलं सकाञ्जिकं हन्ति पानाभ्यञ्जननावनैः ॥ ४८ ॥
आमवातं कृमीन्गुल्मान्प्लीहोदरशिरोरुजः ।
मन्दाग्निं पक्षसन्ध्यण्डवातस्तम्भगदानपि ॥ ४९ ॥

अथ सैन्धवाद्यतैलमाह—

द्वे पले सैन्धवात्पञ्च शुण्ठ्या ग्रन्थिकचित्रकात् ।
द्वे द्वे भल्लातकास्थीनि विंशतिर्द्वे तथाऽऽढके ॥ ५० ॥
आरनालात् पचेत् प्रस्थं तैलस्यैरण्डजस्य च ।
गृध्रस्यूरुग्रहस्यार्त्तिसर्ववातविकारनुत् ॥ ५१ ॥

इति चतुर्विंश ऊरुस्तम्भाधिकारः समाप्तः॥ २४ ॥

अथ पञ्चविंश आमवाताधिकारः ॥ २५ ॥

तत्रामवातस्य निदानपूर्विकां सम्प्राप्तिमाह—

विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च ।
स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्वतस्तथा ॥ १ ॥
वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति ।
तेनात्यर्थमपक्वोऽसौ धमनीभिः प्रपद्यते ॥ २ ॥
वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः ।
स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः ॥ ३ ॥
जनयत्यग्निदौर्बल्यं हृदयस्य च गौरवम् ।
व्याधीनामाश्रयो ह्येष आमसंज्ञोऽतिदारुणः ॥ ४ ॥

*विरुद्धाहारचेष्टस्य = विरुद्धाहारः = क्षीरमत्स्यादिः, विरुद्धचेष्टा = भुक्त्वा व्यायामादिः, ताभ्यां युक्तस्य । निश्चलस्य = निर्व्यायामपरस्य । "स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्वत" इति मिलितो हेतुः । श्लेष्मस्थानम् = आमाशयसन्ध्यादि । तेन = श्लेष्मस्थानगमनेन । अत्यन्तमपक्वः । पित्तस्थानगमनेन पक्वो भविष्यतीत्यभिप्रायः । असौ = आमः । धमनीभिः प्रपद्यते = धमनीमार्गैश्चलति । भूयो दूषितः = अतिशयेन दूषितः । सोऽन्नजो रसः = आमः । स्रोतांस्यभिष्यन्दयति = संस्रुत्य रसवहशिराऽवरोधं कृत्वा स्रोतांसि गुरूणि कुर्यात् । नानावर्णः = वातादिजनितवर्णभेदाद् नानावर्णः ॥ १–४ ॥

अथामस्वरूपमाह—

अजीर्णाद्यो रसो जातः सञ्चितो हि क्रमेण वै ।
आमसंज्ञां स लभते शिरोगात्ररुजाकरः ॥ ५ ॥

*अजीर्णाद् = भुक्तादजीर्णात् ॥ ५ ॥

अथामवातस्य सामान्यलक्षणमाह—

युगपत्कुपितावेतौ त्रिकसन्धिप्रवेशकौ ।
स्तब्धञ्च कुरुतो गात्रमामवातः स उच्यते ॥ ६ ॥

*एतौ = वातकफौ, त्रिकसन्धिप्रवेशकौ, वेदनयेति बोद्धव्यम् ॥ ६ ॥

अथ तन्त्रान्तरोक्तामवातलक्षणमाह—

अङ्गमर्दोऽरुचिस्तृष्णा चालस्यं गौरवं ज्वरः ।
अपाकः शूनताऽङ्गानामामवातस्य लक्षणम् ॥ ७ ॥

*विशेषार्थमस्य संग्रहः ॥ ७ ॥

अथातिवृद्धस्यामवातस्य लक्षणमाह—

स कष्टः सर्वरोगाणां यदा प्रकुपितो भवेत् ।
हस्तपादशिरोगुल्फत्रिकजानूरुसन्धिषु ॥ ८ ॥
करोति सरुजं शोथं यत्र दोषः प्रपद्यते ।
स देशो रुज्यतेऽत्यर्थं व्याविद्ध इव वृश्चिकैः ॥ ९ ॥
जनयेत्सोऽग्निदौर्बल्यं प्रसेकारुचिगौरवम् ।
उत्साहहानिं वैरस्यं दाहञ्च बहुमूत्रताम् ॥ १० ॥
कुक्षौ कठिनतां शूलं तथा निद्राविपर्ययम् ।

तृट्छर्दिभ्रममूर्च्छाश्च हृद्ग्रहं विड्विबद्धताम् ।
जाड्यान्त्रकूजमानाहं कष्टांश्चान्यानुपद्रवान् ॥ ११ ॥

*यदा प्रकुपितो भवेत्=प्रकर्षेण कुपितः स्यात्, तदा वक्ष्यमाणानुपद्रवान्करोति । हस्तेत्यादि । यत्र दोषः=दुष्ट आमः । प्रपद्यते=गच्छति । जाड्यम्=अकर्मण्यत्वम् । अन्यानुपद्रवान्=कलायखञ्जत्वादीन् ॥ ८-११ ॥

अथामवातस्य विशिष्टलक्षणमाह—

पित्तात्सदाहरागञ्च सशूलं पवनात्मकम् ।
स्तिमितं गुरुकण्डूकं कफजुष्टं तमादिशेत् ॥ १२ ॥

*गुरुकण्डूकम्=बहुकण्डूकम् ॥ १२ ॥

अथामवातस्य साध्यत्वादिकमाह—

एकदोषानुगः साध्यो द्विदोषो याप्य उच्यते ।
सर्वदेहचरैः शोथैः स कष्टः सान्निपातिकः ॥ १३ ॥

अथामवातस्य चिकित्सामाह—

लङ्घनं स्वेदनं तिक्तं दीपनानि कटूनि च ।
विरेचनं स्नेहनञ्च वस्तयश्चाममारुते ॥ १४ ॥
रूक्षः स्वेदो विधातव्यो वालुकापुटकैस्तथा ।
उपनाहाश्च कर्त्तव्यास्तेऽपि स्नेहविवर्जिताः ॥ १५ ॥
आमवाताभिभूताय पीडिताय पिपासया ।
पञ्चकोलेन संसिद्धं पानीयं हितमुच्यते ॥ १६ ॥
शुष्कमूलकयूषं वा यूषं वा पाञ्चमौलिकम् ।
रसकं काञ्जिकं वाऽपि शुण्ठीचूर्णविचूर्णितम् ॥ १७ ॥
सौवीरं स्विन्नवार्त्ताकं तथा तिक्तफलानि च ।
वास्तुकशाकं सारिष्टशाकं पौनर्नवं हितम् ॥ १८ ॥
पटोलं गोक्षुरश्चैव वरुणं कारवेल्लकम् ।
यवान्नं कोरदूषान्नं पुराणं शालिषष्टिकम् ॥ १९ ॥
लावकानां तथा मांसं हितं तक्रेण संस्कृतम् ।
हितश्च यूषः कौलत्थः कालायश्चणकस्य च ॥ २० ॥

रुच्यं दद्याद्यथासात्म्यमामवातहितञ्च यत् ।
शतपुष्पा वचा विश्वश्वदंष्ट्रावरुणत्वचः ॥ २१ ॥
पुनर्नवासदेवाह्वासटीमुण्डितिकाः समाः ।
प्रसारणी च तर्कारी फलञ्च मदनस्य च ॥ २२ ॥
शुक्तकाञ्जिकपिष्टं च कोष्णं च लेपने हितम् ।
अहिंस्रा केवुकं मूलं शिग्रुर्वल्मीकमृत्तिका ॥ २३ ॥
मूत्रपिष्टैश्च कर्त्तव्यमुपनाहः प्रलेपनम् ॥ २४ ॥
चित्रकं कटुकापाठाकलिङ्गातिविषाऽमृताः ।
देवदारुवचामुस्तनागरातिविषाऽभयाः ।
पिबेदुष्णाम्बुना नित्यमामवातस्य भेषजम् ॥ २५ ॥
शटी शुण्ठ्यभया चोग्रा देवाह्वातिविषाऽमृताः ॥ २६ ॥
कषायमामवातस्य पाचनं रूक्षभोजनम् ।
पुनर्नवा च बृहतीबर्द्धमानफणिज्जकैः ॥ २७ ॥
कल्पयेत्काथमामे तु मूर्वाशिग्रुद्रुमैर्भिषक् ।
सेचनं चामवातस्य रुबूकपयसाऽपि वा ॥ २८ ॥
लिह्यात्पथ्यां सविश्वां वा मूत्रैर्वा गुग्गुलुं पिबेत् ।
विश्वाऽलम्बुषयोः कल्कमद्याद्वा तिलविश्वयोः ॥ २९ ॥
विश्वापथ्याऽमृताकाथं कवोष्णं कौशिकान्वितम् ।
कटीजङ्घोरुपृष्ठानां रुजं पीतं निवर्त्तयेत् ॥ ३० ॥

अथ हिङ्ग्वाद्यचूर्णमाह—

हिङ्गु चव्यं विडं शुण्ठी कृष्णाऽजाजी सपुष्करम् ।
भागोत्तरमिदं चूर्णं पीतं वातामजिद्भवेत् ॥ ३१ ॥

अथ पिप्पल्यादिचूर्णमाह—

पिप्पली पिप्पलीमूलं सैन्धवं कृष्णजीरकम् ।
चव्यचित्रकतालीशपत्रकं नागकेशरम् ॥ ३२ ॥
एषां द्विपलिकान्भागान्पञ्च सौवर्चलस्य च ।
मरिचाजाजिशुण्ठीनामेकैकस्य पलं पलम् ॥ ३३ ॥
दाडिमात्कुडवञ्चैव द्वे पले चाम्लतवेसात् ।

सर्वमेकत्र संक्षुद्य योजयेत्कुशलो भिषक् ॥ ३४ ॥
पिप्पल्याद्यमिति ख्यातं नष्टस्याग्नेश्च दीपनम् ।
अर्शांसि ग्रहणीं गुल्ममुदरं सभगन्दरम् ॥ ३५ ॥
कृमिकण्ड्वरुचीर्हन्यात्सुरयोष्णोदकेन वा ।
नातः परतरं किञ्चिदामवातस्य भेषजम् ॥ ३६ ॥

अथ पथ्याऽऽद्यचूर्णमाह—

पथ्याविश्वयवानीभिस्तुल्याभिश्चूर्णितं पिबेत् ।
तक्रेणोष्णोदकेनापि काञ्जिकेनाथ वा पुनः ॥ ३७ ॥
आमवातं निहन्त्याशु शोथं मन्दाग्नितामपि ।
पीनसं कासहृद्रोगं स्वरभेदमरोचकम् ॥ ३८ ॥

अथ रसोनादिकषायमाह—

रसोनविश्वनिर्गुण्डीक्वाथमामार्दितः पिबेत् ॥ ३९ ॥

अथ रास्नापञ्चककाथमाह—

रास्नां गुडूचीमेरण्डं देवदारु महौषधम् ।
पिबेत्सार्वाङ्गिके वाते सामे सन्ध्यस्थिमज्जगे ॥ ४० ॥

अथ पञ्चकोलक्काथमाह—

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
क्वथितं वारि तत्पेयमामवातविनाशनम् ॥ ४१ ॥

अथ शट्यादिकल्कमाह—

शटीविश्वौषधीकल्कं वर्षाभूक्वाथसंयुतम् ।
सप्तरात्रं पिबेज्जन्तुरामवातविनाशनम् ॥ ४२ ॥

अथ रास्नासप्तकक्वाथमाह—

रास्नाऽमृताऽऽरग्वधदेवदारुत्रिकण्टकैरण्डपुनर्नवानाम् ।
क्वाथं पिबेन्नागरचूर्णमिश्रं जङ्घोरुपार्श्वत्रिकपृष्ठशूली ॥ ४३ ॥
आमवाते कणायुक्तं दशमूलीजलं पिबेत् ।
खादेद्वाऽप्यभयाविश्वं गुडूचीं नागरेण वा ॥ ४४ ॥

अथ चित्रकादिचूर्णमाह—

चित्रकेन्द्रयवौ पाठा कटुकाऽतिविषाऽभया: ।
आमाशयोत्थवातघ्नं चूर्णं पेयं सुखाम्बुना ॥ ४५ ॥

अथ पुनर्नवाऽऽदिचूर्णमाह—

पुनर्नवाऽमृता शुण्ठी शताह्वा बृद्धदारकम् ।
शटी मुण्डितिका चूर्णमारनालेन पाययेत् ॥ ४६ ॥
आमाशयोत्थवातघ्नं चूर्णं पेयं सुखाम्बुना ।
आमवातं निहन्त्याशु गृध्रसीमुद्धतामपि ॥ ४७ ॥

अथ नागरचूर्णमाह—

कर्षं नागरचूर्णस्य काञ्जिकेन पिबेत्सदा ।
आमवातप्रशमनं कफवातहरं परम् ॥ ४८ ॥

अथ पञ्चकोलचूर्णमाह—

पञ्चकोलकचूर्णन्तु पिबेदुष्णेन वारिणा ।
मन्दाग्निशूलगुल्मामकफारोचकनाशनम् ॥ ४९ ॥

अथैरण्डतैलमाह—

आमवातगजेन्द्रस्य शरीरवनचारिणः ।
एक एव निहन्ताऽऽशु एरण्डतैलकेशरी ॥ ५० ॥

अथैरण्डतैलहरीतकीमाह—

एरण्डतैलयुक्तां हरीतकीं भक्षयेन्नरो विधिवत् ।
आमानिलार्त्तियुक्तो गृध्रसीवृद्ध्यर्दितो नियतम् ॥ ५१ ॥

अथारग्वधपत्रप्रयोगमाह—

आरग्वधस्य पत्राणि भृष्टानि कटुतैलतः ।
आमघ्नानि नरः कुर्यात्सायं भक्तावृतानि च ॥ ५२ ॥

अथ कटिग्रहपङ्गुरोगयोर्लक्षणं चिकित्सां चाह—

वायुः कट्याश्रितः शुद्धः सामो वा जनयेद्रुजम् ।
कटीग्रहः स एवोक्तः पङ्गुः सक्थ्नोर्द्वयोर्वधात् ॥ ५३ ॥
शुण्ठीगोक्षुरकक्वाथः प्रातः प्रातर्निषेवितः ।
सामे वाते कटीशूले पाचनं रुक्प्रणाशनम् ॥ ५४ ॥
यवक्षारसमायुक्तं मूत्रकृच्छ्रविनाशनम् ।
दशमूलीकषायेण पिबेद्वा नागराम्भसा ॥ ५५ ॥
कटीशूलेषु पातव्यं तैलमेरण्डसम्भवम् ।
महौषधगुडूच्योश्च क्वाथं पिप्पलिसंयुतम् ॥ ५६ ॥

पिबेदामे सरुक्कोष्ठे कटीशूले विशेषतः ।
विशोध्यैरण्डबीजानि पिष्ट्वा क्षीरे विपाचयेत् ॥ ५७ ॥
तत्पायसं कटीशूले गृध्रस्यां परमौषधम् ।
सर्पिस्तैलं गुडं शुक्तं पञ्चमं विश्वभेषजम् ॥ ५८ ॥
पीतमेतद्भवेत्सद्यस्तर्पणं कटिशूलनुत् ।
न हि चैतत्समं किञ्चिन्निरामे कटिमारुते ॥ ५९ ॥
शुकतरुवल्कलसहितं गोमूत्रं स्थापितन्तु सप्ताहम् ।
हिङ्गुवचाशतपुष्पासैन्धवयुक्तेन तेनाथ ॥ ६० ॥
तत्पुटपक्वं हन्यात्कटीरुजं दारुणं पुंसाम् ।
आममेदोवृद्धिभवान्विकारांश्चानिलोद्भवान् ॥ ६१ ॥

अथामृताऽऽद्यचूर्णमाह—

अमृतानागरगोक्षुरमुण्डितिकावरुणकैः कृतं चूर्णम् ।
मस्त्वारनालपीतं सामानिलनाशनं ख्यातम् ॥ ६२ ॥

अथालम्बुषाऽऽदिचूर्णमाह—

अलम्बुषा गोक्षुरकं त्रिफलानागरामृताः ।
यथोत्तरं भागवृद्ध्या श्यामाचूर्णञ्च तत्समम् ॥ ६३ ॥
पिबेन्मस्तुसुरातक्रकाञ्जिकोष्णोदकेन वा ।
आमवातं जयत्याशु सशोथं वातशोणितम् ॥ ६४ ॥
त्रिकजानूरुसन्धिस्थं ज्वरारोचकनाशनम् ।
अलम्बुषाऽऽदिकं चूर्णं रोगानीकविनाशनम् ॥ ६५ ॥
हरीतक्यक्षधात्रीभिः प्रसिद्धा त्रिफला क्रमात् ।
प्रत्येकं तेन वा युञ्ज्याद्भागवृद्धिं यथोत्तरम् ॥ ६६ ॥

अथ द्वितीयमलम्बुषाऽऽदिचूर्णमाह—

अलम्बुषा गोक्षुरकं मूलं वरुणकस्य च ।
गुडूची नागरञ्चेति समभागानि कारयेत् ॥ ६७ ॥
काञ्जिकेन तु तत्पेयं बिडालपदमात्रकम् ।
आमवाते प्रवृद्धे च योगोऽयममृतोपमः ॥ ६८ ॥

अथ तृतीयमलम्बुषाऽऽदिचूर्णमाह—

अलम्बुषा गोक्षुरकं गुडूची वृद्धदारुकम् ।

पिप्पली त्रिवृता मुस्ता वरुणं सपुनर्नवम् ॥
त्रिफला नागरश्चेति सूक्ष्मचूर्णानि कारयेत् ॥ ६९ ॥
मस्त्वारनालतक्रेण पयोमांसरसेन वा।
आमवातं निहन्त्याशु श्वयथुं सन्धिसंस्थितम् ॥ ७० ॥

अथ वैश्वानरचूर्णमाह—

माणिमन्थस्य भागौ द्वौ यवान्यास्तद्वदेव तु।
भागास्त्रयोऽजमोदाया नागराद्भागपञ्चकम् ॥ ७१ ॥
दश द्वौ च हरीतक्याः सूक्ष्मचूर्णीकृतं शुभम्।
मस्त्वारनालतक्रेण सर्पिषोष्णोदकेन वा ॥ ७२ ॥
पीतं जयत्यामवातं गुल्महृद्वस्तिजान्गदान्।
प्लीहानं ग्रन्थिशूलादीनानाहं गुदजानि च ॥ ७३ ॥
विबन्धं जाठरान् रोगान्कटीवस्तिसमुत्थितान्।
वातानुलोमनमिदं चूर्णं वैश्वानरं स्मृतम् ॥ ७४ ॥

अथासीतकादिचूर्णमाह—

असीतकं मागधिका गुडूची श्यामावराहीगजकर्णशुण्ठीः।
समा धृताः कृत्स्नमिदन्तु चूर्णं पिबेत्तदुष्णोदकमण्डयूषैः ॥ ७५ ॥
तक्रै रसैर्मद्यसमस्तुभिर्वा यथेष्टचेष्टस्य च भोजनस्य।
सबाहुकं गृध्रसिखञ्जवातं विश्वाचितूनीप्रतितूनिरोगान् ॥ ७६ ॥
जङ्घाऽऽमवातार्दितवातरक्तं कटीग्रहं गुल्मगुदामयञ्च।
सक्रोष्टुकं पाण्डुगरोग्रशोथं हन्यादुरुस्तम्भमुदीर्णवेगम् ॥ ७७ ॥

अथ शुण्ठीधान्यकघृतमाह—

शुण्ठीनां षट्पलं पिष्टं धान्यकं द्विपलं तथा।
चतुर्गुणं जलं दत्त्वा घृतप्रस्थं विपाचयेत् ॥ ७८ ॥
वातश्लेष्मामयान् हन्यादग्निवृद्धिकरं परम्।
दुर्नामश्वासकासघ्नं बलवर्णाग्निवर्द्धनम् ॥ ७९ ॥

अथ शुण्ठीघृतमाह—

सर्पिर्नागरकल्केन सौवीरं तच्चतुर्गुणम्।
सिद्धमग्निकरं श्रेष्ठमामवातहरं परम् ॥ ८० ॥
पुष्ट्यर्थं पयसा साध्यं दध्ना विण्मूत्रसंग्रहे।

दीपनार्थं मतिमता मस्तुना च प्रकीर्त्तितम् ॥ ८१ ॥

अथ द्वितीयं शुण्ठीघृतमाह—

नागरक्वाथकल्काभ्यां घृतप्रस्थं विपाचयेत् ।
चतुर्गुणेन तेनाथ केवलेन जलेन वा ॥ ८२ ॥
वातश्लेष्मप्रशमनमग्निसन्दीपनं परम् ।
नागरं घृतमित्युक्तं कटीशूलामनाशनम् ॥ ८३ ॥

अथ काञ्जिकाद्यघृतमाह—

हिङ्गु त्रिकटुकं चव्यं माणिमन्थं तथैव च ।
कल्कान्कृत्वा तु पलिकान्घृतप्रस्थं विपाचयेत् ॥ ८४ ॥
आरनालाढकं दत्त्वा तत्सर्पिर्जठरापहम् ।
शूलं विबन्धमानाहमामवातं कटीग्रहम् ॥ ८५ ॥
नाशयेद् ग्रहणीदोषं मन्दाग्नेर्दीपनं परम् ॥ ८६ ॥

अथ शृङ्गवेराद्यघृतमाह—

शृङ्गवेरयवक्षारपिप्पलीमूलपिप्पलीः ।
पिष्ट्वा विपाचयेत्सर्पिरारनालं चतुर्गुणम् ॥ ८७ ॥
शूलं विबन्धमानाहमामवातं कटिग्रहम् ।
नाशयेद् ग्रहणीदोषमग्निसन्दीपनं परम् ॥ ८८ ॥
पिबेद् बिन्दुघृतं वाऽपि धान्वन्तरमथापि वा ।
महाशुण्ठीघृतं वाऽपि आमवाते पुनःपुनः ॥ ८९ ॥
यत्किञ्चिल्लेखनं सर्पिर्दीपनं पाचनञ्च यत् ॥
तत्सर्वमामवातेषु योज्यं वा मस्तु षट्पलम् ॥ ९० ॥

अथाजमोदादिचूर्णवटकावाह—

अजमोदमरिचपिप्पलिविडङ्गसुरदारुचित्रकशताह्वाः ।
सैन्धवपिप्पलिमूलं भागा नवकस्य पलिकाः स्युः ॥ ९१ ॥
शुण्ठी दशपलिका स्यात्पलानि तावन्ति वृद्धदारस्य ।
पथ्यापलानि पञ्च च सर्वाण्येकत्र कारयेच्चूर्णम् ॥ ९२ ॥
समगुडवटकानदतश्चूर्णं वाऽप्युष्णवारिणा पिबतः ।
नश्यन्त्यामानिलजाः सर्वे रोगाः सुकष्टाश्च ॥ ९३ ॥

प्रतितूनी विश्वाची रोगाश्चान्येऽपि गृध्रसी चोग्रा।
कटिपृष्ठगुदस्फुटनञ्चैवार्क्षिर्जङ्घयोस्तीव्रा॥ ९४॥
श्वयथुश्च सर्वसन्धिषु ये चान्येऽत्यामवातसम्भूताः।
सर्वे प्रयान्ति नाशं तम इव सूर्यांशुविध्वस्तम्॥ ९५॥
क्षुद्बोधमरोगित्वं स्थिरयौवनमथ वलीपलितनाशम्।
कुरुते च तथाऽभ्यासाद् गुणानथान्यांस्तथा सुबहून्॥ ९६॥

अथ योगराजगुग्गुलुमाह—

चित्रकं पिप्पलीमूलं यवानीं कारवीं तथा।
विडङ्गमजमोदाञ्च जीरके सुरदारु च॥ ९७॥
चव्यैलासैन्धवं कुष्ठं रास्नागोक्षुरधान्यकम्।
त्रिफलां मुस्तकं व्योषन्त्वगुशीरं यवाग्रजम्॥ ९८॥
तालीशपत्रं पत्रञ्च सूक्ष्मचूर्णानि कारयेत्।
यावन्त्येतानि चूर्णानि तावन्मात्रन्तु गुग्गुलुम्॥ ९९॥
संमर्द्य सर्पिषा गाढं स्निग्धे भाण्डे निधापयेत्।
अतो मात्रां प्रयुञ्जीत यथेष्टाहारवानपि॥ १००॥
योगराज इति ख्यातो योगोऽयममृतोपमः।
अग्निमान्द्यामवातादीन् क्रिमिदुष्टव्रणानपि।
प्लीहगुल्मोदरानाहदुर्नामानि विनाशयेत्॥ १०१॥
अग्निञ्च कुरुते दीप्तं तेजोवृद्धिं बलं तथा।
वातरोगाञ्जयत्येष सन्धिमज्जगतानपि॥ १०२॥

अथ प्रसारणीलेहमाह—

प्रसारण्याढके क्वाथे प्रस्थो गुडरसो मतः।
पक्वः पञ्चोषणरजोयुक्तः स्यादामवातहा॥ १०३॥

अथ खण्डशुण्ठीमाह—

नागरस्य पलान्यष्टौ घृतस्य पलविंशतिम्।
क्षीरद्विप्रस्थसंयुक्तं खण्डस्यार्द्धशतं पचेत्॥ १०४॥
व्योषत्रिजातकद्रव्यात्प्रत्येकञ्च पलं पलम्।
निदध्याच्चूर्णितं तत्र खादेदग्निबलं प्रति॥ १०५॥
आमवातप्रशमनं बलपुष्टिविवर्द्धनम्॥ १०६॥

बल्यमायुष्यमोजस्यं वलीपलितनाशनम् ।
आमवातप्रशमनं सौभाग्यकरमुत्तमम् १०७ ॥

अथ रसोनपिण्डमाह—

पलं शतं रसोनस्य तिलस्य कुडवं तथा ।
हिङ्गु त्रिकटुकं क्षारौ द्वौ पञ्च लवणानि च ॥ १०८ ॥
शतपुष्पा निशा कुष्ठं पिप्पलीमूलचित्रकौ ।
अजमोदा यवानी च धान्यकञ्चापि बुद्धिमान् ॥ १०६ ॥
प्रत्येकञ्च पलञ्चैषां श्लक्ष्णचूर्णानि कारयेत् ।
घृतभाण्डे दृढे चैव स्थापयेद्दिनषोडशम् ॥ ११० ॥
प्रक्षिप्य तैलमानीञ्च प्रस्थार्द्धं काञ्जिकस्य च ।
खादेत्कर्षप्रमाणन्तु तोयं मद्यं पिबेदनु ॥ १११ ॥
आमवाते रक्तवाते सर्वाङ्गैकाङ्गसंश्रिते ।
अपस्मारेऽनले मन्दे कासे श्वासे गरेषु च ।
सोन्मादे वातभग्ने च शूले जन्तुषु शस्यते ॥ ११२ ॥

अथ प्रसारणीतैलमाह—

प्रसारण्या रसे सिद्धं तैलमेरण्डजं पिबेत् ।
सर्वदोषहरञ्चैव कफरोगहरं परम् ॥ ११३ ॥

अथ द्विपञ्चमूलाद्यतैलमाह—

द्विपञ्चमूलीनिर्यासफलदध्यम्लकाञ्जिकैः ॥ ११४ ॥
तैलं कटयूरूपार्श्वार्त्तिकफवातामयान्ग्रहान् ।
हन्ति वस्तिप्रदानेन करोत्यग्निबलं महत् ॥ ११५ ॥

अथ बृहत्सैन्धवाद्यतैलमाह—

सैन्धवं श्रेयसी रास्ना शतपुष्पा यवानिका ।
स्वर्जिका मरिचं कुष्ठं शुण्ठी सौवर्चलं विडम् ॥ ११६ ॥
वचाऽजमोदाजरणाः पौष्करं मधुकं कणा ।
एतान्यर्द्धपलांशानि सूक्ष्मपिष्टानि कारयेत् ॥ ११७ ॥
प्रस्थमेरण्डतैलस्य प्रस्थाम्बु शतपुष्पजम् ।
काञ्जिकं द्विगुणं दत्वा मस्तु च द्विगुणं तथा ॥ ११८ ॥
एतं सम्भृत्य सम्भारं शनैर्मृद्वग्निना पचेत् ।

सिद्धमेतत् प्रयोक्तव्यमामवातहरं परम् ॥ ११९ ॥
पानाभ्यञ्जनवस्तौ च कुरुतेऽग्निबलं भृशम्।
वातार्त्तवङ्क्षणे शस्तं कटीजानूरुसन्धिजे ॥ १२० ॥
शूले हृत्पार्श्वजे तद्वद् वृद्धे श्लेष्मणि पीडिते।
बाह्यायामार्दितानाहैरन्त्रवृद्धिनिपीडिते।
अन्यांश्चानिलजान् रोगान्नाशयत्याशु देहिनाम् ॥ १२१ ॥

अथ निरूहवस्तिमाह—

स्वल्पप्रसारणीतैलं तैलं वा सैन्धवादिकम्।
दशमूलाद्यतैलेन वस्तिदानं प्रशस्यते ॥ १२२ ॥
तैलस्य द्विपलं दद्यात्काञ्जिकस्य चतुःपलम्।
दशमूलरसं मूत्रं पृथक्पञ्च पलानि तु ॥ १२३ ॥
वचा मदनवाट्या वा शताह्वाकुष्ठसैन्धवैः।
पिप्पल्यतिविषामुस्तरास्नाकट्फलपौष्करैः ॥ १२४ ॥
अक्षांशिकैश्च तत्सर्वं मन्थयेत विचक्षणः।
प्रस्थार्धं प्रथमं देयो वस्तिर्निरभिशङ्कितः ॥ १२५ ॥
द्वितीये च तृतीये च वर्जयेत्प्रसृतद्वयम्।
सर्ववातविकारेषु मेहेषु वृषणामये ॥ १२६ ॥
कुक्षौ हृत्पृष्ठपार्श्वेषु जानुजङ्घाकटीग्रहे।
विबन्धानाहरोगेषु शर्कराऽश्मरिपीडिते ॥ १२७ ॥
भग्नविश्लिष्टगात्रेषु पिच्चितेषु क्षतेषु च।
एतन्निरूहवत्प्राज्ञो निरायासो महागुणः ॥ १२८ ॥

अथामवातेऽपथ्यान्याह—

दधिमत्स्यगुडक्षीरं पोतकीमाषपिष्टकम्।
वर्जयेदामवातार्त्तो मांसमानूपसम्भवम् ॥ १२९ ॥
अभिष्यन्दकरा ये च ये चान्ये गुरुपिच्छिलाः।
वर्जनीयाः प्रयत्नेन आमवातार्दितैर्नरैः ॥ १३० ॥

अथ मध्यमरास्नाऽऽदिक्वाथमाह—

रास्नैरण्डशतावरीसहचरादुःस्पर्शवासाऽमृता-
देवाह्वातिविषाऽभयाघनशटीशुण्ठीकषायः कृतः।

पीतः सोरुवुतैल एष विहितः सामे सशूलेऽनिले
कटयूरुत्रिकपृष्ठकोष्ठजठरक्रोडेषु चामार्त्तिजित् ॥१३१॥

अथ महारास्नाऽऽदिक्वाथमाह—

रास्ना वातारिमूलञ्च वासकञ्च दुरालभम् ।
शटीदारुबलामुस्तनागरातिविषाऽभयाः ॥ १३२ ॥
श्वदंष्ट्रा व्याधिघातश्च मिसिधान्यपुनर्नवाः ।
अश्वगन्धाऽमृताकृष्णा वृद्धदारः शतावरी ॥ १३३ ॥
वचा सहचरश्चैव चविका बृहतीद्वयम् ।
समभागान्वितैरेते रास्नाद्विगुणभागिकैः ॥ १३४ ॥
कषायं पाययेत्सिद्धमष्टभागावशेषितम् ।
शुण्ठीचूर्णसमायुक्तमाभाऽऽद्येन युतं तथा ॥ १३५ ॥
अलम्बुषाऽऽदिसंयुक्तमजमोदादिसंयुतम् ।
यथादोषं यथाव्याधि प्रक्षेपं कारयेद्भिषक् ॥ १३६ ॥
सर्वेषु वातरोगेषु सन्धिमज्जगतेषु च ।
आनाहेषु च सर्वेषु सर्वगात्रानुकम्पने ॥ १३७ ॥
कुब्जके वामने चैव पक्षाघाते तथाऽर्दिते ।
जानुजङ्घाऽस्थिपीडासु गृध्रस्यां च हनुग्रहे ॥ १३८ ॥
प्रशस्तं वातरक्ते स्यादूरुस्तम्भे तथाऽर्शसि ।
विश्वाचीगुल्महृद्रोगविषूचीक्रोष्टुशीर्षके ॥ १३९ ॥
अन्त्रवृद्धौ श्लीपदे च योनिशुक्रामये तथा ।
पुंसां मेढ्रगते रोगे स्त्रीणां वन्ध्याऽऽमये तथा ॥ १४० ॥
योषितां गर्भदं मुख्यं नास्ति किंचिदतः परम् ।
सर्वेषां पाचनानान्तु श्रेष्ठमेतद्धि पाचनम् ॥ १४१ ॥
महारास्नाऽऽदिकं नाम प्रजापतिविनिर्मितम् ॥ १४२ ॥

अथ रास्नाऽऽदिदशमूलक्वाथमाह—

रास्नाविश्वविडङ्गानि रुबूकं त्रिफला तथा ।
दशमूलं पृथक् श्यामा क्वाथो वातामयापहः ॥ १४३ ॥
अर्द्धावभेदके त्वाढये चार्दिते वातखञ्जके ।

नेत्ररोगे शिरःशूले ज्वरापस्मारयोस्तथा ।
मनोभ्रंशे च विविधे कथितञ्च शुभप्रदम् ॥ १४४ ॥

इति पञ्चविंश आमवाताधिकारः समाप्तः ॥ २५ ॥

अथ षड्विंशः पित्तव्याध्यधिकारः ॥ २६ ॥

तत्र पित्तव्याधीनां विप्रकृष्टसंनिकृष्टनिदानमाह—

कट्वम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातप-
स्त्रीसम्भोगतृषाक्षुधाऽभिहननव्यायाममद्यादिभिः ।
मध्ये चापि हि भोजनस्य जरता भुक्तेन मध्यन्दिने
मध्याह्ने रजनी निदाघशरदोः पित्तं करोत्यामयान् ॥ १ ॥

*मद्यादिभिरित्यादिशब्देन दधिमत्स्यमाषतिलातसीकाञ्जिकादीनि संगृह्यन्ते । तीक्ष्णं=राजिकाऽऽदि । मध्ये चापि हि भोजनस्य=यावत् कालेन भुङ्क्ते, तस्य कालस्य मध्यभागे । जरता भुक्तेन=भुक्तस्य जरणकालमध्ये । मध्यन्दिने=त्रिधा विभक्तस्य दिवसस्य मध्यांशे, तथा रात्रेर्मध्यमेंऽशे ॥ १ ॥

अथ पित्तरोगानाह—

अकालपलितं नेत्ररक्तता मूत्ररक्तता ।
नेत्रास्यपीतता तद्वन्मूत्रस्यापि च पीतता ॥ २ ॥
मलस्य पीतता प्रोक्ता शाखानामपि पीतता ।
दन्तानाञ्चापि पीतत्वं पीतत्वं वपुषस्तथा ॥ ३ ॥
तमसो दर्शनञ्चापि परितः पीतदर्शनम् ।
निद्राऽल्पताऽऽदि शोषश्च मुखे गन्धश्च लोहवत् ॥ ४ ॥
मुखस्य तिक्तता चापि तथा च वदनाम्लता ।
उच्छ्वासस्योष्णता चापि धूमोद्गारस्तथैव च ॥ ५ ॥
भ्रमः क्लमस्तथा क्रोधो दाहो भेदसमन्वितः ।
तेजो द्वेषश्च शीतेच्छाऽऽद्यतृप्तिररतिस्तथा ॥ ६ ॥
भक्षितस्य विदाहश्च जठरानलतीक्ष्णता ।
रक्तप्रवृत्तिर्विड्भेदः पुरीषस्योष्णता तथा ॥ ७ ॥

मूत्रोष्णता मूत्रकृच्छ्रं मूत्राल्पत्वं तनूष्णता ।
स्वेदस्य चापि दौर्गन्ध्यं देहप्रावरणं तथा ॥ ८ ॥
शरीरस्यावसादश्च पाकश्च वपुषस्तथा ।
चत्वारिंशदमी पित्तव्याधयो मुनिभिर्मताः ॥ ९ ॥

*एषां चिकित्सा तु स्वप्रकरणे बोद्धव्या ॥ २-९ ॥

इति षड्विंशः पित्तव्याध्यधिकारः समाप्तः ॥ २६ ॥

अथ सप्तविंशः श्लेष्मव्याध्यधिकारः ॥ २७ ॥

तत्र श्लेष्मव्याधीनां सामान्यतः विप्रकृष्टसंनिकृष्टनिदानान्याह—

गुरुमधुररसादिस्निग्धमन्दोदराग्नि-
द्रवदधिदिननिद्राशीतनिश्चेष्टितानि ।
प्रथमदिवसभागे भुक्तमात्रे वसन्ते
भवति हि कफरोगो रात्रिभागेऽपि चाद्ये ॥ १ ॥

*मधुररसादीत्यादिशब्देनाम्ललवणौ गृह्येते । निश्चेष्टितानि=कायिकव्यापाराकरणानि । प्रथमदिवसभागे=त्रिधा विभक्तस्य दिवसस्याद्यभागे । भुक्तमात्रे=भुक्तस्य पाककालस्य त्रिधा विभक्तस्य प्रथमकाले । कफरोगो भवति ॥ १ ॥

अथ कफरोगानाह—

प्रथमं मुखमाधुर्यं तथैव मुखलिप्तता ।
मुखप्रसेकश्च तथा निद्राऽऽधिक्यं तथैव च ॥ २ ॥
कण्ठे घुर्घुरता चापि कटुकाङ्क्षोष्णकामिता ।
बुद्धिमान्द्यमचैतन्यमालस्यं तृप्तिरेव च ॥ ३ ॥
अग्निमान्द्यं मलाधिक्यं मलशौक्ल्यं तथैव च ।
मूत्राधिक्यं मूत्रशौक्ल्यं शुक्राधिक्यं तथैव च ॥ ४ ॥
स्तैमित्यं गौरवं शैत्यमेत एव हि विंशतिः ।
योगतो रूढितः प्रोक्ता मुनिभिः श्लैष्मिका गदाः ॥ ५ ॥

अथ श्लेष्मव्याधीनां सामान्यां चिकित्सामाह—

रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवनं-
धूमोष्मानलघर्मनस्यवमनं स्वेदोपवासादिकम् ।

तृड्घाताध्वनियुद्धजागरजलक्रीडाऽङ्गनासेवनं-
पानाहारविहारभेषजमिदं श्लेष्मामयान् संहरेत् ॥ ६ ॥

*निष्ठीवनं=कवलग्रहः । नियुद्धं=बाहुयुद्धम् । जागरो रात्रौ । स च दिवाशयनोत्थे कफव्याधौ कार्यः । जलक्रीडा—जलक्रीडारूपो-व्यायामोऽश्लेष्मजनितोरुस्तम्भसंमूढवातादिषु कार्यः । अङ्गनासे-वनं—श्लेष्मजनितस्थौल्यादौ कार्यम् ॥ ६ ॥

इति सप्तविंशः श्लेष्मव्याध्यधिकारः समाप्तः ॥ २७ ॥

अथाष्टाविंशो वातरक्ताधिकारः ॥ २८ ॥

तत्र वातरक्तस्य विप्रकृष्टनिदानमाह—

लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः ।
क्लिन्नशुष्काम्बुजानूपमांसपिण्याकमूलकैः ॥ १ ॥
कुलत्थमाषनिष्पावशाकादिपललेक्षुभिः ।
दध्यारनालसौवीरशुक्ततक्रसुराऽऽसवैः ॥ २ ॥
विरुद्धाध्यशनक्रोधदिवास्वप्नातिजागरैः ।
प्रायशः सुकुमाराणां मिथ्याऽऽहारविहारिणाम् ।
स्थूलानां सुखिनाञ्चापि प्रकुप्येद्वातशोणितम् ॥ ३ ॥
हस्त्यश्वोष्ट्रैर्गच्छतश्चाश्नतश्च विदाह्यन्नं सविदाहाशनस्य ॥ ४ ॥
कृत्स्नं रक्तं विदहत्याशु तच्च दुष्टं शीघ्रं पादयोश्चीयते तु ।
तत्संपृक्तं वायुना दूषितेन तत्प्राबल्यादुच्यते वातरक्तम् ॥ ५ ॥

*क्षारो=यवक्षारादिः । अजीर्णभोजनैः=अजीर्णे भोजनैः, अति-मात्रभोजनैरित्यर्थः । क्लिन्नादीनि मांसविशेषणानि । क्लिन्नं=शटि-तम् । शुष्कम्=आतपे शोषितम् । अम्बुजं=मत्स्यादि मांसम् , आ-नूपं=गौडादिपूर्वदेशजम् मांसम । पिण्याकः=तिलखलिः । मूलकं प्रसिद्धमेव । निष्पावः=[वोडा] । शाकं=पत्रशाकम् । आदिश-ब्देन वृन्ताकादीनां फलशाकादीनां फलं गृह्यते । पललं=शटितत्वा-दिदोषरहितमपि मांसम् । वातशोणितं प्रकोपयेत् । शटितादि मांसं तु विशेषतो वातशोणितं प्रकोपयेत् । आरनालसौवीरशुक्तानि =सन्धानभेदाः । तक्रं=चतुर्थांशजलयुक्तं वस्त्रपूतं दधि । सुरा=

सन्धानभेदः। विरुद्धं=क्षीरमत्स्यादि। अध्यशनम्=

*अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते।

*अतिजागरो निशि। प्रायशः=बाहुल्येन। सुकुमाराणाम्=अल्पतरकायव्यापाराणाम्। अथ च मिथ्याऽऽहारविहारिणाम्। स्थूलानां सुखिनां रक्तवृद्धय। हस्त्यश्वोष्ट्रै र्गच्छतः=यतो वायुर्वर्द्धते रुधिरञ्चाधोगच्छति। हस्त्यादय उपलक्षणानि। पद्भ्यामपि चलतः। अश्नतश्च विदाह्यन्नम्। विदाहि=निष्पावकुलत्थसर्षपशाकादि। सविदाहाशनस्य=सविदाहि अशनं यस्य, भुक्ते विदग्धे तदुपरि भुञ्जानस्येत्यर्थः। अध्यशनमुक्त्वाऽप्येतद्वचनं विदग्धं=जीर्णम्। भोजनस्य विशेषतो हेतुत्वार्थम्। पश्चाद् वातशोणितं प्रकुप्यतीत्यन्वयः। एतेषां कारणानां मध्ये केन चिद् वायुः, केन चिद् रक्तं, केन चिदुभयमपि प्रकुप्येत्। अथ सम्प्राप्तिमाह—कृत्स्नेत्यादि। पूर्वोक्तैर्हेतुभिः, कृत्स्नं=समस्तम्। रक्तं विदहति, अत्र दहधातुरविवक्षितकर्मकः, तेन विदहति=विदग्धं भवतीत्यर्थः। तच्च दुष्टं रक्तमधोगतम्। दूषितेन स्वहेतुभिर्वायुना सम्पृक्तं=मिलितम्, वातरक्तमुच्यते। ननु चैतस्य सम्प्राप्तिरुक्ता सुश्रुतेन—

*शीघ्रं रक्तं दुष्टिमायाति तच्च वायोर्मार्गं संरुणद्ध्याशु वातम्।
क्रुद्धोऽत्यर्थं मार्गरोधात्स वायुरत्युद्रिक्तं दूषयेद्रक्तमाशु॥ १॥

*अत्र प्रथमं रक्तस्य दुष्टिरतो "रक्तवातमि"ति व्यपदेष्टुमुचितं भवति। तत्राह—तत् प्राबल्यादिति। तस्य वातस्य दोषत्वेन प्राधान्याद् वातरक्तमिति व्यपदिश्यते॥ १-५॥

अथ वातरक्तस्य पूर्वरूपमाह—

स्वेदोऽत्यर्थं न वा कार्ष्ण्यं स्पर्शाज्ञत्वं क्षतेऽतिरुक्।
सन्धिशैथिल्यमालस्यं सदनं पिडिकोद्गमः॥ ६॥
जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु।
निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव च॥ ७॥
कण्डूः सन्धिषु रुग्दाहो भूत्वा नश्यति चासकृत्।
वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक्पूर्वलक्षणम्॥ ८॥

*धर्मागमनमत्यर्थं भवति न वा सर्वथा भवति, एतच्च व्याधिमहिम्ना कुष्ठवद्बोद्धव्यम्। क्षतेऽतिरुग्=यदि क्षतं स्यात् तदा तत्रातिरुक्। सदनं=सुप्तिः, अङ्गानाम्। पिडिकाप्रादुर्भावः। जान्वादिषु निस्तोदः=पीडाविशेषः। वैवर्ण्यं=त्वक्कान्तिक्षयः॥ ६-८॥

अथ वाताधिकस्य वातरक्तस्य लक्षणमाह—

वातेऽधिकेऽधिकं तत्र शूलं स्फुरणतोदनम्।
शोथस्य रौक्ष्यं कृष्णत्वं श्यावता वृद्धिहानयः॥ ९॥
धमन्यङ्गुलिसन्धीनां संकोचोऽङ्गग्रहोऽतिरुक्।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः॥ १०॥

*तत्र पादयोः शूलादिकमधिकं यत आह सुश्रुतः—
*"स्पर्शोद्विग्नौ तोदभेदप्रशोषौ।
स्वापोपेतौ वातरक्तेन पादौ"इति॥ २॥

*तथा शोथस्य रौक्ष्यादिकं वृद्धिहानयश्च विज्ञेयाः। सुप्तिः=स्पर्शाज्ञता॥ ९-१०॥

[1]अथ रक्ताधिकस्य वातरक्तस्य लक्षणमाह—

रक्ते शोथोऽतिरुक्तोदस्ताम्रश्चिमिचिमायते।
स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः॥ ११॥

*'रक्तेऽधिक' इत्यनुवर्त्तनीयम्। एवं वक्ष्यमाणपित्तादिष्विति। एतच्चारम्भकरक्ताद्रक्तान्तरं बोद्धव्यम्। रक्तमपि रक्तान्तरदूषकं भवति। यदुक्तं दुष्टरक्तलक्षणम्—"पित्तवद्रक्तेनातिकृष्णञ्चे"ति। अतिरुक्तोदः=अतिरुक्तोदो यत्र सः। शोथः। चिमिचिमायते="चिमिचिमे"ति कण्डूभेदः, स्पर्शप्रियेति यावत्। "चुहचुहा" इति लोके, तद्युक्तः। क्लेदसमन्वितः=क्लेदः=आर्द्रता, तद्युक्तः॥ ११॥

अथ पित्ताधिकस्य वातरक्तस्य लक्षणमाह—

पित्ते विदाहः संमोहः स्वेदो मूर्च्छा मदस्तृषा।
स्पर्शासहत्वं रुग्दाहः शोथः पाको भृशोष्णता॥ १२॥

*पित्तेऽधिके विदाहः=विशेषेण दाहः। विदाहादयश्च पादयोरेव बोद्धव्याः। यत आह सुश्रुतः—

*"पित्तासृग्भ्यामुग्रदाहौ भवेतामत्यर्थोष्णौ रक्तशोथौ मृदू च।"

*"पादावि"ति शेषः । संमोह आतुरस्य । स्वेदः पादयोः । मूर्च्छा=पादयोः समुच्छ्रायः, शोथ इति यावत् । न तु मूर्च्छा=मोहः, संमोहस्योक्तत्वात् ॥ १२ ॥

अथाधिककफद्विदोषत्रिदोषाणां वातरक्तानां लक्षणान्याह—

कफे स्तैमित्यगुरुता सुप्तिः स्निग्धत्वशीतता ।
कण्डूर्मन्दा च रुग्द्वन्द्वसर्वलिङ्गञ्च संकरे ॥ १३ ॥

*कफेऽधिके स्तैमित्यं=शरीरस्यार्द्रचर्मावगुण्ठितत्वमिव । गुरुताऽऽद्यः पादयोरेव । यत आह सुश्रुतः—

*"कण्डूमन्तौ श्वेतशीतौ सशोथौ ।
पीनौ स्तब्धौ श्लेष्मदुष्टे तु रक्ते" ॥ ३ ॥

*पादाविति शेषः । अधिकद्विदोषम्; अधिकत्रिदोषं च, तदाह–द्वन्द्वसर्वलिङ्गं च संकरे=द्वित्रिदोषसंसर्गे ॥ १३ ॥

अथ वातरक्तप्रसर्पणप्रकारमाह—

पादयोर्मूलमास्थाय कदा चिद्धस्तयोरपि ।
आखोर्विषमिव क्रुद्धं तद्देहमनुसर्पति ॥ १४ ॥

*आखोः=मूषकस्य । आखोर्विषमिवेत्यनेन मन्दविसर्पत्वं बोधितम् । देहमनुसर्पति, अप्रतिक्रियाणाम् ॥ १४ ॥

अथ वातरक्तस्योपद्रवानाह—

अस्वप्नारोचकश्वासमांसकोथशिरोग्रहाः ।
मूर्च्छा चामन्दरुक्तृष्णाज्वरमोहप्रवेपकाः ॥ १५ ॥
हिक्कापाङ्गुल्यवीसर्पपाकतोदभ्रमक्लमाः ।
अङ्गुलीवक्रतास्फोटदाहमर्मग्रहार्बुदाः ॥ १६ ॥

*मांसकोथो=मांसगलनम् । मूर्च्छा=तदङ्गसमुच्छ्रायः । अमन्दरुक्=पीडाबाहुल्यम् । प्रवेपकः=कम्पः, प्रवेपनं प्रवेपस्ततः स्वार्थे कः ॥ १५-१६ ॥

अथ वातरक्तस्य साध्यत्वादिकमाह—

एतैरुपद्रवैर्वर्ज्यं मोहेनैकेन चापि तत् ।
अकृत्स्नोपद्रवं याप्यं साध्यं स्यान्निरुपद्रवम् ॥ १७ ॥

*मोहेनैकेनेति वचनम्—अस्त्रमादिभिः समस्तैरसाध्यत्वं बोधयति ॥ १७ ॥

एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम्।
त्रिदोषजमसाध्यं स्याद्यस्य च स्युरुपद्रवाः ॥ १८ ॥

*नवं = संवत्सरादर्वाचीनं, तत्साध्यम् ॥ १८ ॥

आजानु स्फुटितं यच्च प्रभिन्नं प्रस्रुतञ्च यत्।
उपद्रवैश्च यज्जुष्टं प्राणमांसक्षयादिभिः।
वातरक्तमसाध्यं स्याद्याप्यं संवत्सरोत्थितम् ॥ १९ ॥

*आजानु = पद्भ्यां जानुपर्यन्तं यद्भवति तदसाध्यं स्यात्। स्फुटितं = यच्च त्वङ्मात्रे शीतेनेव किञ्चिद्विदीर्णम्। प्रभिन्नम् = अधिकविदीर्णम्। प्रस्रुतं = वहत् ॥ १९ ॥

अथ वातरक्तचिकित्सामाह—

वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत्।
अल्पाल्पं रक्षयेद्वायुं यथादोषं यथाबलम् ॥ २० ॥

*रक्षयेद् वायुं = यथा वायुर्न बर्द्धते तथा रक्तं हरेदित्यर्थः ॥ २० ॥

उग्राङ्गदाहतोदेषु जलौकोभिर्विनिर्हरेत् ॥ २१ ॥
शृङ्गेण वै चिमिचिमाकण्डूरुग्लेपनान्वितम्।
प्रच्छन्नेन शिराभिर्वा देशाद्देशान्तरं व्रजेत् ॥ २२ ॥

*विनिर्हरेद् = निष्काशयेत्। चिमिचिमा = "चुहचुहा" इति लोके। प्रच्छन्नं = "पच्छना" इति लोके। "व्रजेदि"ति रक्तविशेषणम् ॥२१-२२॥

अङ्गे ग्लाने तु न स्राव्यं रक्ते वातोत्तरञ्च यत्।
गम्भीरं श्वयथुं स्तम्भं कम्पवायुशिराऽऽमयान्।
ग्लानिमन्यांश्च वातोत्थान्कुर्याद्वायुरसृक्क्षयात् ॥ २३ ॥
खञ्जादीन् वातरोगांश्च मृत्युञ्चानवशेषितम्।
कुर्यात्तस्मात्प्रमाणेन स्निग्धाद्रक्तं विनिर्हरेत् ॥ २४ ॥
विरेच्यः स्नेहयित्वाऽऽदौ स्नेहयुक्तैर्विरेचनैः।
रूक्षैर्वा मृदुभिः शस्तमसकृद्वस्तिकर्म च ॥ २५ ॥
नहि वस्तिसमं किञ्चिद्वातरक्तचिकित्सितम्।

बाह्यमालेपनाभ्यङ्गपरिषेकोपनाहनैः ॥ २६ ॥
विरेकास्थापनस्नेहपानैर्गम्भीरमाचरेत् ।
दिवास्वप्नं ससन्तापं व्यायामं मैथुनं तथा ॥ २७ ॥
कटूष्णगुर्वभिष्यन्दि लवणाम्लौ च वर्जयेत् ।
पुराणा यवगोधूमा नीवाराः शालिषष्टिकाः ।
भोजनार्थे रसार्थे तु विष्किराः प्रतुदा हिताः ॥ २८ ॥
आढक्यश्चणका मुद्रा मसूराः सकुलत्थकाः ।
यूषार्थे बहुसर्पिष्काः प्रशस्ता वातशोणिते ॥ २९ ॥
सुनिषण्णकवेत्राग्रकाकमाचीशतावरी ।
वास्तुकोपोदिकाशाकं शाकं सौवर्चलं तथा ॥ ३० ॥
घृतमांसरसैर्भृष्टं शाकसात्म्याय दापयेत् ॥ ३१ ॥

*सुनिषण्णः=चाङ्गेरीसदृशः, चतुष्पत्रशाकः सजले स्थले भवति, "सुसुनि" इति लोके । "धवली चिल्मो" इति क्वचित् ॥ ३०-३१ ॥

सर्पिस्तैलवसामज्जपानाभ्यञ्जनबस्तिभिः ।
सुखोष्णैरुपनाहैश्च वातोत्तरमुपाचरेत् ।
हितो गोधूमचूर्णश्च च्छागक्षीरघृताप्लुतः ॥ ३२ ॥
लेपस्तद्वत्तिला भृष्टाः पिष्टाः पयसि निर्वृताः ।
क्षारपिष्टातसीलेपो वर्द्धमानफलेन वा ॥ ३३ ॥
उभे शताह्वे मधुकं बलां च प्रियालकं चापि कसेरुकं च ।
घृतं विदारीञ्च सितोपलाञ्च कुर्यात्प्रदेहं पवने सरक्ते ॥ ३४ ॥
रास्ना गुडूची मधुकं बले द्वे सजीवकं सर्षभकं पयश्च ।
घृतञ्च सिद्धं मधुशेषयुक्तं रक्तानिलार्त्तिं प्रणुदेत्प्रदेहः ॥ ३५ ॥
वासागुडूचीचतुरङ्गुलानामेरण्डतैलेन पिबेत्कषायम् ।
क्रमेण सर्वाङ्गजमप्यशेषं जयेदसृग्वातभवं विकारम् ॥ ३६ ॥
दशमूलीशृतं क्षीरं सद्यः शूलनिवारणम् ।
परिषेकोऽनिलप्राये तद्वत्कोष्णेन सर्पिषा ॥ ३७ ॥
पटोलकटुकाभीरुत्रिफलाऽमृतसाधितम् ।
क्वाथं पीत्वा जयेज्जन्तुः सदाहं वातशोणितम् ॥ ३८ ॥

त्रिवृद्विदारीक्षुरकक्काथो वातास्रनाशनः।
अमृता कफवातघ्नी कफमेदोविशोषिणी ॥ ३९ ॥
वातरक्तप्रशमनी कण्डूत्वीसर्पनाशिनी ॥ ४० ॥
गुडूच्याः स्वरसं कल्कं चूर्णं वा काथमेव च।
प्रभूतकालमासेव्य मुच्यते वातशोणितात् ॥ ४१ ॥
अमृतानागरधान्यककर्षत्रितयेन पाचनं सिद्धम्।
जयति सरक्तं वातं सामं कुष्ठान्यशेषाणि ॥ ४२ ॥
वत्सादन्युद्भवः क्वाथः पीतो गुग्गुलुमिश्रितः।
समीरणसमायुक्तं शोणितं सम्प्रणाशयेत् ॥ ४३ ॥
तिस्रोऽथ वा पञ्च गुडेन पथ्या जग्ध्वा पिबेच्छिन्नरुहाकषायम्।
तद्वातरक्तं शमयत्युदीर्णमाजानुभिन्नं च्युतमप्यवश्यम् ॥ ४४ ॥

अथ गुग्गुलुवटिकामाह—

गुग्गुलवमृतवल्लीभिर्द्राक्षा(गुग)लुङ्गरसेन वा।
त्रिफलाया रसैर्युक्ता गुटिकाः कोलसम्मिताः ॥ ४५ ॥
भक्षयेन्मधुनाऽऽलोडय शृणु कुर्वन्ति यत्फलम्।
पादस्फोटं महाघोरं स्फुटत्सर्वाङ्गसञ्चयम्।
तत्सर्वं नाशयत्याशु साध्यञ्चैव सशोणितम् ॥ ४६ ॥
माहिषं नवनीतं तु वह्निना परिमिश्रितम्।
गोमूत्रमिश्रितं कृत्वा क्षीरेण लवणेन च ॥ ४७ ॥
तदेकत्र समालोडय वह्निना भावयेच्छनैः।
गात्रमुद्वर्त्तयेत्तेन देहस्फुटनशान्तये ॥ ४८ ॥

इति गुग्गुलुवटिका।

घृतेन वातं सगुडा विबन्धं पित्तं सिताढ्या मधुना कफञ्च।
वातासृगुग्रं रुवुतैलमिश्रा शुण्ठ्यामवातं शमयेद् गुडूची ॥ ४९ ॥
सिंहास्यपञ्चमूलोच्छिन्नरुहैरण्डगोक्षुरक्काथः।
एरण्डतैलरामठसैन्धवचूर्णान्वितः पीतः ॥ ५० ॥
प्रशमयति वातरक्तं तथाऽऽमवातं कटीशूलम्।
मूत्रपुरीषविबन्धं ब्रध्नविकारं सुदुर्वारम् ॥ ५१ ॥

गन्धर्वहस्तवृषगोक्षुरकामृतानां-
मूलं बलेक्षुरकयोश्च पचेत्तु धीमान् ।
वातासृगाशु विनिहन्ति चिरप्ररूढ-
माजानुगं स्फुटितमूर्ध्वगतन्तु धीमान् ॥ ५२ ॥
कफपित्तप्रशमनं कण्डूवीसर्पनाशनम् ।
वातरक्तप्रशमनं हृद्यं गुडघृतं स्मृतम् ॥ ५३ ॥
पिप्पलीबर्द्धमानं वा सेव्यं पथ्या गुडेन वा ॥ ५४ ॥
कोकिलाक्षामृताक्वाथे पिबेत्कृष्णां यथाबलम् ।
पथ्यभोजी त्रिसप्ताहान्मुच्यते वातशोणितात् ॥ ५५ ॥
मधुकाद् द्विगुणं तैलं तैलादाजं पयो भवेत् ।
तद्यथाऽग्निबलं पेयं वातरक्तरुजाऽपहम् ॥ ५६ ॥
अगस्तिपुष्पचूर्णेन माहिषं जनयेद्दधि ।
तदुत्थनवनीतेन देहजं स्फुटनं जयेत् ।
त्रिफलानिम्बमञ्जिष्ठा वचा कटुकरोहिणी ॥ ५७ ॥
वत्सादनी दारुनिशा कषायो नवकार्षिकः ।
वातरक्तं तथा कुष्ठं पामानं रक्तमण्डलम् ॥ ५८ ॥
कण्डूकपालिकाकुष्ठं पानादेवापकर्षति ।
पञ्चरक्तिकमाषेण कषायो नवकार्षिकः ॥ ५९ ॥
किञ्चैवं साधिते क्वाथे योग्या मात्रा प्रदीयते ।
कर्षादौ तु पलं यावद्दद्यात्षोडशिकं जलम् ॥ ६० ॥
ततस्तु कुडवं यावदष्टादशगुणं जलम् ।
चतुर्गुणमतश्चोर्ध्वं यावत्प्रस्थादिकं भवेत् ॥ ६१ ॥
विरेचनैर्घृतक्षीरपानैः सेकैः सबस्तिभिः ।
लेपनं शाल्मलीकल्कमविक्षीरेण संयुतम् ॥ ६२ ॥
रक्तोत्तरं क्षीरघृतं मधुकोशीरवारिभिः ।
सेचनं चात्र कर्त्तव्यमविक्षीरैः क्षणं क्षणम् ॥ ६३ ॥
सहस्रशतधौतेन घृतेन रुधिरोत्तरे ।
लेपनं सुष्ठु शीतेन घृतसर्जरसेन वा ॥ ६४ ॥

शीतैर्निर्वापणैश्चापि रक्तपित्तोत्तरं जयेत् ।
सरागे सरुजे दाहे रक्तं विस्राव्य लेपयेत् ॥ ६५ ॥
तिलाः प्रियालं मधुकं बिसमूलं च वेतसम् ।
सघृतं पयसा पिष्टं प्रलेपो दाहरोगनुत् ॥ ६६ ॥
पित्तोत्तरे तु काश्मर्यद्राक्षाऽऽरग्वधचन्दनैः ॥ ६७ ॥
मधुकक्षीरकाकोलीयुक्तैः क्वाथं सुशीतलम् ।
शर्करामधुसंयुक्तं वातरक्ते पिबेन्नरः ॥ ६८ ॥
धारोष्णं मूत्रसंयुक्तं क्षीरं दोषानुलोमनम् ।
पिबेद्वा सत्रिवृच्चूर्णं पित्तरक्तावृतानिले ॥ ६९ ॥
क्षीरेणैरण्डतैलं वा प्रयोगेण पिबेन्नरः ।
बहुदोषे विरेकार्थं जीर्णे क्षीरौदनाशनः ॥ ७० ॥
पटोलं त्रिफला भीरुगुडूची कटुरोहिणी ।
क्वाथः पित्ताधिके शस्तः शर्करामधुसंयुतः ॥ ७१ ॥
तिक्तस्य सर्पिषः पानं बहुशश्च विरेचनम् ।
वमनं मृदुनाऽत्यर्थं स्नेहसेको विलङ्घनम् ॥ ७२ ॥
कोष्णाः सेकाश्च शस्यन्ते वातरक्ते कफोत्तरे ।
तैलमूत्रसुराशुक्तैः परिषेकाः सदा हिताः ॥ ७३ ॥
गौरसर्षपकल्केन प्रदेहो वा रुजाऽपहः ॥ ७४ ॥
सवरुणशिग्रोः कल्को धान्याम्लेनानिलार्त्तिजिल्लेपात् ।
भवति न वेति विकल्पो न विधेयः सिद्धयोगेऽस्मिन् ॥ ७५ ॥
कल्कः श्लेष्मोत्तरे लेपो वाजिगन्धातिलोद्भवः ।
लेपः सर्षपनिम्बार्कहिंस्राक्षारतिलैर्हितः ॥ ७६ ॥
श्रेष्ठः शक्तुघृतक्षारकपित्थत्वग्भिरेव च ।
मसूरशिग्रोस्तोद्बीजं हितं धान्याम्लसंयुतम् ।
मुहूर्त्ताल्लिप्तमम्लैश्च सिञ्चेद्वातकफोत्तरे ॥ ७७ ॥
मुस्ताऽऽमलकनिशाभिः क्वथितं तोयं समाक्षिकं पेयम् ।
जयति सदागतिरक्तं सकफं वा सततयोगेन ॥ ७८ ॥
हरिद्राऽमृतकक्वाथं मधुना मधुरीकृतम् ।

पिबेद्वा त्रिफलाक्वाथं वातरक्ते कफाधिके ॥ ७९ ॥
हरीतकीं वा तक्रेण पाययेदुदकेन वा ।
गृहधूमो वचा कुष्ठं शताह्वा रजनीद्वयम् ।
प्रलेपः शूलनुद्वातरक्ते वातकफोत्तरे ॥ ८० ॥
अमृताकटुकायष्टीशुण्ठीकल्कं समाक्षिकम् ॥ ८१ ॥
गोमूत्रपीतं जयति सकफं वातशोणितम् ।
धात्रीहरिद्रामुस्तानां कषायं वा समाक्षिकम् ॥ ८२ ॥

अथ लाङ्गलीगुटिकामाह—

लाङ्गल्यास्त्वमृतातुल्यं कन्दमुद्धृत्य यत्नतः ।
योजयेत्त्रिफलालौहरजस्त्रिकटुकैः समैः ॥ ८३ ॥
गुग्गुल्वमृतवल्लीभिर्द्राक्षालुङ्गरसेन वा ।
त्रिफलाया रसैर्युक्ता गुटिकाः कोलसंमिताः ॥ ८४ ॥
भक्षयेन्मधुनाऽऽलोड्य शृणु कुर्वन्ति यत्फलम् ।
पादस्फुटितं दुर्भग्नं जानुप्राप्तं च यद्भवेत् ॥ ८५ ॥
यच्च देहोद्गतं रक्तं यच्चासाध्यं प्रकीर्त्तितम् ।
घ्नन्त्येता भक्ष्यमाणस्य प्रबलं वातशोणितम् ॥ ८६ ॥
(संसर्गे सन्निपाते च क्रियापथ्यमुक्तं मिश्रं कुर्यात्)

अथ बलाघृतमाह—

बलामतिबलां मेदामात्मगुप्तां शतावरीम् ।
काकोलीं क्षीरकाकोलीं रास्नां मृद्वीं च पेषयेत् ॥ ८७ ॥
घृतं चतुर्गुणं क्षीरं तैः सिद्धं वातरक्तनुत् ।
हृत्पाण्डुरोगवीसर्पकामलादाहनाशनम् ॥ ८८ ॥

अथापरपिण्डतैलमाह—

बलास्थिरानागबलागुडूचीशतावरीकल्ककषायसिद्धम् ।
तैलं विदध्यादनुवासनेषु तद्वातरक्तं शमयत्युदीर्णम् ॥ ८९ ॥

अथ पारूषकघृतमाह—

त्रायन्तिका चामलकी द्विकाकोली शतावरी ।
कसेरुका कषायेण कल्कैरेभिः पचेद् घृतम् ॥ ९० ॥
उभे परूषके द्राक्षाकाश्मर्यः सक्षुरद्रुमाः ।

पृथग्विदार्याः स्वरसं तथा क्षीरं चतुर्गुणम् ॥ ९१ ॥
एतदायोजितं सर्पिः पारूषकमिति स्मृतम् ।
वातरक्ते क्षते क्षीणे वीसर्पे पैत्तिके ज्वरे ॥ ९२ ॥

अथ शतावरीघृतमाह—

शतावरीकल्कगर्भं रसे तस्याश्चतुर्गुणे ।
क्षीरतुल्यं घृतं सिद्धं वातशोणितनाशनम् ॥ ९३ ॥

अथर्षभकघृतमाह—

ऋषभक्षीरकाकोलीक्षीरिकाजीवकैः समैः ।
सिद्धं त्वर्षभकं सर्पिः सक्षीरं वातरक्तनुत् ॥ ९४ ॥

अथ गुडूचीघृतमाह—

गुडूचीक्वाथकल्काभ्यां सपयस्कं घृतं श्रृतम् ।
हन्ति वातं तथा रक्तं कुष्ठं जयति दुस्तरम् ॥ ९५ ॥
क्षीरं स्नेहसमं दद्याच्चतुर्भिश्च चतुर्गुणम् ।
एकद्वित्रिद्रवद्रव्यैः कुर्यात्स्नेहाच्चतुर्गुणम् ॥ ९६ ॥

अथ द्वितीयं गुडूचीघृतमाह—

अमृतायाः कषायेण कल्केन च महौषधात् ।
मृद्वग्निना घृतं सिद्धं वातरक्तहरं परम् ॥ ९७ ॥
आमवाताढ्यवातादीन्क्रिमिकुष्ठव्रणानपि ।
अर्शांसि गुल्मांश्च तथा नाशयेदाशु योजितम् ॥ ९८ ॥

अथ तृतीयं गुडूचीघृतमाह—

अमृतास्वरसविपक्कं सर्पिस्तत्कल्कसाधितं पीतम् ।
अपहरति वातरक्तमुत्तानं चावगाढं ॥ च ॥ ९९ ॥

अथ चतुर्थं गुडूचीघृतमाह—

अमृतायाः पलशतं जलद्रोणावशेषितम् ।
घृतप्रस्थं विपक्तव्यं कल्कादष्टौ पलानि च ॥ १०० ॥
चतुर्गुणेन पयसा वातासृक्कुष्ठनाशनम् ।
कामलापाण्डुरोगघ्नं प्लीहकासज्वरापहम् ॥ १०१ ॥

अथामृताद्यघृतमाह—

अमृता मधुकं द्राक्षा त्रिफला नागरं बला ।

वासाऽऽरग्वधवृश्चीरदेवदारुत्रिकण्टकम् ॥ १०२ ॥
कटुका रोहिणी कृष्णा काश्मर्यस्य फलानि च ।
रास्नाक्षु(.)कगन्धर्वबृद्धदारघनोत्पलैः ॥ १०३ ॥
कल्कैरेभिः समैः कृत्वा सर्पिःप्रस्थं विपाचयेत् ।
धात्रीरसः समो देयो वारित्रिगुणसंयुतः ॥ १०४ ॥
सम्यक्सिद्धं च विज्ञाय भोज्ये पाने च शस्यते ।
बहुदोषोत्थितं वातरक्तेन सह मूर्च्छितम् ॥ १०५ ॥
उत्तानं चापि गम्भीरं त्रिकजङ्घोरुजानुकम् ।
क्रोष्टुशीर्षं महामूल आमवाते सुदारुणे ॥ १०६ ॥
दाहरोगोपसृष्टस्य वेदनां चातिदुस्तराम् ।
मूत्रकृच्छ्रमुदावर्त्तं प्रमेहं विषमज्वरान् ॥ १०७ ॥
एतान्सर्वान्निहन्त्याशु वातपित्तकफोत्थितान् ।
सर्वकालोपयोगेन वर्णायुर्बलवर्द्धनम् ।
अश्विभ्यां निर्मितं श्रेष्ठं घृतमेतदनुत्तमम् ॥ १०८ ॥

अथ पञ्चमं गुडूचीघृतमाह—

गुडूचीस्वरसे सर्पिर्जीवनीयैश्च साधितम् ।
कल्कैश्चतुर्गुणैः क्षीरैः सिद्धं वाऽप्यसृग्वातनुत् ॥ १०९ ॥

अथ महागुडूचीघृतमाह—

अमृतायाः शतं प्राप्य जलद्रोणे विपाचयेत् ।
चतुर्भागावशिष्टन्तु घृतप्रस्थं विपाचयेत् ॥ ११० ॥
क्षीरं चतुर्गुणं तत्र दापयेन्मतिमान् भिषक् ।
कल्कश्चात्र प्रवक्ष्यामि यथावदनुपूर्वशः ॥ १११ ॥
काकोली क्षीरकाकोली जीवकर्षभकौ च यत् ।
शतावरी पयस्या च मधुकं नीलमुत्पलम् ॥ ११२ ॥
अश्वकन्दस्य मूलानि स्थिरां वा कटुरोहिणीम् ।
ऋद्धिं वृद्धिं तथा मेदे श्वदंष्ट्रां बृहतीद्वयम् ॥ ११३ ॥
गुडूचीं पिप्पलीं रास्नां वासकं चापि संहरेत् ।
तदेकस्थं समैर्भागैः पाचयेन्मृदुनाऽग्निना ॥ ११४ ॥
पानाभ्यञ्जननस्येषु परिषेके च दापयेत् ।

वातरक्तं सशोषाढयं सदाहं क्रोष्टुशीर्षकम् ॥ ११५ ॥
खञ्जोरुस्तम्भवातञ्च वातरक्तं सुदारुणम् ।
बहूदितं वातकुब्जं गृध्रसीं वातकण्टकम् ॥ ११६ ॥
नाशयेद्योजितं सर्पिर्धन्वन्तरिवचो यथा ॥ ११७ ॥

अथ शताह्वाऽऽदितैलमाह—

क्वाथेन शतपुष्पायाः कुष्ठस्य मधुकस्य च ।
एकैकं साधयेत्तैलं वातरक्तरुजाऽपहम् ॥ ११८ ॥

अथ महापिण्डतैलमाह—

सारिवाऽरिष्टकूष्माण्डपोतकीभस्मजाम्बुना ।
गुडूचीगव्यदुग्धाभ्यां कर्मरङ्गरसेन च ॥ ११९ ॥
विपचेत्तिलजं तैलं दत्त्वैतानि भिषग्वरः ।
काकोल्यौ जीवकं मेदे शताह्वाक्षीरिणीयुतैः ॥ १२० ॥
जिङ्गीसिक्थामृताऽनन्तासर्जसैन्धवचन्दनैः ।
हन्याद्वातास्रजं घोरं स्फुटितं गलितं तथा ॥ १२१ ॥
चर्मदलाख्यं पामार्दींस्त्वग्दोषञ्च विपादिकाम् ।
कुष्ठान्यर्शांसि वीसर्पं व्रणशोथं भगन्दरम् ॥ १२२ ॥
न सोऽस्ति वातरक्तस्य विकारो योऽभिवर्द्धितः ।
यं न हन्यात्प्रसह्यैतत्पिण्डतैलं महत्स्मृतम् ॥ १२३ ॥

अथ पिण्डतैलमाह—

सारिवासर्जमञ्जिष्ठायष्टीसिक्थैः पयोऽन्वितैः ।
तैलं पक्वं प्रयोक्तव्यं पिण्डाख्यं वातशोणिते ॥ १२४ ॥

अथ द्वितीयं पिण्डतैलमाह—

सारिवासर्जयष्ट्याह्वमधुसिक्थैः पयोऽन्वितैः ।
सिद्धमैरण्डजं तैलं वातरक्तरुजाऽपहम् ।
अपूतमथितस्यास्य पिण्डतैलस्य योगतः ॥ १२५ ॥

अथ महापद्मकतैलमाह—

पद्मकेशरयष्ट्याह्वफेनिलैः पद्मकोत्पलैः ।
पृथक्पञ्चपलैर्दत्तं बलाकिंशुकचन्दनैः ॥ १२६ ॥
जले शृतं पचेत्तैलं प्रस्थं सौवीरसम्मितम् ।

लोध्रकाकोलिकोशीरजीवकर्षभकेशरैः ॥ १२७ ॥
मद्यन्तिलतापत्रपद्मकेशरपद्मकैः ।
प्रपौण्डरीककालीयमेदामांसीप्रियङ्गुभिः ॥ १२८ ॥
कुङ्कुमैर्द्विगुणैः कर्षैर्मञ्जिष्ठायाः पलेन च ।
महापद्ममिदं तैलं वातासृग्ज्वरनाशनम् ॥ १२९ ॥

अथ खुड्डाकपद्मकतैलमाह—

पद्मकोशीरयष्ट्याह्वरजनीक्वाथसाधितम् ॥ १३० ॥
स्यात्पिष्टैः सर्जमञ्जिष्ठावीराकाकोलिचन्दनैः ।
खुड्डाकपद्मकमिदं तैलं वातास्रपित्तनुत् ॥ १३१ ॥

अथ गुडूचीतैलमाह—

तुलां पचेज्जलद्रोणे गुडूच्याः पादशेषितम् ।
क्षीरद्रोणन्तु ताभ्यां च पचेत्तैलाढकं शनैः ॥ १३२ ॥
कल्कैर्मधुकमञ्जिष्ठाजीवनीयगणोत्थितैः ॥
कुष्ठैलाऽगुरुमृद्वीका मांसी व्याघ्रनखं नखी ॥ १३३ ॥
हरेणुः श्रावणी व्योषं शताह्वा शृङ्गिसारिवे ।
त्वक्पत्रागुरुविक्रान्ताः स्थिरा तामलकी तथा ॥ १३४ ॥
नतकेशरह्रीबेरं पद्मकोत्पलचन्दनम् ।
सिद्धं कर्षसमैर्भागैः पानाभ्यङ्गानुवासनैः ॥ १३५ ॥
सेव्यं वातास्रजान्हन्ति स्रोतोधात्वन्तराश्रितान् ।
धन्यं पुंसवनं स्त्रीणां गर्भदं वातपित्तनुत् ॥ १३६ ॥
स्वेदकण्डूरुजाऽऽयामशिरःकम्पामयार्दितान् ।
हन्याद् व्रणकृतान्दोषान्गुडूचीतैलमुत्तमम् ॥ १३७ ॥

अथामृताह्वयतैलमाह—

गुडूचीं मधुकं ह्रस्वपञ्चमूलं पुनर्नवाम् ।
रास्नामेरण्डमूलञ्च जीवनीयानि लाभतः ॥ १३८ ॥
पलानां शतिकैर्भागैर्बलापञ्चशतं भवेत् ।
कोलं बिल्वं यवान्माषान् कुलत्थांश्चाढकोन्मितान् ॥ १३९ ॥
काश्मर्याणाञ्च शुष्काणां द्रोणं द्रोणशतेऽम्भसः ।
साधयेज्जर्जरं पूतं चतुर्द्रोणञ्च शेषयेत् ॥ १४० ॥

तैलद्रोणं पचेत्तेन दत्त्वा पञ्चगुणं पयः।
पिष्ट्वा त्रिपलिकञ्चैव चन्दनोशीरकेशरम् ॥ १४१ ॥
पत्रैलाऽगुरुकुष्ठानि तगरं मधुयष्टिकाम्।
मञ्जिष्ठाऽर्द्धपलञ्चैव तत्सिद्धं सर्वयौगिकम् ॥ १४२ ॥
वातरक्ते क्षते क्षीणे भारार्त्ते क्षीणरेतसि।
वेपनोत्क्षिप्तभग्नानां सर्वाङ्गैकाङ्गरोगिणाम् ॥ १४३ ॥
योनिदोषमपस्मारमुन्मादं विषमज्वरम्।
हन्यात्पुंसवनञ्चैव तैलाग्र्यममृताह्वयम् ॥ १४४ ॥

अथ मृणालाद्यमिश्रकतैलमाह—

मृणालोत्पलशालूकसारिवोदीच्यकेशरैः।
चन्दनद्वयभूनिम्बपद्मबीजकसेरुकैः ॥ १४५ ॥
पटोलकटुकानन्तागुन्द्रापर्पटवासकैः।
पिष्ट्वा तैलं घृतं पक्वं तृणमूलरसेन वा ॥ १४६ ॥
क्षीरद्विगुणसंयुक्तं वस्तिकर्मसु योजितम्।
नस्याभ्यञ्जनपानैर्वा हन्यात्पित्तगदानिदम् ॥ १४७ ॥

अथ धत्तूराद्यतैलमाह—

कनकशिखरिमानद्वारसंसिद्धतोये
कुसुमलवणयुक्तैः सर्जनिर्यासचूर्णैः।
विधिशृततिलतैलं कल्कयुक्तं निहन्ति
प्रचुरतरमिदानीमिन्द्रलुप्तास्रवातम् ॥ १४८ ॥

अथ नागबलातैलमाह—

शुद्धां पचेन्नागबलातुलान्तु जलार्मणे पादकषायसिद्धम्।
विस्राव्य तैलाढकमत्र देयमजापयस्तैलविमिश्रितन्तु ॥ १४९ ॥
नतं सयष्टीमधुकञ्च कल्कं दत्त्वा पृथक्पञ्चपलं विपक्वम्।
तद्वातरक्तं शमयत्युदीर्णं वस्तिप्रदानेन हि सप्तरात्रात्।
दशाहयोगेन करोत्यरोगं पीतञ्च तलोत्तममश्विनोक्तम् ॥ १५० ॥

अथ जीवकाद्यमिश्रकमाह—

जीवकर्षभकौ मेदे ऋष्यप्रोक्ता शतावरी।
मधुकं मधुपर्णी च काकोलीद्वयमेव च ॥ १५१ ॥

मुद्गमाषाख्यपर्णी च दशमूलं पुनर्नवा ।
बलाऽमृता विदारी च साश्वगन्धाऽश्मभेदकौ ॥ १५२ ॥
कुर्यात्कल्कं कषायञ्च ताभ्यां तैलं घृतं पचेत् ।
लाभतश्च वसा मज्जा मांसं प्रतुदविष्किरात् ॥ १५३ ॥
चतुर्गुणेन पयसा तत् संसिद्धं वातशोणितम् ।
सर्वदेहाश्रितान्हन्ति व्याधीन्घोरांश्च वातजान् ॥ १५४ ॥

अथ शतपाकबलातैलमाह—

बलाकषायकल्काभ्यां तैलं क्षीरचतुर्गुणम् ।
शतपाकं भवेदेतद्वातासृग्वातपित्तनुत् ॥ १५५ ॥
धन्यं पुंसवनञ्चैव नराणां शुक्रवर्द्धनम् ।
रेतोयोनिविकारघ्नमेतद्वातविकारनुत् ॥ १५६ ॥

अथ मधुकाद्यतैलमाह—

मधुयष्ट्याः पलशतं कषाये पादशेषिते ।
तैलाढकं समक्षीरं पचेत्कल्कैः पलोन्मितैः ॥ १५७ ॥
शतपुष्पावरीमूर्वापयस्याऽगुरुचन्दनैः ।
स्थिराहंसपदीमांसीद्विमेदामधुपर्णिभिः ॥ १५८ ॥
काकोलीक्षीरकाकोलीतामलक्यृद्धिपद्मकैः ।
जीवकर्षभजीवन्तीत्वक्पत्रनखवालकैः ॥ १५९ ॥
प्रपौण्डरीकमञ्जिष्ठासारिवेन्दुवितुन्नकैः ।
वातासृक्पित्तदाहार्त्तिज्वरघ्नं बलवर्णकृत् ॥ १६० ॥

अथ शतपाकमधुकतैलमाह—

मधुयष्ट्याः पलं पिष्ट्वा तैलप्रस्थं चतुर्गुणे ।
क्षीरे साध्यं शतं वारांस्तदेव मधुकान्वितम् ॥ १६१ ॥
सिद्धं देयं त्रिदोषे स्याद्वातास्रश्वासकासनुत् ।
धन्यं पुंसवनञ्चैव कामलादाहनाशनम् ॥ १६२ ॥

अथ सहस्रपाकबलातैलमाह—

बलाकषायकल्काभ्यां तैलं क्षीरसमं पचेत ।
सहस्रशतपाकं वा वातासृग्वातरोगनुत् ॥ १६३ ॥

रसायनमिदं श्रेष्ठमिन्द्रियाणां प्रसादनम् ।
जीवनं बृंहणं स्वर्यं शुक्रासृग्दोषनाशनम् ॥ १६४ ॥

अथ पुनर्नवागुग्गुलुमाह—

पुनर्नवामूलशतं विशुद्धं रुबूकमूलञ्च तथा प्रयोज्य ।
दत्वा पलं षोडशकञ्च शुण्ठ्याः संकुट्य सम्यग्विपचेद्धटेऽपाम् ॥१६५॥
पलानि चाष्टावथ कौशिकस्य तेनाष्टशेषेण पुनः पचेत्तु ।
एरण्डतैलं कुडवञ्च दद्याद्दत्वा त्रिवृच्चूर्णपलानि पञ्च ॥ १६६ ॥
निकुम्भचूर्णस्य पलं गुडूच्याः पलद्वयं चार्द्धपलं पलं वा ।
फलत्रयत्र्यूषणचित्रकाणि सिन्धूत्थभल्लातविडङ्गकानि ॥ १६७ ॥
कर्षं तथा माक्षिकधातुचूर्णं पुनर्नवायाः पलमेव चूर्णम् ।
चूर्णानि दत्वा ह्यवतार्य शीते खादेन्नरः कर्षसमप्रमाणम् ॥ १६८ ॥
वातासृजं वृद्धिगदं च सप्त जयत्यवश्यं त्वथ गृध्रसीं च ।
जङ्घोरुपृष्ठत्रिकवस्तिजं च तथाऽऽमवातं प्रवलं च हन्ति ॥१६९॥

अथ समशर्करगुग्गुलुमाह—

यावशूकसुरदारुसैन्धवं मुस्तकत्रुटिवचायमानिकाः ।
व्योषदीप्यकनिशाफलत्रिकं जीरकद्वयविडङ्गचित्रकम् ॥१७०॥
कार्षिकं सुमसृणं सुयोजितं संयुतं पुरपलैश्च पञ्चभिः ।
शर्करां पुरसमां सुपेषयेत्तत्सर्पिषि विनिक्षिपेत्ततः ॥ १७१॥
वातरक्तमुदरं भगन्दरं प्लीहयक्ष्मविषमज्वरं गरम् ।
श्वित्रकुष्ठमखिलव्रणानयं चित्तविभ्रमगदांश्च दारुणान् ॥ १७२ ॥
गृध्रसीं च गुदजाग्निमन्दतां हन्ति कोष्ठजनितं महागदम् ।
वज्रमिन्द्रसुकरादिव च्युतं गुप्तशैलकुलमुत्तमं द्रुतम् ॥१७३॥
अन्नपानपरिहारवर्जितं सर्वकालसुखदं निरत्ययम् ।
सेव्यमानमिदमश्विनिर्मितं गुग्गुलोर्हि वटिका रसायनम् ॥ १७४ ॥
चत्वारो माषका हीने मध्यमेऽष्टौ च माषकाः ।
श्रेष्ठा द्वादशकाः प्रोक्ताः कोष्ठं विज्ञाय पाययेत् ॥ १७५ ॥
स्रंसनत्वाद् गुरुत्वाद्वा गुग्गुलोः करणक्रमः ॥ १७६ ॥

अथामृतागुग्गुलुमाह—

प्रस्थमेकं गुडूच्याश्च अर्द्धप्रस्थं च गुग्गुलोः ।

प्रत्येकं त्रिफलायास्तु तत्प्रमाणं विनिर्दिशेत् ॥ १७७ ॥
सर्वमेकत्र संकुट्य क्वाथयेन्नल्वणेऽम्भसि ।
पादशेषं परिस्राव्य कषायं ग्राहयेद्भिषक् ।
पुनः पचेत्कषायन्तु यावत्सान्द्रत्वमागतम् ॥ १७८ ॥
दन्तीव्योषविडङ्गानि गुडूचीत्रिफलात्वचः ।
ततश्चार्द्धपलं चूर्णं गृह्णीयाच्च प्रति-प्रति ॥ १७९ ॥
कर्षन्तु त्रिवृतायाश्च सर्वमेकत्र चूर्णयेत् ।
तस्मिन्सुसिद्धं विज्ञाय कवोष्णे प्रक्षिपेद् बुधः ॥ १८० ॥
ततश्चाग्निबलं मत्वा खादेत्कर्षप्रमाणतः ।
वातरक्तं तथा कुष्ठं गुदजान्यग्निसादनम् ॥ १८१ ॥
दुष्टव्रणं प्रमेहांश्च आमवातं भगन्दरम् ।
नाड्याढ्यवातं श्वयथुं सर्वानेतान्व्यपोहति ॥ १८२ ॥

अथ द्वितीयममृतागुग्गुलुमाह—

त्रिप्रस्थममृतायाश्च प्रस्थमेकन्तु गुग्गुलोः ।
प्रत्येकं त्रिफलाप्रस्थं वर्षाभूप्रस्थमेव च ॥ १८३ ॥
सर्वमेकत्र संकुट्य साधयेन्नल्वणेऽम्भसि ।
पुनः पचेत्पादशेषं यावत्सान्द्रत्वमागतम् ॥ १८४ ॥
दन्तीचित्रकमूलानां कणाविश्वफलत्रिकम् ।
गुडूचीत्वग्विडङ्गानां प्रत्येकार्द्धपलं मतम् ॥ १८५ ॥
त्रिवृताकर्षमेकन्तु सर्वमेकत्र चूर्णयेत् ।
सिद्धे चोष्णे क्षिपेत्तत्र अमृतागुग्गुलुं परम् ॥ १८६ ॥
अतो यथाबलं खादेदम्लपित्ती विशेषतः ।
वातरक्तं तथा कुष्ठं गुदजान्यग्निसादनम् ॥ १८७ ॥
दुष्टव्रणं प्रमेहांश्च आमवातं भगन्दरम् ।
नाड्याढ्यवातं श्वयथुं हन्यात्सर्वामयांस्तथा ॥ १८८ ॥
अश्विभ्यां निर्मितश्चायममृताऽऽख्यो हि गुग्गुलुः ॥ १८९ ॥
गुडरामठशुण्ठीनां मांसकूष्माण्डयोरपि ।
गुडूच्या गुग्गुलोश्चैव प्रस्थः षोडशभिः पलैः ॥ १९० ॥

अथ नवपुराणयोर्गुग्गुल्वोर्लक्षणमाह—

स्निग्धः काञ्चनसंकाशः पक्वजम्बूफलोपमः।
नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः ॥ १९१ ॥
शुष्को दुर्गन्धिकश्चैव वर्णान्यत्वमुपागतः।
पुराणः स तु विज्ञेयो न स देयस्तु रोगिणे ॥ १९२ ॥

अथ चन्द्रप्रभागुटिकामाह—

क्रिमिरिपुदहनव्योषत्रिफलाऽमरदारुचव्यभूनिम्बाः।
मागधिमूलं मुस्तं शटीवचाधातुमाक्षिकञ्चैव।
लवणक्षारनिशायुक्कुस्तुम्बुरुगजकणाः सहातिविषाः ॥१९३॥
कर्षांशिकान्येव समानि कुर्यात्पलाष्टकं चाश्मजतु प्रदद्यात्।
निष्पत्रशुद्धस्य पुरस्य धीमान्पलद्वयं लौहरजस्तथैव ॥१९४॥
सिताचतुष्कं पलमत्र वांश्या निकुम्भकुम्भत्रिसुगन्धियुक्तम्।
पृथक्पलं चूर्णमथावपेच्च चन्द्रप्रभेयं गुटिका विधेया ॥ १९५ ॥
ज्वरातिसारग्रहणीविकारांश्चार्शांसि निर्णाशयते षडेव।
भगन्दरान्कामलपाण्डुरोगान्निर्नष्टवह्नेः कुरुते च दीप्तिम् ॥१९६॥
हन्त्यामयान्पित्तकफानिलोत्थान्नाडीगते मर्मगते व्रणे च।
क्षतक्षये गृध्रसियक्ष्मरोगे मेहे गजाख्ये प्रबले प्रयोज्य ॥१९७॥
शुक्रक्षये चाश्मरिमूत्रकृच्छ्रे शुक्रप्रवाहेऽप्युदरामये च।
शम्भुं समभ्यर्च्य कृतप्रसादं प्राप्ता गुटी चन्द्रमसा प्रशस्ता ॥१९८॥
न पानभोज्ये परिहारवादो न शीतवातातपमैथुनेषु।
भक्तस्य पूर्वं सततं प्रयोज्या तक्रानुपानाऽप्यथ मस्तुपाना ॥१९९॥
अजारसो जाङ्गलजो रसो वा पयोऽथ वा शीतजलानुपानम्॥२००॥
शुक्रदोषान्निहन्त्यष्टौ प्रमेहांश्चापि विंशतिम्
वलीपलितनिर्मुक्तो वृद्धोऽपि तरुणायते ॥ २०१ ॥
गिरिजतुगुग्गुलुलौहान्येकीकृत्याथ भावयेद् बहुशः।
क्वाथैस्तद्व्याधिहरैस्तदनु च चूर्णीकृतं मिलितम्।
कृमिरिप्वादिकचूर्णैर्गिरिजतुसमधान्यपटोलयूषेण ॥ २०२ ॥

अथ कैशोरगुग्गुलुमाह—

वरमहिषलोचनोदरसन्निभवर्णस्य गुग्गुलोः प्रस्थम्।

प्रक्षिप्य तोयराशौ त्रिफलाञ्च यथोक्तपरिमाणाम् ॥ २०३ ॥
द्वात्रिंशच्छिन्नरुहापलानि देयानि यत्नेन ।
विपचेत्तदप्रमत्तो दर्व्या संघट्टयेन्मुहुर्यावत् ॥ २०४ ॥
अर्द्धक्षयितं तोयं जातं ज्वलनस्य सम्पर्कात् ।
अवतार्य वस्त्रपूतं पुनरपि संसाधयेदयःपात्रे ॥ २०५ ॥
सान्द्रीभूते तस्मिन्नवतार्य हिमोपलप्रख्ये ।
त्रिफलाचूर्णार्द्धपलं त्रिकटोश्चूर्णं षडक्षपरिमाणम् ॥ २०६ ॥
क्रिमिरिपुचूर्णार्द्धपलं कर्षं कर्षं त्रिवृद्दन्त्योः ।
पलमेकन्तु गुडूच्या दत्त्वा संचूर्ण्य यत्नेन ॥ २०७ ॥
उपयुज्य चानुपानं यूषं क्षीरं सुगन्धि सलिलञ्च ।
इच्छाऽऽहारविहारी भेषजमुपयुज्य सर्वकालमिदम् ॥२०८॥
तनुरोधि वातशोणितमेकद्वित्र्युल्वणं चिरोत्थमपि ।
भग्नस्रुतपरिशुष्कं स्फुटितं दीर्णमाजानु यच्चापि ॥ २०९ ॥
व्रणकासकुष्ठगुल्मश्वयथुं गरपाण्डुमेहांश्च ।
मन्दाग्निञ्च विबन्धं प्रमेहपिडकाश्च नाशयत्याशु ॥ २१० ॥
सततं निषेव्यमाणः कालवशाद्धन्ति सर्वगदान् ।
अभिभूय जरादोषं करोति कैशोरिकं रूपम् ॥ २११ ॥
प्रत्येकं त्रिफलाप्रस्थो जलञ्चाढकमाढकम् ।
गुडवद् गुग्गुलोः पाकः सन्धेयस्तु विशेषतः ॥ २१२ ॥

अथ त्रिफलागुग्गुलुमाह—

त्रिफलाऽतिविषादारुदार्वीमुस्तापरूषकैः ।
खदिरासननक्ताह्वगुडूचीनृपपादपैः ॥ २१३ ॥
भूनिम्बनिम्बकटुकाकलिङ्गकुलकैः समैः ।
क्वाथं कृत्वा ततः पूतं शृतमष्टगुणेऽम्भसि ॥ २१४ ॥
गुडूच्यास्तत्र सुकृतं चूर्णमर्द्धं तु वारिणि ।
क्षिप्त्वा सुनूतने भाण्डे वासयेद्रजनीगतम् ॥ २१५ ॥
सोमोपेतेन पूतेन कौशिकं परिभावयेत् ।
षड्गुणेन तु सप्ताहं शिलाजतुसमन्वितम् ॥ २१६ ॥

शुक्तस्य तु पलान्यष्टौ समादाय विचक्षणः।
ताप्यचूर्णं पलञ्चैकं द्वे पले मधुसर्पिषोः॥ २१७॥
एकीकृत्य समं सर्वं लिह्यात्तु त्रिफलाऽम्बुना।
तनुना मुद्गयूषेण जाङ्गलानां रसेन वा॥ २१८॥
जीर्णेऽजीर्णे च भुञ्जीत पुराणं शालिषष्टिकम्॥ २१९॥
यथारोगं यथासात्म्यं रसैर्यूषैश्च संस्कृतैः।
त्रिसप्ताहप्रयोगेण वातरक्तं सुदारुणम्॥ २२०॥
निहन्ति वीर्यतः क्षिप्रं कुष्ठरोगान्व्रणानपि।
छिन्नं भिन्नञ्च सन्धत्ते त्रिफलाऽऽख्यो हि गुग्गुलुः॥२२१॥

अथ सिंहनादगुग्गुलुमाह—

पलत्रयं कषायस्य त्रिफलायाः सुचूर्णितम्।
सौगन्धिकं पलञ्चैकं कौशिकस्य पलत्रयम्॥ २२२॥
कुडवं चित्रतैलस्य सर्वमादाय यत्नतः।
पाचयेत्पाकविद्वैद्यः पात्रे लोहमये दृढे॥ २२३॥
हन्ति वातं तथा पित्तं श्लेष्माणं खञ्जपङ्गुताम्।
श्वासं सुदुर्जयं हन्ति कासं पञ्चविधं तथा॥ २२४॥
कुष्ठानि वातरक्तञ्च गुल्मशूलोदराणि च।
आमवातं जयत्येतदपि वैद्यविवर्जितम्॥ २२५॥
सर्वदाऽस्योपयोगेन जरापलितनाशनम्।
सर्पिस्तैलरसोपेतमश्नीयाच्छालिषष्टिकम्॥ २२६॥
सिंहनाद इति ख्यातो रोगवारणदर्पहा।
वह्नेर्दीप्तिकरं पुंसां भाषितो दण्डपाणिना॥ २२७॥
अत्राहुस्त्रिफलाक्वाथं पृथक् त्रिपलसम्मितम्।
किञ्चिन्निर्याति चैरण्डस्नेहे पाकोऽधिके खरः॥ २२८॥

*त्रिफलायाः प्रत्येकं पलत्रयं कषायस्य चूर्णस्यापि। सौगन्धिकं=गन्धकम्। चित्रतैलस्य=एरण्डतैलस्य॥ २२२–२२८॥

अथ द्वितीयं सिंहनादगुग्गुलुमाह—

अष्टौ पलान्यत्र पलङ्कषायाः प्रस्थौ पृथक् शुद्धफलत्रयस्य।

दत्त्वा पचेद् द्रोणयुगे जलस्य पादावशेषं पुनरेव वैद्यः ॥२२९॥
दन्तीत्रिवृत्त्र्यूषणवारुणीनां विडङ्गमुस्तत्रिफलाऽमृतानाम् ।
कटूग्रगन्धालुकमाणकानां सगन्धकानाञ्च सपारदानाम् ॥२३०॥
पलार्द्धमानं प्रमितं सुचूर्णं दद्याद्विपक्वं पुनरेव तत्र ।
फलानि संचूर्ण्य च कानकानि सहस्रसंख्याकलितानि पश्चात् ॥२३१॥
खादेद्धि माषद्वितयं प्रतप्तं तोयादिकं देयमतोऽनुपाने ।
आमानिलं सन्धिगतं सशूलं शिरोगतं जानुकटिस्थितञ्च ॥२३२॥
अर्शोऽतिवृत्तिं विषमज्वरार्त्तिं प्रमेहकुष्ठानि भगन्दरञ्च ।
हन्यान्नराणामिति सिंहनादो मेदोमरुच्छ्लेष्मगदान्पुरोऽयम् ॥२३३॥

दाहोऽत्यन्तप्रवृत्तिर्वा विकारोऽन्यो न चेद्बहुः ।
तत्कृतस्तु तदा तत्र तक्रभक्तं हितं भवेत् ।
उद्वर्त्तनं शीतजलस्नानञ्च शयनं तथा ॥ २३४ ॥
विरेकातिशयं कुर्यात्सिंहनादो यतः सुधीः ।
ज्ञात्वा बलं शरीरे तु दद्यादेवं न वा भिषक् ॥ २३५ ॥
तोयारनालगोक्षीरैः क्रमात्पक्वं विशुध्यति ।
फलं कानकसंज्ञन्तु कृत्वा चूर्णं ततः क्षिपेत ॥ २३६ ॥

अथ तृतीयं सिंहनादगुग्गुलुमाह—

पिण्डितां गुग्गुलोर्मानीं कटुतैले पलाष्टके ।
प्रत्येकं त्रिफलाप्रस्थं सार्द्धद्रोणे जले पचेत् ॥ २३७ ॥
पादशेषं सुपूतञ्च पुनरग्नावधिश्रयेत् ।
त्रिकटुत्रिफलामुस्तविडङ्गामलकानि च ॥ २३८ ॥
गुडूच्यग्नित्रिवृद्दन्तीवचासूरणमानकम् ।
कस्तूरीरससूतांशं प्रत्येकं शुक्तिसम्मितम् ॥ २३९ ॥
सहस्रं कानकफलं सिद्धे संचूर्ण्य निक्षिपेत् ।
ततो माषद्वयं जग्ध्वा पिबेत्तप्तजलादिकम् ॥ २४० ॥
अग्निञ्च कुरुते शीघ्रं वडवाऽनलसन्निभम् ।
मेधावृद्धिं वयोवृद्धिं बलं सुविपुलं तथा ॥ २४१ ॥
आमवातं शिरोवातं ग्रन्थिवातं भगन्दरम् ।

जानुजङ्घाश्रितं वातं सकटीग्रहवेदनम् ॥ २४२ ॥
अश्मरीमूत्रकृच्छ्रे च भग्ने च तिमिरोदरे ।
अम्लपित्तं तथा कुष्ठं प्रमेहं गुदनिर्गमम् ॥ २४३ ॥
कासं पञ्चविधं श्वासं क्षयञ्च विषमज्वरम् ।
प्लीहानं श्लीपदं गुल्मान्पाण्डुरोगं सकामलम् ॥ २४४ ॥
शोथान्त्रवृद्धिशूलानि गुदजानि विनाशयेत् ।
मेदःकफामसञ्जातरोगवारणदर्पहा ॥ २४५ ॥
सिंहनाद इति ख्यातो योगोऽयममृतोपमः ।
भिषग्भिर्वर्जिते रोगे भाषितो दण्डपाणिना ॥ २४६ ॥

अथ योगसारामृतमाह—

शतावरी नागबला वृद्धदारकमुञ्चटा ।
पुनर्नवाऽमृता कृष्णा वाजिगन्धा त्रिकण्टकम् ॥ २४७ ॥
पृथग्दशपलान्येषां श्लक्ष्णचूर्णानि कारयेत् ।
तदर्द्धशर्करायुक्तं चूर्णं संमर्दयेद् बुधः ॥ २४८ ॥
स्थापयेत्सुदृढे भाण्डे मध्वर्द्धाढकसंयुतम् ।
घृतप्रस्थेन वाऽऽलोड्य त्रिसुगन्धपलेन च ॥ २४९ ॥
तं खादेदिष्टभक्ष्यान्नो यथावह्निबलं नरः ।
वातरक्तं क्षयं कुष्ठं कार्श्यं पित्तास्रसम्भवम् ॥ २५० ॥
वातपित्तकफोत्थांश्च रोगानन्यांश्च तत्कृतान् ।
हत्वा करोति पुरुषं हत्वा सर्वामयान् द्रुतम ॥ २५१ ॥
बलीपलितनिर्मुक्तं मेधास्मृतिविभूषितम् ।
करोति पुरुषं धन्यं पञ्चवर्षशतायुषम् ॥ २५२ ॥
योगसारामृतो नाम लक्ष्मीकीर्त्तिविवर्द्धनः ॥ २५३ ॥

अथ वातरक्ते त्याज्यान्याह—

व्यायामं मैथुनं कोपमुष्णाम्ललवणं रसम् ।
दिवास्वप्नमभिष्यन्दि गुरु चान्यद्विवर्जयेत् ॥ २५४ ॥

इत्यष्टाविंशो वातरक्ताधिकारः समाप्तः ॥ २८ ॥

इति मध्यखण्डे द्वितीयो भागोऽपि समाप्तः ॥ २ ॥

॥ श्रीः ॥

भावप्रकाशः

अथ मध्यखण्डम् ।

तत्र

तृतीयो भागः ।

अथैकोनत्रिंशः शूलाधिकारः ॥ २९ ॥

अथ शूलस्य संनिकृष्टं निदानमाह—

दोषैः पृथक्समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत् ।
सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः ॥ १ ॥

*प्रभुः=कर्त्ता ॥ १ ॥

अथ वातोत्पन्नशूलस्य विप्रकृष्टनिदानसंप्राप्तिपूर्वकं लक्षणमाह—

व्यायामयानादतिमैथुनाच्च प्रजागराच्छीतजलातिपानात् ।
कलायमुद्गाढकिकोरदूषादत्यर्थरूक्षाध्यशनाभिघातात् ॥ २ ॥
कषायतिक्तातिविरूढजान्नविरुद्धवल्लूरकशुष्कशाकैः ।
विट्शुक्रमूत्रानिलसन्निरोधाच्छोकोपवासादतिहास्यभाषात् ॥ ३ ॥
वायुः प्रवृद्धो जनयेद्धि शूलं हृत्पृष्ठपार्श्वत्रिकवस्तिदेशे ।
जीर्णे प्रदोषे च घनागमे च शीते च कोपं समुपैति गाढम् ॥ ४ ॥
मुहुर्मुहुश्चोपशमप्रकोपौ विण्मूत्रसंस्तम्भनतोदभेदैः ।
संस्वेदनाभ्यञ्जनमर्दनाद्यैः स्निग्धोष्णभोज्यैश्च शमं प्रयाति ॥ ५ ॥

*व्यायामो=मल्लयुद्धादिः । यानं=तुरगरथादि । मैथुनं=स्त्रीसेवा । प्रजागरो रात्रौ । एषामतियोगात् । शीतलजलप्रभूतपानात् । कलायः=त्रिपुटः । आढकी=तुवरी । कोरदूषः=कोद्रवः । अत्यर्थरूक्षम्=अतिरूक्षद्रव्यसेवा । अध्यशनं=भुक्तस्योपरि भोजनम् । अभिघातो लोष्ट्रादिभिः । कषायतिक्तरससेवा, विरूढजान्नम्= विरूढ-

भङ्कुरितमन्नं कलायचणकादि, तज्जमन्नं भक्ष्यम् । वल्लूरकं=शुष्क-मांसम्। तस्य शूलस्य देशमाह—हृदादिषु। तत्र हृच्छूलस्य पृथगपि लक्षणं पठन्ति ॥

*अथ हृदयशूललक्षणमाह—

*कफपित्तावरुद्धस्तु मारुतो रसवर्द्धितः ।
हृदयस्थः प्रकुरुते शूलमुच्छ्वासरोधकम् ।
स हृच्छूल इति ख्यातो रसमारुतकोपजः ॥ १ ॥

*अथ पार्श्वशूलस्यापि लक्षणमाह—

*कफं निगृह्य पवनः सूचीभिरिव निस्तुदन् ।
पार्श्वस्थः पार्श्वयोः शूलं कुर्यादाध्मानसंयुतम् ॥ २ ॥
तेनोच्छ्वसिति वक्त्रेण नरोऽन्नञ्च न काङ्क्षति ।
निद्राञ्च नाप्नुयादेष पार्श्वशूलः प्रकीर्त्तितः ॥ ३ ॥

*अथ वस्तिशूलस्यापि लक्षणमाह—

*संरोधात्कुपितो वायुर्वस्तिं संश्रित्य तिष्ठति ॥ ४ ॥
वस्तेरध्वनि नाडीषु ततः शूलोऽस्य जायते ।
विण्मूत्रवातसंरोधी वस्तिशूलः स उच्यते ॥ ५ ॥

*प्रकृतमनुसरति। जीर्णे भुक्ते। प्रदोषे=रात्र्यागमे, रात्रिभव-शीतेन वातप्रकोपात्। घनागमे=वर्षासु मेघोदये च ॥ २-५ ॥

अथ पित्तजशूलस्य निदानसंप्राप्तिपूर्वकं लक्षणमाह—

क्षारातितीक्ष्णोष्णविदाहितैलनिष्पावपिण्याककुलत्थयूषैः ।
कट्वम्लसौवीरसुराविकारैः क्रोधानलायासरविप्रतापैः ॥ ६ ॥
ग्राम्यातियोगादशनैर्विदग्धैः पित्तं प्रकुप्याथ करोति शूलम् ।
तृण्मोहदाहार्त्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमशोषयुक्तम् ॥७॥
मध्यन्दिने कुप्यति चार्द्धरात्रे निदाघकाले जलदात्यये च ।
शीते च शीतैः समुपैति शान्तिं सुस्वादुशीतैरपि भोजनैश्च ॥८॥

*निष्पावो=राजमाषः। सौवीरं=सन्धानभेदः। सुराविकारैः=

*परिपक्वान्नसन्धानसमुत्पन्ना सुरा मता ।

*तस्याः प्रकारैः। रविप्रतापः=आतपः। ग्राम्यातियोगो=मैथुनाधिक्यम्। "विदाही"त्युक्त्वाऽपि "अशनैर्विदग्धैरि"ति बोधयति—

अविदाहिवस्तुनोऽपि पित्तवशाद्विदाहित्वं भवति । जलदात्यये = शरदि, शीतैर्वातादिभिः ॥ ६-८ ॥

अथ कफजशूलस्य निदानसंप्राप्तिपूर्वकं लक्षणमाह—

आनूपवारिजकिलाटपयोविकारै-
र्मांसेक्षुपिष्टकृशरातिलशष्कुलीभिः ।
अन्यैर्बलासजनकैरपि हेतुभिश्च
श्लेष्मा प्रकोपमुपगम्य करोति शूलम् ॥ ९ ॥
हृल्लासकासखसदनारुचिसंप्रसेकै-
रामाशये स्तिमितकोष्ठशिरोगुरुत्वैः ।
भुक्ते सदैव हि रुजं कुरुतेऽतिमात्रं
सूर्योदयेऽथ शिशिरे कुसुमागमे च ॥ १० ॥

*आनूपं = बहुलजलदेशजं भक्ष्यम् । वारिजं = शालूकादि ॥

*पक्कं दध्ना समं क्षीरं विज्ञेया दधिकूर्चिका ।
तक्रेण तत्कूर्चकं स्यात्तयोः पिण्डः किलाटकः ॥ ६ ॥

*पयोविकारः = पायसादिः । पिष्टं = माषादिः । अन्यैः = गुर्वादिभिः । स्तिमितम् = आर्द्रपटावगुण्ठितत्वमिव, यत्कोष्ठं शिरश्च, तयोर्गुरुत्वैः सह । सूर्योदय इति–त्रिधाविभक्तदिवसप्रथमभागस्योपलक्षणम् । शिशिरे-तत्र कफस्यातिसञ्चयात् । कुसुमागमे = वसन्ते ॥ ९-१० ॥

अथ द्विदोषोत्पन्नशूलस्य लक्षणमाह—

द्विदोषलक्षणैरेतैर्विद्याच्छूलं द्विदोषजम् ॥ ११ ॥

अथ त्रिदोषोत्पन्नशूलस्य लक्षणमाह—

सर्वेषु देशेषु च सर्वलिङ्गं विद्याद्भिषक्सर्वभवं हि शूलम् ।
सुकष्टमेनं विषवज्रकल्पं विवर्जनीयं प्रवदन्ति तज्ज्ञाः ॥ १२ ॥

*सर्वेषु देशेषु = हृत्पृष्ठपार्श्वत्रिकवस्तिनाभ्यामाशयेषु । सर्वभवं = त्रिदोषजम् ॥ १२ ॥

अथामोत्पन्नशूलस्य लक्षणमाह—

आटोपहृल्लासवमीगुरुत्वस्तैमित्यकानाहकफप्रसेकैः ।
कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमुदाहरन्ति ॥ १३ ॥

*कफस्य = कफशूलस्य। आमोद्भवम = आमादुद्भवो यस्य तम्। तत्रामशूले जाते पश्चाद्दोषसम्बन्धः, अत एवास्य शूलस्याष्टमत्वमुक्तम्। स च प्रथममामाशये भवति, पश्चात् सम्बन्धिभिर्दोषैर्वस्तिनाभिहृत्पार्श्वकुक्षिषु भवति यथादोषसम्बन्धः॥ १३॥

अथामशूलस्य दोषविशेषेण देशविशेषमाह—

वातात्मकं वस्तिगतं वदन्ति पित्तात्मकञ्चापि वदन्ति नाभ्याम्।
हृत्पार्श्वकुक्षौ कफसन्निविष्टं सर्वेषु देशेषु च सन्निपातात्॥ १४॥

*हृत्पार्श्वकुक्षौ = हृत्पार्श्वाभ्यां सहिते कुक्षौ। कफसन्निविष्टं = कफेनाविष्टम्॥ १४॥

वस्तौ हृत्कटिपार्श्वेषु स शूलः कफवातिकः।
कुक्षौ हृन्नाभिमध्ये तु स शूलः कफपैत्तिकः।
दाहज्वरकरो घोरो विज्ञेयो वातपैत्तिकः॥ १५॥

अथ तन्त्रान्तरोक्तामशूलस्य लक्षणमाह—

अतिमात्रं यदा भुक्तं पावके मृदुतां गते।
स्थिरीकृतन्तु तत्कोष्ठे वायुरावृत्य तिष्ठति॥ १६॥
यदाऽन्नं न गतं पाकं तच्छूलं कुरुते भृशम्।
मूर्च्छाऽऽध्मानविदाहांश्च हृत्क्लेशं सविलम्बिकम्॥१७॥
कम्पं वान्तिमतीसारं प्रमोहं जनयेदपि।
अविपाकोद्भवं शूलमेतमाहुर्मनीषिणः॥ १८॥

*अविपाकोद्भवम = आमोद्भवमित्यर्थः॥ १८॥

अथ शूलोपद्रवानाह—

वेदनाऽतितृषामूर्च्छा आनाहो गौरवारुची।
कासः श्वासो वमिर्हिक्का शूलस्योपद्रवाः स्मृताः॥ १९॥

अथ शूलस्य साध्यत्वादिकमाह—

एकदोषानुगः साध्यः कृच्छ्रसाध्यो द्विदोषजः।
सर्वदोषान्वितो घोरस्त्वसाध्यो भूर्युपद्रवः॥ २०॥

अथ शूलारिष्टमाह—

वेदनाऽतितृषामूर्च्छा आनाहो गौरवं ज्वरः॥ २१॥
भ्रमोऽरुचिः कृशत्वञ्च बलहानिस्तथैव च।

उपद्रवा दशैवैते यस्य शूलेषु नास्ति सः ॥ २२ ॥

अथ शूलस्यैव भेदं परिणामशूलमाह—

स्वैर्निदानैः प्रकुपितो वातः सन्निहितो यदा ।
कफपित्ते समावृत्य शूलकारी भवेद् बली ।
भुक्ते जीर्यति यच्छूलं तदेव परिणामजम् ॥ २३ ॥

*"स्वैर्निदानैरि"त्यादिना निदानपूर्विका संप्राप्तिरुक्ता । "भुक्ते जीर्यती"त्यादिना लक्षणमुक्तम् । समावृत्य=व्याप्य ॥ २३ ॥

तस्य लक्षणमप्येतत्समासेनाभिधीयते ॥ २४ ॥
आध्मानाटोपविण्मूत्रविबन्धारतिवेपनैः ।
स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेद्भिषक् ॥ २५ ॥
तृष्णादाहारतिस्वेदकट्वम्ललवणोत्तरम् ।
शूलं शीतशमप्रायं पैत्तिकं लक्षयेद् बुधः ॥ २६ ॥
छर्दिहृल्लाससंमोहस्वल्परुग्दीर्घसन्तति ।
कटुतिक्तोपशान्तौ च विज्ञेयञ्च कफात्मकम् ॥ २७ ॥
संसृष्टलक्षणं बुद्ध्वा द्विदोषं परिकल्पयेत् ।
त्रिदोषजमसाध्यं स्यात्क्षीणमांसबलानलम् ॥ २८ ॥

अथान्नद्रवनामकशूलविशेषस्य लक्षणमाह—

जीर्णे जीर्यति चाप्यन्ने यच्छूलमुपजायते ।
पथ्यापथ्यप्रयोगेण भोजनाभोजनेन वा ।
न शमं याति नियमात्सोऽन्नद्रव उदाहृतः ॥ २९ ॥

*नेदं शूलमसाध्यं चिकित्साऽभिधानात् ॥ २९ ॥

अथ शूलस्य चिकित्सामाह—

वमनं लङ्घनं स्वेदः पाचनं फलवर्त्तयः ।
क्षाराश्चूर्णानि गुटिकाः शस्यन्ते शूलशान्तये ॥ ३० ॥
विज्ञाय वातशूलन्तु स्नेहस्वेदैरुपाचरेत् ।
स्वल्पशूलाकुलस्य स्यात्स्वेद एव सुखावहः ॥ ३१ ॥

अथ मृत्तिकास्वेदमाह—

मृत्तिकां सजलां पाकाद्घनीभूतां पटे क्षिपेत् ।
कृत्वा तत्पोट्टलीं शूली यथास्वेदं विधारयेत् ॥ ३२ ॥

अथ कार्पासास्थ्यादिस्वेदमाह—

कार्पासास्थिकुलत्थकैस्तिलयवैरेरण्डमूलातसी·
वर्षाभूशणबीजकाञ्जिकयुतैरेकीकृतैर्वा पृथक्।
स्वेदः स्यादथ कूर्परोदरशिरःस्फिग्जानुपादाङ्गुली·
गुल्फस्कन्धकटीरुजो विजयते निःशेषवातार्त्तिहा ॥ ३३ ॥

अथ तिलादिगुटिकामाह—

तिलैश्च गुटिकां कृत्वा भ्रामयेज्जठरोपरि ॥ ३४ ॥
शूलं सुदुस्तरं तेन शान्तिं गच्छति सत्वरम्।
नाभिलेपाज्जयेच्छूलं मदनं काञ्जिकान्वितम् ॥ ३५ ॥

*मदनं = मयनफलम् ॥ ३४–३५ ॥

विश्वमेरण्डजं मूलं क्राथयित्वा जलं पिबेत्।
हिङ्गुसौवचलोपेतं सद्यः शूलनिवारणम् ॥ ३६ ॥

अथ वातजशूलचिकित्सामाह—

पुंसः शूलाभिपन्नस्य स्वेद एव सुखावहः।
पायसैः कृशरः पिण्डैः स्निग्धैर्वा पिशितोत्करैः ॥ ३७ ॥
वातात्मकं हन्त्यचिरेण शूलं स्नेहेन युक्तस्तु कुलत्थयूषः।
ससैन्धवव्योषयुतः सलावः सहिङ्गुसौवर्चलदाडिमाढ्यः ॥ ३८ ॥
बलापुनर्नवैरण्डबृहतीद्वयगोक्षुरैः।
सहिङ्गुलवणोपेतं सद्यो वातरुजाऽपहम् ॥ ३९ ॥
तुम्बुरुण्यभया हिङ्गु पौष्करं लवणत्रयम्।
पिबेदुष्णाम्बुना वाऽपि शूलगुल्मापतन्त्रकी ॥ ४० ॥
यवानीहिङ्गुसिन्धूत्थक्षारसौर्वचलाभयाः।
सुरामण्डेन पातव्या वातशूलनिषूदनाः ॥ ४१ ॥
सौवर्चलाम्लिकाऽजाजीमरिचैर्द्विगुणोत्तरैः।
मातुलुङ्गरसैः पिष्ट्वा गुटिका वातशूलनुत् ॥ ४२ ॥
बीजपूरकमूलं च घृतेन सह पाययेत्।
जयेद्वातभवं शूलं कर्षमेकं प्रमाणतः ॥ ४३ ॥

अथ पित्तजशूलचिकित्सामाह—

गुडः शालिर्यवक्षारः सर्पिष्पानं विरेचनम्।

जाङ्गलानि च मांसानि भेषजं पित्तशूलिनाम् ॥ ४४ ॥
मणीरजतताम्राणां भाजनानि गुरूणि च ।
तोयेन परिपूर्णानि शूलस्योपरि धारयेत् ॥ ४५ ॥
विरेचनं पित्तहरं प्रशस्तं-
रसाश्च शस्ताः शशलावकानाम् ।
सगुडां घृतसंयुक्तां भक्षयेद्वा हरीतकीम् ।
प्रलिह्याच्छूलशान्त्यर्थं धात्रीचूर्णं समाक्षिकम् ॥ ४६ ॥

अथ कफजशूलचिकित्सामाह—

शाल्यन्नं जाङ्गलं मांसमरिष्टं कटुकं रसम् ।
मधुना जीर्णगोधूमं कफशूले प्रयोजयेत् ॥ ४७ ॥

*अरिष्टं=भेषजवारिक्काथसिद्धमद्यम् ॥ ४७ ॥

लवणत्रयसंयुक्तं पञ्चकोलं सरामठम् ।
सुखोष्णेनाम्बुना पीतं कफशूलं प्रणाशयेत् ॥ ४८ ॥

अथामशूलचिकित्सामाह—

आमशूले क्रिया कार्या कफशूलप्रणाशिनी ।
सेव्यमामहरं सर्वमग्नेर्मन्दस्य वर्द्धनम् ॥ ४९ ॥
तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम् ।
प्रयोज्यं मधुसर्पिर्भ्यां सर्वशूलनिवारणम् ॥ ५० ॥

*तीक्ष्णायश्चूर्णं=राजिकाऽऽदिचूर्णम् ॥ ५० ॥

दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः ।
अम्लपिष्टैः सुखोष्णैश्च लिम्पेच्छूलयुतोदरम् ॥ ५१ ॥
मूलं वैल्वं तथैरण्डं चित्रकं विश्वभेषजम् ।
हिङ्गुसैन्धवसंयुक्तं सद्यः शूलनिवारणम् ॥ ५२ ॥

*वातरोगान्तर्गताध्मानचिकित्सायां लिखितो नाराचनामा रसोऽन्यच्च विरेचनं शूले हितम् ॥ ५२ ॥

अथ कूष्माण्डक्षारमाह—

कूष्माण्डं तनु कृत्वा तु क्षिप्त्वा घर्मे विशोषयेत् ।
स्थाल्यां निक्षिप्य तत्सर्वं पिधानेन पिधाय च ॥ ५३ ॥

चुल्ल्यां निवेश्य वह्निञ्च ज्वालयेत्कुशलो जनः ।
यथा तन्न भवेद्भस्म किन्त्वङ्गारो दृढो भवेत् ॥ ५४ ॥
तदा निर्वापयेच्छीतं सर्वथा चूर्णितन्तु तत् ।
माषद्वयमितं तावच्छुण्ठीचूर्णेन मिश्रितम् ॥ ५५ ॥
जलेन भक्षयेन्नित्यं महाशूलाकुलो नरः ।
असाध्यमपि यच्छूलं तदप्येतेन शाम्यति ॥ ५६ ॥

अथ परिणामशूलचिकित्सामाह—

लङ्घनं प्रथमं कुर्याद्वमनं सविरेचनम् ।
पक्तिशूलोपशान्त्यर्थं तत्र वान्तेर्विधिर्यथा ॥ ५७ ॥
पीत्वा तु क्षीरमाकण्ठं मदनक्वाथसंयुतम् ।
कान्तारकस्य पौण्ड्रस्य कोशकारस्य वा रसम् ॥ ५८ ॥
कषायो वाऽथ निम्बस्य कटुतुम्बीरसोऽथ वा ।
यथाविधि वमेद्धीमान्पक्तिशूलार्दितो जनः ॥ ५९ ॥
त्रिवृता च तथा दन्त्या तैलेनैरण्डजेन वा ।
दत्तं विरेचनं सद्यः पक्तिशूलनिवारणम् ॥ ६० ॥

अथ विडङ्गादिमोदकमाह—

विडङ्गतण्डुलव्योषत्रिवृद्दन्ती सचित्रका :
सर्वाण्येतानि संहृत्य सूक्ष्मचूर्णानि कारयेत् ॥ ६१ ॥
गुडेन मोदकान्कृत्वा खादेदुष्णेन वारिणा ।
जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम् ॥ ६२ ॥

अथ शुण्ठ्यादिकल्कमाह—

नागरतिलगुडकल्कं पयसा संपिष्य यः पुमाँल्लिह्यात् ।
उग्रं परिणतिशूलं नश्येत्तस्य त्रिरात्रेण ॥ ६३ ॥
पीतं शम्बूकजं भस्म जलेनोष्णेन तत्क्षणात् ।
पक्तिजं नाशयत्येव शूलं विष्णुरिवासुरान् ॥ ६४ ॥

अथ पथ्याऽऽदिलौहमाह—

लौहपथ्याकणाशुण्ठीचूर्णं समधुसर्पिषा ।
विलिहन्विनिहन्त्येव शूलं हि परिणामजम् ॥ ६५ ॥

अथ नारिकेलक्षारमाह—

नारिकेलं सतोयञ्च लवणेन सुपूरितम् ।
मृदाऽववेष्टितं शुष्कं पक्वं गोमयवह्निना ॥ ६६ ॥
पिप्पल्या भक्षितं हन्ति शूलं हि परिणामजम् ।
वातिकं पैत्तिकञ्चापि श्लैष्मिकं सान्निपातिकम् ॥ ६७ ॥

अथान्नद्रवशूलचिकित्सामाह—

अन्नद्रवाख्ये शूले तु न तावत्स्वास्थ्यमश्नुते
यावत्कटुकपित्ताम्लमन्नं न च्छर्दयेद् द्रवम् ॥ ६८ ॥
जातमात्रे जरत्पित्ते शूलमाशु विनाशयेत् ।
पित्तान्तं वमनं कृत्वा कफान्तञ्च विरेचनम् ॥ ६९ ॥
अन्नद्रवे च तत्कार्यं जरत्पित्ते यदीरितम् ।
जरत्पित्तेऽपि तत्पथ्यं प्रोक्तमन्नद्रवे तु यत् ॥ ७० ॥
आमपक्वाशये शुद्धे गच्छेदन्नद्रवः शमम् ॥ ७१ ॥
माषेण्डरीं सलवणां सुस्विन्नां तैलपाचिताम् ।
तादृशीं सर्पिषा खादेदन्नद्रवनिपीडितः ॥ ७२ ॥
धात्रीफलभवं चूर्णमयश्चूर्णसमन्वितम् ।
यष्टीचूर्णेन वा युक्तं लिह्यात्क्षौद्रेण तद्गदे ॥ ७३ ॥
श्यामाकतण्डुलैः सिद्धं सिद्धं कोद्रवतण्डुलैः ।
प्रियङ्गुतण्डुलैः सिद्धं पायसं सहितं हितम् ॥ ७४ ॥

*अत्र प्रियङ्गुः=कङ्गुविशेषः ॥ ७४ ॥

गौडिकं शौरणं कन्दं कूष्माण्डमपि भक्षयत् ।
कलाययवशक्तून्वा शक्तून्वा लाजसम्भवान् ॥ ७५ ॥

*गौडिकं=गुडेन संस्कृतं पक्वान्नम् ॥ ७५ ॥

कुलत्थशक्तूनथ वा दध्नाऽद्याद् दाधिकं तथा ।
चणकानामथो शक्तून्कोद्रवस्योदनं तथा ॥ ७६ ॥

*दाधिकं=दध्ना संस्कृतं भक्तं "महेरि" इति लोके ॥ ७६ ॥

गोधूममण्डकं तत्र सर्पिषा गुडसंयुतम् ।
ललितं शीतदुग्धेन मृदितं क्वथितं हितम् ॥ ७७ ॥

अन्नद्रवो दुश्चिकित्स्यो दुर्विज्ञेयो महागदः।
तस्मात्तस्य प्रशमने परं यत्नं समाचरेत॥ ७८॥
अन्नद्रवे जरत्पित्ते वह्निमन्दो भवेद्यतः।
तस्मादत्रान्नपानानि मात्राहीनानि कारयेत्॥ ७९॥
कलाययवगोधूमाः श्यामाकाः कोरदूषकाः।
राजमाषाश्च माषाश्च कुलत्थाः कङ्गुशालयः॥ ८०॥
दधिलुप्तरसं क्षीरं सर्पिर्गव्यं समाहिषम्।
वास्तूकं कारवेल्ली च कर्कोटकफलानि च॥ ८१॥
बर्हिणो हरिणा मत्स्या रोहिताद्याः कपिञ्जलाः।
एतस्मिन्नामये शस्ता मता मुनिचिकित्सकैः॥ ८२॥

*दधिलुप्तरसं=दध्ना लुप्तो रसः=प्रकृतरसो यस्य तत्क्षीरं, दधियुक्तं क्षीरमित्यर्थः॥ ८१-८२॥

अथ गुडमण्डूरमाह—

गुडामलकपथ्यानां चूर्णं प्रत्येकशः पलम्।
त्रिपलं लोहकिट्टस्य तत्सर्वं मधुसर्पिषा॥ ८३॥
समालोड्य समश्नीयादक्षमात्रप्रमाणतः।
आदिमध्यावसानेषु भोजनस्य निहन्ति तत्॥ ८४॥
अन्नद्रवं जरत्पित्तमम्लपित्तं सुदारुणम्।
परिणामसमुत्थश्च शूलं संवत्सरोत्थितम॥ ८५॥

अथ शूलरोगेऽपथ्यान्याह—

व्यायामं मैथुनं मद्यं लवणं कटुकं रसम्।
वेगरोधं शुचं क्रोधं विदलं शूलवांस्त्यजेत॥ ८६॥

इत्येकोनत्रिंशः शूलाधिकारोऽथवा शूलपरिणामशूलान्नद्रवजरत्पित्ताधिकारः समाप्तः॥ २९॥

अथ त्रिंश उदावर्त्तानाहाधिकारः॥ ३०॥

तत्रोदावर्त्तस्य विप्रकृष्टनिदानमाह—

वातविण्मूत्रजृम्भाऽश्रुक्षवोद्गारवमीन्द्रियैः।
क्षुत्तृष्णोच्छ्वासनिद्राणां धृत्योदावर्त्तसम्भवः॥ १॥

*इन्द्रियमत्र शुक्रम्। अत्र तृतीया सहार्था। धृत्या=वेगविघातेन ॥ १ ॥

अथोदावर्त्तस्य सामान्यलक्षणमाह—

यत्रोर्ध्वं जायते वायोरावर्त्तः स चिकित्सकैः।
उदावर्त्त इति प्रोक्तो व्याधिस्तत्रानिलः प्रभुः ॥ २ ॥

*आवर्त्तो=भ्रमः ॥ २ ॥

अथाधोवातावरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

वातमूत्रपुरीषाणां सङ्गो ध्मानं क्लमो रुजा।
जठरे वातजाश्चान्ये रोगाः स्युर्वातनिग्रहात् ॥ ३ ॥

*तत्तद्वेगाभिघातभिन्नानामुदावर्त्तानां क्रमेण विशिष्टानि लक्षणान्याह। तत्रापानवातनिरोधजस्योदावर्त्तस्य लक्षणमाह--वातेति। सङ्गः=अप्रवृत्तिः। ध्मानम्=आध्मानम्। क्लमः=अनायासश्रमः। रुजा जठरे। अन्ये=तोदशूलगुल्मादयः ॥ ३ ॥

अथ पुरीषावरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

आटोपशूलौ परिकर्त्तिका च सङ्गः पुरीषस्य तथोर्ध्ववातः।
पुरीषमास्यादथवा निरेति पुरीषवेगेऽभिहते नरस्य ॥ ४ ॥

*पुरीषवेगे धारिते सति, आटोपः=सरुग् गुडगुडाशब्दः। शूलमिति पक्वाशये। परिकर्त्तिका=गुदे कर्त्तनवत्पीडा। ऊर्ध्ववातः=उद्गारः ॥ ४ ॥

अथ मूत्रावरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

वस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा।
विनामो वङ्क्षणानाहः स्याल्लिङ्गं मूत्रनिग्रहे ॥ ५ ॥

*विनामः=व्यथया वपुषो नमनम्। वङ्क्षणानाहः=वङ्क्षणयोराकर्षणवद्व्यथा ॥ ५ ॥

अथ जृम्भाऽवरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

मन्यागलस्तम्भशिरोविकारा जृम्भोपघातात्पवनात्मकाः स्युः।
तथाऽक्षिनासावदनामयाश्च भवन्ति तीव्राः सह कर्णरोगैः ॥ ६ ॥

अथ नेत्रोदकावरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

आनन्दजं वाऽप्यथ शोकजं वा नेत्रोदकं प्राप्तममुञ्चतो हि।
शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन ॥ ७ ॥

अथ छिक्काऽवरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

मन्यास्तम्भः शिरःशूलमर्दितार्द्धावभेदकौ ।
इन्द्रियाणाञ्च दौर्बल्यं क्षवथोः स्याद्विधारणात् ॥ ८ ॥

अथोद्गारावरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

कण्ठास्यपूर्णत्वमतीव तोदः कूजश्च वायोरथ वाऽप्रवृत्तिः ।
उद्गारवेगेऽभिहते भवन्ति जन्तोर्विकाराः पवनप्रसूताः ॥ ९ ॥

*कण्ठास्यपूर्णत्वं—कवलेनेव । तोदो-हृद्यामाशये च । कूजो=ऽव्यक्तशब्दः । उदरे वायोरप्रवृत्तिः, उच्छ्वासादिनिरोधात् । पवनप्रसूताः=पवनाज्जाताः, विकाराः=हिक्काऽऽदयः ॥ ६ ॥

अथ वमनावरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

कण्डूकोठारुचिव्यङ्गशोथपाण्ड्वामयज्वराः ।
कुष्ठहृल्लासवीसर्पाश्छर्दिनिग्रहजा गदाः ॥ १० ॥

अथ वीर्यावरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

मूत्राशये वै गुदमुष्कयोश्च शोथो रुजा मूत्रविनिग्रहश्च ।
शुक्राश्मरी तत्स्रवणं भवेच्च ते ते विकारा विहते तु शुक्रे ॥ ११ ॥

*तत्स्रवणं=शुक्रस्रावः । ते ते विकाराः=वातकुण्डलिकाऽऽदयः ॥ ११ ॥

अथ क्षुधाऽवरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

तन्द्राऽङ्गमर्दावरुचिः श्रमश्च क्षुधाविघातात्कृशता च दृष्टेः ॥ १२ ॥

अथ तृषाऽवरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

कण्ठास्यशोषः श्रवणावरोधस्तृष्णाविघाताद्धृदये व्यथा च ॥ १३ ॥

अथ श्वासावरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

श्रान्तस्य निश्वासविनिग्रहेण हृद्रोगमोहावथ वाऽपि गुल्मः ॥ १४ ॥

अथ निद्राऽवरोधोत्पन्नोदावर्त्तस्य लक्षणमाह—

जृम्भाऽङ्गमर्दाक्षिशिरोऽतिजाड्यं निद्राविघातादथ वाऽपि तन्द्रा ॥ १५ ॥

*अतिजाड्यं=गौरवम् । "शिरोगात्राक्षिगौरवमिति" तन्त्रान्तरेपाठात् ॥ १५ ॥

अथ रूक्षादिकुपितवातोत्पन्नोदावर्त्तस्य निदानसम्प्राप्तिपूर्वकं लक्षणमाह—

वायुः कोष्ठानुगो रूक्षैः कषायकटुतिक्तकैः ।
भोजनैः कुपितः सद्य उदावर्त्तं करोति च ।

वातमूत्रपुरीषाश्रुकफमेदोवहानि वै ।
स्रोतांस्युदावर्त्तयति पुरीषं न प्रवर्त्तयेत् ।
ततो हृद्बस्तिशूलार्त्तो हृल्लासारतिपीडितः ।
वातमूत्रपुरीषाणि कृच्छ्रेण लभते नरः ॥ १६ ॥
श्वासकासप्रतिश्यायदाहमोहतृषाज्वरान् ।
वमिहिक्काशिरोरोगमनःश्रवणविभ्रमान् ।
बहूनन्यांश्च लभते विकारान्वातकोपजान् ॥ १७ ॥

*वेगावरोधजमुदावर्त्तमभिधाय रूक्षादिकुपितवातजमाह—वायुरिति । उदावर्त्तयति=वायुरूर्ध्वं भ्रमेणैव वातादिवहानि स्रोतांसि निरुणद्धि न तु विडादीनधो गमयति । मनोविभ्रमः=रज्जौ सर्पज्ञानम् । श्रवणविभ्रमः=अन्यथा श्रवणम् ॥ १६-१७ ॥

अथासाध्योदावर्त्तस्य लक्षणमाह—

तृष्णाच्छर्दिपरिक्लिष्टं क्षीणं शूलैरुपद्रुतम् ।
शकृद् वमन्तं मतिमानुदावर्त्तिनमुत्सृजेत् ॥ १८ ॥

*परिक्लिष्टं=क्लेशसंयुक्तम् ॥ १८ ॥

अथानाहस्य सामान्यलक्षणमाह—

आमं शकृद्वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन ।
प्रवर्त्तमानं न यथास्वमेनं विकारमानाहमुदाहरन्ति ॥ १९ ॥

*आमम्=अपक्वमाहाररसम् । शकृत=पुरीषं वा । क्रमेण निचितं=सञ्चितम् । भूयो विगुणानिलेन=दुष्टवायुना, विबद्धं=व्यायामशोषितं वा, यथास्वं=पूर्ववदप्रवर्त्तमानम् । एनं विकारमानाहमाहुः॥१६॥

अथामजानाहस्य लक्षणमाह—

तस्मिन्भवन्त्यामसमुद्भवे तु तृष्णाप्रतिश्यायशिरोविदाहाः ।
आमाशये शूलमथो गुरुत्वं हृत्स्तम्भ उद्गारविघातनञ्च ॥ २० ॥

*विघातनम्=अप्रवृत्तिः ॥ २० ॥

अथ मलसंचयेनोत्पन्नानाहस्य लक्षणमाह—

स्तम्भः कटीपृष्ठपुरीषमूत्रे शूलोऽथ मूर्च्छा शकृतो वमिश्च ।
श्वासश्च पक्वाशयजे भवन्ति तथाऽलसोक्तानि च लक्षणानि ॥२१॥

*पक्वाशयजे=शकृत्सञ्चयजे, आनाहे । स्तम्भशब्दः=कटीपृष्ठयोः-

स्तब्धतावाची पुरीषमूत्रयोरप्रवृत्तिवाची च। अलसोक्तानि लक्षणानि =आध्मानवातावघातादीनि ॥ २१ ॥

अथोदावर्त्तानां चिकित्सामाह—

अधोवातनिरोधोत्थे उदावर्त्ते हितं मतम्।
स्नेहपानं तथा स्वेदो वर्त्तिर्वस्तिर्हितो मतः॥ २२॥
विड्विघातसमुत्थे तु विड्भङ्गान्नं तथौषधम्।
वर्त्त्यभ्यङ्गावगाहाश्च स्वेदो वस्तिर्हितो मतः॥ २३॥

*वर्त्तिः=फलवर्त्तिः॥ २२–२३॥

मूत्रावरोधजनिते क्षीरवारिवचां पिबेत्।
दुःस्पर्शास्वरसं वाऽपि कषायं ककुभस्य च॥ २४॥

*दुःस्पर्शा=कण्टकारी दुरालभा च, तुल्यगुणत्वात्॥ २४॥

एर्वारुबीजं तोयेन पिबेद्वा लवणीकृतम्।
सितामिक्षुरसं क्षीरं द्राक्षां यष्टीमथापि वा।
सर्वथैव प्रयुञ्जीत मूत्रकृच्छ्राश्मरीविधिम्॥ २५॥
जृम्भाऽभिघातजे स्नेहं स्वेदं वाऽपि प्रयोजयेत्।
अन्यानपि प्रयुञ्जीत समीरणहरान्विधीन्॥ २६॥
नेत्रनीरावरोधोत्थे मुञ्चेद्वाऽपि दृशोर्जलम्।
स्वप्यात्सुखञ्च तस्याग्रे कथयेच्च कथाः प्रियाः॥ २७॥
क्षवथोर्घातजे तीक्ष्णघ्राणनस्यार्कदर्शनैः।
प्रवर्त्तयेत्क्षुतं सक्तां स्नेहस्वेदौ च शीलयेत्॥ २८॥

*तीक्ष्णं=मरिचराजिकाऽऽदि॥ २८॥

उद्गारस्यावरोधे तु स्नैहिकं धूममाचरेत्।
छर्दिनिग्रहसञ्जाते वमनं लङ्घनं हितम्॥ २९॥
विरेचनं चात्र मतं तैलेनाभ्यञ्जनं तथा।
वस्तिशुद्धिकरैः सिद्धं चतुर्गुणजलं पयः॥ ३०॥
आ वारिनाशात् क्वथितं पीतवन्तं प्रकामतः।
रमयेयुः प्रिया नार्यः शुक्रोदावर्त्तिनं नरम्॥ ३१॥
तस्याभ्यङ्गोऽवगाहश्च मदिरा चरणायुधाः।

शालिः पयोनिरूहश्च हितं मैथुनमेव च ॥ ३२ ॥
क्षुद्विघातसमुद्भूते स्निग्धमुष्णं तथा लघु ।
रुच्यमल्पं हितं भक्ष्यं पुष्पं सेव्यं सुगन्धि यत् ॥ ३३ ॥
तृषाविघातसम्भूते शीतः सर्वो विधिर्हितः ।
कर्पूरशिशिरं स्वल्पं पिबेत्तोयं शनैः शनैः ॥ ३४ ॥
श्रमश्वासधृतौ शस्तो विश्रामः सरसौदनः ॥ ३५ ॥
निद्रावेगविघातोत्थे पिबेत्क्षीरं सितायुतम् ।
संवाहनं सुशय्याऽत्र हितः स्वप्नः प्रियाः कथाः ॥ ३६ ॥

अथ रूक्षादिहेतुकुपितवातोत्पन्नोदावर्त्तचिकित्सामाह ।

तत्र हिङ्ग्वादिफलवर्त्तिमाह—

हिङ्गुमाक्षिकसिन्धूत्थैः पिष्टैर्वर्त्तिं विनिर्मिताम् ।
घृताभ्यक्तां गुदे न्यस्येदुदावर्त्तविनाशिनीम् ॥ ३७ ॥

*वातादिवेगविघातजनितानामुदावर्त्तानां चिकित्सामभिधाय रूक्षादिकुपितवातजनितस्योदावर्त्तस्य चिकित्सामाह—हिङ्ग्विति॥३७॥

अथ मदनफलादिवर्त्तिमाह—

मदनं पिप्पली कुष्ठं वचा गौराश्च सर्षपाः ।
गुडक्षीरसमायुक्ताः फलवर्त्तिरिहोदिता ॥ ३८ ॥

अथ नाराचचूर्णमाह—

खण्डपलं त्रिवृताऽक्षः कृष्णाकर्षो द्वयोश्चूर्णम् ।
प्राग्भोजनस्य मधुना विडालपदकं नरो लिह्यात् ॥ ३९ ॥
एतद् गाढपुरीषेदेयं विज्ञैरुदावर्त्ते ।
मधुरं नरपतियोग्यं चूर्णं नाराचकं नाम्ना ॥ ४० ॥

अथ गुडाष्टकमाह—

सव्योषपिप्पलीमूलं त्रिवृद्दन्ती च चित्रकम् ।
तच्चूर्णं गुडसंमिश्रं भक्षयेत्प्रातरुत्थितः ॥ ४१ ॥
एतद्गुडाष्टकं नाम्ना बलवर्णाग्निवर्द्धनम् ।
उदावर्त्तप्लीहगुल्मशोथपाण्डवामयापहम् ॥ ४२ ॥

अथ शुष्कमूलकाद्यघृतमाह—

मूलकं शुष्कमार्द्रं च वर्षाभूः पञ्चमूलकम् ॥ ४३ ॥

कृतमालफलं चाप्सु पक्त्वा तेन घृतं पचेत्।
तत्पीतं शमयेत्क्षिप्रमुदावर्त्तमशेषतः ॥ ४४ ॥

*पञ्चमूलकमत्र बृहत् ॥ ४३-४४ ॥

अथानाहस्य चिकित्सामाह—

तुल्यकारणकार्यत्वादुदावर्त्तहरीं क्रियाम्।
आनाहेषु च कुर्वीत विशेषश्चाभिधीयते ॥ ४५ ॥
त्रिवृत्कृष्णाहरीतक्यो द्विचतुष्पञ्चभागिकाः।
गुडेन तुल्या गुटिका हरत्यानाहमुल्वणम् ॥ ४६ ॥

अथ त्रिकटुकाऽऽदिवर्त्तिमाह—

वर्त्तिस्त्रिकटुकसैन्धवसर्षपगृहधूमकुष्ठमदनफलैः।
मधुनि गुडे वा पक्वैर्विहिता साऽङ्गुष्ठसम्मिता विज्ञैः ॥ ४७ ॥
वर्त्तिरियं दृष्टफला शनैः प्रणिहिता गुदे घृताभ्यक्ता।
आनाहमुदरजार्त्तिं शमयति जठरे तथा गुल्मम् ॥ ४८ ॥

इति त्रिंश उदावर्त्तानाहाधिकारः समाप्तः ॥ ३० ॥

अथैकत्रिंशो गुल्माधिकारः ॥ ३१ ॥

तत्र गुल्मस्य सन्निकृष्टविप्रकृष्टकारणपूर्वकं समान्यलक्षणमाह—

दुष्टा वातादयोऽत्यर्थं मिथ्याऽऽहारविहारतः।
कुर्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ॥ १ ॥

*दुष्टाः स्वकारणैर्मिथ्याऽऽहाराध्यशनादिभिः। मिथ्याविहारो=बलवद्विग्रहादिः। पञ्चधेति—वातपित्तकफसन्निपातरक्तजा एवं पञ्च। द्वन्द्वजास्तु प्रकृतिसमसमवेतत्वात् पृथग् न गण्यन्ते, अर्शोवत्। कोष्ठान्तः=हृदयाद्बस्तिपर्यन्तं कोष्ठस्तस्य मध्ये, कुत्रापि ग्रन्थिरूपिणम्=गुटिकाऽऽकारम् ॥ १ ॥

अथ पञ्चविधत्वं विवृणोति—

स व्यस्तैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः।
पुरुषाणां तथा स्त्रीणां रक्तजश्चोपजायते ॥ २ ॥

अथार्त्तवोत्पन्नगुल्ममाह—

आर्त्तवादपि गुल्मः स्यात्स तु स्त्रीणां प्रजायते।
अन्यस्त्वसृग्भवः पुंसां तथा स्त्रीणां प्रजायते ॥ ३ ॥

*आर्त्तवरूपादपि रक्ताद् गुल्मो भवतीत्याह—आर्त्तवादिति ॥३॥

अथ कोष्ठेऽपि स्थाननियममाह—

तस्य पञ्चविधं स्थानं पार्श्वहृन्नाभिवस्तयः ॥ ४ ॥

अथ गुल्मस्य सामान्यलक्षणमाह—

हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदि वाऽचलः ।
वृत्तश्चयोपचयवान्स गुल्म इति कीर्त्तितः ॥ ५ ॥

*नाभिशब्देन वस्तिर्बोध्यः, सामीप्यादेव, यथा गङ्गायां घोष इति । वस्तेरपि गुल्माश्रयत्वेनोक्तत्वाद्; अन्ये तु "हृद्वस्त्योरेव" पाठान्तरं पठन्ति । अन्ये तु-"वस्तौ विद्रधिः स्यान्न गुल्म" इति, तन्न वस्तेरपि गुल्मस्थानत्वात् । तथा च चरके—

*"पञ्चस्थानानि गुल्मस्य पार्श्वहृन्नाभिवस्तयः" । इति ।

*सञ्चारी = चलनशीलः । अचलः = स्थिरः । वृत्तो = वर्त्तुलः । चयोपचयवानिति—कदा चिच्चीयते = वृद्धिं गच्छति, कदा चिदपचीयते = हीनो भवति । "एतल्लक्षणं सामान्योक्तमपि वातिके व्यवतिष्ठत" इति जेज्जटः । गयदासस्तु सामान्यमेवाह, सर्वगुल्मानां वातमूलत्वात् ॥५॥

अथ गुल्मस्य पूर्वरूपमाह—

उद्गारबाहुल्यपुरीषबन्धतृप्त्यक्षमत्वान्त्रविकूजनानि ।
आटोपमाध्मानमपक्तिशूलमासन्नगुल्मस्य वदन्ति चिह्नम् ॥ ६ ॥
अरुचिं कृच्छ्रविण्मूत्रवातत्वं चान्त्रकूजनम् ।
आनाहं चोर्ध्ववातञ्च सर्वगुल्मेषु लक्षयेत् ॥ ७ ॥

अथ वातिकगुल्मनिदानमाह—

रूक्षान्नपानं विषमातिमात्रं विचेष्टनं वेगविनिग्रहश्च ।
शोकाभिघातोऽतिमलक्षयश्च निरन्नता चानिलगुल्महेतुः ॥ ८ ॥

*विचेष्टनं = विरुद्धा चेष्टा बलवद्विग्रहादिः । शोकाभिघातः = शोकेन मनोऽधिष्ठानस्य हृदयस्याभिघातः । अतिमलक्षयो विरेकादिना । निरन्नता = उपवासः ॥ ८ ॥

अथ वातिकगुल्मलक्षणमाह—

यः स्थानसंस्थानरुजाविकल्पं विड्वातसङ्गं गलवक्त्रशोषम् ।
श्यावारुणत्वं शिशिरज्वरञ्च हृत्कुक्षिपार्श्वाङ्गशिरोरुजञ्च ॥ ९ ॥

करोति जीर्णेऽत्यधिकं प्रकोपं भुक्ते मृदुत्वं समुपैति यश्च।
वातात्स गुल्मो न च तत्र रूक्षं कषायतिक्तं कटु चोपशेते ॥ १० ॥

*श्यावारुणत्वं शरीरस्य। शिशिरज्वरं=शीतज्वरम्। जीर्णे आहारे प्रकुप्यति, भुक्ते च शान्ति गच्छति, स वातिको गुल्मः। रूक्षः= आहारः। कषायतिक्तकटुरसाः। तत्र=तस्मिन्वातगुल्मे, नोपशेते= न सुखयति ॥ १० ॥

अथ पैत्तिकगुल्मनिदानमाह—

कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्रोधातिमद्यार्कहुताशसेवा।
आमोऽभिघातो रुधिरञ्च दुष्टं पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥ ११ ॥

*विदाहि=वंशकरीरादि। अतिशब्दो मद्यादिषु योज्यः। आमो-ऽत्र विदग्धाजीर्णबोधकः। अभिघातो लगुडादिना ॥ ११ ॥

अथ पैत्तिकगुल्मलक्षणमाह—

ज्वरः पिपासा सदनाङ्गरागौ शूलं महज्जीर्यति भोजने च।
स्वेदो विदाहो व्रणवच्च गुल्मः स्पर्शासहः पैत्तिकगुल्मरूपम् ॥ १२ ॥

*अङ्गरागः=देहस्य लौहित्यम्। जीर्यति भोजने च विदाहो, व्रणवच्च गुल्मः स्पर्शासहः, पैत्तिकगुल्मरूपम् ॥ १२ ॥

अथ श्लैष्मिकसांनिपातिकयोर्गुल्मयोः कारणमाह—

शीतं गुरु स्निग्धमचेष्टनञ्च सम्पूरणं प्रस्वपनं दिवा च।
गुल्मस्य हेतुः कफसम्भवस्य सर्वस्तु दुष्टो निचयात्मकस्य ॥१३॥

*सम्पूरणम्=उदरपूरणम्। निचयात्मकस्य=सान्निपाति-कस्य। सर्वो हेतुः=वातपित्तकफानां हेतुः ॥ १३ ॥

अथ श्लैष्मिकगुल्मलक्षणमाह—

स्तैमित्यशीतज्वरगात्रसादहृल्लासकासारुचिगौरवाणि ॥
कफस्य लिङ्गानि च यानि तानि भवन्ति गुल्मे कफकोपजाते ॥ १४ ॥

*कफस्य लिङ्गानि=वेदनाऽल्पतावह्निमान्द्यादीनि ॥ १४ ॥

अथ द्वन्द्वजगुल्मलक्षणमाह—

व्यामिश्रलिङ्गानपरांस्तु गुल्मांस्त्रीनादिशेदौषधकल्पनाऽर्थम् ॥१५॥

*सान्निपातिके सर्वो हेतुरुपलक्षणम्-व्यामिश्रेति ॥ १५ ॥

अथ त्रिदोषजगुल्मलक्षणमाह—

महारुजं दाहपरीतमश्मवद्धनोन्नतं शीघ्रविदाहि दारुणम् ।
मनःशरीराग्निबलापहारिणं त्रिदोषजं गुल्ममसाध्यमादिशेत् ॥१६॥

*दाहपरीतं=दाहेन व्याप्तसकलदेहम् । शीघ्रविदाहि=शीघ्रविदग्धाजीर्णकरम् । दारुणं=मारकम् । मनोऽपहारिणं=मनोवैकृत्यकारकम् । शरीरापहारिणं=शरीरस्य कार्श्यकरम् ॥ १६ ॥

अथार्त्तवरूपरक्तजगुल्मलक्षणमाह—

नवप्रसूताऽहितभोजना या या चामगर्भं विसृजेद्दृतौ वा ।
वायुर्हि तस्याः परिगृह्य रक्तं करोति गुल्मं सरुजं सदाहम् ॥ १७ ॥
पैत्तस्य लिङ्गेन समानलिङ्गं विशेषणञ्चाप्यपरं निबोध ।
यः स्पन्दते पिण्डित एव नाङ्गैश्चिरात्सशूलः समगर्भलिङ्गः ।
स रौधिरः स्त्रीभव एव गुल्मो मासे व्यतीते दशमे चिकित्स्यः ॥१८॥

*नवप्रसूता=प्रकृताग्निबलवर्णमांसहीना, अहितभोजना । या चामगर्भं विसृजेत्=नवममासादर्वाक् प्रसूयते, साऽप्यहितभोजना । ऋतौ वा आर्त्तवप्रवृत्तिकालेऽहितभोजना । अपथ्याचरणाद्वा वायू-रक्तं परिगृह्य गुटिकाऽऽकारं गर्भाशये गुल्मं करोति । भोजनपदं विहारस्याप्युपलक्षणम् । यतश्चाह चरकः—

*"ऋतावनाहारतया भयेन विरूक्षणैर्वेगविनिग्रहैश्च ।
संस्तम्भनोल्लेखनयोनिदोषैर्गुल्मः स्त्रिया रक्तभवोऽभ्युपैति" ॥१॥

*धातुरूपरक्तजस्यापि विप्रकृष्टनिदानानि लक्षणानि च पैत्तिकस्येव बोद्धव्यानि । परमत्राभिघातादिर्हेतुविशेषः । चिरात् स्पन्दते=चलति । नाङ्गैः=न हस्तपादाद्यैः । समगर्भलिङ्गः=अत्र समशब्दःसर्वशब्दार्थः, तेन समानि=सर्वाणि, गर्भलिङ्गानि=आर्त्तवप्रवृत्तिकाले आर्त्तवादर्शन मुखपीतता-स्तनमुखकृष्णता-दोहदादीनि यत्र सः । एते च व्याधिप्रभावाद्, यथा यक्ष्मिणो रिरंसा । स रौधिरः=आर्त्तवरूपरक्तजः स्त्रीणां प्रजायत इति । गर्भसमानलिङ्गत्वे विशेषज्ञानार्थमाह—"मासे व्यतीते दशमे चिकित्स्यः" । नवमदशममासयोः प्रसवकालत्वादित्येके; तन्न "यः स्पन्दते पिण्डित एव नाङ्गैरि"त्यादिनैव संश-

यस्य निराकृतत्वात् । गर्भः प्रत्यङ्गैर्निरन्तरं निःशूलं स्पन्दते गुल्मश्चै-तद्विपरीत इति । किञ्च—"नवमे दशमे प्रसूयत" इत्युत्सर्गो न तु नि-यमः । तदधिककालेऽपि प्रसवदर्शनादागमाच्च । यत आह चरकः—

*"तं स्त्री प्रसूते सुचिरेण गर्भं पुष्टं यदा वर्षगणैरपि स्यात् ॥२॥

*तस्माद्—"मासे व्यतीते दशमे चिकित्स्य" इति न संशयव्य-वच्छेदार्थं किन्तु तदा सुखेन चिकित्साऽर्थम् , यत उक्तम्—

*"रक्तगुल्मपुराणत्वं सुखसाध्यस्य लक्षणम् " ।

*पुराणता चास्य दशमासातिक्रमेणैव भवति । जेज्झटेनाप्युक्तम् । "दशमासोपरि पिण्डिते गुल्मे स्नेहादिनोपस्कृतदेहाया न गर्भाश-यक्षतिमादधाति रक्तभेदनमिति ॥ १७-१८ ॥

अथासाध्यगुल्मलक्षणमाह—

सञ्चितः क्रमशो गुल्मो महावास्तुपरिग्रहः ।
कृतमूलः शिरानद्धो यदा कूर्म इवोन्नतः ॥ १९ ॥
दौर्बल्यारुचिहृल्लासकासच्छर्द्यरतिज्वरैः ।
तृष्णातन्द्राप्रतिश्यायैर्युज्यते न स सिध्यति ॥ २० ॥

*महावास्तुपरिग्रहः=व्यापकतया बृहत्स्थलं गृह्णाति । युज्यते= युक्तो भवति ॥ १९-२० ॥

अपरञ्च—

गृहीत्वा सज्वरश्वासं छर्द्यतीसारपीडितम् ।
हृन्नाभिहस्तपादेषु शोथः कर्षति गुल्मिनम् ॥ २१ ॥

*कर्षति=मारणाय कर्षति ॥ २१ ॥

अपरञ्च—

श्वासः शूलं पिपासाऽन्नविद्वेषो ग्रन्थिमूढता ।
जायते दुर्बलत्वञ्च गुल्मिनो मरणाय वै ॥ २२ ॥

*ग्रन्थिमूढता=ग्रन्थिरूपस्य गुल्मस्याकस्माद्विलयनम् ॥ २२ ॥

अथ गुल्मचिकित्सामाह—

वातारितैलेन पयोयुतेन पथ्यासमेतेन विरेचनं हि ।
संस्वेदनं स्निग्धमतिप्रशस्तं प्रभञ्जनक्रोधकृते च गुल्मे ॥ २३ ॥
स्वर्जिकाकुष्ठसहितः क्षारः केतकसम्भवः ।

पीतस्तैलेन शमयेद् गुल्मं पवनसम्भवम् ॥ २४ ॥
तित्तिरांश्च मयूरांश्च कुक्कुटान्क्रौञ्चवर्त्तकान् ।
सर्पिः शालिं प्रसन्नाञ्च वातगुल्मे प्रयोजयेत् ॥ २५ ॥
पित्तगुल्मे त्रिवृच्चूर्णं पातव्यं त्रिफलाऽम्बुना ।
विरेकाय सितायुक्तं कम्पिल्लं वा समाक्षिकम् ॥ २६ ॥

*त्रिफलाऽम्बुना = त्रिफलाक्वाथेन । कम्पिल्लकं = "कबीला" इति लोके ॥ २६ ॥

अभयां द्राक्षया खादेत्पित्तगुल्मी गुडेन वा ।
योगैश्च वातगुल्मोक्तैः श्लेष्मगुल्ममुपाचरेत् ।
अपरैश्च बलासघ्नैर्युक्तियुक्तैः शमं नयेत् ॥ २७ ॥

अथ हिङ्ग्वादिचूर्णमाह—

हिङ्गुग्रन्थिकधान्यजीरकवचाचव्याग्निपाठाशटी-
वृक्षाम्लं लवणत्रयं त्रिकटुकं क्षारद्वयं दाडिमम् ।
पथ्यापौष्करवेतसाम्लहवुषाऽजाज्यस्तदेभिः कृतं-
चूर्णं भावितमेतदार्द्रकरसैः स्याद् बीजपूरद्रवैः ॥ २८ ॥
गुल्माध्मानगुदाङ्कुरान्ग्रहणिकोदावर्त्तसंज्ञं गदं-
प्रत्याध्मानगरोदराश्मरियुतांस्तूनीद्वयारोचकान् ।
ऊरुस्तम्भमतिभ्रमं च मनसो बाधिर्यमष्ठीलिकां-
प्रत्यष्ठीलिकया सहापहरते प्राक्पीतमुष्णाम्बुना ॥ २९ ॥
हृत्कुक्षिवङ्क्षणकटीजठरान्तरेषु
वस्तिस्तनांसफलकेषु च पार्श्वयोश्च ।
शूलानि नाशयति वातबलासजानि
हिङ्ग्वाद्यमाद्यमिदमाश्विनसंहितोक्तम् ॥ ३० ॥

इति हिङ्ग्वादिचूर्णम् ।

धीमानुपाचरेद् गुल्मं प्रत्याख्याय त्रिदोषजम् ।
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः ॥ ३१ ॥
शरपुङ्खस्य लवणं पथ्याचूर्णं समं द्वयम् ।
शाणप्रमाणमश्नीयाच्चूर्णं गुल्मगदापहम् ॥ ३२ ॥

स्वर्जिका शाणमाना स्यात्तावदेव गुडं भवेत् ।
उभयोर्वटिकां खादेद् गुल्मामयविनाशिनीम् ॥ ३३ ॥

अथ क्षाराष्टकमाह--

पलाशवज्रीशिखरिचिञ्चाऽर्कतिलनालजाः ।
यवजः स्वर्जिका चेति क्षारा ह्यष्टौ प्रकीर्त्तिताः ।
एते गुल्महराः क्षारा अजीर्णस्य च पाचकाः ॥ ३४ ॥

अथ वज्रक्षारमाह—

सामुद्रं सैन्धवं काचं यवक्षारं सुवर्चलम् ।
टङ्कणं स्वर्जिकाक्षारतुल्यं चूर्ण प्रकल्पयेत् ॥ ३५ ॥
वज्रीक्षीरै रविक्षीरैरातपे भावयेत् त्र्यहम् ।
वेष्टयेदर्कपत्रेण रुद्ध्वा भाण्डे पुटे पचेत् ॥ ३६ ॥
तत्क्षारं चूर्णयेत्पश्चात्त्र्यूषणं त्रिफला तथा ।
यवानी जीरको वह्निश्चूर्णमेषाञ्च कारयेत् ॥ ३७ ॥
सर्वचूर्णसमं क्षारं सर्वमेकत्र कारयेत् ।
तच्चूर्णं टङ्कयुगलं सलिलेन प्रयोजयेत् ॥ ३८ ॥
गुल्मे शूले तथाऽजीर्णे शोथे सर्वोदरेषु च ।
मन्दे वह्नावुदावर्त्ते प्लीह्नि चापि परं हितम् ॥ ३९ ॥
वातेऽधिके जलैः कोष्णैर्हितं पित्तेऽधिके घृतैः ।
गोमूत्रेण कफाधिक्ये काञ्जिकेन त्रिदोषजे ॥ ४० ॥
वज्रक्षार इति ख्यातः प्रोक्तः पूर्वं स्वयम्भुवा ।
सेवितो हरतेऽजीर्णं तथाऽजीर्णभवान्गदान् ॥ ४१ ॥

इति वज्रक्षारः ।

सुवर्चिका टङ्कमिता तत्समानाऽऽर्द्रिकाऽपि च ।
उभे भुञ्जीत युगपद् गुल्मामयनिवृत्तये ॥ ४२ ॥
*सुवर्चिका="सोरा" इति लोके ॥ ४२ ॥
शुक्तिचूर्णस्य गुटिकां टङ्कमात्रां सुवेष्टयेत् ॥
गुडेन शाणमानेन तां लिहेद् गुल्मरोगवान् ॥ ४३ ॥
गुल्मी कुमारिकामांसं कर्षार्द्धं गोघृतान्वितम् ।
गिलेद्व्योषाभयासिन्धुसुदमचूर्णावधूलिताम् ॥ ४४ ॥

*कुमारिका="घिवकुमारी" इति लोके ॥ ४४ ॥

अथ गुल्मरोगिण्याज्यपदार्थानाह—

वल्लुरं मूलकं मत्स्यं शुष्कशाकानि वैदलम् ।
न खादेदालुकं गुल्मी मधुराणि फलानि च ॥ ४५ ॥

*वैदलानां निषेधेऽपि माषकुलत्थयोर्नात्र निषेध इति सुश्रुतटीका ॥ ४५ ॥

अथ रक्तगुल्मचिकित्सामाह—

स्निग्धस्विन्नशरीरस्य योज्यं स्नेहविरेचनम् ।
शताह्वाचिरबिल्वत्वग्दारुभार्गीकणोद्भवः ॥ ४६ ॥
कल्कः पीतो जयेद् गुल्मं तिलक्वाथेन रक्तजम् ।
तिलक्वाथो गुडव्योषघृतभार्गीयुतो भवेत् ॥ ४७ ॥
योनिरक्तभवे गुल्मे नष्टपुष्पेषु योषिताम् ।
पीतो धात्रीरसो युक्तो मरिचैश्चास्रगुल्मनुत् ॥ ४८ ॥
गुण्डारोचनिकाचूर्णं शर्करामाक्षिकान्वितम् ।
विदधीताशु गुल्मिन्या मलसश्चङ्क्रमाय च ॥ ४९ ॥
विशेषमपरश्चाशु शृणु रक्तप्रभेदनम् ।
पलाशक्षारतोयेन सर्पिः सिद्धं पिबेच्च सा ॥ ५० ॥
सक्षारं त्र्यूषणं सर्पिः प्रपिबेदस्रगुल्मिनी ।
यस्मिन्न च रसक्षीरतोयसाध्यरसादिषु ॥ ५१ ॥
फेनोद्गारस्यानिष्पत्तिर्मिष्टदुग्धसमाकृतेः ।
स एव तस्य पाकस्य कालो नेतरलक्षणः ॥ ५२ ॥

इत्येकत्रिंशो गुल्माधिकारः समाप्तः ॥ ३१ ॥

अथ द्वात्रिंशः प्लीहयकृदधिकारः ॥ ३२ ॥

तत्र प्लीह्नः शरीरावयवविशेषस्य स्वरूपमाह—

शोणिताज्जायते प्लीहा वामतो हृदयादधः ।
रक्तवाहिशिराणां स मूलं ख्यातो महर्षिभिः ॥ १ ॥

अथ प्लीहरोगस्य निदानसम्प्राप्तिपूर्वकं लक्षणमाह—

विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक्कफश्च ।